ङ

विधिविवेकः

सम्पादकः

डा० महाप्रभुलालगोस्वामी

VIDHIVIVEKA

OF

ŚRĪ MAṆḌANA MIŚRA

With the Comentary

NYĀYAKANIKĀ

OF

VĀCHASPATI MIŚRA

Edited with Detailed Introduction

BY

Dr. MAHAPRABHU LAL GOSWAMI
Acārya (Nyāya, Vyākaraṇa; Sāhitya, Vedānta) Mimāṃasā Śāstrī,
M.A., Ph.D., D.Ltt

TARA PRINTING WORKS
VARANASI
1984.

श्रीमण्डनमिश्रविरचितः

विधिविवेकः

श्रीवाचस्पतिमिश्रप्रणीतः

न्यायकणिकासहितः

सम्पादको विस्तृतभूमिकालेखकश्च

न्याय-व्याकरण-वेदान्त-साहित्याचार्यः मामासाशास्त्री,

एम्० ए०, पी-एच्० डी०, डी० लिट्०

तारा प्रिंटिंग वर्क्स

वाराणसी

१९८४ तमः ख्रिष्टाब्दः]   [२०४१ तमो वैक्रमाब्दः

प्रकाशक:
तारा प्रिंटिंग वर्क्स
कमच्छा
वाराणसी २२१०१०.

प्राप्तिस्थानम्
तारा बुक एजेंसी
कमच्छा, वाराणसी

प्रथमसंस्करणम्
मूल्यम् : ४०.००

मुद्रक:
तारा प्रिंटिंग वर्क्स
कमच्छा, वाराणसी

सम्पादकीयम्

विदितमेवैतद्विश्वेषामपि विदुषाम्, यत् संस्कृतसाहित्ये आचार्यमण्डनस्य कीदृशं महत्त्वम् । शङ्करावतारभूतस्याचार्यशङ्करस्यापि अद्वैतवेदान्तप्रतिष्ठापने यदि कस्याप्याचार्यस्यापेक्षा ऐतिह्यालोचकानां भवति तर्हि भारतीमण्डितस्य मण्डनस्यैव । शङ्करस्य उपनिषन्मूला वृद्धतमा भारती तावद्विगतबला यावन्मण्डनस्य भारत्याः च हस्तावलम्बनपरा न भवति । भारतीशून्यमण्डनभारतीविभूषितैव भारते शङ्करभारती भातीति प्राचीनैतिह्यप्रचारः ।

स्मरणातीतयुगात् भारते दार्शनिकज्ञानस्य मेध्याग्निः प्रज्वलति । खीष्टीयाष्टमशतके दर्शनराज्यस्य गाम्भीर्य्ये उच्चतायां व्यापकत्वे च हिमालयसदृशः भारतीयः भारतीमण्डितः मण्डननामा पण्डितमण्डलीमण्डनभूतः कश्चित्पण्डितः आसीत् । कर्ममीमांसकोऽसौ मण्डनमिश्रः शङ्कराचार्येण सह शास्त्रविचारणायां पराजितः सन्न्यासग्रहणपूर्वकं सुरेश्वराचार्याख्यां जगाम । किन्तु, मण्डनसुरेश्वरौ भिन्नौ, नासीत्तयोर्भेदः इति विचारः इदानीमपि दोलायमानः वर्तते ।

पूज्यमहामहोपाध्यायडाक्टरश्रीयोगेन्द्रनाथवागचीशास्त्रिपादाः महामहोपाध्यायकुप्पुस्वामिशास्त्रिपादाः, प्राध्यापकश्रीहिरियण्णमहोदयाः, प्राध्यापकश्रीशतकरीमुखोपाध्यायपादाः अन्ये च केचन मण्डनसुरेश्वरयोरैक्यं न स्वीकुर्वन्ति, यतः, विश्वरूपस्यैव सुरेश्वरत्वात् । अपरत्र माधवीयशङ्करदिग्विजयस्य प्रामाण्यमवलंब्य मण्डनसुरेश्वरयोरैक्यमिति महामहोपाध्यायपण्डितप्रवरानन्तकृष्णशास्त्रिमहोदयाः अन्ये च तदनुयायिनः समामनन्ति ।

नात्र कापि विप्रतिपत्तिर्यत् आचार्यसुरेश्वरः शङ्कराचार्यस्यान्यतमशिष्य आसीत् । साक्षात् शिष्य इति तस्य समसामयिकत्वेऽपि नास्ति सन्देहावसरः । खृष्टीयाष्टमशतके उभयोः स्थितिरित्यपि निश्चप्रचं वचः । वैयक्तिकदृष्ट्या शङ्कराचार्यस्य कालविषये वर्तते मतभेदः, परं न युक्तिसह इत्यूहापोहकुशलैः नैव गण्यतेऽसौ मतभेदः । आचार्यशङ्करेण धर्मस्थितिहेतवे भारतस्य पश्चिमप्रान्ते द्वारकायां शारदापीठस्य पूर्वप्रान्ते जगन्नाथे गोवर्द्धनपीठस्य उत्तरप्रान्ते बदरीक्षेत्रे ज्योतिष्पीठस्य दक्षिणप्रान्ते च शृङ्गेरीपीठस्य स्थापना कृता । मठाम्नायाख्ये ग्रन्थे एतेषां पीठानां विशिष्टं विरणमुपलभ्यते—

धर्मस्य पद्धतिस्त्वेषां जगतः स्थितिहेतवे ।
सर्ववर्णाश्रमाणां हि यथाशास्त्रं विधीयते ॥ (म० आ० २४)

पीठेषु च श्रौतपरायणस्य जितेन्द्रियस्य, वेदवेदाङ्गादिपारगस्य सकलशास्त्र-प्रयोगकुलस्य विदुषः अभिषेको भविष्यतीति—

शुचिर्जितेन्द्रियो वेदवेदाङ्गादिविशारदः।
योगज्ञः सर्वशास्त्राणामस्मदास्थानमाप्नुयात् ॥
अन्यथारूढपीठोऽपि निग्रहार्हो मनीषिणाम् ॥ (म० आ० ९-१०)

भगवान् शङ्करः भारतस्याखण्डतार्थं तत्कल्याणार्थञ्चैतत्सर्वमनुष्ठितवान्। सत्यमेतद्यत् ऐतिहासिकानुसंधानं नैतस्य मुखबन्धस्योद्देश्यम्, किन्तु संक्षेपेण किमपि वक्तव्यमेव। अस्मद्दृष्टिरपि मण्डनमिश्रः सुरेश्वरश्च भिन्नावेवेति मतमनुवर्तते। शङ्करदिग्विजये कर्ममीमांसकमण्डनमिश्र एव पराजितः सन् कषायवस्त्रं दधार। किन्तु ब्रह्मसिद्धिकारो मण्डनः कर्ममीमांसको नास्ति अपि तु ब्रह्मवादी वेदान्ती, परन्तु आचार्यशङ्करसिद्धान्तेन सुरेश्वरसिद्धान्तेन च महत्पार्थक्यं मण्डनसिद्धान्तस्य वर्तते। मण्डनस्य ब्रह्मवादे स्फोटवादस्य प्रचुरप्रभावोऽवलोक्यते, अतः शब्दब्रह्मवादी असौ मण्डनमिश्रः वस्तुतः कर्ममीमांसको नास्ति। ब्रह्मसिद्धिकारः स्वतन्त्राद्वैतवेदान्ती ब्रह्मसिद्धिं निर्माय पराजितः शङ्करशिष्यः सुरेश्वराचार्यः सन् शङ्करसिद्धान्तं गृहीतवान्।

शङ्करदिग्विजयानुसारेण मण्डनः कुमारिलभट्टस्य छात्रः, मीमांसादर्शने असाधारणवैदुष्यसम्पन्नमाहिष्मत्यां निवसति स्म। कुमारिलभट्टेन सह शङ्करस्य साक्षात्कारः प्रयागे भवति। तत्रैव मण्डनमिश्रेण सह विचारार्थं शङ्करं प्रेरयामास। उभयोर्विचारयुद्धे माध्यस्थ्यमुभयभारती मण्डनपत्नी चकार। विचारे पराजितः मण्डनः तच्छिष्यत्वं स्वीचकार इत्येवाधारभूतः मण्डनसुरेश्वरयोरैक्ये। किन्तु, विचारेण सिद्धान्तदृष्ट्योभयोः पार्थक्यमेवेति।

अनन्तकृष्णशास्त्रिभिस्तु मण्डनमिश्रमतस्य शङ्करसुरेश्वरानुसारित्वं प्रदर्शयद्भिः यदुक्तं तत्संक्षेपेण तद्वचसैवोच्यते—

"स्फोटवादः भगवत्पादानामद्वैतमताविरोधीति व्यवस्था मण्डनमिश्रस्य हरिकारिकासिद्धान्तमनुसृत्य, स्फोटस्यैव चैतन्यरूपत्वमपि अङ्गीकृत्य। अयं प्रकारो जयन्तभट्टेनाप्यनुक्रियते इति मण्डनमिश्रो नाद्वैतविरुद्धं कुत्रापि किमपि निबन्धमन्य इव निबध्नाति, स्फोटसिद्धेरप्यत्रैव तात्पर्यमिति ब्रह्मसिद्धेराशयः। सति चैवमिष्टसिद्धिकाराणाम् "तस्मादद्वैतमेव सिध्यति, न शब्दाद्वैतम् घटाद्वैतं वा" इति स्फोटब्रह्मवादनिरसनं न स्फोटसिद्धेर्निरसनम्, न वा ब्रह्मसिद्धेर्मङ्गलश्लोकगताक्षरपदस्य स्फोटवादसमर्थनपरतयाऽपि विवरणस्य। किन्तु अन्ते शास्त्रिणोक्तं यत् "स्फोटवादोऽप्यद्वैतस्य प्रस्थानान्तरमिति" एतत्कथनेनैव स्फोटाद्वैतवादः न शङ्करसम्मतः।

कुप्पुस्वामिपादैरुक्तं यत् "ज्ञानकर्मसमुच्चयो मण्डनेन विवक्ष्यते, ज्ञानकर्मसमुच्चयस्तु भगवत्पादैर्निरस्यते" इति भगवत्पादविरुद्धं मण्डनोऽत्र निबध्नाति[1] इति प्रतिभाति।

अत्रापि कर्मणा सह श्रवणाद्यनुष्ठाने क्षिप्रं मुक्तिसिद्धिः, विना कर्म श्रवणादिकं तु चिरेण मोक्षोपयोगीति ब्रह्मसिद्धिप्रस्थानमेव विशदं प्रतीयते। किन्तु एतत्स्वीकारे मण्डनमतस्यैव विवेचनमाचार्यशङ्करः करोति, नास्ति तस्याद्वैतवेदान्ते वैशिष्ट्यम्, इति मण्डनपृष्ठसेवी शङ्करभगवत्पाद इत्यापतति।

शास्त्रिपादाः स्वीयभूमिकायाम् "विपरीतख्यातिरियमनिर्वचनीयख्यातितो न विवेक्तुं शक्यते"[2] तथापि भाट्टमतमेव मण्डनः समर्थयति। व्यवहारे भाट्टनय एवाद्वैतिनां शरणमिति मत्वा लिखन्ति अत्राप्यनन्तकृष्णशास्त्रिमहोदयाः।

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते रूपं किञ्चित् कैश्चित् महात्मनः॥

इति भाट्टाः मन्वानाः नियतसदसत्ख्यातिवादिनः सांख्या इव नान्यथाख्यादिवादिनः, न वा विपरीतख्यातिवादिनः। भाट्टाः नियतसदसत्ख्यातिवादिनः, आर्हतास्त्वनियतसदसत्ख्यातिवादिनः।

न च व्यवहारे भाट्टनय इत्येकान्तो मण्डनस्येति विधिविवेकः, ब्रह्मसिद्धेर्नियोगकाण्डश्च न केवलं प्राभाकरम्, किन्तु भट्टपादमपि वेदान्तविचारावसरेऽपीष्टसाधनत्वविध्यर्थतावादस्वीकारेण निरस्यति। अत्र शास्त्रिपादाः "मण्डनस्य विपरीतख्यातिरियं नान्यथाख्यातिः। अन्यथाख्यातिपदेनानिर्वचनीयख्यातिं व्यपदिशति। तात्पर्यं तु मण्डनस्यानिर्वचनीयख्यातावेव"[3]।

मण्डनमिश्रः अख्यातिवादं निरस्यान्यथाख्यातिवादमुक्तवान्, अर्थात् सकलज्ञानस्य समीचीनत्वखण्डनपूर्वकं भ्रमज्ञानं स्वीकृतवान्। एतत्तु सत्यं यत् भ्रमज्ञानसमर्थने एव मण्डनस्य तात्पर्यं न तु नैयायिकमतसिद्धान्यथाख्यातिसमर्थने। ब्रह्मसिद्धौ तर्ककाण्डस्य—

प्रतिष्ठितं च विज्ञानमर्थमात्रावलम्बनम्।
भेदेषु त्वप्रतिष्ठत्वमस्तीन्द्रियधियामपि॥ ३१॥

इत्यनया कारिकया भेदमात्रस्य मिथ्यात्वं साधयति, भेदमात्रस्य मिथ्यात्वं संसाध्य जीवब्रह्मणोरैक्यं समर्थयति। नैयायिकमतसिद्धसत्ख्यातिविशेषान्यथाख्यातिसमर्थने उन्मत्तप्रलपितत्वं तस्य भवेत्। एतावता एतदेव सिद्धयति यदयं

१—ब्र० भू० पृ० XXXIV

२—पृ० २७—५।

३—ब्र० भू० पृ० ७९।

पीठेषु च श्रौतपरायणस्य जितेन्द्रियस्य, वेदवेदाङ्गादिपारगस्य सकलशास्त्र-प्रयोगकुलस्य विदुषः अभिषेको भविष्यतीति—

शुचिर्जितेन्द्रियो वेदवेदाङ्गादिविशारदः ।
योगज्ञः सर्वशास्त्राणामस्मदास्थानमाप्नुयात् ॥
अन्यथारूढपीठोऽपि निग्रहार्हो मनीषिणाम् ॥ (म० आ० ९-१०)

भगवान् शङ्करः भारतस्याखण्डतार्थं तत्कल्याणार्थञ्चैतत्सर्वमनुष्ठितवान् । सत्यमेतद्यत् ऐतिहासिकानुसंधानं नैतस्य मुखबन्धस्योद्देश्यम्, किन्तु संक्षेपेण किमपि वक्तव्यमेव । अस्मद्दृष्टिरपि मण्डनमिश्रः सुरेश्वरश्च भिन्नावेवेति मतमनुवर्तते । शङ्करदिग्विजये कर्ममीमांसकमण्डनमिश्र एव पराजितः सन् कषायवस्त्रं दधार । किन्तु ब्रह्मसिद्धिकारो मण्डनः कर्ममीमांसको नास्ति अपि तु ब्रह्मवादी वेदान्ती, परन्तु आचार्यशङ्करसिद्धान्तेन सुरेश्वरसिद्धान्तेन च महत्पार्थक्यं मण्डनसिद्धान्तस्य वर्तते । मण्डनस्य ब्रह्मवादे स्फोटवादस्य प्रचुरप्रभावोऽवलोक्यते, अतः शब्दब्रह्मवादी असौ मण्डनमिश्रः वस्तुतः कर्ममीमांसको नास्ति । ब्रह्मसिद्धिकारः स्वतन्त्राद्वैतवेदान्ती ब्रह्मसिद्धिं निर्माय पराजितः शङ्करशिष्यः सुरेश्वराचार्यः सन् शङ्करसिद्धान्तं गृहीतवान् ।

शङ्करदिग्विजयानुसारेण मण्डनः कुमारिलभट्टस्य छात्रः, मीमांसादर्शने असाधारणवैदुष्यसम्पन्नमाहिष्मत्यां निवसति स्म । कुमारिलभट्टेन सह शङ्करस्य साक्षात्कारः प्रयागे भवति । तत्रैव मण्डनमिश्रेण सह विचारार्थं शङ्करं प्रेरयामास । उभयोर्विचारयुद्धे माध्यस्थ्यमुभयभारती मण्डनपत्नी चकार । विचारे पराजितः मण्डनः तच्छिष्यत्वं स्वीचकार इत्येवाधारभूतः मण्डनसुरेश्वरयोरैक्ये । किन्तु, विचारेण सिद्धान्तदृष्ट्योभयोः पार्थक्यमेवेति ।

अनन्तकृष्णशास्त्रिभिस्तु मण्डनमिश्रमतस्य शङ्करसुरेश्वरानुसारित्वं प्रदर्शयद्भिः यदुक्तं तत्संक्षेपेण तद्वचसैवोच्यते—

"स्फोटवादः भगवत्पादानामद्वैतमताविरोधीति व्यवस्था मण्डनमिश्रस्य हरिकारिकासिद्धान्तमनुसृत्य, स्फोटस्यैव चैतन्यरूपत्वमपि अङ्गीकृत्य । अयं प्रकारो जयन्तभट्टेनाप्यनुक्रियते इति मण्डनमिश्रो नाद्वैतविरुद्धं कुत्रापि किमपि निबन्धमन्य इव निबध्नाति, स्फोटसिद्धेरप्यत्रैव तात्पर्यमिति ब्रह्मसिद्धेराशयः । सति चैवमिष्टसिद्धिकाराणाम् "तस्मादद्वैतमेव सिध्यति, न शब्दाद्वैतम् घटाद्वैतं वा" इति स्फोटब्रह्मवादनिरसनं न स्फोटसिद्धेर्निरसनम्, न वा ब्रह्मसिद्धेर्मङ्गलश्लोकगताक्षरपदस्य स्फोटवादसमर्थनपरतयाऽपि विवरणस्य । किन्तु अन्ते शास्त्रिणोक्तं यत् "स्फोटवादोऽप्यद्वैतस्य प्रस्थानान्तरमिति" एतत्कथनेनैव स्फोटाद्वैतवादः न शङ्करसम्मतः ।

कुप्पुस्वामिपादैरुक्तं यत् "ज्ञानकर्मसमुच्चयो मण्डनेन विवक्ष्यते, ज्ञानकर्मसमुच्चयस्तु भगवत्पादैर्निरस्यते" इति भगवत्पादविरुद्धं मण्डनोऽत्र निबध्नाति'[1] इति प्रतिभाति।

अत्रापि कर्मणा सह श्रवणाद्यनुष्ठाने क्षिप्रं मुक्तिसिद्धिः, विना कर्म श्रवणादिकं तु चिरेण मोक्षोपयोगीति ब्रह्मसिद्धिप्रस्थानमेव विशदं प्रतीयते। किन्तु एतत्स्वीकारे मण्डनमतस्यैव विवेचनमाचार्यशङ्करः करोति, नास्ति तस्याद्वैतवेदान्ते वैशिष्ट्यम्, इति मण्डनपृष्ठसेवी शङ्करभगवत्पाद इत्यापतति।

शास्त्रिपादाः स्वीयभूमिकायाम् "विपरीतख्यातिरियमनिर्वचनीयख्यातितो न विवेक्तुं शक्यते"[2] तथापि भाट्टमतमेव मण्डनः समर्थयति। व्यवहारे भाट्टनय एवाद्वैतिनां शरणमिति मत्वा लिखन्ति अत्राप्यनन्तकृष्णशास्त्रिमहोदयाः।

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते रूपं किञ्चित् कैश्चित् महात्मनः॥

इति भाट्टाः मन्वानाः नियतसदसत्ख्यातिवादिनः सांख्या इव नान्यथाख्यादिवादिनः, न वा विपरीतख्यातिवादिनः। भाट्टाः नियतसदसत्ख्यातिवादिनः, आर्हतास्त्वनियतसदसत्ख्यातिवादिनः।

न च व्यवहारे भाट्टनय इत्येकान्तो मण्डनस्येति विधिविवेकः, ब्रह्मसिद्धेर्नियोगकाण्डश्च न केवलं प्राभाकरम्, किन्तु भट्टपादमपि वेदान्तविचारावसरेऽपीष्टसाधनत्वविध्यर्थतावादस्वीकारेण निरस्यति। अत्र शास्त्रिपादाः "मण्डनस्य विपरीतख्यातिरियं नान्यथाख्यातिः। अन्यथाख्यातिपदेनानिर्वचनीयख्यातिं व्यपदिशति। तात्पर्यं तु मण्डनस्यानिर्वचनीयख्याताविव"[3]।

मण्डनमिश्रः अख्यातिवादं निरस्यान्यथाख्यातिवादमुक्तवान्, अर्थात् सकलज्ञानस्य समीचीनत्वखण्डनपूर्वकं भ्रमज्ञानं स्वीकृतवान्। एतत्तु सत्यं यत् भ्रमज्ञानसमर्थने एव मण्डनस्य तात्पर्यं न तु नैयायिकमतसिद्धान्यथाख्यातिसमर्थने। ब्रह्मसिद्धौ तर्ककाण्डस्य—

प्रतिष्ठितं च विज्ञानमर्थमात्रावलम्बनम्।
भेदेषु त्वप्रतिष्ठत्वमस्तीन्द्रियधियामपि॥ ३१॥

इत्यनया कारिकया भेदमात्रस्य मिथ्यात्वं साधयति, भेदमात्रस्य मिथ्यात्वं संसाध्य जीवब्रह्मणोरैक्यं समर्थयति। नैयायिकमतसिद्धसत्ख्यातिविशेषान्यथाख्यातिसमर्थने उन्मत्तप्रलपितत्वं तस्य भवेत्। एतावता एतदेव सिद्ध्यति यदयं

१—ब्र० भू० पृ० XXXIV

२—पृ० २७—५।

३—ब्र० भू० पृ० ७९।

मण्डनः न द्वैती। आचार्यशङ्करोपि "सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिरति" इति कथयति किन्तु, नैतावता उभयोरेकविधमेवाद्वैतमपि तु मण्डनस्याद्वैतवादः भर्तृहरिसमर्थितः न शाङ्कराद्वैतवादः।

सर्वज्ञात्ममुनिः जीवन्मुक्तविषये स्थितप्रज्ञविषये वा मण्डनवचः प्रस्थानान्तरमिति प्रतिपादयति—"तद्ध्यन्यथा प्रस्थितम्" इति विश्ववेदव्याख्यायामपि "मण्डनमिश्रस्य तु प्रस्थानान्तरत्वात् तदीयं वचो यथाश्रुतमेवास्तु"[1]। वेदानन्दव्याख्यायामपि "अयमेव न्यायो वार्तिकादिषु नेतव्यः परिहृत्य मण्डनवचः; तस्यान्यथा प्रस्थितत्वात्। सुरेश्ववार्त्तिकेऽपि "अन्ये तु पण्डितमन्याः" इति कथनेन सिद्धान्तभेदमूलकमनैक्यमेव।

"तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः"

इति श्रुतिव्याख्याप्रसङ्गे भर्तृप्रपञ्चमतमुपन्यस्य तन्निरासानन्तरम्—

"अन्ये तु पण्डितमन्याः सम्प्रदायानुसारतः।
विज्ञायेति वचः श्रौतमिदं व्याचक्षतेऽन्यथा॥
तत्त्वमस्यादिवाक्योत्थविज्ञानेन यथोदितम्।
विज्ञायेति वस्त्वसंसर्गिप्रज्ञां कुर्वीत यत्नतः॥"

(पृ० १८५२–७२६)

इत्यत्र आनन्दगिरिणोक्तं यत् मण्डनमतमुत्थाप्य वार्त्तिके तन्मतं निरस्यति इति मण्डनसुरेश्वरयोः सिद्धान्तभेदः वर्तते। यद्यपि अनन्तशास्त्रिमहोदयः एतस्य अन्यथा समर्थनं प्रदर्शयति तथापि तत्र स्फुटार्थप्रतिपादकस्य वचनस्यान्यथोन्नयनं तदाग्रहमेव सूचयति।

शास्त्रिपादास्तु कथयन्ति—"तत्र प्रभाकरमण्डन-ब्रह्मदत्त-भर्तृप्रपञ्च-सुरेश्वर-कुमारिलानां सर्वेषां परस्परं भगवत्पादकालिकानाम्, भगवत्पादानां च प्रभाकरेण साकं वादः कश्चनासीत्, यत्र मण्डन-ब्रह्मदत्त-भर्तृप्रपञ्च-वार्तिककारा एकमता आसन्।

अतो ज्ञायते—प्रभाकरोऽपि पराजितोऽद्वैतसिद्धान्तं कर्मसंन्याससाधुतापक्षमपि स्वीकरोति स्मेति[2]।

न्यायरत्नदीपावल्यां मण्डनविश्वरूपयोर्भेदः सुरेश्वरविश्वरूपयोश्चैक्यं प्रत्यपीपदत्। आनन्दगिरिप्रणीतशङ्करदिग्विजये मण्डनस्य संन्यासग्रहणचर्चा न वर्तते। आनन्दगिरिकृतशङ्करविजये विश्वरूपोऽपरः सुरेश्वरः। विश्वरूप एव मण्डन इति माधवीये सप्तमाध्याये (श्लोकसंख्या–११३–११८)।

---

१. पृ० ५५० ९० ३३।

२. ब्र० भू० पृ० ११०।

गुरुवंशकाव्यमपि शृङ्गगिर्यास्थानपण्डितरचितम्—गृहावस्थायां विश्वरूप एव संन्यासावस्थायां सुरेश्वर इति सिद्धान्तं पोषयति। केचित्तु मण्डन एव विश्वरूप इति वदन्ति। अनन्तानन्दशङ्करविजये विश्वरूप एव सुरेश्वरः निर्दिष्टः।

म० म० अनन्तकृष्णशास्त्रिमहोदयानां विश्लेषणेन एतदवगम्यते यत् मण्डनः विश्वरूपश्च एक एवासावेव संन्यासानन्तरं सुरेश्वराख्यां जगाम।

"भारतीय शास्त्र ओ साहित्ये अद्वैतवाद" इत्याख्ये म० म० डा० श्री योगेन्द्रनाथबागचीमहोदयग्रन्थे—शारदामठस्य मठाधीशः विश्वरूपाचार्यः भगवतः शङ्करस्य शिष्य आसीत्। अयं विश्वरूपाचार्यः याज्ञवल्क्यस्मृतेः बालक्रीडानाम्नीं टीकां व्यरचयत्। मिताक्षरायां विज्ञानेश्वरेण लिखितम्—"याज्ञवल्क्यमुनिभाषितं मुहुर्विश्वरूपविकटोक्तिविस्तृतम्"। अयमेव विश्वरूपाचार्यः बृहदारण्यकभाष्यवार्त्तिकमरचयत्। सुरेश्वराचार्यरचितत्वेनैतस्य वार्त्तिकस्य प्रसिद्धिर्वर्तते। सुरेश्वराचार्यश्च विश्वरूपाचार्यः। विद्यारण्यविरचिते—"विवरणप्रमेयसंग्रहे" सुरेश्वराचार्यप्रणीतवार्त्तिकश्लोकस्य विश्वरूपाचार्यप्रणीतत्वेनोद्धारः वर्तते—

आम्रे फलार्थ इत्यादि ह्यापस्तम्बस्मृतेर्वचः।
फलवत्त्वं समाचष्टे नित्यानामपि कर्मणाम्॥

बृ० वा० पृ० १।१।९७

इदं वाक्यं नित्यवाक्यविषयत्वेन वार्त्तिके विश्वरूपाचार्य उदाजहार। (पराशरमाधवीयभाष्यम् Vol. 1 Part I P. 57) ब्रह्मानन्दभारतीकृते "पुरुषार्थप्रबोधे" नैष्कर्म्यसिद्धिग्रन्थस्य प्रणेता सुरेश्वर एव विश्वरूपाचार्य इत्युक्तम्—

इत्येवं नैष्कर्म्यसिद्धौ ब्रह्मांशैर्ब्रह्मवित्तमैः!
श्रीमद्भिर्विश्वरूपाद्यैराचार्यैः करुणार्णवैः॥

पी० पी० काणेमहाशयः स्वरचिते "History of Dharmashastra" इत्याख्ये ग्रन्थे विश्वरूपाचार्यविरचितबालक्रीडायाः वाक्यान्युद्धृत्य भगवतः शङ्कराचार्यस्यानुयायित्वमसाधयत्। अपवर्गार्थं हि पारिव्राज्यं ज्ञानैकसाधनं न तत्र कर्मणां प्रयोजनमित्युक्तमेव।

तत्त्वाग्रहणात्मकेनाविद्योत्थत्वात्प्रपञ्चस्य एवमादिचोद्यानवकाश एव।
तत्त्वेन ब्रह्मणो नान्यद् वस्त्वन्तरमस्तीति ब्रह्मविदां स्थितिः॥

(या० स्मृ० ६६ श्लो०)

आचार्यः सुरेश्वरः "नैष्कर्म्यसिद्धौ" सर्वथा शाङ्करसिद्धान्तमनुसरति। किन्तु, मण्डनमिश्रः "ब्रह्मसिद्धौ" न शाङ्करसिद्धान्तमनुसरति न वा नैष्कर्म्यसिद्धौ प्रतिपादितमनुवदति, अतः मण्डनः सुरेश्वरादभिन्नो नास्ति। न्यायकन्द-

लीटीकायां[1] श्रीधराचार्य: मण्डनमिश्रविरचिता ब्रह्मसिद्धिरिति, एवमेव चित्सुखाचार्यः तत्त्वप्रदीपिकायामपि[2] तथैव कथयति। कुत्रापि सुरेश्वरविरचिता ब्रह्मसिद्धिरिति न प्रतिपादयति। नैष्कर्म्यसिद्धिः, वार्त्तिकम् वा मण्डनस्य इति न कोऽपि आचार्यः स्वीकरोति तस्मादुभयोर्भेदः स्वाभाविकः। संक्षेपशारीरके २।१७४ कारिकायां परिहृत्य मण्डनवचः इति कथयति। एवमेव विद्यारण्यः विवरणप्रमेयसंग्रहे विश्वरूपाचार्यस्य चर्चां करोति, अतः विश्वरूप एव मण्डनः।

प्राध्यापकहिरियण्णामहोदयः स्वकीयनिबन्धे[3] उभयोः पार्थक्यमेव प्रमाणयति। तत्र दार्शनिकसिद्धान्तभेदमवलंब्य श्रृङ्गेरीमठाध्यक्षाणां विवरणमनुसृत्य च उभयोः भेदं साधु संसाधयति। अनन्तरं म० म० कुप्पुस्वामिशास्त्रिमहोदयोऽपि ब्रह्मसिद्धिभूमिकायां[4] भेदमेव साधयति।

मण्डनमिश्रस्य शब्दब्रह्मवादः

मण्डनमिश्रः आसीदद्वैतवेदान्ती किन्तु तदीयाद्वैतवादः न ब्रह्माद्वयवादोऽपि तु भर्तृहरिसम्मतः शब्दब्रह्माद्वयवादः। स्फोटवादस्य समर्थनार्थं 'स्फोटसिद्धिः' इत्याख्यं ग्रन्थमपि व्यरचयत्। विमुक्तात्मयतिः इष्टसिद्धिग्रन्थे सुरेश्वराचार्यमतमनुसृत्य ब्रह्माद्वैतवादः एव प्रकृताद्वैतवादः न शब्दाद्वैतवादः[5] इति समर्थयति। एतेनापि ज्ञायते मण्डनमिश्रः न सुरेश्वरादभिन्नः।

---

१. न्या० पृ० २१८।

२. तत्त्व० पृ० १४०।

3. **Journal of Asiatic Society, April 1923, January 1924.**

4. A careful study of Maṇḍana Miśra's Brahmasiddhi in comparison with his other known works, all of which are now available in print, and with the known works of Sureśvara and Śamkara ......and a careful consideration of the references to Maṇḍana contained in certaion important works of Mīmānasā, Nyāya, Dvaitavedānta and other systems have made it possible to assemble here several data of overwhelming cumulative weight, which would be quite sufficient to kill the common beli f in the Maṇḍana-Sureśvara equation, and to exihibit Maṇḍana and Sureśvara as two different individuals, maintaining strikingly divergent views within the purviews of Advaitism.

(Introduction P. X X VI)

५. तस्मादात्माद्वैतमेव सिद्ध्यति, शब्दाद्वैतं घटाद्वैतं वा। (इष्टसि० पृ० १७६)

मण्डनमिश्रस्वीकृतस्य भावाद्वैतवादस्य खण्डनं सुरेश्वराचार्यः बृहदारण्यक-वार्त्तिके युक्तिभिः करोति। एवम् अद्वैतसिद्धौ आचार्यः मधुसूदनोऽपि भावाद्वैत-वादस्य यौक्तिकत्वं प्रतिपाद्यापि खण्डनं करोति। "वस्तुतस्तु अविद्यानिवृत्तेः पञ्चमप्रकारत्वं भावाद्वैतञ्चाभ्युपगमपराहतम्" (अ० सि० पृ० ४६७) एतदपि उभयोः पार्थक्यं समर्थयति।

मण्डनमिश्रस्य चिन्तायां स्वातंत्र्यं वर्तते। शाङ्करभाष्यस्यैकापि पंक्ति-र्नैवोद्धृता तेन। एतेन च ज्ञायते असावासीत् वस्तुतः शङ्करप्रतिद्वन्द्वी सन्नपि अद्वैतवेदान्ती। मण्डनसिद्धान्तस्य अवतारणा प्रकरणपञ्चिकायाम् न्याय-मञ्जर्य्याञ्च द्रष्टव्या। अतः उभयोरभिन्नत्वे प्रमाणं नोपलभ्यते।

मण्डनमिश्ररचिताः ग्रन्थाः—

१. विधिविवेकः।
२. भावनाविवेकः।
३. विभ्रमविवेकः।
४. मीमांसानुक्रमणिका।
५. ब्रह्मसिद्धिः।
६. स्फोटसिद्धिः।

मण्डनसुरेश्वरप्रस्थानयोः सिद्धान्तभेदः—

मण्डनमिश्रप्रस्थानम्	सुरेश्वरप्रस्थानम्
१—मण्डनमिश्रः स्फोटवादं स्वीकृत्य शब्दब्रह्मवादस्य समर्थनं कृतवान्।	१—शङ्कराचार्यः सुरेश्वराचार्यश्च स्फोटवादं नैव स्वीकुरुतः। ब्रह्माद्वैतवादमङ्गीकृत्य शब्दब्रह्म-वादस्य स्फोटवादस्य च खण्डनं कुरुतः।
२—मण्डनमिश्रस्य भावाद्वैतवादः तन्मते ब्रह्मव्यतिरिक्तोऽपरो भाव-पदार्थः नास्ति। सत्यपि ब्रह्मज्ञाने प्रपञ्चस्य अविद्यायाश्च अभावस्या-स्तित्वं तत्कालेऽपि वर्तते एव। विज्ञानात्मनो ब्रह्मणोऽस्थूल-त्वादिरिव दुःखाभावोप्युपाधिवि-शेषः इति ब्रह्मणोऽभावरूपत्वम्, इति तद्व्यतिरेकेण भावरूपद्वैता-भावः एवाद्वैतवादः इति भावाद्वैत-मतम्।	२—शङ्करस्य सुरेश्वरस्य च मते अवि-द्यानिवृत्तिः ब्रह्मस्वरूपा ब्रह्मव्य-तिरिक्तः न भावपदार्थः नाभाव-पदार्थः तिष्ठति। ब्रह्माद्वैतवाद एव वर्तते।

३—मण्डनमते अविद्यायाः आश्रयः जीवः विषयः ब्रह्म। वाचस्पतिरपि मण्डनमिश्रमतमेव स्वीकरोति।	३—शङ्करसुरेश्वरयोर्मते आश्रयविषयौ ब्रह्म एव। पद्मपादः प्रकाशात्मयतिरपि एतन्मतमेव स्वीकरोति।
४—मण्डनमते अग्रहणान्यथाग्रहणभेदेन अविद्यायाः द्वैविध्यम्।	४—सुरेश्वराचार्यः वार्त्तिके एतन्मतस्य खण्डनं करोति।
५—भ्रमज्ञानव्याख्यायामयं भट्टसम्मतां विपरीतख्यातिं समर्थयति।	५—सुरेश्वरः विपरीतख्यातिं नैव स्वीकरोति।
६—वेदान्तश्रवणजन्यं ज्ञानं परोक्षात्मकम्, शब्दजन्यं ज्ञानं प्रत्यक्षात्मकं न भवति, मनननिदिध्यासनानन्तरं मनसा प्रत्यक्षात्मकं ब्रह्मज्ञानं जायते।	६—एतन्मते शब्दजन्यमपरोक्षात्मकं ज्ञानं जायते।
७—मण्डनः प्रतिबिम्बवादी।	७—सुरेश्वरः आभासवादी
८—मण्डनमते दृष्टिसृष्टिवादः।	८—सुरेश्वरमते जगतः व्यावहारिकसत्यत्वम्।
९—जीववन्मुक्तिर्नास्ति।	९—जीवन्मुक्तिर्वर्तते।

विधिस्वरूपे विभिन्नदार्शनिकदृष्टिः

"स्वर्गकामोऽश्वमेधेन यजेत" इत्यादिवाक्यस्थं यजेत इति पदं लिङ्बोधकप्रत्ययघटितम्। यज्धातोः लिङ्प्रत्यये सति यजेत इति। अत्र यज+इत यजेत इत्यत्र इतइति लिङर्थबोधकः प्रत्ययः। लिङ्प्रत्ययः विधिप्रत्ययः। विधिप्रत्ययस्यार्थश्चात्र आप्ताभिप्रायः। आप्ताभिप्रायो नाम वेदवक्तृपुरुषाभिप्रायः। आचार्यस्य मते आप्ताभिप्राय एव विधिप्रत्ययस्यार्थः। प्रथमतः वेदः अल्पज्ञजीवोच्चरितो न भवितुमर्हतीत्यवधारितम्। आप्ताभिप्रायार्थकविधिप्रत्ययेन यस्यायमभिप्रायोऽनुमितो भवति स एव ईश्वरः। अनुमानाकारः—(पक्षः) वैदिकविधिप्रत्ययः (साध्यम्) आप्ताभिप्रायबोधकः (हेतुः) विधिप्रत्ययत्वात्।

आचार्यः पाणिनिः विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रेण विध्यादिष्वर्थेषु लिङः विधानं करोति। प्रवर्तनात्वस्य विध्यादिषु चतुर्षु अनुस्यूतत्वात् तेन रूपेण प्रवर्तना एव लिङर्थः। प्रवृत्त्यनुकूलः व्यापारः

प्रवर्त्तना। प्रवृत्तिः शिष्यादिनिष्ठा। तदनुकूलव्यापारस्तु प्रेरणात्मकः प्रवर्तयितृगुर्वादिनिष्ठः।

प्राभाकरमते विधिप्रत्ययस्यार्थः नियोगः। नियोगशब्दः कर्तृवाच्ये घञ्प्रत्यये निष्पन्नो भवति—नियुङ्क्ते इति नियोगः। नियोगः नियोज्यं पुरुषं नियोगस्य सिद्धये नियोगविषये नियुक्तं करोति—"स्वसिद्धये नियोज्यं स्वविषये नियुञ्जानः नियोग" इति। कार्य्यम् अपूर्वम् इत्यादयः शब्दाः नियोगशब्दस्य समानार्थकाः। नियोगः स्वसिद्धये पुरुषं नियुञ्जानः नियोग इत्यभिधीयते[१]। नियोगस्य अपरं नाम कार्य्यं, कार्य्यं हि कर्तुः कृतिसाध्यमर्थात् कर्तुः कृतेरुद्देश्यम्। कृतिसाध्यत्वादेव कार्य्यमित्युच्यते। कार्य्यमेव स्वसिद्धये नियोज्यपुरुषस्य नियोगं करोतीति नियोगनाम्नाभिधीयते। अत एव "स्वसिद्धये स्वात्मनि नियुञ्जानं नियोग" इति। विधिवाक्यश्रवणानन्तरं यः पुरुषः इदं मत्कार्य्यमित्यवगच्छति स एव नियोज्यः। **स्वर्गकामो यजेत** (आपस्तम्बगौतमसू० १०।२।८) इति वाक्ये साध्यस्वर्गकामनावान् पुरुष एव स्वर्गकामः। स्वर्गकामनावान् पुरुषः तादृशकर्मण्येव नियोज्यो भवति यद्धि कार्यं स्वर्गकामनावतः पुरुषस्य काम्यस्वर्गस्य साधकं भवितुमर्हति।

काम्यस्वर्गफलाव्यवहितप्राक्काले विद्यमानं वस्तु एव स्वर्गफलस्य साधनं भवितुमर्हति। यागक्रिया च क्षणविनाशिनीति कालान्तरभाविनः स्वर्गफलस्य अव्यवहितप्राक्क्षणे न विद्यते इति यागरूपक्रिया कार्यरूपे स्वर्गकामरूपनियोज्येन सह अन्विता न स्यात्। यत् काम्यफलस्य साधनं नास्ति तादृशकार्ये कदापि स्वर्गकामः पुरुषः नियोज्यरूपेणान्वितो न भवितुमर्हति। अत एव "स्वर्गकामो यजेत" इत्यत्र यागक्रियातिरिक्तं प्रमाणान्तरावेद्यं कार्यमेव लिङादिप्रत्ययेन अभिधीयते। तादृशकार्यस्यैवाभिधायकः लिङादिविधिप्रत्ययो भवति यद्धि कार्यमेतद्वाक्यातिरिक्तेन केनापि प्रमाणेन विदितं न भवति। प्रमाणान्तरावेद्यत्वादेव अपूर्वमिदम् इति जेगीयते। कार्यस्य विषय एव करणम्। कार्यस्य स्वरूपप्रतीतौ यत् विषयरूपेण भासते तदेव कार्यस्य स्वरूपनिवर्त्तकरूपे करणरूपेण भासते। कार्यप्रतीतौ यद्धि विषयरूपेणापेक्षितं तदेव कार्योत्पत्तौ करणं भवति। कार्यं कृतिघटितशरीरम्। कृतिसाध्यमेवं कृतिं प्रति प्रधानीभूतमेव कार्यम्। ज्ञानं यथा नियतं सविषयकम् तथैव कृतिरपि नियतसविषयिका। तथा च कार्यस्य प्रतीतौ कृतेर्विषयस्यापेक्षा वर्तते। विषयमन्तरा कृतेः प्रतीतिरेव न स्यात्। उत्पत्तिक्रिया सकरणिकैव। करणं विना क्रिया न भवितुमर्हति। धात्वर्थरूपकरणेन नियोज्यपुरुषरूपः कर्ता कार्यस्योत्पादको भवति। कार्यमुत्प-

---

१. पुरुषं नियुञ्जानः नियोग इति व्यपदिश्यते।—न्यायक० पृ० ५३

द्यमानमर्थात् निर्वर्त्यम्, कार्यस्य निर्वर्तयिता नियोज्य एवं करणं धात्वर्थः। यस्य पूर्वं कार्यस्य विषयरूपेण प्रतीतिस्तस्यैव कार्यस्य उत्पत्तौ करणरूपेण प्रतीतिः। प्रथमतः नियोज्यपुरुषस्य समीपे विधिवाक्येन प्रतीतिरनन्तरं नियोज्यरूपकर्तृपुरुषेण कार्यं निर्वर्त्यं—निष्पाद्यं स्यात्।

कृतिसाध्यं वस्त्वेव कार्यं तस्मात् कृतेर्ज्ञानं विना कार्यस्य ज्ञानं न सम्भवति। यद्धि कृतिसाध्यं कृतिं प्रति प्रधानीभूतन्तदेव कार्यम्। यद्वस्तु उद्दिश्य कृतिर्जायते तदेव कृतिं प्रति प्रधानीभूतम्, नियोज्यरूपकर्तृपुरुषस्य कृतिः कार्यस्य सिद्ध्युद्देश्येन प्रवर्तते। कृतिर्हि चेतनस्य आत्मनः गुणः। चेतन एव नियोज्यो भवति। यत्र कार्ये चेतनः पुरुषः अप्रधानरूपेण प्रतीयते तदेव कार्यम्। कार्यस्य स्वरूपसिद्ध्यर्थमेव चेतनः प्रयत्नवान् भवति। कार्यं हि कृतेरुद्देश्यमिति कार्यं प्रधानम् अत्र कृतिरप्रधाना एवं कृत्याश्रयः पुरुषोऽपि अप्रधानभूतः। ज्ञानं यथा सविषयकं तथैव कृतरपि नित्यं सविषयिका। विषयमन्तरेण कृतेः स्वरूप-निरूपणं न भवितुमर्हति। कृतेः विषयः पुरुषव्यापारः—चेष्टा, यागः दानं, होमादिकम्। क्रियाविषयिणी कृतिः अपूर्वाख्यकार्यमुद्दिश्य प्रवर्तते। तथा च नियोज्यपुरुषस्य कृत्या अपूर्वं सिध्यति। यागादिविषयिणी या कृतिस्तया-कृतिसाध्यं कृतिं प्रति प्रधानीभूतमपूर्वं कार्यं जायते। कार्यं कृतिं विना न सम्भवति, कृतिश्च क्रियां विना न सम्भवति इति कृतिः क्रियाविषयिणी। तथा अनया कृतिप्रणाल्या **यजेत** इति कथिते यागविषयकं कार्यमित्यर्थोऽवगम्यते। विपूर्वकस्य बन्धनार्थक "षिञ्" धातोः अच्प्रत्यये **विषयः**। विषिण्वन्ति विष-यिणं बध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः। ज्ञानादीनां विषयः विषयिणं ज्ञानं बध्नाति। विषयनिरूपणाधीनमेव ज्ञानं निरूपणीयं भवति। घटादिविषयः स्वविषयकं ज्ञानमितरविषयकज्ञानात् व्यावर्तयति अत एव घटादिः ज्ञानस्य विषयः जायते। एवमेव कार्यमपि इतरकार्याद्व्यावर्तयति इति धात्वर्थरूपक्रिया कार्यस्य बन्धनकारिका। कृतिः क्रियाभिन्ननिरूपिता न भवति। धात्वर्थ एव क्रिया। धात्वर्थरूपक्रियाविषयककृत्या लिङर्थकार्यस्य निष्पत्तिर्भवति। यागविषयकं कार्यमित्यत्र धात्वर्थक्रिया यागलिङर्थकार्यस्य बन्धनं व्यवच्छेदकं विशेषणं वा भवतीति कार्यस्य विषयो जायते। **स्वर्गकामो यजेत** एतादृशवाक्यस्य यथा नियोज्यः स्वर्गकामनावान् पुरुषः तथैव लिङर्थ-कार्ये एव पुरुषः नियोज्यरूपेणान्वित इति कार्यरूपः लिङर्थः नियोज्यपुरुषकाम्यस्य स्वर्गस्य साधनं भवतीति। कार्यं लिङर्थं एव नियोज्यकाम्यस्य स्वर्गस्य साधनम्। तथा च लिङर्थकार्यविषयः धात्वर्थक्रिया नियोज्यपुरुषकाम्यफलस्य साधनम्।

अत्रेयमाशङ्का यत् लिङर्थः कार्यं नियोज्यपुरुषस्य यत्काम्यं फलन्तस्य साधनमत एव नियोज्यः पुरुषः लिङर्थकार्यस्य सिद्ध्यर्थं प्रवृत्तो भवति। लिङर्थः

कार्यं यदि नियोज्यपुरुषस्य यत्काम्यं फलन्तस्य साधनं न स्यात् तदा नियोज्यः पुरुषः कदापि लिङर्थकार्यस्य सिद्ध्यर्थं प्रवृत्तो न स्यात्। तस्मात् गुरुमते कार्यं नियोज्यपुरुषस्य काम्यफलस्य साधनम्। तथा च कार्यं फलस्य जनकमिति कार्यमप्रधानं फलञ्च प्रधानम्। विधिवाक्ये कार्यस्यैव मुख्यविशेष्यत्वमित्यपि न संघटते, यतः अप्रधानभूतं कार्यं मुख्यं विशेष्यं न भवितुमर्हतीति कार्यस्यैव समस्तवाक्यप्रधानीभूतत्वं न संगच्छते।

अत्र गुरुमतानुयायिनः कथयन्ति—कार्यं स्वसिद्ध्यर्थमेव नियोज्यं नियुनक्ति। तथा च कार्य्यं नियोगो वा स्वसिद्ध्यनुकूलनियोज्यप्राप्त्यर्थमेव फलसाधनतामात्मनि स्वीकरोति न तु फलसिद्ध्यर्थं फलसाधनतां स्वीकरोति। कार्य्यं स्वसिद्ध्यर्थमेव नियोज्यं प्रेरयति नियोज्योऽपि काम्यफलस्य असाधने नैव प्रवृत्तो भवतीति नियोगः कार्य्यं वा नियोज्यपुरुषकाम्यफलसाधनतां स्वीकरोति फलतः कार्य्यं स्वसिद्ध्यनुकूलनियोज्यपुरुषलाभार्थं नियोज्यपुरुषस्य यत्काम्यं फलन्तस्य साधनं भवतीति कार्य्यस्य नियोगस्य वा प्राधान्यस्य हानिर्न जायते।

शब्देन विधेर्ज्ञानमनायासेनैव सर्वेषां यदि जायते तदा साधनत्वेन ज्ञाते कर्मणि प्रवृत्तौ सत्यां निष्पादितक्रिये कार्ये साधनस्य अनुपपत्तिरेव स्यात, शब्दात्प्रसिद्धस्य प्रतिपादनं वृथैव भवति इति शब्देन विज्ञातं वस्तु नैव जिज्ञासितं भवति। विधिश्च सर्वथाऽप्रसिद्धस्तदा अप्रसिद्धत्वादेव वेदार्थतया प्रतिपाद्यः न स्यात्। विधिः शब्देन अवगम्यते इति प्रसिद्ध एव तथापि विधौ वर्तन्ते दार्शनिकानां काश्चन विप्रतिपत्तिय इति संशयापन्नः विधिः जिज्ञासितो भवति। तत्र सतीषु वह्वीषु विप्रतिपत्तिषु इयं हि विमतिर्जायते लिङादिः लडादिरूपादन्यशब्दात् भिद्यते इति शब्दभेद एव विधिः। यथा अयस्कान्तमणिस्वरूपे वस्तुनि अस्त्येव स्वस्वभावजन्यः तादृशः कश्चिदतिशयः यद्वशात् अतचेतनं लौहं प्रवर्त्तयति तथैव लिङादावपि तादृशोऽतिशयः कश्चिद् वर्तते यद्वशात् चेतनं पुरुषं कर्मणि प्रवर्त्तयति। लिङादेर्व्यापारातिशयो वा चेतनस्य प्रवृत्तिकारणं स्वीक्रियते किम्वा शब्दभेदवदर्थभेद एव विधिरभ्युपेयते। यद्यप्यत्रेयं शङ्कोदेति यत् अर्थभेदस्य विधित्वे शब्दे विधिव्यवहारः कथमिव स्यात्, दृश्यते च शब्देऽपि विधिव्यवहारः। यथा—"चोदनेति क्रियायाः प्रवर्त्तकं वचनम्" इति, "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति च उभयत्रापि शब्दे एव विधिशब्दव्यवहारः दृश्यते नार्थे। चोदनेतिशब्दस्यैव क्रियायाः प्रवर्त्तकत्वं प्रतिपादितम् तथैव एकवाक्यता च वाक्यरूपेण शब्देन वाक्यान्तरस्य शब्दस्याभिहितम्। सत्यम्, परमियमाशङ्का नैव दुष्परिहरा। विध्यर्थाभिधायके शब्देऽपि विधिशब्दव्यवहारो भवति।

मण्डनमिश्रस्य मते इष्टसाधनत्वमेव विध्यर्थः। कृतिसाध्यत्वं हि लोकादेव अवगम्यत इति न तत्र विध्यपेक्षा। यागो मत्कृतिसाध्यः, मत्कृतिसाध्यविरोधिधर्मानधिकरणत्वात् इत्यनुमानेनैव कृतिसाध्यत्वस्य लाभात्, तथा च कृतिसाध्यत्वज्ञानस्य प्रवर्त्तकत्वेऽपि "अनन्यलभ्यो हि शब्दार्थः" इति न्यायेन प्रदर्शितरीत्या अनुमानेनैव कृतिसाध्यत्वज्ञानस्य प्रवर्तकत्वलाभात् न तत्र विधेः शक्तिरस्ति। स्वर्गादीनामिष्टसाधनत्वन्तु प्रमाणान्तरेणावगन्तुं न शक्यतेऽपि तु आम्नायवाक्यादेव तदवगम्यते इत्यनन्यलभ्यत्वात्तत्र विधेः शक्तिः स्वीक्रियते। केचित्तु "अनन्यलभ्यो हि शब्दार्थः" इति न्यायस्य तत्रैव प्रवृत्तिः यत्र पदान्तरलभ्योऽर्थः भवति—पदान्तरलभ्ये हि अर्थे पदस्य शक्तिः न भवति, अन्यथा कुत्रापि शक्तिर्न सिद्धयेत् सर्वस्यैवार्थस्य शब्दातिरिक्तप्रमाणान्तरवेद्यत्वात्। अनन्यलभ्यन्यायेन प्रदर्शितरीत्या कृतिसाध्यत्वे विध्यर्थनिषेधास्वीकारेऽपि कृतिसाध्यत्वज्ञानं न प्रवर्त्तकं, कृत्यसाध्यत्वेन निश्चिते प्रवृत्तिस्तु न जायते। कृत्यसाध्ये इष्टाभावेन वृथा श्रमजनकत्वेन द्वेषादेव प्रवृत्तेरभावात्। यद्यपि प्रदर्शितरीत्या कृतिसाध्यत्वज्ञानं प्रवर्तकं न भवेत् तथापि कृतिसाध्यत्वज्ञानं विना कृतिसाध्यत्वप्रकारिकेच्छात्मिका या चिकीर्षा सा नैव जायते। चिकीर्षाया अभावे च प्रवृत्तिरपि नैव स्यादिति कृतिसाध्यत्वज्ञानस्य प्रवर्तकत्वमावश्यकम्। लोकव्यवहारादेव तस्यानुगमात् चिकीर्षोपपत्तेः चिकीर्षानुरोधेन कृतिसाध्यत्वे शक्तिकल्पनमनावश्यकम्।

अत्रेयमाशङ्का भवति—अनिष्टजनके उदासीने च कर्मणि वृथा श्रमजनकतया द्वेषादेव प्रवृत्तिर्न स्यात् तथा च इष्टसाधनत्वज्ञानस्य विध्यर्थत्वाभावेऽपि इष्टसाधने एव कर्मणि प्रवृत्तिः स्यान्नान्यत्र। इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वाभावे इष्टाजनके कर्मणि यत्र आन्तरालिकश्रमो वर्तते तत्र द्वेषाभावसत्वेऽपि प्रवृत्तिर्न भवतीति सकलजनसम्मतोऽयं विषयः, इदानीमिष्टसाधनत्वज्ञानस्य प्रवृत्तिहेतुत्वानभ्युपगमेऽत्र प्रवृत्तिर्दुर्निवारा स्यात् इष्टसाधनत्वज्ञानस्य प्रवृत्तिहेतुत्वाभ्युपगमे तु प्रदर्शितस्थले इष्टसाधनत्वात्मकस्य प्रवृत्तिहेतुत्वस्याभावादेव प्रवृत्तिर्न भवतीति सर्वं सुसमञ्जसम्। इष्टसाधनत्वज्ञानस्य प्रवृत्तिहेतुत्वञ्च न मदंशरहितस्यापि तु मदिष्टसाधनमितिज्ञानस्यैव प्रवृत्तिहेतुत्वमभ्युपगन्तव्यम् अन्यथा मदंशस्य विधिवाक्यादलाभेन मदिष्टसाधनेऽपि यागादौ प्रवृत्तेरनुदयात्।

अयमाशयः—लिङादिप्रत्ययेभ्यः प्रवर्त्तना प्रतीयते। सर्वापि चेष्टा मानसिकी भवतु कायिकी वा प्रयत्नपूर्विकैव भवति। प्रयत्नो हि रागपूर्वक एव, विना रागं न कस्मिंश्चिदपि कार्ये प्रेक्षावतां प्रवृत्तिर्भवति। रागो हि नैव दुःखे नाप्यसुखे अपि तु सुखानुशयी राग इति सुखे सुखसाधने वा रागो भवति दुःखे

द्वेषादेव रागो न असुखदु:खे च उपेक्षणाच्च न राग:। सुखस्य चान्येच्छानधीनेच्छाविषयत्वमिति सर्वानुभवसिद्धम्। क्रिया च दु:खात्मिका इत्यत्र नास्ति केषामपि सचेतसां विमति: लोकानुभवसिद्धत्वात्। क्रियायां लोका: प्रवर्त्तन्ते इत्यवश्यमेव क्रियायां सुखसाधनत्वमवगन्तव्यम् अन्यथा सुखार्थिनस्तत्र नैव प्रवर्तेरन् वैदिकक्रियाश्च नैव साक्षात् सुखसाधिका इति प्रेक्षावतां वैदिकव्यापारोपरमप्रसङ्ग: समापतति इति दु:खरूपास्वपि क्रियासु सुखसाधनत्वमवश्यमेवाभ्युपगन्तव्यम्। सुखसाधनतैवेच्छोपहारमुखेन सुखोपायत्वात् क्रियासु प्रवर्त्तयितुमीशते। यदि शब्द: सुखसाधनतां न प्रतिपादयेत् तदा न कोऽपि क्रियायां पुरुषं प्रवर्त्तयेत्। लिङ्‌ शब्देन इष्टसाधनतामात्रमभ्युपगम्यत इति कथमिवास्मात् प्रवर्त्तनाया: प्रतीति: स्यात्। प्रवृत्तिसमर्थस्तावत्कश्चिद्भावातिशयो व्यापार एव प्रवर्त्तना[1]। एतन्मते केवलं परिस्पन्दनमेव व्यापारशब्देन नोच्यते येन परिस्पन्दनातिरिक्तत्वेन व्यापारशब्दस्य प्रयोगो न भवेत्। तस्मादिष्टसाधनत्वस्य परिस्पन्दनातिरिक्तत्वेन अप्रवर्तनात्मत्वं स्यात्, भावधर्म एव कश्चित्समीहितसाधनानुगुणो व्यापारपदार्थ:। यथा कश्चित् ज्ञानजनने प्रवृत्तो भवति तदा भावधर्म: नैव सामान्यत: परिस्पन्द: भवति अपि तु मन:-संयोग एवायं भावधर्म: तथैव स्पन्देतर: इष्टसाधनत्वाख्य: भावधर्म एव प्रवृत्तिजननेऽनुकूलतया व्यापारविशेष: प्रवर्तना। शब्द: तद्भावना वात्र न भवति प्रवर्तना यत: न अपेक्षितोपायत्वप्रतिपादनं विना कोऽपि क्रियासु प्रवर्तते[1]। अत्रेयमाशङ्का जागर्ति यत् राज्ञ: सेवक: यत्र यत्र कर्मणि प्रवर्तते तत्र सर्वत्रापेक्षितोपायत्वनिबन्धनैव प्रवृत्तिर्भवतीति वक्तुं न शक्यते, राजाज्ञया अनपेक्षितोपायेऽपि प्रेक्षावतां राजसेवकानां प्रवृत्तिर्दृश्यते, इति अपेक्षितोपायतां प्रतिपाद्यैव क्रियासु प्रवृत्तिरिति सैव प्रवर्तना इति न सार्वत्रिक: प्रवृत्तिहेतु:। सत्यम्, भवति आज्ञादिभ्य: प्रवृत्ति: क्रियायां तथापि केनापि रूपेणापेक्षितोपायनिबन्धनतामाश्रित्यैव सा प्रवृत्तिर्जायते। यद्यपि यत्र आज्ञादिना कस्यांश्चित्क्रियायां प्रवृत्तिर्भवति तत्र नियोक्तुरेव अर्थकर्मणि इति नियोक्तुरेवापेक्षितोपायनिबन्धना आज्ञादयो वर्तन्ते तथापि नियोज्यस्य पुरुषस्य या तद्विषयसम्पादने प्रवृत्तिर्भवति सा नियोज्यापेक्षितनिबन्धनैव भवति। यत: नियोज्य: प्रेक्षावान् आज्ञाद्यनन्तरं मनसि परिकल्पयति एतत्कार्यसम्पादनानन्तरं कार्यसम्पादनेन सम्यक्तोषित: ममाज्ञापयिता अभीष्टं मह्यं प्रयच्छेत् ममाहितं वा न विदध्यात् इति समीहितलाभरूपमहितविनिवृत्तिरूपं वा अपेक्षितमुपाश्रित्यैव भृत्यस्य नियोज्यस्य स्वनियोक्तुराज्ञाविषयसम्पादने प्रवृत्तिर्भवति नान्यथात एव य: पुरुष: यस्य

---

१. प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम्। वि० बि० पृ०—२४३

हितप्राप्तौ अहितपरिहारे वा नैव यत्नं विधत्ते तस्य आज्ञामपि नैवासौ नियोज्यः अनुरुणद्धि इति अकामेनापि एतत्स्वीकर्तव्यं यत् नियोक्त्रर्थसमुद्देशेन नियोज्यस्य प्रवृत्तिरानुषङ्गिकी आज्ञाविषयस्य स्वापेक्षिततत्वादेव प्रवृत्तिरिति लिङादिभ्यः प्रवर्त्तनावगतिर्नानुपपन्ना।

केचन वेदं प्रति अतिशयश्रद्धावन्तः इदं मम कर्तव्यमिति ज्ञानानन्तरमेव प्रवृत्तिरित्यवोचन्। कस्यचित्कर्मणः दर्शनोत्तरं कर्त्तव्यतामेव प्रवृत्तिहेतुत्वेनावगच्छन्ति। स्तनन्धयस्य बालस्य या तावदादौ प्रवृत्तिर्भवति सापि न समीहितोपाय इत्येतावतैवापि तु कर्तव्यमेतदिति। तस्मात् कर्तव्यतैव प्रवृत्तिहेतुरिति लिङादिश्रवणानन्तरा प्रवृत्तिः कर्तव्यताभिधानमेव लिङादीनां संसाधयति। लौकिकवचनं हि न निरपेक्षं प्रवृत्तिजनकं भवत्यपि तु प्रमाणान्तरापेक्षम् अपेक्षितोपायप्रतीतिपुरस्सरमेव। क्रिया हि दुःखरूपा, तथा च दुःखरूपायां क्रियायां प्रवृत्तिर्न स्वाभाविकी नापि केवलं कर्तव्यत्वज्ञानसापेक्षा परमियं हि प्रमाणान्तरापेक्षैव प्रवृत्तिरिति दुःखरूपक्रियाकर्तव्यतावगतेरपेक्षितोपायतां तत्प्रमाणभूतामन्तर्भाव्य कर्तव्यतावगतिः। वेदो हि अपौरुषेय इति निरपेक्षत्वात् न स्वार्थे प्रमाणान्तरमपेक्षत इति अपेक्षितोपायतावगतेरपेक्षा तत्र न जायते तथा च अपेक्षितोपायतावगमनिरपेक्ष एव कर्तव्यतावगमहेतुः। कर्तव्यता हि वेदे लिङादिप्रयोगेनाभिधीयते। यथा लोके लिङादिश्रवणान्तरा प्रवृत्तिः कर्तव्यताभिधानमेव लिङादीनामापादयति। अवगतसङ्गतितया लिङादयो वेदेऽपि कर्तव्यतामेवाभिदधते। वेदे लिङादिनाऽवगम्यमाना कर्तव्यता अनुष्ठानकर्तारमधिकारिणं नियोज्यं पुरुषमपेक्षते। तत्र कश्चिद्विधिः साध्यः यथा—**स्वर्गकामो यजेत**। अत्र यदा नियोज्यः साध्यविशिष्टस्तदा साध्यत्विवृद्धिर्भवति। यत्र तु नियोज्यः निमित्तवान् यथा **'यावज्जीवमग्निहोत्रं जुहुयात्'** तत्र भावविषयं कार्यं हितसाधनतावगमनिरपेक्षोऽपि अवगमयन्प्रवृत्तिं जनयति। यत्र वा **'न कलञ्जं भक्षयेदिति'** तत्र भगवानाम्नाय एव निरस्ताखिलदोषाशङ्कोऽहितसाधनतावगमनिरपेक्ष एव नञर्थविषयं कार्यमवगमयन् निवृत्तिं विधत्ते इति अपेक्षितोपायतायाः प्रवृत्तिं प्रति साधनत्वस्वीकारे न किमपि फलम्।

एतस्य पूर्वप्रदर्शितस्य शङ्काग्रन्थस्य समाधाने न्यायकणिकायामेतदभिहितं यत् अपेक्षितोपायताम्—इष्टसाधनत्वमन्तरेण कर्तव्यमिति शतशोऽभिधीयमानमपि न कार्यप्रवृत्तये समर्थो भवति। शब्दो हि कर्तव्यतायां विदितसंगतिरवश्यमेवापेक्षितोपायतामवगमयति, अपेक्षितोपायतावशादेवानुष्ठाने प्रवृत्तिर्भवति, अर्थात् इष्टसाधनत्वादेव प्रमाणान्तरानपेक्षादाम्नायादवगता कर्तव्यता अनुष्ठान-

१. सा च क्रियाणामपेक्षितोपायतैव। वि० वि० पृ०—२४३

माक्षिपति। एवमेव नैमित्तकविधौ च प्रतीयमाना अपेक्षितोपायसाधनता न शक्या नेति वक्तुम्। कर्तव्यताज्ञानस्य हि अपेक्षितोपायनान्तरीयकत्वात् कर्तव्यताज्ञानस्य प्रवृत्तिजनकत्वेऽपेक्षितोपायत्वज्ञानस्यैव प्रवृत्तिजनकत्वं सेत्स्यति। अन्यथा कर्तव्यमिति प्रतिपद्यमानोऽपि कथं तत्र प्रवर्त्तते[1]। तस्मादीप्सितस्योपायतैव कर्तृप्रवृत्तिहेतुः।

अत्र पूर्वपक्षिणा एतदुच्यते यत् कर्तव्यताऽवगमादेव कर्त्ता कर्मणि प्रवर्त्तते इति कर्त्तव्यतैव प्रवृत्तिहेतुरस्तु। इयं कर्तव्यता का? न निरालम्बनं ज्ञानं भवति। किमपि विषयमवलम्ब्यैव ज्ञानं भवति निरालम्बनं ज्ञानं च न भवति इति कर्तुरीप्सितोपायतैव प्रवृत्तिहेतुः कर्तव्यताज्ञानस्यालम्बनम्। कृतिव्याप्यतागोचरं कर्तव्यत्वज्ञानन्तद्विपरीततागोचरं हि अकर्तव्यत्वज्ञानमिति तत्कथं समीहितसाधनत्वमेवं तद्विपरीतसाधनत्वं गोचरयितुमर्हति? कर्तव्यत्वसमीहितसाधनत्वयोस्तादात्म्यं नास्ति यतः एकस्य सिद्धत्वादपरस्य च साध्यत्वात् दहनतुहिनवदुभयोः स्वभावविरुद्धत्वात्। यथा शुक्लः प्रत्यय इत्यत्र शुक्ल एवार्थः प्रत्ययेऽन्वेति इति शुक्ल एव शुक्लप्रत्ययस्य विषयो भवति समीहितोपायतां तद्विपरीततां चानुयातौ कर्तव्यमकर्तव्यमिति प्रत्ययौ प्रवृत्तिनिवृत्तिहेतू लौकिकानाम्। तथा च अपेक्षितोपायतासत्त्वे कर्तव्यत्वप्रत्ययः अपेक्षितोपायताभावे चाकर्तव्यत्वप्रत्ययः। कृतिसाध्यतामात्रं कर्तव्यता, परं कृतिसाध्यतामात्रं नैव प्रवृत्तिकारणं समीहितस्यापि कर्तव्यतया समीहितस्यापि प्रवृत्तिहेतुत्वप्रसङ्गात्। फलं हि कर्तव्यस्य कृतिसाध्यस्य सुखं सुखसाधनं प्रवृत्तिगोचरः स्यादेवेति कर्तव्यतायाः प्रवृत्तिगोचरत्वं स्यादेव। सत्यम्, साधनत्वं प्रवृत्तिहेतुः न तु कर्तव्यतामात्रमपि तु कर्तुरिष्टसाधनं प्रवृत्तिकारणम्। तथा च कर्तव्यतैकार्थसमवायिनी समीहितसाधनता प्रवृत्तिहेतुः सैव च कर्तव्यताज्ञानस्यालम्बनमभिमता। यद्युच्यते कर्तव्यतामात्रोपयोगिनी या समीहितसाधनता वर्तते सा नेव प्रवृत्तिहेतुः। स्वीक्रियतेऽपि तु कर्तव्यतैव प्रवृत्तिहेतुर्भवति। सा च कर्तव्यता क्वचित्साधनतयाऽवगम्यते क्वचिच्च सा कर्तव्यता शब्दतः कृतिसाध्यत्वेन रूपेण प्रवृत्तिहेतुर्भवति। तथा चासत्यामपि समीहितसाधनतायां कृतिसाध्यत्वरूपा कर्तव्यतैव प्रवृत्तिहेतुरिति कर्तव्यतामात्रमेव प्रवृत्तिहेतुरिति। समीहितोपायता हि कृतियोनिः। अयमाशयः—समीहितोपायता हि प्रमाणान्तःपातिनी इत्यत्र नास्ति ममापि विमतिः, परमेतादृशमप्यस्ति किञ्चित्प्रमाणं यस्य प्रमाणस्य अभावात् प्रमेयं निवर्त्तते। यदि कोऽपि भावपदार्थः अनित्यो भवति तदाऽवश्य-

---

१. ननु कर्तव्यमिति प्रतिपत्तेः प्रवृत्तिः। कथं हि तथा प्रतिपद्यमानो न प्रवर्त्तते। वि० वि० पृ० २४५, ४४६।

मेवासौ कृतकोऽपि भवति। तथा च कृतकत्वन्तत्र भावानामनित्यत्वे प्रमाणम्। कृतकत्वाभावादनित्यत्वं निवर्त्तते। कदाचिदपि कस्मिंश्चिद् भावे एतन्नैव भवितुमर्हति यदसौ भावोऽकृतकः सन्नपि अनित्यो भवेत्। एवमेवात्रापि कार्यत्वं नाम कृतिव्याप्यत्वं तथा च सति कार्यत्वे कृतिरवश्यमेव स्यात्, कृतिः चेतनप्रयत्नः पुरुषप्रयत्नो वेति। सा च कृतिः इच्छाजन्या अर्थात् इच्छाद्वेषजीवनयोनिस्तथा च इच्छाद्वेषात्मकयोः कृतियोनिभूतयोः निवृत्तौ कृतिरपि नैव भवति। ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेदित्यंशे न कस्यापि विमतिः। तस्मात्समीहितसाधनतायाः निवृत्तौ प्रवृत्तिर्नैव भवितुमर्हति समीहितस्य कृतियोनित्वात्। तस्मात्कर्तुः समीहितसाधनतैव कर्तव्यता कर्तुरपेक्षितोपायताविपरीता ह्यकर्तव्यता[1]। यः पुरुषः यदिच्छति तदेवासौ करोति नान्यत् इति भावनायाः प्रारम्भः इच्छैव भवति। प्रारब्धया इच्छया च भावनाप्रयत्नः जायते, इच्छापूर्वकत्वात्प्रयत्नस्येति पूर्वमेव प्रतिपादनात्। इच्छापूर्वकत्वात्प्रयत्नस्य इच्छाकर्म एव भावनासाध्यमिति सिद्धोऽपि स्वर्गः इच्छाकर्मतया साध्यात्मनैव भावनायामन्वेति समीहितसाधनतैवैतन्मते लिङर्थ इति संक्षेपः।

नव्यमते विधिविवेकः

वेदो हि आचारमूलः, आचारश्च प्रवृत्तिः। तथा च जनकतासम्बन्धेन प्रवर्त्तकज्ञानवत्त्वं वेदस्य, प्रवृत्तिप्रयोजकत्वादेव प्रवर्त्तकज्ञानं नितान्तमपेक्षितं भवति।

भाट्टमते हि लिङादीनामर्थः अभिधा। विधेः व्यापारीभूतः विधिसमवेतः भावनाख्यः अतिरिक्तपदार्थविशेषः अभिधा। अस्याश्चाभिधायाः ज्ञानं प्रवर्त्तकम् भावनायाञ्च भावनात्वरूपेण विधिशक्तिः। प्रयोजनज्ञानं प्रवृत्तिहेतुर्न भवितुमर्हति एवमेव प्रयोजनज्ञानस्याहेतुत्वे विश्वजिद्यागादौ फलकल्पनमनुपपन्नं स्यात्। यागविषयकभावनाजन्यो भवति पुरुषव्यापारः। तत्र यागविषयकव्यापारेऽभिधाजन्यत्वस्य अन्वये व्यापारनिष्ठं यदिष्टसाधनत्वन्तद्धि अन्वयप्रयोजकं जायत इति योग्यताबलादेवात्र लिङर्थे इष्टसाधनत्वज्ञानस्य भानं भवति इति अन्यथालभ्ये इष्टसाधनत्वे लिङादीनां न शक्तिग्रहो भवति। यागविषयकभावनाजन्यः पुरुषव्यापारः आख्यातसामान्यशक्तिबललभ्ये कृतिरूपव्यापारे जन्यत्वसम्बन्धेन भावनायाः अन्वयसिध्यर्थं व्यापारनिष्ठेष्टसाधनत्वस्यान्वयप्रयोजकत्वम् इति योग्यतयैव तदिष्टसाधनत्वस्य भानं भवति। अथवा विधिबलादेव स्वर्गादिसाधनत्वस्य ग्रहो जायते। इष्टसाधनत्वञ्च प्रवृत्तिरूपव्यापारे आख्यातार्थेऽन्वेति, प्रवृत्तौ च इष्टसाधनताज्ञानमेव हेतुः। नचात्रेदं

१. तस्मात्कर्तव्यताऽपि नान्या कर्तुः समीहितोपायतायाः। वि० वि० पृ० ३०४

चिन्तनीयं यत्—न्यायमतेऽपि इष्टसाधनत्वमेव विध्यर्थ इति कोऽनयोर्विशेषः ? न्यायमते क्रियागतेष्टसाधनत्वं विध्यर्थः, भाट्टमते तु प्रवृत्तिगतमेव तदिष्टसाधनत्वमिति विशेषः। भाट्टमते चाभिधाया अभ्युपगमः, न्यायमते अभिधाया अनभ्युपगमश्चेति वर्तते विशेषः। अत्रेयमाशङ्का जागर्ति यत् अभिधानामकस्य व्यापारस्याभ्युपगमः किमिति क्रियते ? व्यापारभिन्नस्य इतरनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा भवति। यथा दण्डः चक्रनिष्ठस्पन्दनाख्यव्यापारजनकः, दण्डश्च स्वनिष्ठस्पन्दनाख्यव्यापारार्जनं विना न भवति चक्रनिष्ठस्पन्दजनकोऽपि तु दण्डस्य स्वनिष्ठस्पन्दार्जनद्वारा चक्रनिष्ठस्पन्दजनकत्वम्। व्यापारो हि परनिष्ठव्यापारजनको भवतीति तत्रापि स्वनिष्ठः कश्चिद्व्यापारोऽवश्यमेवाभ्युपगन्तव्य इति व्यापारभिन्नस्येत्युक्तम्। व्यापारिणः स्वनिष्ठव्यापारजनने व्यापारापेक्षायान्तु तस्यापि स्वनिष्ठव्यापारजनने व्यापारापेक्षेति तस्य तस्येति क्रमेण अनवस्थापत्तेर्दुर्वारत्वादिति परनिष्ठेत्युक्तम्। तावतापि ज्ञानद्वारैव लिङादीनां प्रवृत्तिजनकत्वमिति शब्दाश्रिता सा अभिधा न सेत्स्यति इत्यत उक्तं स्वनिष्ठव्यापारद्वारेति। सा च अभिधाख्या भावना यदा शब्दाश्रिता तदा शब्दाश्रितत्वादियं भावना शाब्दी भावनेत्युच्यते। अयमाशयः—भाट्टमते लिङ्लोट्तव्यदादियुक्तवाक्ये द्विविधभावना प्रतीयते—एका शाब्दभावना अपरा च आर्थभावना। आख्यातमात्रमार्थभावनामवगमयति लिङ्लोडादयश्च शाब्दभावनां प्रत्याययति। इदमेव "**अभिधाभावनामाहुः**" इत्यादिवार्त्तिकानुसारिसुचरितमिश्रमतम्।

मण्डनमिश्रादीनां मते तु "श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते" इति वार्त्तिकानुरोधेन इष्टसाधनत्वमेव विध्यर्थः।

लोके लिङादीनामाप्तेच्छायां शक्तिग्रहो वर्तत इति वेदेऽपि नियोगः प्रवर्त्तनीयत्वेन इच्छा, तादृशार्थवाचकोऽत्र लिङादिर्भवति। नियोगः[१]–प्रवर्त्तनम्–प्रयोजनं वा, अत्रैव लिङादीनां शक्तिग्रहः। वेदे चास्मदादीनामिच्छा न सम्भवतीति इच्छाश्रयत्वेनात्र ईश्वरस्य सिद्धिर्जायते। इच्छा हि आत्मविशेषगुणः स च समवायसम्बन्धेनात्मनि वर्तते। यदाश्रिता च वेदार्थे इच्छा स एव ईश्वरः। नियोगो हि आचार्यमते आप्ताभिप्राय एव।

विधिवादे इच्छा यदि प्रवृत्तिशब्दस्यार्थः स्यात्तदा "स्वर्गकामोऽश्वमेधेन यजेत" इत्यादिविधिवाक्यश्रवणानन्तरमश्वमेधयज्ञादौ इच्छा स्यात्, इच्छामात्रेणैव पुरुषः चरितार्थो भवेत् यतः इच्छैव विध्यर्थः स्वीक्रियते।

१. नियोगः प्रवर्तनम् प्रयोजनमर्थो येषां ते—**आमोद०** पृ० ३१०

अयमभिप्रायः—कस्यापि शब्दस्य शक्तिग्रहे प्रदर्शितेषु बहुविधेषु कारणेषु व्यवहारस्यैव प्राधान्यं वरीवर्ति। व्यवहारो हि शब्दप्रयोगात्मकस्तेनापि घटादिपदानामर्थमजानानस्य जिज्ञासोर्बालस्य शक्तिग्रहो भवति। यथा ज्येष्ठवृद्धेन गुर्वादिना घटमानय इति शिष्याय उक्तम्, ज्येष्ठप्रयोजकवृद्धवाक्यं श्रुत्वा प्रयोज्यशिष्यादिना घट आनीतः। तत्र समीपस्थः व्युत्पित्सुर्बालः घटाद्यर्थेऽगृहीतशक्तिकोऽपि प्रयोजकवृद्धोच्चारितवाक्यं श्रुत्वा प्रयोज्यवृद्धस्य गमनं दृष्ट्वा घटानयनं च दृष्ट्वा प्रयोज्यवृद्धसमवेतप्रयत्नसाध्यघटानयनक्रिया प्रयोजकवृद्धोच्चरित-"घटमानये" ति पदज्ञानजन्यशाब्दबोधजन्येति अनुमिनोति। घटानयनक्रियया प्रवृत्त्यनुमानञ्चेत्थम्भवति—घटानयनक्रिया प्रयत्नपूर्विका, विलक्षणक्रियात्वात्, स्वीयक्रियावत्। प्रवृत्त्या च शाब्दबोधानुमानं जायते—घटानयनविषयकप्रवृत्तिः घटानयनविषयकज्ञानजन्या, तद्गोचरप्रवृत्तित्वात्; या यद्गोचरा प्रवृत्तिः सा तद्गोचरज्ञानजन्या, स्वीयस्तन्यपानप्रवृत्तिवदित्यनुमानेन घटानयनविषयकशाब्दबोधमनुमायानन्तरं घटानयनगोचरज्ञानम् घटमानयेतिवाक्यजन्यम्, तदन्वयव्यतिरेकानुविधायित्वात्; यद् यदन्वयव्यतिरेकानुविधायि तत् तज्जन्यं यथा तन्त्वन्वयव्यतिरेकानुविधायि पटः इत्येवमानयनक्रियान्विते घटपदार्थे शक्तिं विनिश्चिनोति। इत्येवं क्रियान्वितघटादौ शक्तिग्रहानन्तरं घटं नय, गां बधान, गां विसृजेत्यादिप्रयोजकवृद्धवाक्यात् कस्यचित्पदस्य संग्रहेण, कस्यचित्पदस्य त्यागेन क्रियान्वितगवाद्यर्थे शक्तिमनुमिनोति—घटानयनकार्यम् घटमानयेति शब्दप्रयोज्यम्, तादृशशब्दश्रवणशून्यकालीनप्रवृत्त्यविषयत्वे सति प्रवृत्तिविषयत्वात्; एवं क्रमेण क्रियान्वितघटादौ शक्त्यवधारणानन्तरं क्रियान्वितघटत्वाद्यपेक्षया घटत्वादेरेव शक्यतावच्छेदकत्वे लाघवेन अनन्यलभ्यस्यैव शब्दार्थतया अन्वयस्य संसर्गमर्यादया भानेन च क्रियान्वितघटत्वे घटादिपदशक्यतावच्छेदकत्वस्य परित्यागौचित्यात् लाघवज्ञानादिसहकृतमनसा घटादिपदं क्रियान्वितघटादिशक्तमिति न कार्यान्वितघटत्वं शक्यतावच्छेदकम् किन्तु घटत्वमेव।

लिङः शक्तिविचारेऽपि व्युत्पित्सुर्बालः यद्धि स्वप्रवृत्तिजनकत्वेनावधारयति तत्रैव तस्य शक्तिरिति निश्चिनोति। विना इच्छां न कस्मिन्नपि कर्मणि कोऽपि प्रयतत इति इच्छामेव लिङर्थमवधारयति; तथा च इच्छैव लिङर्थ इति केषाञ्चिन्मतम्[१]।

१. "अन्ये तु व्यवहारेण व्युत्पित्सुर्बालः स्वप्रवृत्तिजनकत्वेनावधारिते शक्तिं कल्पयति, तादृशीच्छैवेति सैव लिङर्थ इत्याहुः।" तत्वचिन्तामणि टीका पृ० ७

आद्या प्रवृत्तिरिच्छैव इति प्रयोगात् यद्यपीच्छा अन्यत्र प्रवृत्तिशब्दार्थः कुसुमा० विवृति पृ० १२०

पूर्वोक्तेन प्रसङ्गेन एतत्प्रतिपादितं यत् प्रवृत्तिशब्दस्यार्थः प्राथमिकेच्छा प्रयत्नो वेति । किन्तु इच्छा यदि प्रवृत्तिशब्दस्यार्थो भवेत्तदा "स्वर्गकामोऽश्वमेधेन यजेत" इति वैदिकविधिवाक्यश्रवणानन्तरमश्वमेधयज्ञादौ इच्छामात्रेणैव पुरुषः चरितार्थः स्यात् इच्छामात्रेणैव विध्यर्थस्य निर्वाहेण इच्छामात्रादेव फलस्य स्वर्गादेरुत्पत्तौ कर्मणो यगादेरननुष्ठानप्रसङ्ग एव भवेत् । बहुवित्तव्ययायासाध्ये यागादिकर्मणि न कोऽपि कृतिं कुर्यात् यागादीनामकरणेऽपि विध्यर्थस्य निर्वाहेण पुरुषस्य कृतकृत्यताप्रसङ्गात्; तथा च यागाद्यकरणप्रसङ्गः समापतति[1] । क्रियमाणयागस्य न कोऽप्युपयोगः स्यात्केवलं जलताडनादिवद् वृथायासः एतस्मिन् संभवति । दृश्यते च लोके "स्वर्गकामोऽश्वमेधेन यजेत" एतद्वाक्यश्रवणानन्तरं पुरुषः यज्ञादौ प्रवृत्तः सन् यत्नवान् भवति । तस्मात् कृतिर्यत्नो वा विध्यर्थः न तु इच्छामात्रम् । कृतिर्हि फलपर्यवसाना भवति; तथा च फलपर्यवसानायाः कृतेर्विधिकार्यतया क्रियमाणस्य यागस्य उपयोगः सम्भवत्येव । विधिवादे हि न कायपरिस्पन्दनमात्रं कृतिर्यथाऽन्यत्र चेतनपुरुषस्पन्दस्य (व्यापारस्य) कृतिशब्दवाच्यत्वेन व्यवहारो भवति । प्रवृत्तिर्हि विधिज्ञानकार्या । तथा च कृतेः विध्यर्थत्वे मोक्षकामस्य पुरुषस्य कृतेः ज्ञानविधौ[2] भूतेषु दयाविधाने च चेष्टारूपायाः कृतेः शरीरपरिस्पन्दस्याभावेऽपि विधेः दर्शनान्न कृतिः विध्यर्थः । आत्मज्ञानं हि न स्पन्दाद्यधीनं यतः ज्ञानस्य आत्ममनःसंयोगजन्यत्वात् न स्पन्दाद्यपेक्षा तत्र वर्तते । कर्तृधर्मस्य स्पन्दस्य ज्ञानमेतादृशविधिस्थले न भवति । तथा च स्पन्दनं चेष्टा वा न विध्यर्थः ।

भवतु नाम स्पन्दाख्यायाः कृतेरात्मज्ञानादौ अभावात् विधित्वासम्भवेऽपि प्रयत्नः विध्यर्थः कस्मान्न भवति । श्रवणमनननिदिध्यासनादिकं हि प्रयत्नसाध्यमेव भवति भूतदयादीनामपि प्रयत्नविषयत्वमस्त्येव । एतावता प्रयत्नो नैव विध्यर्थः ; यत्नो यदि विध्यर्थः स्यात्तदा वैधकर्मणि अप्रवृत्तिप्रसङ्ग एव स्यादिति संक्षेपः ।

विधिविवेकग्रन्थे विधेः आलोचना वर्तते । प्रकरणस्यारम्भे एव विषयप्रयोजनादेः निर्णयो विद्यते—

---

१. इच्छामात्रेण विध्यर्थनिर्वाहे बहुवित्तव्ययायाससाध्ये यागाद्यकरणप्रसङ्गात् । न्या० कु० प्रका० ५२५ ।

२. आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेत्यत्र आत्मानं विजानीयात् ।

साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः।
बोधं विधौ समायत्तमतः स प्रविविच्यते ॥

विधेर्बोध एव पुरुषार्थस्य साधनम्। वेदवाक्यस्य तात्पर्यबलेनैव पुरुषार्थस्य सिद्धिर्जायते। ग्रन्थकारः कथयति विधिः शब्दः शब्दव्यापारो वा नास्ति। "तस्मान्न विधिः शब्दस्तद्व्यापारो वा।" अभिधेयभावनापि विधिर्नास्ति "अभिधेयोऽपि विधिर्नास्ति।" टीकाकारमते प्रमाणान्तरागोचरः शब्दः आलम्बननियोग एव विधिः, इत्येव प्रभाकरमतम्। एतस्य मतस्य विशेषरूपेण खण्डनं वर्तते। नियोगः केनापि रूपेण युक्तियुक्तो नास्ति। वाक्यार्थः शब्दप्रमाणको न भवितुमर्हति, यतः अपदार्थोऽपि तत्र वर्तते, अपदार्थः कदापि वाक्यार्थो न भवितुमर्हति, शब्दप्रमाणकः पदार्थोऽपि न भवितुमर्हति। यतः, कस्यापि प्रमाणान्तरस्यापि अभावे पदार्थत्वस्य अनुपपत्तिः भवति। शब्द एव नियोगे प्रमाणमित्यपि न समीचीनम्, तथा सति इतरेतराश्रयदोषो भवति "प्रमितिर्हि शब्देन नियोगे सम्बन्धग्रहात्सति च तस्मिन् शब्देन तस्य प्रमा"। प्रमाणान्तरेण नियोगस्य सिद्धिरित्यपि न भवितुमर्हति, यतः मानान्तरस्वीकारे सिद्धेरनपेक्षत्वमेव। नियोक्तृव्यापारेऽपि निगोस्य कर्त्ताऽपेक्षितो भवतीति, किन्तु एतदपि न सम्भवति, यतः शब्दस्य अपौरुषेयत्वाङ्गीकारात्। अतः केनापि प्रकारेण नियोगस्य सिद्धिर्न भवितुमर्हति। केषाञ्चिन्मते प्रतिभैव शब्दज्ञानम्।

अत एव प्रतिभामात्रं विकल्पमात्रं वा शब्दज्ञानमिति विपश्चितः। प्रतिभानिबन्धनश्च व्यवहारः। प्रतिभानुगृहीतानि च प्रमाणानि व्यवहाराङ्गमिति। एतन्मतमपि खण्डितम्। प्रतिभावादस्वीकारे सकलायाः प्रवृत्तेरभावः। अतदात्मनि तादात्म्यप्रतीतिः भ्रान्तिः। ज्ञानस्य स्वप्रकाशत्वमखण्डतञ्च। ज्ञानसम्बन्धे आचार्यः कथयति—

सर्वादृशामन्यवित्तमिन्द्रियाणां न गोचरः।
अत एव न सर्वज्ञज्ञानकार्य्यं प्रसिध्यति ॥ पृ० १४५

ज्ञानमतीन्द्रियम्, ज्ञानं सर्वप्रकाशकम्, ज्ञानं न कस्यापि कार्यं न च प्रकाश्यम्। नियोगस्य सार्थकता केनापि प्रकारेण न सम्भवति। आचार्यस्य एष एव सिद्धान्तः, यत्—अतो न नियोगोऽनुप्रवेशेन वस्तुतत्त्वं प्रकाशयति। श्रुतिः कार्य्यार्थतां प्रकाशयति, सिद्धवस्तुनोऽपि प्रकाशं करोति। शब्दः द्विविधः, कार्याभिधायी लिङादिः, भूतवस्तुनोऽभिधायी लङादिः। उपनिषद्वाक्यं भूतवस्तुविषयकम्। उपनिषद्वाक्ये विधेरवसरो नास्ति "उपनिषदात्मतत्त्वं त्वनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते शब्दभावना—शाब्दीभावनैव विधिः इत्येव भट्टकुमारिलसम्मतम्, शब्दभावनापक्षोऽपि न युक्तियुक्तः, इष्टबोधाभावे शब्दभावनाबलेन लोकः प्रवर्तितो न भवितुमर्हति।

काम्यकर्मणि नैमित्तिककर्मणि अधिकारभेदः—कार्यनिष्ठबलेन प्रयोगनिष्ठत्वबलेन च काम्यकर्मणि नैमित्तिककर्मणि च अधिकारभेदो न भवितुमर्हति ।

इष्टसाधनता—इष्टसाधनतैव न विधिः । कर्तुः इष्टसाधनतापि कर्तव्या, अकरणे तत्त्वानवबोधः विधेरन्तर्भुक्तः, सर्वविषयकज्ञानमेव विधिः । अतएव गीतायामुक्तम्—"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधं कर्म चोदना ।" वास्तविककर्मकरणे इष्टलाभः भवेत् ? तेन इष्टलाभेन मम कः सम्बन्धः ? अकरणे कस्तावद् दोषः ? कथं कर्तव्यम् करणे कस्य फलस्य प्राप्तिः स्यात् ? एतादृशपर्यालोचनायामेव विधेस्तात्पर्यम् ।

अज्ञानी एव कर्मणि अधिकारी, न तु ज्ञानी । "एव खलु पुरुषः स्वभावतो रागाद्याविष्टो दृढफलैरुपायैः विषयोपार्जने प्रवर्तमानस्तदाक्षिप्तमनाः तत्पक्षपाती । न विगलितविषण्णप्रपञ्चमात्मतत्त्वमुपदिष्टं प्रत्येतुं परिभाषयितुं वा अलम् ।" स्वर्गादिफलं क्षणिकम् । तत्र दुःखसम्मिश्रणमप्यस्ति । यज्ञस्य स्वर्गाख्यं फलम् । अतः यज्ञे न ज्ञानी अधिकृतः, यतः ज्ञानिनः सन्यासमेव कर्तव्यम् । आत्मज्ञानाधिकारे कर्मविधेरवसरो नास्ति—तस्मान्नाऽसाधने धात्वर्थेऽधिकारसिद्धिः । साधनत्वं चास्य विधिरित्युक्तम् ।

ब्रह्मसूत्रस्य तत्तु समन्वयात् (१।१।४) इति सूत्रे "प्रतिपत्तिविधिवादिनः" मतस्य खण्डनं वर्तते । विधिविवेकग्रन्थेऽपि आचार्यमण्डनः प्रतिपत्तिविधिवादिनः मतस्य विस्तृतरूपेण आलोचनां कृत्वा खण्डनमकरोत् । प्रतिपत्तिविधिवादी गुरुरेव इत्यपि एतस्मिन्नेव ग्रन्थे निर्दिष्टवान् । ब्रह्मप्रतिपत्तौ विधिरस्तीति समर्थनार्थमाचार्यः प्रभाकरस्य गुरोः वाक्यमप्युद्धृतवान् । परिशेषे आचार्यः मण्डनः कथयति—"अलं वा गुरुभिर्विवादेन" । ब्रह्मप्रतिपत्तिविधायकवाक्येन यदि ब्रह्मसिद्धिर्भवति, तदा गुरुणा सह विवादस्य प्रयोजनं नास्ति[1] ।

आचार्यप्रभाकरः मीमांसादर्शनस्य (१।१।२) सूत्रस्य शावरभाष्यस्य बृहतीटीकायां सकलस्यापि वेदार्थस्य कार्यरूपत्वमर्थात् साध्यरूपत्वमेव न तु सिद्धरूपत्वं कार्येऽर्थे एव वेदस्य प्रामाण्यात् इत्याह । एतस्य बृहतीवाक्यस्य पञ्जिकाख्यटीकायां शालिकनाथमिश्रः आचार्यमण्डनस्य ब्रह्मसिद्धिग्रन्थात् कियदंसमुद्धृत्य, वेदस्य सिद्धरूपोऽप्यर्थो भवितुमर्हतीति मण्डनमिश्रमतमुद्धृत्य तस्य विस्तृतरूपेणालोचनां कृत्वा तन्मतमखण्डयत्[2] ।

---

१. उपनिषदात्मतत्त्वन्त्वनपेक्षविध्यन्तराद् वाक्यात् प्रतीयते । अलं वा गुरुभिर्विवादेन । वि० वि० पृ० २८१

२. अत्रापरोऽपरिपक्वविद्यावलेपोद्रेकतिरस्कृतविवेकः परिचोदयति । तदेतत् बालभाषितं बालादेवादरणीयतां लभते । पञ्जिका पृ० २०

मण्डनाचार्यस्य एतन्मतखण्डनार्थं शालिकनाथोऽत्र यदवोचत् तस्य समाधानार्थमेव वाचस्पतिमिश्रः विधिविवेकस्य टीकायां न्यायकणिकायां शालिकनाथस्य वाक्यमादाय खण्डनमकरोत् ।

आचार्यः मण्डनः विधिविवेके शाबरभाष्यनिबन्धकारस्य प्रभाकरस्य वाक्यमुद्धृतवान्, किन्तु, तद्वाक्यं शाबरभाष्यस्य यस्यांशविशेषस्य व्याख्यामादाय निबद्धवान्, तदंशविशेषस्य बृहतीटीकायां तस्य वाक्यस्योपलब्धिर्नास्ति[1] ।

अद्वैतवेदान्तिनां मते उपनिषद्वाक्यानां साक्षाददद्वितीयब्रह्मप्रतिपादकत्वेऽपि प्रतिपत्तिविधिवादिनां मीमांसकानां मते साक्षाद्रूपेण उपनिषद्वाक्यानामद्वितीयब्रह्मप्रतिपादकत्वं न भवितुमर्हति । ब्रह्मप्रतिपत्तिविधायकवाक्यात् साक्षाद्रूपेण ब्रह्मप्रतिपत्ते कर्त्तव्यतया प्रतिपन्नत्वे विधेयभूतब्रह्मप्रतिपत्तेः विषयभूतं ब्रह्मापि प्रतिपन्नं भवतीति । अतः, मीमांसकाः नाद्वैतसिद्धान्तविरोधिनः किन्तु अद्वैतवेदान्तिनः येन रूपेण उपनिषद्वाक्यानामद्वैतब्रह्मणि प्रामाण्यं प्रतिपादयन्ति, मीमांसकाः तेन रूपेण न कथयन्ति, अपि तु विधायकवाक्यस्यैव प्रामाण्यं स्वीकुर्वन्ति ।

नात्र सन्देहो यत् मण्डनमिश्रः पूर्वमीमांसायाः श्रेष्ठः आचार्यः । वाचस्पतिमिश्रः यस्य ग्रन्थस्य टीकाकारः तस्य ग्रन्थस्य विषये किमु वक्तव्यम् । अस्मिन् विधिविवेके मण्डनमिश्रः आत्मज्ञाने विधिरस्ति न वेत्यस्मिन् विषये पूर्ववर्तिनां बहूनामाचार्याणां मतं प्रतिपादितवान् । उपसंहारे च आत्मज्ञाने विधिर्न भवितुमर्हतीति प्रतिपादितवान्[2] । 'विधिनिरपेक्षवेदान्तवाक्यादेव आत्मतत्त्वस्य प्रतीतिर्भवतीति' मण्डनमिश्रवाक्यस्य टीकायां वाचस्पतिमिश्रः कथयति "तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति । श्रुतमयी, चिन्तामयी साक्षात्कारवती च ।" इमास्तिस्रोऽपि प्रतिपत्तयो विधानायोग्याः, अतः, वेदान्तवाक्यैः विधिनिरपेक्षात्मतत्त्वस्य प्रतिपादनं जायते । एतदेव प्रतिपादितम् । "तत्तिसृणामपि प्रतिपत्तीनां विधानानर्हत्वात् आत्मतत्त्वप्रतिपादनपरत्वं हि वेदान्तानामुपपादितम् । सर्वञ्चैतद् ब्रह्मसिद्धौ कृतश्रमाणामनायासमधिगमनीयमिति नेहास्माभिरुपपादितम्"[3] ।

---

१. यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः ? यस्माद् भूतादिकमर्थं चोदनैव गमयति । कथम् ? कार्यमर्थमेवमवगमयन्ती गमयति । वि० वि० पृ० २७९

यदि कार्य एवार्थे वेदस्य प्रामाण्यं कथं तर्हि भूतावद्यवगतिर्मन्त्रार्थवादेषु । बृ० पृ० २६

२. 'उपनिषदात्मतत्त्वं तु अनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते' । वि० वि० पृ० २८१

३. वि० वि० न्या० क० पृ० २८१

आचार्यमण्डनस्य विधिविवेकग्रन्थेन चैतत्सुस्पष्टं जायते यत् प्राचीनकर्म-मीमांसकानां मध्येऽपि एवम्भूताः सम्प्रदायाः आसन्, ये जीवब्रह्मणोरैक्यं स्वीकुर्वन्ति स्म। "तत्तु समन्वयात्" (ब्र० सू० १।१।४) इति सूत्रभाष्ये आचार्यः शङ्करः पूर्वमीमांसकानां मतद्वयस्य पूर्वपक्षरूपेण निर्देशं कृतवान्[1]। तस्य भामतीटीकायां वाचस्पतिमिश्रेणोक्तम्—भाष्यकारः आचार्यदेशीयानां मतमुत्थापयति—"अत्रापरे प्रत्यवतिष्ठन्ते इति"। एतन्मीमांसकानां मते यद्यपि जीवेन सह ब्रह्मणः ऐक्यं वेदान्तवाक्येन सिद्धं भवति तथापि स्वरूपतः ब्रह्माभिन्नः जीवः इत्यत्र वेदान्तवाक्यानां तात्पर्यं न भवितुमर्हति, कस्यापि वस्तुनः स्वरूपमात्रस्य प्रतिपादकं वाक्यं निरर्थकमेव स्यात्। अतः, वेदान्तवाक्यानां तादृशब्रह्मस्वरूपे तात्पर्यं नास्ति अपि तु स्वरूपस्य ज्ञानविधावेव तात्पर्यम्। अर्थात् वेदान्तवाक्येन तादृशब्रह्मणः ज्ञानमेव विहितम्। वेदान्तवाक्यानां विधावेव तात्पर्यं न तु वस्तुस्वरूपे, यतः वेदानां विधावेव **तात्पर्यम्।**

अस्मिन् विषये पूर्वपक्षिणः मीमांसकाः वेदान्तवाक्यानां वस्तुस्वरूपे तात्पर्यं न भवितुमर्हति अपितु कार्ये विधौ वा वेदान्तवाक्यस्य तात्पर्यमित्येतत्साधनार्थं शबरस्वामिनः भाष्यस्य महर्षेः जैमिनेः मीमांसासूत्रस्यापि प्रमाणतया निर्देशं कृतवन्तः। आचार्यवाचस्पतिमिश्रोऽपि एतस्य पूर्वपक्षभाष्यस्य व्याख्यायां प्रभाकरमतरहस्यं प्रदर्शितवान्। बृहदारण्यकोपनिषदि "आत्मेत्येवोपासीत" (१।४।७) इत्यत्र शाङ्करभाष्ये प्रभाकरसम्प्रदायस्य मतं प्रदर्श्य आचार्यशङ्करः खण्डितवान्। **प्रभाकरः** (**गुरुः** ; चोदनालक्षणोऽर्थो धर्मः (जै० सू० १।१।२) इत्यस्य सूत्रस्य भाष्यसम्मतार्थं प्रकाशितवान्। तेनैतदेवावगम्यते यत् वेदस्य अर्थः साध्यरूपः, न तु सिद्धरूपः। वेदस्य सिद्धवस्तुरूपः अर्थो न भवितुमर्हति। प्रभाकरः एतादृशसिद्धान्तस्य समर्थनं करोति, तेनावगम्यते यत् **अयं सिद्धान्तः** सुदूरपूर्वकालादेव प्रचलति। तथाहि—"चोदनालक्षणः कार्यरूप एव वेदार्थः, न सिद्धरूप इति प्रतिज्ञातम्" (पञ्जिका पृ० २०) चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः, इति कार्यरूप एवेति दर्शयति। यदि कार्ये एव अर्थे वेदस्य प्रामाण्यं कथं तर्हि भूताद्यर्थावगतिर्मन्त्रार्थवादेषु ? तेषामपि हि कार्यार्थता द्वितीये पादे वक्ष्यति। तदुक्तं शक्नोत्यवगमयितुम्। (बृहती पृ० २०–२३)

विधिविवेके आचार्यः मण्डनः गुरुप्रभाकरस्य एतन्मतखण्डनपूर्वकं स्वीयमतस्थापनार्थं प्रथमतः पूर्वपक्षरूपे प्रभाकरमतप्रदर्शनप्रसङ्गे उक्त-

---

१. अत्रापरे प्रत्यवतिष्ठन्ते यद्यपि शब्दप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। ब्र० सू० १।१।४

वात्—यद्धि वाक्यं न प्रवर्त्तकं न च निवर्तकं तादृशवाक्यस्य व्यर्थत्वात् न तादृशं वाक्यं भवितुमर्हति। श्रोतुरवगत्यर्थमेव वक्ता वाक्यं प्रयुनक्ति। सप्रयोजनमेव वाक्यं श्रोतुं श्रोता इच्छति। अतः सप्रयोजनमेव वाक्यं वक्ता प्रयुङ्क्ते। सिद्धवस्तुनः प्रतिपादकं वाक्यं सप्रयोजनं न भवितुमर्हति, यतः सिद्धवस्तुप्रतिपादकेन वाक्येन प्रवृत्तिर्निवृत्तिर्वा किमपि न जायते। वाक्यमात्रं प्रवर्त्तकं निवर्त्तकं वा भवति, यद्धि न प्रवर्त्तकं न निवर्त्तकं तत् निष्प्रयोजनम् अर्थात् व्यर्थमेव[1]।

एतस्या आशङ्कायाः उत्तरप्रसङ्गे आचार्यः मण्डनः कथयति—"कथं तर्हि भूताऽन्वाख्यायिनो वेदान्ता लौकिकवचांसि च" (पृ० १९२) अर्थात् अप्रवर्त्तकस्य अनिवर्त्तकस्य वा वाक्यस्य व्यर्थत्वे सिद्धवस्तुनः प्रतिपादकस्य वेदान्तवाक्यस्य एवं सिद्धवस्तुनः प्रतिपादकस्य लौकिकवाक्यस्य वा वैयर्थ्यं स्यात्। अत्र प्रभाकरः कथयति—"वेदान्तेषु तावदात्मतत्त्वप्रतिपत्तिः कर्त्तव्या" (पृ० २९२) अर्थात् वेदान्तवाक्यस्य वैयर्थ्यं नापतति, यतः आत्मा ज्ञातव्यः इत्यादिवेदान्तवाक्येनात्मविषयकप्रतिपत्तिः उक्तेति। विहितात्मप्रतिपत्तिविषयः आत्मा कीदृशः? एतादृशाकाङ्क्षायाः निवृत्त्यर्थमात्मस्वरूपप्रतिपादकं सर्वमपि उपनिषद्वाक्यमात्मस्वरूपं प्रतिपादयति। प्रमाणवाक्यस्य नैष स्वभावो यत् विधिनिरपेक्षं सत् वस्तुनः स्वरूपं प्रतिपादयेत्, एवमेव 'अयं देशः धनसमृद्धः' इत्यादिसिद्धवस्तुनः प्रतिपादकं लौकिकं वाक्यमपि विधिपर्यवसायि। "लोके चेदमिह निध्यादि प्रपित्तव्यमिति वाक्यपर्यवसानम्" (वि० वि पृ० १९२) अर्थात् "त्वम् जानीहि" एतादृशविधिवाक्ये एव पूर्वोक्तवाक्यस्य पर्यवसानं भवति। अत्रैव मण्डनाशयाभिव्यक्तिप्रसङ्गे वाचस्पतिमिश्रः कथयति—गुरुप्रभाकरः यद् ब्रह्मप्रतिपत्तौ विधिं स्वीकरोति, सा प्रतिपत्तिः किमुपनिषद्वाक्यजन्यब्रह्मविषयकशाब्दबोधभूता? अथवा शाब्दबोधानन्तरं ब्रह्मविषयकध्यानभूता चिन्तभूता वा? अथवा ब्रह्मसाक्षात्कारात्मिका? परन्तु प्रदर्शितासु तिसृषु प्रतिपत्तिषु कस्यामपि प्रतिपत्तौ विधिर्न भवितुमर्हति। एतासु प्रथमा श्रुतमयी, द्वितीया चिन्तामयी तृतीया च साक्षात्कारवती। श्रुतमय्यां प्रतिपत्तौ विधिर्न भवितुमर्हति, यतः ब्रह्मप्रतिपादकवाक्याद्वाक्यार्थबोधे विधेरपेक्षा नास्ति। यदि वाक्यार्थबोधेऽपि विधेरपेक्षा स्यात्तदा कर्मविधिरेव स्वार्थबोधार्थमन्यविधेरपेक्षां कुर्यात्। एवमेव सोऽप्यपेक्षितविधिः स्वार्थबोधेऽन्यं विधिमपेक्षेत सोऽपि चान्यमित्यनवस्था स्यात्। विधिवाक्येन विधेयवस्तुनोऽवगत्यनन्तरं प्रवृत्तिर्भवति, एतदेव

१. ननु नाप्रवर्त्तकम् निवर्त्तकं वा वचः समस्ति, वैयर्थ्यात् कर्त्तव्यतापर्यवसायिनी हि वाक्यप्रवृत्तिः। वि० वि० पृ० १९२

विधेः प्रयोजनम् । ब्रह्मविषयकशाब्दबोधानन्तरं कुत्र प्रवृत्तिर्भवेत् ? अतः शाब्द-बोधे विधिस्वीकारे विधे प्रयोजनं नास्तीति श्रुतमय्यां प्रतिपत्तौ विधिर्न भवितुमर्हति । न्यायकणिकायामग्रेऽप्युक्तम्—वेदान्तवाक्यस्य ब्रह्मप्रतिपत्तिविधिः प्रतिपत्तिविषयस्य ब्रह्मस्वरूपस्य अपेक्षां करोतीति ब्रह्मस्वरूपे वेदान्तः प्रमाणं स्यादित्यपि न समीचीनम्, यतः प्रतिपत्तिः समारोपिते विषयेऽपि स्यात्, अतः वेदान्तवाक्यस्य ब्रह्मपरत्वं न सिद्ध्यतीति वेदान्तस्य ब्रह्मविद्यात्वमेव न सम्भवेत् । "तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति—श्रुतमयी, चिन्तामयी, साक्षात्कारवती च । तत्र श्रुतमयीमधिकृत्याह—शब्दात्प्रतिपत्तेरुत्पत्तेः पुनस्तत्राव्यापारात्, न श्रुतमयी विधेया । शब्दाद्विधेयमवगम्यते उत्तरकाला प्रवृत्तिर्विधि-प्रयोजनं न पुनः शब्दावबोध एव आत्माश्रयदोषप्रसङ्गादिति भावः ।......अपि च प्रतिपत्तिविधिपरत्वे वेदान्तानां ब्रह्मस्वरूपसत्तायामप्रामाण्यप्रसङ्गः ।........ प्रतिपत्तिविषयो हि विधिः प्रतिपत्तिविषयमात्मतत्त्वमपेक्षते । तथा च तथात्मशब्दः प्रमाणमिति चेत् । न । आत्मतत्त्वमन्तरेण समारोपेणापि प्रतिपत्तेरुपपत्तेः । एवञ्च तत्परत्वाभावात् वेदान्तानां ब्रह्मविद्यात्वं बाध्येत ।" (न्या०क०पृ०१९३-५)

आचार्यमण्डनेनाप्युक्तं यत् वेदान्तवाक्यं यदि ब्रह्मप्रतिपत्तौ विधिप्रतिपादकं स्यात्, तदा तादृशवाक्यात् ब्रह्मप्रतिपत्त्यर्थमनुष्ठानस्यैव अवगतिः स्यात्, तथा च तादृशवाक्यात् आत्मतत्त्वस्य सिद्धिर्न स्यात् । एतदर्थम् आत्मतत्त्वस्य ब्रह्मतत्त्वस्य वा प्रतिपादके वेदान्तवाक्ये विधिसत्त्वेऽपि अविवक्षित एव विधिः ।

"क्रियापरत्वञ्च विधेर्वस्तुरूपसत्ताया अविवक्षितत्वात् तत्प्रतिपत्त्यर्थम् अनुष्ठानं गम्यते नात्मतत्त्वावबोधः स्यात् ।.........अतः श्रूयमाणो विधिरेवंजातीयकेषु विधानानर्हेष्वविवक्षितः । (न्या० क० पृ० १९४) यद्युच्येत—ब्रह्मप्रतिपादकवाक्यश्रवणे ब्रह्मविषयकं शाब्दज्ञानमुत्पद्यते । शाब्दज्ञाने विधेरावश्यकताया अभावेऽपि ब्रह्मविषयकशाब्दज्ञानाद्भिन्नं ब्रह्मविषयकं साक्षात्कारात्मकं ज्ञानं ब्रह्मगोचरं प्रत्यक्षज्ञानं वा विहितं स्यात्, ब्रह्म शाब्दज्ञानविषयं न भवितुमर्हति, यतः वाक्यार्थज्ञानमेव शाब्दज्ञानं पदार्थसंसर्गश्च वाक्यार्थः । उक्तसंसर्गज्ञानं संसृष्टानेकपदार्थविषयकं भवति । अतः निरस्तसमस्त-भेदप्रपञ्चं ब्रह्मतत्वमेतद्वाक्यार्थज्ञानस्य विषयः कथमिव स्यात् । अतएव एतावदद्वैततत्त्वावभासज्ञानं वाक्यजन्यज्ञानाद्भिन्नं तस्मिन्नेव च विधिः । "नन्वन्यदेवेदं शब्दप्रभवादात्मतत्त्वगोचरं ज्ञानं विधीयते । नहि शाब्दज्ञानपरिवेद्यं ब्रह्मस्वरूपम् । वाक्यलक्षणो हि शब्दः प्रमाणम्, पदार्थसंसर्गात्मा च तदर्थः, प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वम्, तत्कथमस्य गोचरः । तस्मात् प्रलीनसकलावच्छेदोल्लेखमद्वैततत्त्वावभासात्मकं ज्ञानमन्यदेव शब्दाद्विधीयते ।" (वि० वि० पृ० १९७)

प्रभाकराभिमतस्यैतस्य सिद्धान्तस्य खण्डनार्थं मण्डनाचार्य्यः कथयति— प्रभाकरस्य एतत्कथनमसङ्गतम्, अद्वैततत्त्वावभासात्मकः साक्षात्कारः विधेयो न भवितुमर्हति। यतः एतस्य अद्वैततत्त्वस्य साक्षात्कार एव फलम्, फलञ्च कदापि विधेयं न भवितुमर्हति। यद्धि अभिलषितं भवति, तत् फलातिरिक्तं किमपि नास्ति। अतः, अभिलषितस्य अन्यस्य वस्तुनोऽभावे फले विधिः कथमिव स्यात्। विधेयार्थस्यानुष्ठानेन अभिलषितफललाभो भवतीति विधेर्विधायकत्वम्, अद्वैततत्त्वलाभश्च स्वयमेव फलस्वरूपः, ततोऽन्यत्किमपि अभिलषितं फलं नास्ति। यदि प्रभाकरः कथयति–मोक्षस्य फलत्वमेवञ्च तत्प्राप्त्यर्थमेव विधिर्भविष्यति। तत्र मण्डनः प्रतिपादयति—तदपि न समीचीनम्, यतः मोक्षो हि निष्प्रपञ्चात्मतत्त्वावभासनात् नैव भिन्नः, सप्रपञ्चात्मतत्त्वावभास एव संसारः, निष्प्रपञ्चात्मतत्त्वावभास एव मोक्षः, अर्थात् आत्मस्वरूपविश्रान्तिरेव च मोक्षः। मोक्षस्य चान्यस्वरूपत्वे तादृशमोक्षस्य कार्यत्वमापतति। अविद्यात्मककर्मादिप्रपञ्च एव बन्धहेतुः अविद्योच्छेदश्च मोक्षः विद्या वा। "वार्त्तमेतत्, न खलु फलांशो विधिगोचरः। निष्प्रपञ्चात्मतत्त्वावभासश्च फलमेव, न ततोऽन्यदीप्सते। मोक्ष इति चेत्? ततोऽव्यतिरेकात्। सप्रपञ्चात्मतत्त्वावभासो हि संसारः। निष्प्रपञ्चात्मतत्त्वावभासो हि मोक्षः स्वात्मनि स्थितिः। अन्यथा कार्तत्वादमोक्षात्। बन्धहेतुश्च कर्म्मादिप्रपञ्चोऽविद्या, तदुच्छेदश्च विद्यैव। (वि० वि० पृ० १९७-९८) निष्प्रपञ्चात्मतत्त्वावभास एव मोक्षः न एतस्माद्व्यतिरिक्तः कश्चिदन्यः मोक्षः। एतस्य टीकायां वाचस्पतिमिश्रः—मोक्षः संसारविरुद्धस्वभावः। मोक्षस्य विरुद्धस्वभावताप्रदर्शनार्थमेव संसारप्रदर्शनम्। तस्मात् मोक्षः प्रवृत्तिविषयो न भवितुमर्हति, साध्यमेव प्रवृत्तिविषयभूतम् मोक्षो हि सिद्धस्वरूपः। मोक्षस्य सिद्धस्वरूपतायाः प्रदर्शनार्थमेव मोक्षः स्वात्मनि स्थितिरित्युक्तम्। मोक्षस्य सिद्धस्वरूपत्वप्रतिपादनेन मोक्षस्य साध्यत्वं खण्डितम्। अस्माभिः पूर्वमेव विवेचितं यत् प्रभाकरमते निष्प्रपञ्चं ब्रह्म शब्दज्ञानस्य विषयो न भवितुमर्हति। अत्र मण्डनाचार्यः कथयति—समस्तभेदप्रपञ्चरहितं ब्रह्म यदि शाब्दज्ञानस्य विषयो न भवति, तदा तादृशब्रह्मविषयकज्ञाने एव कथं विधिः स्यात्। यतः, विषयेणैव ज्ञानं निरूपितं भवति। निर्विषयकस्य ज्ञानस्य निरूपणं न भवितुमर्हति, अपितु सिद्धविषय एव ज्ञानस्य निरूपको भवति असिद्धविषयः ज्ञानस्य निरूपको न भवति। अत्र च ज्ञानस्य निरूपकं प्रपञ्चरहितं ब्रह्म, एतस्य च ब्रह्मणः सिद्धिः शब्दप्रमाणभिन्नेनान्येन प्रमाणेन न भवितुमर्हति। अतः, एतादृशस्य ब्रह्मणः शाब्दज्ञानाविषयत्वे एतस्य ब्रह्मणः सिद्धिरेव न स्यात्, ब्रह्मणोऽसिद्धौ च ब्रह्मविषयकज्ञानस्यापि सिद्धिः न स्यात्। अतः, ब्रह्मज्ञाने विधिर्न सम्भवति, तादृशब्रह्मणः शाब्दज्ञानाविषयत्वे ब्रप्रह्मातिपत्तिविषयकविधिर्न

सम्भवेत्। "यदि न कथञ्चिदपि शाब्दज्ञानविषयो ब्रह्म कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः। **विषयतश्च** ज्ञाननिरूपणम् सिद्धश्च तन्निरूपयति, तत्सिद्धिश्च प्रमाणान्तराऽभावात् स्यात्। तस्यापि चेदविषयः, तदसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विध्यप्रतिपत्तिः।" (वि० वि० पृ० १९८)

यद्यत्र प्रभाकरः कथयति—ब्रह्मस्वरूपस्य शाब्दज्ञानाविषयत्वेऽपि भेदप्रपञ्चप्रविलयेन तत् शाब्दज्ञानविषयो भविष्यति। अत्र मण्डनः समाधत्ते—तथासति ब्रह्म शाब्दज्ञानस्य अविषयभूतं न स्यात्। आत्मा ज्ञातव्यः, आत्मानमुपासीत इत्याद्युपनिषद्वाक्यं यदि ब्रह्मप्रतिपत्तिकर्तव्यतातात्पर्यकं स्यात्तदा ईदृशं ब्रह्म प्रतिपत्तव्यम् ब्रह्मणः ईदृशत्वम् इति उपनिषद्वाक्यस्यार्थ एव न स्यात्। यतः, यत्र वाक्यस्य तात्पर्यं तदेव तस्यार्थः। वचनस्य प्रतिपत्तिकर्तव्यतायां वाक्यस्य तात्पर्यमस्तीति ब्रह्मणः ईदृशत्वे वाक्यस्य तात्पर्यं नास्ति। अतः, वाक्यतात्पर्याविषयस्य ब्रह्मस्वरूपस्य वाक्येन सिद्धिर्नैव स्यात्। प्रतिपत्तिविधेः कर्तव्यतापरत्वेऽपि प्रत्येतव्यविषयपरत्वं नास्ति। अत्र प्रभाकरो वक्तुं **शक्नोति**-ब्रह्मणः **ईदृशत्वस्य** माभूत् वाक्येन सिद्धिस्तथापि अर्थादेव तस्य सिद्धिः स्यात्। यतः, प्रतिपत्तौ विधिसत्त्वेऽपि प्रतिपत्तिः प्रत्येतव्यविषयिणी स्यात्, तथा च प्रतिपत्तिकर्त**व्यतैव प्रतिपत्तिः** एवञ्च तद्विषयस्य ब्रह्मणः आक्षेपः स्यादिति प्रत्येतव्यब्रह्मतत्त्वस्य सिद्धिः स्यात्। अत्र मण्डनः समाधत्ते—एतन्न भवितुमर्हति, यतः **आरोपेणापि** प्रतिपत्तेः सम्भावना अस्ति, प्रतिपत्तेः कर्तव्यता प्रत्येतव्यस्य आक्षेपं कुर्यादिति तु सत्यम्, किन्तु प्रत्येतव्यस्य तथात्वस्य आक्षेपो नैव भवेत् समारोपेणापि प्रत्येतव्यस्योपपत्तिर्भवेदिति, अतः विधिवाक्येन वस्तुस्वरूपस्य सिद्धिर्नैव भवेत् **किमन्यत्, प्रतिपत्तिविधिः** प्रत्येतव्यविषये प्रमाणमपि नास्ति, तथा च समस्तभेदप्रपञ्चरहितस्य ब्रह्मणः सिद्धवस्तुस्वरूपत्वेऽपि शब्दव्यतिरिक्तान्यप्रमाणवेद्यत्वाभावात् **ब्रह्मणः** तादृशब्रह्मप्रतिपादकोपनिषद्वाक्यस्य विधिशून्यत्वेऽपि सिद्धब्रह्मस्वरूपप्रतिपादकत्वे न कश्चिद्दोषः। तस्मात् विधिशून्योपनिषद्वाक्यं तादृशब्रह्मस्वरूपे प्रमाणं स्यादिति। अत एव "चोदना हि भूतं भवन्तम्" एतस्य शाबरभाष्यस्य प्रभाकरकृता व्याख्या नैव समीचीना। "नाप्यर्थोऽर्थः, अध्यारोपेणापि प्रतिपत्तेः सम्भवात्। अतो न नियोगाऽनुप्रवेशेन वस्तुतत्त्वं प्रकाश्यते। न हि तत्र शब्दस्य प्रामाण्यम्। एवमनपेक्षतया प्रामाण्यसिद्धेः कार्याऽन्वयरहितभूतादिमप्यवगमयितुमलमाम्नाय इत्यसमञ्जसमेतत्। यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः? यस्माद्भूतादिकमर्थं चोदनैव गमयति। कथम्? कार्यमर्थमेवमवगमयन्ती भूतादिकमपि गमयति"। (वि० वि० १९८-९९) यदि कार्यरूप एव वेदार्थः तदा मन्त्रार्थवादोपनिषदादेः

भूतार्थप्रतिपादकवेदभागस्य प्रामाण्यं कथमिव स्यात् ? एतस्या आशङ्कायाः समाधानार्थं "चोदना हि भूतं भवन्तम्" इत्यादिशावरभाष्यस्य अवतारणां कृत्वा व्याख्याने कथयति—भूतादिरूपमप्यर्थं चोदनैव प्रतिपादयति। यदि भूताद्यर्थमपि चोदना प्रतिपादयेत्तदा वेदार्थमात्रस्य कार्यरूपता न सिध्यति। किञ्च भूतवस्तुनः **प्रतिपादने** भूतवस्तु प्रमाणान्तरविषयमिति अनपेक्षत्वलक्षणं प्रामाण्यमपि वेदस्य न स्यात्। अत्र समाधत्ते निबन्धकारः—"चोदना कार्यरूपस्य अर्थस्य अवगतिं कारयित्वा भूतादेरर्थस्याप्यवगतिं कारयति। शब्दो द्विविधः कार्याभिधायी लिङादिः, भूताद्यभिधायी च लङादिः। लिङादिप्रत्ययः कार्याभिधायी इति कार्यपरः लङादिश्च प्रत्ययः यद्यपि भूतादेरभिधायी तथापि कार्यान्वितभूतादेः प्रतिपादनं करोतीति परम्परारूपेण कार्यपर एव। तथा च भूतादेरभिधायिनः लङादेरपि कार्ये अर्थे तात्पर्यात् कार्यार्थत्वं सिध्यति। अत एव भूतादेरभिधायिनः लङादेरपि अनपेक्षत्वमस्ति। यदि कार्यासम्बद्धस्य शुद्धभूतवस्तुमात्रस्य प्रतिपादनं लङादिः कुर्यात्तदा प्रमाणान्तरसिद्धभूतवस्तुनः प्रतिपादकत्वात्सापेक्षः स्यात्। तथा सति तस्मिन् निरपेक्षत्वरूपं **प्रामाण्यं न स्या**दिति।

कार्यान्तरशून्योऽपि वेदः भूतादिवस्तुनः प्रतिपादको भवितुमर्हतीति। न्यायकणिकायां वाचस्पतिमिश्रः कथयति—"चोदना हि भूतं भवन्तम्" इत्यादिशाबरभाष्यस्य निबन्धनकारप्रदर्शितव्याख्या नैव समीचीना, अत एव आचार्यः मण्डनः "असमञ्जसमेतदि" त्युक्तवान्। एतदिति सर्वनाम्ना निबन्धनकारव्याख्या निर्दिष्टा। निबन्धनकारेण शाबरभाष्यटीकायामेवमुक्तम्। यदि कार्यरूप एव वेदार्थस्तदा भूतार्थप्रतिपादकमन्त्रार्थवादोपनिषद्वाक्यस्य कस्तावदर्थो भवेत्। निबन्धनकारो ह्येतदाशङ्क्या भाष्यवाक्यस्यावतारणां कृतवान्, व्याख्यायाञ्च कथयति—चोदनैव भूताद्यर्थस्य प्रतिपादिका। यदि चोदनैव भूताद्यर्थस्य प्रतिपादिका स्यात्तदा कार्यरूप एव वेदार्थो न भवति तथैव भूतार्थप्रतिपादकस्य वाक्यस्य अनपेक्षत्वमपि न स्यादित्येतदभिप्रायेण जिज्ञासां करोति कथम्? अर्थात् अर्थवादादिवाक्यं भूतार्थप्रतिपादकं कथं भवति? निवन्धनकारः समाधत्ते—चोदना हि कार्यार्थावगमिका सती भूतादिसिद्धवस्तुनोऽपि अवगतिं कारयति केवलं सिद्धवस्तुनः अवगमिका न भवितुमर्हति-एतत्पर्यन्तमेव निबन्धनकारस्य व्याख्या। आचार्यवाचस्पतिमिश्रः निबन्धनकारदृष्ट्या निबन्धनकारस्य व्याख्यां कृतवान्। "चोदना हीति भाष्यग्रन्थस्य..................तदिदमसमञ्जसम्। भूतार्थपरत्वेऽप्यनपेक्षत्वेन प्रामाण्योपपत्तेः"। (न्या० क० पृ० १९९)

आचार्यमण्डनः विधिविवेकग्रन्थे ब्रह्मसिद्धौ च निबन्धनकारस्य यद्धि वचनं उद्धृतवान् तद्वचनं प्रभाकरविरचिवृहतीटीकायां नोपलभ्यते, अतः प्रभाकर-

विरचितनिबन्धनग्रन्थः कश्चिदन्य एव किन्तु वृहतीग्रन्थें विवेचनसाम्यमस्ति । अत्र विधिविवेकग्रन्थस्य, ब्रह्मसिद्धिकारस्य मीमांसाबृहतीग्रन्थस्य च वाक्यमुद्ध्रियते– "यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः यस्माद् भूतादिकमर्थं चोदनैव गमयति । कथं ? कार्यमर्थमवगमयन्ती भूतादिकमपि गमयति ।" (वि० वि० पृ० १९९)

'कथं तर्हि मन्त्रार्थवादाः सोपनिषत्का इत्याशङ्क्य "चोदना हि भूतं भवन्तमि" त्याद्युक्तम् । एतदुक्तं भवति—कार्यमर्थमवगमयन्ती चोदनैव भूतादिकमप्यर्थमवगमयतीति ये मन्यन्ते तत्प्रतिबोधनाय प्रयत्यते ।" (ब्र० सि० पृ० ७४)

"चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः' इति कार्येऽर्थे वेदस्य प्रामाण्यं दर्शयति—'चोदना हि भूतमिति । यदि कार्य एवार्थे वेदस्य प्रामाण्यं कथं तर्हि भूताद्यर्थावगतिर्मन्त्रार्थवादेषु ? तेषामपि हि कार्यार्थतां द्वितीये पादे वक्ष्यति । तदुक्तं शक्नोत्यवगमयितुमिति ।" (वृहती १।१।२)

केचन प्राभाकराः कथयन्ति—निष्प्रपञ्चात्मतत्त्वसाक्षात्कारस्य फलत्वात् तत्र विधिर्न भवितुमर्हति इति सत्यम्, किन्तु निष्प्रपञ्चात्मतत्त्वविषयिका या चिन्तामयी प्रतिपत्तिः तत्र विधिस्वीकारे कापि बाधा नास्ति । निष्प्रपञ्चात्मतत्त्वविषयकशाब्दज्ञानधारैव चिन्ता । इयं शाब्दज्ञानधारैव ध्याननाम्ना उच्यते । ध्यानमेवात्र चिन्ता । ध्यानं चिन्तापरपर्यायः स्मृत्यनुकूलो व्यापारः । ध्यानं वा नैव फलम् अपि तु आत्मतत्त्वसाक्षात्काररूपफलस्य साधनम्, फलसाधनत्वाच्च तत्र विधिस्वीकारे न काप्यापत्तिः । "अन्ये तु शाब्दज्ञानसन्तानविधानमिच्छन्ति । तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात् । अत्रापि नात्मरूपावगतिः । ज्ञानप्रकर्षश्चाभ्यासनिबन्धनः प्रथित इति न चोदनार्थता । (वि० वि० पृ० २००)

प्रभारकसम्प्रदायस्य समाधानप्रसङ्गे आचार्यः मण्डनः कथयति—ज्ञानविधितात्पर्यकवाक्यात् ज्ञेयस्वरूपस्य सिद्धिर्न भवतीति पूर्वमेवोक्तम् । चिन्तारूपप्रतिपत्तौ विधिस्वीकारे चिन्तनीयवस्तुनः प्रकृतस्वरूपस्य एतद्विधिप्रमाणेन सिद्धिर्न स्यात्, यतः, चिन्तनीयवस्तुनः आरोपेणापि चिन्ता सिद्ध्यतीति चिन्तनीयविषयः प्रमाणसिद्धो न भविष्यति । प्रभाकरस्य एतन्मते अयं तावत् विशिष्टदोषः—चिन्ता चिन्तनीयवस्तुनः, ध्यानं ध्येयवस्तुनः प्रत्यक्षजनकं भवतीति अन्वयव्यतिरेकसिद्धत्वात् प्राप्तविषयेऽप्राप्तस्य प्रापको विधिर्न भवितुमर्हति । निरस्तभेदप्रपञ्चात्मतत्त्वस्य विधिनिरपेक्षोपनिषद्वाक्येनापि प्रतीतिर्जायते। अनेन प्रकारेण प्रतिपत्तिविधिप्रयुक्तप्रत्येतव्यवस्तुनः सिद्धिर्न भवितुमर्हति, तथा च प्रतिपत्तिविधिप्रयुक्तोपनिषद्वाक्यं प्रत्येतव्यब्रह्मणः प्रतिपादनं न करोति, अपि तु विधिनिरपेक्षोपनिषद्वाक्यमेव निष्प्रपञ्चब्रह्मणः आत्मनो वा प्रतिपादनं

करोति। प्रभाकरमतं स्वीकृत्यैवाचार्यमण्डनः कथयति—"अलं वा गुरुभिर्विवादेन" (वि० वि० पृ० २००) प्रतिपत्तिविधिप्रयुक्तप्रत्येतव्यवस्तु विधिनैव सिध्यति चेत्सिध्यतु मम का आपत्तिः।

ब्रह्मप्रतिपत्तिः यदि विधायकवेदान्तवाक्येन विहिता तदा विधायकवेदान्तवाक्यं प्रतिपत्तव्यनिष्प्रपञ्चे ब्रह्मणि प्रमाणं भवितुं नार्हति। निष्प्रपञ्चं ब्रह्म वेदान्तवाक्यरूपप्रमाणभिन्नान्यप्रमाणेन सिद्धं न भवितुमर्हति इति सर्वसम्मतम्, यदि वेदान्तवाक्येनापि निष्प्रपञ्चस्य ब्रह्मणः सिद्धिर्न भवेत्तदा ब्रह्मणः सिद्धिर्न जातेत्येव वक्तव्यम्। अतः निष्प्रपञ्चे ब्रह्मणि वेदान्तवाक्यानि न प्रमाणानि। केचन ब्रह्मप्रतिपत्तिकर्तव्यताप्रतिपादनव्याजेन ब्रह्मणि वेदान्तवाक्यस्य प्रामाण्यमेव नास्तीति प्रतिपादयन्ति।

"एवम्भूत आत्मा प्रतिपत्तव्यः" एतादृशप्रतिपत्तिविधिना आत्मा अपि एवम्भूत इत्यस्य सिद्धिर्न भवति, यतः यद्वस्तु यादृशं नास्ति तस्य वस्तुनः तेन रूपेण ज्ञानं भवितुमर्हति। "आत्मा विजरो विमृत्युः" अनेन विधिवाक्येन आत्मनः जराराहित्येन रूपेणापि ज्ञानं भवितुमर्हति एवमेव मृत्युयुक्तस्यापि वस्तुनः **जरामृत्युरहितरूपत्वेनापि** ज्ञाने का आपत्तिः। अतद्रूपवस्तुनि तद्रूपाध्यारोपेणापि ज्ञानस्य चर्चा श्रुतावपि बहुषु स्थानेषु उक्ता। यथा "मनो ब्रह्मेत्युपासीत" "योषा वाव गौतमाग्निः" इत्याद्यनेकश्रुतिवाक्येन यद्धि वस्तु यद्रूपं नास्ति तस्य वस्तुनः तेन रूपेण अवगतेश्चर्चा कृता। अतः, **जरामृत्युरहितत्वेन** रूपेण ब्रह्मणः ज्ञानं कर्तव्यमिति श्रुतौ कथनेऽपि आत्मा विजरो विमृत्युरिति सिद्धः स्यादिति वक्तुं नैव शक्यते अन्यवस्तुनि अन्यधर्मारोपेणापि ज्ञानं भवितुमर्हति। जैमिनिसिद्धान्तमवलम्ब्यैव प्रतिपत्तिविधिवादिनः आसीत् कदाचित्प्राबल्यम्, ते ब्रह्माद्वैतवादस्य समर्थनं प्रबलयुक्त्या कृतवन्तः।

अद्वैतवेदान्तिनः प्रदर्शितायाः आपत्तेः समाधाने प्रतिपत्तिविधिवादिनः कथयन्ति—ब्रह्मप्रतिपत्तौ विधिस्वीकारे ब्रह्मणः सिद्धिर्नैव स्यात् इति तु महदाश्चर्यम्। अन्यवस्तुनोऽन्यरूपेण ज्ञानमिति तु कस्मिन्नपि मते न सम्भवति, अन्यधर्मसमारोपेणान्यवस्तुनः ज्ञानं भवितुमेव नार्हति। अन्यवस्तुनः अन्यरूपेण ग्रहणे सति तज्ज्ञानमेव न भविष्यति। ज्ञानं कदापि विपरीतार्थकं न भवति—सर्वमपि ज्ञानं यथार्थमेव। अत एव प्रतिपत्तिविधिवादिनः अख्यातिवादिनाम्ना प्रसिद्धाः। अख्यातिवादस्य विस्तृतं विश्लेषणं बृहतीग्रन्थस्य १।१।५ अधिकरणे कृतम्। तथा च "आत्मा एवंरूपो ज्ञातव्यः" इति कथने सति आत्मनः एवंरूपता अवश्यमेव सिध्येत् अत्र नास्ति सन्देहः। ये अतथावस्तुनि तथाभावसमारोपं स्वीकुर्वन्ति तेषां मते ज्ञानविधिना ज्ञेयवस्तुनः सिद्धिः नापि भवितुमर्हति, किन्तु

ज्ञानं कदापि विषयव्यभिचारि न भवति। तथा च ज्ञानविधिवाक्यस्य ज्ञेय-स्वरूपे तात्पर्याभावेऽपि ज्ञानमहिम्नैव ज्ञेयवस्तुनः स्वरूपस्य सिद्धिः स्यात्। यद्वस्तु यद्रूपं नास्ति तत् तद्रूपेण कदापि विषयः न भवति, विषयं विनापि यदि ज्ञानं स्यात्तदा लोकव्यवहार एव उच्छिद्येत। ज्ञाने वस्तुनः भासमानत्वेऽपि ज्ञानस्य अन्यदेवालम्बनम्, यथा ज्ञाने रजतं भासते ज्ञानस्य आलम्बनञ्च शुक्तिका—एतच्च प्रतीतिविरुद्धम्। यद् वस्तु ज्ञाने भासते तदेव तस्य ज्ञानस्य विषयः आलम्बनम्, ज्ञाने यत् न भासते तत्तस्य ज्ञानस्य आलम्बनं विषयो वा इति स्वीकारे स्वानुभवविरोध एव भवति।

किञ्च विषयस्य व्यवहारार्थमेव विषयज्ञानस्यावश्यकता वर्तते। विषयाभावेऽपि यदि ज्ञानं स्यात्तदा ज्ञानं प्रति विश्वासः एव न स्यात्। आचार्यमण्डनः अख्याति-वादं खण्डयित्वा अन्यथाख्यातिं स्वीकृतवान् अनिर्वचनीयख्यातिमसौ नैव स्वीकृतवान्, अतः किम् उभयोर्विरोधो नास्ति। यद्यपि मीमांसकाचार्यैः ब्रह्मा-त्मैक्यं स्वीकृतम् तथापि अद्वैतवेदान्तिभिः सह ऐकमत्यं नास्ति। आचार्य-देशीयमतेन प्रभाकरमतस्यैव निर्देशं कृतवान् भामतीकारः। अमलानन्दः कल्प-तरौ प्रतिपत्तिविधिवादिमते आपातदृष्ट्या ब्रह्मात्मैक्यस्य सिद्धिर्भवतीति "अत्रापरे प्रत्यवतिष्ठन्ते" एतस्य पूर्वपक्षस्य सारसङ्कलनप्रसङ्गे उक्तवान्—

अयन्तु—सन्तु वेदान्ता मानं ब्रह्मात्मवस्तुनि।
किन्तु ज्ञानविधिद्वारेत्येष भेदः प्रतीयताम् (क० १।०।४) पृ० १०८

पूर्वपक्षो भवतु सिद्धान्तपक्षो वा प्रभाकरदृष्ट्या ब्रह्मात्मैक्यवादोऽद्वैतवाद एव वर्तते इत्यत्र नास्ति सन्देहः। मण्डनमिश्रः उत्तरमीमांसादृष्टया अद्वैतवादस्य मण्डनं कृतवान् किन्तु प्रभाकरः पूर्वमीमांसादृष्ट्यैवाद्वैतवादमुक्तवान्। पूर्वमीमां-सादृष्ट्या ब्रह्मात्मैक्यप्रतिपादनं न सम्भवतीत्येव प्रदर्शनार्थमद्वैतवेदान्ती प्रभाकर-मतस्य खण्डनं कृतवान्।

श्लोकवार्तिकस्य टीकाकारः सुचरितमिश्रः स्वप्रणीतकाशिकाटीकायां प्रभाकरमतं निर्दिष्टवान्—चोदनासूत्रस्य भाष्ये आचार्यः शबरस्वामी—"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नो-त्यवगमयितुम्" (जै० सू० १।१।२ भा०)। भट्टपादः प्रभाकरश्च एतस्य भाष्यस्य व्याख्यानं कृतवान्। भट्टपादसम्मतं व्याख्यानमेव समीचीनमिति प्रतिपादनार्थं सुचरितमिश्रः प्रभाकरसम्मतं व्याख्यानं प्रदर्श्य खण्डितवान्। तथाहि—चोदना हि भूतमित्येतस्य ये हि एवं कथयन्ति यत् वेदवाक्येन कार्यरूपार्थप्रतिपादनेऽपि भूतादेरर्थस्यापि अवगतिर्जायते वेदवाक्यं भूताद्यर्थस्य प्रतिपादकं नास्ति अपितु भूताद्यर्थस्यावगमकम्' कार्यरूपेऽर्थे एव वेदस्य तात्पर्यम्, भूतादिवस्तुनि वेदस्य

तात्पर्यं नास्ति। यस्य वाक्यस्य यस्मिन् अर्थे तात्पर्यं नास्ति तद्वाक्यं तस्य अर्थस्य प्रतिपादकं न भवति, वाक्यं तात्पर्यविषयीभूतस्यैवार्थस्य प्रतिपादकं भवति, वेदस्य कार्यरूपे एवार्थे तात्पर्यम्, तथा च वेदावाक्यं कार्यरूपस्यैवार्थस्य प्रतिपादकम्, भूतादिवस्तुनि वेदस्य तात्पर्यं नास्ति अतः वेदो भूताद्यर्थस्य प्रतिपादको नास्ति। वेदस्य भूतादिवस्तुनः प्रतिपादकत्वाभावेऽपि भूतादिवस्तुनः अवगमकत्वं भवितुमर्हति, तात्पर्याभावेऽपि अवगमकत्वे बाधा नास्ति। वाक्यस्य यत्र तात्पर्यन्तत्रैव तत्प्रमाणम्, तात्पर्यविषयीभूते एवार्थे वाक्यं प्रमाणम्, तात्पर्याविषये वाक्यं प्रमाणं न भवति। वेदस्य भूतादिवस्तुनोऽवगमकत्वेपि वेदवाक्यं भूतादिवस्तुनि प्रमाणं नास्ति[१] वेदवाक्यं यदि भूतादिवस्तुनः प्रतिपादकं न भवेत् तदा उपनिषद्वाक्यैः अनाद्यनन्तविज्ञानानन्दस्वरूपब्रह्मणः सिद्धिः कथमिव स्यात्। कस्मिन् च कार्यरूपेर्थे उपनिषद्वाक्यानां प्रामाण्यं स्यात्?

अत्र कार्यार्थतावादी प्रभाकरः कथयति—उपनिषद्वाक्यानां तादृशब्रह्मप्रतिपत्तिकर्तव्यतायामेव तात्पर्यमवगन्तव्यम्। उपनिषदि तादृशब्रह्मज्ञानविषयकं "आत्मा ज्ञातव्यः" इत्यादिविधिवाक्यं वर्तते। एतज्ज्ञानविषयकविधिवाक्यस्यायमर्थः—विज्ञानानन्दस्वरूपं ब्रह्म अवगन्तव्यम्। उपनिषद्वाक्यानां तादृशात्मस्वरूपे तात्पर्याभावे तादृशात्मस्वरूपस्य सिद्धिरुपनिषद्वाक्येन कथमिव स्यात्। अतात्पर्यविषये शब्दः प्रमाणं न भवति, भिन्नतात्पर्यविषयकं वाक्यं भिन्नेऽर्थे प्रमाणं न भवितुमर्हति, अपितु वैपरीत्यस्यैव सम्भावना वर्तते। लोकव्यवहारेऽपि यद्धि वस्तु यद्रूपं नास्ति तस्य तद्रूपेणावगत्यर्थमुपदेशो भवति। यथा यः पिता नास्ति तस्य पितृरूपेण ज्ञानस्योपदेशो लोके भवति। सुमित्रा लक्ष्मणं कथयति—"रामं दशरथं विद्धि" इति। केवलं लोकव्यवहारे एव न अपितु वेदेऽपि एतादृशः उपदेशः वर्तते—"ओमित्येतदक्षरमुद्गीथमुपासीत" ओङ्कारः उद्गीथः नास्ति तथापि अनुद्गीथस्योद्गीथरूपेण उपासना उक्ता। अत्र प्राभाकराः वदन्ति यत् उपनिषद्वाक्यानां विधावेव तात्पर्यमिति तादृशात्मस्वरूपस्य उपनिषद्वाक्येन सिद्धिर्माभूत् तथापि प्रमाणान्तरेण तादृशात्मतत्त्वस्य सिद्धिर्भविष्यति। अत्र एषः सन्देहः—प्रमाणान्तरेण कस्य प्रमातुः तादृशात्मस्वरूपसिद्धिः स्यात्। प्रमाता बद्धपुरुषः मुक्तपुरुषो वा। बद्धपुरुषस्य कृते प्रमाणान्तरेण तादृशात्मनः सिद्धिर्न भवितुमर्हति। यतः, संसारबद्धजीवः शरीरेन्द्रियादिसंघातव्यतिरिक्तस्य सच्चिदानन्दब्रह्मस्वरूपस्य साक्षात्कारं कर्तुं न शक्नोति बद्धजीवः शरीरमेव आत्मा इति जानाति, अतः तस्य कृते आत्मा दुःखी, अनित्यः, जडः इत्यादि-

---

१. काशिका पृ० ७० ।

२. काशिका पृ० ७०-७१ ।

रूपेणैवावगतो भवति[1]। एवमेव यः किल मुक्तः पुरुषः सोऽपि प्रमाणान्तरेण तादृशात्मानं ज्ञातुं न शक्नोति। यतः मुक्तः पुरुषः स्वरूपप्रतिष्ठो भवति। तेषामनाद्यविद्याप्रयुक्तं शरीरेन्द्रियादिनिखिलप्रपञ्चजातं चिरनिवृत्तं जायते। अतः मुक्तः पुरुषः प्रमितिप्रमातृप्रमेयप्रमाणादित्रिभागरहितः सुनिश्चलः आनन्दरूपफलीभूतब्रह्मभावे स्थितो जायते। अस्यामवस्थायां द्वितीयस्य वस्तुनोऽभावात् मुक्तः पुरुषः प्रमाणान्तरेण तादृशं ब्रह्म ज्ञातुं न शक्नोति। अतः ज्ञाने विधिस्वीकारे तादृशज्ञानेन ज्ञेयस्य तादृशात्मतत्त्वस्य सिद्धिर्न भवितुमर्हति। अत एव युक्त्या शास्त्रस्वरूपालोचनया वेदस्य कार्यार्थत्वं न भवितुमर्हति। तस्मात् भट्टपादसम्मत एवार्थः स्वीकरणीयः। उपनिषदा ब्रह्मात्मैक्यस्य सिद्धिर्न भवतीति प्रभाकरस्य व्याख्या नोपादेया। शाबरभाष्यस्य भट्टपासम्मतव्याख्यया उपनिषदा ब्रह्मात्मैक्यस्य सिद्धिर्भवतीति सुरचरितमिश्रः एतस्याः एव व्याख्यायाः समर्थनं करोति।

मण्डनमिश्रः विधिविवेकेऽधिकारविधिनिरूपणप्रसङ्गे भर्तृमित्रस्य मतं प्रदर्श्य खण्डयति—भर्तृमित्रः मीमांसकः सन्नपि आसीदद्वैताचार्यः। प्रभाकरापेक्षया भर्तृमित्रसिद्धान्तः आसीदनुकूलतरः अद्वैतस्य। सम्पूर्णस्य कर्मकाण्डस्य अधिकारसिद्धावेव पर्यवसानम्। शङ्करः मण्डनः अन्ये चाद्वैतवेदान्तिनः चित्तशुद्धिसम्पादकतया विहितकर्म एव आत्मज्ञानेऽधिकारं सम्पादयन्ति। विहितकर्मणा स्वर्गादेः फलस्य लाभो न भवति—इति ते न स्वीकुर्वन्ति अपि तु सर्वस्यापि विहितकर्मणः स्वर्गादिविशेषफलसत्त्वेऽपि विहितकर्मणा शुद्धचित्तः सन् पुरुषः आत्मज्ञाने अधिकारी भवति। आचार्यः शङ्करः नित्यस्य नैमित्तिकस्य वा कर्मणोऽनुष्ठानेन चित्तशुद्धिर्भवतीति कथयति, काम्यं कर्म स्वर्गादिफलस्यैव जनकं भवति, काम्यं च कर्म चित्तशोधकं न भवति। एतादृशमतभेदसत्त्वेऽपि विहितकर्मणः फलं चित्तशुद्धिरेवेति स्वीकरोति। सिद्धित्रयप्रणेता सुप्रसिद्धः यामुनाचार्य्यः स्वग्रन्थे अद्वैतवेदान्तिनामाचार्याणां नामोल्लेखप्रसङ्गे भर्तृमित्रस्यापि नामोल्लेखं कृतवान्। आचार्यः भर्तृमित्रः स्वीकरोति कस्यापि विहितकर्मणः किमपि फलं नास्ति। सर्वमपि विहितं कर्म केवलं रागादिदोषस्यैव निवर्तकं भवति. कर्मानुष्ठानेऽनुष्ठाता शान्तः दान्तश्च भवति, शान्तदान्तपुरुषस्यैव आनन्दस्वरूपनिष्प्रपञ्चात्मनः साक्षात्कारो भवति, अयं साक्षात्कार एव वेदप्रतिपाद्यः पुरुषार्थः। दुःखलेशरहितानन्दात्मकात्मसाक्षात्कार एव पुरुषार्थः। आत्मा निष्प्रपञ्च इति दुःखलेशरहितः एवम् आत्मा आनन्दस्वरूपः। बाह्यविषयैः सह रागद्वेषावेव आत्मसाक्षात्कारविरोधिनौ, विहितकर्मानुष्ठाने निरत-

१. काशिका पृ० ७१

पुरुषस्य बाह्यविषयैः सह रागद्वेषौ क्षीणौ भवतः, तथा च पुरुषः शान्तः दान्तश्च भवति। शान्तः दान्त एव पुरुषः आत्मज्ञाने अधिकारी। अशान्तः अदान्तः पुरुषः आत्मज्ञाने नैवाधिकारी जायते। विहितकर्मणा स्वर्गादिफस्य प्राप्तिर्भवति इति तु असङ्गतम्। धनपुत्रस्वर्गादिबाह्यविषयेषु जीवस्य रागः स्वभावतः प्रबलः, रागिपुरुषस्य धनादिषु प्रबलरागस्य सद्भावेऽपि कदाचित् काम्यधनादिलाभोपायाज्ञानात् प्रवलरागादि सोढुं बाध्यो भवति। शास्त्रं यदि काम्यवस्तुनः लाभोपायं निर्दिशति तदा शास्त्रं पुरुषस्य कृतेऽनर्थलाभसाधकं भवति। यथा कश्चित्पुरुषः रागवशात् दुष्टं वस्तु भक्षयितुमिच्छति, किन्तु तस्य वस्तुनः कुत्र उपलब्धिर्भवतीति न जानाति इति इच्छन्नपि असावनिष्टद्रव्यं न भुङ्क्ते, किन्तु कश्चित्पुरुषः तद्वस्तुनः प्राप्त्युपायं प्राप्तिस्थानं च निर्दिशति तदासौ रागी पुरुषः तदनिष्टं वस्तु अनायासेनैव प्राप्नोति भुक्त्वा च तत् अनिष्टफलमपि प्राप्नोति। शास्त्रमपि यद्येवमेतादृशकामिपुरुषस्य काम्यस्य बस्तुनः लाभोपायं वर्णयति तदा कथन्तच्छास्त्रं स्यात्। हितशासकमेव शास्त्रम् यद्यहितशासकमपि शास्त्रं स्यात्तदा अशास्त्रं किं स्यात्। कामिपुरुषस्य कृते कामोपहारप्रदानं रागिपुरुषस्य कृते रोगेन्धनसम्पादनम् शास्त्रस्य कार्यं न भवितुमर्हति। येन पुरुषः अरागः अद्वेषः किष्कामो भवेत्तदेव शास्त्रम्। एवमेव समस्तोऽपि कर्मकाण्डभागः आत्मज्ञानाधिकारसम्पादनार्थं पर्यवसानं लभते—अयं भर्तृमित्रस्याभिप्रायः। विहितकर्मणः पृथक् फलस्यास्वीकारे जीवस्य सुखं विहितकर्मफलमेवमेव निषिद्धकर्मणः फलं दुःखमित्यस्यापि सिद्धिर्न भवति। अतः भर्तृमित्रमते जीवस्य सुखं दुःखं च स्वाभाविकमेव इति स्वीकर्तव्म्। एतस्य स्वभाववादस्य समर्थनं करोतीति लोकायतमतमेव भर्तृमित्रमतम्। एतदर्थमेव भट्टपादः मण्डनमिश्रः अन्ये च आचार्याः एतन्मतं लोकायतमिति खण्डयन्ति। अवसाने मण्डनः कथयति—लोकायतमते यत् स्वीक्रियते वेदेऽपि स एवार्थः इत्येव स्वीकर्तव्यम्। "स्वाभाविकत्वाच्च फलोपभोगस्य स्वभाववाद एवाम्नायार्थश्छद्मना आश्रितः स्यात्"। (वि० वि० पृ० ३३५) "यागादीनामफलसाधनत्वे सेवादेश्च व्यभिचारादहेतुः (व्यभिचारादहेतुत्वे) सुखदुःखादिरेव स्वाभाविकलोकायतिकाभ्युपगताम्नायार्थः इति वचनव्यक्त्यन्तरेणाभ्युपगतं भवतीत्याह स्वभाविकत्वाच्च फलभोगस्य।" (न्या० क० पृ० ३१५)

भर्तृमित्रस्यापव्याख्यानफलेनैव वेदस्य कर्मकाण्डभागो लोकायतीकृतः। जैमिनिसूत्रस्य षष्ठाध्याये अधिकारविधेः निरूपणं वर्तते। मण्डनमिश्रः षष्ठाध्यायप्रतिपाद्यस्याधिकारविधेः आलोचनाप्रसङ्गे भर्तृमित्रमतं प्रदर्शितवान्। भाट्टाः हि भर्तृमित्रमतमेव पूर्वपक्षरूपेण स्वीकुर्वन्ति। विहितकर्मणः फलाभावे

कर्मणि अधिकार एव न सिध्येत् तथा च कर्मणां दृष्टरूपेणैव आत्मज्ञानाधिकारात्मकं प्रयोजनं स्यात् । बाह्यविषये रागद्वेषादेः निवृत्त्या आत्मज्ञाने अधिकारसिद्धिरेव कर्मविधिसमूहस्य प्रयोजनम् । "तथा च फलाभावादधिकाराभावः । न ह्यफलेषु कर्मसु कश्चिन्नियोज्यः स्वामी वा ।" (वि० वि० पृ० ३०९) दृष्टेनैव कर्मविधय आत्मज्ञानाधिकारप्रयोजनाः । (वि० वि० पृ० ३१५)

निष्प्रपञ्चानन्दस्वरूपात्मनः ज्ञानेऽधिकारसम्पादनमेव कर्मविधीनां फलम्, स्वर्गपुत्रादिलाभार्थं कर्मविधिर्नास्ति, अपि तु तादृशात्मज्ञानेऽधिकारसम्पादनार्थमेव कर्मविधीनां कथनं वेदे वर्तते । अनेनैव तात्पर्येण पूर्वपक्षिणा कर्मणोऽधिकारखण्डनार्थं बह्व्यः युक्तयः प्रदर्शिताः । भर्तृमित्रप्रभृतयः युक्त्या कर्मणि अधिकारखण्डनार्थमेव प्रवृत्ताः आसन् । किन्तु एतत्खण्डनं नैव तदुद्भावितमपि तु जैमिनेः षष्ठाध्यायप्रारम्भे "द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः" ६।१।१ एतत्सूत्रं पूर्वपक्षिणामेव प्राचीनतमाचार्यसम्मतमासीत् । एतस्य सम्प्रदायस्यैव भर्तृमित्रप्रभृतयः आचार्याः तत्त्वशुद्ध्यादिग्रन्थं लिखित्वा प्राचीनतमाचार्याणामाशयं प्रदर्शितवन्तः । संभाव्यते एतेन पूर्वपक्षिणामेव कदाचित्प्राबल्यमासीत् । ते हि बहूनां ग्रन्थानां निर्माणं कृत्वा प्रचलितसिद्धान्तमेव पूर्वपक्षरूपेण गृहीतवन्तः । यद्यपि भर्तृमित्रविरचिततत्त्वशुद्धिव्यतिरिक्तानां ग्रन्थानामुपलब्धिरिदानीं नास्ति तथापि आसन् केचन ग्रन्थाः प्राचीनाचार्यरचिताः इत्यनुमीयते ।

मण्डनमिश्रस्य भावनाविवेकग्रन्थादपि एतादृशपूर्वपक्षस्य रहस्यं मिलति । चलति, पचति इत्यादिक्रियाप्रतिपादकशब्दाः संयोगविभागाख्यगुणस्यैव प्रतिपादकाः, संयोगविभागरूपगुणव्यतिरिक्ता काचन क्रिया नास्ति । प्रत्यक्षेणापि संयोगविभागयोरेव प्रतीतिः जायते, संयोगविभागभिन्ना क्रिया न प्रतीयते । धातोरर्थः संयोगविभागाख्यः गुणः धात्वर्थातिरिक्ता अन्या क्रिया अपि नास्ति । अतः, प्रत्ययार्थः भावना प्रत्ययार्थभावनैव च क्रिया इति न सुसङ्गता ।" तस्मात् गुणविशेष एव धातूपादानः क्रिया, न तु तदतिरिच्यमानात्मा क्रियापदार्थः यः प्रत्ययस्य धातोर्वाऽभिधेयः स्यात् । (भा० वि० पृ० ३५) अत एव प्राचीनतमः मीमांसकः बादरिः द्रव्यगुणसंस्काराणामेवाङ्गत्वं प्रतिपादितवान् । तन्मते यागादिक्रिया नैवाङ्गभूता यतः यागादिक्रिया संयोगविभागव्यतिरिक्ता नास्ति । अत एव गुणतः पृथग्रूपेण क्रियायाः अङ्गत्वेन निर्देशो नास्ति, किन्तु जैमिनिः गुणव्यतिरिक्तां क्रियां स्वीकरोति । अत एव "द्रव्यगुणसंस्कारेषु बादरिः" एतस्य सूत्रस्य अनन्तरमेव "कर्मण्यपि जैमिनिः फलार्थत्वात्" (जै० सू० ३।१।४) इत्युक्तवान् । तेन च गुणव्यतिरिक्तस्य कर्मणोऽपि फलाङ्गत्वकथनं सुसंगतं भवति । मीमांसादर्शनस्य षष्ठाध्यायस्य प्रारम्भे "स्वर्गकामो यजेत" इत्याधिकारविधि-

वाक्यस्य कीदृशोऽर्थो भवेदिति निरूपणार्थं भाष्यकारेणोक्तम्—उक्तविधिवाक्यात् स्वर्गादिकर्मणः प्राधान्येन एवं यागादिकर्मणश्च प्राधान्येन प्रतीतिरस्ति ? अथ वा यागादिकर्मणोऽप्राधान्येन स्वर्गस्य च प्राधान्येन प्रतीतिः ? पूर्ववाक्ये स्वर्गकामः एवं यजेत इयि पदद्वयं वर्तते । पदयोश्च सम्बन्धः वर्तते इत्यवश्यमेव स्वीकरणीयम् । वाक्यान्तर्गतपदयोः परस्परं संसृष्टत्वाभावे एकवाक्यत्वमेव न स्यात्, यथा गौः अश्वः पुरुषः हस्ती—एतेषां चतुर्णां पदानां परस्परं सम्बन्धो नास्तीति एकवाक्यत्वमपि एतेषां नास्ति । "स्वर्गकामो यजेत" इति एकं वाक्यं पदार्थद्वयं च परस्परं सम्बद्धं सदेकस्य विशिष्टस्य अर्थस्य बोधकम् । सम्बद्धयोरुभयोः पदयोः कस्तावत्सम्बन्धः ? 'यजेत' पदान्तर्गतयज्धातोरर्थः यागः साध्यं साधनम्वा ? साध्यरूपेण प्रतीतः अर्थः प्रधानं साधनरूपेण प्रतीतः अर्थः अप्रधानम् । द्वयोः पदार्थयोः सम्बन्धे सति प्रधानभावेन अप्रधानभावेन च सम्बन्धः स्यात् । द्वयोरपि पदार्थयोः प्रधानभावेन अथवा उभयोरपि अप्रधानभावेन च सम्बन्धो न भवितुमर्हति । विशिष्टार्थे एकोऽर्थः प्रधानं विशेष्यम्वा स्यात् अन्योऽर्थोप्रधानं तस्य विशेषणम्वा स्यात् । वाक्यं क्रियाप्रधानमेकप्रयोजनकञ्च भवतीति वाक्यस्य स्वभावः । अर्थस्य चैषः स्वभावो यत् क्रिया स्वभावतः एव साध्यरूपा एवं द्रव्यञ्च स्वभावतः एव सिद्धरूपम् । साध्यस्वरूपा क्रिया स्वसिद्ध्यर्थं साधनरूपसिद्धस्वभावं द्रव्यमपेक्षते । सिद्धस्वभावं द्रव्यमेव साधनं भवितुमर्हति । असिद्धं साधनं भवितुं नार्हति । अत्र सिद्धस्वभावं स्वर्गद्रव्यं साध्यस्वभावायाः यागक्रियायाः साधनं स्यात्, किन्तु साध्ययागः सिद्धस्वर्गस्य साधनं न भवितुमर्हति, अतः स्वर्गेण यागः सिद्ध्यति किन्तु यागेन स्वर्गस्य सिद्धिर्न स्यात्, स्वर्गो यदि यागस्य साधनं स्यात्तदा स्वर्गस्य फलत्वमेव न स्यात्, साध्यमेव वस्तु फलं भवति । यागस्य साध्यत्वे याग एव फलं स्यात् फलस्यैव वाक्यार्थे प्रधानरूपेण प्रतीतिः भवति । स्वर्गः यदि यागसाधनं तदा स्वर्गः अप्रधानं स्यात् अप्रधानमेव च गुणशब्देनोच्यते । अतः प्रदर्शितवाक्यस्य यो हि अर्थः तत्र स्वर्गस्य फलत्वेन प्रधानत्वं न स्यात्, यागस्यैव फलत्वात् अर्थात् साध्यत्वात् प्रधानत्वेन प्रतीतिः स्यात् । तथा च स्वर्गफलस्य साधनं यागः इति एतस्य वाक्यस्य अर्थ एव नास्ति । स्वर्गः यागश्च उभयमपि फलमेवेति एकेन वाक्येन प्रत्येतुं न शक्यते । द्वयमपि साध्यं फलमेवेति स्वीकारे प्रदर्शितवाक्यस्य एकत्वं न स्यादपि तु द्वित्वं स्यादर्थाद्वाक्यद्वयत्वापत्तिस्तथा च वाक्यभेददोषः आपतति । स्वर्गं कुर्यात् यागं कुर्यात् एतादृशकथने 'स्वर्गकामो यजेत' एतद्वाक्यस्य अनुभवसिद्धमेकत्वं न स्यात् । साध्यस्य फलस्य वा भेदप्रयुक्तं वाक्यमपि भिन्नं स्यात् । "इह केचित् क्रियाप्रधानमेकार्थं वाक्यमिति । क्रियैव हि भाव्यते, स्वभावसिद्धं द्रव्यं गुणमिति वदन्तः फलस्यासमन्वयं वाक्ये मन्यन्ते । (वि० वि० पृ० ३०८-३०९)

"सर्वमेव हि क्रियाप्रधानमेकार्थमेकप्रयोजनं वाक्यं शब्दप्रवृत्त्यनुसारात्। वस्तुतोऽपि क्रियैव हि स्वभावतः साध्यरूपा भाव्यते, स्वभावसिद्धं तु द्रव्यं "भूतं भव्यायेति" न्यायात् तां प्रति गुणभूतं स्वर्गादीति वदन्तः फलस्यासमन्वयं मन्यन्ते। फलत्वेन तु सम्बन्धे स्वर्गादेस्तत्प्राधान्यात् क्रियाया न प्राधान्यम्। उभय-प्राधान्ये च एकार्थत्वं लोकावगतमपहीयेतेति भावः।" (न्या० क० पृ० ३०९) अनेन रूपेण स्वर्गः फलं न भविष्यतीति स्वर्गफलकामिनः यागे अधिकारोऽपि न सिध्येत्। निष्फले कर्मणि कोऽपि अधिकारी स्वामी वा न भवितुमर्हति। "तथा च फलाभावादधिकाराभावः। न ह्यफलेषु कर्मसु कश्चिन्नियोज्यः स्वामी वा।" (वि० वि० पृ० ३०९) मीमांसासूत्रेऽपि एतादृशी चर्चा वर्तते–"द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः" (मी० सू० ६।१।१) स्वर्गादिद्रव्यं यागादिकर्मणा सह गुण-भावेन अर्थात् अप्रधानभावेन सम्बद्धं स्यात्, किन्तु रूपेण अर्थात् प्रधानरूपेण सम्बद्धं भवितुं नार्हति। भर्तृमित्रप्रभृतयः मीमांसायाः यस्य सूत्रस्योल्लेखं कृत-वन्तः तत्सूत्रं यागादिकर्मणः स्वर्गादिफलसाधनता इति अधिकरणस्य पूर्वपक्ष-सूत्रम्। जैमिनेः पूर्वपक्षः एव भर्तृमित्रादीनां सिद्धान्तपक्षः। "स्वर्गकामो यजेत" एतद्वाक्यस्वभावस्य एतद्वाक्यसाम्र्थ्यस्य वा आलोचनायां प्रदर्शित एवार्थोऽव-गतो भवति। वस्तुनः सामर्थ्यस्य आलोचनायाः स्वर्गादिद्रव्यं यागादिकर्मणः फलं भवितुं नार्हति। 'यजेत' इति पदं यज्धातोः 'इत' एतद्विभक्तियोगेन निष्पन्नं भवति। विभक्तेः अर्थः भावना पुरुषस्य प्रयत्नो वा। यज्धातोरर्थः यागः। पुरु-षस्य प्रयत्नः यागविषयकः एव स्यात् स्वर्गविषयको न भवितुमर्हति। पुरुषप्रयत्न-निष्पाद्यं यागाख्यमेव कर्म, स्वर्गः पुरुषप्रयत्ननिष्पाद्यो नास्ति। पुरुषः स्वप्रयत्नेन यागादिक्रियामेव सम्पादयति न तु स्वर्गं निष्पादयति। यतः स्वर्गविषयकः पुरुष-प्रयत्नोऽसम्भवः एव, अतः पुरुषप्रत्नेन सह स्वर्गादिफलस्य सम्बन्धः असम्भव एव। पुरुषप्रयत्नस्य निष्पाद्यत्वेऽपि पुरुषप्रयत्ननिष्पन्नयागेन स्वर्गादेः सिद्धिः स्यात्, प्रयत्नसिद्धः यागः स्वर्गादिफलस्य साधनं करणं वा स्यादेव, तथा च स्वर्गादिफलेन सह यागादिकरणस्य सम्बन्धोऽपि भवितुमर्हतीति कथनमपि असङ्गतम्। यतः, व्यापारवत्कारणमेव करणं भवति। यागः यदि स्वर्गफलस्य करणं स्यात्तदा यागेऽपि स्वर्गफलजनकव्यापारः स्वीकरणीयः, व्यापारशून्यं वस्तु करणं भवितुं नार्हति, स्वर्गफलजनकव्यापारश्च यागादिक्रियायां न दृश्यते, अतः, व्यापारशून्यो यागः स्वर्गफलस्य करणं न भवितुमर्हति। "एवं तावद् द्रव्याणां कर्मसम्बन्धे गुणत्वेनाभिसम्बन्धो न फलत्वेन इति युक्तम्। वस्तुतश्च न सम्बन्धः फलत्वेन, पुरुषप्रयत्नस्य यागादिविषयत्वात् स्वर्गाद्यसम्बन्धाद्यागादेश्च व्यापारान्तरादर्शनात् करणत्वानुपपत्तेः।" (वि० वि० पृ० ३१०)

"पुरुषप्रयत्नस्य भावनाया यागादिविषयत्वाद्धेतोः स्वर्गाद्यसम्बन्धात्। न जातु पुरुषः स्वर्गे व्याप्रियमाण उपलभ्यते अपि तु यागे। ततश्च याग एवतस्य साध्यो न स्वर्गः। अथ पुरुषप्रयत्नसाध्योऽपि यागः फलं प्रति करणं भविष्यति ततः सम्बन्धः उपपत्स्यते इत्यत आह—यागादेश्च व्यापारान्तरादर्शनात् करणत्वानुपपत्तेः। करणत्वं हि क्रियायोगेन व्याप्तं स चादर्शनात् यागादेर्निवृत्तः करणत्वमपि निवर्तयतीत्यर्थः।" (न्या० क० पृ० ३११) यद्युच्येत 'यजेत स्वर्गकामः" अनेन वाक्येन यागो विहितः, अनेन विहितेन यागेन यदि एतद्वाक्यनिर्दिष्टं फलं न स्यात्तदा यागे विधिरस्तीति विश्वजिन्यायेन जन्यफलस्य कल्पना स्यात्। "विश्वजिता यजेत" अस्मिन् वाक्ये कस्यापि फलस्य निर्देशाभावेऽपि यागे विधिरस्तीति विधिसामर्थ्यवशादेव स्वर्गफलकल्पना जायते, तथैव "स्वर्गकामो यजेत" अस्मिन् वाक्ये नापि यागे विधिरस्तीति अन्यफलकल्पना स्यात्, किन्तु एतदपि नैव सङ्गतम्, यतः "यजेत स्वर्गकामः" अस्मिन् वाक्ये यथा श्रुतस्वर्गोपि विहितयागसाध्यत्वेन वा अन्वितो न भवति तथैव विश्वजिन्यायानुसारं कल्पितस्वर्गोऽपि फलत्वेन साध्यरूपत्वेन वा विहितयागेन सह अन्वितो न भवितुमर्हति। फलेन सह विहितयागस्य साध्यसाधनभाव एव सम्बन्धो भवितुमर्हति अर्थात् स्वर्गादिफलं साध्यं विहितयागश्च साधनम् किन्तु, एतन्न भवितुमर्हति। यतः "यजेत" इत्यनेन यागः साध्यरूपेण प्रतीयते, साध्ययागस्य फलसाधनत्वं कथमिव स्यात्? साध्यत्वं साधनत्वञ्च विरुद्धधर्मः। असिद्धमेव साध्यमेवं सिद्धवस्तु एव साधनं भवति, यागादिक्रिया साध्यस्वभावा, तस्मिन् साधनत्वं कथं स्यात्। अतः यागादिक्रियायाः साधनत्वमेव दुर्बोधम्, अर्थात् साधनत्वमेव सिद्धं न स्यात्। "यजेत" इति यज् धातुः एकदैवोच्चारितः। एकदैवोच्चारितः एकदैव श्रुतः यज् धातुः परस्परविरुद्धेन साध्यत्वेन साधनत्वेन च रूपेण यागस्य अवगतिं नैव कारयितुं शक्नोति। "यजेत" इति कथनेन यागस्य साध्यत्वमेव प्रतीयते। साध्यरूपेण प्रतीतस्य यागस्य साधनत्वेन रूपेण प्रतीतिः कथमिव स्यात्? "न विधिसामर्थ्यादन्यदपि फलं तस्याप्येवमसमवायात् वैरूप्यात् साधनभावस्य दुरवबोधत्वात्।" (वि० वि० पृ० ३१२)

"यागश्च विधिसाथ्यात्तु विश्वजिदादिवत् कल्पितेन फलान्तरेण संभन्त्स्यते इत्यत आह—न विधिसामर्थ्यादन्यदपि फलम्। कुतः? तस्याप्येवं श्रुतफलपदासमवायात्। कुतः? वैरूप्याद्धेतोः साधनभावस्य दुरवबोधत्वात्। न जातु सकृदेव श्रुतो यागः साध्यं साधनञ्चेत्युपपद्यते विरोधात्। तस्मात् साधनभावो दुरवबोधः साध्यत्वेन श्रुतस्य यागस्येति।" (न्या० क० पृ० ३१२)

यद्युच्येत "यजेत" इति शब्देन यागस्य साध्यरूपेण प्रतीतावपि अर्थापत्त्या फलं प्रति यागः साधनं भवितुमर्हति। शब्दप्रमाणेन यागः साध्यरूपेण अर्थापत्त्या

च यागः साधनरूपेण प्रतीयेत । एकेन प्रमाणेन साध्यत्वस्य साधनत्वस्य च यागे प्रतीतिर्न भवितुमर्हति, वैरूप्यापत्तेः किन्तु भिन्नेन प्रमाणेन यागे फलसाधनत्वप्रतीतौ पूर्वोक्तदोषो न संघटते । पूर्वोक्तविश्लेषणेन यागे फलसाधनतायामर्थापत्तिरेव प्रमाणम् किन्तु चोदना अर्थात् विधिः प्रमाणं नास्ति इत्येव मन्तव्यम्, तथा च धर्मे विधिवाक्यमेव प्रमाणमिति तव प्रतिज्ञायाः विरोधः स्यात् । यागादिकर्मणः फलसाधनत्वाभावेऽपि विधिवाक्येन यागादेः साध्यत्वप्रतीतौ न कोऽपि दोषः । तथा च अर्थापत्त्या यागादेः फलसाधनतायाः सिद्धिः न स्यात्, अफलं च कर्म प्रवृत्तेः कारणं न भवतीत्यपि न सुसङ्गतम्, यतः, निष्फलेऽपि कर्मणि लोकानां प्रवृत्तिर्न भवतीति स्वीक्रियते तदा "न कुर्वीत वृथा चेष्टाम्" इति धर्मशास्त्रिणा कथं निषिद्धम् ? निष्फले कर्मणि यदि केषामपि प्रवृत्तिर्न स्यात्तदा पूर्वोक्तः निषेधः व्यर्थ एव स्यात् । विहितनिष्फलकर्मातिरिक्तं रागप्रयुक्तं निष्फलं कर्म न कुर्यात्—इत्येवोक्तनिषेधवाक्यस्याभिप्रायः । "नार्थापत्तितः । चोदनालक्षणत्वहानेः तस्याः साध्यपर्यवसानात् । अफलस्य कर्मणो लोके साध्यत्वादृष्टेः । साधनत्वस्य च साध्यपुरःसरत्वादर्थात्तदाक्षेपायोगात् । साध्यत्वस्य पुरोभाविनः साधनत्वाक्षेपासामर्थ्यात् ।" (वि० वि० पृ० ३१२) चोदनातः साध्यत्वेन प्रतीतस्य यागादेरर्थापत्तितः फलं प्रति साधनत्वं गम्यते माभूद्वैरूप्यम्, इत्यत आह—नार्थापत्तितः । कुतः ? चोदनालक्षणत्वहानेः । फलसाधनता चेदर्थापत्तिगम्या चोदनालक्षणत्वं न स्यात् । ततश्च चोदनैवेति प्रतिज्ञाव्याघातः ! न चार्थापत्तेश्चोदनामूलतया तद्विषयश्चोदनालक्षण इति साम्प्रतम् । चोदनाया यागादिसाध्यमात्रपर्यवसितायाः फलसाधनतामन्तरेणोपपत्तेरर्थापत्तिमूलत्वाऽभावादित्याह—साध्यत्वपर्यवसानात् । अथाफलस्य साध्यत्वं चोदनाप्रतीतमनुपपन्नमिति चोदनैव साध्यत्वप्रतिपादिकाऽपर्यवस्यन्ती फलकल्पनाबीजमिति तत्राह—अफलस्य कर्मणो लोकसाध्यत्वेनादृष्टेः । यत्किल धर्मशास्त्रकारो निषेधति 'न कुर्वीत वृथा चेष्टामिति' । (न्या० क० पृ० ३१२)

यदि "यजेत स्वर्गकामः" इति विधिवाक्येन यागादिधात्वर्थस्य साध्यतामात्रेणैव प्रतीतिर्जायते न तु यागादिधात्वर्थे स्वर्गादिफलस्य साधनता प्रतीयते तदा विधिः कथमिव स्यात् ? अभिमतसाधनत्वमेव लिङादिविधिप्रत्ययस्य अर्थः इति यदुच्यते मीमांसकैः तन्न समीचीनम् । यतः प्रवर्तनैव विधिप्रत्ययस्यार्थः । विधिशब्दः पुरुषस्य अर्थमनर्थं वा न स्पृशति । यद्यपि प्रवृत्तिहेतुरेव प्रवर्तना, इष्टसाधनत्वमपि प्रवृत्तिसाधनमेव, तथापि लिङादिविधिप्रत्ययः साधारणरूपेण प्रवृत्तिहेतुत्वरूपेणैव प्रवर्तनायाः बोधकः भवति, प्रार्थना, अनुज्ञा एवम् उपदेशः इत्येतेषु चतुर्षु अर्थेषु एव विधिशब्दः प्रयुक्तः भवति, आज्ञादिचतुर्षु अर्थेषु एव प्रवृत्तेर्हेतुता वर्तते । आज्ञया प्रवृत्तिर्भवति सा सकलानुभवसिद्धा ।

आज्ञापयिता प्रार्थयिता च स्वेष्टसाधनत्वस्य प्रतिसन्धानं कृत्वा आज्ञां प्रार्थनां वा करोति । यं प्रति आज्ञां प्रार्थनां वा करोति तस्य आज्ञाप्यस्य प्रार्थनीयस्य वा पुरुषस्य इष्टसाधनत्वस्य प्रतिसन्धानं कृत्वा आज्ञां प्रार्थनां वा न करोति। स्वामी भृत्यमाज्ञापयति—"गामानय" । अत्र स्वामी स्वकल्याणमनुसन्धायैव भृत्यमाज्ञापयति । सम्भवति आज्ञापालनेन भृत्यस्यापि इष्टसाधनत्वम् तथापि आज्ञा भृत्यस्य इष्टसाधनतां नैव प्रतिपादयति । प्रमाणान्तरेणैव आज्ञापालकस्य भृत्यस्य इष्टस्य ज्ञानं जायते । एतादृशप्रार्थनायामपि प्रार्थयितुः इष्टसाधनत्वमेव प्रतीयते । प्रार्थनीयपुरुषस्य कल्याणं प्रति लक्ष्यं कृत्वा प्रार्थना नैव प्रयुज्यते । यथा—"माणवकमध्यापय" इत्यस्यां प्रार्थनायां प्रार्थनीयस्य गुरोः इष्टस्य प्रतिसन्धानं नास्ति । प्रार्थयिता स्वेष्टस्य सिद्ध्यर्थमेव प्रार्थनां करोति । आज्ञया प्रार्थनया च उपदेशः भिन्नः । उपदेष्टा स्वेष्टमभिसन्धाय नैवोपदिशति । अपि तु उपदेश्यपुरुषस्य इष्टसाधनतायाः एव प्रतिसन्धानं कृत्वा उपदेशं करोति, यथा—"ज्वरितः पथ्यमश्नीयात्" ज्वररोगयुक्तस्य पुरुषस्यैव इष्टसाधनतायाः प्रतिपादनं करोति न तु उपदेष्टा आत्मनः इष्टमभिसन्धाय उपदेशं करोति । अनुज्ञायामनुज्ञाता आत्मनः इष्टसाधनतामनुसन्धाय अनुज्ञां नैव करोति अपितु अनुज्ञेयपुरुषस्यैव इष्टसाधनत्वमवगत्य अनुज्ञां करोति । उपदेशे अनुज्ञायाञ्चैष एव भेदो वर्तते यत् अप्रवृत्तं पुरुषं प्रवर्तयति उपदेशेन उपदेष्टा, स्वेच्छया प्रवृतः पुरुषः अनुज्ञया प्रवर्तितो भवति । स्थलविशेषे च अनुज्ञायामपि अनुज्ञातुः पुरुषस्य इष्टसाधनत्वस्य प्रतिसन्धानं वर्तत एव । विधिविभक्तेः पूर्वोक्तविश्लेषेणेन सन्ति चत्वारोऽर्थास्तथा प्रवर्तनारूपं चतुर्ष्वपि अनुस्यूतं वर्तते । आज्ञा प्रार्थना नास्ति तथापि प्रवर्तना अस्त्येव । आज्ञा, प्रार्थना उपदेशश्च अप्रवृत्तप्रवर्तना किन्तु अनुज्ञा प्रवृत्तप्रवर्तना इयान् एव भेदः, प्रवर्तना तु चतुर्ष्वपि वर्तते । आज्ञादिकं प्रवर्तनाया एव विशेषरूपम् । सामान्यरूपेण प्रवर्तना सर्वत्रैव विद्यतेऽतः प्रवर्तनैव विधिशब्दार्थस्तथा चानेकार्थत्वरूपः दोषः शब्दे स्यात् एकार्थत्वे सम्भवति शब्दस्य अनेकार्थत्वं नैव स्वीकर्तव्यम्[१] । एकस्य शब्दस्य अनेकार्थेषु शक्तिस्वीकारे शक्तिकल्पनायां गौरवं स्यात् । "यजेत स्वर्गकामः" अनेन वाक्येन यागः स्वर्गसाधनमेषोऽर्थः कथमपि भवितुं नार्हति । तथा च यागादिकर्म निष्फलमेव स्यात् । अनेन प्रकारेण कर्मविधायकं किमपि वाक्यं फलसाधनकर्मणः प्रतिपादनं कर्तुं

१. "कथं तर्हीदानीं विधिः ? किमत्र कथम् ? प्रवर्तनामात्रं विधिर्न्न पुरुषार्थानर्थौ स्पृशति । कुतः ? प्रतीतेरव्यभिचाराच्च । तथा च लिङ्गादिभ्यः प्रेरणावगमः । यद्यपि चेष्टसाधनता प्रवृत्तिहेतुः । शब्दस्त्वनामृष्टतद्रूपः प्रवर्तनामात्रस्य चाऽव्यभिचारात् । अनेकार्थत्वदोषात् । वि० वि० पृ. ३१३

न शक्नोति। किमपि विहितं कर्म फलस्य जनकं भवितुं नार्हति। तथा च निष्प्रयोजनस्य कर्मण उपदेश एवनस्यात् यतः निष्फलकर्मणः उपदेशे उपदेश एव अनर्थकः भवेत्। अत्रेदं वक्तव्यं यत् निष्फलर्मणः उपदेशस्य यदि किमपि प्रयोजनं स्यात्तदा उपदेशः निरर्थकः कथं स्यात्? यदि प्रयोजनं न स्यात् तदा निरर्थक एव स्यादत्र किमु वक्तव्यम्? कर्मोपदेशस्य प्रयोजनं हि आत्मज्ञाने अधिकारसिद्धिरेव। कथं सर्वस्यापि कर्मविधेः एकमात्रं प्रयोजनम् आत्मज्ञाने पुरुषस्य अधिकारसिद्धिः? एतस्य समाधानप्रसङ्गे विधिविवेके उक्तं मनुष्यः विविधविषयरागसम्पन्नः सन् एव जन्मग्रहणं करोति। जीवस्य विषयरागः स्वाभाविकः, वीतरागपुरुषस्य जन्म न भवति। स्वभावसिद्धविषयरागप्रयुक्तः पुरुषः स्वीयरागस्य धनपुत्रकलत्रादेः लाभार्थं कृषिवाणिज्यादौ एवमेव स्तेयद्यूनमृगयादौ दृष्टसाधने अनुरक्तः स्यात्। दृष्टे विषयेऽतिशयानुरागप्रयुक्त एव विषयप्राप्तिसाधनेषु नितान्तमनुरक्तः जायते। अतः शास्त्रे निष्प्रपञ्चानन्दस्वरूपात्मतत्त्वस्य उपदेशोऽपि तादृशात्मतत्त्वस्य ज्ञानार्थं तत्प्रणिधानार्थं वा प्रवृत्तिर्नैव स्यात्। विषयरागयुक्तस्य पुरुषस्य तादृशात्मतत्त्वस्य साक्षात्कारस्तु सुदूरपराहत एव। कर्मणामुपदेशेन शास्त्रं मनुष्यस्य स्वाभाविकप्रवृत्तेः निवृत्तिं सम्पादयति। शास्त्रोपदिष्टे कर्मणि सततं निरतः सन् पुरुषः अनुशिष्टो भवति विषयरागश्च क्रमशः शान्तो भवति। स्वभावतः मनुष्यः पुत्रकलत्रपरिजनादिचिन्तायां नियुक्तः सन् अपि शास्त्रोपदिष्टे कर्मणि सततं निरतः परिजनचिन्तायां पूर्ववदभिनिविष्टः न भवति। शास्त्रीयकर्मपद्धतौ व्यवस्थितः सन् दान्तो जायते। काम्यचिन्तया चित्तं व्याकुलं न भवति। एतस्यामेवावस्थायां शास्त्रोपदिष्टनिष्प्रपञ्चात्मतत्त्वज्ञानार्थं प्रणिधाने समर्थो भवति। अनेन रूपेण कर्मविधिः फलसाधनकर्मणि पुरुषस्य कृतेऽधिकारसिद्धिमकृत्वा एव रागनिवृत्तिपूर्वकं निष्प्रपञ्चात्मनः ज्ञाने पुरुषस्य अधिकारं साधयति[1]। एतादृशार्थस्वोकारे एव शास्त्रस्य शास्त्रत्वं सिद्ध्यति। येन नियोज्यस्य पुरुषस्य अनुशासनमथवा येन पुरुषस्य हितानुशासनं जायते तदेव शास्त्रम् शास्त्रीयप्रवृत्तेरुपदेशेन पुरुषस्य स्वाभाविकीं प्रवृत्तिं निवर्तयति। स्वाभाविकप्रवृत्तिः परिणामदुःखेन, तापदुःखेन च विमिश्रिता वर्तते। एतत्त्रिविधदुःखात्मिकया प्रवृत्त्या निवृत्तं कृत्वा शास्त्रं नियोज्यपुरुषस्य अनुशासनमेव करोति, तेनैव च शास्त्रस्य शास्त्रत्वं रक्षितं भवत्ति। निष्प्रपञ्चनित्यानन्दस्वरूपात्मनः ज्ञानेऽधिकारसिद्धौ सत्यां कर्मविधिः हितस्यापि उपदेशको भवति। हितानुशासकमेव शास्त्रम्, आत्मनः ज्ञानापेक्षया किमन्यद्धितं स्यात्[2]। यन्मते विहितं कर्म

---

१. वि० वि० पृ० ३१३—१४।

२. वि० वि० पृ० ३१४, न्या० क० पृ० ३१४।

पुत्रधनस्वर्गादिः साधनम्, स्वर्गादिफलसाधनतैव कर्मणो वर्तते इत्येव सिद्धान्तः तन्मते कर्मप्रतिपादकस्य वेदस्य शास्त्रत्वमेव नास्ति । प्रकारान्तरेण कर्मशास्त्रस्य अशास्त्रत्वमेव ते स्वीकुर्वन्ति । पुत्रधनस्वर्गादेः विहितकर्मणः फलत्वे एतदवश्यमेव स्वीकर्तव्यम् यत् मनुष्याणामेतेषु सर्वेष्वपि फलेषु स्वाभाविकः रागः कामना वा वर्तते। तथा च स्वभावसिद्धरागविषये प्रवृत्तिरपि स्वाभाविकी। काम्यफलस्य साधनापरिज्ञाने साक्षात्फले प्रवृत्तिर्न भवितुमर्हति। शास्त्रमेतेषां काम्यफलानां साधनं प्रतिपाद्य पुरुषस्य स्वाभाविकप्रवृत्तौ साहाय्यं कुर्यात्। तदा शास्त्रस्य शास्त्रत्वमेव निवर्तेत। स्वेच्छावशात् प्रवृत्तौ साहाय्यस्य सम्पादकं शास्त्रं न भवति। न तदनुशासकं जायते। एतादृशेन च शास्त्रेण नैव पुरुषः अनुशिष्टो भवति। कर्मविधिसमूहस्य आत्मज्ञानेऽधिकारसिद्धिः एव प्रयोजनम्, किन्तु एतत्कथनमसङ्गतमेव। यतः कर्मविधिना यदि विहितं कर्म एव साध्यम्, स्वर्गादिफलं न साध्यं तदा ज्ञानविधिना मोक्षफलस्य सिद्धिः कथं भवेत् ? यथा कर्मविधिना कर्मण एव साध्यत्वं प्रयीयते। तेन च मोक्षफलं न सिद्ध्यति, कर्मविधिः यथा कर्मणि प्रवर्तनामवगमयति तथैव ज्ञानविधिरपि ज्ञाने प्रवर्तनामवगमयेत्। कर्मविधेः ज्ञानविधेश्च एकैवावस्था स्यात्। एतदपि कथनं न सुसङ्गतम्। यतः ज्ञानं दृष्टार्थम् अर्थात् यद्यपि विधिशब्देन ज्ञानस्य सम्बन्धो नास्ति, ज्ञानविधिः ज्ञानस्यैव साध्यत्वं प्रतिपादयति तथापि ज्ञानं ज्ञेयतन्त्रम्। ज्ञेयवस्तु यादृशं स्यात् तज्ज्ञानमपि तथैव भवेत्। ज्ञेयनिरपेक्षः ज्ञानाकारो नैव भवितुमर्हति। "नन्वेवं ज्ञानविधिरप्यनुशासनमात्रमेव स्यात् ? न। ज्ञानस्य दृष्टार्थत्वात् स्वभावतश्च गुणभूतत्वात्।" (वि० वि० पृ० ३१५) भ्रमज्ञानमस्माभिः न स्वीक्रियते, तथा च विषयस्य अन्यरूपत्वेऽपि तस्य ज्ञानमन्याकारकं स्यादिति तु प्रतीतिविरुद्धम्। तस्मात्, आत्मज्ञाने विधेः सत्त्वेऽपि एतज्ज्ञानं ज्ञेयतन्त्रमिति आत्मनः निष्प्रपञ्चरूपतायाः आनन्दरूपतायाश्च सिद्धिः स्यात्। आत्मस्वरूपः एव मोक्षः। अतः ज्ञाने विधिसत्त्वेऽपि फलस्य असिद्धिर्न स्यात्। ज्ञातं तादृशमात्मस्वरूपमेव फलम्। ज्ञानं स्वभावत एव ज्ञेयतन्त्रम् सर्वत्रैव ज्ञेयं प्रधानम् ज्ञानञ्चाप्रधानम्। आत्मज्ञानस्य विधिसाध्यत्वेऽपि ज्ञानापेक्षया ज्ञेयस्य प्रधानत्वेन तादृशात्मनः सिद्धौ कापि बाधा नास्ति। भ्रमज्ञानं ज्ञेयनिरपेक्षमिति भ्रमज्ञानेन ज्ञेयवस्तुनः सिद्धिर्न स्यात्। अस्माभिस्तु भ्रमज्ञानं न स्वीक्रियते, अख्यातिवादसमर्थकाः वयम्। भर्तृमित्रस्यैतन्मतं प्रभाकरानुरूपतां भजेत। आत्मज्ञाने विधिस्वीकारे वेदस्य कार्यार्थतैव स्यात् तथा च भ्रमज्ञानास्वीकारे च अख्यातिवादस्य समर्थनं भवेत्। शबरप्रदर्शिताभिप्रायेणैव उक्तवान् "कर्त्तव्यश्च सुखवान् अकर्तव्यो दुःखवान्"। (जै० सू० ६।१।१)

अत्रस्थभाष्यस्यायमेवाभिप्रायो यत् स्वर्गादिफलस्य साधनं यदि विहितं

यागादिकर्म स्यात् तदा यागादिकर्म कर्तव्यमेव न स्यात्, यतः स्वर्गादिफलस्य क्षणिकत्वान्नानादुःखमिश्रितत्वाच्च दुःखरूपत्वमेव। एतस्य दुःखस्य साधनभूतयागादिरपि दुःखरूप एवेत्यस्य कर्तव्यत्वं न स्यात्। 'कर्तव्यः सुखवान्' इति भाष्यवचनेन आत्मज्ञानस्यैव कर्तव्यता सिद्ध्यति। प्रपञ्चस्य दुःखरूपत्वम् आत्मा च सुखस्वरूप इति एतादृशात्मज्ञानस्य सुखफलकत्वात् तस्यैव च कर्तव्यत्वम्[1]। "यजेत स्वर्गकामः" अनेन वाक्येन येषां मते स्वर्गकामिनः स्वर्गसाधनयागेऽधिकारः न सिद्ध्यति, अधिकार एव असिद्धः अर्थात् कस्मिन्नपि स्थले विधिवाक्येन अधिकारसिद्धिः न स्यात् इत्येव वदेत् किन्तु इदानीमवलोक्यते तेषामपि मते विधिना अधिकारः सिद्ध्यतीति। अत्रेदं समाधानम्; शाब्दन्यायेनोच्यते विधिवाक्येनाधिकारो न सिद्ध्यति न्यायानुसारेण च सिद्धः सर्वैरेव स्वीकार्यः अभ्युपगमसिद्धान्तेन नैतदुच्यते[2]। न्यायानुसारेण यदि ज्ञानविधिना अधिकारः सिद्ध्यति तदा किमु वक्तव्यम्? वस्तुतः ज्ञानविधिना अधिकारः न सिद्ध्यति, ज्ञानस्य दृष्टार्थताप्रयुक्त एवासौ सिद्ध्यति। लोकातयमतानुसारिणां मीमांसकानामेतन्मतं विधिविवेके मण्डनेनोक्तम्।

एतस्य मतस्य खण्डनावसरे श्रीमता मण्डनेनोक्तम्—ये हि विहितस्य निषिद्धस्य वा कर्मणः फलं न स्वीकुर्वन्ति, ते जीवस्य सुखभोगः दुःखभोगो वा स्वभावत एव भवतीति स्वीकुर्वन्ति, तथा च स्वभाववाद एव वेदस्य अर्थः इत्येव वदन्ति। आत्मज्ञानस्याधिकारसिद्धिच्छलेन वेदस्य लोकायतशास्त्रत्वमेव साधयन्ति। तथा च ये दृष्टद्वारेणैव आत्मज्ञानविध्यधिकारी एव कर्मविध्यधिकरीति स्वीकुर्वन्ति, कर्मविधेरन्यः कश्चिदधिकारीति न स्वीकुर्वन्ति। एतेन कर्मविधेरिव ज्ञानविधेरपि अनुशासने एव पर्यवसानं भवति। विधिना तादृशस्यात्मनः प्रतिपत्तिः सिद्धिर्न स्यात्। यद्युच्येत—ज्ञानस्वभावप्रयुक्त एव तादृशात्मनः प्रतिपत्तिः सिद्ध्यति। अतादृशः आत्मा तादृशप्रतिपत्तेर्विषयो न भवितुमर्हति तथा च ज्ञाने विधेर्वैयर्थ्यं स्यात्। अतादृशात्मनि तादृशरूपसमारोपेणापि आत्मनः ज्ञानं भवितुमर्हतीति आत्मनः निष्प्रपञ्चरूपता न सिद्ध्यति। "स्वाभाविकत्वाच्च फलोपभोगस्य स्वभाववाद एवाम्नायार्थश्छद्मना आश्रितः स्यात्।.........सम्भवान्न तत्त्वपरिच्छेदः।" (वि० वि० पृ० ३३५–३६) अयमाशयः, विहितस्य निषिद्धस्य च कर्मणः फलमिमे न स्वीकुर्वन्ति, स्वर्गादि-

---

१. इममेवार्थमभिप्रेत्य कर्तव्यश्च सुखवान् अकर्तव्यश्च दुःखवान् इत्याद्युक्तमत्र भवता (न्या० क० पृ० ३१६) वि० वि० पृ० ३१६

२. वि० वि ३१५

३. वि० वि० पृ० ३१६

फलास्वीकारेऽपि चित्तशुद्धिः विहितकर्मणः फलमिति स्वीकुर्वन्ति, किन्तु, विधिवशात् नैव स्वीकुर्वन्ति, स्वाभाविकप्रवृत्तेः निरोधरूपदृष्टेनैव चित्तशुद्धिर्जायते, कर्मी कर्मानुष्ठाने दान्तो भवति। वेदान्तिनः कर्मफलं नैव स्वीकुर्वन्ति यत्, अनात्मवस्तु परमार्थरूपतां न प्राप्नोति, अनात्मवस्तुनि तेषां नास्ति आश्वासः। अत एव एकजीववादः दृष्टिसृष्टिवादश्चोत्तमाधिकारिणां कृते इति ते निरूपयन्ति। अपारमार्थिकं कदापि पारमार्थिकं न भवितुमर्हति। कर्म तत्फलं कर्मणि अधिकारः अनात्मपदार्थः निष्प्रपञ्चे आत्मनि आश्वासः अनात्मनि चानाश्वासः। अतएव भर्तृमित्रेण एतादृशी प्रक्रिया प्रदर्शिता।

न्यायकणिकासहितस्य विधिविवेकस्य सम्पादने श्रीमतां कृष्णाचार्यमिश्राणां वचसानाख्येयं साहाय्यमुपलब्धं तत्कृपयैव एतत्प्रकाशनसामर्थ्यमासादितम्। पूज्यचरणविद्यावाचस्पतिश्रीब्रह्मदत्तद्विवेदिमहोदयानां गुरुवर्याणां विषये तु किमपि वक्तव्यमेव नास्ति। तज्ज्ञानं तेभ्य एवेदं सततमुपहरामि अतः नास्ति सङ्कोचावसरः। पण्डितप्रवराः झोपाख्यश्री आनन्दशर्ममहोदयाः अहैतुक्या कृपया भूमिकायाः श्रवणेन समुचितपरामर्शप्रदानेन महदुपकारं कृतवन्तः इति तदीयमुपकारजातं बिभर्मि। तारांप्रिंटिंगप्रेसाध्यक्षः श्रीरमाशङ्करपाण्ड्यामहोदयः श्रीविनयशङ्करपाण्ड्यामहोदयश्च सततं प्राचीनतमसंस्कृतग्रन्थोद्धारे कृतसंकल्पः सर्वथा प्रशंसार्ह इति।

विदुषामाश्रवः

महाप्रभुलाल गोस्वामी

विषयसूची

अथ विधिविवेकः

—:0:—

श्रीगणेशाय नमः

साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः ।
बोधं विधौ समायत्तमतः स प्रविविच्यते ॥

अथ न्यायकणिका

—:0:—

श्रीसरस्वत्यै नमः

—:0:—

परामृष्टः क्लेशैः कथमपि न यो जातु भगवान्
न धर्माऽधर्माभ्यां त्रिभिरपि विपाकैर्न च तयोः ।
परं वाचां तत्त्वं यमधिगमयत्योमिति पदं
नमस्यामो विष्णुं तममरगुरूणामपि गुरुम् ॥१॥

भुवनभवनस्थेमध्वंसप्रबन्धविधायिने
भवभयभिदे तुभ्यं भेत्रे पुरां तिसृणामपि ।
क्षितिहुतवहक्षेत्रज्ञाऽम्भःप्रभञ्जनचन्द्रम-
स्तपनवियदित्यष्टौ मूर्तीर्नमो भव बिभ्रते ॥२॥

अज्ञानतिमिरशमनीं परदमनीं न्यायमञ्जरीं रुचिराम् ।
प्रसवित्रे प्रभवित्रे विद्यातरवे नमो गुरवे ॥३॥

आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥४॥

प्रकरणाऽऽरम्भे प्रेक्षावत्प्रवृत्त्यङ्गं विषयप्रयोजनहेतुकं प्रकरणस्य विधिविषयविवेचनं प्रयोजनमाह—

साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः ।
बोधं विधौ समायत्तमतः स प्रविविच्यते ॥

इह केचिदाहुः । यदप्रयोजनविषयं न तत्प्रेक्षावत्प्रवृत्तिगोचरः । यथा काकदन्तपरीक्षा । तथा चैतन्मीमासाप्रकरणमिति व्यापकविरुद्धोपलब्धिः ।

न चेयमसिद्धा । प्रयोजनं खल्विह विधेर्वेदप्रामाण्यसिद्धिर्वा, पदार्थसंसर्गप्रतीतिर्वा, हिताऽहितसाधनताऽवगमो वा प्रवृत्तिनिवृत्तिनिमित्तम् । न तावत्प्रामाण्यसिद्धिरन्तरेणाऽपि विधिं तत्सम्भवात् ।

पूर्वपक्षः—स्यादेतत् । विधिविरहे कार्यशून्यतया भूताऽर्थाऽवगाहिनो भूतस्य च मानान्तरविषयतया तदपेक्षत्वाद्वेदस्य प्रामाण्यं विहन्येत, पुरुषवाक्यवत् । तदनुपपन्नम् । अत्रेदं तु भवान् पृष्टो व्याचष्टाम् यदेतत्पुरुषवचसां मानान्तराऽपेक्षत्वम् , तत्किं भूतार्थतया, आहोस्वित् पुरुषबुद्धिप्रभवतया ? न तावद्भूतार्थतया । प्रत्यक्षादीनामप्रामाण्यप्रसक्तेः । तान्यपि हि भूतार्थान्येव । चैत्यवन्दनादिवाक्यस्य च कार्याऽर्थाऽभिधायिनो निरपेक्षतया प्रामाण्यप्रसङ्गात् । विनियोगमात्रपरमेतन्न कार्यपरमिति च स्वतन्त्रसिद्धान्तश्रद्धामात्रविजृम्भितं न प्रामाणिकमिति निवेदयिष्यते । तस्माद्वक्तृधीप्रभवत्वमेव सापेक्षत्वे हेतुः । तच्च भूतार्थेऽपि वैदिके नास्तीति नास्ति सापेक्षता । सा च कार्यनिष्ठानामपि पुरुषवचसाम् । तन्न, प्रामाण्यसिद्धिरर्थो विधेः ।

नाऽपि पदार्थसंसर्गप्रतीतिः । विनाऽपि विधिना स्थाल्यामोदनं पचति चैत्र इति पदार्थसंसर्गप्रतीतेरुपपत्तेः । यदि मन्येत विवक्षाऽधीनरचनानि पुंसो वचनानि, विवक्षा च मानान्तराऽवधारणाऽधीना, मानान्तरं च पदार्थसंसर्गगोचरं न पदार्थमात्रगोचरमिति तन्मानान्तरं प्रभवतया पुंस्यान्यपि पदार्थसंसर्गमेव गोचरयन्ति । न त्वेवं वेदवाक्यान्यपौरुषेयाणीति पदार्थसंसर्गसिद्ध्यर्थं विधिरेषितव्य इति । तदयुक्तम् । विधावपि तदनुपपत्तेः । तस्मिन् विधौ सति तद्विधिकाङ्क्षानिबन्धनः सम्बन्धः पदार्थानामिति चेत् ? तदाकाङ्क्षैव कुतः तदपर्यवसानादिति चेत् ? न । क्रियादिष्वपि साम्यात् । यथा हि शब्दाऽभिहितो विधिर्विषयनियोज्यादिभिर्विना न पर्यवस्यति तथा क्रियादयोऽपि पदार्थाः कारकादिभिर्विनेति त एव पदैरुपात्ता आकाङ्क्षायोग्यतासन्निधिसध्रीचीनाश्च संसर्गं गमयिष्यन्तीति कृतं विधिना । विशिष्टाऽर्थप्रतीतिप्रयुक्तत्वेन च पदानां समभिव्याहारस्य लोके विदितलोकतदुपायत्वाच्च वैदिकाऽर्थप्रतोतेः ।

नाऽपि हिताऽहितसाधनताऽवगमस्तस्य प्रयोजनं सम्भवति । सन्तापमपनयति च तप्तस्य सलिलाऽवसेकः, दहति च ज्वलनज्वालाकलापाऽऽलिङ्गनमिति वर्तमानाऽपदेशादपि हिताऽहितसाधनताऽवगमात् । ततश्चेप्साजिहासाभ्यां प्रमाणान्तरादिव प्रवृत्तिनिवृत्त्योरुपपत्तेर्व्यर्थो[1]

---

१. निवृत्त्योर्व्यर्थो का० वि० ।

विधिरिति सिद्धा व्यापकविरुद्धोपलब्धिः[1], अतो नाऽऽरम्भणीयमेतत्प्रकरणमिति। तान् प्रत्याह—साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः। बोधं विधौ समायत्तमिति। मा भूवन्नन्यानि प्रयोजनानि विधेः। पुरुषार्थसाधनताऽवबोधस्तु विधिनिबन्धनः। न हि "स्वर्गकामो यजेते"-ति विधौ असति स्वर्गो भावनाया भाव्यः सम्भवति। सा हि भाव्यमात्राऽपेक्षिणी। भविता च भाव्यो यागादयश्च भवितार इति समानपदोपादानतया प्रकृत्यर्थतया च तदनुरक्ताया एव भावनायाः प्रतीतेः स्वर्गस्य च पदान्तरोपादानतया पुरुषविशेषणतया च व्यवस्थानात्तमपहाय यागादीनेव[2] भाव्यतया भावना गृह्णीयात्। कर्त्रपेक्षितोपायतारूपविध्युपहितमर्यादा पुनरियं भावना समानपदोपादानमपि प्रथमाऽवगतमपि दुःखाकरतया कर्त्रनपेक्षितमपहाय धात्वर्थमसमानपदोपादानमपि पुरुषविशेषणमप्यपेक्षिततया स्वर्गमेव भाव्यमवलम्बते। समासादितविधिभाव्या च यागादीन् करणतया स्वीकरोतीति पुरुषार्थसाधनता तेषां सिद्धा भवति। कथं तर्हि वर्तमानाऽपदेशेभ्यो लोके[3] पुरुषार्थसाधनताऽवगतिः? प्रमाणान्तरवशान्न शब्दसामर्थ्यात्। यथा चैतत्तथा द्रव्यसंस्कारकर्मस्विति चाऽसाधकं तु तादर्थ्यादिति च व्याचक्षाण उपपादयिष्यति स्वयमेवाऽऽचार्यः।

नन्वेष विधिः शब्दात्प्रसिद्धो वा स्यादप्रसिद्धो वा? स चेत्प्रसिद्धो, नाऽनेन प्रकरणेन प्रतिपादनीयः। शब्दप्रतिपन्नस्याऽप्रतिपित्सितत्वात्। निष्पादितक्रिये कर्मणि साधनस्य तत्राऽनुपपत्तेः। अप्रसिद्धश्चेन्नितरां वेदार्थतया प्रतिपाद्यः। तस्मादनर्थकमेतद्विषयं प्रकरणमिति। अत आह—अतः स प्रविविच्यते इति। सत्यं शब्दाऽवगम्योऽपि विधिर्विप्रतिपत्तेः साधकबाधकप्रमाणविरहे सति संशयमापन्नः सन्[4] प्रतिपित्सित उपपत्त्यनुपपत्तिभ्यां परीक्ष्य शङ्कितसमारोपितरूपव्यवच्छेदेन यथावत्प्रतिपाद्यते। तदुच्यते[5]—विविच्यते इति।

नन्वस्य विवेकोऽपि वार्तिककृत्प्रभृतिभिरकारीति सोऽपि व्यर्थ एवेत्यत आह—प्रेति। कृतोऽपि तैर्विवेकोऽकृतकल्प एव। 'अभिधाभावनामाहु'[6] रित्यादिसङ्कीर्णशब्दप्रयोगात्। इह तु कर्तारिष्टाऽभ्युपाय इति

१. स्तान् प्रत्याह का० वि०।
२. यागादिमेवेति १ पु० पा०, का० वि०।
३. वर्तमानापदेशे तथा नोके इति २ पु० पा०।
४. सन्न० का० वि०।
५. तदिदमुच्यते० २ पु० पा०।
६. अभिधां भावनाम्० २ पु० पा०।

स खलु शब्दभेदो वा, तद्व्यापाराऽतिशयो वाऽर्थभेदो वा? यद भिधानाच्छब्दोऽपि तथा व्यपदेश्यः।

प्रमाणत्वादनियमात्प्रवृत्तेः संविदाश्रयात्।
समभिव्याहृतेः शब्दो न विधिः कार्यकल्पनात्॥

प्रमाणं हि शब्दः प्रतिज्ञायते। बोधकं च प्रमाणम्। तत्र प्रवृत्तिहेतुं कञ्चनाऽर्थातिशयमवगमयन् शब्दश्चोदनात्वेन प्रमाणतामश्नुते। स्वयमेव तु प्रवृत्तेः कारकस्तां प्रमाणतामपजह्यात्। न हि कारको हेतुः प्रमाणम्। अपि तु ज्ञापकः।

निष्कृष्याऽभिधानात् तस्य च व्युत्पादनात्प्रकर्षोपपत्तेरर्थवदेतत्प्रकरणमिति[1]। तत्र प्रथमं तावद्विप्रतिपत्तिनिमित्तं विमर्शमाह—स खलु शब्दभेदो वा। लिङादिः शब्दान्तराद्भिद्यते इति भेदः। तस्य खलु लिङादेरयस्कान्तमणेरिव वस्तुस्वभावजोऽतिशयो येन लोहमिव चेतनं प्रवर्तयति?, तद्व्यापाराऽतिशयो वा, प्रवृत्तिहेतुरुपेयते, अर्थभेदो वा वक्ष्यमाणभेदः? यद्यर्थभेदः, कथं तर्हि चोदनेति क्रियायाः प्रवर्तकं वचनमिति विधिना त्वेकवाक्यत्वादिति चेत्यत आह—यदभिधानाच्छब्दोऽपि तथा व्यपदेश्यः।

तत्र शब्दस्वरूपस्य तावद्विधिभावं निषेधति—

प्रामाणत्वादनियमात् प्रवृत्तेः संविदाश्रयात्।
समभिव्याहृतेः शब्दो न विधिः कार्यकल्पनात्॥

कारिकां व्याचष्टे—प्रमाणं हि शब्दः प्रतिज्ञायते चोदनालक्षणोऽर्थो धर्म इति। बोधकं च प्रमाणम्। अबाधिताऽनधिगताऽसन्दिग्धाऽर्थप्रमाजनकम्। तत्र च प्रवृत्तिहेतुं कञ्चनाऽर्थातिशयमवगमयन् शब्दश्चोदनात्वेन प्रमाणतामश्नुते शब्दस्वरूपविधिवादिनां मते। स्वयमेव तु प्रवृत्तेरप्रमायाः कारकस्तां प्रमाणतामपजह्यात्। नन्वप्रमाया[3] अपि प्रवृत्तेः कारकः कस्मान्न प्रमाणमत आह—न हि कारको हेतुः प्रमाणम्। मा भूद् बीजादीनामङ्कुरादिकारकाणां प्रामाण्यम्। किं तर्हि प्रमाणकमित्यत आह—अपि तु ज्ञापकः। इन्द्रियादौ तथाभावात्[4]।

ननु मा नामवादीत्प्रवृत्तिहेतुं कञ्चनाऽर्थातिशयम्, अस्तु शब्दः स्वयमेव प्रवृत्तिहेतुः। तथापि यत्र प्रवृत्तिरनेन जनयितव्या तद्विषयः[5] पुरुषस्य

१. इति सिद्धम्० २ पु० पा०।
२. प्रभेदः २ पु० पा०।
३. नन्वयमप्रमायाः २ पु० पा०।
४. तथा भावात् प्रवृत्तिहेतुभूतमर्थं प्रमापयत एव प्रामाण्यात् २ पु० पा०।
५. स विषयः २ पु० पा०।

विषयाऽवबोधनान्न दोष इति चेत् ? न। तन्मात्रस्याऽन्यत्राऽपि तुल्यत्वात्। चोदनालक्षणोऽर्थो धर्म इत्यभ्युपगमाऽनर्थक्यात्। शब्दस्वातन्त्र्ये च नियोगतोऽवश्यं प्रवृत्तिः स्यात्। तथा चाऽकुर्वन् विहितं कर्मेति निर्विषयं स्यात्। न हि तदानीं बलवदनिलसलिलौघनुद्यमानस्येवेच्छाऽपि तन्त्रं प्रवृत्तिं प्रति पुरुषस्य। ज्ञापकश्च स्वरूपकर्मसम्बन्धविषयज्ञानमपेक्षते। लिङादिस्वरूपं च प्रवृत्तेः कारकमित्यनुपयुक्तस्वरूपतत्कर्मसम्बन्धविषयसंविदोऽपि पुंसः प्रवृत्तिप्रसङ्गः।

व्यापारो बोध्यते[1] इति कारकहेतोरपि विषये प्रमाजनकत्वात्प्रमाणतोपपत्स्यते। अङ्कुरस्येव पचादिहेतोः स्वाकारणं प्रमापयत इति शङ्कते—विषयाऽवबोधनान्न दोष इति चेत् ?। निराकरोति—नेति। कुतः ? तन्मात्रस्याऽन्यत्रापि[2] वर्तमानापदेशेऽपि चैत्रः पचतीत्यादौ तुल्यत्वात्। न हि तत्र भावना यत्र नाऽवगम्यते। अस्तु तुल्यता, का नो हानिरित्यत आह—चोदनालक्षणोऽर्थो धर्म इत्यभ्युपगमाऽऽनर्थक्यात्। प्रवर्तकत्वं चोदनात्वं प्रवृत्तिहेतुं कञ्चनाऽर्थाऽतिशयमवगमयन्ननेन रूपेण प्रामाण्यमश्नुते, न भावनामात्रवचनत्वेन। तस्याऽन्यत्राऽपि तुल्यत्वात्। तस्माद्येन रूपेण प्रामाण्यं न तेन चोदना, येन चोदना न तेन प्रामाण्यम्, तस्य प्रवृत्तिं प्रति कारकत्वादित्यर्थः। प्रमाणत्वादिति हेतुं व्याख्याय अनियमात् प्रवृत्तेरिति व्याचष्टे, शब्दस्वातन्त्र्ये च पुंसः प्रवृत्तौ नियोगतोऽवश्यं प्रवृत्तिः स्यात्। भवतु, को दोष ? इत्यत आह—तथा चाऽकुर्वन् विहितं कर्मेति धर्मसूत्रकारवचनं निर्विषयं स्यात्।

नन्विच्छाधीनप्रवृत्तित्वात्पुंसां तस्याश्च कादाचित्कत्वात् न विहितेऽप्यवश्यम्भावनियमः प्रवृत्तेरिति सम्भवति विहिताकरणेन[3] निर्विषयता वचनस्य, इत्यत आह—न हि तदानीं बलवदनिलसलिलौघनुद्यमानस्येवेच्छाऽपि तन्त्रं प्रवृत्तिं प्रति पुरुषस्य। संविदाश्रयादिति व्याचष्टे—ज्ञापकश्च स्वरूपतत्कर्मसम्बन्धविषयज्ञानमपेक्षते, न तु कारकः[4]। लिङादिस्वरूपं च प्रवृत्तेः कारकमित्यनुपयुक्तस्वरूपतत्कर्मसम्बन्धविषयसंविदोऽपि पुंसः प्रवृत्तिप्रसङ्गः। एतदुक्तं भवति, स्वकार्ये संविदाश्रयत्वं ज्ञापकत्वेन

---

१. व्यापारः शब्दस्तद्बोधने इति २ पु० पा०।

२. तस्याऽन्यत्रापि २ पु० पा०। का० वि०।

३. विहिताऽकरणमिति २ पु० पा०।

४. कारकं का० वि०।

ननु शङ्खध्वनिवदेतत् स्यात्? यथा हि शङ्खशब्दात् प्रवर्तितव्यमित्युपयुक्तस्वरूपसम्बन्धसंविद एव प्रवर्तन्ते, नेतरे। न च शङ्खशब्दः प्रवृत्तेरभिधायकोऽन्यस्य वा कस्य चित्प्रवृत्तिहेतोः, येन ज्ञापकः स्यात्। वार्तमेतत्। न हि शङ्खध्वनिः प्रवृत्त्युपयुक्तसङ्गतितया प्रवृत्तिकारणं शङ्खशब्दात् प्रवर्तितव्यमिति, अपि तु प्रवर्तितव्यमिति। प्रकृत्यर्थाऽतिरिक्ते प्रत्ययार्थे ऽनुविधेयस्य पुंसोऽभिप्रायभेदे कृतसङ्केतस्तमनुस्मारयति।

व्याप्तम्, धूमादौ तथा दर्शनाद् वीजादौ चाऽनुपलब्धेः। तदिह तद्विरुद्धकारकत्वोपलब्धिरूपाऽनुपलब्धिरेव[1] संविदाश्रयत्वं निवर्तयेदिति।

चोदयति ननु शङ्खध्वनिवदेतत् स्यात्?। तदेव स्फुटयति—यथा हि शङ्खशब्दात् प्रवर्तितव्यमिति प्रवृत्युपयुक्त[2]स्वरूपसम्बन्धसंविद एव प्रवर्तन्ते नेतरे। न चाऽस्य तत्र ज्ञापकत्वम्, अनभिधानात्। अपि तु[3] कारकत्वमेवेत्याह—न च शङ्खशब्दः प्रवृत्तेरभिधायकोऽन्यस्य वा कस्यचित्प्रवृत्तिहेतोः, येन ज्ञापकः स्यात्। अनभिधायकोऽपि शङ्खध्वनिर्न प्रवृत्तौ कारकोऽपि तु प्रवृत्तिहेतुमभिप्रायविशेषमनुविधेयस्याऽवगयमन् ज्ञापक एवेति न व्यभिचार इति। परिहरति—वार्तमेतत्। न हि शङ्खध्वनिः प्रवृत्त्युपयुक्तसङ्गतितया प्रवृतेः कारणम्। कुतः? शङ्खशब्दात् प्रवर्तन्ते इत्यस्मादपि स्वकार्य[4]प्रवृत्तिं प्रति कारणत्वमस्याऽवगम्यते। हेतौ पञ्चमीविधानात्। ततश्चाऽनेन प्रकारेण विदितस्वकार्यशब्दाच्छङ्खध्वनेरेवाऽभिप्रायविशेषाऽनुमानसिद्धात् प्रवृत्तिप्रसङ्गात्[5]। कथं ततः[6] प्रवृत्तिरित्यत आह—अपि तु प्रवर्तितव्यमिति प्रकृत्यर्थाऽतिरिक्ते प्रत्ययार्थेऽनुविधेयस्याऽभिप्रायभेदे[7] आज्ञादौ कृतसम्बन्धः कृतसङ्केतस्तमनुस्मारयति। तमभिप्रायविशेषमुपलक्षणीकृत्याऽनुमातुमुद्दिश्येति[8] यावत्। स्मारयति सम्बन्धम्। ततः कृतसम्बन्धस्मरणसहकारिणः शङ्खध्वनेरेवाऽभिप्रायविशेषाऽनुमानसिद्धिः।

क्वचित्पाठः। कृतं सम्बन्धमनुस्मारयति तावत्। अथ तत्स्मरणसहकारी सन्नभिप्रायभेदमनुमापयतीति द्रष्टव्यम्। एतेन शङ्खध्वनेर्ज्ञापकत्वाद् व्यभिचार इति दर्शितम्। भवत्वेवं, प्रवृत्तिस्तु कुत इत्यत आह—ततोऽभिप्रायभेदादनुमितात्तदनुविधायिनः प्रवर्तन्ते।

---

१. कारकोपलब्धिरेव २ पु० पा०। २. इत्ययुक्त १ पु० पा०।
३. च० का० वि०। ४. स्वकार्यम् ३ पु०, पा०।
५. ध्वनेरेवप्रवृत्ति पु० पा०। ६. तर्हि ततः का० वि०।
७. अनुविधेयस्य पुंसोऽभिप्राय २ पु० पा०। ८. न का० वि०।

ततस्तदनुविधायिनः प्रवर्तन्ते। अविदितविषयतया नाऽनधिगतसमयाः प्रवर्तन्ते इत्यपि मिथ्या। तन्मात्रसङ्गतिज्ञस्याऽपि तत्प्रसङ्गात्। अप्रत्यय-पूर्वायां च शब्दपरतन्त्रस्य प्रवृत्तौ विषयवेदनाऽनुपयोगात्। प्रबलपवने-रितस्यैवाऽन्धपङ्ग्वादेर्न वेदनं प्रवृत्त्यङ्गम्। कारको अपि प्राणिस्थो-ऽहिदंशो ज्ञानमपेक्षते। नैवम्। ज्ञानस्यैव तत्र कारकत्वात्। विनाऽप्यहिदंशं शङ्काविषेणाऽपि मरणदर्शनात्।

योऽप्याह—अभिधेयविज्ञानं प्रति कारकहेतुरपि शब्दो यथा शक्तिज्ञानमपेक्षते तथा प्रवृत्तिशक्तिसंविदमपीति। तेनाऽपि न ज्ञापकादन्यत्र ज्ञानाऽपेक्षा प्रदर्श्यते। ज्ञानकारकस्यैव ज्ञापक इत्याख्यानात्।

ननु भवतु प्रवृत्तेः कारको यत्र त्वनेन प्रवर्तयितव्यः पुरुषः स विषयोऽज्ञातो न[1] प्रवृत्तिविषयो भवतीति तत्र लिङादिर्ज्ञापको ऽभ्युपगन्तव्यः। तथा चाऽस्य संविदाश्रयत्वमुपपन्नम्। प्रवृत्तिकारकस्याऽपि प्रवृत्तिविषये प्रामाण्यादित्यत आह—अविदितविषयतया नाऽनधिगतसमयाः पुमांसो लिङादिभ्यः प्रवृत्तिकारकेभ्योऽपि प्रवर्तन्ते इत्यपि मिथ्या। कुतः? तद्विषयमात्रसङ्गतिज्ञस्याऽपि तत्प्रवृत्तिप्रसङ्गात्। दूषणान्तरमाह—अप्रत्य-यपूर्वायाञ्च शब्दपरतन्त्रस्य प्रवृतौ विषयवेदनाऽनुपयोगात्। कस्मादुपयोगो नास्तीत्यत आह—प्रवलपवनेरितस्येव नाऽन्धपङ्ग्वादेर्वेदनं प्रवृत्त्यङ्गम्। चोदयति—कारकोऽपि प्राणिस्थो[2]ऽहिदंशो ज्ञानमपेक्षते इति व्यभिचारः। परिहरति—नैवम्। ज्ञानस्यैव तत्र कारणत्वात्[3]। कुतः? विनाऽप्यहिदंशं शङ्काविषेणा[4]ऽपि मरणदर्शनात्। दंशस्यैव मरणकारणत्वेऽसति तस्मिन् न शङ्काविषेण प्रेयात्। न जातु वीजविज्ञानमङ्कुरमसति वीजे जनयति। वालानामपि प्राग्भवीयभावनाप्रवोधादहिदंशविज्ञाने सति भयसम्भवान्म-रणमिति मन्तव्यम्।

योऽप्याह—अभिधेयविशेषविज्ञानं प्रति कारकहेतुरपि शब्दो यथा शक्तिज्ञानमपेक्षते तथा प्रवृत्तिशक्तिसंविदमपीति। तेनाऽपि न ज्ञापका-दन्यत्र ज्ञानाऽपेक्षिता प्रदर्श्यते। ज्ञानकारकस्यैव ज्ञापक इति आख्याना-दिति न सपक्षेण व्यभिचार इति भावः। सर्वस्यैव ज्ञापकस्य कार्यजनकता-स्वरूपतच्छक्तिसंविदाश्रयभावितोक्ते[5]ति मत्वा भ्रान्तश्चोदयति। ननु

---

१. पुरुषो योऽज्ञान २ पु० पा०।
२. प्रायेण हि।
३. कारकत्वात् २ पु० पा०।
४. विशेषेण १ पु० पा०।
५. भावेनोक्तेति २ पु० पा०।

ननु ज्ञानकारकोऽपि चक्षुरादिर्न शक्तिज्ञानमपेक्षते। किमतः ? शब्दस्याऽकारकत्वप्रसंगः[1]। अयमपरो दोषः। कुतस्तर्ह्यर्थबोधः ? अभ्यासात् कशाऽङ्कुशवत्। उक्तञ्च—

अभ्यासात्प्रतिभाहेतुः सर्वः शब्दः समासतः।
बालानां च तिरश्चां च यथाऽर्थप्रतिपादने॥

ज्ञानकारकोऽपि चक्षुरादिर्न शक्तिज्ञानमपेक्षते। समाधातुं निगूढाऽभिसन्धिराह—किमतः ? आन्तरे पत्राश्र्वस्थः प्रसङ्गमापादयति—ज्ञानं प्रति[2] शब्दस्याऽकारकत्वप्रसङ्गः। ज्ञानकारकचक्षुरादिवैधर्म्यात्। अत्राऽनन्तरतया पार्श्वस्थं प्रति तावदुत्तरमाह—अयमपरो दोषः। न वयं मीमांसकाः, येन शब्दार्थयोः स्वाभाविकं सम्बन्धमाचक्ष्महे इति भावः। ननु यद्यवाचकः शब्दः, कुतस्तर्ह्यर्थबोधः ? न च नास्तीति वक्तव्यं, वचनेन भवतो[3]ऽस्मत्प्रतिपादनायाऽप्रवृत्तिप्रसङ्गादिति भावः। उत्तरम्—अभ्यासात् कशाङ्कुशाऽभिघातवत्[4]। नाऽभिधानाऽधीनोऽर्थबोधः शब्दादपि[5]त्वभ्यासाऽधीनः। यथा हि खलु कशाऽङ्कुशाऽभिघातादयोऽनभिधायका अपि वाजिगजादीनामभ्यासात् स्वतः[6] प्रवृत्तिनिवृत्तिहेतुमर्थप्रतिभासां प्रतिभां भावयन्तः प्रवर्तका[7] निवर्तकाश्च तथा संक्षेपतः सर्वः शब्दो[8] व्युत्पन्नानामव्युत्पन्नानां चेह जनयतीत्यर्थः। उक्तञ्च—

अभ्यासात्प्रतिभाहेतुः सर्वः शब्दः समासतः।

[9]व्युत्पन्नानां [10]पुनरर्थाभिधानतः। अभ्यासजनितां भावनामभ्यासशब्देनाह। कार्ये कारणोपचारात्। अयं च प्राग्भवीयोऽभ्यासोऽवश्याऽभ्युपेय इत्यत्र दृष्टान्तमाह—

बालानां[11] च तिरश्चां च यथाऽर्थप्रतिपादने।

न हि तेषां प्राग्भवीयभावनामन्तरेण प्रवृत्तिनिवृत्तिहेतुभूताऽर्थप्रतिभास[12]प्रतिभोत्पादनसम्भवः[13]। अर्थाऽऽभासप्रतिभोत्पादनेन चाऽर्थप्रतिपादनमुक्तम्। एतच्च सिद्धान्ते विस्तरेण वक्ष्यते।

---

१. प्रसङ्गादिति मू० पु० पा०। **२. ज्ञानं प्रति, नास्ति २ पु०।**
३. ता का० वि०। **४. धान**
५. चा का० वि०। **६. स्वतो न २ पु० पा०।**
७. काः का० वि०। **८. सर्वे एव शब्दाः २ पु० पा०।**
९. अव्युत्पन्नव्यु का० वि०। **१०. न पुनरभिधानतः २ पु० पा०।**
११. अभ्यासादिश्लोकोत्तरार्द्धमिदं पादद्वयमिति प्रतिभाति।
१२. सः का० वि०। **१३. नमेव चार्थप्रतिपादन का० वि०।**

अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते। इति।

न च ब्रूमः सर्वो ज्ञापको ज्ञानाऽपेक्ष, किन्तु स एव, नेतरः। बीजादिष्वदर्शनात्।

न च दृष्टविपरीतस्वभावकल्पना लिङ्गादीनाम् अनुपपत्त्या। तादृशाऽनुसारेणाऽप्युपपत्तेः। प्रत्ययश्च सहाऽभिधानात्प्रकृत्या, तदनुवादाद्वा,

अनागमश्च सोऽभ्यासः

आगम्यते प्राप्यतेऽस्मादिति कारणमागमः। अविद्यमान आगमो यस्मिन्नसावनागमोऽनादिरित्यर्थः।

समयः कैश्चिदिष्यते।

समय इत्यादिमत्तामाह[1]। नैयायिकादयो हीश्वरनिर्माणं शब्दार्थसम्बन्धं[2] समय इत्याचक्षते। स चाऽभ्यासस्य भावनाया विषय इत्यभ्यास उक्तः। एवं पार्श्वस्थं निराकृत्य प्रकृतं चोदकं प्रत्युत्तरमाह—न च ब्रूमः, सर्वो[3] ज्ञापको ज्ञानाऽपेक्ष.[4] किन्तु स एव ज्ञापक एव, नेतर कारकः। कुतः? बीजादिष्वङ्कुरादिकारकेऽदर्शनात् ज्ञानाऽपेक्षाऽवधार्यते स तु ज्ञापकः[5] एतेन निगूढोऽभिसन्धिरुद्घाटितः।

ननु ज्ञापकत्वे समानेऽपि केचिदनाश्रितसंविदो ज्ञानं जनयन्ति, यथा चक्षुरादयः। केचित्पुनराश्रितसंविदः[6], यथा धूमादयो धूमध्वजादिविज्ञानम्। एवं यद्यप्यन्ये कारकाः हेतवः स्वकार्यजननं प्रत्यनाश्रितसंविदस्तथाऽपि शब्दप्रवृत्तिकारकोऽपि संविदमाश्रयिष्यते[7] अन्यथा प्रवृत्त्यनुपपत्तिरित्यत आह—न च दृष्टविपरीतस्वभावकल्पना लिङ्गादीनामन्यथाऽनुपपत्त्या। कुतः? प्रवृत्तिहेतुभूताऽर्थज्ञापकतया दृष्टाऽनुसारेणाऽप्युपपत्ते.[8]। प्रकृतिप्रत्यययोः सहाऽभिधानम्। तथा च प्रत्ययश्च सहाऽभिधानात्प्रकृत्या सह समभिव्याहारमर्हति नाऽन्यथा। सहाऽभिधानप्रकार दर्शयति—तदनुवादाद्वा

---

१. तमाह का० वि०। २. सिद्धार्थसम्बन्धम् २ पु० पा०।

३. र्वं का० वि०। ४. क्षी का० वि०।

५. ज्ञानापेक्षायाः। ज्ञानाऽपेक्षावधार्यते न तु ज्ञानापेक्षेऽव्वेव ज्ञापकत्वम् २ पु०पा०।

६. दो का० वि०। ७. आश्रयति २ पु० पा०।

८. त्तेरर्थापत्तिपरिक्षयात्। समभिव्याहृतेरिति हेतुं विवृणोति। प्रत्ययमात्रात् प्रकृतिमात्राच्चार्थप्रतीतेरनुपपत्तेः का० वि०।

तद्द्योतनाद्वा, तत्सम्बन्ध्यर्थान्तराऽभिधानाद्वा तया समभिव्याहारमर्हति। अवाचकस्य तु प्रवृत्तेः कारकस्य स न युक्तः। संख्याद्यभिधेयान्तरनिबन्धनः स इति चेत् ?

अस्तु। प्रवृत्तेस्तु प्रत्ययेनाऽप्रतिपाद्यमानायाः कथं प्रवृत्त्यभिसम्बन्धः ? अभिधेयैव प्रत्ययस्य प्रकृत्यर्थाऽनुरक्ता प्रवृत्तिरिति चेत् ? न तावद्भावना कार्यरूपा लिङाद्यभिधेयेति शब्दविधिवादिभिः शक्यं वक्तुम्। तस्यां तर्हि तादृशलिङादेः कारकत्वेन सङ्गतिः। समभिव्याहृतिस्तु तस्या वाच्यं

प्रकृत्यर्थाऽनुवादात्। यथैको द्वौ बहवः इति। तद्द्योतनाद्वा प्रकृत्यर्थद्योतनाद्वा। यथा कुमारीति ईप्रत्ययः[१] स्त्रीत्वं द्योतयति। तत्सम्बन्ध्यर्थान्तराभिधानात्। यथा पचति पाचको दण्डीति तिवके[२] नयः प्रकृत्यर्थविशिष्टभावनाः कर्तृसम्बन्धार्थाः। अस्तु, प्रस्तुते किमायातमित्यत आह—अवाचकस्य तु लिङादेः प्रवृत्तेः कारकस्य न समभिव्याहारो युक्तः। सहाऽभिधाना-ऽसम्भवात्। शङ्कते--अभिधेयान्तरनिबन्धनः स इति चेत्?। न हि वयमनभिधेयतां[३] सर्वथैव लिङादीनां ब्रूमः, येन सहाऽभिधाना-सम्भवात् प्रकृत्या[४] समभिव्याहृतिर्न स्यात्। किन्तु कर्तृसंख्यादयो हि तस्याऽभिधेयाः। ते च कथञ्चित्कृत्या सम्बद्धा इति समभिव्याहारोपपत्तिरित्यर्थः। निराकरोति—अस्तु समभिव्याहारमात्रम्, विशेषस्तु न सिध्यतीत्याह--प्रवृत्तेस्तु प्रत्ययेनाऽप्रतिपाद्यमानायाः कार्यायाः कथं प्रकृत्यर्थसम्बन्धः ? न खलु समभिव्याहारमात्रं लिङादीनां प्रकृत्या सहाऽवगम्यते, अपि तु कर्तव्यतोपहितसीमानं प्रवृत्तिभावनां प्रकृत्यर्थ-विशिष्टामभिदधताम्। न च कर्तृसंख्याद्यभिधाने सत्य[५]प्ययं विशेषः सेद्धु-मर्हतीत्यर्थः[६]। शङ्कते—अभिधेयैव प्रत्ययस्य प्रकृत्यर्थाऽनुरक्ता प्रवृत्तिर्भावना। तेन समभिव्याहारविशेष[७] उपपन्न इति चेत् ? निराकरोति—न तावद्भावना कार्यरूपा[८] लिङाद्यभिधेयेति शब्दस्वरूपविधिवादिभिः शक्यं वक्तुम्। कर्तव्यता[८]ऽऽकाराया एव भावनायाः प्रवृत्तिहेतुतया विधित्वेन शब्दस्वरूपस्य तत्त्वाऽनुपपत्तेः। तस्मात्प्रवृत्तिमात्रं लिङाद्यर्थो न पुनः कर्तव्यतारूपेति तैरभ्युपगन्तव्यम्। तथा च तस्यां तर्हि प्रवृत्तौ तादृश्यां कर्तव्यताऽऽकारायां लिङादेः कारकत्वेन सङ्गतिर्न पुनरभिधायकत्वेनेति प्रकृत्यर्थाऽनुरक्तकार्य-

१. ङीप् प्रत्ययः २ पु० पा०। २. तिङ्के नयः २ पु० पा०। ३. धायकतां का० वि०। ४. प्रकृत्या सह २ पु० पा०। ५. त्ययं का० वि०। ६. विशेषः सिध्यति २ पु० पा०। ७. व्यवहारप्रवृत्तिरिति विशेषः २ पु०पा०। ८. कार्यता २ पु० पा०।

लक्ष्यं वा तथाविधेन सम्बन्धमुपाश्नुते । अप्रतीतयोर्घटनाऽयोगात् । कार्यायां तु प्रवृत्तौ न नियमनिमित्तं समस्ति अनभिधेयस्य प्रवृत्तिहेतोः । अपि चाऽश्रुतफलेषु फलाऽध्याहारः, क्वचित् क्रतूपकारकल्पना, श्रुतानामपि स्वर्गादीनां फलत्वाऽध्यवसाय इति सर्व एष[1] महिमा विधेः । स शब्दस्य तद्भावेऽनुपपन्नः । न हि तदा शब्दादनवगम्यमानमन्यथा गम्यते । न हि लिङादिस्वरूपस्यैवाऽन्यथाऽनुपपत्तिः । प्रवर्तकस्येति चेत् ? न । तस्याऽपि पवनादिर्वातिन इवोपपत्तेः फलरूपं कारकं विना । तस्मान्न विधिः शब्दस्तद्व्यापारो वा ।

रूपप्रवृत्त्यभिधायकत्वेन रूपेण । विशिष्टसमभिव्याहृतिस्तु कुतः[2] सा किमित्यहेतुकेत्यत आह—वाच्यं लक्ष्यं वा तथाविधेन वाच्येन लक्ष्येण वा सम्बन्धमुपाश्नुते । शब्दादप्रतीतयोर्घटनाऽयोगात् । शाब्दे प्रमेये प्रवृत्तिमात्रस्याऽभिधेयत्वात् । कार्यायां तु कर्तव्यताऽऽकारायां प्रवृत्तावनभिधेयायां न नियमनिमित्तं विशिष्टसमभिव्याहारनिमित्तं समस्ति अनभिधेयस्याऽविद्यमानविशिष्टाऽभिधेयस्य शब्दस्वरूपविधिवादिनो[3] मते प्रवृत्तिहेतोर्लिङादेः । कार्यकल्पनादिति विवृणोति—

अपि चाऽश्रुतफलेषु पिण्डपितृयज्ञादिषु स्वर्गादिफलाऽध्याहारः । क्वचित् क्रतूपकारकल्पना समिधादौ । श्रुतानामपि पुरुषविशेषणतया स्वर्गादीनां फलत्वाऽध्यवसाय इति सर्व एष महिमा विधेः । स शब्दस्य तद्भावे विधिभावेऽनुपपन्नः । कस्मात् ? न हि तदा शब्दादनवकल्प्यमानमन्यथा फलं क्रतूपकारं विना[4] किञ्चिद्गम्यते । यच्छब्दा[5]दवगतं फलादिना विनाऽनुपपद्यमानं फलादीनां कल्पनाबीजं भवेत् । मा भूद् लिङादिगम्यस्याऽन्यथाऽनुपपत्तिः । लिङादिरेव सेति[6] चेत्तत्राह—न हि लिङादेः स्वरूपस्यैवाऽन्यथाऽनुपपत्तिः । न हि तद्रूपस्य श्रोत्रग्राह्यस्य सान्निध्ये फलादि वर्तते, येन तद्विना नोपपद्यते । शङ्कते—प्रवर्तकस्येति चेत् ? लिङादयः खलु पुंसां प्रवर्तकाः । न चैते निष्फले प्रवर्तयितुं पुरुषमीशते इति तदन्यथाऽनुपपत्त्या फलकल्पनेत्यर्थः । निराकरोति—न । तस्याऽपि प्रवर्तकत्वस्य पवनादिर्वातिन इवोपपत्तेः । न हि यो यः प्रवर्तयति स सर्वः फलमपेक्षते । पवनादीनां प्रवर्तयतामपि तदनपेक्षत्वदर्शनादित्यर्थः । कारिकार्थमुपसंहरति—तस्माद्धेतुपञ्चकान्न विधिः शब्दः । तद्व्यापारो वा न विधिः । अत एव हेतुपञ्च-

---

१. एव० मू० पु. २. तस्त्या का० वि० ।
३. नां का० वि० । ४. क्रतूपकारकत्वेन विना २ पु० पा० ।
५. दवगते का० वि । ६. लिङादेरेव भवेदिति चेत् २ पु० पा० ।

नन्वनभिधेये एते दोषाः, अभिधेय एव तु लिङादिशब्दानां पुरुषं प्रति प्रयोजकव्यापार आत्मीयः प्रवर्तना। एवं ह्युक्तम्। 'अभिधाभावनामाहुरन्यामेव लिङादयः'। तथा च ज्ञापकत्वात्प्रामाण्यम्। प्रवृत्तिहेतुं बुद्ध्वा पुरुषस्येच्छया प्रवृत्तिः संबन्धबोधाऽपेक्षा च अभिधेयसम्बन्धनियमश्च। अभिधेयत्वात्। प्रतीतप्रवर्तनाऽन्यथाऽनुपपत्त्या कार्यकल्पनेति।

नैतत्सारम्।

न प्रयोगाऽनिरूप्यत्वाद्वै[5]यर्थ्यात्पूर्वदोषतः।
अप्रवृत्तेः फलाऽयोगाद्रूपोक्तेर्व्यापृतिः श्रुतेः॥

विधिरित्यनुषज्यते। न हि प्रेरणाऽध्येषणाऽभ्यनुज्ञालक्षणः शब्दस्य

काश्चोदयति—नन्वनभिधेयशब्दव्यापारे एते दोषाः पूर्वोक्ताः। अभिधेये एव तु लिङादिशब्दानां पुरुषं प्रवर्तमानं प्रयोज्यं प्रति प्रयोजकव्यापार आत्मीयः प्रवर्तना। न चैतत्स्वोत्प्रेक्षितमित्याह—एवं ह्युक्तम्—

'अभिधाभावनामाहुरन्यामेव लिङादयः'। इति।

अभिधायाः शब्दस्य भावनां प्रवर्तनामाहुरित्यर्थः। एवं च यत्कारणत्वेना[1]ऽप्रामाण्यमासञ्जितं तत्स्वकार्यप्रवर्तनाज्ञापकत्वेन परिहृतं भवतीत्याह—तथा च ज्ञापकत्वात् प्रामाण्यम्। इच्छासहकारिणश्च प्रवर्तकत्वात् इच्छायाश्चाऽवश्यम्भावा[2]ऽनियमात्। प्रवृत्तिनियमोऽप्युपपन्न इत्याह—प्रवृत्तिहेतुं बुद्ध्वा पुरुषस्येच्छया प्रवृत्तिः। ज्ञापकत्वे सति संविदाश्रयत्वमप्युपपन्नमित्याह—सम्बन्धबोधाऽपेक्षा च। प्रकृत्य[3]न्तराऽनुरक्तप्रवर्तनाऽभिधायिना च प्रत्ययेन सह प्रकृतेः समभिव्याहारविशेषोऽप्युपपन्न इत्याह—अभिधेयसम्बन्धनियमश्च। अभिधेययोर्धात्वर्थप्रत्ययार्थप्रवर्तनयोः सम्बन्धनियमात्प्रकृतिप्रत्यययोः समभिव्याहारविशेषोऽप्युपपन्न इत्यर्थः। कुतः? प्रवर्तनाया अभिधेयत्वात्। शब्दव्यापारश्चाऽभिहित[4] इच्छासहकारी प्रवर्तयतीति। कार्यकल्पनाऽप्युपपन्नेत्याह—शब्दप्रतीतप्रवर्तनाऽन्यथाऽनुपपत्त्या कार्यकल्पनेति। तदेतद् दूषयति—नैतत्सारम्। तथा हि।

न प्रयोगाऽनिरूप्यत्वाद्वैयर्थ्यात्पूर्वदोषतः
अप्रवृत्तेः फलाऽयोगाद्रूपोक्तेर्व्यापृतिः श्रुतेः॥

विधिरित्यनुषज्यते। स च न व्यापृतिः श्रुतेरिति निषिध्यते। प्रयोगाऽनिरूप्यत्वादिति विवृणोति—न हि प्रेषणाऽध्येषणाऽभ्यनुज्ञालक्षणः

---

१. कारकात्वेन यत् २ पु० पा० : २. भाधनि
३. र्थानु का० वि०। ४. तः का० वि०।

व्यापारो निरूप्यते। तस्य पुरुषधर्मत्वात्। नाप्यन्यस्तत्समर्थाचरणलक्षणः कारीषादिवत्। अनुपलब्धेः। तत एवोपलब्धिः सम्बन्धाऽपेक्षणादसमीचीना। न च णिज्वत्प्रेषणाद्यतिरिक्ते तत्समर्थाचरणमात्रे लिङादयो निरूपितप्रयोगाः। कारीषादिस्तु शीतापनोदनादिना शक्ततां सम्पादयन् प्रवृत्तिहेतुः। शब्दस्तु कथमिति न निरूप्यते।

शब्दस्य प्रयोगो व्यापारो निरूप्यते। ननु शब्दोच्चारणाऽनन्तरं तदवगमात्तेनोक्तमिति[1] कथं प्रेषणादिलक्षणः शब्दप्रयोगो न निरूप्यत इत्याह—तस्य पुरुषधर्मत्वात्। सत्यं शब्दविज्ञानाऽनन्तरमुपलभ्यते। न[2] त्वसौ शब्दस्याऽभिप्रायभेदत्वात्। प्रेषणादेरचेतनत्वेन शब्देऽसम्भवादित्यर्थः।

अथ मा भूवन् प्रेषणादयः पुरुषधर्माः शब्दे, यथा तु कारीषोऽग्निरध्यापयतीत्यध्ययनप्रवृत्तौ[3] समर्थं शीताऽपनोदनमध्येतुर्भावयन् कारीषोऽग्निरध्ययने प्रवर्तयति पुरुषम् एवं लिङादयोऽपि प्रवृत्तिसमर्थं कञ्चिदुपकारं पुरुषस्याऽऽचरन्तः स्वव्यापारेण प्रवर्तयिष्यन्तीत्यत आह—नाप्यन्यः प्रेषणादिभ्यस्तत्समर्थाऽऽचरणलक्षणः कारीषादिवत्। कुतः? अनुपलब्धेः। प्रमाणान्तरेण।

यद्युच्येत, मा ज्ञायि प्रामाणान्तरेण, शब्दादेव स व्यापारोऽवगंस्यते[4] इत्यत आह—तत एवोपलब्धिरसमीचीना। कुतः? सम्बन्धग्रहणाऽपेक्षणात्[5]। अयमर्थः[6]। गृहीतसम्बन्धः खलु शब्दः स्वार्थमवबोधयति। सम्बन्धबोधश्च सम्बन्धिसंवेदनाऽधीनः[7]। शब्दादेव चेदर्थः सम्बन्धी प्रतिपत्तव्यो, दुरुत्तरमितरेतराश्रयं प्रसज्येत; सम्बन्धबोधे शब्दोऽर्थमवबोधयति, तदवबोधे च सम्बन्धबोध इति। ननु यथा णिच्प्रत्ययः कारीषादीनामध्ययनप्रवृत्त्यनुकूलं व्यापारमभिवक्ते अभिधास्यन्ते तथा लिङादयः स्वव्यापारमेव पुरुषप्रवृत्त्यनुकूलां प्रवर्तनामित्यत आह—न च णिज्वत् प्रेषणाद्यतिरिक्ते तत्समर्थाऽऽचरणमात्रे लिङादयो निरूपितप्रयोगा मानान्तरेण लिङादीनां व्यापारस्याऽनुपलब्धेरित्युक्तम्। णिज्वाच्यस्तु कारीषादीनां व्यापारो न तथेत्यत आह—कारीषादिस्तु शीताऽपनोदनादिना शक्ततां सम्पादयन् प्रवृत्तिहेतुः। शब्दस्तु कथमिति न निरूप्यते वैयर्थ्यादिति

१. अत्रागमात् किमिति २ पु० पा०। २. त्वासौ का० वि०।
३. त्तावसमर्थस्य का० वि०। ४. गन्स्यते का० वि०।
५. सम्बन्धाऽपेक्षणात् २ पु० पा०। ६. र्थो का० वि०।
७. अधीनजन्मा २ का० वि०।

स्यान्मतम्—पवनादिरिव लिङादिः प्रेरयति पुरुषम् । तदसत् । अभिधानवैयर्थ्यात् । अप्रतीतव्यापारस्याऽपि वाय्वादेरिव स्वभावतः प्रेरकत्वात् । पूर्वोक्तदोषापाताच्च । न हि प्रवृत्तिं प्रति कारकत्वे शब्दस्य सदपि तद्व्यापाराऽभिधानमङ्गम् । अनभिहितव्यापारस्याऽपि तस्य कारकत्वात्[1] । कारकस्याऽनपेक्षितज्ञानत्वात्[2] । उपेत्यापि तु शब्दस्य प्रयोगं ब्रूमः । न प्रवर्तेत पुरुषः । प्रवर्तयतोऽपि शब्दस्याऽननुरोध्यत्वात् । न हि सर्वस्मिन् प्रवर्तयितरि प्रवृत्तिः प्रेक्षावताम्, अपि त्वनुविधेये । न चार्थाऽनर्थप्राप्तिपरिहाराद्यनुविधानकारणं स्वाम्यादाविव शब्दे समस्ति । फलात्प्रवृत्तौ तद्वैयर्थ्यम् । तत एव फलाऽवगमादवैयर्थ्यमिति चेत् ? तन्न ।

विवरीतुं शङ्कते—स्यान्मतम् । पवनादिरिव लिङादिः प्रेरयति पुरुषम्, किं मानान्तरतस्तद्व्यापारग्रहणेनेति । निराकरोति—तदसत् । अभिधानस्य वैयर्थ्यात् । कुत ? अप्रतीत[3]व्यापारस्याऽपि लिङादेर्वाय्वादेरिव स्वभावतः प्रेरकत्वात्, पूर्वोक्तदोषाऽऽपाताच्च । अप्रमाणत्वादिदोषप्रसङ्गादित्यर्थः ।

नन्वनभिधेयत्वे व्यापारस्यैते दोषा न त्वभिधेयत्वे इत्युक्तम्, अत आह—न हि प्रवृत्तिकारकत्वे शब्दस्य सदपि तद्व्यापाराऽभिधानमङ्गं प्रवृत्तिं प्रति । अनभिहितव्यापारस्याऽपि तस्य कारकत्वात् । कुतः ? कारकस्याऽनपेक्षितज्ञानत्वात् । एतेन वैयर्थ्यात्पूर्वदोषत इति च विवृते । अप्रवृत्तेरिति विवृणोति—उपेत्याऽपि तु शब्दस्य प्रयोगं ब्रूमः, न प्रवर्तेत पुरुषः । कुतः ? प्रवर्तयतोऽपि शब्दस्याऽननुरोध्यत्वात् । न हि सर्वस्मिन् प्रवर्तयितरि प्रवृत्तिः प्रेक्षावताम्, अपि त्वनुविधेये । अथाऽनुविधेयः शब्दः कस्मात्तेन भवतीत्यत आह—न चार्थाऽनर्थप्राप्तिपरिहाराद्यनुविधानकारणं स्वाम्यादाविव शब्दे समस्ति । आदिशब्दाभ्यां करुणादुःखिनोर्ग्रहणम् । यद्युच्येत, फलप्राप्तिरनुविधानकारणमस्तीति, तत्राह—फलात्प्रवृत्तौ तद्वैयर्थ्यम् । तदिति शब्दव्यापारं परामृशति । शङ्कते—तत एव शब्दव्यापारात् शब्देन कृताऽवभासनात्[4] फलाऽवगमादवैयर्थ्यमिति चेत् ? तन्न । फलाऽयोगात्, स्वव्यापारेण कृताऽवभासनेन । शब्दे प्रवर्तयितरि फलस्याऽयुक्तत्वमाह—आप्ते हि सप्रत्ययक्रिये हितकरे एव प्रवर्तयितरि अन्यथाऽनुपपत्त्या फलाऽवगमः । प्रमाणेन हिताऽहितप्राप्तिपरिहारोपायतत्त्वाऽवगतिराप्तिः, तया सह वर्तते इत्याप्तस्तस्मिन् । स च हिताऽहितप्राप्तिपरिहारोपायतत्त्वाऽवगतावपि कदाचिदकारुणिकतया नोपदिशति । अत उक्तम्—हितकरे परेषाम् । एते च तत्त्वज्ञानकारुण्ये परात्मवर्तिनी इति

---

१. कार्यकरत्वात् मू० पु० पा० । २. अनपेक्षितव्यापारत्वात् मू० पु० पा० ।
३. तद्व्या का वि० । ४. सितात् का० वि० ।

फलाऽयोगात् । आप्ते हि सप्रत्ययक्रिये हितकरे एव प्रवर्तयितरि अन्यथानुपपत्त्या फलाऽवगमः । शब्दे तु किमनुपपन्नम् ? प्रवर्तनामात्रस्य वाय्वादाविव विपरीतेऽप्युपपत्तेः ।

पुरुषश्रेयोऽर्थं प्रवृत्तेः शास्त्रस्य नैवमिति चेत् ? न । प्रमाणाऽभावात् । प्राक् शास्त्रत्वाऽसिद्धेः लिङादिव्यापारे च विधौ स्वरूपाऽभिधानप्रसङ्गः । अन्यथा शब्दविशिष्टव्यापाराऽप्रत्ययात्सन्निधानाद्विशिष्टत्वेऽर्थस्यापि तत्प्रसङ्गात् । योग्यत्वस्योभयत्राऽपरिज्ञानात् । तस्मान्नाऽभिधेया भावना विधिरूपम् ।

कुतोऽवगम्यते इत्यत उक्तम्—सप्रत्ययक्रिये । प्रत्यय उपदिष्टस्याऽर्थस्य मानान्तरेण संवादस्तेन सह वर्तते इति सप्रत्यया क्रिया यस्योपदेशरूपा सा यस्यो[1]पदेष्टुः स तथोक्तः, तस्मिन् ।

एतदुक्तं भवति । यदेव यस्मै हितमुपदिशति कर्म तस्य तत्प्रवृत्तौ हितप्राप्तेः संवाददर्शनादुपदेष्टृवर्तिनी अपि तत्त्वज्ञानकारुण्ये ईषत्करज्ञाने एवेति तदेतस्मिन् प्रवर्तयितरि[2] तत्प्रवर्तनाऽन्यथानुपपत्त्या फलाऽवगम इति युक्तम् । शब्दे तु किमनुपपन्नम् ? प्रवर्तनेति चेत् ? तत्राह—प्रवर्तनामात्रस्याऽऽ[3]प्ताऽनाप्तप्रणेतृकस्य वाय्वादाविव विपरीतेऽप्युपपत्तेः । शङ्कते—पुरुषश्रेयोऽर्थप्रवृत्तेः शास्त्रस्य नैवमिति चेत् ? शासनाद्धि शिष्याणां शास्त्रमुच्यते, शासनं च शङ्कितसमारोपितरूपव्यवच्छेदेन हिताऽहितप्राप्तिपरिहारोपायतत्त्वज्ञापनम्, ततश्च शास्त्रत्वादेव पुरुषश्रेयोऽवगतिरित्यर्थः । निराचष्टे—न प्रमाणाऽभावात् । प्राक् फलाऽवगमाच्छास्त्रत्वाऽसिद्धेः । फलाऽवगमाच्च शास्त्रत्वे परस्पराश्रयप्रसङ्गादिति भावः ।

तदनेन फलाऽयोगादिति विवृतम् । रूपोक्तेरिति व्याचष्टे—लिङादिव्यापारे च विधौ लिङादिस्वरूपाऽभिधानप्रसङ्गः । कस्मात् ? अन्यथा यदि लिङादिस्वरूपं नाऽभिधीयते ततस्तन्नाऽवगतमिति विशिष्टव्यापाराऽप्रत्ययात् लिङादेः संनिधानात् तेन विशिष्टत्वेऽर्थस्याऽपि तद्व्यापारवत्त्वप्रसङ्गात् । संनिधानाऽविशेषात् । अथाऽर्थस्य प्रवर्तनां प्रति योग्यत्वं नाऽवधृतमिति संनिधानेऽपि न तस्य प्रवर्तना व्यापार इति तत्राह—योग्यत्वस्योभयत्राऽपरिज्ञानात् । न हि लिङादेरपि योग्यत्वमन्यतोऽवधृतमित्यर्थः । कारिकार्थमुपसंहरति—तस्मान्नाऽभिधेया भावना विधिरूपम् ।

---

१. रूपा आप्तस्य २ पु० पा० । २. एतस्मिन्नाप्ते प्रवर्तयितरि० पु० पा० ।
३. स्यानाप्त का० वि० ।

अथ मतम्—अभिधैव भावना विधिर्लिङ्गाद्यर्थ इति। अत्रोच्यते—

प्रवृत्तेः सर्वतोऽर्थे वा प्रसङ्गात्कार्यतो गतेः।
अस्थानान्नियतेर्हेतोरभावाच्चाऽभिधैव न॥

विधिरित्यनुषज्यते। अभिधा चेद्विधिः सर्वशब्दानां यथास्वमभिधेयेषु तद्भाव इति घटादिशब्देभ्यो ऽपि प्रवृत्तिप्रसङ्गः। अस्या[1] अविशेषात्। अभिधेयविशेषाद्भेदे स एव प्रवृत्तिहेतुरन्वयव्यतिरेकाभ्याम्। अनन्यलभ्यस्तु शब्दार्थ इति स्थितौ कार्योन्नेयाया अभिधायाः शब्दार्थत्वमयुक्तम्।

अथ मतं, नाऽभिधेया भावनाऽभिधाभावनेति, अपि त्वभिधैवाऽर्थाऽभिधाव्यापारः शब्दस्य भावना विधिर्लिङाद्यर्थ इति। तस्य च शब्दाऽर्थसंवेदनाफलप्रथितसद्भावस्य[2] प्रवृत्तिजननं प्रति सामर्थ्यमात्रमुन्नेयमिति भावः।

अत्रोच्यते—

प्रवृत्तेः सर्वतोऽर्थे वा प्रसङ्गात्कार्यतो गतेः।
अस्थानान्नियतेर्हेतोरभावाच्चाऽभिधैव न॥

विधिरित्यनुषज्यते। स च नाभिधेति निषिध्यते। अस्यां प्रतिज्ञायां प्रवृत्तेः सर्वतः प्रसङ्गादिति हेतुं विवृणोति—अभिधा चेद्विधिः सर्वशब्दानां यथास्वमभिधेयेषु तद्भावोऽभिधाव्यापारसद्भाव[3] इति घटादिशब्देभ्योऽपि प्रवृत्तिप्रसङ्गः। कुतः? अस्या अभिधाया अविशेषात्। यद्युच्येत, अर्थाभिधात्वमात्रेणाऽविशेषेऽपि अभिधेयविशेषाद्भेदो भविष्यत्यभिधायाः। तादृशः खल्वभिधेयविशेषो लिङादीनां, येन लिङाद्यभिधैव प्रवर्तयति, न तु घटादिशब्दाऽभिधेति, तत्राह—अभिधेयविशेषाद्भेदे स एवाऽभिधाविशेष एव प्रवृत्तिहेतुर्नाऽभिधा। कुतः? अन्वयव्यतिरेकाभ्यामभिधेयविशेषाऽवगमे सति प्रवृत्तेः। सत्यामप्यभिधायां घटादिशब्देभ्यस्तदभावे प्रवृत्तेरभावादित्यर्थः।

तदनेनाऽर्थे वेति विवृतम्। कार्यतो गतेरिति विवृणोति—अनन्यलभ्यस्तु शब्दार्थ इति स्थितौ सत्यामर्थप्रतीतिलक्षणकार्योन्नेयाया अभिधाया

---

१. तस्याः—मू० पु० पा०।

२. फलप्रवेदनीयसद्भावस्य २ पु० पा०।

३. व्यापारभावः २ पु० पा०।

अभिधायाश्चाऽभिधाऽपेक्षणेऽनवस्थापातात्। अर्थाऽभिधैवाऽपेक्षते इति चेत्? न। नियामकस्य हेतोरभावात्। अर्थाऽभिधानस्य च। न ह्यत्र हेतुरस्ति। अर्थाभिधैवापेक्षते नाऽभिधेति। अभिधीयतेऽभिधेति पुरुषस्य च प्रवृत्तिरिति किं केन सङ्गतम्? तस्मादभिधा न विधिः।

अस्तु तर्ह्यर्थभेदः। नैतदपि।

अपौरुषेये प्रैषादिर्न् धर्मो नाऽवकल्पते।

अन्यलब्धत्वाच्छब्दार्थत्वमयुक्तम्। अस्थानादिति विवृणोति—अभिधायाश्चाऽभिधाऽपेक्षणेऽभिधाऽभिधाऽप्यभिधात्वेनाऽभिधेया,[1] एवं तदभिधाऽपीत्यनवस्थापातः। शङ्कते—अर्थाऽभिधैवाऽपेक्षतेऽभिधां नाऽभिधेति चेत्? निराकरोति—न। नियामकस्य हेतोरभावात्।

अपि चाऽर्थाऽभिधाऽभिधीयमाना तयैवाऽभिधीयेताऽभिधान्तरेण वा? यदाऽभिधान्तरेण तदा तयोर्यौगपद्यं क्रमो वेति विकल्पा उपप्लवन्ते। तत्र न तावत्प्रथमः कल्पः। स्वात्मनि वृत्तिविरोधेनाऽपास्तत्वात्। नाऽपि यौगपद्यम्। फले फलान्तराऽनुपपत्तेः। न ह्यस्ति सम्भवः, पाकः, पच्यते, छिदा[2] च्छिद्यते इति। क्वचिदस्ति, यथा ज्ञानं ज्ञायते इति चेत्। न। फलावस्थायां तदनुपपत्तेः फलान्तरोत्पादसमये च तस्य ज्ञेयतया कर्मकारकत्वेन फलाभावाऽभावात्। अस्तु तर्हि क्रमः। प्रथमं लिङादिभिः स्वार्थोऽभिधीयते, अथ स्वार्थो ऽभिधेति। तन्न। शब्दबुद्धिकर्मणामनावृत्तानां विरम्य व्यापाराऽनुपपत्तेः।

एतेनैव क्रमशोऽभिधानं प्रत्युक्तम्। तदनेनाऽभिसन्धिनाऽऽह—अर्थाऽभिधानस्य च। अर्थाऽभिधाया अपि हेतोरभावादित्यर्थः। अनेन नियतेर्हेतोरभावाच्चेति व्याख्यातम्। चेत्यभिधानाऽभावहेतुसमुच्चयादिति। नियमहेत्वभावमाह—न ह्यत्र हेतुरस्ति। अर्थाऽभिधैवाऽपेक्षतेऽभिधां नाऽभिधाऽभिधेति। अन्यलभ्यस्याऽपि शब्दार्थत्वाऽभ्युपगमादिति भावः। अपि चाऽभिधीयते लिङादिभिः स्वार्थाऽभिधेति च प्रेक्षावतां हिताऽहितप्राप्तिपरिहारार्थनां प्रवृत्तिरिति किं केन सङ्गतम्? न खलु प्रासादः श्वेत[3] इति पिपासवो दहनमाहरन्ति। उपसंहरति—तस्मादभिधानमपि न विधिः।

अस्तु तर्ह्यर्थभेद एव लिङादीनां विधिः नैतदपि। कुतः?

अपौरुषेये प्रैषादिर्न् धर्मो नाऽवकल्पते।

---

१. अभिधाभिधयाभिधेया २ पु० पा०। २. छेदः २ पु० पा०।
३. श्वेति का० वि०।

न च प्रवर्तनामात्रमविशेषमकर्तृकम् ।।

लोके हि प्रतीतः प्रेषणाऽध्येषणाऽभ्यनुज्ञालक्षणोऽभिप्रायाऽतिशयः प्रयोक्तृधर्मो लिङर्थः। तस्याऽपौरुषेयेषु वेदवाक्येष्वसम्भवः। प्रतीतेः सम्भव इति चेत्? न। पौरुषेयत्वापत्तेः। वेदात्मनोऽभिप्राय इत्यतिस्थवीयः। तेनाऽसंदृब्धत्वेऽभिप्रायाऽवगत्यभावात्, संदृब्धत्वे पौरुषेयत्वदोषात् ।

न च प्रवर्तनामात्रमविशेषमकर्तृकम् ।।

लिङाद्यर्थभेदश्चेद्विधिस्तस्य लोकाऽधीनाऽवधारणत्वाल्लोके च प्रेषणाध्येषणाऽभ्यनुज्ञालक्षणस्य तस्योपलब्धेः स एव विधिः स्यात्। तस्य च पौरुषेयतयाऽपौरुषेयेषु वेदवाक्येष्वसम्भव इत्याह—लोके हि प्रतीतः प्रैषणाऽध्येषणाऽभ्यनुज्ञालक्षणोऽभिप्रायाऽतिशयोऽनुविधेयपुरुषधौरेयधर्मतयाऽतिशयः प्रयोक्तुर्धर्मो लिङर्थः। तस्याऽपौरुषेयेषु वेदवाक्येष्वसम्भवः। शङ्कते—लोकाऽवगतसामर्थ्याल्लिङादेर्वेदेऽपि श्रूयमाणात्प्रेषणादिप्रतीतेः सम्भव इति चेत्? न हि दृष्टेऽनुपपन्नं नामेति भावः। निराकरोति—न, पौरुषेयत्वापत्तेः[1]। येऽपि वेदान्तवादिनोऽपौरुषेयमङ्गीकृत्य वेदं वेदशरीरिणमन्तर्यामिणमास्थिषत 'अथाऽधिदैवं[2] यः सर्वेषु वेदेषु प्रतिष्ठन् सर्वेभ्यो वेदेभ्योनन्तरो यं सर्वे वेदा न विदुर्यस्य सर्वे वेदाः शरीरं यः सर्वान् वेदानन्तरो यमयति एष त आत्माऽन्तर्याम्यमृत' इति श्रुतेः; तान् प्रत्याह—वेदात्मनोऽभिप्राय इत्यतिस्थवीयः। चेष्टेन्द्रियार्थाश्रयः शरीरमिति हि तद्विदः। न च कस्यचिदात्मनश्चेष्टादीनां वेदराशिराश्रयो भवितुमर्हति। न जातु देवदत्तादिशरीरवदस्मिन् बुद्धिपूर्वाः सन्ति क्रियाः। न च पार्थिवाऽऽप्यतैजसवायवीयाऽदृष्टोपनिबद्धकर्णनेमिमण्डलाऽवच्छिन्ननभोभागात्मनामिन्द्रियाणाममूर्त्तवेदाधारता सम्भवति। न च मनोमात्रस्य बाह्येन्द्रियनिरपेक्षस्य भोगसाधनत्वमुपपद्यते।

एतेन विषयाश्रयत्वमस्य प्रत्युक्तम्। तस्माद्देहलक्षणविरहाद्वेदात्मनो वेददेहस्याऽऽत्मनोऽभिप्राय इत्यतिस्थवीय इति। अपि च यदा लोके गामभ्याजेत्यादिवाक्येभ्यो वक्तुराज्ञादयोऽभिप्रायभेदाः प्रतीयन्ते नाऽन्यस्य तदा यद्यन्तर्यामी[3] वेदसन्दृब्धा[4] ततस्तेन तस्याऽसम्बद्धत्वेन तदभिप्रायाऽवगत्यभावात्, सन्दृ[5]ब्धत्वे पौरुषेयत्वदोषादयुक्तमेतत्

---

१. त्वापातः का० वि०। २. अधिवेदम् १ पु० पा०।
३. मी न का० वि०। ४. द्र का० वि०। ५. द्र का० वि०।

यदपि मतम्—अनेकसामर्थ्यपरिकल्पनादोषाद्व्यभिचाराच्च प्रैषादीनामवाच्यत्वादव्यभिचारात्प्रवर्तनामात्रं लोके लिङाद्यर्थस्तस्य वेदेऽप्युपपत्तिरिति। इदमप्य[1]चतुरस्रम्। निर्विशेषसामान्याऽयोगात्। अकर्तृकत्वे व्यापाराऽनुपपत्तेश्च। न तावत् प्रैषादयो विशेषा वेदे सम्भविनः। नाऽप्यन्यो विशेषः कश्चिदुपदर्श्यते। तदुपदर्शने वा सामान्याऽभिधानप्रसाधनमस्मिन्नवसरे व्यर्थम्। तदेतदपास्तसकलभेदं प्रवर्तनासामान्यं ब्राह्मण्यमिव समुज्झितकठादिभेदं स्यात्। प्रवर्तना च प्रवर्तयितुर्व्यापारः स तमन्तरेणेति नाऽतिविराजते। पुरुषस्याऽभावात्। शब्दस्य च प्रवर्तकत्वनिषेधात् प्रवर्तयितुरभावः।

यदि मन्येत फलं प्रवर्तकं तद्व्यापारः प्रवर्तना, फलार्थिनः पुरुषस्य

यदपि मतं, तत्तत्प्रेषणाद्यभिप्रायविशेषाऽभिधानेऽनेकसामर्थ्यपरिकल्पनादोषाद्व्यभिचाराच्च प्रैषादीनामवाच्यत्वादव्यभिचारात्प्रवर्तनामात्रं लोके लिङर्थो[2], न पुनः प्रैषादयः। तस्य चाऽपौरुषेये वेदेऽप्युपपत्तिरिति। अभिप्रायभेदाः खल्वमी प्रैषादयः पुरुषनान्तरीयकतया तमवगमयन्ति, न प्रवर्तनामात्रम्। तस्य तन्नान्तरीयकत्वाऽभावादिति भावः[3]। निराचष्टे—इदमप्यचतुरस्रम्। कुतः ? निर्विशेषसामान्याऽयोगात्। अकर्तृकत्वे व्यापाराऽयोगाच्च।

प्रथमं हेतुं विवृणोति—न तावत्प्रैषादयो विशेषा वेदे सम्भविनः, अपौरुषेयत्वव्याघातात्। नाऽप्यन्यो विशेषः कश्चिदुपदर्श्यते। तदुपदर्शने वा सामान्याऽभिधानप्रसाधनमस्मिन्नवसरे व्यर्थम्, विशेषस्यैव प्रवर्तकत्वात्। तदेतदपास्तसकलभेदं प्रवर्तनासामान्यं ब्राह्मणत्वमिव समुज्झितकठादिभेदं[4] स्यात्। गगनकुसुमायमानं स्यादित्यर्थः।

द्वितीयं विवृणोति—प्रवर्तना च प्रवर्तयितुर्व्यापारः, स तं प्रवर्तयितारमन्तरेणेति नाऽतिविराजते। ननु पुरुषः प्रवर्तयिता भविष्यतीत्यत आह—पुरुषस्याऽभावात्। नापि शब्द इत्याह—शब्दस्य च प्रवर्तकत्वनिषेधादधस्तात्। तस्मात्प्रवर्तयितुरभावः, तदभावात्तद्व्याप्ताया: प्रवर्तनाया अप्यभावः। यदि मन्येत फलं प्रवर्तकमिति तद्व्यापारोऽर्थिता प्रीत्यात्म[5]ता

---

१. तदपि० मू० पु० पा०।
२. र्थः का० वि०।
३. नान्तरीपकभावाऽभावात् २ पु० पा०।
४. भेदे का० वि०।
५. ना का० वि०।

तत्साधने प्रवृत्तेः। अन्यथा ऽभावात्। न कश्चिद्व्यापारविशेषः प्रवर्तनाऽपि तु प्रवृत्तिसमर्थं व्यापारमात्रं च प्रयोजकव्यापारः। भिक्षा वासयति; कारीषो ऽग्निरध्यापयतीति दर्शनात्। तदसत्।

अर्थिता व्यापृतिः पुंसो नियमः किंनिबन्धनः।
फलसाधनता कर्मनिश्चेया साध्यता कदा॥

फलार्थिता चेत् प्रवृत्तिहेतुः सेच्छा तद्योगो वा इच्छासमवायो वा। कृत्तद्धितसमासेषु सम्बन्धाऽभिधानं त्वतल्भ्यामिति वचनात् पुरुषधर्म इति न फलं व्यापृतिः। अथ तदिच्छोपहारमुखेन फलस्य प्रवृत्तिहेतुर्धर्मः प्रीत्यात्मता फलव्यापारः प्रवर्तना? साऽपि तत्रैव न कर्मणि। फलव्यापाराच्च

वा प्रवर्तना। क[1]स्मात्? फलार्थिनः पुरुषस्य फलसाधने[2] प्रवृत्तेः। अन्यथा फलव्यापारमन्तरेणाऽभावात्। न[3] हि कश्चिदेव विशेषो व्यापारः प्रवर्तना, अपि तु प्रवर्तन[4]समर्थं[5] व्यापारमात्रं[6] प्रयोजकव्यापारः, प्रवर्तनासम[7]र्थश्चायमर्थितालक्षणः प्रीत्यात्मता[8]लक्षणो वा फलस्य व्यापारः। भिक्षा वासयति, कारीषोऽग्निरध्यापयतीति दर्शनात्, अन्नोपादानशीताऽपनोदनाभ्याम्। तद् दूषयति—तदसत्।

अर्थिता व्यापृतिः पुंसो नियमः किं निवन्धनः।
फलसाधनता कर्म्मनिश्चेया[9] साध्यता कदा॥

फलार्थिता चेत्प्रवृत्तिहेतुः सेच्छा, तद्योगो वा इच्छासमवायो वा कृत्तद्धितसमासेषु सम्वन्धाऽभिधानं त्वतल्भ्यामिति वार्तिककारवचनात् पुरुषधर्म एव, न फलधर्म इति न फलं व्यापृतिः। न खल्वन्यत्र समवेतोऽन्यव्यापारो भवितुमर्हति, अतिप्रसङ्गात्। शङ्कते—अथ तदिच्छोपहारमुखेन फलस्य प्रवृत्तिहेतुर्धर्मः, प्रीत्यात्मता फलव्यापारः प्रवर्तना, इष्टलक्षणं फलम्, सुखाऽनुशायिनी चेच्छेति फलेन सुखात्मना भवितव्यम्, सुखत्वेन तदिच्छामुपहरति, इच्छा च प्रयत्नं प्रसूते, इतीच्छोपहारमुखेन फलसमवायिनी प्रीत्यात्मता प्रवृत्तिहेतुव्यापारत्वाद् भवति प्रवर्तनेत्यर्थः। निराचष्टे—साऽपि प्रीत्यात्मताऽपि तत्रैव फले एव। न च फलं प्रवृत्तिविषय इत्युक्तम्, फलेन साक्षात्करणे कर्तुश्चेष्टेति। यत्र च फलसाधने कर्म्मणि प्रवृत्तिः तस्य च दुःखतया न प्रीत्यात्मतेत्याह—न कर्मणि।

---

१. त का० वि०।
२. तत्साधने २ मु० पा०।
३. न का० वि०।
४. समर्थः का० वि०।
५. प्रवृत्तिसमर्थम् २ पु० पा०।
६. त्रं च का० वि०।
७. प्रवृत्तिसमर्थः २ पु० पा०।
८. ना का० वि०।
९. कर्मनिष्ठा या १ पु० पा० का० वि०।

प्रवर्तमानः सर्वत्र प्रवर्तेत । नियमनिमित्ताऽभावात् । तत्साधनत्वात् कर्मण्येव प्रवर्तते, न सर्वत्र । तत एव तर्हि तत्साधनत्वं प्रवृत्तिहेतुः कर्मणि न फलरूपम्, तच्च कर्मसमवायीति कर्म प्रवर्तकं स्यात् । एवं तर्हि तत्साध्यता प्रवृत्तिहेतुः, सा च फलसमवायिनीति न दोषः । तथा हि । समभिलषितस्य तृप्त्यादेः कर्मविशेषेण साध्यत्वात्तत्रैव प्रवृत्तिः । का पुनरियं साध्यता ? यदि रूपं फलस्य, सर्वत्र प्रवृत्तिप्रसङ्गः । कारकविशेषः । स हि फलस्य साधननियतः शक्तिभेदो रूपादिवत् । अन्यथा कारकत्वाऽभावात् । यथा हि

यद्युच्येत, फलसमवायिनोऽपि प्रीत्यात्मताव्यापारात्पुरुषः कर्मणि प्रवर्त्स्यति, तत्राह—फलव्यापाराच्च प्रवर्तमानः सर्वत्र प्रवर्तेत । कुतः ? फलादन्यत्वेन तत्साधनस्याऽन्येषां चाऽविशेषान्नियमनिमित्ताऽभावात् । चोदयति—तत्साधनत्वात्कर्मण्येव प्रवर्तते । सर्वत्र सर्वेषां फलसाधनत्वाऽभावात् । परिहरति—तत एव तत्साधनत्वे सति प्रवृत्तिभावादेव । भवतु तर्हि तत्साधनत्वं प्रवृत्तिहेतुः कर्मणि, न पुनः फलरूपम् । भवतु को दोष ? इत्यत आह—ततश्च कर्मसमवायि न फलसमवायीति कर्मैव प्रवर्तकं स्यात् । चोदयति—एवं तर्हि तत्कर्मसाध्यता प्रवृत्तिहेतुः, सा च फलसमवायिनीति न दोषः । ननूक्तं फलसमवायिनी सा कथमन्यत्र कर्मणि प्रवृत्तिहेतुरतिप्रसङ्गादिति ? तत्राह—तथा हि समभिलषितस्य तृप्त्यादेः कर्मविशेषेण साध्यत्वात्तत्रैव कर्मविशेषे प्र[1]वर्त्तनाऽन्यत्र ।

एतदुक्तं भवति । फलसमवायिन्यपि असौ साध्यता[2] साधनाऽधीनानिरूपणतया साधनमपि गोचरयति, न पुनरसाधनमपि । तेनैव तस्माद्विशेषात्साधने एव प्रवर्तयति, न तु सर्वत्रेति । तदेतद् दूषयति—का पुनरियं साध्यता ?यदि रूपं फलस्य, ततस्तस्य साधनाऽधीननिरूपणत्वाऽभावान्न साधने प्रवर्तयेत् । प्रवर्तयेद्वा सर्वत्रैव, अन्यत्वाऽविशेषात् । चोदयति—कारकविशेषः । विशेष्यते व्यावर्त्यते कर्मकारकं गगन[3]कुसुमादिभ्यो येन शक्तिभेदेन स तथोक्तः । ननु तथाऽपि कुतस्तस्य साधने प्रवर्तकत्वम् ? इत्यत्राह—स हि फलस्य साधननियतः शक्तिभेदः । अतः साधने प्रवर्तते इत्यर्थः । निदर्शनमाह—रूपादिवत् । कुतः शक्तिभेदप्रत्ययः ? इत्यत आह—अन्यथा यदि फलस्य शक्तिभेदो न स्यात्ततोऽस्य लौकिकपरीक्षकप्रसिद्धस्य कर्मकारकत्वस्याऽभावात् । शक्तिमत्कारकमिति तद्विदः । दृष्टान्तदार्ष्टान्तिके विभजते—यथा हि रूपादीनां

---

१. प्रवृत्तिर्ना मु० पा० । २. साध्यता २ मु० पा० ।
३. गगन तत् कुसु मु० पा० ।

रूपादीनां शक्तिविशेषाद् ग्रहणे साधननियमः तथा फलेष्वपि द्रष्टव्यः। गगनतत्कुसुमादेरनुत्पादात्, तृप्त्यादेश्च कर्ममात्रेण। कदा पुनरयं शक्तिभेदः साध्यताऽभिधानः? फलस्य भावसमये न तावत्। वैयर्थ्यादप्रवृत्तिहेतुत्वाच्च। न खलूत्पन्नस्योत्पादो, यद्योगिनी[1] शक्तिरर्थवती। नापि सिद्धे फले तत्साधने कश्चित्प्रवर्तते। अभावकालेऽप्यसत्कथं शक्तिमत् खपुष्पवत्?

ननु सदेव कार्यमुत्पद्यते?

कर्मकारकाणां शक्तिविशेषाद्ग्रहणे चक्षुरादिसाधननियमः, तथा फलेष्वपि द्रष्टव्यः[2]। सम्भवति खलु स तादृशः फलस्य कर्मकारकस्य सामर्थ्याऽतिशयो येनाऽभवनधर्मणश्च गगनकुसुमादेर्भवनधर्मणश्च घटादेस्तथा साधनाऽविशेषाच्च भेदः सिध्यतीत्याह—गगनकुसुमादे[3]रनुत्पादात्। तृप्त्यादेश्च फलस्य कर्ममात्रेण। तदेतद्विकल्प्य दूषयति—कदा पुनरयं शक्तिभेदः साध्यताऽभिधानः? फलस्य भावसमये न तावत्। कुतः वैयर्थ्यादप्रवृत्तिहेतुत्वाच्च। वैयर्थ्यादिति हेतुं विवृणोति—न खलूत्प[4]न्नफलस्योत्पादः यद्योगिनी शक्तिरर्थवती। अप्रवृत्तिहेतुत्वाच्चेति विवृणोति—नाऽपि सिद्धे फले तत्साधने कश्चित्प्रेक्षावान् प्रवर्तते। फलस्याऽभावकालेऽप्यसत् कथं शक्तिमत्? खपुष्पवत्। चोदयति—ननु सदेव कार्यमुत्पद्यते?

इदमत्राऽऽकूतम्। यदसत्तन्न क्रियते यथा शशविषाणम्। असच्चेत्कारणे कार्यं[5] तदपि न क्रियेत, असत्त्वात्। क्रियते च, तस्मात्सत्। तथा हि। क्रियमाणत्वं भवनकर्तृतया व्याप्तं, सा चाऽसतो व्यावर्तमाना स्वव्याप्यं क्रियमाणत्वं व्यावर्तयन्ती सत्येव व्यवस्थापयतीति प्रतिबन्धसिद्धिः। अपि च कारकत्वाऽविशेषेऽपि कस्मात् तन्त्वाद्यात्मका एव पटादयो, न कुविन्दाद्यात्मकाः? न ह्यसत्त्वे कश्चिद्विशेषः। तन्त्वाद्यात्मानश्चोपलभ्यन्ते। तस्मातन्त्वादिषु सन्तः पटादयः। अपि च यदि तन्त्वादिष्वसन्तः पटादयः, कस्मात्तन्त्वादिभ्य एव भवन्ति, न तु वार[6]णादिभ्यः? पट एव वा तन्तुभ्यः कस्माज्जायते, न जायन्ते कटादयः? अतो न[7] खल्वसत्त्वे कश्चिद्विशेषः। सोऽयमुभयविधो नियमः स्वकारणे कार्यस्य सत्त्वमसत्वमन्यत्राऽवगमयति। अपि चाऽशक्तादशक्यकार्यस्याऽनुत्पत्तेरतिप्रसङ्गात् शक्तादेव कारणात्कार्येण

---

१. उत्पादोपयोगिनी० मू० पु० पा०।
२. व्यम् का० वि०।
३. गगनतत्कुसुमादेः २ पु० पा०।
४. अन्यत्र का० वि०।
५. चेत् कार्यम् २ मु० पा०।
६. वी मु० पा०।
७. न मु० पा०।

इदं तावदसत्कार्यवादिनोऽनुनाथ्य वक्तव्यम् ।

शक्येनोत्पत्तव्यम्, शक्तियुक्तश्च शक्यः,[१] शक्तिश्च सम्बन्धरूपा संयोगवदुभयाश्रया शक्याऽभावे न भवतीति शक्यभावोऽभ्युपेयः । अपि च कारणं नाम कार्योपहितमर्यादं यदि तदभावे नाऽर्हति भवितुम्, न हि यद्यदुपहितमर्यादं तत्तदभावे भवति; यथा कुण्डलोपहितसीमा कुण्डली न कुण्डलाऽभावे । तस्मात्कारणभावात्तत्र कार्यं सत् । तदिदं सत्कार्य-साधनमवीत[२]पञ्चकमाचख्युः साङ्ख्याः । परिहरति—इदं तावदसत्काय-वादिनोऽनुनाथ्य[३] वक्तव्यम् ।

इदमाकूतम् । न तावत्क्रियमाणत्वमत्र प्रमाणं भवितुमर्हति, असाधा-रणत्वात्, अनुपलब्धिविरोधाच्च । यथा हि खल्वसद[४]शक्यक्रियमेवं सदपि न जातु सतीति शक्तिरपरिणामिन्यनन्ता क्रियागोचरः । अपि च[५] इद[६]म-मन्त्रौषधमिन्द्रजालमार्येण शिक्षितं[७] यदिदमजाताऽविनष्टरूपाऽतिशयम्-व्यवधानमनतिदूरस्थानं तस्यैव तदवस्थेन्द्रियादेरेव पुंसः कदाचित्प्रत्यक्षं[८] परोक्षं च, येन कदाचिदस्य प्रत्यक्षमुपलब्धिः, कदाचिदनुमानम्, कदा-चिदागमः । तस्मिन्नेवाऽनतिशयेऽमीषां प्रकाराणां विरोधात् । यदि मन्येत, नाऽनतिशयमेकाऽतिशयोत्पत्त्या पराऽतिशयनिवृत्त्या च व्यवहारभेदोप-लब्धेः । तिस्रः खल्विमा भावपरिणतिविधा भवन्ति साङ्ख्यानाम्, धर्मलक्ष-णाऽवस्थाभेदात् यथास्वं धर्मिधर्मलक्षणाऽधिकरणाः । तद्यथा सुवर्णतत्त्वमेकं धर्मि, तस्य परिणामाः, स्वस्तिकरुचकादयो धर्मा उपजनाऽपायधर्माण-स्तेषाञ्च लक्षणपरिणामः, तथा हि । यदा खल्वयं हेमकारः स्वस्तिकं भङ्क्त्वा रुचकं रचयति तदा स्वस्तिको वर्तमानतालक्षणं हित्वाऽतीतता-लक्षणमापद्यते । रुचकस्त्वनागततालक्षणं हित्वा वर्तमानतां प्रतिपद्यते । तथाऽवस्थापरिणामो लक्षणगतः । प्रतिक्षणमुत्पत्तिनिरोधधर्माणोऽभिनव-तमाऽभिनवतराऽभिनवपुराणपुराणतरपुराणतमत्वादयः । प्रयत्नरक्षितस्यापि वस्त्रादेः प्रान्ते पुराणतमत्वोपलम्भात् सोऽयं त्रिविधः परिणामोऽतिशय इति । अथाऽयमतिशयस्त्रिविधोऽपि धर्मिणि सनातनः कादाचित्को वा ? यदि सनातनस्तदा स्वस्तिकादयश्च त्रैकाल्यं च नवपुराणत्वादयश्चाऽपर्यायं धर्मिण्येकस्मिन् सुवर्णे उपलभ्येरन् । कादाचित्कत्वे तु कथं नाऽसता-मुत्पादः ? तेषां शक्त्यात्मना सत्त्वादयमदोष इति चेत् ? न । शक्तिरति-

---

१. शक्तः मु० पा० । २. धनमाच० का० वि० । ३. वाद्य का० वि० ।
४. दृशिश० का० वि० । ५. च कुतः का० वि० । ६. दं म० का० वि० ।
७. इन्द्रजालकार्यम् २ पु० पा० । ८. प्रत्यक्षं च येन का० वि० ।

अपि च निरुपादानकार्याऽनुत्पादात्तदत्यन्तव्यतिरेकाऽभावादुपादेयस्यो-

शयश्च किमेकमेव तत्त्वं नाना वा ? तत्रैकत्वे जन्माऽजन्मनिवृत्तिरनिवृत्तिः प्रत्यक्षतापरोक्षताऽर्थक्रियासूपयोगोऽनुपयोगश्चेति कथमेकत्र निष्पर्यायं परस्परपराहतं युज्यते ? नानात्वे वा सत्त्वेऽपि शक्तेरसन्नतिशयः कादाचित्क इति कथं नाऽसत उत्पत्तिः ? सर्वदाऽतिशयस्य सत्त्वे वा कथं न पूर्वोक्त-दोषप्रसङ्गः ? अतिशयस्य व्यक्त्यव्यक्तिभ्यामविरोध इति चेत् ? व्यक्त्यव्यक्ती अप्यतिशयस्य सदातन्यौ न वा ? तत्र सदातनत्वे तदवस्थैव विरोधप्रसक्तिः। कादाचित्कत्वे वा कथं नाऽसत उत्पादः ? इति भव्यत्व-ञ्चाऽसत उपपादयिष्यतेऽधिकारनिरूपणप्रस्तावे। असत्त्वेऽपि च कारण-सामर्थ्यनियमात् कार्यनियम उपपद्यते। अन्यथा भवन्मतेऽपि प्रधानो-पादानत्वाद्विश्व[1]स्य प्रधानस्य चाऽन्वयितया सर्वत्रैकरूपत्वादुपादानात्म-कत्वादुपादेयस्य कार्यजातस्य सर्वं सर्वतः सर्वत्र सर्वदा सर्वथा सदितीदमतो नेदमिदमिह नेदमिदमिदानीं नेदमिदमेवं नेदमिति नियमो न स्यात्। कस्यचिदपि रूपस्य कथञ्चित्कदाचित् क्वचिद्विवेकहेतोरभावात्। सर्वत्र सत्त्वाऽविशेषेऽपि हेतुसामर्थ्यनियमादभिव्यक्तिनियम इति चेत् ? हन्ताऽसत उत्पत्या किमपराद्धम्, येन तस्यामपि नियमो न स्यात् ? भवतां तु सर्वेषां सर्वात्मकत्वादभिव्यक्तिभेदाऽनुपपत्तेश्च दुरधिगमो नियम इत्युक्तप्रायम्।

एतेन कुविन्दादिसमवधानेऽपि पटस्य नियमेन तन्त्वात्मकत्वेन[2] सत्कार्यसाधनं प्रत्युक्तम्। शक्तिश्च शक्यविषयाऽपि शक्ताश्रया विनापि शक्यसद्भावं ज्ञानमिव ज्ञेयविषयमपि ज्ञानाश्रयमन्तरेणापि ज्ञेयमुपपत्स्यते। कारणत्वञ्च कार्यं प्रति कारणस्य शक्तिभेदः। स च कारणाश्रय एव,[3] न कार्यकारणाश्रयः। निरूपणमप्यस्य कार्याऽवगमाधीनं, न तु कार्यसत्त्वा-ऽधीनमिति नाऽवीतपञ्चकं सत्कार्यसाधने प्रभवति। तस्मात्तन्त्वादयः स्वव्यापारात्प्रागसत्कार्यमुत्पादयन्ति कारणत्वादभिव्यक्तिकारणवदित्य-सत्कार्यवादिनो दर्शयाम्बभूवुः। तेनताननुनाथ्यैतद्वक्तव्यम्, सदेव कार्य-मुत्पद्यते इति[4]।

अपि च समानतीर्था अपि स्वायम्भुवा एकान्ताऽनभ्युपगमादिति वदन्तो न सर्वात्मना सत उत्पत्तिमभ्युपयन्ति, अपि तूपादेयस्योपादानरूपेण सतो, न पुनरुपादेयरूपेणापि सत इत्याह—अपि च निरुपादानकार्याऽनुत्पा-

---

१. विशेषस्य १ पु० पा० का० सं०। २. तन्त्वात्मकत्वम् २ पु० पा०।
३. आश्रयो भवेत् २ पु० पा०। ४. इति। तस्मात् सर्वमवदातम् २ पु० पा०।

पादानरूपेण सत उत्पत्तिरुच्यते । सर्वात्मना तु सत्त्वे तदनुपपत्तेर्वैयर्थ्याच्चोपादेयवत् । साध्यं नोपादानम् । कथं तर्हि कर्म्म कारकम् ? नैव कर्मकारकं कारकाश्रितमिति केचित् । विकार्यप्राप्ययोर्वा सत्त्वाददोषः । त्रैविध्यं तर्हि हीयते । कामं, न त्वसतः कारकत्वं शक्याऽध्यवसानम् । कथं तर्हि [1]घटं करोतीति प्रयोगः ? उपादेयश्रुत्या उपादाननिर्देशात् । बुद्धिस्थस्य वा

दात्तदत्यन्तव्यतिरेकाऽभावादुपादेयस्योपादानरूपेण सत उत्पत्तिरुच्यते । निष्क्रान्तमुपादानात्कार्यं निरुपादानम्, तन्त्वादिभ्यो भिन्नदेशमिति यावत् ।

एतदुक्तं भवति । यथा कुविन्दादिभ्यो भिन्नदेशे एतदुपलभ्यते, नैवं तन्त्वादिभ्यः, सोऽयं धर्मधर्मिभावो नैकान्तिकभेदे भवितुमर्हति, गवाश्वस्येव । नाप्यभेदे ऐकान्तिके, धर्मिरूपस्येव । तस्मात्कथञ्चिद्भेदः कथञ्चिदभेद एषितव्यः । सोऽयमनेकान्ताऽभ्युपगम इत्यर्थः ।

अथोपादेयस्वरूपेणापि सतः किमित्युत्पत्तिर्नोच्यते ? इत्यत आह— सर्वात्मना तु सत्त्वे तदनुपपत्तेः । तस्मादुत्पत्तेरनुपपत्तेः । हेत्वन्तरमाह— वैयर्थ्याच्च साधनानाम् । कुतः ? उपादेयवत् । उपादेयरूपेण तद्वत् तदन्वितमिति यावत् । साध्यं साधनार्हं नोपादानम्, यतो निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य साधनन्यायाऽतिपातात् । ननु यद्यसत उत्पत्तिस्ततस्तस्याऽसत्त्वेन क्रियां प्रति निमित्तभावाऽभावात्कथं कर्मकारकम् ? इत्याह—कथं तर्हि कर्मकारकम् ? तदेकदेशिमतेन परिहरति—नैव कारकं कर्मकारकाश्रितमिति केचित् । यथाहुः 'कारकादुत्पत्तेः कर्मे'-ति । तदेतत्कारकाऽधिकारे कर्मसंज्ञाविधानविरुद्धमित्यनादृत्य पक्षान्तरमुपन्यस्यति— विकार्यप्राप्ययोर्वा सत्त्वाददोषः । चोदयति—त्रैविध्यं तर्हि वैयाकरणप्रवरसंमतं कर्मणो हीयेत । निर्वर्त्यस्याऽसत्त्वेनाऽकर्मत्वात् । परिहरति—कामम्, न त्वसतः कारकत्वं शक्याऽध्यवसानम्; तत्रभवतोऽभियुक्तस्य पाणिनेर्विरोधे कात्यायनस्याऽसद्वादित्व[2]मिति भावः । ननु यदि न निर्वर्त्यस्य कर्मता, कथं तर्हि घटं करोतीति द्वितीयाप्रयोगः ? तस्माल्लौकिकप्रयोगविरोधात्पाणिनेरेवाऽसद्वादित्वमित्यर्थः । समाधत्ते—उपादेयस्य घटस्य श्रुत्या । घटशब्देनेति यावत् । उपादानस्य कपालानां तादर्थ्यनिमित्तोपचारात् । उपादानस्य च सत्त्वेन कारकत्वोपपत्तेर्द्वितीयाप्रयोगसिद्धिः ।

एतदुक्तं भवति, प्रयोगो लौकिको घटं करोतीति, न पुनस्तस्य मुख्यत्वमपि, औपचारिकस्याऽपि तस्य लोके दर्शनात्; मञ्चाः क्रोशन्तीति

---

१. कटम् मू० पु० पा० । २. वादित्वात् २ पु० पा० ।

क्रियासूपयोगाद्युक्तो निर्वर्त्यस्य कारकभावः । यथोक्तम्—

व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्म्मणः ।
कारकत्वं तथासिद्धं बुद्धिरूपप्रकल्पितम् ।।

एतेन साध्यसाधनयोः परस्पराऽऽनुकूल्यं परास्तम् । अस्तु तर्हि कर्म्म प्रवर्तकम् । अभिमतसाधनता तस्य प्रवर्तना, प्रवृत्तिहेतुरूपत्वात् । न । तस्य विषयत्वात् । अपि च—

प्रज्ञायते लिङादीनां व्यञ्जनीया प्रवर्तना ।
प्रयोक्तृधर्म्मो न णिचो यथाऽनियतकर्तृका ।।

लोकाद्धि शब्दार्थाऽधिगमः । तत्र च प्रवर्तना नियताधारा प्रयोक्तृसंश्रयैव

यथा । तदिह कारके कर्तुरीप्सिततमं कर्म, कर्मणि द्वितीयेत्यभियुक्तस्मृतेरौपचारिक इति निश्चीयते । अतो यस्य स्मृत्या विरोधो मुख्यत्वस्य, न तस्य लौकिकत्वम्, यस्य तु प्रयोगस्य लौकिकत्वम्, न तस्य विरोध इति । अस्तु वा मुख्यत्वम्, तथाऽप्यविरोध इत्याह—बुद्धिस्थस्य वा क्रियासूपयोगात् । क्रियानिमित्तत्वोपपत्तौ युक्तौ निर्वर्त्यस्य कारकभावः । यथोक्तम्—

व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्मणः ।
कारकत्वं तथा सिद्धं बुद्धिरूपप्रकल्पितम् ।।

आकृतौ हि पदार्थे तस्या नित्यत्वाज्जन्यमानत्वानुपपत्तेरित्यर्थः । तस्मान्न फलस्य शक्तिभेदः साध्यता । एतेन फलगतशक्तिभेदसाध्यतानिराकरणमात्रेण साध्यसाधनयोः सिद्धिं प्रति परस्पराऽऽनुकूल्यं सम्बन्धः साध्यता परास्ता वेदितव्या । तत्राऽपि साम्यात्कदेति प्रश्नस्य ।

अस्तु तर्हि कर्म प्रवर्तकम् । अभिमतसाधनता तस्य प्रवर्तनप्रयोजकव्यापारः । कुतः ? प्रवृत्तिहेतुरूपत्वात् । तथा खल्वभिमत[1] साधने कर्मणि स्वयं दुःखरूपेऽपि पुरुषः प्रवर्तते । तदेतद् दूषयति—न, तस्य विषयत्वात्प्रवृत्तिकर्तुः प्रयोजकः प्रवर्तकः, सिद्धश्च स भवति, तदिह सिद्धं चेत्कर्म प्रवृत्तेः प्राक् प्रवृत्तेर्भावनाया विषयो न भाव्यम् । न जातु गगनमस्या भाव्यं भवितुमर्हति । विषयश्चेत्कर्म असिद्धत्वात्कथं प्रवर्तकमित्यर्थः । अपि च—

प्रज्ञायते लिङादीनां व्यञ्जनीया प्रवर्तना ।
प्रयोक्तृधर्मो न णिचो यथाऽनियतकर्तृका ।।

लोकसिद्धो हि शब्दसामर्थ्याऽधिगमः । तत्र च प्रवर्तना नियताधारा प्रयोक्तृसंश्रयैव लिङाद्यर्थोऽवगम्यते । णिजर्थस्तु सा अनियताधारा ।

---

१. अयमभिमतः २ पु० प० ।

लिङाद्यर्थोऽवगम्यते। णिजर्थस्तु साऽनियताधारा। न च णिजर्थवल्लिङाद्यर्थोपि भवितुमर्हति। यथालोकप्रज्ञानं शब्दार्थव्यवस्थानात्[1]।

यस्य त्वेवं सति पुरुषप्रयत्नोऽनुवादो होमाऽनुगतस्तु व्यापारः श्रुत्योच्यते इति दर्शनाच्चेतनकर्तृव्यापारात्मिका, इतरथा वा स्पन्दाऽस्पन्दसाधारण्येनौदासीन्यप्रच्युत्यात्मव्यापारमात्रं भावना विधिशब्दपर्याया लिङर्थोऽपरामृष्टकालभेदा। लि[2]ङादिषु तु सत्त्वेपि कालविशेषेण विधिरूपप्रतिबन्धादप्रवृत्तिहेतुत्वात् य[3]ज्यादिभिरिव लिङभिधेयाया इति दर्शनम्; तम्प्रत्युच्यते—

नैकं विबद्धं न च तद्विशेषश्चेत्स कथ्यताम्।
कालभेदाऽपरामर्शः कामं नाऽस्मात्प्रवर्तते॥

लिङादिषु कालभेदेन विधिरूपस्य प्रतिबन्धे भावनाज्ञानाऽभावो-

न च णिजर्थवल्लिङर्थोऽपि भवितुमर्हति, यथालोकप्रज्ञानं शब्दार्थव्यवस्थानात्। सुगमम्। यस्य तु दर्शनमिति परेण सम्बन्धः कृतः। किं तदित्याह—एवं सति पुरुषप्रयत्नोऽनुवादः, होमाधारगतस्तु व्यापारः श्रुत्योच्यत इति तेषु तेषु शास्त्रप्रदेशेषु भाष्यकारव्यवहारदर्शनाच्चेतनकर्तृव्यापारात्मिका प्रयत्नशब्दप्रवेदनीया। इतरथा स्पन्दाऽस्पन्दसाधारण्येनौदासीन्यप्रत्युपलक्ष्यमाणाऽऽत्मव्यापारमात्रं भावना विधिशब्दपर्याया लिङर्थः।

ननु यदि भावनैव विधिः पचत्यपाक्षीत्पक्ष्यतीत्यत्राऽप्यस्ति भावनेति पचेदित्यनेन तुल्यार्थत्वप्रसङ्ग इत्यत आह—अपरामृष्टकालभेदा प्रवृत्तिहेतुर्भावना विधिरपरामृष्टकालभेदा तद्धेतुः। सा च लिङर्थः। न त्वेवं लडाद्यर्थ[4] इत्यर्थः। लडादिषु सत्त्वेऽपि भावनायाः कालविशेषेण वर्तमानादिना विधिरूपप्रतिबन्धादप्रवृत्तिहेतुत्वान्न लिङादितुल्यार्थता, य[5]ज्यादिभिरिव लिङभिधेयाया इति। यथा 'यदि रथन्तरसामा सोमः स्या', 'द्यस्योभयं हविरार्तिमार्च्छेती[6],-त्येवमादिषु; तं प्रत्युच्यते—

नैकं विवद्धं, न च तद्विशेषश्चेत्स कथ्यताम्।
कालभेदाऽपरामर्शः कामं नाऽस्मात् प्रवर्तते॥

यदि हि भावना विधिरित्येकमेव तत्त्वं ततो लिङादिषु कालभेदेन विधिरूपप्रतिबन्धे भावनाज्ञानाऽभावः। विधेर्भावनाया अभेदात्। अविवद्धे

---

१. व्यवस्थापनात् मू० पु० पा०। २. लडादिषु का० वि०।
३. यज्यादि मु० पा०। ४. लडाद्यर्थ इति १ पु० पा०। एवमग्रेपि।
५. यज्या मु० पा०। ६. आर्च्छेत् २ पु० पा०।

ऽभेदात् । अविबद्धे भेदप्रसङ्गात् । न खल्वेकं विबद्धमविबद्धं च कल्पते । विशेषस्य प्रतिबन्धो न भावरूपस्य । विशेषरूपभावाऽभावाऽनुविधानात् । प्रवृत्तिभावाऽभावयोः । स तर्हि विशेषो विधिः । न भावो भावना विधिरुपदेशः प्रेरणमित्येकम् । निदर्शनीयश्चासौ । कर्तव्यतेति चेत् ? न । तस्या एव बुभुत्सनात् ।

ननु कालभेदपरामर्शविरह एव विशेषः किमन्येन ? वर्तमानादिरूपाया अननुष्ठेयत्वात्तदभावेऽप्यनुष्ठेयत्वप्रतीतेः । भवत्वेष विशेषो न तु पुरुषस्य प्रवृत्तिहेतुः । कामं प्रत्येतु कालभेदविविक्तां[1] भावनाम् ? अनुष्ठानं तु कुतः ? न हि वस्तुरूपमात्रप्रतिपत्तिः प्रवृत्तिनिमित्तम् । न खलु घट इति प्रतिपद्य ततोऽर्थं तावत्येव तस्मिन्प्रवर्तते । साध्यतया प्रवर्तत इति चेत् ?

वा भावनाया विबद्धाऽविबद्धविरुद्धधर्माऽध्यासाद् भेदप्रसङ्गात् । विरुद्धधर्माऽध्यासाऽसम्भवमेकस्य दर्शयति—न खल्वेकं विबद्धमविबद्धञ्च कल्पते, घटते । चोदयति—विशेषस्य प्रतिबन्धो न भावरूपस्य । भाव इति ण्यन्ताद्भवतेरेरजित्यचि कृते भावनामाह । परिहरति—विशेषरूपभावाऽभावाऽनुविधानात् प्रवृत्तिभावाऽभावयोः । स तर्हि विशेषो विधिः । अतो न भावो भावना विधिरुपदेशः प्रेरणमित्येकं वस्तु । निदर्शनीयश्चासौ । शङ्कते—भावनायाः कर्तव्यतेति चेत् ? निराकरोति—न । तस्या एव बुभुत्सनात् । सत्यम्, कर्तव्यता विधिः, सैव तु कीदृशीति जिज्ञास्यत इत्यर्थः । चोदयति—ननु कालभेदपरामर्शविरह एव विशेषो भावनायाः कर्तव्यताविधिः, तत्किमन्येन विशेषेण ? अत्रैवाऽन्वयव्यतिरेकौ दर्शयति—वर्तमानादिरूपाया भावनाया अननुष्ठेयत्वात्तदभावे चाऽनुष्ठेयत्वप्रतीतेर्विधिनिबन्धनत्वाच्चऽनुष्ठेयत्वस्य कालभेदाऽपरामर्श एव भावनायाः कर्तव्यता विधिरिति साम्प्रतम् । तद् दूषयति—भवत्वेष विशेषः, न तु पुरुषस्य प्रवृत्तिहेतुः, अतद्धेतुश्च कथं विधिः ? नन्वनुष्ठेयत्वाऽवगतेरेव प्रवृत्तिः सा च भावनायाः कालभेदाऽपरामर्शे आपततीत्यत आह—कामं प्रत्येतु कालभेदविविक्तां भावनामयं पुमान्, अनुष्ठानं तु कुतो हेतोः ? ननु कालभेदाऽपरामर्शभावाऽभावाऽनुविधानादनुष्ठेयत्वाऽवगतिभावाऽभावयोः स एव विशेषः प्रवृत्तिहेतुरित्युक्तम्, तत्किं हेतुप्रश्नेन ? इत्यत आह—न हि वस्तुरूपमात्रप्रतीतिः प्रवृत्तिहेतुः । कस्मात् ? न हि घट इति प्रतिपद्य ततो घटशब्दादर्थकालभेदपरामर्शरहितं तावत्येव तस्मिन् घटे प्रवर्तते । तस्मादन्वयो व्यभिचारीत्यर्थः । शङ्कते—साध्यतया प्रवर्तते इति

1. विभक्तां मु० पा० ।

केयं साध्यता ? यद्यसिद्धत्वम्, खपुष्पम् । मृत्पिण्डाऽवस्थायां च घटो नास्तीत्यपि प्रसङ्गः । अथ कारकविषयत्वं तैर्विषयीकृतायां प्रवृत्तिकारिकायां किमर्थं प्रवर्तेत ? साध्यायां चाऽनेन प्रवर्तितव्यमिति कुतस्त्यम् ? फलवत्ताऽवगमात्प्रवर्तेत इति चेत् ? । स एव कुतः ? अनुष्ठेयत्वाऽवगमादिति चेत् ? न । सिद्धेऽनुष्ठेयत्वे फलकल्पना ततश्चाऽनुष्ठेयत्वमितीतरेतराश्रयत्वात् । एवमेवाऽप्रवृत्तस्याद्या प्रवृत्तिः आकूतं चिकीर्षा अध्यवसायो वा लिङाद्यर्थः । उत्तरकाला प्रवृत्तिः प्रयत्नो वा देहवचनचेष्टा वा लडाद्यर्थ इति विशेषाऽभिधानं प्रत्यूढम् । तद्धेत्वभावात् । पुरुषरूपमात्रप्रतीतेरप्रवृत्तेः, हेत्वन्तराऽप्रतीतेश्च । तां च भूतवर्तमानौ प्रतिबध्नीतो, नेतरः कालो, भविष्यत्यनुष्ठेयत्वाऽविरोधात् ।

चेत् ? विकल्प्य निराकरोति—केयं साध्यता ? न तावत् कालभेदपरामर्शविरहो, व्यभिचारादित्युक्तमधस्तात् । तथा च सति यद्यसिद्धत्वमत्यन्तप्रागभावाभ्यां खपुष्पम् । मृत्पिण्डाद्यवस्थायाञ्च घटो नास्तीत्यपि साध्यमिति प्रवृत्तिप्रसङ्गः । अथ कारकविषयत्वम्, तैर्विषयीकृतायां प्रवृत्तिकारिकायां किमर्थं प्रवर्तेत ? साधनप्रवर्तकत्वं हि कर्तृव्यापारः; प्रवृत्तानि चेत्साधनानि स्वव्यापारे कृतं तर्हि प्रवर्तकेने[1]त्यर्थः । अपि च साध्यायाञ्च भावनायामनेन प्रेक्षावता हिताऽहितप्राप्तिपरिहारार्थिना प्रवर्तितव्यमिति कुतस्त्यम् ? शङ्कते—फलवत्ताऽवगमात्प्रवर्तेत इति चेत् ? निरकरोति—स एवाऽन्तरङ्गतया धात्वर्थभाव्यावरुद्धायां भवन्मते कुतः ? अनुष्ठेयत्वावगमादिति चेत् ? न । सिद्धेऽनुष्ठेयत्वे फलकल्पना, फलकल्पने चा[2]ऽनुष्ठानमितीतरेतराश्रयम्[3] । एवमेवाऽप्रवृत्तस्याऽऽद्या प्रवृत्तिः । तामेव विभजते—आकूतं चिकीर्षाऽध्यवसायो वा प्रयत्नस्तत्पूर्वो लिङर्थः, उत्तरकाला प्रवृत्तिः प्रयत्नो वा देहवचनचेष्टा वा लडाद्यर्थ इत्याचार्यदेशीयानां विशेषाभिधानं प्रत्युक्तम् । एवमित्यतिदिष्टं हेतुमादर्शयति—तद्धेत्वभावात् । तदित्याद्यां प्रवृत्तिं परामृशति । स एव कुतः ? पुरुषस्य रूपमात्रप्रतीतेरप्रवृत्तेर्हेत्वन्तरस्य साध्यताया वा फलस्य वाऽप्रतीतेः । अपि च स नाम कालभेदपरामर्शस्त्यज्यताम्, यः साध्यतां विहन्ति भावनायाः, अतीतवर्तमानौ च तथा; न त्वनागतः । तस्य तया सह विरोधाऽसिद्धेः । तेन पक्ष्यतीत्यादावनुपहतसाध्यभावा भावनाऽवगम्यते इति विधित्वप्रसक्तिरित्याह—ताञ्च भूतवर्तमानौ प्रतिबध्नीतो, नेतरः कालो, भविष्यत्यनुष्ठेयत्वाऽविरोधात् ।

---

१. प्रवर्तकेन कर्त्रा. २ पु० पा० २. कल्पनातश्च. २ पु० पा० ।

३. इतरेतराश्रयत्वात्. २ पु० पा० ।

यदपि समर्थनम्—अप्राप्तसम्बन्धया क्रियया आत्मनः सम्बन्धस्य प्रतीत्या प्रवृत्तिः यथाऽद्य तवेदं कर्मेति लोके। अत्रापि तु लृङन्ते श्रोतुः प्रमाणान्तरेणाऽनधिगतमर्थमवगमयति विधित्वप्रसङ्गः।

न। निमित्तान्तराऽप्राप्ते तस्य तदभिधानं, तत्र निमित्तान्तरप्राप्तस्यैव भविष्यत्त्वेनाऽभिधानादर्थस्य लिङादिभिस्तु तथाऽभिधानम्। अतश्चाऽज्ञातज्ञापनमप्रवृत्तप्रवर्तनमुभयविधप्राप्तिप्रतिषेधेनाऽप्राप्तक्रियाकर्तृसम्बन्धो विधिरिति विधिविदामुद्गाराः।

नैतत्सारम्। यस्मात्—

न प्रवृत्तिर्योगधियो लोकेऽभिप्रायवेदनात्।
मृषा भवेत्तथा कामं[1] किं मुधैष प्रयस्यति ॥

यदपि समर्थनम्, अप्राप्तसम्बन्धया क्रिययाऽऽत्मनः सम्बन्धस्य प्रतीत्या प्रवृत्तिः। यथाऽद्य तवेदं कर्मेति लोके। स्वामिना हि यदा भृत्यं प्रत्युच्यते चैत्र! अद्य तव नगरगमनं कर्मेति तदा खल्वयं चैत्र आत्मनो नगरगमनसम्बन्धं स्वामिवचनादन्यतोऽनधिगतमवगम्य गमने प्रवर्तते, तथेहापि स्वर्गकामादेर्यागादिक्रियासम्बन्धं लिङादेरन्यतोऽनधिगतमवगम्य स्वर्गकामस्य यागादौ प्रवृत्तिरित्यप्राप्तक्रियाकर्तृसम्बन्ध एव विधिरित्यर्थः। एकदेशी तु प्रसङ्गमापादयति—अत्राऽपि समर्थने पक्ष्यतीत्यादौ लृङन्ते श्रोतुः प्रमाणान्तरेणाऽनधिगतमर्थमवगमयति वचने विधित्वप्रसङ्गः। परिहरति चोदकः—न। निमित्तान्तराऽप्राप्ते क्रियाकर्तृसम्बन्धे तस्य लिङादेस्तदभिधानम्, सम्बन्धाभिधानम्, तत्र लृङादौ निमित्तान्तरप्राप्तस्यैव भविष्यत्त्वेन रूपेणाऽभिधानादर्थस्य सम्बन्धस्य। लिङादिभिस्तु तथाऽभिधानं निमित्तान्तराऽप्राप्ततयाऽभिधानम्। अप्राप्ते हि द्विविधा प्राप्तिः प्रतिषिध्यते, उत्पत्तिः प्रमितिश्च। तत्र मानान्तराऽनधिगतं सम्बन्धमवगमयति लृङन्ते यद्यपि प्रमितिरूपा प्राप्तिर्न समस्ति, समस्त्युत्पत्तिरूपा, निमित्तान्तरादुत्पत्स्यमानस्यैव तस्य तत्राऽभिधानात्। न त्वेवं लिङन्ते[2] तद्वाक्यार्थाऽवगतिनिबन्धनं पुरुषप्रयत्नमन्तरेणाऽन्यतो यागादिसम्बन्धाऽसिद्धेरित्यर्थः। यत एवमतश्चाऽज्ञातज्ञापनमप्रवृत्तप्रवर्तनमुभयविधप्राप्तिप्रतिषेधेनाऽप्राप्तक्रियाकर्तृसम्बन्धो विधिरिति विधिविदामुद्गाराः। तदेतद् दूषयति—नैतत्सारम्। यस्मात्—

न प्रवृत्तिर्योगधियो लोकेऽभिप्रायवेदनात्।
मृषा भवेत्तथा कामं किं मुधैष प्रयस्यति ॥

---

१. कामः मू० पु० पा०।　　२. लिङन्तवाक्यार्थे. २ पु० पा०।

प्रतिपद्यतां नामाऽयमात्मनः क्रियायोगं शब्दात् तं च तथाभावे तथेति निश्चिनोतु, विपर्यये नैतदेवमिति। प्रवर्तते तु कस्मात्? लोके त्वद्य तवेदं कर्मेति वचनादधिगतवक्त्रभिप्रायो यो यदभिप्रायाऽनुरोधी स प्रवर्तितुमर्हति, अन्यथा सर्वस्य प्रवृत्तेः। नन्विहापि शब्दाऽनुरोधी प्रवर्त्स्यति। न शब्दाऽनुरोधे किंचन निमित्तम्। नन्वस्ति प्रामाण्यम्? तच्च प्रवृत्तौ समर्थितं भवति। अन्यथा मृषात्वाऽऽपातात्। कथम्? भूतवर्तमानयोः सम्बन्धयोरभावात्। भविष्यत्यपि न चेत्पुरुषः प्रवर्तते न तत्स्यादिति मृषात्वापातः। पुरुषप्रवृत्त्या तर्हि प्रामाण्यम्, भवतु कामं मृषा, किमर्थोऽयमस्य शब्दप्रमाणीकरणप्रयासः? बहुतरं च तस्यैवमायसितव्यमापतति। सकलमिथ्याज्ञान-

प्रतिपद्यतां नामाऽयमात्मनः क्रियया योगं शब्दः, तञ्च तथाभावे मानान्तरेण संवादे च तथेति निश्चिनोतु। विपर्यये मानान्तरेण बाधे नैतदेवमिति। प्रवर्त्तते तु कस्मात्? ननूक्तं यथा तवेदं कर्मेति लोके, इत्यत आह—लोके तु अद्य तवेदं कर्मेति वचनादधिगतवक्त्रभिप्रायभेदो यो यदभिप्रायाऽनुरोधी स तदभिप्रायाऽवगमात् प्रवर्तितुमर्हति। न हि तदा क्रियाकर्तृसम्बन्धबोधः प्रवर्तयति, अपि त्वनुविधेयाऽभिप्रायभेद आज्ञादिरित्यर्थः। कुतः? अन्यथा यदि क्रियाकर्तृसम्बन्धबोधमात्रं प्रवृत्तिहेतुः, न त्वनुविधेयाऽभिप्रायभेदबोधः, ततः सम्बन्धबोधः सर्वसाधारण इति सर्वस्य प्रवृत्तेः। चोदयति—नन्विहापि शब्दाऽनुरोधी प्रवर्त्स्यति। यथा लोकेऽभिप्रायानुरोधी। दूषयति—न शब्दाऽनुरोधे किञ्चिन्निमित्तम्। यथाऽभिप्रायाऽनुरोधेऽनुविहितभावः खल्वयं स्वामी हितं तु भृत्याय प्रयच्छति, अहितं वा न विधत्ते। चोदयति—नन्वस्ति प्रामाण्यम्, प्रवृत्तिहेतुभावस्तस्य कथम्? इत्यत आह—तच्च प्रवृत्तौ समर्थितं भवति। कस्मात्? अन्यथा प्रवृत्त्यभावे कर्तुः क्रियासम्बन्धविरह आत्यन्तिक इति तदभिधायिनो वेदराशेर्मृषात्वाऽऽपातात्। पृच्छति—कथं पुनः प्रवृत्त्यभावे सम्बन्धाऽभावः[1]? उत्तरम्—भूतवर्तमानयोः सम्बन्धयोरुपलम्भाऽर्हयोरनुपलब्धेरभावात्। भविष्यत्यपि सम्बन्धे न चेत्पुरुषः प्रवर्तते ततस्तस्य कालत्रयविवेके गगनकुसुमवदात्यन्तिकमसत्त्वमिति तद्विषयस्य न तत्स्यादिति न तत्प्रामाण्यं स्यादिति। सोऽयं मृषात्वापातः। तदेतद् दूषयति—पुरुषप्रवृत्त्या तर्हि प्रामाण्यम्। भवतु को दोष? इत्यत आह—ततः कामं भवतु मृषा शब्दः, किमर्थोऽयमस्य पुंसः शब्दप्रमाणीकरणप्रयासः? न खल्वस्य प्रेक्षावतस्तत्प्रमाणीकरणे हितप्राप्तिरहितनिवृत्तिर्वा। यदि

---

१. संबन्ध्यभावः २ पु० पा०।

प्रमाणीकरणात् । ननु न शाब्दं मिथ्याज्ञानम् । द्विविधहेत्वभावात् । यद्यपि हेतुदोषो न स्यात्, बाधकस्तु दुर्वारः । भूतवर्तमानयोः संबन्धयोरुपलब्धिगोचरयोरनुपलब्धेः । भविष्यतो हेत्वभावात् । शब्दप्रामाण्यं हेतुः । न । प्रवृत्तौ तस्य भावादितरेतराश्रयत्वात् । ननु स्वतः प्रामाण्याद्विज्ञानस्य नेतरेतराश्रयम् । न । प्रवृत्तिहेत्वभावेन तस्याऽपवादात् । प्रमाणस्य परिच्छेदकत्वात्स्वतोऽप्रवृत्तिकारणत्वात् । प्रवृत्तिहेतुसद्भावादेव प्रामाण्यसिद्धेः ।

ननु च स्वतः प्रामाण्यात्प्रवृत्तिहेतुः कल्पयिष्यते तस्मात्प्रमितसिद्धावन्यपरिच्छेदात् । अन्याऽपरिच्छित्त्या च प्रमितताहानात् । कः ? फलम् । न ।

प्रामाण्यसिद्धिमात्रमीहितं तत्र वहुतरं च तस्यैवमायसितव्यमापतितम्, सकलमिथ्याज्ञानप्रमाणीकरणात् । चोदयति—ननु न शाब्दं मिथ्याज्ञानं द्विविधहेत्वभावात् । तस्मात्प्रामाण्यमेव शब्दस्य पुरुषप्रवृत्तिमाक्षेप्स्यतीत्यर्थः । दूषयति—यद्यप्यपौरुषेयतया हेतुदोषो न स्याद् वाधस्तु दुर्निवारः । कुतः ? भूतवर्तमानयोः सम्वन्धयोरुपलब्धिगोचरयोरुपलम्भकप्रत्ययान्तरसाकल्यस्वभावविशेषशालिनोरनुपलब्धेः । भविष्यतो हेत्वभावात् । हेत्वभावे च कार्याऽभावः । अन्यथा कादाचित्कत्वाऽनुपपत्तेरिति भावः । चोदयति—शब्दप्रामाण्यं भविष्यतः सम्बन्धस्य हेतुरस्ति । दूषयति—न । प्रवृत्तौ तस्य प्रामाण्यस्य भावात् प्रामाण्ये तु सति प्रवृत्तिसिद्धेरितरेतराश्रयात् । चोदयति—ननु स्वतः प्रामाण्याद्विज्ञानस्य न प्रवृत्तिनिवन्धनं प्रामाण्यमिति नेतरेतराश्रयम् । निराचष्टे—न । प्रवृत्तिहेत्वभावेन तस्य प्रामाण्यस्यौत्सर्गिकस्याऽप्यपवादात् । ननु प्रमाणमेव प्रवृत्तिहेतुः, स्वतः प्रामाण्याऽन्यथानुपपत्त्या तदाक्षेपकत्वादित्यत आह—प्रमाणस्य परिच्छेदकत्वात्, स्वतोऽप्रवृत्तिकारणत्वात् । प्रवृत्तिहेतुसद्भावादेव[1] प्रामाण्यसिद्धेः ।

इदमाकूतं, कोऽयमाक्षेपो नाम ? न तावत्प्रज्ञापनम् । तस्या अहेतुकायाः खपुष्पवदत्यन्ताऽसत्याः प्रवृत्तेः प्रज्ञापने शब्दप्रामाण्याऽनुपपत्तेरर्थादुत्पादकत्वमेषितव्यम् । तत्र चोक्तो दोषः । चोदयति—ननु च स्वतः प्रामाण्यात्प्रवृत्तिहेतुः कल्पयिष्यते । कस्मात् ? स्वतः सिद्धप्रमाणभावात् प्रमाणात् प्रमितस्य सिद्धौ तदन्यथाऽनुपपत्त्याऽन्यस्य तदुपपादकस्य परिच्छेदात् । अन्यथाऽनुपपत्तिमेव प्रमितस्य दर्शयति—अन्याऽपरिच्छित्त्या च प्रमितताहानिप्रसङ्गात् । कोऽसावन्यः प्रवृत्तिहेतुः ? उत्तरं फलम् ।

---

१. सद्भावे च मू० पु० पा० ।

फलवत्यप्यर्थिनोऽप्रवृत्तेः । क्रियासंबन्धस्याऽविशेषेण प्रवृत्तेः । कल्पितेऽपि तस्मिंस्तदनुपपत्तेः ।

ननु स्वर्गकामादय एव क्रियासम्बन्धिनः श्रूयन्ते ? सत्यं, न तु सर्वत्र 'विश्वजिता यजेत', 'यावज्जीवमग्निहोत्रं जुहुयादि'ति । अत एव सर्वस्याऽभिलषितमेकत्र फलम् अन्यत्राऽपायपरिहारः कल्प्यते । सत्यम् । न त्वेवमपि श्रुतोपपत्तिः । तथा हि—

> अर्थिनोऽपि नियोगेन न क्रिया न निमित्तिनः ।
> आलस्यादन्तरायेभ्यो विहिताऽकृत्यभावतः ।।

न खलु फलकामो निमित्तवान्वाऽपायपरिहारप्रयोजनो नियोगतः क्रियासम्बन्धमनुभवति, येन श्रुतक्रियासम्बन्धोपपत्तिः स्यात् फलाऽपायपरिहारकल्पनयोः सतोः । यतो ह्यवश्यं क्रियासम्बन्धः स हेतुस्तमुपपादयितुं क्षमते । कथं पुनः फलकामस्याऽपायभीरोर्वा न क्रिया ? अलसतया । न

तदेतद् दूषयति—न फलवत्यप्यर्थिनोऽप्रवृत्तेः । ननु मा भूदनर्थिनः प्रवृत्तिः अर्थी तु प्रवर्त्स्यतीत्यत आह—क्रियासम्बन्धस्याऽविशेषेणाऽर्थिनोऽनर्थिनश्च प्रवृत्तेः[1] । कल्पितेऽपि फले तस्मिन्नविशेषप्रवृत्तस्य क्रियासम्बन्धस्याऽनुपपत्तेः । प्रमितं खल्वनुपपद्यमानमुपपादकमुपकल्पयति, न पुनरनुपपद्यमानमात्रमनुपपादकम् । अनुपपादकञ्च फलमविशेषप्रवृत्तस्य क्रियाकर्तृसम्बन्धस्येत्यर्थः—चोदयति । ननु स्वर्गकामादय एव क्रियासम्बन्धिनः श्रूयन्ते न तु पुरुषमात्रम् । दूषयति—सत्यम्, क्वचिन्न तु सर्वत्र । विश्वजिता यजेत, यावज्जीवमग्निहोत्रं जुहुयादिति । चोदक आह—अत एव सर्वस्याऽभिलषितमेकत्र विश्वजिति स्वर्गः फलमन्यत्र नैमित्तिकेऽपायपरिहारः प्रयोजनं कल्प्यते, न फलं तत्कामस्याऽनधिकारादिति सर्वशक्तौ प्रवेदयिष्यते । तदेतद् दूषयति—सत्यम्, न त्वेवमपि श्रुतोपपत्तिः । तथा हि—

> अर्थिनोऽपि नियोगेन न क्रिया न निमित्तिनः ।
> आलस्यादन्तरायेभ्यो विहिताऽकृत्यभावतः ।।

न खलु फलकामो निमित्तवान्वाऽपायपरिहारप्रयोजनः कर्ता नियोगतः क्रियासम्बन्धमनुभवति प्राप्नोति, येन श्रुतक्रियासम्बन्धोपपत्तिः स्यात्, फलोपापयरिहारकल्पनयोः सतोः । कस्मात्पुनर्न स्याद् ? इत्यत आह—यतो ह्यवश्यं क्रियासम्बन्धः स हेतुस्तमुपपादयितुं क्षमते—पृच्छति । कथं पुनः फलकामस्य विश्वजिदादावपायभीरोर्वा नैमित्तिके नावश्यंभाविनी क्रिया ?

---

१. प्रतीतेः २ पु. पा ।

तर्ह्यर्थिता । न प्रत्यात्मवेद्याऽर्थिता क्रियाऽभावेन शक्यनिह्नवा । तथा मरणादिभ्योऽन्तरायेभ्योऽप्रवृत्तिः । यदि च नियोगतः प्रवृत्तिः, विहिताऽकरणाऽभावप्रसङ्गः । अपि च—

निमित्तान्तरतः प्राप्तिर्मोहादेश्च प्रकल्पते ।
न चोपदेशकः शब्द उदीक्षेत ततः पुमान् ॥

फले हि प्रवृत्तिहेतौ कल्प्यमाने न शब्दनिमित्तः क्रियासम्बन्धः, अपि तु शाब्दपरिप्रापित इति निमित्तान्तराऽप्राप्तताऽनुपपत्तिः । प्रमाणान्तराऽनधिगतत्वादुपपत्तिर्यदि; लृङन्तेऽपि प्रसङ्ग इत्युक्तम् । अपि च मोहयदृच्छादौ सम्भविनि क्रियासम्बन्धहेतौ नैकान्ततः फलवत्त्वं परिकल्प्यम् । शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात्फलकल्पनेति चेत् । न । अशास्त्रत्वात् । उपदेशकं

उत्तरम्—अलसतया । प्रष्टुर्वचनं न तर्ह्यर्थिता । न ह्यस्ति सम्भवस्तदर्थिता च तदक्रिया चेत्यर्थः । उत्तरम्—न प्रत्यात्मसंवेद्या मनसा संयुक्तसमवायादिष्टाऽर्थिता क्रियाभावेनाऽनुमानेन शक्यनिह्नवा । अनुमानस्य मानसप्रत्यक्षबाधितविषयतयाऽनुत्पादादित्यर्थः । तथा मरणादिभ्योऽन्तरायेभ्योऽर्थिनोऽप्रवृत्तिः । यदि च नियोगतः प्रवृत्तिस्ततो विहिताऽकरणाऽभावप्रसङ्गः । तथा चाऽकुर्वन्विहितं कर्मेति निर्विषयं प्रसज्येतेत्युक्तम् । अपि च—

निमित्तान्तरतः प्राप्तिर्मोहादेश्च प्रकल्पते ।
न चोपदेशकः शब्द उदीक्षेत ततः पुमान् ॥

फले हि प्रवृत्तिहेतौ[1] कल्प्यमाने सति न शब्दनिबन्धनः क्रियया सम्बन्धप्रसङ्गो[2] अपि तु शाब्दफलपरिप्रापित इति निमित्तान्तराऽप्राप्तताऽनुपपत्तिः । यदि मन्येत, भवतु फलं निमित्तमस्योत्पादकतया, ज्ञापकतया तु सम्बन्धस्याऽन्यतोऽप्रज्ञातस्य शब्दो निमित्तं भविष्यतीति शङ्कते—प्रमाणान्तराऽनधिगतत्वादुपपत्तिर्यदीति । निराकरोति—लृङन्तेऽपि विधित्वप्रसङ्ग इत्युक्तम् । अपि च मोहयदृच्छादौ सम्भविनि क्रियासम्बन्धहेतौ नैकान्ततः फलवत्त्वं क्रियायाः शक्यपरिकल्पनम् । औषधादाविव मोहादपि प्रवृत्तेरुपपत्तेः । क्रियाकर्तृसम्बन्धस्य यदृच्छाहेतुरपि क्रिया करकिसलयकलितलीलाकमलदलसङ्कलनादिलक्षणा लोकसिद्धैव । शङ्कते—शास्त्रस्य पुरुषश्रेयोऽविधायकत्वात् मोहयदृच्छादिपरिहरणात् फलकल्पनेति चेत् ? निराकरोति—न । अशास्त्रत्वात् । तद् दर्शयति—उपदेशकं हि शास्त्रम्,

---

१ हेतौ निमित्ते. २ पु० पा० । २ संबन्धः २ पु० पा० ।

हि शास्त्रम् । न चैतेषामुपदेशका यजेतेत्यादयः शब्दाः । न ह्येभिरिदं कुर्वित्युपदिश्यते । अपि तु स्वर्गकामादेर्यागसम्बन्धोऽवगम्यते, दण्डयादिश्रुतिभिरिवादण्डादिसम्बन्धः । स च भूतो वर्तमानो वा ऽनुपलब्धिनिराकृत इति भविष्यन्नवशिष्यते ।

अपि चैवं न प्रत्ययपूर्वं पुरुषः प्रवर्तते । सामुद्रविदाख्यातमिवाऽनिरूपितनिमित्तं क्रियासम्बन्धमुदीक्षेत । तथा च वचनवैयर्थ्यम्, पुरुषकाराऽभावात् ।

यदपि दर्शनम्—प्रमाणान्तराऽगोचरः शब्दमात्राऽऽलम्बनो नियुक्तोऽस्मीति प्रत्यात्मवेदनीयः सुखादिवत् अपरामृष्टकालत्रयो लिङादीनामर्थो विधिरिति ।

न चैतेषामुपदेशका यजेतेत्यादयः शब्दाः, यस्मान्न तैरिदं कुर्वित्युपदिश्यते, अपि तु स्वर्गकामादेर्यागेन सम्बन्धोऽवगम्यते यजेतेत्यादिशब्दैः । गम्यत-इति णिचि रूपम् । दण्ड्यादिश्रुतिभिरिवाऽनुपदेशिकाभिर्दण्डादिसम्बन्धो देवदत्तादेः । स च भूतो वर्तमानो वाऽनुपलब्धिनिराकृत इति भविष्यन्नवशिष्यते । तत्र च फलमिव मोहयदृच्छादयोऽपि हेतवः सम्भविन इति नैकान्ततः फलकल्पनासम्भव इति ।

अपि चैवं न प्रत्ययपूर्वं पुरुषः प्रवर्तते यथोपदेशकादिदं कुर्विति वाक्यात्, किन्तु सामुद्रविदाख्यातमिवाऽनिरूपितनिमित्तविशेषं क्रियासम्बन्धमुदीक्षेत । ननूदीक्षताम् को दोष ? इत्यत आह—तथा च वचनवैयर्थ्यम् । कुतः ? पुरुषकाराऽभावात् । यत्र हि वचनादर्थं प्रतिपद्य प्रवर्तमानः समीहितं किञ्चिदाप्नोति तत्रार्थो वचनस्य, तदभावे त्वप्रतीतेरप्रवृत्तेः[1] । समीहित-प्राप्त्यनुपपत्तेः यदा तु वचनादर्थं प्रतिपद्याऽपि पुंसोदीक्षितव्यम्, न प्रवर्तितव्यम्, तदाऽनर्थकं वचनमित्यर्थः ।

सम्प्रति टीकाकारीयं मतमुपन्यस्यति—यदपि दर्शनम् प्रमाणान्तराऽगोचरो न च निष्प्रमाणकः । यतः शब्दमात्रालम्बनः, शब्दमात्रमालम्बनमाश्रयः प्रतिपादकतया यस्य स तथोक्तः । कथम्पुनरस्य शब्दप्रतिपाद्यत्वम् ? इत्यत आह—यतो लिङादियुक्तवाक्यश्रवणसमनन्तरं स्वर्गकामादिना नियोज्येन नियुक्तो ऽस्मीति प्रत्यात्मवेदनीयः सुखादिवत् । यथा हि सन्तापदूनश्चन्दनाऽनुलेपनाऽनन्तरमान्तरमपि मनोमात्रप्रवेदनीयमामोलितलोचनः सुखभेदमनन्यप्रमाणकमनुभवति, एवं नियोगमपि लिङादिवाक्यश्रवणाऽनन्तरमित्यर्थः । प्रमाणान्तराऽगोचरत्वे हेतुमाह—अपरामृष्टकालत्रयः ।

---

१ अप्रतीतेस्तदर्थाऽप्रतीतेः । २ पु० पा० ।

अत्रोच्यते—

पदार्थ एव वाक्यार्थो न च सोऽनन्यगोचरः ।
नाऽकर्तृका क्रिया कालविविक्तञ्च खपुष्पवत् ।।

स खलु शब्दप्रमाणको वाक्यार्थः पदार्थो वा । तत्र पदार्थस्यैव पदार्थान्तरोपकल्पितविशेषस्य वाक्यार्थत्वादपदार्थत्वे तदनुपपत्तिः । सम्बन्धवाक्यार्थवादिनोऽपि तद्विशेषो वाक्यार्थः सम्बन्धिनश्च पदार्था एवेति नाऽप-

सदुपलम्भनानि हि प्रत्यक्षादीनि मानान्तराणि, कालभेदसम्भेदश्च सत्ता[1]-तद्विषयाणाम्, अयं पुनर्नियोगोऽतीताऽनागतवर्तमानादीनामन्यतमेनाप्यात्मना न परामृश्यत इति कार्यतया न मानान्तरगोचरः । कार्यप्रतिपक्षतया च विद्यमानोपलम्भनत्वम्, नाऽतीताऽनागतप्रतिपक्षतया । तेनाऽनुमानादिष्वतीताऽनागतविषयेष्वपि तदस्तीति न भागाऽसिद्धता हेतोः । सोऽयं लिङादीनामर्थो नियोगो विधिः । एवंविधार्थत्वे च चोदनाया अनपेक्षतया प्रामाण्यसिद्धिरिति ।

अत्रोच्यते—

पदार्थ एव वाक्यार्थो न च सोऽनन्यगोचरः ।
नाऽकर्तृका क्रिया कालविविक्तञ्च खपुष्पवत् ।।

स खलु शब्दप्रमाणको नियोगो वाक्यार्थः पदार्थो वा स्यात् । अपदार्थस्य तस्य वाक्यार्थत्वं दूषयति—तत्र पदार्थस्यैवैकस्येतरपदार्थान्तरोपकल्पितविशेषस्य वाक्यार्थत्वाल्लोके तथा दर्शनात् । अपदार्थत्वे तदनुपपत्तिः । सम्बन्धवाक्यार्थवादिनोऽपि मते न तावत्सम्बन्धमात्रं वाक्यार्थः । तस्य विशेषनिबन्धनव्यवहाराऽनङ्गतया वाक्यश्राविणः क्वचित् कुतश्चित् प्रवृत्तिनिवृत्त्योरनुपपत्तेः । तस्मादेतद्विशेषो वाक्यार्थः । न च नियोगस्तद्विशेषः, असम्बन्धरूपत्वात् । सम्बन्धश्च विशेष्यमाणः सम्बन्धिभिर्विशेषणीयः । तस्य सम्बन्धिनिरूपणतया स्वरूपेण विशेषाऽनुपपत्तेः । सम्बन्धिनश्चास्य पदार्था इति नियोगेनापि सम्बन्धिना सता पदार्थेनैव भवितव्यम्, नाऽपदार्थेन । न च सम्बन्धमात्रं वाक्यार्थ इत्याह—सम्बन्धमात्रमविशिष्टं सम्बन्धिभिः पदार्थैः पदार्थ एव सम्बन्धाऽन्वयव्यतिषङ्गादिपदगोचरमात्रमेव, न तु विशिष्टव्यवहारार्हमित्युक्तमिति । तस्मात्सम्बन्धवाक्यार्थवादिनोऽपि मते नाऽपदार्थो नियोगो वाक्यार्थ उपपद्यते । अपदार्थस्यापि सम्बन्धभेदस्यैव वाक्यार्थत्वात् । अपदार्थभूतस्य

१. सत्तासंबन्धश्च. २ पु० पा० ।

दार्थो वाक्यार्थः ।

अस्तु तर्हि पदार्थः ? नैवम् । अनन्यप्रमाणगोचरस्य तत्त्वाऽनवक्लृप्तेः । सम्बन्धसंवेदनसापेक्षत्वात् । तस्य च सम्बन्धिपरिच्छेदपुरःसरत्वात् । प्रमाणादृते च तस्याऽयोगात् ।

नन्वस्ति शब्दः प्रमाणम् ? न । इतरेतराश्रयत्वात् । प्रमिते हि शब्देन नियोगे सम्बन्धग्रहः, सति च तस्मिन् शब्देन तस्य प्रमा । अविदितसङ्गतेः पदस्य प्रकृतेः प्रत्ययस्य चाऽप्रत्यायकत्वात् ।

नियोगस्याऽसम्बन्धितया तदवच्छेदकत्वाऽनुपपत्तेरित्युक्तमित्यर्थः ।

द्वितीयं विकल्पमवलम्बते—अस्तु तर्हि पदार्थः । निराकरोति—नैवम् । अनन्यप्रमाणगोचरस्य तत्त्वाऽनवक्लृप्तेः । पदार्थत्वाऽनुपपत्तेः । कुतः सम्बन्धसंवेदनसापेक्षत्वात्पदार्थत्वस्य । भवतु संवेदनसापेक्षता, ततः किम् ? इत्यत आह—तस्य च सम्बन्धसंवेदनस्य सम्बन्धिपरिच्छेदपुरस्सरत्वात् । एवमपि किम् ? इत्याह—प्रमाणादृते कार्यसम्बन्धिपरिच्छेदस्याऽयोगात् । परिच्छेदो हि प्रमाणस्य फलम्, तत्र तदभावे भवितुमर्हति, अङ्कुर इव बीजाभावे इत्यर्थः । चोदयति—नन्वस्ति शब्दः प्रमाणम् । परिहरति—नेतरेतराश्रयत्वात् । तद् दर्शयति—प्रमिते हि शब्देन नियोगे तेन सह सम्बन्धग्रहः, सति च तस्मिन् सम्बन्धग्रहे शब्देन तस्य नियोगस्य प्रमा ।

यस्तु मन्यते, अस्ति खलु लिङादेस्तादृशः सामर्थ्याऽतिशयः, येनाऽगृहीतसम्बन्धो विलक्षणविषयः कतिपयश्रवणसहकारी[1] जनयति विलक्षणविषयमवबोधम् । कतिपयश्रवणसमनन्तरं तद्भावात् । न चाऽन्येनाऽगृहीतसङ्गतितया शब्दाः स्वार्थमभिदधतीत्यनेनापि तथा भवितव्यम् । मा भूदन्येषां न साक्षात्कार्यार्थितेत्यस्यापि तथाभावः ।

तन्निराकरोति—प्रमान्तराऽविदितसङ्गतेः पदस्य प्रकृतेः प्रत्ययस्य चाऽप्रत्यायकत्वात् । अयमभिसन्धिः । प्रथमश्रवणादिव संबन्धाऽग्रहे शतशोऽपि श्रुतात् लिङादेर्विलक्षणविषयबोधाऽनुत्पत्तेः, व्यवहारदर्शनस्य चाऽर्थरूपसम्बन्धिदर्शनगर्भतयोत्पत्तेरुपपत्तेर्नाऽदृष्टचरसामर्थ्याऽतिशयपरिकल्पनादौ नैसर्गिक[2] शब्दमात्रवर्त्तिसम्बन्धाऽपेक्षाऽपवादोऽसति[3] बलवद्बाधकोपनिपाते युज्यत इति ।

---

१ कतिपयश्रवणकुहरचरः—२ पु० पा० । २ औत्सर्गिक—१ पु० पा० ।
३ अपवादो नापि. २ पु० पा० ।

प्रैषादीनां लोके प्रतीतेस्तद्गतस्य तदुपाधेः सम्बन्धग्रहः ।

अत्र चोदयति—प्रैषादीनां लोके प्रतीतेस्तद्गतस्य तदुपाधेः सम्बन्धग्रहः । इदमाकूतम् । कार्याऽभिधायिता तावल्लिङादीनामवगता आचार्यवाक्येषु माणवक ! समिधमाहरेत्यादिषु । तथा हि । एतद्वाक्यश्रवणाऽनन्तरं प्रवर्तमानं समिदाहरणे माणवकमुपलभ्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति, बुद्धिपूर्वेयमस्य प्रवृत्तिः, स्वतन्त्रप्रवृत्तित्वात्, मदीयप्रवृत्तिवत्, यच्चाहं बुद्ध्वा प्रवृत्तस्तदेवायं मदविशेषात् । अहं च न क्रियामात्राऽवगमान्नापि फलमात्रावगमान्नापि फलसाधनत्वाऽवगमात्; किन्तु कार्यताऽवगमात्[1] । न खल्वन्ततोऽर्भकः स्तनपानादिकामपि क्रियां कार्यतया यावन्नाऽवगतवानस्मि न तावत्तस्यामपि प्रवृत्तः । न च या श्रेयःसाधनता सैव कार्यता । परस्परपरिहारस्थितिलक्षणविरोधाधारत्वात् । न ह्यस्ति संभवः, यदेव समीहितं प्रति साधनत्वं तदेव कृतिं पुरुषप्रयत्नं प्रति साध्यत्वमिति । क्लेशात्मनस्तु कर्मणः फलसाधनताऽन्वयिनी कार्यतेति केचिदभेदं प्रतीतवन्तः । तथा सुखस्य फलसाधनतां विना च कार्यताऽवगतिरस्ति । अतः फलसाधनताऽतिरिक्तकार्यतावोधात् प्रवृत्तिर्ममेति माणवकोऽपि तदवबोधादेव प्रवृत्त इति निश्चिनोति । तदवबोधश्चास्याऽऽचार्यवचनाऽनन्तरमुपजायमानस्तन्निबन्धन एवेति कार्याऽभिधायितां शब्दस्य कल्पयति तच्च कार्य्यमन्वितमभिधेयमिति स्थितौ सत्याम् 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादिषु वाक्येषु षष्ठाद्यराद्धान्ताऽनुसारेण स्वर्गकामपदेन नियोज्यतया स्वर्गकामः समर्पणीय इति स्थितम् । यश्च कार्यमवबुध्यते स नियोज्यः । स्वर्गकामश्च साध्यस्वर्गकामविशिष्टः । स च तस्मिन्नेव कार्ये नियोज्यतयाऽन्वेति, यदेव तस्य काम्योपायतामनुभवितुं शक्नोति । न च क्रिया क्षणभङ्गिनी कालान्तरभाविफलहेतुरिति न कार्य्यतया नियोज्येन सहाऽन्वेति । यत्कालान्तरस्थायि कार्यं तदेव तेन सहाऽन्वयं गन्तुमर्हतीति क्रियाऽतिरेकिमानान्तराऽवेद्यमेव लिङादयः कार्यमभिदधतीति । तच्च मानान्तराऽपूर्वतया अपूर्वमिति च कार्यतयाऽवगम्यमानमात्मनि पुरुषं नियुञ्जानं नियोग इति च व्यपदिश्यते । न च क्रियाऽनन्तरं भवदपि देशकालादिसहकार्यपेक्षया अनन्तरमेव स्वर्गादि भावयति । न च फलजनकतया गुणभावादपूर्वस्य वाक्यार्थत्वहानिः, स्वाऽनुगुणनियोज्यलाभाय फलानुकूलताऽवलम्बनात्स्वमिवत् । यथाऽऽत्मन एव संविदधानः[2] स्वामी गर्भदासस्योपकरोति, तथैतदपि । न चैवं वेदे एव

१ कार्यमात्राऽवगमात्. २ पु० पा० । २. संविधाने. २ पु० पा० ।

तेषामेव तर्हि प्रतीतेः सम्बन्धज्ञानं न नियोगस्य। उपाधयस्ते न शब्दार्थाः, व्यभिचारात्। प्रवर्तकस्तेष्वनुयायी शब्दार्थः। सर्वत्राऽपरित्यागात्।

नैतत्सारम्। उपाधयश्चेन्मानान्तरसिद्धाः नैकस्तेष्वन्वयी प्रवर्तको

व्युत्पत्तिः। लोकव्युत्पत्तेरेव वेदवाक्याऽनुसारेण अपूर्वपर्यन्तगमनात्। न चाऽनेकार्थाऽभिधायिता लिङादीनां न प्रतीयते। वदति हि माणवक आचार्यचोदितः प्रवर्त्तितः कार्यमवबोधित इति यावत्। न खल्वन्यथा चेतनः प्रवर्तयितुं शक्यते। यतस्तदेवं प्रैषादीनां लोके प्रतीतेः कार्याऽवबोधमन्तरेण च प्रवृत्त्यनुपपत्तेस्तद्गतस्य सम्बन्धग्रहस्तदुपग्रहमपोह्य च वेदे पर्यवसानात्।

ननु प्रैषादयोऽप्यवगम्यन्ते लोके, तत्कथं कार्याऽभिधायकत्वमेव लिङादीनाम् ? इत्यत आह—तदुपाधेः। प्रैषाद्युपाधेः। एतदुक्तं भवति, उपाधय एते, न तु शब्दार्थाः। त एव चोपाधयः ये तटस्थाः प्रयोगदर्शनमात्राच्छब्दार्थं विशेषे व्यवस्थापयन्ति, यथा हरिपदाऽभिधेयस्य पशुत्वमुपाधिः। तथा हि। पशुत्वं तटस्थमेवाऽभिधानाऽविनिवेशादिति हरिपदार्थं इति हर्तृत्वं[1] पशावेव नियच्छति। एवं प्रैषादयोऽप्यभिधानाऽविनिवेशिन एव कार्यं विशेषे व्यवस्थापयन्ति, न पुनरभिधेया इति सम्बन्धग्रहणसम्भवादुपन्नं नियोगाऽभिधानं लिङादीनामिति।

तदेतद् दूषयति—तेषां प्रैषादीनामेव तर्हि प्रतीतेः सम्बन्धज्ञानं न नियोगस्याऽपूर्वस्य। ननूक्तमुपाधयस्ते न शब्दार्थाः, व्यभिचारात्। न हि प्रैषादयो लिङर्थाः, समं प्रत्यामन्त्रणेऽपि तस्याप्रयोगात्। नामन्त्रणाम्, ज्यायांसं प्रत्यध्येषणेऽपि प्रयोगात्। नाऽध्येषणम्, हीनं प्रति प्रेषणेऽपि प्रयोगात्। सोऽयं व्यभिचारः।

प्रवर्तकस्तेष्वनुयायी शब्दार्थः। कुतः ? सर्वत्रऽपरित्यागात्। सर्वेष्वेव प्रैषादिषु कर्तव्यतैका संभवेत्[2]। अन्यथा स्वतन्त्रप्रवृत्तेरनुपपत्तेरित्युक्तम्। तस्मात्कर्त्तव्यताऽभिधायिनो लिङादयः स्वर्गकामपदसम्बन्धान्नियोज्यविशेषणीभूतसाध्यस्वर्गाद्यनुकूलस्याऽऽशुतरविनाशियागाद्यतिरिक्तस्याऽपूर्वस्याऽभिधायिनः। तदेवं प्रमाणान्तराऽगोचरता लिङाद्यर्थता नियोगस्येति सिद्धम्।

तद् दूषयति—नैतत्सारम्। उपाधयश्चेन्मानान्तरसिद्धा, नैकस्तेष्वन्वयी

१. हरत्वम् २ पु० प०।

२. संप्लवते. २ पु० या०।

नियोगः। प्रमाणान्तरगोचरत्वात्तेषां सम्बन्धज्ञानं न तस्य। अविदितविषयस्य सम्बन्धस्य प्रत्येतुमशक्तेः। त एव च शब्दार्था विदितसङ्गतित्वान्नेतरे।

प्रवर्तको नियोगः। अपूर्वमिति यावत्। अतः प्रमाणान्तरगोचरत्वात्तेषामुपाधीनामेव सम्बन्धज्ञानं लिङादिवाच्यत्वज्ञानम्। न तस्याऽपूर्वापरनाम्नो नियोगस्य। कुतः? अविदितविषयस्य सम्बन्धस्य प्रत्येतुमशक्तेः।

भवतूपाधिषु सम्बन्धज्ञानम्, मा च भूदपूर्वे, किमेतावता? इत्यत आह—त एव शब्दार्था विदितनियोगसंगतित्वात् नेतरे नियोगसङ्गतिसंवेदनविरहात्। इदमत्राकूतम्। सत्यं कर्तव्यताऽभिधायिनो लिङादयः, कर्तव्यता तु क्रियाया एव, नाऽपूर्वस्य, लोकाधीनाऽवधारणत्वाच्छब्दसामर्थ्यस्य। तस्या एव च कार्यतया प्रवृत्तिहेतुत्वेन स्वात्मनि मानान्तरेण विदितत्वात्। नन्वपूर्वस्य तस्य मानान्तराऽगोचरत्वात् कर्तव्यतामात्रविदितसङ्गतीनां लोके लिङादीनां स्वर्गकामपदसम्बन्धाद्वेदेऽपूर्वविशेषप्रतिलम्भ इति चेत्? अस्तु तावदस्यैव तु कर्तव्यस्य लिङाद्यर्थता, न पुनः क्रियाया अपि लौकिक्या इति कुतस्त्यम्? अनेकार्थत्वस्याऽन्याय्यत्वात्। लक्षणस्यापि च कर्तव्यायां क्रियायां लौकिकस्य लिङादीनां प्रयोगस्योपपत्तेरपूर्वकर्तव्यतानान्तरीयकत्वात्। क्रियाकर्तव्यताया असाधितायाः क्रियायास्तत्साधनत्वाऽनुपपत्तेः[1]। लौकिकप्रयोगाऽविरोधात्। अपूर्वकर्तव्यतायास्तु लौकिकक्रियाकर्तव्यातानान्तरीयकत्वाऽनुपलब्धेर्वैपरीत्याऽनुपपत्तेरत्यन्तप्रयोगाभ्यासाल्लाक्षणिकस्यापि वाचकत्वाऽभिमानादपूर्वाऽभिधाननियोगसिद्धरिति चेत्? नन्वनेकार्थत्वमन्याय्यमित्येतदेव कुत.? अनेकशक्तिकल्पनागौरवादिति चेत्? नन्वपूर्वमपि नैकविधप्रधानाङ्गवर्ति नानेति कथमैकार्थ्यं लिङः? कृतिव्याप्यतायाः प्रवृत्तिनिमित्तस्य सर्वत्राऽविशेषाद्रूपभेदेऽप्यपूर्वाणामेकशक्तिरस्या लिङ एकहायन्यादिशब्दवदिति चेत्? हन्त भोस्तपस्विन्या क्रियया किमपराद्धम्? यदस्यां कर्तव्यतारूपायामभिधानायकः पतिरिव लिङादिः शक्त्यन्तरमुत्कोचं रोचयते। शब्दसाम्येऽपि कर्तव्यताभेदादयमदोष इति चेत्? न। भेदाऽभावात्।

यदि मन्येत, यद्यपि कर्तव्यताशब्दसाम्यं तथाऽपि कृतिं प्रतीप्सिततमता कर्तव्यताऽपूर्वस्य, तदुद्देशेन पुरुषप्रयत्नस्येति कृतेः प्रवृत्तेः सैव च लिङादिप्रवृत्तिनिमित्तम्। न चैवंरूपा क्रियाकर्तव्यता, तस्या दुःखतया तां

---

१. क्रियाकर्तव्यतानान्तरीयकत्वात्। अपूर्वकर्तव्यताया असाधनत्वाऽनुपपत्तेः।
२. पु० पा०।

प्रति प्रधानभावाऽनुपपत्तेः ओदनाद्यर्थप्रवृत्तकृतिव्याप्यतालक्षणौदनादिहेतोस्तस्याः कर्तव्यता, सा त्वन्यत्वान्न शक्त्यन्तरमन्तरेण लिङादिगोचर इति। तन्न। विशेषाऽभावात् क्रियाकर्तव्यतायाः। न खल्वपूर्वमुद्दिश्य कृतिः प्रवर्तितुमर्हति। सा हि पुरुषप्रयत्नः। स चेच्छानुशयीति तदेवोद्दिश्येत। यदिच्छाकर्म तदेव च तस्याः कर्म यत्सुखं सुखानुशयित्वादिच्छायाः। न चाऽपूर्वं सुखमिति कथमिष्टम्? अनिष्टं चेत् कथं तदुद्देशेन कृतेः प्रवृत्तिः? शब्दात्तथाऽवगतेः। असुखमप्यनिष्ठमप्यपूर्वं कृतिं प्रति प्रधानमिति चेत्? तत्किं शब्दोऽवगमयतीत्यनग्निरप्यस्तु धूमः? आनन्दस्वभावं वा विज्ञानम्, 'विज्ञानमानन्दमि'ति श्रुतेः। प्रमाणान्तरविरोधान्नैवमिति चेत्? न। इहाऽपि तस्य साम्यात्। समिदादिविषयस्याऽपूर्वस्याऽननुष्ठेयस्याऽनुष्ठेयाऽधिकाराऽपूर्वपरत्वेन कर्तव्यतात्वाऽभ्युपगमनात्। स्वर्गाद्यनुकूलत्वादपूर्वस्याऽसुखस्यापीच्छाविषयत्वमिति कुतो मानान्तरविरोध इति चेत्? न। क्रियायामपि समीहितसाधनतायास्तथाभावात्। नैमित्तिकनिषेधाऽपूर्वयोश्च फलविरहिणोस्तदनुपपत्तेः। एवं च नैमित्तिकनिषेधाऽपूर्वयोर्नाऽपूर्वसिद्धिर्लिङादीनाम्। निमित्तवतो निषिध्यमानक्रियाकर्तुश्च सिद्धविशेषणावच्छिन्नस्य नियोज्यस्य क्रियाकर्तव्यताऽवगमाऽविरोधात्। प्रधानाऽङ्गग्रामसहभावस्याऽशब्दार्थभूतकल्पिताऽपूर्वद्वारेणाप्युपपत्तेः। अपि च साध्यस्वर्गविशिष्टो ऽपि नियोज्यः कस्मात् क्रियामेव नावैति कर्तव्याम्? तस्या आशुतरविनाशिनीत्वेन तदनुकूलत्वाऽभावात्। तद्धि तदुत्पादाऽनुकूलं यस्मिन् सति यदुत्पद्यते, नाऽसति। न चाऽऽमुष्मिकं स्वर्गादि सति कर्मणि भवति चिरविनष्टे। तस्मिंस्तदुपपत्तेरिति चेत्? किमिदानीमाग्नेयादिष्वपि न साधनत्वमधिकाराऽपूर्वस्य, भाक्तो वा साधनभावस्तेषाम्? न हि तस्य भाक्तत्वे इतिकर्तव्यतासम्बन्धो घटते। न जातूपचरितवह्निभावो माणवको दाहपाकयोरुपयुज्यते। तेषां च विषयत्वमेकं नाना च करणत्वं भवद्भिरभ्युपेयते। तयोर्भिन्नप्रस्थानोपधारूपत्वात्। प्रतिपत्त्यनुबन्धो हि विषयो[1] यथाप्रतीति व्यवतिष्ठते। तत्रोच्चारिताश्चाऽऽग्नेयादयो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति सकृदवगतेस्तथैव विषयभावमनुभवन्तीत्येकमेवैषामधिकाराऽपूर्वं प्रति विषयत्वम् उत्पत्त्यनुबन्धस्तु करणत्वम्। स च स्वरूपाऽधीनः, न प्रतिपत्त्यधीनः। स्वरूपं चैषामाग्नेयादीनां 'यदाग्नेयो ऽष्टाकपाल' इत्यादिभ्यो भिन्नभावमवगतमिति तदनुवर्तिनी साधनताऽपि भिन्नैव।

---

१. विषयत्वम्. २ पु० पा०

न चैवमन्योन्यनिरपेक्षाणामुपायभावः। यथाश्रुतकरणाऽधीनसिद्धित्वात् परमाऽपूर्वस्य। बहूनि चाऽस्य करणानि श्रूयन्ते, इति नैकोपायसाध्यता भवितुमर्हति। अनेककरणसाध्यत्वं चैकस्या अपि क्रियाया लोकेऽपि दृष्टमेव। यथाऽश्वेन दीपिकया खड्गपाणिभिरग्रेसरैः संचरते राजा प्रदोष इति। अवान्तरव्यापारभेदादश्वादीनां साधनानां भेद इति चेत्? इहाप्युत्पत्त्यपूर्वाण्येवाऽवान्तरव्यापाराः। ते च प्रत्याग्नेयादि भिद्यन्ते इति समानम्। एवं चाऽऽज्यौषधसांनाय्येषु न सङ्करो धर्माणाम्। परमाऽपूर्वप्रयुक्तत्वेऽप्यवान्तरव्यापारोत्पत्त्यपूर्वभेदेन साधनभावस्य भेदादपूर्वसाधननिवेशितत्वाच्च तेषाम्। अन्यथा तदभेदे सङ्करप्रसङ्गात्। तस्माद्यथैवाधिकाराऽपूर्वोत्पत्तिसमये आग्नेयादीनामसतामपि शब्दाऽवगतसाधनभावनामुत्पत्त्यपूर्वाण्यवान्तरव्यापाराः शक्तयो वा तथा फलं प्रत्यवगतसाधनभावायाः क्रियाया अवान्तरव्यापारः शक्तिर्वा अपूर्वं भविष्यति। कथमन्यसमवेताऽन्यस्य शक्तिः, असति वा व्यापारवत्यवान्तरव्यापार इति चेत्? आग्नेयादीनामपि परमाऽपूर्वसाधनानामवान्तरव्यापारेषु शक्तिषु वोत्पत्त्यपूर्वेषु तुल्यत्वात्पर्यनुयोगस्य। अनपेक्षशब्दाऽवगतसाधनभावनामाग्नेयादीनामसहभुवामन्यसमवेतान्यप्यसमानकालान्यप्युत्पत्त्यपूर्वाणि व्यापाराः सामर्थ्यं वेति चेत्? तत्किं 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'-ति लोकाऽनुसारतः साध्यस्वर्गवैशिष्ट्येन[1] क्रिया कार्या नाऽवगम्यते, स्वविशेषणं वा साध्यरूपं प्रत्ययस्याऽनानुकूल्यम्, येन तद्घटनायाऽवान्तरव्यापारः सामर्थ्यं वा क्रियाया नाऽपूर्वमास्थीयेत?

फलसाधनसाधनं न फलसाधनं क्रियेत्यपि मिथ्या। फलप्रवृत्ताया एव तस्यास्तत्साधनत्वात्। यथा परमाऽपूर्वसाधनप्रवृत्तानामाग्नेयादीनामुत्पत्त्यपूर्वसाधनत्वम्; सस्यागमो[2]द्देशेन प्रवृत्तस्येव कृषिकर्मणो भूपाटनादिसाधनत्वम्। न च परमाऽपूर्वं प्रत्युत्पत्त्यपूर्वाणामेव साधनत्वम्, नाऽऽग्नेयादीनामिति साम्प्रतम्। न हि दर्शपूर्णमासाभ्यामिति च यजेतेति चोत्पत्त्यपूर्वाणामभिधानमपि तु षण्णामाग्नेयादीनां कालविशेषसम्बन्धेनोत्पन्नानामनूदितानां समुदायिनाम्[3]। न चैषामुत्पत्तिवाक्यान्येव यथास्वमुत्पत्त्यपूर्वाणि प्रति कारणत्वमधिगमयितुमीशते। अधिकारवाक्यसन्निधिसमाम्नातानां तदुत्पत्तिवाक्यानामधिकाराऽपूर्वप्रत्यभिज्ञाशङ्कया द्रागिवाऽपूर्वान्तरप्रत्ययाऽजननात्। उत्पन्नानूदितानां तु पश्चादाग्नेयादीनामधिकाराऽपूर्वं

---

१. विशिष्टेन २ पु० पा०। २. सस्याधिगम २ पु० पा०।
३. समुदायानाम् २ पु० पा०।

अथ मानान्तरात्सिद्धिः ? न। मानान्तरविषयत्वेनाऽनपेक्षत्वसिद्धेः। अपि च नियोक्तृव्यापारो नियोगो न नियोक्तुर्विना अवकल्पते। न

प्रत्यधिगतविषयकरण[1] भावानामपरस्परं सम्भवतां तदनुपपत्तेः। तत्सिद्ध्यर्थमुत्पत्त्यपूर्वाणि कल्पितानि प्रत्ययवाच्यान्यपि कार्यरूपाण्यपि नाऽऽग्नेयादीनां साधनानां प्रधानं प्रति स्वकरणतामापादयितुमर्हन्ति। तैराग्नेयादिभिः परमाऽपूर्वे जनयितव्येऽवान्तरव्यापारतया तत्कल्पनात्। तथैव च लिङर्थत्वव्यवस्थापनात् प्राधान्याऽनुपपत्तेः। प्रधानद्वयसम्बन्धस्यैकत्र दुरधिगमत्वात्। तस्माद्यथा तवाऽऽग्नेयादीनामुत्पत्त्यपूर्वाऽवान्तरव्यापाराणां परमाऽपूर्वं फलं चैककृतिकर्म तथा विवृद्धं साध्यं प्रत्येक एव करणभावः, तथा ममाप्यपूर्वाऽवान्तरव्यापाराया एव क्रियाया अपि स्वर्गाऽनुकूलतेति साध्यस्वर्गविशिष्टोऽपि शक्त एव क्रियाकर्तव्यतामवबोद्धुम्। न च यो यत्कामः स तदुपायमेव कार्य्यमवैति, नाऽनुपायमित्यस्यैकान्तिकत्वमिति निवेदयिष्यते। दर्शितं च भावनाविवेके। कर्तृसमीहितोपायस्य कर्तव्यताज्ञानालम्बनतायां फले चाऽप्रसङ्ग इत्युपरिष्टान्निवेदयिष्यते। तस्मान्न स्वर्गकामादिसम्बन्धान्मानान्तराऽपूर्वाऽभिधानसिद्धिर्लिङादीनाम्।

नाऽपि लोके माणवक! सन्ध्यामुपास्वेत्याचार्यवचनाऽनन्तरं माणवकस्य प्रवृत्तिमुपलभ्य तस्याश्च कार्याऽवगमाऽधीनत्वात्सन्ध्योपासनकर्मणश्च दुःखतया तदनुपपत्तेः तदतिरिक्ते कार्ये मानान्तराऽवेद्ये लिङादेः सङ्गतिग्रह इति चतुरस्रम्। क्रियाया एव कर्तव्यतोपपत्तेः। दुःखतयाऽनुपपत्तिरिति चेत्? एवं तर्हि वरं तस्या एव हिताऽहितप्राप्तिपरिहारयोरन्यतरोपायतापरिकल्पनम्, तादृश्या एव तस्या आत्मनि प्रवृत्तिहेतोरुपलब्धेः तदेतदप्यतिपेलवम्। तस्मान्मानान्तराऽविषयत्वेनाऽपदार्थत्वाच्च नैव वाक्यार्थत्वं नियोगस्याऽपूर्वस्येति सिद्धम्।

यदि तु नियोगस्य पदार्थत्वलिप्सयाऽनभिमतमपि मानान्तरगोचरत्वमास्थीयते ततो मानान्तरविषयत्वेनाऽनपेक्षत्वं चोदनायाः स्यादित्याह—अथ मानान्तरात्सिद्धिः? न। मानान्तरविषयत्वेनाऽनपेक्षत्वसिद्धेश्चोदनायाः। अपि च नियोग इति प्रवर्तनेति च प्रेरणेति च नियोक्तुर्व्यापारे निरूढवृत्तयः शब्दास्तं गमयन्ति। न चाऽसौ नियोक्तुर्विना अवकल्पते, कारणाऽभावे कार्यनिवृत्तेरित्याह—अपि च नियोक्तुर्व्यापारो नियोगो न नियोक्तुर्विना अवकल्पते। अस्तु तर्हि नियोक्तेत्यत्राह—न चाऽस्याऽस्ति

१. अधिगतकरण २ पु० पा०।

चाऽस्य सम्भवः, अपौरुषेयत्वाऽभ्युपगमात् । शब्दस्य पुरस्तात् प्रतिषेधात् । कुर्विति तदपरामर्शादनन्यगोचरत्वम् । तद्यदि शब्दतो घटादावपि प्रसङ्गः । न हि घटादिश्रुतयोऽपि भूतादीनामन्यतममामृशन्ति । अर्थाऽर्थतः ? अत्यन्ताऽसत्त्वं खपुष्पादिवत् । एतल्लक्षणत्वादत्यन्ताऽसत्तायाः । नित्यानां च वर्तमानत्वादव्यभिचारः । यदीतरप्रतियोगिता वर्तमानता न नित्येषु सा ।

सम्भवः । ननु पुरुषो नियोक्ता भविष्यतीत्यत आह—अपौरुषेयत्वाऽभ्युपगमात् । पुरुषाऽभावाद्वेदे । अस्तु तर्हि शब्दो नियोक्तेत्यत आह—शब्दस्य पुरस्तात् प्रतिषेधात् । प्रमाणत्वादित्यादिना । यदपि प्रमाणान्तराणां कालविपरिवृत्त्यर्थविषयगोचरत्वात् कुर्विति तदपरामर्शात् कालत्रयाऽपरामर्शात्करिष्यसि, अकार्षीः, करोषीत्यभिन्नार्थत्वप्रसङ्गादनन्यगोचरत्वम् । तद्यदि शब्दतो घटादावपि मानान्तराऽगोचरत्वप्रसङ्गः । न हि घटादिश्रुतयोऽपि भूतादीनामन्यतममामृशन्ति । न हि घट इति भूतादीनामन्यतमामर्शे घटोऽभूदस्ति भविष्यतीति प्रयोगसम्भवः । विरोधपौनरुक्त्याभ्यां त्रयामर्शे चाऽपौनरुक्त्यमेवेत्यर्थः । अथाऽर्थतस्त्रैकाल्याऽनामर्शो, न पुनः शब्दमात्रात् । दूषयति—अत्यन्ताऽसत्त्वं खपुष्पादिवत् । यथा खपुष्पादयो नाऽभूवन्न भवन्ति न भविष्यन्ति तथा चेन्नियोगोऽपि न स्यात्तेभ्यो विशेषः । न ह्यत्यन्ताऽसत्ताया अन्यल्लक्षणम् । अतः कालत्रयविवेकादित्याह—एतल्लक्षणत्वादत्यन्ताऽसत्तायाः । कालाऽतिरिक्तस्य हि सत्त्वं कालाऽवच्छेदेन व्याप्तम्, स तदवच्छेदो[1]कालात्मनो नियोगान्निवर्तमानः सत्त्वमप्यस्य निवर्तयति, निवर्तमाना वृक्षतेव शिंशपात्वमेकशिलामयात् गिरिप्रदेशादित्यर्थः । ननु कालाऽतिरिक्ताः परमाण्वाकाशादयः सन्तो न च कालाऽवच्छिन्नास्तस्माद्व्यभिचार इत्यत आह—नित्यानां च वर्तमानत्वादव्यभिचारः । अतीताऽनागताभ्यां व्यपवृत्तयाऽस्तिक्रियया स्वाऽयोगं नित्येषु नियोगेन व्यवच्छिन्दन्त्या उपहितानां नित्यानां वर्तमानता सदातनीत्यर्थः । शङ्कते—यदीतरप्रतियोगिता वर्तमानता, न नित्येषु सा, या खल्वनागतता कारणद्वारेणोपमृद्य भवति या च अतीततया स्व[2]नाशककारणद्वारेणोपमृद्यते,[3] सा वर्तमानता । न चेयं नित्येषु सम्भवति । प्राक्प्रध्वंसाऽभावाऽविनाभावितया नित्यत्वविरोधिनीत्वादित्यर्थः । तदेतत्पारिभाषिकं वर्तमानत्वं न लोकसिद्धम् । अस्ति हि प्राक्प्रध्वंसाऽभावरहिते-

---

१. अतस्तदवच्छेदः पु० पा० । २. याचस्व २ पु० पा० ।
३. उपरममश्नुते २ पु० पा० ।

कालाऽसंसृष्टमपि तर्हि मानान्तरविषय इति व्यर्थः कालविवेकोपन्यासः ।

प्रमाणग्राह्यता सत्त्वलक्षणम् । अतो नाऽत्यन्तासत्त्वम् । न । अभाव-

स्वप्याकाशादिषु वर्तमानतानिसर्गाऽनुभवो लौकिकानाम् विद्यते व्योमा-ऽऽकाशोऽस्ती[1]त्यादिप्रयोगदर्शनात् । न च भाक्तः प्रयोगः, विशेषाभावात् । न खल्वात्माऽस्ति, विज्ञानमस्तीति विशेषोऽवगम्यते । अविशेषे अपि[2] चैकस्य भाक्तत्वकल्पने तदतिरिक्तस्यापि भाक्तत्वप्रसङ्ग इति ।

सत्यप्यत्र दूषणे स्थवीयसि दोषान्तरमाह—कालाऽसंसृष्टमपि तर्हि मानान्तरविषय इति व्यर्थो नियोगस्य कालविवेकोपन्यासः ।

एतेन यदाहुः कारकव्यापारो हि कालत्रयाऽवच्छेद्यो नाऽधिकार इति, तदप्यपास्तं वेदितव्यम् । यथाऽव्यापारात्मतयाऽधिकारो नियोगः कार्य्यम्, न कालत्रयसंभिन्नः तथा घटादयोऽपि । न जातु तेऽपि व्यापारा[3] न च[4] मानान्तरागोचराः । तथाऽधिकारोनवच्छिन्नोऽपि कालेन मानान्तर-गोचरः स्यादिति व्यर्थः कालविवेकोपन्यासः । ननु न कालसम्बन्धः सत्ता, नापि तद्व्याप्ता, कालस्य तदसम्बन्धस्याऽसत्त्वप्रसङ्गात् । नाऽपि सामान्यम्, पूर्वविमर्शाऽभावे[5] तदनुपपत्तेः । यथा कालाक्षीमीक्षितवतः स्वस्तिमत्यां गवि तदवमर्शो, नैवं हिमशैलादिषु च त्रसरेण्वादिषु च रूपादिषु चोत्क्षेपणादिषु गोत्वादिषु च तदवमर्शः समस्ति एतेन द्रव्यत्वादयोऽपि प्रत्युक्ता वेदितव्याः । तस्मान्न सामान्यमपि सत्ता, अपि तु प्रमाणग्राह्यता सत्त्वलणम् । सा च त्रैकाल्याऽनवच्छिन्नस्य कालस्येव नियोगस्याऽपि शास्त्रप्रमाणप्रयोगवेदनी-यस्याऽस्तीति नात्यन्ताऽसत्त्वम् ।

गगनकुसुमादयस्त्वतीतसमस्तमानकर्मभावा अत्यताऽसन्त एवेत्या-शयवान् परिचोदयति—प्रमाणग्राह्यता सत्त्वलक्षणम्, अतो नाऽत्यन्ताऽसत्त्वं नियोगस्य । दूषयति—नाऽभावस्यापि प्रमेयत्वात् । न खलु प्रमेयता सत्ता, तदनुवृत्तावपि सत्ताया अभवाद् व्यावृत्तेः । यद्धि यस्मिन् अनुवर्तमाने व्यावर्तते तत्ततोऽन्यदेव, यथा सूत्रात् कुसुमानि । सदसदिति च परस्परव्यावृत्ते लोकसिद्धे प्रमेये । यदाहुः प्रामाणिकाः "सत् सदिति गृह्यमाणं यथाभूत-मविपरीतं च तत्त्वं सत् । असदसदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वमस-

---

१. आत्मास्ति २ पु० पा० ।
२. तथापि २ पु० पा० ।
३. घटादयोऽप्यव्यापाराः २ पु० पा० ।
४. न मानान्तरा णां मु० पा० ।
५. पूर्वाऽवमर्शेन विना १ पु० पा० ।

कथम् ? यदा नाऽभावः प्रमेयः कण्टकादीनामिति निरटङ्कि, कथं तर्हि नास्यापि प्रमेयत्वात् । अभावः प्रमेय इति सुव्याहृतम् । नास्ति प्रमीयते चेति ऽस्तीति व्यवहारः ? विषयावच्छेदात् । अवच्छिन्नविषयं हि प्रमाणं तदवबोधयदन्यदनवबोधयन्नास्तीति व्यवहारयति । कथमन्यविषयो व्यवहारोऽन्यविषयात्प्रमाणात् ? नाऽयमन्यविषयः । तस्य प्रमाणविषयाऽवच्छेदविषयत्वात् । तस्या विषयान्तरत्वात् । तथा हि—नास्तीत्ययमर्थो नेदं प्रतीयते

दि"ति । तदेतदसत्त्वेन नित्यं परस्परव्यावृत्तं सदसत्त्वं व्यच्छिन्नमनुभूयते । चोदकः सोपहासमाह—अभावः प्रमेय इति सुव्याहृतम् । उपहासबीजं दर्शयति—नास्ति प्रमीयते चेति कथम् ? न हि यथा द्रव्यगुणसामान्यान्यन्योऽन्यविलक्षणानि स्वभावभेदवन्ति च तद्भेदाश्चकासति तथा ऽयमभावोऽपि कश्चित् परस्परव्यावृतश्च स्वभावभेदवांश्चाऽनुभव एव च प्रमाणमार्गासङ्गतो लोकस्तत्त्वालोकनात्, न पुनः पुरुषप्रवादमात्रम् । विप्रवादो हि सम्भवेत् सवटयक्षवत् । तस्मान्नास्तीति व्यपदेशऽप्रमीयमाणतामात्राऽऽलम्बनो न पुनरभावं विग्रहवन्तं गोचरयति । तथा च घटो नास्ति, न प्रमीयत इत्यर्थः । तस्य कथं प्रमीयत इत्यनेन सङ्गतिः ? विरोधादित्यर्थः । यद्येवमभावव्यवहारस्य भूतले कण्टकादि 'नास्तीति चरणन्यासादिलक्षणस्य प्रवृत्त्यात्मकस्य घटादि नास्तीति च निवृत्त्याऽऽत्मकस्याऽसत्यभावे किं बीजम् ? इत्याह । यदा नाऽभावः प्रमेयः कण्टकादीनामिति निरटङ्कि, कथं तर्हि तदानीं नास्तीति व्यवहारः ? उत्तरमाह—विषयाऽवच्छेदात् । प्रमाणस्य भूतलग्राहिणः । तदेव स्फोटयति—अवच्छिन्नविषयं हि प्रमाणमेकाकिभूतलग्राहि न घटकण्टकादिसद्वितीयभूतलग्राहीति यावत् । तदवबोधयद् भूतलमन्यदनवबोधयत् घटकण्टकादि नास्तीति व्यवहारयति ।

तदेतद्विशदीकर्तुं शक्यते—कथमन्यविषयो व्यवहारो घटाद्यभावविषयोऽन्यविषयाद् भूतलादिविषयात् प्रमाणात् ? अभावव्यवहारस्तावदयं सर्वजनीनो न निह्नवमर्हति, भावव्यवहारवत् । तदनेनाऽभावादेवोत्पत्तव्यम्, अन्यव्यवहारस्याऽन्यत उत्पत्तावतिप्रसङ्गादित्यर्थः । निराकरोति—नायमन्यविषयः । न व्यतिरिक्ताऽभावविषयः, तस्याऽभाववद् विग्रहवतोऽप्रतीतेः । किंविषयस्तर्हि ? इत्यत आह– तस्याऽभावव्यवहारस्य प्रमाणविषयाऽवच्छेदविषयत्वात् ।

नन्वेवं विषयावच्छेदोऽपि भावरूपाद्विषयाद् भिन्न इति कथं नाऽन्यविषयोऽयमभावव्यवहारः ? इत्यत आह—तस्या विषयान्तरत्वात् । न

भूतलं प्रमीयते न घट इति । अतस्तत्राऽप्रमितिः प्रमाणमित्यलौकिकमिति ।

उच्यते—अनिरूपितव्यवहारमत्रभवन्तं पश्यामः । इदं हि भवान्निरूपयतु, य एष लौकिकानां क्वचिन्नास्तीति प्रवृत्तिनिवृत्तिलक्षणो व्यवहारः किमयमपरिच्छेदाद्, उताऽन्यपरिच्छेदात्, उत तदभावपरिच्छेदात् ? यद्यपरिच्छेदात्, नेष्टस्याऽभावं जिज्ञासेरन्, अपरिच्छेदादेव निवर्तेरन्, अनिष्टस्याऽपरिच्छेदादेव प्रवर्तेरन् । प्रमाणविषयाऽपरिच्छेदनिबन्धन एव व्यवहारः । न । विशेषाऽभावात् । न हि तदितरयोरपरिच्छेदो विशिष्यते । अप्रत्यय-

ह्यवच्छेदो नाम भूतलभावाद् भिन्नः, किं तर्हि दृश्ये प्रतियोगिनि घटकण्टकादौ भूतलमात्रोलम्भः । स चैकाकिभूतलविषयः । यस्मिन्दिदृक्षिते यस्मिन् प्रतियोगिनि दृश्ये भवति[1] तस्याभाव उच्यते, प्रवर्तयति च तदभावव्यवहारम् । ननु भवतु नामैतद्विषयोऽयमभावव्यवहारो नास्तीति व्यपदेशो लौकिकानां भावाऽतिरिक्तमर्थमवलम्बिष्यत इत्यत आह—तथा हि । नास्तीत्ययमर्थो नेदं प्रतीयते, भूतलमेकाकि प्रतीयते । न घट इति व्यपदेशोऽपि प्रमाणविषयावच्छेदविषय एव, न निर्विषयः । प्रमाणविषयावच्छेदश्च व्याकृतः । तस्मादुपपन्न उपहास इत्याह—अतस्तत्राऽप्रमितिः प्रमाणं चेत्यलौकिकम् ।

तदेतद्दूषयितुमुपक्रमते—उच्यते । अनिरूपितव्यवहारमत्रभवन्तं पश्यामः । निरूपणे त्वभावव्यवहारस्याऽनुपपन्नमेतदिति तन्निरूपणे प्रवर्तयति । इदं हि भवान्निरूपयतु, य एष लौकिकानां क्वचिन्नास्तीति प्रवृत्तिनिवृत्तिलक्षणो व्यवहारः किमयमपरिच्छेदात्सर्वोपाख्याविरहलक्षणात्, उताऽन्यपरिच्छेदात्, उत तदभावपरिच्छेदात् ? तत्र प्रथमं कल्पं दूषयति—यद्यपरिच्छेदात्, नेष्टस्याऽभावं जिज्ञासेरन् । किञ्चाऽपरिच्छेदादेव निवर्तेरन् अनिष्टस्याऽपरिच्छेदादेव प्रवर्तेरन् । जिज्ञासमानोऽपि खल्वपरिच्छेदमेवाऽऽप्नुयात् । तदतिरिच्यमानदेहस्य प्रमेयाऽभावस्याऽनभ्युपगमात् । स च प्राप्त एवेति प्रेक्षावतामभावजिज्ञासा न स्यात् ।

शङ्कते—प्रमाणविषयाऽपरिच्छेदनिबन्धन एव व्यवहारः । नाऽपरिच्छेदमात्रमत्र विवक्षितम्, अपि तु दृश्यस्य प्रतियोगिन इत्यर्थः । निराकरोति—न । विशेषाऽभावात् । तमेवाह—न हि तत्तदितरयोरपरिच्छेदो विशिष्यते । न हि दृश्यत्वेऽदृश्यत्वे वा प्रतियोगिनोरपरिच्छेदस्य प्रसज्यप्रतिषेधात्मनः सर्वोपाख्याविरहिणः कश्चिद्विशेषः सम्भवति । तत्सम्भवे तु तुच्छत्वाऽनुपपत्तेः ।

---

१. यस्मिन् प्रतियोगिनि दृश्यं भवति २ पु० पा० ।

पूर्विके च प्रवृत्तिनिवृत्ती इत्यसमीचीनम्[1] ।

वस्त्वन्तरप्रत्ययात् प्रवर्तन्ते निवर्तन्ते चेति मिथ्या । भावेऽपि प्रतियोगिनस्तत्प्रसङ्गात् । भावे घटकण्टकयोर्ज्ञायमानयोस्तन्निबन्धे एव प्रवृत्तिनिवृत्ती[2] । हन्त तर्हि तदभावाद्विपर्ययः, न वस्त्वन्तरभावात् । इष्टाऽनिष्टसाधनज्ञानस्य तदापि भावात्पुरस्ताच्च ।

दूषणान्तरमाह—अप्रत्ययपूर्विके च प्रवृत्तिनिवृत्ती इत्यसमीचीनम् । न खलु गगनकुसुमायमानस्तुच्छोऽपरिच्छेदः प्रत्ययः कारणं वा विज्ञानं वा सम्भवति । ततश्चाऽपरिच्छेदात् प्रेक्षावत्प्रवृत्तिनिवृत्ती ब्रुवाण आकस्मिकत्वं वा तयोरविज्ञानपूर्वकत्वं वा वाचोयुक्त्यन्तरेणाऽभिदधीत, कदाचित्कत्वप्रेक्षावत्प्रवृत्तिनिवृत्तित्वयोरनुपपत्तेरित्यर्थः ।

ननूभयी भूतलादौ संवित्, सद्वितीयभूतलविषया चैकाकिभूतलविषया चेति । उत्तरा ऽपि च द्वयी, दृश्ये प्रतियोगिनि अदृश्ये च । दृश्यत्वं चास्योपलम्भाय[3] प्रत्ययान्तरसाकल्यं, स्वभावविशेषश्च । स च स्वभावविशेष उच्यते । यस्मिन्सति सत्स्वन्येषूपलम्भप्रत्ययेषु सद्भावोऽनुभूयते । एवं च या दृश्ये प्रतियोगिनि भूतलप्रतीतिः सैवाऽभावव्यवहारसाधनी । यस्याश्चाऽतुच्छत्वात् सम्भवति विशेषणयोगः । तत्सिद्ध्यर्थं च युज्यते सूक्ष्मकीटकण्टकादिजिज्ञासेत्यत आह—वस्त्वन्तरप्रत्ययात् प्रवर्त्तन्ते चेति मिथ्या । कुतः ? भावेऽपि प्रतियोगिनो घटादेर्भूतलादौ तत्प्रसङ्गात् । घटो नास्तीति निवृत्तेः कण्टको नास्तीति प्रवृत्तेः प्रसङ्गात् ।

शङ्कते—भावे घटकण्टकयोर्जायमानयोस्तन्निबन्धने एव प्रवृत्तिनिवृत्ती; न भूतलज्ञाननिबन्धने । निराचष्टे—हन्त तर्हि तदभावात् घटकण्टकयोरभावाद्विपर्यय इष्टाऽनिष्टसाधनज्ञानस्य घटकण्टकज्ञानस्य । अथ भूतलभाव एव कस्मादिष्टाऽनिष्टसाधनज्ञानविपर्ययहेतुर्न भवति ? इत्यत आह—न वस्त्वन्तरभावात् । न भूतलभावादिष्टाऽनिष्टसाधनज्ञानविपर्ययः । कस्मात् ? तदाऽपीष्टाऽनिष्टसाधनज्ञानस्य समयेऽपि भावाद् भूतलस्य । एतदुक्तं भवति । यदीष्टाऽनिष्टसाधनज्ञानविरोधो भूतलस्याऽभविष्यत् ततस्तस्मात्तदनङ्क्ष्यत्[4] न त्वनयोर्विरोधः । तज्ज्ञानसन्तत्या सह तस्य चिरमवस्थितेरिति ।

---

१. इत्यसमीचीनम् इति नास्ति मू० पु० । २. वस्त्वन्तरेत्यादि मू० पु० नास्ति ।
३. उपलम्भतः २ पु० पा० । ४. तस्मादन्वभविष्यत् २ पु० पा० ।

न चेष्टसाधनज्ञानाऽसहभुवोऽपि भूभागस्य तज्ज्ञानविपर्ययविरोधिताऽपीत्याह—पुरस्ताच्च। भूतलस्य भावात्। इष्टाऽनिष्टसाधनज्ञानस्य घटकण्टकज्ञानस्य पुरस्तात्तदभावे दृश्यमानं भूतलं न तत्सहभावनियतमित्यर्थः।

अत्रेदमाकूतम्। योऽयमभावव्यवहारो लौकिकानां घटो नास्तीति निवृत्तिलक्षणः, कण्टको नास्तीति प्रवृत्तिलक्षणः, स न तावद् दृश्ये घटकण्टकादौ भूभागग्रहनिबन्धनः, दृश्यमानेऽपि तद्गते घटादौ प्रसङ्गात्। न ह्यदृश्यः, दृश्यमानत्वात्[1]। केवलभूभागग्रहणनिबन्धनत्वादयमदोष इति चेत्। किं पुनरस्य कैवल्यम्? स्वरूपमिति चेत्। न। घटकण्टकादिग्रहेऽपि तत्सद्भावात्। तद्धर्म[2] इति चेत्? स तर्हि घटादिभावविरोधी भूमिकान्तरेण तदभाव एवेति सिद्धं नः समीहितम्। नन्वभावप्रमेयवादिनामपि भूतलग्रहणसद्भावज्ञानकारणमेषितव्यम्। यदाह—"गृहीत्वा वस्तुसद्भावं स्मृत्वा च[3] प्रतियोगिन"मिति। तत्र न तावत् संसृष्टभूतलग्रहस्तद्धेतुर्विरोधात्। न खल्वस्ति सम्भवः, घटसंसृष्टभूतलग्रहश्च तत्र घटाऽभावनिश्चयश्चेति। नापि घटाऽभाववद्भूतलग्रहः। आत्माश्रयप्रसङ्गात्। न खलु स एव तस्य हेतुरिति साम्प्रतम्। तस्माददृश्ये प्रतियोगिनि घटादौ भूतलमात्रग्रहणं घटाऽभावपरिच्छेदहेतुरित्यकामेनाऽपि घटाभावादन्यत् कैवल्यं भूतलस्य स्वीकरणीयम्। तदेव चाऽभावव्यवहारनिबन्धनमिति किमन्तर्गडुना घटाऽभावेनेति।

तदेतदयुक्तम्। वस्तुसद्भावग्रहणमात्रस्याऽभावज्ञानहेतुत्वाऽनभ्युपगमात्। अपि तु तुल्योपलम्भयोग्यस्य प्रतियोगिनोऽनुपलम्भने सत्यस्य तत्कारणत्वमिष्यते। तदाह—स्मृत्वा च प्रतियोगिनमिति। अनेनागृह्यमाणतामस्य सूचयति। तत्त्वे स्मृत्यनुपपत्तेः। न चैकज्ञानसंसर्गिभूतलोपलम्भ एव घटानुपलम्भ इति साम्प्रतम् नोपलब्धचरघट[4]संसृष्टभूतलोपलम्भेऽपि घटाऽनुपलम्भप्रसङ्गात्। तदाऽपि भूतलोपलम्भस्य भावात्। घटाऽनुपलम्भस्य च तदव्यतिरेकात्। नन्वयमनुपलम्भः प्रतीतो वा स्यादभावज्ञाने हेतुरप्रतीतो वा? न तावत् प्रतीतोऽनवस्थाऽऽपातात्। सोऽपि ह्युपलम्भाऽभावरूपत्वादनुलम्भान्तरेण प्रमातव्यः, एवमनुपलम्भान्तरमपीत्यनवस्थानात्। अप्रतीतत्वे तु सत्तया हेतुः स्यात्। तथा च यदाऽयं प्रमाणोपलम्भचरचत्वरभूतलप्रमित्साऽभावात् तस्मिन्नप्रतीतचरे चैत्राऽभावं त्वचिरप्राप्तचैत्रविशिष्टचत्वरतलोपलम्भवान् पृच्छ्यते मैत्र! प्राक् किमासीदिह चैत्र इति

---

१. न ह्यदृश्यो दृश्यमानः २ पु० पा०। २. तद्धर्म्य० २ पु० पा०।
३. प्रयोगिनम् मु० पा०। ४. साम्प्रतं घट २ पु० पा०।

स तदा तत्प्रश्नसमुदितजिज्ञासः प्राक्तनीं दृश्यमानस्य चैत्रस्याऽसत्तां तदानीमेवाऽवधार्योत्तरमाह, आयुष्मन्नासीदिह चैत्रः सम्प्राप्त इति।

तन्नोपपद्यते। तदानीन्तनेनोपलम्भेन तदनुपलम्भाऽपवादात्। न च प्राक्तनोऽनुपलम्भस्तस्य सम्प्रतितनीमभावधियमाधातुमर्हति। न खलु निमीलितनयनयुगलः प्राच्या नयनसत्तया सम्प्रति रूपं पश्यति। तस्मादेकज्ञानसंसर्गवस्त्वन्तरोपलम्भ एवाऽभावज्ञानकारणमेषितव्यम्। तथा च स्वसंवेदनसिद्धः स एवाऽभावव्यवहारसाधनाय पर्याप्त इति कृतमभावेन प्रमेयेनेति।

अत्रोच्यते। न तावद्विना घटाऽनुपलम्भम् भूतलोपलम्भमात्रमभावव्यवहारसाधनम्। न च भूतलोपलम्भ एव तदनुपलम्भ इति चोक्तम्। अतोऽनुपलम्भो वरं[1] प्रतियोगिन एषितव्यः। न चाऽसावप्रतीतस्तदभावव्यवहारसाधनम्, प्रेक्षावद्व्यवहारस्याऽबुद्धिपूर्वकत्वाऽनुपपत्तेः। तदभावज्ञानसाधनं तु भवेत्। अज्ञातस्याऽपि ज्ञानोपायत्वदर्शनाच्चक्षुरादिवत्।

नन्वेवं सत्तामात्रेणोपायत्वमभ्युपेतं भवति। तच्चाऽनुपपन्नम्। असत्यनुपलम्भे तदभावबुद्धिसमुत्पादप्रसङ्गादित्युक्तम्। न। अनुपलम्भाऽभावस्याऽसिद्धेः। नन्वत्र चत्वरतले किमयमासीच्चैत्र इति प्रश्नसमये तदुपलम्भमानः स एव मैत्रः[2] कथं तदुपलम्भवान्? सत्यम्, गृह्णाति चैत्रम्, न तु स्मरत्यस्य प्राक्तनीं तत्र सत्ताम्, चत्वरतलस्येव। न च स्मृतिरनुपलम्भ इति तदभावोऽप्यनुपलम्भ एव। तेन यथा ग्रहणार्हस्याऽग्रहणं[3] तदभाववीक्षासाधनम्[4], एवं सत्यपि सम्प्रति तस्य ग्रहणे प्राक्तनी चैत्रस्य सत्ता चत्वरस्येव तत्र मध्यन्दिने स्मरणार्हा न स्मर्यत इति माध्यन्दिनस्मरणाऽभावः सन्निति प्राक्तनाऽभावविषयं माध्यन्दिनं प्रत्ययं शक्त एव जनयितुम्। न च प्रत्यक्षाऽनुपलब्धिरेवाऽभावज्ञानसाधनमिति साम्प्रतम्। योग्यप्रमाणाऽनुपलब्धेस्तत्साधनत्वात्। अतत्साधनत्वे त्वनुमानादिनिवृत्तेः। मकरगतस्य सवितुर्मीनादिषु सत्तायाश्च चैत्यवन्दनादिधर्मतायाश्च दर्विहोमाऽपूर्ववत्त्वस्य च ध्वन्यागमनमात्रोपपन्नश्रवणशब्दस्य सजातीयपरम्परारम्भणस्य निवारणाऽभावात्। प्रमाणान्तराणामिवाऽप्रमाणस्याऽपि स्मरणस्य स्वविषये योग्यत्वोपपत्ते। प्रत्ययान्तरसाकल्यलक्षणस्य च दृश्यत्वस्य विषयकारणक एव प्रत्यय उपपत्तेः। तदभावे चाऽनुमानादिनिवृत्तेरनुमेयाद्यभावसाधनत्वात्।

---

१. अपरः २ पु० पा०।　२. तदुपलम्भवानेव मैत्रः २ पु० पा०।
३. ग्रहणादियोग्यग्रहणं २ पु० पा०।　४. अभावसाधनं २ पु० पा०।

न ह्यनुमानाद्येकविषयाणां प्रमेयाणां क्वचिदभावस्तद्वयवहारो वा विषया- ऽतिरिक्तप्रत्ययान्तरसाकल्ये सम्भवति। तस्मिन् सति सद्विरोधिभावप्रत्यय- व्यवहारोपपत्तेः न च विषयकारणेऽपि प्रत्ययान्तरसाकल्यसम्भवः। इन्द्रिया- र्थसन्निकर्षस्यैवाऽसत्यर्थेऽनुपपत्तेः। तस्मात्संस्काराऽभावेऽपि स्मरणाऽर्हत्वमुप- पन्नम्। न चोपलम्भाऽनुपलम्भयोर्विरोधः, असमसमयवृत्तिभावाऽभावसाधन- तया भिन्नविषयत्वात्।

स्यादेतत्। सत्तामात्रेणाऽभावसाधने त्वनुपलम्भस्य दृश्यत्वमप्यस्य तथेति तज्ज्ञानसिद्धयर्थं सूक्ष्मकीटकण्टकादिजिज्ञासा न स्यात्। मैवम्। दृश्यत्वसिद्धयर्थं हि सा। अजिज्ञासितस्य तत्त्वाऽनुपपत्तेः। न तु दृश्यत्व- ज्ञानार्थम्। भवतु वा दृश्यत्वज्ञानं हेतुः, भूतलज्ञानवत्, किमायातमनुप- लम्भस्य? न ह्यालोको ज्ञायमानः कारणमिति चक्षुषाऽपि तथा भवि- तव्यम्। न च धूमोऽवगतोऽनुमानज्ञानकारणमिति मनोऽपि तत्कारणं ज्ञातव्यम्। तस्मात्सत्तयाऽनुपलम्भोऽभावज्ञानकारणमिति नाऽनवस्था। नाऽपि प्रमेयाऽभावाऽतिरिक्तकैवल्याऽङ्गीकारः। चत्वरतलोपलम्भस्य चैत्रा- ऽनुपलम्भे सति तत्कारणत्वात्। तदयमभावव्यवहारो वस्तुसद्भावग्रहणतत्- प्रतियोगितत्स्मरण[1]तद्बुभुत्साऽतिरिक्तनिमित्तजन्मा। यथा सत्स्वपि तन्तुषु कदाचित्पटः प्रादुर्भवंस्तदतिरिक्ततत्संयोगभेदजन्मेति। दृश्ये प्रतियोगिनि स्मर्यमाणे वस्तुसद्भावग्रहणे सत्यभावव्यवहारोऽवश्यम्भावीति हेतुरसिद्ध इति चेन्न। गृह्यमाणेऽपि प्रतियोगिन्यस्मर्यमाणे किमासीदिति प्रश्नाऽनन्तरं प्राक्तनतदभावव्यवहारप्रवृत्तेः। भवतु तर्हि बुभुत्सिते प्रतियोगिनि बोधार्हे वस्तुसद्भावज्ञानमभावव्यवहारसाधनम्। अस्ति च गृह्यमाणे चैत्रे किमा- सीदिति प्रश्नसमनन्तरं तत्र तदीयप्राचीनसद्भावसुस्मूर्षा। तदेतस्यां सत्यां प्राक्कालवर्तिचत्वरतलस्मृतिरेवाऽवश्यं तदभावव्यवहारप्रवृत्तिनिमित्तमित्य- सिद्धता हेतोः। न। एतस्यामप्यवश्यम्भावनियमाऽभावात्। प्रतीतिस्मरणा- ऽनुभवयोः सतोरपि नितान्तवल्लभ्यतया सुस्मूर्षाऽनुबुभूषयोरविरामात्[2]। तथा च प्रतियोगिनोऽनुभवे स्मरणे च तत्र तत्र तदभावव्यवहारप्रसक्तेः। असंस्मरणेऽननुभवे चेति विशेषणान्न दोष इति चेत्? अङ्गीकृतं तर्हि तदतिरिक्तं निमित्तमभावः। तथाप्युपलम्भाऽभावरूपत्वादस्य न प्रमेया- ऽभावसिद्धिरिति चेत्। अत्रोत्तरमनन्तरमेव वक्ष्यति स्वयमेवाऽऽचार्यः।

नन्वभावो नाम विग्रहवान्न कश्चिदनुभूयत इत्युक्तम. तत्किमयमभाव- व्यवहारो नास्ति, नास्ति निमित्तो वा? न तावन्नास्ति निमित्तः। कादा-

१. द्रव्यस्मरण २ पु० पा०। २. अधिगमात् २ पु० पा०।

तस्मान्नाऽन्यप्रमितिनिबन्धने नाप्यप्रमितिनिबन्धने अनभिमतमभिमतं नास्ति, अभिमतं नास्तीति प्रवृत्तिनिवृत्ती, अपि त्वभावाऽधिगमनिबन्धने। नास्तिज्ञानस्य को विषयो निरूपितः? ननूक्तम्, किमपराद्धं भवतो विषयाऽभावेन? यत्तमतिलङ्घ्य प्रमाणाऽभावो विषय इत्युच्यते। ज्ञेयाऽभावो न

चित्कत्वाऽनुपपत्तेः। न च निमित्तान्तरमस्याऽस्तीत्युक्तम्। न च नास्ति, भावव्यवहारस्याऽपि अपह्नवप्रसङ्गादित्युक्तम्। निःस्वभावस्य कथमनूभूयमानता? इति चेन्न। सद्व्यावृत्तिरूपस्य तस्य प्रतीयमानत्वात्स्वतोऽवान्तरविशेषाऽनुपलब्धेः। निःस्वभावतेति चेत्? न। ज्ञानशक्त्यादीनामपि तत्प्रसङ्गात्। तेषामपि हि न स्वतो भेदो निरूप्यते। ज्ञेयशक्य[1]भेदाऽधीनं तद्भेदनिरूपणमिति चेत्? न। इहापि प्रतियोगिभेदेन तद्भेदनिरूपणादिति सर्वमवदातम्।

प्रकृतमुपसंहरति—तस्मान्नाऽन्यप्रमितिनिबन्धने नाऽप्यप्रमितिनिबन्धनेऽनभिमतं नास्ति, अभिमतं नास्तीति प्रवृत्तिनिवृत्ती, अपि तु पारिशेष्यादभावाऽवगमनिबन्धने। न केवलं व्यवहाराऽन्यथानुपपत्तेरभावसिद्धिः, अपि तु घटोऽस्तीति ज्ञानवत्तदभावज्ञानमप्यवगम्यते। न च ज्ञानं निरालम्बनमिति निवेदयिष्यते। तदस्याऽऽलम्बनं नाऽभावादन्यदस्तीत्याशयवान् पृच्छति—नास्तिज्ञानस्य को विषयो निरूपितः? अपर आह—ननूक्तम्, नेदमिह प्रतीयत इत्यर्थः।

तत्र न तावददृश्ये[2] प्रतियोगिनि वस्तुसद्भावज्ञानम्, प्रतियोगिनोऽप्यप्रमितिः सम्भवतीत्युक्तम्। अतस्तद्व्यतिरिक्ताऽनुपलम्भाऽभावो वक्तव्यः। तथा च किमपराद्धमत्रभवतो विषयाऽभावेन? यत्तं प्रमीयमाणमतिलङ्घ्य प्रमाणाऽभावो विषय उच्यते।

शङ्कते—प्रातिस्विकभेदाऽनुपलब्धेर्ज्ञेयाऽभावो न प्रमेयः। निराचष्टे—भवतु यद्यस्ति ज्ञानज्ञेयाऽभावयोर्विशेषः। न हि ज्ञानाऽभावोऽप्याजानतो भेदवान्। तद्भेदस्याऽपि प्रतियोगिभेदाऽधीननिरूपणत्वात्। तथा च चैत्रो नास्तीति प्रतीतिस्तदभावाऽवभासलक्षणकार्यसमधिगमनीया, न कुकविकृतिरिव क्लेशेन कथंचित्प्रमाणाऽभावविषयतया व्यख्यातुमुचिता। अथापि वैजात्यात् उच्यते, न च तत्त्वतो नास्तीति बुद्धिव्यवहारौ स्तः, किन्तु

१. शक्त्य मु० पा०। २. दृश्ये २ पु० पा०।

प्रमेयः। भवतु यद्यस्ति तद्विशेषो हेतुः। ज्ञानाऽभावे ज्ञानभ्रमो व्यवहाराऽभावे व्यवहारभ्रमः। आलोकाऽदर्शनेऽन्धकारभ्रमवत्।

न। सुषुप्त्याद्यवस्थासु प्रसङ्गात्। अप्रमिते च भ्रमाऽयोगात्सुषुप्त्यादिवत्।

चैत्रदर्शनाऽभावे चैत्रो नास्तीति ज्ञानं भ्रमः, चैत्रोचितव्यवहाराऽभावे व्यवहारभ्रमः।

अत्रैव निदर्शनमाह—आलोकाऽदर्शनेऽन्धकारभ्रमवत्। न किलाऽन्धकारो नाम तत्त्वतोऽस्ति, तत्प्रत्ययो वा। तथा हि तद् द्रव्यादीनामन्यतम[1]मेव भवेत्। तैरेव विश्वस्य सङ्ग्रहात्। तत्र द्रव्यत्वे तमःपृथिव्यादीनामन्यतममन्यद्वा? न तावदन्यतमम्। क्षितिसलिलात्मसु चतुर्दशगुणेषु, तेजसि चैकादशगुणे, मातरिश्वनि च नवगुणे, मनसि चाऽष्टगुणे, नभसि च षड्गुणे, दिक्कालयोश्च पञ्चगुणयोरविनाशिनोरनन्तर्भावात्। अन्तर्भावे वा तावद्गुणत्वप्रसङ्गान्नित्यत्वापत्तेश्च। नाऽपि द्रव्यान्तरम् निर्गुणस्य तत्त्वाऽनुपपत्तेः। नीलोत्पलपलाशश्यामलमुपलभ्यमानं महच्च तमो न निर्गुणम्। अतो द्रव्यान्तरमिति चेत्? न। कृष्णरूपस्य[2] गन्धाद्येकार्यसमवायिनस्तद्व्याप्तस्य तदभावेऽभावात्। तथा च निखिलगुणविरहिणो न द्रव्यत्वम्। गुणकर्मसामान्यभावोऽप्यनाश्रयस्य न सम्भवति। न च पृथिव्यादिद्रव्यमस्याश्रयः। तदाश्रयत्वे तद्गुणानां तत्सहचरितानामुपलब्धिप्रसङ्गात्। न चास्य तमस उपलब्धिरुपपद्यते। उपलम्भकाऽभावात्[3]। न चेन्द्रियाणामेतत्तमो लोचनं गोचरयति। तदभावे तदनुपलब्धिप्रसङ्गात्। अस्ति च निमिलितलोचनस्याऽपि तमः पश्यामीत्यभिमानः। घ्राणादीनां गोचरस्तम इति स्थवीयः। मनोऽपि चाऽऽन्तरगोचरनियतं बहिरसतीन्द्रियलिङ्गादौ दवीय एव। न च कारणाऽभावे कार्यमुत्पत्तुमर्हति। तस्याऽऽकस्मिकत्वेन कादाचित्कत्वाऽनुपपत्तेः। तस्मान्न तमो नाम किञ्चिदस्ति वस्तु। नापि तज्ज्ञानम्। अथ च तमस्तमालनीलमुपलभामह इत्यभिमानो लौकिकानामालोकाऽदर्शने। सोऽयं विप्लवः। एवमभावदर्शनं तद्व्यवहारश्च विप्लव एवेति भावः।

तदेतन्निराकरोति—न। सुषुप्त्याद्यवस्थासु प्रसङ्गात्। यदि हि ज्ञानव्यवहारयोरभावे तद्विभ्रमः, सुषुप्त्याद्यवस्थास्वपि तथा प्रसङ्गः। न हि तदा ज्ञानं, नाऽपि व्यवहारः। समस्तविज्ञानोपसंहृतिलक्षणात्वात्सुषुप्त्याद्यवस्थायाः। हेत्वन्तरमाह—अप्रमिते च भ्रान्त्ययोगात् सुषुप्त्यादिवत्।

---

१. अन्यतमदेव १ पु० पा०। एवमग्रेऽपि। २. रूपस्य तदभावे का० वि०।

३. उपलम्भसाधनाऽभावात् २ पु० पा०।

तमोदर्शनं तु भूच्छायादर्शनम् ।

प्रमितस्य हि भावस्य प्रमित एव भावे समारोपभ्रान्तिर्न पुनरसतो नापि ज्ञानाऽऽकारस्य, नाप्यग्रह इत्युपपादितं विभ्रमविवेके। अत्रापि सूचयिष्यति । न च ज्ञाव्नयवहाराभावौ क्वचिदुपलब्धपूर्वौ । तदुपलम्भे वा कृतमत्र भ्रमोपन्यासेन । तस्मादप्रमिते भ्रान्त्यनुपपत्तेरयुक्तमेतदित्यर्थः ।

दृष्टान्तस्तु साध्यविकल इत्याह—अत एव तमोदर्शनं तु भूच्छाया-दर्शनम् । अयमत्राऽभिसन्धिः । प्रमीयते तावत्तमस्तमालमालाश्यामम् । न चाऽप्रमितावेव प्रमितिविभ्रमसम्भवः । न चास्य बाधकमस्ति प्रमाणम् । न च तदभावे प्रमीयमाणमपह्नवमर्हति । अतिप्रसङ्गात् । न च तमसः प्रमाणाऽनुपलब्धेः प्रमा प्रथमानाप्यपह्नोतुमुचिता । रूपाद्युपलब्धेरपि तत्प्रसङ्गात् । न हि तत्प्रमाणमिन्द्रियाद्युपलभ्यते । रूपाद्युपलब्धिलिङ्गक-मनुमानमस्योपलब्धिरिति चेत् ? न । इहापि समानत्वात् । ननु चक्षुरादि-गोचरत्वमस्येत्युक्तम् । तर्हि वरमस्तु तमसि समस्तजनसाक्षात्काराऽऽस्पदे प्रमितिकार्यदर्शनात् प्रमाणान्तरमनुपलब्धपूर्वमपि, न पुनस्तस्याऽन्यतो-ऽनुपलम्भात् स्पष्टदृष्टकार्यविपर्ययो युज्यते । अस्तु वा चक्षुरेवाऽस्य कारणम् । न च निमीलिताक्षस्य पटलवतो वा तन्नास्ति, अपि तु पिहितम् । कथं तर्हि पिहितं[1] घटादाविव बाह्ये तमसि प्रवर्त्तेतेति चेत् ? मा प्रवर्त्तिष्ट । किन्नश्छिन्नम् ? परिच्छेत्स्यति हि तच्छायां पक्ष्मणोः पटलस्य वाऽत्यासन्नामपि पिधातृणी पटलपक्ष्मणी पिदधतीं तामेवेक्षते चक्षुः, न तु पटलपक्ष्मणी । आलोकाप्यायितं तत्पृथिव्यादिग्रहे प्रभवति, न तु तच्छा-यायां तद्विरोधिन्याम्, केवलस्यैव तत्र सामर्थ्यात् । कार्यदर्शनोन्नेयत्वात्तस्य सूक्ष्ममपि चेषीकतूलादि चक्षुराच्छादकमासन्नमनुभूयमानमतिमहदनवधि चकास्ति तथेयमपि । न चाऽन्धानामितरगात्राऽवयववद् गोलकाधिष्ठाने तत्कार्योपलम्भसम्भवः । तद्भावे वा वरमुपलम्भकान्तरकल्पनेत्युक्तम् ।

कतमत्पुनर्द्रव्यादीनां तमः ? ननु द्रव्यमेव, कालिमगुणशालित्वात् स्पन्दवत्त्वाच्च । तथा हि । कालिमैवाऽस्य रूपमुपलभ्यते । अप्तेजसोरिव श्वेतिमा । एवं संङ्ख्या ऽप्येकत्वादिका परिमाणम्, तच्चतुर्विधम् । पृथिव्या-द्यणूनामिव तमोऽणूनामप्यनुमानात् । पृथक्त्वसंयोगविभागपरत्वाऽपरत्व-संस्काराश्च पञ्चविधमपि कर्माऽध्यक्षमीक्षते । यथाहाऽत्रभवान्वार्तिककारः ।

---

१. कथमपि हितं २ पु० पा० ।

न नु नाऽभावमात्रस्य तमस्त्वं वृद्धसंमतम् ।
छायायाः कार्ष्ण्यमित्येवं पुराणे भूगुणश्रुतेः ॥
भूगुणस्य कार्ष्ण्यस्य च्छायायां द्रव्यान्तरश्रुतेरित्यर्थः ।
दूराऽऽसन्नप्रदीपादिदेहचेष्टाऽनुसारिणी ।
आसन्नदूरदीपादिमहदल्पचलाऽचला ।
देहानुवर्त्तिनी च्छाया न वस्तुत्वादिना भवेत् ॥ इति ।

न च पृथिव्यादीनामन्यतमम् । न तावत्कृष्णरूपस्य तमसस्तोयादिभावसम्भवः । तोयतेजसोः सितत्वादेवं पवनादीनां चाऽरूपत्वात् । न च परोपधानात् कालिन्दीसलिलस्येव तमसः कालिमेति साम्प्रतम् । अनुपहितस्य कदाचिदपि स्वाभाविकरूपान्तरशालिनोऽनुपलब्धेः, क्षेत्रसमुद्धृतस्येव कालिन्दीवारिणः स्वभावस्वच्छधवलस्य ।

नापि पार्थिवं तमः । तद्गुणानां गन्धादीनामभावात् । ननु तथैव गन्धादिव्याप्तं कृष्णमपि रूपं तन्निवृत्तावसदित्युक्तम् । तत्किं पवनेऽनुष्णशीतस्पर्शोऽसन्नेव ? गन्धादिव्याप्तस्य तस्य पृथिव्यामुपलब्धेः । पवने च तेषामभावात् । पाकजस्य स्पर्शस्य गन्धादिव्याप्तत्वम् । अयं त्वपाकजः स्पर्शो वायवीय इति चेन्न । इहापि साम्यात् । न हि तमसोऽपि कालिमा पाकजः । प्रत्यक्षं चोभयत्राऽपि समानम् । तमःपरमाणवश्च पार्थिवादिपरमाणव इव द्व्यणुकादिक्रमेण महान्तं तमोऽवयविनं पार्थिवमिवारम्भन्ते । तच्च रूपविशेषे सत्यनेकद्रव्यत्वान्महत्त्वाद्वा चाक्षुषमिति न तदुत्पत्त्यनवक्लृप्तिः । न च तस्य दिवाऽऽरम्भसम्भवः शाश्वतिकविरोधे सति तेजसि । न जातु स्पर्शवद्वेगवन्मुद्गरादिघाते परिपन्थिनि कुम्भारम्भाय भवन्ति मृदवयवाः बिभ्रति वा कुम्भमारब्धमिति । अत एव हि दिवापि निरस्ततेजसि गिरिगुहायामारभन्ते एव ।

स्यादेतत् । न तामसः परमाणवो ऽवयविनमारभन्ते । स्पर्शविरहादात्ममनो व्योम[1]वत् । न चाऽऽरम्भे रूपवत्त्वं प्रयोजकम् । अरूपाणामपि पवनपरमाणूनां स्पर्शवद्द्रव्यारम्भदर्शनादस्पर्शानां चाऽऽत्ममनसां तदभावात् । तत्किमत्र भवतां तमःपरमाणवः सन्ति न वा ? सन्ति चेत्कथन्तदवयविनामभावः ? तद्भावलक्षणत्वात् परमाणुभावस्य । असत्त्वे वा तमःपरमाणूनां कथं न हेतोराश्रयासिद्धिः ? हेतोरस्पर्शस्याऽसद्रूपत्वादसदाश्रयत्वमदोष इति चेन्न । तुच्छस्याऽहेतुत्वात्कल्पनारोपिततद्भावस्य च वस्तुनोऽसाधकत्वात्[2] ।

---

१. आत्ममनःस्तोम १ पु० पा० । २. वस्तुतत्त्वाऽसाधकत्वात् २ पु० पा० ।

न जातु समारोपितधूमभावा मिहिका[1] कृशानुसाधनं भवति । प्रामाणिकस्य त्वभावस्य भावाऽधिकरणमन्तरेणाऽयोगात् । तमःपरमाणुष्वसत्स्वाश्रयाऽसिद्धतया भवत्यसिद्धिः, न तु स्वतोऽप्रसिद्धस्य सत्यामपि परप्रसिद्धौ साधनाङ्गत्वम्, स्वयमप्रतीतस्य परप्रत्यायनाऽनर्हत्वात् । यथोक्तम् ।

योऽपि तावत्पराऽसिद्धः स्वयंसिद्धोऽभिधीयते ।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रियेति ।।

अपि चाऽस्पर्शस्य द्रव्याऽनारम्भकत्वेन न स्वाभाविकः संबन्धो मनसः शक्यो निश्चेतुं, वैय[2]र्थ्यस्योपाधेर्विद्यमानत्वात् । धर्माऽधर्मनिमित्तत्वाद्विश्वकार्यनिर्माणस्य । साक्षात्पारम्पर्येण च सर्वं कार्यजातं भोगसाधनं सत्तन्निर्माणं स्यात् । न च मनोऽवयविनः शरीरतया विषयतया वा भोगसाधनता सम्भवति । इन्द्रियाऽनधिष्ठानतया देहभावाऽभावात् । अपार्थिवस्य च तद्भावाऽनभ्युपगमात् । विषयभावस्त्वननुभूयमानतयाऽनुपपन्नः । इन्द्रियभावस्त्वणुत एव मनसः । तमसस्तु रूपवतो विषयभावेन भवति भोगसाधनत्वमिति न वैयर्थ्यम् । परममहतां पुनरसमवायिकारणसंयोगविरहादधिकपरिमाणकार्यद्रव्याऽनुपपत्तेश्च कारणसमानन्यूनपरिमाणकार्याऽदर्शनाच्चक्वाऽधिक्याऽयोगाच्च परममहत्त्वव्याघाताच्च न स्वसमवायिद्रव्यारम्भकत्वमिति सोऽयमुपाधिः । न चौपाधिकः सम्बन्धोऽनुमानाङ्गम् । मा भूदुपाध्यायदर्शनादसकृदवगतसहभावस्याऽनुमानं शिष्यस्य । न चाऽनन्यथासिद्धे नीलाऽन्धकाराऽनुभवे परिपन्थिनि स्फुरति प्रत्यक्षे बाधितविषयमनुमानमुदेतुमुत्सहते । मा भूदनुष्णत्वं तेजसो द्रव्यत्वात्पृथिव्यादिवदित्यनुमानम्, द्रव्यान्तरस्य च द्रव्यान्तराश्रयत्वं दृष्टम् । तद्यथा आकरजस्य तेजसः सुवर्णादेः पार्थिवद्रव्योपष्टम्भः, अन्यथा पतनादि न भवेद् गुरुत्वाऽभावात् । यथा चाऽभिजातमहानीलादिमणिसमाश्रयं तेजः न च तद्वदेतद् भ्रमणत[3]स्तेज इति साम्प्रतम् । तेजसस्तदाश्रयस्याऽन्ततः खद्योतादिगतस्यापि कयाचिन्मात्रया रूपप्रकाशनव्याप्तत्वात्तमसश्च तद्वैपरीत्यात् । तस्मात्तमो द्रव्यान्तरमपि पृथिव्याद्यनुविधास्यति, तेजसश्च विनङ्क्ष्यति । तदपगमे च पृथिव्यादिभ्यः पुनः प्रभविष्यति चतुष्कादपवरकप्रविष्टस्य कतिपयाऽऽलोकाऽवयवसम्भेदविरलेऽपि तमसि सान्द्रताऽवगमो भ्रमः । इन्द्रियोपहतेः कालपरिवासवशात् । उपहतिविगमे तु यथावत्पश्यत्यपवरकवर्तिनः पदार्थान्, अल्पां च तत्र च्छायाम् ।

---

१. धूममहिषी २ पु० पा० । २. दैर्घ्यस्यो मु० पा० ।
३. भ्रमणे २ पु० पा० ।

आलोकाऽभावदर्शनं चेत्यसमानम् ।

सा च सान्द्रा पिधत्ते पदार्थान्, न तेजसा विरलीकृता । न चाऽऽलोकाभावमात्रं तम इति साम्प्रतम्, तस्य नीलत्वाऽनुपपत्तेरस्मृताऽनवलोकिताऽलोकस्य च तमःप्रत्ययाऽनुपपत्तिप्रसङ्गात् । तथा च परिस्पन्दादयस्तद्वर्तिनो ऽवगम्यमानाः कथंचित् क्लेशेन न व्याख्यामर्हन्ति । तस्मात्प्रत्यक्षसिद्धमसति बाधके द्रव्यान्तरमेकादशं तमो नवगुणं[1] चेति सिद्धम् ।

नादृष्टौ दर्शनं छाया नवाऽभावोऽस्मृतौ गतेः ।
रूपादुपायसद्भावाद् द्रव्यं द्रव्यान्तराऽनुगम् ।।
इति सङ्ग्रहश्लोकः ।

अलं वा नैयायिकैर्विवादेन । आलोकाऽभाव एव तमः । तथाऽपि सिद्धत्येव नः समीहितमित्याह—आलोकाऽभावदर्शनं चेति । तस्मादसमानं दार्ष्टान्तिकेनेति । तद्यदि प्रमाणग्राह्यता प्रमाणसंबन्धः, यदि वा तदर्हता, उभय्यप्यसावभावे सदाऽस्तीति तस्यापि सत्त्वप्रसङ्गः । अथ स्वरूपवर्तमानता[2], न साऽभावेऽस्ति । न । अतुच्छत्वोपपादनात् । न चैवमपि प्रतिभावं[3] भेदवती सत्सदिति बुद्धिव्यपदेशयोरभिन्नाऽर्थावगाहिनोर्गोचरो भवितुमर्हति । अभेदे वाऽभिधानान्तरेण सामान्यमेव तत् । पूर्वाऽभिमर्शमन्तरेण सामान्यमप्रामाणकमिति चेत् ? न । विकल्पाऽसहत्वात् । कः खल्वयं पूर्वाऽभिमर्शोऽभिमत आयुष्मतः, यावदुपलब्धरूपपरामर्शः, आहोस्वित् कतिपयानामपि रूपाणाम् ? तत्र प्रथमस्य न क्वचिदपि सम्भवः । न खलूपलब्धचरशिलाभ्रकस्या[4]पि वर्षासु शरदि पुनः पश्यतस्तादृशः पूर्वाऽवमर्शोऽस्ति । तस्याऽपि तदभावादन्यत्वप्रसङ्गः । कतिपयपरामर्शोऽत्रापि समानः । अस्ति खलु कतिपयानां रूपाणामनुगमस्त्रसरेणुकरेण्वोर्विविधभेदसमवायेऽपि वा द्रव्यत्वादिना । तस्माद्यथा सद्बुद्धिव्यपदेशयोरनन्यथासिद्धेर्गुणवत्त्वस्य च प्रतिगुणवद्भेदेन तदुपपादनाऽसामर्थ्यात् एवं द्रव्यगुणकर्मसामान्यानामपि अत्यन्तभिन्नानामपि सदित्यभिन्नबुद्धिव्यपदेशभाजामनुस्यूतमस्ति तत्सत्त्वम् । यस्य च त्रैकाल्याऽसम्बन्धादत्यन्ताऽसन्तः शशविषाणादयः, यस्य चाऽयोगव्यवच्छेदादत्यन्तसन्तः परमाण्वाकाशादयः, यस्य चात्यन्ताऽयोगव्यच्छेदात्कदाचिदेव सन्तः पटादयः, यस्य च सम्बन्धाद् द्रव्यगुणकर्मसामान्यानि स्वाऽभावव्यवच्छेदेन स्वाऽनुभवाद् भासन्ते, सामा-

---

१. अवगुणं २ पु० पा० । २. वर्तमानार्हता १ पु० पा० ।
३. प्रतिव्यक्ति २ पु० पा० । ४. शिलाभेदस्य २ पु० पा० ।

अस्तु वा प्रमाणग्रा[1]ह्यता, वर्त्तमानता तु सत्त्वमुच्यते ।

अर्थाऽभावो नियोगस्य शाब्द्यां भूताद्यपाकृतौ ।
अनन्यगोचरत्वं न प्रमाणान्तरजन्मनि ।।

अशाब्दश्चेन्नियोगो नाभून्नास्ति न भविष्यतीति बोधयति न नियुक्तो न नियुज्यते न नियोक्ष्यते वा स्वर्गकाम इति वाक्यार्थः स्यादिति सुनिरूपितोऽधिकारः । अथ न शाब्दो भूतादिप्रतिक्षेपः किं तु तस्यौदासीन्यान्मानान्तरतस्तथाऽवसायः । न तर्ह्यनन्यगोचरः । मानान्तरेण तथात्वस्याऽवसायात् शब्दप्रमितस्य विशेषस्ततः । प्रत्यक्षस्येव गिरेरग्निमत्ता

न्यरूपभूयस्त्वाऽल्पीयस्त्वनिबन्धनश्च तत्र वैलक्षण्याऽवगतिभेदः । यथाऽऽहाचार्यः ।

सामान्यरूपभूयस्त्वे तस्मात्तत्त्वं प्रकाशते ।
विलक्षणत्वमल्पत्वे चकास्ति तदनुद्भवात् ।। इति ।

तदेतद् ब्रह्मसिद्धौ कृतश्रमाणां सुगममिति नेह प्रपञ्चितम् ।

अभ्युपेत्योच्यते । अस्तु वा प्रमाणग्राह्यता सत्त्वं, तथाऽपि वर्तमानता तु सा । कस्मात् ? अतीताऽनागतयोः प्रमाणग्राह्ययोरप्यसत्प्रतीतिव्यवहारास्पदत्वात् । वर्तमानतैव हि सत्त्वमुच्यते । तथा च वस्तुतः कालाऽनवच्छिन्नो नियोगः प्रमाणग्राह्योऽप्यसन्नेव सत्त्वे च न[2] मानान्तराऽगोचर इति सिद्धम् ।

अपि च—
अर्थाभावो नियोगस्य शाब्द्यां भूताद्यपाकृतौ ।
अनन्यगोचरत्वं न प्रमाणान्तरजन्मनि ।।

अपि चास्य त्रैकाल्याऽनवच्छेदः शब्देन वा प्रतिपाद्यते, मानान्तरेण वा ? यदि शब्देनाऽत्यन्ताऽसत्त्वम् । मानान्तरेण तु त्रैकाल्यव्यवच्छेदे मानान्तरगोचरत्वप्रसङ्गाद्विवक्षितार्थभावनमित्याह—अशाब्दश्चेन्नियोगो नाऽभून्नास्ति न भविष्यतीति बोधयति तथा सति न नियुक्तो न नियुज्यते न नियोक्ष्यते स्वर्गकाम इति वाक्यार्थः स्यादिति सुनिरूपितोऽधिकारः । अथ न शाब्दो भूतादिप्रतिषेधः, तस्य शब्दस्य तेषु भूतादिषु निषेध्येष्वौदासीन्यात्, किन्तु मानान्तरतस्तथाऽवसायः, त्रैकाल्यव्यवच्छेदेनाऽवसायः । न तर्ह्यनन्यगोचरः । कुतः ? मानान्तरेण तथात्वस्य त्रैकाल्यावच्छेदस्याऽवसायात् ।

---

१. ग्र मु० पा० । २. सत्त्वान्न मु० पा० ।

ऽनुमानात् । न । विशिष्टाऽपरिच्छेदे विशेषणस्याऽविषयत्वात् । अपि च अन्यतोऽपि तथात्वाऽधिगमेऽनियोग एव स्वर्गकामः । तस्यापि प्रमाणत्वात् । अतत्त्वे वा भूतादिविवेकाऽभिधानं प्रलापः । ननूपाधयो भूतादयः, न चोपाधिनिवृत्तावुपाधिमतो निवृत्तिरप्रतीतिर्वा । भवत्वन्योपाधिष्वेवमिह त्वेतल्लक्षणमेवाऽत्यन्ताऽसत्त्वम् । नित्याऽनित्यत्वोपाधिनिवृत्तौ च नोपाधिमत्सम्भवः । प्रत्यक्षं त्वापातजन्मकाले भेदोपाधिविविक्तरूपमात्रग्राहीति न ततो विषयभेदः । अवर्त्तमानस्याऽरूपत्वाद्वर्त्तमानविषयं तत् । सत्यं वस्तुतो

शङ्कते—शब्दप्रमितस्य नियोगस्य विशेषस्त्रैकाल्यविवेकस्ततो मानान्तरात् । न पुनर्मानान्तरं नियोगे प्रवर्तत इति । अत्रैव निदर्शनमाह—प्रत्यक्षस्येव गिरेरग्निमत्ताविशेषोऽनुमानात्, न तु तदग्निमत्तागोचरं गिरिमपि गोचरयितुमर्हति । निराकरोति—न । विशिष्टाऽपरिच्छेदे विशेषस्याऽविषयत्वात् । न ह्यस्ति सम्भवो यद्विशिष्टं पर्वतादि न परिच्छिद्यते, तद्विशेषश्चाऽग्निमत्त्वं गम्यत इति । न चाऽप्रत्यक्षीकृतपर्वतस्तद्विशेषमनुमातुमर्हतीति साम्प्रतम् । अनुमानसमये प्रत्यक्षज्ञानस्याऽतीतत्वेन गिरेरपरिच्छेदात्स्मृत्यनुपपत्तेश्च । तदा युगपद् ज्ञानोत्पत्तेरनुपपत्तेरन्तःकरणस्य प्रत्ययपर्याये सामर्थ्यात् । अन्यथा समानगोचरबुद्धिधाराऽऽनुपपत्तेः । सकृदेव यावत्कर्तव्यकरणात् । समर्थस्य क्षेपाऽयोगात् । प्रत्यक्षाऽनुमानयोश्च धर्मिधर्मरूपमात्रगोचरतया सहस्थितावपि विशिष्टत्वा[1]ऽनवभासनात् । अपि चास्याऽन्यतोऽपि तथात्वाऽधिगमेऽनियोग एव स्वर्गकामः । तस्याऽपि प्रमाणत्वात् । कालत्रयविरहात् । तत्त्वे वा[2] भूतादिविवेकाऽभिधानमप्रमाणिकं प्रलापः । चोदयति—ननूपाधयो विशेषणानि वस्तुतो भूतादयः कर्णस्येव कुण्डलादयः । न पुनः स्वभावः । ततः किम् ? इत्यत आह—न चोपाधिनिवृत्तौ सत्यामुपाधिमतोऽपि निवृत्तिरप्रतीतिर्वा । न खलु कुण्डलनिवृत्तौ कर्णो निवर्तते, न प्रतीयते वा । परिहरति—भवत्वन्योपाधिषु कुण्डलादिष्वेवम्, इह त्वेतल्लक्षणं त्रैकाल्यविवेकलक्षणमेवाऽत्यन्ताऽसत्त्वम् । न खलु शशविषाणादीनामत्यन्ताऽसत्त्वमन्यत् । अतस्त्रैकाल्यविवेकात् । न केवलमयमन्येऽपि सन्ति ते उपाधयो ये निवर्तमाना वस्तुसत्तां निवर्तयन्तीत्याह—नित्याऽनित्यत्वोपाधिनिवृत्तौ नोपाधिमत्सम्भवः । अपि च शब्दतस्त्रैकाल्याऽनवमर्शे प्रत्यक्षं त्वापातजन्मविशेषणविशेष्यभावाऽनवमर्शात् कालभेदोपाधिविविक्तरूपमात्रग्राहीति न ततः प्रत्यक्षाद्विषयभेदः शाब्दस्य ज्ञानस्य भवेत् ।

---

१. विशिष्टतत्त्व २ पु० पा० । २. अतत्त्वे २ पु० पा० ।

न प्रमितितः । वस्तुतो वर्तमानादिविवेके निरात्मकत्वमत्यन्ताऽप्रमितितो न विषयभेदात्प्रमाणान्तराऽनपेक्षत्वं शब्दस्य । सैषोभयतस्पाशा ।

ननु प्रतीयते यजेतेति कार्योऽर्थो, न स भविष्यन्मानाऽभावात् एकान्ताऽनवधारणात् । कार्य्यत्वादेव नेतरकालाऽनुपाती । न च नास्ति । प्रतीतेः । उक्तोत्तरमेतत् । सात्मकत्वे न वस्तुतः कालभेदः, प्रमितितश्चेन्न विषयभेद इति नैरात्यम् । कथं तर्हि प्रतीतिः ? अत एव प्रतिभामात्रं विकल्पमात्रं वा शाब्दज्ञानमिति विपश्चितः । प्रतिभानिबन्धनश्च व्यवहारः । प्रतिभाऽनुगृहीतानि च प्रमाणानि व्यवहाराऽङ्गमिति ।

शङ्कते—अवर्तमानस्याऽरूपत्वाद्वर्तमानविषयं तत् । निराचष्टे—सत्यं वस्तुतो न प्रमितितः । उक्तमर्थं सङ्क्षिपति—तत्र नियोगे वस्तुतो वर्तमानादिविवेके निरात्मकत्वमत्यन्ताऽप्रमितितो न विषयभेदात् प्रमाणान्तराऽनपेक्षत्वं शब्दस्य, सैषोभयतस्पाशा रज्जुः ।

चोदयति—ननु प्रमीयते यजेतेति कार्यो ऽर्थो न स भविष्यन्, भविष्यत्यर्थे प्रमाणाऽभावादेकान्ताऽनवधारणात्तत्त्वाऽनिश्चयात् । मा भूद् भविष्यन्, वर्तमानोऽतीतो वा स्यादित्यत आह—कार्यत्वादेव नेतरकालाऽनुपाती । गगनकुसुमायमानस्तर्हीत्यत आह—न च नास्ति । कुतः ? प्रतीतेः । न ह्येकान्ताऽसतः प्रतीतिविषयभावः सम्भवतीति । परिहरति—उक्तोत्तरमेतत् । उक्तप्रायमस्योत्तरम् । तद्दर्शयति—सात्मकत्वे न वस्तुतः कालभेदविवेकः प्रमितितश्चेन्न विषयभेदः, प्रत्यक्षाद् घटादिशब्दाच्चेति । तस्मान्मानान्तराऽगोचरत्वमिच्छतो नियोगस्य त्रैकाल्यसम्भेदविरहमन्तरेण तदनुपपत्तेर्नैरात्म्यमापतेत् ।

कथं तर्हि प्रतीतिरत्यन्ताऽसतः ? उत्तरम्—अत एवाऽसद्गोचरत्वादेव प्रतिभामात्रंविकल्पमात्रं वा शाब्दं ज्ञानमिति विपश्चितः । असत्प्रतोतिरेव प्रतिभेति वा विकल्प इति वा मतभेदेन व्यपदेशभेदवती । एतदुक्तं भवति, नाऽत्यन्ताऽसत्प्रतीतेरगोचरो ऽपि तु प्रमितेः । नन्वसद्विषया प्रतीतिः कथं व्यवहाराऽङ्गम् ? न खलु खद्योतं दहन इति मन्यमानस्तेन दहति पचति वेति । अत आह—प्रतिभानिबन्धनश्च व्यवहारः । नाऽस्त्ययं नियमः, असदर्थविज्ञानं न व्यवहाराङ्गमिति । संशयविपर्ययौ हि तथा । ताभ्यां व्यवहाराऽनुपलब्धेः । प्रतिभा पुनर्व्यवहारहेतुः । तद्भावाऽभावाऽनुविधानाद् द्रव्यव्यवहारभावाऽभावयोरित्यर्थः । यद्येवं न तर्हि व्यवहारसाधनत्वं प्रमाणानाम्, प्रतिभात एव तत्सिद्धेरित्यत आह—प्रतिभाऽनुगृहीतानि च प्रमाणानि व्यवहाराङ्गम् । एतच्चोपरिष्टात् स्पष्टयिष्यतीति । इतिः समाप्तौ ।

अपि च—

वेदार्थ इत्थमाशङ्का नियोगस्य न कार्यता ।
नियुक्तस्य प्रवृत्तिश्च न नियोगैकबन्धना ॥

यत् खलु न भूतं न वर्त्तमानं भावि न वेत्यनवधारितैकान्तं तदाशङ्काज्ञानगोचरो, यथा वर्षमनतिपतितमप्रवृत्तमतिनीलबहलजलदोदयदर्शनसामर्थ्येन प्रत्ययपथमनुपतद्व्यभिचारदर्शनादनिश्चीयमानैकान्तम् । इमां चाऽवस्थां वत वेदार्थः प्रज्ञाशालिभिरुपनीतोऽतिव्याख्यया ।

अपि च विषयः कार्य्यो न नियोगः । कार्यश्च वेदप्रमेयः इतरपदार्थानां तदन्वयित्वात् । तस्यैव कालविविको मानान्तराऽगोचरतयाऽनपेक्षत्वसिद्धये-

अपि च—

वेदार्थ इत्थमाशङ्का नियोगस्य न कार्यता ।
नियुक्तस्य प्रवृत्तिश्च न नियोगैकबन्धना ॥

यत्खलु न भूतं न वर्तमानं भावि न वेत्यनवधारितैकान्तं तदाशङ्काज्ञानगोचरः । तद्यथा वर्षमनतिपतितमभूतमप्रवर्तमानमतिनीलबहल जलदोदयाद्बहुलदर्शनसामर्थ्येन प्रत्ययपथमनुपतत्क्वचिद् व्यभिचारदर्शनादनिश्चीयमानैकान्तम् । ततः किम् ? इत्याह—इमां चाऽवस्थां वेदार्थः प्रज्ञाशालिभिरुपनीतो ऽतिव्याख्यया । निश्चयफलं हि प्रमाणम् । अयं च[1] स्वार्थे शङ्कामनिश्चयात्मिकां विदधानोऽप्रमाणं स्यादित्यर्थः ।

तदनेन वेदार्थ इत्थमाशङ्केति विवृतम् । नियोगस्य न कार्यतेति विवृणोति—अपि च विषयः कार्यो न नियोगः । आज्ञादिषु हि नियोगेषु स्वाम्यादिनियोक्तृकेषु विषयः कार्योऽवगम्यते नियोज्येन । च चाऽऽज्ञादयो नियोगा इत्यर्थः । ततः किम् ? इत्याह—कार्यश्च वेदप्रमेयो लोकाऽनुसारात् । ननु द्रव्यादयोऽपि तत्पदेभ्योऽवगम्यन्त इति कथं तस्यैव वेदप्रमेयता ? इत्यत आह—इतरपदार्थानां तदन्वयित्वात् । कार्यान्वयित्वात् । एतदुक्तं भवति । सर्वमेव पदजातं कार्यपरम्, तत्रैव व्युत्पत्तेः, तत्र किञ्चिदभिधायकतया, यथा लिङादि । किञ्चित्तु तदर्थस्वार्थाऽभिधायकतया यथा दध्नेत्यादि । भवत्वेवम्, प्रकृते तु किमायातम् ? इत्यत आह—तथा च तस्यैव कार्यस्यैव वेदार्थस्य कालविवेको मानान्तराऽगोचरतयाऽऽम्नायस्य साऽपेक्षत्वसिद्धयेऽभिधानीयो न तु नियोगस्य, तस्याऽकार्यत्वेन वेदार्थत्वाऽभावात् । न चासौ कालरहितः । तस्य कारकव्यापारविषयतया[2] त्रैकाल्यपरामर्शसम्भवादिति भावः ।

---

१. अयन्त्वाम्नायः २ पु० पा० । २. व्यापारतया २ पु० पा० ।

ऽभिधानीयः। ननु नियोग एव कार्य्यत्वप्रत्ययः। एवं हि व्यपदिशन्ति, आचार्य्यनियोगः कर्तव्यो राजशासनमनुष्ठेयमिति। नैतत्। नियोज्यस्य नियोक्तृत्वप्रसङ्गात्। नियोगस्य हि कर्ता नियोक्तेति। अपि च। यागे नियोगात्कर्तव्यता तस्य कुतः? न ह्येष तत्र नियुज्यते।

स्वरूपेणैव स कार्यः, न तत्राऽन्यापेक्षा विषयवत्। किं तु यजेतेति याजयेदित्यर्थः स्यात्। तथा च स्वर्गकामोऽन्यनियोगमात्रेण कृतशास्त्रार्थः स्यादिति साधु सुसंपादितमत्रभवता। नियोगार्थे च कार्ये स्वर्गयागयोः परस्पराऽसम्बन्धस्तदन्वयात्।

चोदयति—ननु नियोगे एव कार्यत्वप्रत्ययो लौकिकानाम्। कुतः? एवं हि व्यपदिशन्ति, आचार्यनियोगः कर्तव्यः, राजशासनमनुष्ठेयमिति। परिहरति—नैतत्। कुतः? नियोगश्चेन्नियोज्यस्य कार्यः, तथा च सति नियोज्यस्य नियोक्तृत्वप्रसङ्गात्। कस्मात्? नियोगस्य हि कर्ता नियोक्ता। यथा स्वाम्यादिराज्ञादेः। अपि च यागे विषये नियोगात्कर्तव्यता तस्य नियोगस्य। कुतः कर्तव्यता? यद्युच्येत, नियोगादिति, तत्राह—न ह्येष तत्र नियोगे नियुज्यते। नियोगान्तराऽभावात्। स्वात्मनि च विषयविषयिभावाऽनुपपत्तेः। भेदाऽधिष्ठानत्वात्तस्य।

शङ्कते—स्वरूपेणैव स नियोगः[1] कार्यः। न तत्राऽन्याऽपेक्षानियोगान्तरापेक्षा विषयवत्। यथा हि विषयो विषयिनियोगकर्तव्यताक्षेपात्कर्तव्यः, यथाह—"यत्तु तत्सिद्धयर्थमुपादीयते तद्विधेय"मिति तन्त्रे व्यवहार इति, नैवं नियोगस्य कर्तव्यता, स्वभावत एव तस्य तत्त्वादित्यर्थः। परिहरति—भवतु, किन्तु यजेतेति याजयेदित्यर्थः स्यात्।

अयमभिसन्धिः। न तावदपूर्वं भावार्थविषयं कार्यतया ऽवगम्यमानं स्वात्मनि नियोज्यं प्रेरयन्नियोगो लिङाद्यर्थ इत्युपपादितमधस्तात्। तथा चाऽऽज्ञादय एवाऽवशिष्यन्ते इति यजेतेति लिङा कार्यं नियोगमभिदधता यागविषयाऽऽज्ञादिरर्थः कर्तव्य इत्युक्तं स्यात्। तस्य चाऽपौरुषेये वेदे ऽपि सम्भवः। न चाऽऽज्ञादयो विषयाऽनुष्ठानमन्तरेणाऽज्ञापयित्रा कर्तुमशक्याः। न खलु राजा विष्टिं नियुञ्जानः शिबिकावहने वहति स्वयं शिबिकाम्। ततश्च स्वर्गकामो यागनियोगकरणमात्रेण कृतशास्त्रार्थः स्यादिति साधु सुकरं सम्पादितमत्रभवता।

अतश्च न नियोगः कार्य इत्याह—नियोगार्थे च कार्ये स्वर्गयागयोः परस्पराऽसम्बन्धः। कुतः? तदन्वयात्। कार्यरूपनियोगान्वयादुभयोः।

---

१. एष नियोगः २ पु० पा०।

एकनियोगसम्बन्धिनोररुणैकहायनीवन्नियमात् । सत्यम् । नाऽन्यकामो यागनियोगे । स्वर्गकामनियोगो न यागादन्यत्र । साध्यसाधनभावस्त्वयुक्तः ।

ननु न नियोगो विषयनियोज्यसम्बन्धमकुर्वन् कर्तव्यताऽवगमायाऽलम्, रूपाऽभावात् कंचित्क्वचिन्नियुङ्क्त इति हि नियोगस्य रूपमस्येदं कर्तव्यमिति । न च सम्बन्धो गुणप्रधानभावादृते सम्भवतीति नेष्टं परनिष्पत्तये इति स्वर्गस्याऽपरार्थत्वाद्यागस्य तादर्थ्यम् । इष्टसंयुक्ते तदर्थाऽन्वयप्रतीतेः । करोतु नियोज्यविषयसंबन्धं नियोगः, विषयनियोज्यविशेषणसङ्गतिस्तु कुतः ?

चोदयति—एकविनियोगसम्बन्धिनोः स्वर्गयागयोररुणैकहायनीवन्नियतः परस्परसम्बन्धः स्यात् । एतदुक्तं भवति । न विनियोगोपमर्दी नियोगः । तद्विषयतया तदविरोधेनाऽवस्थानात् । परिहरति सत्यम्, नाऽन्यकामो यागनियोगे । स्वर्गकामनियोगो न यागादन्यत्र । साध्यसाधनभावस्त्वयुक्तः । स्वर्गयागयोरेकनियोगसम्बन्धिनोरपि स्वर्गकामयागयोरेव सम्बन्धो ऽवगम्यते, न पुनः स्वर्गयागयोः । अनवगम्यमानश्च विनियोगो न नियोगविषय इत्यर्थः ।

चोदयति—ननु न नियोगो विषयनियोज्यसम्बन्धमकुर्वन् स्वयं कर्तव्यताऽवगमायाऽलम् । कुतः ? तदसम्बन्धे रूपाऽभावात् । नियोगत्वोपाधिक[1]-रूपं दर्शयति—कंचिन्नियोज्यं स्वर्गकामादि क्वचिद्विषये यागादौ नियुङ्क्ते इति हि नियोगरूपं विषयनियोज्याभ्यामस्य निरूप्यमाणत्वात् । ताभ्यां निरूप्यमाणत्वं दर्शयितुं स्वरूपमप्याह—कार्यताऽऽकारेणाऽप्युभयनिरूप्यत्वमस्येदं कर्तव्यमिति । न वा तया ऽपि नियोज्यद्वारा स्वर्गस्य यागसम्बन्धो गुणप्रधानभावादृते सम्भवतीति नेष्टं परनिष्पत्तय इति स्वर्गस्याऽपरार्थत्वाद्यागस्याऽनिष्ठत्वेन तादर्थ्यं स्वर्गार्थत्वम् । तस्मात्सिद्धः स्वर्गयागयोः साध्यसाधनसम्बन्धः । नन्वयं तादर्थ्ये सति, तदेव कुतः ? इत्यत आह—इष्टसंयुक्ते वाक्ये स्वयमनिष्टस्य तदिष्टार्थाऽन्वयप्रतीतेः । दूषयति—करोतु नियोज्यविषयसम्बन्धं नियोगः, विषयनियोज्यविशेषणसङ्गतिस्तु कुतः ? ययोरेकनियोगसम्बन्धस्तयोर्भवतु परस्पराऽन्वयनियमः स्वर्गकामयागयोः, स्वर्गयागयोस्तु किमायातम् ? न हि स्वर्गो याग इव नियोगेन सम्बद्धः, अपि तु नियोज्यविशेषणमित्यर्थः ।

---

१. नियोगत्वोपाधिमिति नास्ति २ पु० वा० ।

विशिष्टसम्बन्धाच्चेत् । जीवनादेरपिप्रसङ्गः । किमतः ? अङ्गत्वं वा निमित्तस्य प्राधान्यं वा । अङ्गत्वे ऽतिदेशप्रसङ्गो निमित्तस्य ।

प्राधान्ये काम्यनैमित्तिकाधिकारयोरविशेषः । उभयोः कार्यनिष्ठत्वान्न नैमित्तिकः प्रयोगनिष्ठः स्यात् । तथा चोभयत्र सर्वाङ्गोपसंहारो न वा । नियोज्यभेदसमर्प्पणेन कृतार्थस्य जीवनादेर्न विषयसम्बन्धः स्यात् । आर्थस्तु निमित्तनैमित्तिकभावः । तस्मिश्च सति तत्राऽधिकारात् स्वर्गकामो यजेतेत्यपि तर्ह्येवं स्यात् । न भविष्यति । साध्यस्यैव विशेषणत्वात् । काम्यत्वात् । तथापि न विषयसम्बन्धे प्रमाणम् । अन्यसाध्यस्यापि

चोदयति—विशिष्टसम्वन्धाच्चेत् । यद्यपि न साक्षात्स्वर्गो नियोगेन संबद्धः, तद्विशिष्टस्तु नियोज्यो नियोगसंवद्ध इति स्वर्गोऽपि तन्मुखेन नियोगसंवद्ध इत्येकनियोगसम्वन्धाद्यागेनापि संवध्यते । तथा च साध्य-साधनभावसिद्धिरनयोरित्यर्थः । दूषयति—जीवनादेरपि निमित्तस्य नियोज्य-सम्वन्धद्वारेण नियोगसम्वन्धे यागादिसम्वन्धप्रसङ्गः । चोदकः पृच्छति, किमतः ? उत्तरम्—अङ्गत्वं वा निमित्तस्य नियोगविषये यागादौ प्राधान्यं वा । तत्राऽङ्गत्वे विकृतौ समिदादिवदतिदेशप्रसङ्गो निमित्तस्य । प्राधान्यं तु यागं प्रति साध्यत्वलक्षणं जीवनादेर्निमित्तस्य सिद्धस्य न सम्भवत्येव ।

अभ्युपेत्योच्यते । प्राधान्ये काम्यनैमित्तिकाऽधिकारयोरविशेषः । कुतः ? उभयोः कार्यनिष्ठत्वात् । ततश्च न नैमित्तिकः प्रयोगनिष्ठः[1] स्यात् । मा भूत्, का नः पीडा ? इत्यत आह—तथा चोभयत्र काम्ये नैमित्तिके च सर्वाऽङ्गो-पसंहारो न वा ? चोदक आह—नियेज्यभेदसमर्पणेन कृतार्थस्यैव जीवनादेर्न विषयसम्वन्धः स्यात् । न ह्यस्य विषयसंवन्धमन्तरेण वैयर्थ्यम्, नियोज्याव-च्छेदकतयाऽर्थवत्त्वादित्यर्थः । यदि नियोज्यभेदसमर्पणेन चरितार्थं जीवनं न संवन्धान्तरमर्हति, हन्त भोर्निमित्तनैमित्तिकभावमपि न भजेतेत्यत आह—नियोज्यभेदसमर्पणपरस्यैव जीवनादेः । आर्थस्तु निमित्तनैमित्तिक-भावः । आर्थतां दर्शयति—तस्मिन् सति तत्राऽधिकारात् । दूषयति—स्वर्गकामो यजेतेत्यपि तर्ह्येवं स्यात् । नियोज्यविशेषणं कामो निमित्तत्वेन संवध्यते, न साध्यतयेत्यर्थः । चोदक आह—न भविष्यति कामस्य निमित्तभावः । सिद्धस्य निमित्तता भवति, कामस्य तु साध्यस्यैव नियोज्य-विशेषणत्वात् । साध्यतैवाऽस्य कुतः ?[2] इत्यत आह—काम्यत्वात् । यो हि यदिच्छति तत्तस्य साध्यम् । इच्छाप्रयत्नयोर्वैयधिकारण्याऽभावादिति भावः । दूषयति—तथा ऽपि न विषयसंबन्धे कामस्य प्रमाणमस्ति ।

---

१. नैमित्तिकं प्रयोगनिष्ठं २ पु० पा० । २. **प्रवृत्त्योः २ पु० पा० ।**

विशेषणत्वोपपत्तेः। इच्छामात्रदृष्टेश्च। ननु कामिनोऽधिकाराऽवगतिः कामोपायेऽवकल्पते, नान्यथा तत् नियोज्येन कृतं स्यात्। कामिना कृतं नियोज्येन कृतं स्यात्।

न तु कामः प्रवृत्तिहेतुः, अधिकारहेतुस्तु। अधिकारहेतुका च प्रवृत्तिरिष्यते न फलहेतुका, प्रागधिकारात्तदज्ञानात्।

ननु साध्यं साधनाऽपेक्षीति सन्निधानाद्विषयः साधनतयाऽनेन सम्भन्त्स्यत इत्यत आह—अन्यसाध्यस्याऽपि विशेषणत्वोपपत्तेः। अयमभिसन्धिः। समानपदोपादानतया नियोगेनैव स्वविषयो भावार्थः कारणतया स्वीकृतो नाऽन्यत्र तद्भावमनुभवितुमर्हति। साध्यद्वयसमवायस्यैकत्राऽसम्भवाद् वाक्यभेदप्रसङ्गात्। न च स्वर्गनियोगयोः साध्यत्वमन्यथा नोपपद्यते, येन साध्यविवृद्धिः कल्प्येत। अन्यसाध्यस्यापि स्वर्गस्य नियोज्याऽवच्छेदकतया नियोगसाध्यत्वप्रतिपत्तेरुपपत्तेरिति। अपि चाऽभ्युपेत्य साध्यत्वं कामस्येदमुदितम्, परमार्थतस्तु साध्यताऽपि न प्रतीयत इत्याह—इच्छामात्रदृष्टेश्च। प्रयत्नव्याप्यता हि साध्यता, न पुनरुद्देश्यतामात्रम्,[1] नाऽपि तदविनाभाविनी सा। न खलु कारणान्यवश्यं कार्यवन्ति व्यभिचारादिति भावः।

चोदयति—ननु कामिनोऽधिकाराऽवगतिर्नियोगाऽवगतिः, प्रधानं कार्यं प्रत्यात्मनस्तैरश्चीन्यविज्ञानमिति यावत्, कामोपाये स्वर्गाद्युपाये एव धात्वविषयिणः कार्यस्य नियोगस्य काम्योत्पादाऽनुकूलत्वे सत्यवकल्पते। यस्मान्नाऽन्यथा काम्यऽनुपायत्वे तत्कर्म्म-कामिना नियोज्यते साधनं कृतं स्यात्किन्तु पुरुषमात्रेण। फलानुकूलनियोगाऽवगमे हि विवृद्धे साध्ये एकस्मिन्नियोगफलरूपसाधनतयाऽवगम्य कर्म्म प्रयुज्येत। तदवश्यमेवंविधनियोगप्रतीतिसामर्थ्याद्भावार्थस्य कामोपायत्वमभ्युपेयमित्यर्थः।

उत्तरम्—कामिना कृतं नियोज्येन कृतं स्यात्। कामोपायस्तर्हि कर्मेत्यत आह—न तु कामः प्रवृत्तिहेतुः। यदि हि प्रवृत्तिहेतुः कामो भवेत्ततो नाऽनुपाये प्रवर्त्तते कामीति प्रवृत्तिविषयस्य तदुपायत्वं स्यात्, न त्वस्य प्रवृतिहेतुतेत्यर्थः। किमयमहेतुरेव कामः? तथा च व्यर्थमस्य श्रवणमित्यत आह—अधिकारहेतुस्तु। नियोगाऽवगमनहेतुस्तु नियोज्यावच्छेदकतया। कुतस्तर्हि प्रवृत्तिः? इत्यत आह—अधिकारहेतुका च प्रवृतिरिष्यते, न फलहेतुका। कुतः? प्रागधिकारात्तत्फलाऽज्ञानात्। नियोगाऽवगमस्य पुनः

---

१. न पुनरिष्टकर्मतामात्रं २ पु० पा०।

ननु कामिनोऽधिकारः। कामाऽनुपाये च न कामनिमित्तः। अधिकारो न निर्निमित्तो न वाऽन्यनिमित्तः। कामनिमित्तः। सत्यस्मिन्नधिक्रियमाणत्वात्।

नन्वनुपायेऽधिक्रियमाणस्य न फलार्थिता निमित्तम्। उपाये ह्युपेयार्थिता नियोगनिमित्तम्। सिद्धे तर्ह्युपायोपेयभावे नियोगः। न नियोगात्तत्सिद्धिः। सिद्ध एवाऽसौ नियोगात्प्रतीयते। न। सापेक्षत्वात्। तथा हि—यदि विशिष्टपुरुषनियोगः शब्दार्थः कथं स नियोगाद् गम्यते? अथ फलविशेषनिमित्तको नियोगः, नासौ प्रागसिद्धे तद्भावे इति प्राक्सिद्ध-

पुरस्ताच्चेत्फलमवगन्तव्यम्, कृतं फलाऽवगमेन, नियोगाऽवगमादेव प्रवृत्तिसिद्धेरित्यर्थः।

पुनश्चोदयति—ननु कामिनोऽधिकारः स्वर्गकामादिपदसम्बन्धादवगम्यते। तथा च कामो निमितमधिकारस्येत्यर्थः। भवतु, किं ततः? इत्याह—कामाऽनुपाये च न कामनिमित्तो नियोगः। नापि निर्निमित्त इत्याह—अधिकारः कार्यरूप इति। न निर्निमित्तः। स्वरूपहानिप्रसङ्गात्[1]। न वाऽन्यनिमित्तः। कामपदवैयर्थ्यादिति भावः। उत्तरम्—कामनिमित्तः। कुतः? सत्यस्मिन् कामेऽधिक्रियमाणत्वात्।

चोदकः स्वाभिप्रायं कथयति—नन्वनुपायेऽधिक्रियमाणस्य फलार्थिता न हि नियोगावगमस्य निमित्तम्। कुतः? उपाये ह्युपेयार्थिता नियोगाऽवगमनिमित्तम्। दूषयति—यद्युपेयार्थिताऽनुपाये नियोगाऽवगमननिमित्तम्, सिद्धे तर्ह्युपायोपेयभावे नियोगः। ओमिति ब्रुवन्तं प्रत्याह—न नियोगात्तत्सिद्धिः। ततश्च सेष्यते इति भावः। चोदक आह—सिद्ध एवासौ नियोगात्प्रतीयते। अयमर्थः। न तदवगमपुरःसरं नियोगविज्ञानमपि तु नियोज्यस्य स्वर्गकामस्य यागे नियोगाऽवगमोऽपर्यवस्यन् स्वर्गयागयोः साध्यसाधनभावमाक्षिपति। तेन सिद्ध एवोपायोपेयभावः। कारणान्तरान्नियोगेन ज्ञाप्यत इति। तद् दूषयति—न। सापेक्षत्वप्रसङ्गात्। तद् दर्शयति—तथा हि। यदि विशिष्टपुरुषनियोगः शब्दार्थः। यो हि पुरुषः स्वर्ग उपायेन मे[2] साध्य इत्यवगच्छति तदीयो नियोगः शब्दार्थः। तर्हि नियोगात्प्रागयं विशेषः पुरुषस्याऽवगन्तव्य इति कथं स विशेषो नियोगाद् गम्यते? अथ फलविशेषनिमित्तको नियोगः, यागसाध्यता स्वर्गस्य विशेषः, तन्निमित्तको नियोगः शब्दार्थः। निराकरोति—नासौ प्रागसिद्धेऽनवगते तद्भावे याग-

---

१. **स्वरूपव्याहतेरतिप्रसङ्गात् २ पु० पा०।**

२. **स्वर्गोपायो मे २ पु० पा०।**

तद्भावाऽपेक्षः शब्देनोच्यत इति प्रमाणान्तराऽपेक्षत्वप्रसङ्गः ।

उपेयस्यैव चाऽधिकारनिमित्तत्वे जीवनादिष्वधिकाराऽभावः ।

निमित्तत्वप्रतीतिहेतुशब्दाऽभावाच्चाऽयुक्तमेवैतत् । नियोज्यविशेषणमेव तु तस्मिन्सति नियोगादर्थान्निमित्तमुच्यते । यदि च स्वर्गकामादयो

साध्यत्वे फलस्य भवितुमर्हतीति मानान्तरेण प्राक्सिद्धतद्भावाऽपेक्षः शब्देनोच्यत इति प्रमाणान्तराऽपेक्षत्वप्रसङ्गः ।

इदमत्राऽऽकूतम् । न तावत्साध्यस्वर्गाऽविशिष्टस्य यागविषयकार्याऽवगतिर्यागस्य साध्यं स्वर्गं प्रति साधनतामाक्षेप्तुमर्हति, नियोगप्राधान्यविरोधेन प्रत्युत प्रतिक्षेपार्हत्वात् । प्रधानभूतनियोगसिद्ध्यनुकूलनियोज्यसिद्ध्यर्थमनुप्रवेशात् । चिकीर्षितस्याऽपि फलस्य साध्यता न नियोगरूपकार्यप्राधान्यविरोधिनी, तदधीनप्रतीतित्वात्, किन्तु नियोगकार्ये प्राधान्याऽनुकूलतया तादर्थ्येनैवाऽवतिष्ठते । गर्भदासोपकारवत्, इति चेन्न । चिकीर्षिताऽचिकीर्षितसमवाये चिकीर्षितार्थेन चेतनव्यापारेण तदितरस्य तादर्थ्येन व्यापारात् । अप्राधान्यापादनेन तदनुकूलताऽनुपपत्तेः । तादर्थ्येन निवेशात्तदानुकूल्यमिति चेन्न । स्वभावविरोधेन तदनुपपत्तेः । न हि जातु सन्तापद्रूनस्योपकर्तुमुपनिधीयमानो दहनस्तदनुकूलतामाचरति । न चाऽसुखमसुखसाधनं वाऽपूर्वं चिकीर्षागोचर इत्यावेदितम् ।

यत्तु गर्भदासवदित्युक्तम्, तदयुक्तम् । द्वौ हि तत्र प्रयत्नौ चेतनद्वयसमवायिनौ । तत्र स्वामिनः प्रयत्नः स्वार्थमुद्दिश्य गर्भदासोपकाराय प्रवर्त्तते । गर्भदासोऽपि च स्वयोगक्षेमसमवहितस्वान्तवृत्तिरेव प्रवर्त्तते स्वाम्यर्थे । गर्भदासस्थानीयश्चायं नियोज्यः कामी नियोगं कृत्या व्याप्नुयात् । तथा च कामोद्देशेनाऽस्य कृतिः प्रवृत्ता गर्भदासस्येव स्वार्थोद्देशेन स्वाम्यर्थमिव नियोगं व्याप्नुयात्, न पुनः प्राधान्येन । न च स्वामीव चेतनान्तरमत्राऽस्ति, यत्कृतिं प्रति प्राधान्यं नियोगस्य भवेत् । तस्मात्कामो[1]पायता भावार्थस्य न नियोगाऽऽक्षेपलभ्येति साम्प्रतम् ।

यदि मन्येत, नियोगनिमित्तत्वमनुपेयस्य कामस्य न सम्भवतीति यागं प्रत्युपेय एवेत्यत्राह—उपेयस्यैव चाऽधिकारनिमित्तत्वे जीवनादिष्वधिकाराऽभावप्रसङ्गः । अपि चाऽधिकारनिमित्ततां कामस्याऽभ्युपेत्येदमुक्तम् । परमार्थतस्तु निमित्तत्वप्रतिपत्तिहेतुलिङादिशब्दाऽभावादयुक्तमेवैतन्निमित्तत्वं कामस्य ।

चोदयति—मा भून्निमित्तप्रतिपत्तिहेतुः शब्दो नियोज्यविशेषणमेव ।

---

१. काम्य २ पु० पा० ।

निमित्तपरा न तर्हि नियोज्यपरा: । तत्राऽधिकाराऽप्रतीतेः प्रयोगाऽभावः । अथाऽर्थादधिकारसिद्धिः ? मुधा कर्तृविशेषणपक्षनिरासः ।

यथैव हि कामितयाऽधिकारोऽवगम्यमान उपायभूते धात्वर्थे तथा कामितया कर्तृत्वं नाऽनुपायो यस्य च कामोपायस्तस्येदं कर्मेति अर्थात् कर्तृनियमविधेरधिकारसिद्धिः । अधिकारविधेरिव कर्तृनियमसिद्धिः ।

तस्मिंश्च सति नियोगादर्थान्निमित्त[1]मित्युच्यते । परिहरति—यदि च स्वर्गकामादयो निमित्तपराः, न तर्हि नियोज्यपराः । च त्वर्थः पूर्वपक्षं व्यावर्त्तयति । उभयपरत्वे वाक्यभेदप्रसङ्गात् । तत्र निमित्तपरत्वेऽधिकाराऽप्रतीतेः प्रयोगाऽभावः । अथ निमित्तपरादपि शब्दादापेक्षितत्वादर्थान्निमित्तवतोऽधिकारसिद्धिः प्रतीतिः, अन्यथाऽनुष्ठानाऽभावेन कार्यस्य तत्त्वव्याघातादिति । निराकरोति—अधिकारस्य सिद्धयर्थं तर्हि मुधा कर्तृविशेषणपक्षनिरासः । न तावत् कर्तृविशेषणपक्षे कर्त्तेव क्रियाङ्गतयाऽवश्यं तद्विशेषणमुपादातव्यम्, येन समुद्रमनोध्यानवत् फलेप्सा[2] उपादानस्य सर्वान् प्रत्यविशेषात् कर्तृविशेषो न लभ्येत, अपि तु यथा राजत्वजातिः शुचित्वादिवत्प्रयत्नाऽनिर्वर्त्त्यतयाऽनुपादेया[3] कर्त्तारमवच्छिनत्ति । "राजा राजसूयेन स्वाराज्यकामो यजेते"-ति । यस्य चाऽसावनुपादेयापि राजत्वजातिरस्ति, तस्याऽर्थादधिकारो, न तु ब्राह्मणवैश्ययोः, न जातिविरहिणोः । एवं फले निसर्गसुन्दरतया स्वभावादिच्छाकर्मणीच्छा पुरुषस्याऽनुपादेयाऽपि सम्भवतीति तया समुदाचरन्त्या प्रसुप्ततनुविच्छिन्नेच्छेभ्यो व्यवच्छेत्तुं कर्त्ता चेतनान्तरेभ्यः शक्यत इति न व्यवच्छेद्याऽभावः । न च चरमया क्रियया कर्तृसङ्ख्यया वाऽऽख्यातपदगोचरेण कर्त्तुरेव प्रथममुपस्थापितत्वात् कार्येण प्रथममपेक्षितत्वेऽपि चाऽधिकारिणः साङ्गप्रयोगज्ञानाऽधीननिरूपणत्वाद् न द्रागित्येव प्रतीतिरित्यपेक्षायामपि न प्रथममभिसंवन्ध इत्युपरिष्टान्निवेदयिष्यते ।

एवमपि कुतः सिद्धिरधिकारिण ? इत्यत आह—यथैव भवन्मते कामितयाऽधिकारोऽवगम्यमान उपाय[4]भूते धात्वर्थे, तथाऽस्माकमपि तथा कर्त्तृत्वं नाऽनुपाये । यो हि यदिच्छति स तत्करोतीति न्यायस्याऽत्रापि सम्भवात् । नन्वेवमपि कुतोऽधिकारविशेषप्रतिलम्भ ? इत्यत आह—यस्य च कामोपायस्तस्येदं कर्मेत्यर्थात् कर्तृनियमविधेरधिकारसिद्धिरस्माकम्,

---

१. तन्निमित्तः २ पु० पा० । २. फलेच्छा २ पु० पा० ।
३. जातिरनुपादेयापि २ पु० पा० । ४. उपायभूतः २ पु० पा० ।

इष्टसंयुक्ते च वाक्ये इष्टार्थेऽन्वयो न नियोगार्थेऽन्वयः। उभयार्थेऽन्वये वाक्यभेदात्।

ननु न विनियोगोपमर्दी नियोगः। विरोधाऽभावात्। यथाविनियोगं तत्प्रत्ययात्। तत्र परस्पराऽन्विताः पदार्था नियोगविषयतामापद्यन्ते। न चाऽन्वयो गुणप्रधानभावमन्तरेण। तत्रेष्टत्वात्स्वर्गः प्रधानं कर्म गुणत इति कर्मोपसर्जने स्वर्गकामः पुरुषो नियुज्यते इति न नियोगप्रधानता हास्यते। कर्मफलसम्बन्धश्चोपपत्स्यते।

न च कामे स्वतः प्रवृत्तो नियोज्यपुरुषः। उपायरहितेऽर्थिनोऽप्य-प्रवृत्तेः। न च प्राङ्नियोगादुपायोपेयज्ञानम्। न खलु विनियोगनिबन्धना

भवतामधिकारविधेरिव कर्तृनियमसिद्धिः। दूषणान्तरमाह—इष्टसंयुक्ते च वाक्ये इष्टार्थेऽन्वयो, न नियोगार्थे[1]ऽन्वयः। अथोभयार्थः कस्मान्न भवती? त्यत आह—उभयार्थेऽन्वये वाक्यभेदात्। गर्भदासन्यायश्च न सम्भवतीत्युक्तमधस्तात्।

सम्प्रति जरत्प्राभाकरमतमुपन्यस्यति—ननु न विनियोगोपमर्द्दी नियोगः कुतः? विरोधाऽभावात्। तमेवाह—यथाविनियोगं तत्प्रत्ययात्। तत्र परस्पराऽन्विताः पदार्था नियोगविषयतामापद्यन्ते। न चाऽन्वयो गुणप्रधानभावमन्तरेण, तत्रेष्टत्वात् स्वर्गः प्रधानम्, कर्म गुणतः, गुणः। सार्वविभक्तिकस्तसिः इति कर्मोपसर्जनं यस्याऽस्मिन्स्वर्गे यागसाध्ये स्वर्गकामः पुरुषो नियुज्यत इति न नियोगप्रधानता तस्य हास्यते, कर्म्मफलसम्बन्धश्चो-पपत्स्यते। सुगमम्।

ननु यागोपसर्जने कामे न पुरुषो नियोज्यः। इच्छात एवास्य प्रवृत्तत्वात्। अप्रवृत्तप्रवर्त्तनाव्याप्यस्य च तद्भावादित्यत आह—न च कामे स्वतः प्रवृत्तौ न नियोज्यः पुरुषः। कुतः? उपायरहितेऽर्थिनोऽप्यप्रवृत्तेः। सत्यामपि कामनायां प्रवृत्तिरशक्या। कामयन्त एव हि सर्वज्ञतां पुमांसो न पुनरियमनुपाया शक्यप्राप्तिरिति नास्यां प्रवर्त्तन्ते। एवमुपायज्ञानस्य पुरस्तात् काम्या अपि स्वर्गादयो न प्रवृत्तिगोचरा इति नियोगस्तदुपायम-वगमयंस्तत्र प्रवर्तयति तदर्थिनमित्यर्थः। न च प्राङ्नियोगादुपायोपेयज्ञानम्, तस्मादेव तदवगतेरित्यर्थः।

---

१. **इष्टार्थोऽन्वयो न नियोगार्थः** २ पु० पा०।

स्वर्गयागसंगतिरिष्यते। तार्तीयी सा, नैयोगिकी त्वेषा। भावार्थश्च नियोगविषय इति प्रत्युद्धृतमेव स्यात्। निरधिकारता च स्यात्। विषयस्यानधिकारहेतुत्वात्। विश्वजिदादौ तदकल्पनप्राप्तेः। विधेयत्वलक्षणत्वयोर्विरोधात् प्राप्त्यप्राप्तिभ्याम्। कर्तृतया चाऽन्वयात्प्राङ्नियोगान्नियोज्यत्वाऽभावात्। अवश्यकर्तव्यताप्रसङ्गश्च। कामस्याऽतन्त्रत्वात्। तन्त्रत्वेऽपीच्छाऽप्यवश्य-

तदेतत्स्वतन्त्रसिद्धान्ताऽविरोधेन दूषयति—न खलु विनियोगनिवन्धना स्वर्गयागसङ्गतिरुपायोपेयलक्षणेष्यते भवद्भिः। कुतः? तार्तीयी हि सा विनियोगनिवन्धना सङ्गतिर्नैयोगिकी त्वेषा वादर्यधिकरणस्य तृतीयेऽध्याये साक्षात्सङ्गतिमनिच्छतष्टीकाकारस्य संमतेति राद्धान्तव्याकोपः। अपि च सोपायफलविषयं नियोगमभ्युपगच्छत इदमपरमनिष्टमापद्यत-इत्याह—भावार्थश्च केवलो नियोगविषय इति प्रत्युद्धृतमेव स्यात्। अपि च यदा फलं नियोगविषयस्तदा निरधिकारता च स्यात्। कुतः? विषयस्याऽनधिकारहेतुत्वात्। अथाऽधिकारहेतुरेव विषयः कस्मान्न भवती? त्यत आह—विश्वजिदादौ तदकल्पनप्राप्तेः। विषयस्याऽधिकारहेतोर्विद्यमानत्वात्।

ननु प्रयोजनमेतत्, प्रमाणं तु वक्तव्यम्, तदिदमुच्यते—विधेयत्वलक्षणत्वयोर्विरोधात्। नियोगविषयः खलु विधेयः, अधिकारहेतुश्च लक्षणम्, तेन हि लक्षितः पुरुषस्तदलक्षितेभ्यो[1] व्यवच्छिन्नोऽधिकारभागी चेति। अथैतयोरेव कुतो विरोधः? इत्यत आह—प्राप्त्यप्राप्तिभ्यां लक्षणस्य प्राप्तत्वात्प्रसिद्धत्वात्। अप्रसिद्धस्य तदनुपपत्तेः। अप्राप्तस्य च विधेयत्वेन विधिविषयत्वात्प्राप्तौ तदनुपपत्तेरित्यर्थः। अपि च विनियोगविषयश्चेन्नियोगः, तथा सति तद्विषयान्नियोगनिरूपणात्प्राग्विनियोगो निरूपणीयो तथा भावार्थः। नो खल्वनवगत एव भावार्थो नियोगनिरूपणाय प्रभवति। यथा च यागस्वर्गकामसम्बन्धलक्षणो विनियोगो नियोगात्प्राङ्निरूपितो विषय इति स निरूपणीयः। नियोगाऽवगमाच्च प्राक् स्वर्गकामः क्रियया संबध्यमानः कर्तृतयैव संबध्यते, पश्चात्तु नियोगप्रतीतौ नियोज्यायेति कर्तुरधिकारात् पुनरपि राद्धान्तव्याकोप एवेत्याह—कर्तृतया चाऽन्वया[2]त्प्राङ्नियोगान्नियोज्यत्वाऽभावात्। इदं चाऽपरमनिष्टमापद्यत इत्याह—यागावच्छिन्नविषयककर्तव्यताऽवगतेः। कर्तव्यतया च स्वविरुद्धस्वभावव्यवच्छेदादवश्यकर्त्तव्यताप्रसङ्गश्च सोपायस्य स्वर्गादेः।

---

१. तदलक्षणेभ्यः २ पु० पा०।

२. कर्तृभावाऽन्वयात् २ पु० पा०।

कार्या स्यात्। तस्मात्परस्परमनन्वितयोर्नियोगाऽन्वयः। तदन्वये परस्परं वाक्यभेदात्। एकनियोगसम्बन्धादपि साध्यसाधनभावः प्रत्युक्तः।

ननु नियोगादस्येदमुपकारकमित्यवगम्यते, कथं तस्य कर्म स्यात्? क इवाऽस्योपकारोऽन्यत्र काम्यात्? उपकारान्तरेऽर्थिपदमनर्थकं स्यात्। उपकार्योपकारकत्वे तर्हि नियोगार्थः। किमतः? उपदेशकत्वं हीयते। स्थितवस्त्वनुवादात् सापेक्षत्वं च। तस्मादस्येदं कर्तव्यमिति नियोगार्थो-

नन्वयं कामोपहितमर्यादः स्वर्गादिः, कामश्च नाऽवश्यंभावीति कथमवश्यकर्त्तव्यते?त्यत आह—कामस्याऽतन्त्रत्वात्। नियोगादवश्यकर्त्तव्यता, तया च स्वविरुद्धस्वाऽभावव्यवच्छेदादवश्यकर्तव्यता फलस्य प्रतीयमाना न कामयना संवन्धमर्हति नित्याऽनित्यसंयोगविरोधादिति प्रधाननियोगाऽनुरोधेनाऽतन्त्रता कामनायाः सम्भवतु, न प्रमादपाठ इत्यर्थः। अथ तु तन्त्रताऽऽस्थेया? तत्राह—तन्त्रत्वेऽपीच्छाऽप्यवश्यकार्या स्यात्। तद्विषयत्वान्नियोगस्य फलादिवत्। उपसंहरति—तस्मात्परस्परमनन्वितयोर्यागस्वर्गकामयोर्नियोगाऽन्वयः। तदन्वये च न परस्परं तन्त्रम्, फलस्याऽपि साध्यतया द्वयोर्वाक्यभेदात्। एकनियोगसंबन्धादपि साध्यसाधनभावः प्रत्युक्तः। गर्भदासन्यायस्यात्राऽसम्भवा[1]दिति भावः।

ननु मा नाम भून्नियोज्यविशेषणतया साध्यत्वेन स्वर्गस्य यागसङ्गतिः, अधिकारप्रतीतिसामर्थ्यात्तु कर्मणि स्वर्गसाधनत्वमस्य सङ्गंस्यत इति चोदयति—ननु नियोगाल्लिङादेरस्य पुरुषस्येदमुपकारकं कर्मेति सिद्धमवगम्यते, गम्यताम्, किमेतावता? इत्याह—कथं च तस्याऽधिकारिणः कर्म स्याद्, यदि नोपकारकं कर्म। कर्मजनितमुपकारं भजमानो हि चेतनः कर्मणि स्वामितां प्रतिपद्यते नाऽन्यथेत्यर्थः। तथाऽपि स्वर्गलक्षणस्योपकारस्य किमायातमि? त्यत आह—क इवाऽस्योपकारोऽन्यत्र काम्यादुपकारात्।

ननु जगति किमयमेवोपकार? इत्यत आह—उपकारान्तरे कल्प्यमानेऽर्थिपदमविवक्षितार्थं स्यात्। तथा च श्रुतहानिरश्रुतकल्पना चेति दोषद्वयमापतितमित्यर्थः। दूषयति—यदि लिङादेरस्य पुरुषस्येदमुपकारकं कर्मेति सिद्धमवगम्यते, उपकार्योपकारकत्वे तर्हि नियोगार्थो लिङर्थः। चोदकः पृच्छति—किमतः? उत्तरम्—उपदेशकत्वं प्रसिद्धं हीयते। कुतः? स्थितवस्त्वनुवादात्। ततः सापेक्षत्वं चाऽप्रामाण्यनिमित्तं मूर्द्धाभिषिक्तं प्रसज्येत। उपसंहरति—तस्मादस्येदं कर्त्तव्यमिति नियोगार्थो, न पुनरस्ये-

---

१. असम्भवः २ पु० पा०।

ऽनुष्ठानप्रतीतेः, अव्यभिचाराच्च । नैमित्तिकनिषेधाऽधिकारयोरुपकाराऽनाश्रयणात् । न च नियोज्यार्थ एव कर्मणि नियोगः । अत एव लौकिके चाऽध्येषणादावभावात् । ननु विशेषणं स्वर्गो नोपलक्षणम् । भवतु नियोगेऽस्याऽन्वयः । न तु नियोग एव यागसम्बन्धं विदधाति । तथा नाम ईदृशः पुरुषो नियुज्यत इति । 'यस्याऽग्निर्गृहान्दहेदि'ति यथा । नन्विष्टसिद्ध्युपाधौ

दमुपकारकमिति । कुतः ? अनुष्ठानप्रतीतेः, प्रसिद्धोपदेशभावाऽविरोधात् अव्यभिचाराच्च । उपकार्योपकारकयोस्तु नियोगार्थत्वे व्यभिचारः स्यात् । कुतः ? नैमित्तिकनिषेधाऽधिकारयोरुपकाराऽनाश्रयणात् । न चाऽपूर्वोत्पत्तिरुपकारः । तस्याऽसुखस्य हिताऽहितप्राप्तिपरिहाराऽसाधनस्याऽनुकूलवेदनीयताऽभावेनोपकारभावाऽभावादिति भावः ।

ननु 'ज्वरितः पथ्यमश्नीया'दित्यादौ नियोज्यार्थे कर्मणि नियोगो लोके दृश्यते, तदुपायत्वाच्च वेदेऽपि नियोगविषयस्य कर्मणो नियोज्यार्थकर्मतोचितेत्यत आह—न च नियोज्यार्थ एव कर्म्मणि नियोगः । कस्मात् ? अत एव नैमित्तिकनिषेधाऽधिकारयोर्व्यभिचारत एव । ननु लोके प्रतीतिसामर्थ्यान्नैमित्तिकनिषेधाधिकारयोरुपकारं कल्पयिष्याम इत्यत आह—लोके चाऽध्येषणादावभावान्नियोज्यार्थताया: कर्म्मणः । पुनरपि स्वर्गे साध्यतायामुपलक्षणवैलक्षण्येन नियोज्यविशेषणतां प्रमाणयति—ननु विशेषणं स्वर्गो नोपलक्षणम्, येनात्मानं न कार्ये निवेशयेदिति चेत् । कथ[2] न साध्यतयाऽन्वियात् ? अथ नेति चेत् ? कथमस्य न यागः साधन ? मित्यतः परस्परसङ्गतिः स्वर्गयागयोरित्यर्थः । परिहरति भवतु नियोगे स्वर्गाऽन्वयो, यथाऽऽरुण्यस्य, यागस्य तु कथं ? ननु नियोग एव स्वर्गसम्बन्धः स्वर्गस्य स्वविषयेण योगेन सम्बन्धं विदधाति । तथा च स्वर्गयागयोः सम्बन्धः[3] साध्यसाधनभाव इति । परिहरति—तथा च स्वर्गकामयागयोः सम्बन्धो नाम नियोगात् न तु स्वर्गयागयोः । न ह्येतावता नियोगसङ्गतिस्तयोर्न कल्प्यत इति तत्स्वरूपं दर्शयति—ईदृशः स्वर्गकामः पुरुषोऽस्मिन्यागे नियुज्यत इति । ईदृशत्वे दृष्टान्तमाह—यस्याऽग्निर्गृहान् दहेत् स यजेतेति । यथा आहिताग्नेर्गृहदाहवत इष्टौ नियोगो नेष्टेर्गृहदाहं प्रति साधनतामवगमयति, तथा स्वर्गकामस्याऽपि यागनियोगो न यागस्य तद्विशेषणं प्रति साधनभावमवगमयितुमर्हतीत्यर्थः ।

---

१. कश्चाऽस्योपकारः २ पु० पा० । २. निवेशयतीति चेत् कथं २ पु० पा० ।
३. सिद्धः २ पु० पा० ।

भावार्थे नियोगात्फलसिद्धिः स्यात् ? स्याद्यदीदृशो भावार्थः। न त्वयमेवेत्युक्तं भावनाविवेके।

नैमित्तिके च फलप्रसङ्गः। यथा चाऽस्मिन्दर्शने न कर्मफलसंबन्धस्तथोक्तं भावनाविवेके। 'अतः स्वर्गयागयोरसम्बन्धान्न पुरुषार्थसाधनज्ञानम्। पुरुषार्थसाधनं च जिज्ञासन्ते प्रेक्षावन्तः। लोकाच्च शब्दार्थाऽवगमान्न

चोदयति—नन्विष्टसिद्ध्युपाधौ भावार्थे नियोगात्फलसिद्धिः स्यात्। इदमभिसंहितम्। यद्यपि धातुः कर्म्मरूपमात्रं गोचरयति, पाकच्छेदादिपदेभ्यस्तन्मात्राऽवगमात्। आख्यातोपसंधानात्तु तदर्थः पूर्वाऽपरीभूतप्रचयरूपः प्रतीयते। न चैकमुपसङ्ग्राहकमन्तरेण तद्भाव इति फलमस्योपसंग्राहकम्। तदिदमाख्यातमाप्रारम्भादाफलोत्पत्तेः पूर्वाऽपरीभूतं समानजातीयक्रियासन्तानं वा समानजातीयक्रियासमुदायं वाऽन्योत्पादाऽनुकूलतया भावात्मानमवच्छिनत्ति, पचतीत्यभिदधाति। तथा च यजेतेत्यभिमतफलावधिनि देवदत्तस्मरणद्रव्याऽवमर्शनतद्विषयस्वत्वत्यागात्मनि यागकर्मणि नियोगात्फलभेदाऽपेक्षायामधिकृतविशेषणस्याऽपि स्वर्गस्य यागसाध्यतया समन्वय इति।

परिहरति—स्याद्यदीदृशो भावार्थः। न त्वयमेवमित्युक्तं भावनाविवेके। तादृशं चेत् कर्म्म नियोगविषयस्तर्हि तन्नियोगात्प्रागवगन्तव्यम्। न खल्वनवगतगोचरो नियोज्यस्तद्गोचरं नियोगमवगन्तुमुत्सहते। न च स्वर्गाऽवधिको यागः प्राङ्नियोगाऽवगमान्मानान्तरेण पाक इवौदनाऽवधिः शक्याऽवगमः। न च नियोगात्तदवगमः। परस्पराश्रयदोषप्रसक्तेः। सति नियोगाऽवगमे तन्निरूपणम्, तस्मिंस्तु सति तदवगम इति। यद्यपि यागरूपं प्रमाणान्तरसिद्धम्, तथाऽपि भावात्मना न तत्सिद्धम्। तेन च तद्विषयो, न पुना रूपमात्रेण। तन्मात्रेण वा विषयत्वसमर्थने नास्य स्वर्गसम्बन्धः स्यादिति भावः। नैमित्तिके च फलकल्पनाप्रसङ्गः। इष्टोपाधेर्भावार्थस्य काम्यवत्तत्राऽप्यविशेषात्। न चाऽपूर्वमिच्छागोचर इत्यसकृदावेदितम्। यथा चाऽस्मिन् दर्शने प्रकारान्तरेणापि न कर्म्मफलसम्बन्धस्तथोक्तं भावनाविवेके।

ननु भवत्वसम्बन्धः, का नः पीडेत्यत आह—तेन स्वर्गयागयोरसम्बन्धाद् न पुरुषार्थसाधनं ज्ञानम्। ततः किमित्याह—पुरुषार्थसाधनं च जिज्ञासन्ते प्रेक्षावन्तः।

तदनेन प्रबन्धेन स्वर्गयागयोः परस्पराऽसङ्गतिप्रसङ्गाद् नियोगस्य कार्यता प्रतिषिद्धा। पुनस्तामेव प्रकारान्तरेण निषेधति—लोकाच्च शब्दार्था-

नियोगप्रधानता। तत्सिद्धावनियोगात्। नापि प्रतिपत्ता प्रत्येति ताम्। विषयसिद्धावप्यननुष्ठानात्। न हि गामानयेति नियोगसिद्धिर्विवक्षिता वक्तुरपि तु विषयसिद्धिः।

अन्यल्लोके शब्दवृत्तमन्यद्वेदे। विवक्षापरो हि समन्वयो लोके शाब्दानाम्, नियोगपरो वेदे। अयमपरो गण्डस्योपरि स्फोटः। यदि खलु विवक्षापरेऽन्वये शब्दसामर्थ्यं लोकतोऽवगम्यते नाऽन्यपरत्वम्। अनन्यप्रमाणकत्वाच्छब्दसामर्थ्यस्य। वक्तुरभावादिति चेत्। अयमेव विवक्षापरोऽन्वयस्तमनुमापयेदिति प्राप्तं पौरुषेयत्वम्। प्रतिपत्त्यभावो वा भवन्ती वा प्रतिपत्तिर्न्न शब्दनिमित्ता सामयिकी स्यात्, सामान्यतोदृष्टजा वा। तस्माल्लाक्षणिकप्रयोगज एव तत्रभवतो विभ्रमो नियोगः कार्य्य इति। अपि

ऽधिगमान्न नियोगप्रधानता नियोज्यकृतिं प्रति। कुतः ? तन्नियोगसिद्धावनियोगान्नियोक्तुरेव तत्सिद्धेः। नाऽपि प्रतिपत्ता प्रत्येति तां नियोक्तुर्वाक्ययोगसिद्धिं स्वकृतेर्व्याप्यतया। कस्मात् ? विषयसिद्धौ सत्यामननुष्ठानान्नियोज्यस्य प्रतिपत्तुः। न ह्यन्येनाऽऽनीतायां गवीतरस्तदानयनमारभते। तस्माद्विषयसिद्धौ नियोक्तृनियोज्ययोः सम्प्रतिपत्तेः संबद्धविषयपरामेव साधनतामध्यवस्यति, न तु नियोगपरामित्यर्थः।

चोदयति—अन्यल्लोके शब्दवृत्तमन्यद्वेदे। तदेव स्फोटयति—विवक्षापरो हि समन्वयो लोके शब्दानां पदार्थानाम्, नियोगपरो वेदे। तेन तत्र नियोगस्यैव कार्यतेत्यर्थः। दूषयति—अयमपरो गण्डस्योपरि स्फोटः। तमाह—यदि खलु विवपक्षापरेऽन्वये शब्दसामर्थ्यं लोकतोऽवगम्यते ततो न विवक्षितादन्यपरत्वं वेदस्य। कस्मात् ? अनन्यप्रमाणकत्वाल्लोकप्रमाणकत्वाच्छब्दसामर्थ्यस्य नोपायान्तरं तदवगमाय वेदे सम्भवतीति। शङ्कते—वक्तुरभावान्न विवक्षासम्भवो वेद इति चेत् ? निराकरोति—अयमेव विवक्षापरोऽन्वयस्तमनुमापयेदिति प्राप्तं पौरुषेयत्वम्। सोऽयमस्मिन् पक्षे लोकविरोधलक्षणस्य गण्डस्योपरि पौरुषेयत्वप्रसङ्गलक्षणः स्फोटः। अथ दृढतरमपौरुषेयत्वं ततः प्रतिपत्त्यभावो वा स्फोटः। तदुपायाऽभावात्। अथ स्वाऽनुभवसिद्धा वेदवाक्यश्रवणसमनन्तरा प्रतीतिर्नाऽपह्नवमर्हति, तत्राह—भवन्ती वा प्रतिपत्तिर्न शब्दनिमित्ता सामयिकी। स्वतः सिद्धेष्वेव वेदवाक्येषु पुरुषकृतसङ्केतनिबन्धना तदुच्चारणादर्थप्रतीतिरित्यर्थः। यदि तु सम्बन्धुरस्मरणान्न सङ्केतक्रियासम्भवः, ततः सामन्यतोदृष्टरूपजा वा। गवादिपदयुक्तं हि वाक्यमर्थविशेषप्रत्ययनिमित्तमुपलब्धम्, वैदिकं च तथेति तदपि प्रत्यायकमिति सामन्यतोदृष्टादर्थप्रत्ययो वैदिकादपि वाक्यादित्यर्थः।

च न लोके नियोगमात्रं प्रवृत्तिहेतुः, सर्वस्य नियोगादप्रवृत्तेः। अनुविधेय-नियोगाच्च तद्भावात्। अनुविधेयत्वं नियोक्तुरन्यनियोगात् प्रवृत्तिहेतुः। अनुविधानकारणं चाऽर्थाऽनर्थप्राप्तिपरिहारादि प्रमाणान्तरसिद्धम्। न च वेदे नियोक्ताऽपि। कुतः पुनरनुविधेयः? ननु शब्दः। भवतु नाम नियोक्ता, न त्वनुविधेयः। हेत्वभावात्। न ह्यर्थाऽनर्थप्राप्तिपरिहारयोः शब्दाऽनुविधाने प्रमाणमस्ति। नियोग इति चेत्। न। तस्य प्रमेयत्वात्। नियोगज्ञानं तर्हि। न। तस्य नियोगविषयत्वात्। तस्य च ताभ्यामन्यत्वात्। न चाऽर्थादाक्षेपः।

यत्त नियोगकर्त्तव्यतायामाचार्यनियोगः कर्तव्यः, राजशासनमनुष्ठेय-मिति लौकिको व्यपदेशः प्रमाणमुपन्यस्तम्, तदपहसन्नन्यथासिद्धयति— तस्माल्लाक्षणिकप्रयोगप्रभव एष तत्रभवतो विभ्रमो नियोगः कार्य इति। नियोगशब्देन स्वाभिधेयविषयभावार्थलक्षणादिति पूर्वार्द्धं व्याख्याय कारि-कायाः पश्चार्द्धं व्याचष्टे। अपि च न लोके नियोगमात्रं प्रवृत्तिहेतुः। कुतः? सर्वस्य नियोगादप्रवृत्तेः। अनुविधेयनियोगाच्च तत्प्रवृत्तिभावात्। तस्मादनुविधेयत्वं नियोक्तुरन्यनियोगात्प्रवृत्तिहेतुः। अनुविधानकारणं चार्थाऽनर्थप्राप्तिपरिहारादि प्रमाणान्तरसिद्धम्। वेदेऽप्यनुविधेयोऽस्तु लोकवदिति चेत्। अतः आह—न च वेदेऽपौरुषेयेऽपि नियोक्ताऽपि दृश्यते। कुतः पुनरयमनुविधेयः? धर्मस्याऽत्यन्ताऽसिद्धेरित्यर्थः।

चोदयति—ननु शब्दो नियोक्ताऽनुविधेयः। शब्दनियोक्तृत्वं न्यरासि प्रथममेव प्रमाणत्वादित्यादिना। अभ्युपगम्याप्याह—भवतु नाम नियोक्ता, न त्वनुविधेयः। अनुविधानहेत्वभावात्। नन्वर्थाऽनर्थप्राप्तिपरिहारावनु-विधानकारणं भविष्यतीत्यत आह—न ह्यर्थानर्थप्राप्तिपरिहारयोः शब्दा-ऽनुविधाने प्रमाणमस्ति। शङ्कते—शब्दाऽनुविधाने सत्यनुविधातुः पुरुषस्य हितप्राप्तिरहितनिवृत्तिर्वा भवतीत्यत्र नियोगः प्रमाणमिति चेत्। निरा-करोति—न। तस्य नियोगस्य प्रमेयत्वात्। न खलु प्रमेयं तत्त्वेन प्रमाणं भवतीति। पुनः शङ्कते—यदि प्रमेयतया नियोगो न प्रमाणम्, नियोगज्ञानं तर्हि प्रमाणमस्तु। निराकरोति—न। तस्य नियोगविषयत्वात्। तस्य च नियोगस्य ताभ्यामर्थाऽनर्थप्राप्तिपरिहाराभ्यामन्यत्वात्।

यदि मन्येत, मा नाम भून्नियोगः। प्रमेयतयाऽर्थानर्थप्राप्तिपरिहारयोः प्रमाणं शब्दावगतेस्त्वयं चेतनप्रवृत्तिं विनाऽनुपपद्यमानस्तस्याश्चार्था-ऽनर्थप्राप्तिपरिहारमन्तरेणाऽसम्भवात् प्रवृत्तिमर्थानर्थप्राप्तिपरिहारप्रयोजन-माक्षेप्स्यते च तदपेक्षया प्रमेयमपि प्रमाणताम्, कारकशब्दानामापेक्षिकप्रवृत्ति-त्वादित्यत आह—न चाऽर्थादाक्षेपः। कुतः? हिताऽहितप्राप्तिपरिहाररहित-

अनाप्तनियोगदर्शनात् । क्षेम्योऽयं पन्थाः, गच्छतु भवाननेनैवेति यथा । पदार्थाऽन्वयनिष्ठो नियोगो लोके तस्य च प्रमाणान्तरविषयत्वात्तदपेक्षत्वात्तन्निबन्धना प्रवृत्तिर्लोके, नियोगनिष्ठस्तु वेदे, अतो नाऽन्याऽपेक्षा । उक्तोत्तरमेतत् । अपि च न नियोगमात्रं प्रवृत्तिहेतुः । मिथ्या तर्हि नियोगज्ञानम् । न च तद्युक्तम् । कारणद्वयाऽभावात् । न वयं नियोगमवजानीमहे येन मिथ्यात्वं स्यात् । सत्यपि तस्मिन्पुरुषः प्रवर्तते लोक इव यस्य कस्य चिन्नियोगात् । न हि तत्र नियोगो नास्ति । अतत्परत्वे तात्पर्यमप्रमाणकमित्युक्तम् । ननु कर्तव्यताऽवगमात् प्रवृत्तिः । अवगच्छति च नियुक्त इदं मम कर्तव्य-स्याऽनाप्तनियोगस्य दर्शनात् । अपथमेव सुपन्थानमाख्याय तत्र प्रर्त्तयत्यनाप्तः क्षेम्योऽयं पन्थाः, गच्छतु भवाननेनेति यथा । चोदयति—पदार्थाऽन्वयनिष्ठोऽर्थाऽनर्थप्राप्तिपरिहारोपायतालक्षणसमन्वयनिष्ठो नियोगो लिङादिर्नियुज्यतेऽनेनेति व्युत्पत्त्या लोके तस्य साध्यसाधनभावस्य प्रमाणान्तरविषयत्वात् । प्रमाणान्तराऽपेक्षत्वात्तन्निबन्धना साध्यसाधनभावाऽवगमनिबन्धना प्रवृत्तिर्लोके । अनाप्तवाक्ये च नियोगस्य मानान्तरेण बाधितत्वादप्रवृत्तिः । मानान्तराऽगोचरनियोगनिष्ठस्तु पदार्थान्वयो वेदे । स च प्रतीतः प्रवृत्तौ हिताऽहितप्राप्तिपरिहारसाधनतामनुविधानकारणं नाऽपेक्षते । प्रवर्त्तनकरसत्वात् । अतो नाऽन्याऽपेक्षा । न हि प्रमाणं शब्दस्तदवबोधने मानान्तरमपेक्षते । नाऽपि नियोगः पुरुषप्रवृत्तौ हिताऽहितप्राप्तिपरिहारसाधनतामित्यर्थः । तदेतद् दूषयति—उक्तोत्तरमेतत् । विवक्षापरत्वनिराकरणप्रस्तावे ।

यत्तु प्रवर्त्तनकरसत्वमभिमतं नियोगस्य, तदपि न मृष्यामह इत्याह—अपि च लौकिको भवतु, अलौकिको वा, सर्वथा नियोग इत्येव न नियोगमात्रं प्रवृत्तिहेतुः । चोदयति—न चेत्प्रवर्त्तयति, मिथ्या तर्हि नियोगज्ञानम् । न चैतदुचितम्, कारणद्वयाऽभावात् । परिहरति—न वयं नियोगमवजानीमहे, येन मिथ्यात्वं वेदस्य स्यात् । सत्यपि तस्मिन्पुरुषप्रवृत्तिर्लोक इव यस्य कस्यचिन्नियोगात् । न हि तत्र नियोगो नास्ति । अथ न तन्नियोगपरं लौकिकमपि तु विनियोगपरमित्यत आह—अतत्परत्वे नियोगपरत्वे लौकिकस्य लोकाऽधीनाऽवधारणार्थस्य[1] वैदिकस्य तात्पर्यं नियोगपरत्वमप्रामाणिकमित्युक्तम् ।

ननु न वयं नियुक्तिमात्रं नियोगं ब्रूमहे, अपि तु कर्त्तव्यताम् । सा च निरपेक्षा प्रवृत्तहेतुर्वेदादवगम्यत इत्याह—ननु कर्त्तव्यताऽवगमात्प्रवृत्तिः ।

१. अर्थाऽवधारणस्य २ पु० पा० ।

मिति। यस्त्ववगच्छन्नपि अनुष्ठेयं नाऽनुतिष्ठति स सत्त्वेऽप्यर्थाऽनर्थप्राप्तिपरिहारयोरननुतिष्ठन्निव न दण्डैर्वार्य्यते। तदेतदविमृष्टनियोगरूपम्। तथा हि। प्रवर्तनामात्रं नियोगः। स च लिङाद्यर्थ इति प्रवर्त्तितोऽहमत्रेति प्रतिपत्तिः शब्दात्। कर्तव्यताऽवगमस्तु नियोक्तुरनुविधेयत्वात्। अनुविधेयनियोगे ममेदं कर्तव्यमित्यध्यवसायात्। इतरत्र तु प्रवर्तनामात्रप्रतीतेः। उक्तं च कर्तव्यताविषयो नियोगो न नियोगः कर्तव्यतामाह।

अवगच्छति च नियुक्त इदं मम कर्त्तव्यमिति। यस्त्ववगच्छन्नप्यनुष्ठेयं नाऽनुतिष्ठति स सत्त्वेऽप्यर्थाऽनर्थप्राप्तिपरिहारयोरननुतिष्ठन्निव न दण्डैर्वार्यते। इदमभिसंहितम्, चेतनाप्रवृत्तिलक्षणकार्योन्नेयशक्तयो लिङादयः प्रवृत्तिहेत्वाभिधायिनः। तद्धेतुश्च स्वात्मनि कर्त्तव्यताऽवगमो विदित इति कर्त्तव्यतामभिदधाति। तथा च ततः कर्त्तव्यतामवगम्याऽप्यप्रवर्त्तमाना हिताऽहितप्राप्तिपरिहारोपायतामिव न दण्डैः पराणुद्यन्त इति। दूषयति—तदिदमविमृष्टनियोगरूपं वचः। तथा हि। लोकाऽनुसारादाज्ञादिरूपितं प्रवर्त्तनामात्रं नियोगः। स च लिङाद्यर्थो, न पुनः प्रवृत्तिहेतुः कर्त्तव्यता। तदवबोधे ऽपि कर्त्तव्यताऽनवबोधात्। अननुविधेयनियोगेन हि तत्र नियोगप्रत्ययो नास्ति, अपि तु कर्त्तव्यताऽवबोधः। तदवबोधे सत्यसति विधुरप्रत्ययो[1]पनिपाते प्रवृत्तेरवश्यम्भावनियमादिति। तस्मात्प्रवर्तितोऽहमिति प्रतिपत्तिः शब्दात्प्रवृत्तिहेतुः। कर्त्तव्यताप्रतिपत्तिस्तु प्रेक्षापूर्वतो नियोज्यस्य नियोक्तुरनुविधेयत्वात्। कस्मात्? अनुविधेयनियोगे ममेदं कर्त्तव्यमित्यध्यवसायात्। इतरत्र तु कर्त्तव्यताऽध्यवसायरहितप्रवर्त्तनामात्रप्रतीतेः।

अत्रैव जरत्प्राभाकरोन्नीतार्थं गुरोर्वचः सङ्गच्छत इत्याह—उक्तं च, कर्त्तव्यताविषयो नियोगः प्रवर्त्तना नियोक्तुर्द्धर्म्मः, तमभिदधाति लिङ्, न नियोज्यस्य धर्मं कर्त्तव्यत्वं प्रवर्त्तनाया विषयमाह, विषयस्य विषयिणोऽन्यत्वात्।

नवीनास्तून्नयन्ति, अनिरूपितनियोगव्यापारस्येदं चोद्यमित्युपक्रम्येदमुक्तम्। कर्त्तव्यताविषयो हि नियोगो न कर्त्तव्यतामाहेति। यागकर्त्तव्यताऽनुष्ठानं विषयो यस्य नियोगस्य स तथा। तेन हि नियोगः साध्यते, न पुनर्नियोगो यागस्याऽनुष्ठानं ज्ञापयति।

एतदुक्तं भवति साक्षान्नियोग एव कर्त्तव्यतयाऽवगम्यते लिङादिभ्यः। स तु यागविषयस्तदनुष्ठानमन्तरेण कर्त्तव्यताया अपर्यवसानात् तदनुष्ठान-

---

१. विरोधिप्रत्यय २ पु० पा०

तद्विषयत्वादेव हि तर्हि कर्तव्यताऽवगमः। न तावदयं शाब्दः। शब्देन नियोगमात्रस्याऽभिधानात्। नाप्यार्थः। सर्वनियोगेष्वभावात्। तस्मादिदमपि दर्शनमविमृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः। अस्तु तर्ह्यनुविधेयो नियोक्ता भूतानाम्। साक्षात्कृताऽऽनुश्र[1]विकश्रेयःसाधनो हितकामः सर्वज्ञः।

माक्षिपति। सोऽयमाक्षेपाऽपरनामोपादानव्यापारो नियोगस्याऽऽस्थीयत इति। तदेतदपूर्वात्मनि कार्यरूपे नियोगे सत्युपपद्यते। तदभावश्च निपुणतरमुपपादितः। तदास्तां तावत्।

चोदयति—नियोगस्य तद्विषयत्वादेव तर्हि कर्त्तव्यताऽवगमः। विषयिणो विषयनान्तरीयकत्वादिति भावः। निराकरोति—न तावदयं शब्दः। कस्मात्? शब्देन नियोगमात्रस्याऽभिधानात्। ननूक्तं नान्तरीयकत्वादिति, तत्राह—नाप्यार्थः। कुतः? सार्वनियोगेष्वभावात्। कर्त्तव्यताऽवगमस्यं। न खल्वयमननुविधेयेन शतशोऽपि नियुज्यमानोऽवबुध्यमानोऽपि नियोगं कर्त्तव्यतामवगंस्यत इत्युक्तम्। उपसंहरति-तस्मादिदमपि दर्शनमपि दृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः। तत्सिद्धमेतत्। विवादाध्यासिता लिङादयो न मानान्तराऽपूर्वकार्याऽभिधायिनः, तेनाऽगृहीतसङ्गतित्वात्, यद्येनाऽगृहीतसङ्गति न तत्तदभिधायि, यथा वाजिपदं क्रमेलकस्येति। अगृहीतसङ्गतेरभिधायकत्वे व्यवस्थाहेत्वभावात्। सर्वस्य सर्वमभिधायकं सम्भवेदित्यव्यवस्था। तदिदमगृहीतसङ्गतित्वं व्यवस्थाहेत्वभावेन व्याप्तं स्वव्यापकविरुद्धव्यवस्थोपलब्धेरभिधायकत्वान्निवर्त्तमानमनभिधायकत्व एवावतिष्ठत इति प्रतिबन्धसिद्धिः।

सम्प्रत्यन्यथा प्रत्यवतिष्ठते परः। अस्तु तर्ह्यनुविधेयो नियोक्ता भूतानाम्, भिषज इव तस्य भगवतो नियोगादर्थाऽनर्थप्राप्तिपरिहारार्थेन प्रवर्त्स्यन्ति निवर्त्स्यन्ति चेति। कस्मादित्याह—यतः साक्षात्कृताऽऽनुश्रविकश्रेयः साधनः। ननु साक्षात्कृताऽऽगमगम्यश्रेयःसाधनोऽपि कदाचिदन्यथा ब्रूयात्, न वा ब्रूयात्। तत्कथमस्याऽनुविधेयता? इत्यत आह—हितकामः परेषां स्वार्थीभूत[2]विश्वव्यापिकारुण्यो हि भगवान् वैराग्याऽतिशयसंपन्नो मात्रयाऽपि रागादिभिः क्लेशैरुपक्लेशैश्च मदमानादिभिरपरामृष्टः। तदयमतिमहति संसारदुःखपङ्के निमज्जतः प्राणिनः पश्यन् कथं नामैतानुद्धरेयमिति तद्दुःखेन कथं न दूयमानो वा हिताऽहितप्राप्तिपरिहारोपायतत्त्वे विद्वान् करणपाटवे सति कथमन्यथोपदिशेत्, नोपदिशेद्

---

१. श्रवि० पु० पा०। २. स्वामीभूत २ पु० पा०।

वा। अथैवम्भाव एवास्य कुतः ? इत्यत आह—सर्वज्ञः प्रहीणरागाद्यावरण-तत्त्वज्ञानः खल्वयमनवयवेन विश्वं करतलाऽऽमलकमिव साक्षादीक्षमाणः सर्वज्ञः साक्षात्कृताऽऽनुप्रविकश्रेयः साधनो भवति, भवति च हितकामः। दुःखतो जगदुद्धर्त्तुकामस्यास्य सर्वज्ञतामन्तरेण तदनुपपत्तेस्तत्र प्रवृत्तेः।

न च सर्वज्ञो नास्ति। तथा हि। तदभावव्यवहारो बाधकप्रमाण-सद्भावाद्वा साधकप्रमाणाऽभावाद्वा भवेत्। न तावद्बाधकप्रमाणसद्भावः। न खलु प्रत्यक्षमस्य बाधकं रजतस्येव समारोपितस्य शुक्तितत्त्वं विषयः सम्भवति। तद्विरुद्धोपस्थानाऽसम्भवात्। सर्वज्ञताया अत्यन्तपरोक्षायाः केनचिदपि सह प्रत्यक्षप्रतीतेन विरोधाऽनवगतेः। नाप्यनुमानमस्य बाधकम्। तद्धि विधिनिषेधसाधनतया द्विविधम्। तत्र विधिसाधनं स्वभावहेतुकं कार्यहेतुकं वा न निषेधे साध्ये प्रभवति। अन्यसाधनत्वेऽन्य-साधनस्याऽप्रसङ्गात्। अनुपलब्धिलिङ्गकं तु प्रतिषेधसाधनं भवेत्। तच्च स्वभावाऽनुपलम्भसाधनादन्यदिह सर्वज्ञविरुद्धार्थान्तरविधानेन वा तत्कारण-व्यापकनिषेधेन वा सर्वविदभावं साधयेत्। न तावत्स्वभावविप्रकर्षिणा[1] सर्वविदा सह कस्यचिदपि प्रतीयमानस्य विरोधो दृष्टपूर्वः। विरोधि-प्रतिपत्तिनान्तरीयकतया विरोधाऽवगतेः। विरोधिप्रतिपत्तौ वा नाऽत्यन्ताय तन्निषेधः। न च प्रत्यक्षाऽनुपलम्भसाधनं कार्यकारणभावः स्वभाववि-प्रकर्षवति सर्वविदि शक्याऽवगमः। अत एव व्यापकत्वमपि कस्यचिद् दुरवसायमेव सर्वविदि। नापि विपक्षे बाधके प्रमाणप्रवृत्तिः क्षणिकत्वस्येव सत्त्वे सर्वविद्व्यापकाऽभावाऽवगम[2]-निबन्धनम्। तदभावात्। भावे वा निषेधो नास्ति अत्यन्तायतस्य। न खलु खपुष्पं कस्यचिद्व्याप्यं सम्भवति व्यापकं वा। न चाऽन्यमात्रनिवृत्तावन्यस्य निवृत्तिः। अतिप्रस-ङ्गात्। यथाहुः—

अन्यस्यैव निवृत्याऽन्यविनिवृत्तिः कथं भवेत्।
नाऽश्ववानिति मर्त्येन न भाव्यं गोमताऽपि किम् ? ॥इति।

न च सत्त्वज्ञेयत्वादयो सर्वज्ञतासहभुवः सहस्रश उपलब्धा व्याप्ता विवादाध्यासितस्य पुरुषधौरेयस्य विरुद्धोपस्थापनेन सर्वज्ञतां प्रतोक्षिपन्तोति साम्प्रतम्। सत्त्वादेरसर्वविद्व्याप्त्यसिद्धेः। न खलु दर्शनाऽदर्शनमात्र-निबन्धनं व्याप्तिविज्ञानम्, मा भून्चैत्रः श्यामो मैत्रीतनयत्वात् परिदृश्य-मानमैत्रीतनयस्तोमवदित्यनुमानम्। तत्तनयताया अश्यामतया विरोधा-ऽभावेन सन्दिग्धव्यतिरेकित्वान्नानुमानमेतदिति चेत् ? न। इहाऽपि

---

१. विप्रकृष्टेन २ पु० पा०। २. व्यापकावगम २ पु० पा०।

समानत्वात् । न हि सर्ववित्तया सह सत्त्वादेः कश्चिद्विरोधो, येनासौ न सन्दिग्धव्यतिरेकः स्यात् । द्वयी हि विरोधाऽवगतिः सहाऽनवस्थानं वा, छायाऽऽतपवत् परस्परपरिहारो वा भावाऽभाववत् । न तावदविकलकारणस्य सर्वज्ञत्वस्यालोकस्येव[1] सत्त्वादेः सन्तमसस्येव भावेऽभावः, यतः सहाऽनवस्थितिरूपविरोधसङ्गतिः स्यात् । तथा च भावे वा नात्यन्ताभावः सर्वज्ञताया इत्युक्तम् ।

नाऽप्युत्तरः । न खलु सर्वज्ञनासत्त्वादिपरिहारेण सत्त्वादयो वा तत्परिहारेण भावाऽभाववत् प्रत्ययपथमवतरन्ति । न च सर्वज्ञतया तेषां व्याप्तिरस्तीत्युक्तम् ।

स्यादेतत् । उपदेशप्रणयनमेव बाधकं सकलवस्तुतत्त्वदर्शनस्य । तथा हि । उपदेशो विकल्पविज्ञानयोर्निर्विकल्पश्च समारोपितगोचरतया मिथ्येति न तथा तथागतविज्ञानं भवितुमर्हति । तदयमुपदेशो निषेध्यसर्वविषयतत्त्वविज्ञानविरुद्धसमारोपितगोचरविकल्पविज्ञानकार्यं इति विरुद्धकार्योपलब्ध्या बुद्धादीनां सर्वज्ञत्वाऽभावसाधनम् । उपदेशाऽभावे वा वृथा तत्प्रसाधनं तत्सन्निधानमात्राद्वा चैत्यवन्दनादिचोदनानामनिःसृतत्वाभ्युपगमेऽनाश्वास इति । तन्न । विकल्पस्य सर्वविज्ञानत्वाऽविरोधात् । द्विविधो हि विकल्पो विपर्यासपूर्वोऽतत्पूर्वश्च । तत्र विपर्यासपूर्वो भवादृशाम् अतत्पूर्वस्तत्रभवतः सर्ववेदिनः । न खल्वसौ भ्रान्तो विकल्पवानपि तु विदितसमस्तवस्तुतत्त्वविस्तारः करुणापराधीनमानसो दुःखिन उपदेष्टुकामः । वचनमन्तरेण तदनुपपत्तेः विकल्पं विना तदसम्भवात् तस्याऽतात्त्विकत्वं विद्वानपि तमाहरति । यथा नैरात्म्यतत्त्वं विद्वानपि विकल्प्य समारोपितमात्मानं निषेधति, नास्त्यात्मेति । यथा वा वैयाकरणप्रवरो गाव्यादिशब्दानसाधून् जानानोऽपि पृथग्जनप्रतिपिपादयिषया प्रयुञ्जानोऽपि नाऽपशब्दकारी । तदिदमाहार्यमस्य रूपं न तात्त्विकमिति तत्त्वविदो नोपदेशविरोधः । न च रागादिमत्ता । न खलु कृपा रागपक्षे वर्त्तते । नन्वियं परदुःखप्रहाणेच्छेति राग एव । नैवम् । न हीच्छामात्रं रागः, अपि तु चित्तमलमात्मनो दर्शनाऽऽवरणमभूतगुणाऽभिनन्दनं रागमाचक्षते । न ह्यसति नित्यात्मदर्शने स्वार्थतृष्णापरिप्लुतः कश्चित्परिस्पन्दते । यथा हि चैत्रः स्वतो भिन्नं मैत्रमुदीक्षमाणः स्वगतसुखतृष्णापरिप्लुतो न मैत्रसुखाय घटते । तथा पूर्वाऽपरक्षणविविक्तं विज्ञानमात्रमात्मानं साक्षादीक्षमाणः सन्नतिपतिततद्विपरीतलक्षणान्तरोपकार[2]कर्मणि प्रवर्त्तते, प्रवर्त्तते च स्वार्थतृष्णापरिप्लुतः । तेनाऽवगच्छामोऽवगच्छति नूनमयमहमिति

---

१. लोकस्येवाभावः पु० पा० ।

२. माणो न तत्संततिपतितलक्षणात्मोपकार २ पु० पा० ।

न। तस्याऽनुपपत्तेः, अज्ञानाच्च। तथा हि—

हेत्वभावे फलाऽभावात्प्रमाणेऽसति न प्रमा।
चक्षुराद्युक्तविषयं परतन्त्रं बहिर्मनः॥

यद्यप्यात्मप्रत्यक्षनिवृत्तिर्विप्रकर्षवतामभावं व्यभिचरति। सर्वप्रत्यक्ष-विभिन्नानपि स्वचित्तक्षणानेकतया। तदिदं सहजमात्म[1]ऽदर्शनं निदानं रागादीनाम्। यथाऽहं सुखी भवेयं दुःखी च मा भूवमिति च मा भूवमिति च तृप्यतो यैवाहमिति धीः सैव सहज त[2]त्त्वदर्शनमिति। न च सर्वविदः करुणाऽहमुपकुर्यां परानित्येवमाकाराऽपि सत्त्वदर्शनाऽव्ययवा यस्मान्नात्मगामी फलाभिलाषाऽयमपि तु स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छेत्युक्तम्। न च सर्वे चित्तक्षणाः प्रत्येकं परमुपकुर्यामहमहमित्यहमहमिकयात्पद्यमाना अप्यात्मदर्शनाऽवयवाः। परोपचिकीर्षायास्तं विनाऽप्युपपत्तेः। तत्त्वदर्शने चोपदेशसम्भवात्स्वगतता[3]मन्तरेणापि परोपकारस्य समीहितत्वादपेक्षितलक्षणत्वाच्च फलस्य सत्सम्बन्धस्य प्रवृत्तेः प्रेक्षावत्ताऽविघातात्। तस्मादुपदेशतत्त्वविज्ञानयोरविरोधात्सन्दिग्धव्यतिरेकित्वाद्वचनमपि न सर्वज्ञताया बाधकमिति न बाधकप्रमाणसद्भावस्तदभावव्यवहारसाधनम्। नाऽपि साधकप्रमाणाऽभावः। तथा हि। प्रत्यक्षाऽभावो वा सकलप्रमाणाभावो वा स्यात्। प्रत्यक्षाभावोऽपि चाऽऽत्मनः सर्वेषां वा, यदात्मनस्तदाऽपि दृश्यताविशेषणो निर्विशेषणो वा। न तावदात्मप्रत्यक्षनिवृत्तिर्दृश्यताविशेषणा सर्वज्ञाऽभावसाधनी। तस्य स्वभावविप्रकर्षिणस्तत्वानुपपत्तेः प्रसिद्धत्वान्निर्विशेषणायाश्च व्यभिचारात् समस्तप्रत्यक्षनिवृत्तेश्चाऽसिद्धत्वात्। न खल्वर्वाग्दृशः सकलप्रत्यक्षनिवृत्तिः। असिद्धत्वात्। न च प्रमाणं प्रमेयस्य व्यापकं कारणं वा, येन[4] तन्निवृत्तौ निवर्तेत। तस्मान्न तदभावसिद्धिः। नापि तद्भावसन्देहः। तत्साधनेन तत्सद्भावस्य निवेदयिष्यमाणत्वात्। तस्मादनुविधेयपुरुषधौरेयनियोगादेव प्रवृत्तिनिवृत्ती इति साम्प्रतम्।

तदेतन्निराचष्टे—न। कुतः? तस्याऽनु[5]विधेयस्य सर्वविदोऽनुपपत्तेः। अज्ञानाच्च। पातिते प्रमाणदारुणि यथायथं परिशोधयति—तथा हि।

हेत्वभावे फलाऽभावात् प्रमाणे सति न प्रमा।
चक्षुराद्युक्तविषयं परतन्त्रं वहिर्मनः॥

तदेतद्व्याख्यातुमना भूमिकामारचयति—यद्यप्यात्मप्रत्यक्षनिवृत्तिविप्रकर्षवतां त्रिविधेन कालदेशस्वभावविप्रकर्षेण तद्वतां राममुमेरुपरमाण्वा-

---

१. त्माऽदर्शनं प्र० पा०। २. स प्र० पा०।
३. सकर्तृकताम् २ पु० पा०। ४. येन तन्नि प्र० पा०।
५. स्याऽवि प्र० पा०।

निवृत्तिरसिद्धा। असर्वदृशः सकलप्रमाणनिवृत्त्या च नाऽर्थाऽभावसिद्धिः। अव्यापकनिवृत्त्याऽव्याप्यनिवृत्तेरनियमात्। अव्यापकत्वं चाऽहेतुत्वात्। तन्मात्रानुबन्धाऽभावाच्च। अन्यथा सर्वस्य सर्वदर्शित्वप्रसङ्गात्, अविशेषाच्च। वचनादयश्च यद्यप्यविरोधादनिवर्तकाः तथापि कारणनिवृत्त्या कार्यनिवृत्तिप्रतीतेः प्रमाणाऽनुपपत्त्या तत्कार्यायाः सर्वार्थेषु संविदोऽभावमनुमिमीमहे। तथा हि। न प्रत्यक्षं चक्षुरादिजन्म तावत्सर्वार्थेषु, तेषां विषयनियमात्। किंचिदेव हि वर्तमानं संबद्धं च तद्विषयो न सर्वेऽर्थाः।

यद्यपि चाऽनेकविधप्रमेयसंवेदनाद्रूपतो नियमो दुर्निरूपः। पटुमन्दता-

दीनामभावं व्यभिचरति। सर्वप्रत्यक्षनिवृत्तिरसिद्धा। असर्वदृशोऽस्मदादेः सकलप्रमाणनिवृत्त्या च नार्थाऽभावसिद्धिः। कस्मात्? अव्यापकनिवृत्तावव्याप्यनिवृत्तेरवश्यम्भावाऽनियमात्। अव्यापकत्वमेव कुत? इत्याह—अव्यापकत्वं चाऽहेतुत्वादकारणत्वात्तन्मात्रप्रतिबन्धा[1]ऽभावाच्च। हेतुधर्म्ममात्राऽनुबन्धे हि साध्यधर्मोऽस्य व्यापकः। यथा वृक्षत्वं शिंशपात्वस्य। न च प्रमेयमात्राऽनुबन्धि प्रमाणम्। अन्यथा[2] प्रमेयाऽनुबन्धित्वे प्रमाणस्याऽस्मदादेः सर्वस्य सर्ववित्त्वप्रसङ्गः। तथा सत्यविशेषोऽस्मदादीनां भवदभिमतेन सह सर्वविदा। प्रमेयमात्राऽनुबन्धिप्रमाणशालिता हि सर्वज्ञता। सा चाऽस्मदादेरपीत्यविशेषप्रसङ्गः। वचनादयश्च यद्यप्यनिवर्त्तकाः सर्वार्थतत्त्वविदो विपश्चितश्चाऽविरोध[3]स्तया सह वचने सत्त्वादीनाम्, तथाऽपि कारणनिवृत्त्या कार्यनिवृत्तिप्रतीतिः[4]। न ह्यस्ति सम्भवो, नास्ति धूमकेतनः, अस्ति च धूम इति। प्रमाणं च करणं प्रमाया इति प्रमाणाऽनुपपत्त्या तत्कार्यायाः सर्वार्थसंविदोऽभावमनुमिमीमहे।

प्रमाणाऽनुपपत्तिमेव दर्शयति—तथा हि। न प्रत्यक्षं चक्षुरादिजन्म तावत् सर्वार्थेषु सम्भवति। कुतः? तेषां चक्षुरादीनां विषयनियमात्। नियमभेदमाह—किञ्चिदेव वर्त्तमानं संबद्धं तद्विषयः। न हि वर्त्तमानमात्रं तद्विषयः। स्वभावविप्रकर्षवतां परमाण्वादीनामपि तद्विषयत्वप्रसङ्गात्। अत उक्तम्—किञ्चिदेवावयवि द्रव्यादीति। तथाऽपि कालव्यवहितदेशविप्रकृष्टं च तद्विषयः प्रसज्येत, अत उक्तं सम्बद्धमिति।

एतस्मिंश्च नियमे न सर्वविषयं विज्ञानमिन्द्रियजमित्याह—न च सर्वेऽर्था देशकालस्वभावविप्रकर्षशालिनः। तथा नियमान्तरे तु दूषणमनभ्युपगमादेव परिभूतमित्याह—यद्यपि चाऽनेकविधप्रमेयसंवेदनाद्रूपतो नियमो

---

१. तन्मात्राऽनुबन्ध २ पु० पा०। २. तस्मात् अन्यथा प्र० पा०।
३. विरोधात् २ पु० पा०। ४. प्रतीतेः २ पु० पा०।

दिभेदतश्च नानादेशपरिमाणार्थपरिच्छेदान्न देशतः संबन्धनियमः। परिमाणतो नियमश्च। कालतस्तु निरूप्यते। प्राप्यकारित्वेऽवर्तमानस्य प्राप्त्यभावात्। अप्राप्यकारित्वेऽप्यर्थसामर्थ्यसव्यपेक्षत्वात्।

ज्ञानोत्पत्तावजातनिवृत्तयोरनुपाख्येयत्वात् असामर्थ्यात्। तथा

दुर्निरूपः। तथा हि। न तावद्रूपवच्चाक्षुषम्, अरूपस्यापि सङ्ख्यादेश्चाक्षुषत्वात्। नापि रूपिसमवेतम्। तदसमवेतस्य नीरूपस्य कालादेरपि चाक्षुषत्वादिति न रूपतो नियमः। नापि पाटवं वा रूपशब्दादीनामुद्भवसमाख्यातम्, स्फीताऽऽलोकमध्यवर्त्तिताऽर्थस्य ऐन्द्रियकत्वनियमहेतुः। अनुद्भूतानां मन्दानां रूपशब्दादीनां चक्षुरादिगतानामन्धकारस्थस्य च घटादेरग्रहणादिति साम्प्रतमित्याह—पटुमन्दतादिभेदतश्च ग्रहणाऽग्रहणनियमो दुर्निरूपः। इन्द्रियपाटवतारतम्येन मन्दमन्दतरमन्दतमग्रहणात्। वृषदंशादीनां च निरालोकवर्तिपदार्थग्रहणात्। नापि देशसंनिधिमहत्त्वे द्रव्यग्रहणनियमकारणे इत्याह—नानादेशपरिमाणार्थपरिच्छेदान्न देशतः सम्बन्धनियमः। चक्षुरेतावति देशे संनिकृष्यते, नैतावतीति नायं नियमः सम्भवतीति तुल्यवद्भूम्यादिगतकुम्भादिशनैश्चरादिग्रहणदर्शनात्। परिमाणतो नियमश्च दुर्निरूपः। सूक्ष्मसूक्ष्मतरसूक्ष्मतमगोचरत्वस्योपलब्धेः। अणोरनुपलम्भ इत्यचोद्यम्[1]। यदेव भवदभिमतं त्र्यणुकमोक्षामहे तदेव परमाणुमाचक्ष्महे। तदवयवाऽनुपलम्भात् तत्कल्पनाहेत्वनुपपत्तेश्च। दृश्यमानाऽवयवस्य च स्थवीयसस्तैरेव क्षोदीयोभिरारम्भसम्भवात्। अमहतोऽपि च गुणादेश्चाक्षुषत्वान्न महिमगुणशलिता तद्धेतुः। तदेकार्थसमवायस्य वा तद्धेतुत्वे त्र्यणुकस्याऽग्रहणप्रसङ्गः स्यात्, तदभावात्परस्पराऽपेक्षोभयकारणत्वे वा त्र्यणुकस्य च गुणादेश्चैकैककारणशालिनोरचाक्षुषता स्यात्। परस्पराऽनपेक्षकारणत्वे तु तृतीयस्यापि प्रकारस्य सम्भवो दुर्वारः। भवतु वा स्वभावविशेष एव चाक्षुषत्वे हेतुरेक इति न परिमाणतो नियमोपपत्तिः। तस्मान्निरूपणान्तराऽभावात् कालतस्तु निरूप्यते नियमः।

तथा हि—इन्द्रियाणि प्राप्यकारीणि न वा, उभयथापि तेषां वर्त्तमानविषयतैषितव्येत्याह—प्राप्यकारित्वे प्राप्ते उभयाश्रयत्वेनाऽवर्त्तमानस्याऽसंत आश्रयत्वाऽयोगात्। प्रप्त्यभावात् अप्राप्यकारित्वे यद्यपि प्राप्त्याश्रयत्वेन नाऽपेक्ष्यतेऽर्थः तथापि इन्द्रियाणामसत्यर्थे विज्ञानाऽजननात् अर्थसामर्थ्याऽपेक्षत्वात्। ज्ञानोत्पत्तौ कार्ये अजातनिवृत्तयोरनुपाख्येयत्वात् हेतोरसामर्थ्यम्।

---

१. इति चेत् २ पु० पा०।

चाऽतिशयानामपि चक्षुरादयः स्वविषयमेव देशतः परिमाणतः संख्यातो वाऽधिकं बोधयेयुः नाऽविषयमजातमतिवृत्तम्। तदुक्तं विद्यमानोपलम्भनत्वात्। तथा हि। प्रत्यक्षे रूपादिवेदने तच्चक्षुरादिपरतन्त्रं तन्नियमादेव

न खल्वतीतोऽजातशत्रुः सम्प्रति संतर्पयति विप्रानन्नपानैरुत्थापयति वा यूपं महासंपन्निमित्तमनागतशङ्खश्चक्रवर्त्ती। यद्युच्येत मा नाम भूतामर्वाग्दृशां लोचनगोचरावतीताऽनागतौ, योगविमलाञ्जनोज्ज्वलीकृतलोचनास्त्वालोचयिष्यन्ति सकृदेव जगदुदरवर्त्ति वृत्तवर्त्तिष्यमाणमर्थमात्रम्। अचिन्त्यो हि इन्द्रियाणां सामर्थ्याऽतिशयः, प्रभावाऽतिशयश्च योगस्य।

यथा हि न चक्षुरादीनां देशतः परिमाणतः संख्यातो वा नियमः तथा कालतोऽपि मा भूदिति तत्राह—यदा कालतो नियम इति व्यवस्थापितं तदा अतिशयानामपि सिद्धाञ्जनादिभिर्योगिनां चक्षुरादयोऽर्वाग्दृशामिन्द्रियाणि च स्वविषयमेव देशतः परिमाणतः संख्यातो वाऽधिकं बोधयेयुः, नाऽविषयमजातमनिवृत्तं वा। एतदुक्तं भवति। यथैव कार्यमहेतुकं न भवति कादाचित्कत्वव्याघातात् एवमनियतहेतुकमपि। न खलु अनियतहेतुकत्वमहेतुकत्वाद्विशिष्यते। कारणस्य हि कार्यप्राग्भावनियमः कारणत्वम्, तच्चाऽनियतनिमित्तत्वेऽनुपपन्नम्। न हि जातु यवबीजमत्यन्तपरिकर्मितमपि कलमोऽङ्कुराय परिकल्पते। नानाकारणमेकं वृश्चिकादी[1]ति च स्थूलदृशः। कुशाग्रीयदृशस्तु प्रणिहितमीक्षमाणाः पश्यन्ति तत्रापि कमपि जातिभेदम्। तस्माद्यथैव कारणान्तराणि स्वकार्यनिय[2]तसामर्थ्यानि स्वकार्य एवाऽतिशयमनुभवन्ति नाऽकार्ये नाऽप्यन्यकार्ये तथेन्द्रियाण्यपि न स्वा[3]विषये नाऽप्यन्यविषये इति सिद्धम्।

अत्रैव पारमर्षं सूत्राऽवयवं योजयति—तदुक्तं विद्यमानोपलम्भनत्वादिति। ननु मा प्रवर्त्तिषत बाह्यानीन्द्रियाणि, मनस्तु प्रवर्त्स्यतीत्यत आह—मानसमपि प्रत्यक्षं न सर्वं बोधयति। बहिर्मनसोऽस्वतन्त्रत्वात्। यत्र हि मनः स्थितं तत्र तेन प्रवर्त्तितव्यम्, स्वप्रत्ययाऽनुविधानात्। आन्तरे च सुखादौ तत् स्वतन्त्रमिति सुखादिविषयं तत्। न च सुखादयश्चितितया स्वसंवेदनप्रत्यक्षा इति साम्प्रतम्। विज्ञानादन्यत्वात्। विज्ञानाऽभिन्नहेतुतया तत्त्वमेषामिति चेत्। न। अभिन्नहेतुजत्वस्याऽसिद्धेः। इन्द्रियार्थसंनिकर्षो हि चन्दनविज्ञानस्य हेतुः, सुखस्य तु तद्विज्ञानम्, तदभावेऽपि विज्ञानमात्रादेव स्वप्ने सुखोत्पाददर्शनात्। सत्यपि चन्दनाऽनुलेपे हेमन्ते तदनुत्पादादित्येषा दिक्। तस्मात्सुखादिविषयं मानसं बहिर्विषयं भवितुं नाऽर्हति, तत्र तत्प्रत्ययस्य मनस इन्द्रियादितन्त्रत्वादिन्द्रियादीनां च तदगोचरत्वात्।

---

१. **एकशरवृश्चिकादीति पु० पा०।** २. **निरत प्र० पा०।**
३. **स्ववि प्र० पा०।**

नियतम् । अन्यथाऽन्धाद्यभावप्रसङ्गादिति । मानसमपि प्रत्यक्षमान्तरसुखादिविषयम् । बहिर्मनसोऽस्वतन्त्रत्वात् । स्वातन्त्र्येऽन्धबधिराद्यभावप्रसङ्गादित्युक्तम् । तज्जन्मसमनन्तरप्रत्ययसहकार्य्यपेक्षणाद्यदि नाऽन्धाद्यभावः सर्वथा पारतन्त्र्यं न निवर्तते । तद्विषयत्वात् । अन्यथेन्द्रियान्तरजसहकारिणोऽपि प्रवृत्तेः स एवाऽन्धाद्यभावः । न च तुल्यजातीयविषय एव समनन्त-

कस्मान्न स्वतन्त्रं वहिर्मन ? इत्यत आह—स्वातन्त्र्ये रूपादौ मनसोऽन्धवधिराद्यभावप्रसङ्गात् । न खल्वन्धादयो निर्मनस्कास्तेषां स्मृत्याद्यभावप्रसङ्गात् । मनश्चेच्चक्षुरादिनिरपेक्षमीक्षेत रूपादीन्न कश्चिदन्धवधिरादिः प्रसज्येतेति । तदेव स्फोटयति—तथा हि । प्रत्यक्षे रूपादिवेदने तन्मनश्चक्षुरादिपरतन्त्रं तन्नियमादेव नियतमन्यथा नियमाद्यभावेऽन्धाद्यभावप्रसङ्गादिति ।

उक्तं शङ्कते—तज्जन्मसमनन्तरप्रत्ययसहकार्यपेक्षणाद्यदि नाऽन्धाद्यभावः । अयमर्थः । न खलु मनो नाम चक्षुरादिवत् किंचिदिन्द्रियान्तरं रोचयामहे, किं तु पूर्वमेव विज्ञानं चरमज्ञानस्योपादानमाचक्ष्महे । तदेव हि समंविज्ञानत्वेनाऽनन्तरं चाऽव्यवहितत्वेन समनन्तरप्रत्यय इत्युच्यते । तत्र यदिन्द्रियजविज्ञानसमनन्तरप्रत्ययसहकारिणा तदिन्द्रियजविषयक्षणोपादानेन रूपेक्षणान्तरेणेन्द्रियजविज्ञानसमानकालेन जनितं स्वजनकक्षणविषयं विशदाभमुपरतेन्द्रियव्यापारस्य ज्ञानं तन्मानसं प्रत्यक्षम् । न तदिन्द्रियजम्, तद्व्यापारोपरमे भावात् । नाऽऽन्तरविषयम् । इद्रियजविषयविज्ञानविषयक्षणजनितक्षणान्तरगोचरत्वात् । न चाऽन्धवधिराद्यभावः । तेषामिन्द्रियरहिततया तज्जविज्ञानाऽभावेनोपादानविरहात् । न चाऽप्रत्यक्षम्, विशदाभासत्वादिति ।

निराकरोति—सर्वथा नेन्द्रियान्तरपारतन्त्र्यं निवर्तते स्वोत्पत्तौ मानसस्य प्रत्यक्षस्य । कुतः ? यदिन्द्रियजविज्ञानविषयाऽनन्तरक्षणो ग्राह्यः तदिन्द्रियविषयजविषयजविषयत्वात्[1] अन्यथा तदिन्द्रियजविषयजविषयाऽनपेक्षणे[2] स्वोत्पत्तौ मानसस्येन्द्रियान्तरजविज्ञानसहकारिणोऽर्थात्प्रवर्तमानस्य रूपविज्ञानस्य स एवाऽन्धाद्यभावः प्रसज्येत । सहकारिभिः सह स्वोपादेयमुपादानमपि करोतीति सहकारीत्युच्यते । यद्युच्येत तुल्यजातीयविषय एव समनन्तरप्रत्ययो भवति नाऽसजातीयविषयः, तेनाऽयमप्रसङ्ग इति, तत्राह—न च तुल्यजातीयविषय एव समनन्तरप्रत्ययः । कस्मात् ? जात्यन्तरसंचाराऽ-

१. तदीन्द्रियविषयजविषयत्वात्; प्र० पा० । तदिन्द्रियजविषयत्वात् २ पु० पा० ।
२. विषयजाऽनपेक्षणे २ पु० पा० ।

रप्रत्ययः। जात्यन्तरसंचाराऽभावात्। न खल्वेष ज्ञानधर्मो, जात्यन्तरसंचारात्। न प्रत्यक्षधर्मोऽवितर्कितरूपाद्यपेक्षणात्। न मानसधर्मः। सुखादिषु तददर्शनात्। अपि च विषयनियमात्पारतन्त्र्यमस्तु सहकारिविशेषाऽपेक्षया वेति पारतन्त्र्यं युक्तं स्मरणे तथा दर्शनात्। एकेन्द्रियग्राह्ये च सजातौ रूपान्तरग्रहणप्रसङ्गः। अवान्तरजात्यपेक्षणे भिन्नसन्तानाऽऽपातः। तदतत्सन्तानवृत्त्योर्ज्जात्यभेदात्। तस्मादेकसन्तानक्षणे समनन्तरप्रत्ययताऽभावप्रसङ्गात्। न तावन्निरुपादानं विज्ञानं भवितुमर्हति। न चाऽनियतोपादानम्। उक्तमेतत्, [1]अनियतहेतुकत्वमहेतुकत्वान्नाऽतिरिच्यत इति। तदिह पूर्वबुद्धिभावाऽभावाऽनुविधानादुत्तरबुद्धिभावाऽभावयोः सैवोपादानमिति युक्तम्। ततश्च शुक्लविज्ञानाऽनन्तरमुपजायमानं घनसारशलाकायां शीतस्पर्शविज्ञानं शुक्लविज्ञानोपादानमेषितव्यम्। अन्यथा शुक्लविज्ञानजातीयस्य संतानस्य शिशिरज्ञानजात्यन्तरसंचाराऽभावः स्यादित्यर्थः।

तदेतद्विभजते—न खल्वेष ज्ञानमात्रस्य धर्मः। कुतः? जात्यन्तरसंचारात्। न प्रत्यग्धर्मः। कस्मात्? अविकल्पितरूपार्थाऽपेक्षणात्। अविकल्पितस्य रूपस्य साक्षात्कारात्तद्विषयपूर्वज्ञानसंभवे तु शब्दादिस्मृतौ सत्यां वाऽऽलोचनमात्रं भवेदित्यर्थः। न मानसप्रत्यक्षधर्मः। कस्मात्? सुखादिषु तद्विषयपूर्वज्ञानाऽदर्शनात्।

एवं तावदुक्तेन क्रमेण सहकारिविशेषाऽपेक्षया क्षणान्तरविषयत्वेऽपि पारतन्त्र्यमापादितं मनसः सम्प्रति विमर्शपूर्वकमिन्द्रियविषयतयैव पारतन्त्र्यमवधारयति—अपि च विषयनियमात्पारतन्त्र्यमस्तु सहकारिविषयाऽपेक्षया वेति विमृश्याऽभिमतमवधारयति—पारतन्त्र्यं युक्तम्। य एव यदिन्द्रियविषयः तत्रैव मनस्तदिन्द्रियतन्त्रं प्रवर्तेत इति युक्तमित्यर्थः। कस्मात्? स्मरणे तथा दर्शनात्। अपि च तुल्यजातीयविषयं समनन्तरप्रत्ययं मानसप्रत्यक्षकारणं ब्रुवाणो न तावदेकेन्द्रियग्राह्यतया तुल्यजातीयतां वक्तुमर्हति, अतिप्रसङ्गादित्याह—एकेन्द्रियग्राह्ये च सजातावभ्युपगम्यमाने रूपान्तरग्रहणप्रसङ्गः, पीतदर्शनमपि चाक्षुषं मानसप्रत्यक्षं चक्षुरसन्निकृष्टेऽपि नीले प्रसुवीत, तदिन्द्रियग्रहणाऽर्हत्वस्योभयत्राऽविशेषादित्यर्थः। यदि त्ववान्तरजातिरास्थीयेत न चासौ रूपान्तर इति नाऽतिप्रसङ्गस्तत्राह—अवान्तरजात्यपेक्षणे हि भिन्नसन्तानज्ञानाऽऽपातः। एकनीलोत्पलसन्तानवर्त्येकनीलोत्पलक्षणविषयमिन्द्रियाऽसन्निकृष्टसंतानान्तरवर्तिनीलोत्पलक्षणविषयमपि विशदं मानसं जनयेत्। कुतः? तदसन्तानवृत्त्या नीलोत्पलक्षणयोर्जात्यभेदात्। उपसंहरति—तस्मादेकनीलोत्पलसन्तानवर्त्तिक्षणविषयेन्द्रियजज्ञाने समनन्तरप्रत्ययत्वं तदिन्द्रिय-

---

१. नियत प्र० पा०।

वदता चक्षुरादिविषयग्राहित्वमेवोक्तं भवति । क्षणविवेकप्रतिभासनादभेद-प्रतिभासनात् क्षणिकत्वप्रतिक्षेपात् ।

विषयज्ञानविषयजविषयस्य मानसस्य वदताऽकामेनापि चक्षुरादिविषय-ग्राहित्वमेवोक्तं भवति । तथा चाऽस्येन्द्रियपारतन्त्र्यमिति सिद्धम् ।

न चैतावताऽपि चक्षुरादिविषयत्वमेव भविष्यति, न चक्षुरादिविषय-ग्राहित्वमित्यत आह—क्षणविवेकप्रतिभासनात् । इदमभिसंहितम् । क्षणिकत्वे हि सिद्धे भावानामेव तद्भवेदपि न त्वेतदस्ति । तथा हि । अस्य साधनं प्रत्यक्षमनुमानं वा भवेत् । प्रमाणान्तराऽभावात् । प्रमाणस्य मतोऽत्रैवाऽन्त-र्भावात् । अनन्तर्भावे तत्त्वाऽनुपपत्तेरिति स्थितेः । तत्र न तावत्प्रत्यक्षं लौकिकं नीलोत्पलादिवर्तिक्षणिकतां गोचरयति । ननु न नीलादन्यत् क्षणिकत्वं नाम वस्तुसत् । अर्थक्रियाभेदे हि तथा स्यात् सितादिवत् । न च क्षणि-कत्वस्य नीलसाध्याया अर्थक्रियाया भिन्ना समस्ति अर्थक्रिया, या स्वलक्षण-भेदेनाऽवतिष्ठेत । क्षणिकत्वं पीतादिवन्नीलसाध्ययैव चेदर्थक्रियया तत्त्वतो नीलाद्भिद्यते । न भिद्यते चेन्नूनं नीलग्राहिणा प्रत्यक्षेणैव क्षणिकत्वं गृहीतं तदव्यतिरेकात् । तदनुपपन्नम् अनुभवाऽनारोहात् न खल्वनुभवो व्याख्यान-मर्हति । स च नीलमिति न तु क्षणिकवचनमिति । तदव्यतिरेकात्तद्गोचरत्वे स्थेम्नोऽपि तदभिन्नस्य तत्त्वप्रसङ्गः । मानान्तरात्तु क्षणिकस्य तद्भेदसिद्धौ प्रत्यक्षसिद्ध्यभिधानं प्रलापः । तत्र तस्याऽवसायाऽजनकत्वात् । अवसायाऽ-ननुगतव्यापारस्य प्रत्यक्षस्य प्रवृत्तिविषयं प्रति प्रामाण्याऽनभ्युपगमात् ।

स्यादेतत् । अनुभवारूढैव क्षणमात्रवर्तिता नीलादीनाम् । तथा हि प्रत्यक्षविज्ञानं क्षणिकं स्वसमयेनैवाऽवच्छिन्नं परिच्छिनत्ति । तद्यथा । नीलाऽऽकारमालोचनं नीलं परिच्छिन्दत् तदभावं व्यवच्छिन्दत् तदभावाऽ-व्यभिचारिणः पीतादीनपि व्यवच्छिनत्ति । तथाऽस्तसमयाऽवच्छिन्नं नीलं परिच्छिन्दत् स्वसमय[1]वर्त्तिताऽभावमप्यस्य व्यवच्छिन्दत् तदभावाऽविना-भाविनीं तत्पूर्वाऽपरसमयवर्तितामस्य व्यवच्छिनत्ति । तदव्यवच्छेदे पीता-दीनामप्यव्यवच्छेदः । तथा च नीलसाध्याऽर्थक्रियाऽर्थिनो न क्वचिदेव नियमेन प्रवर्तेरन् । तदनुभवसिद्धैव क्षणिकता भावानामिति ।

तदनुपपन्नम् । नीलमात्रगोचरत्वादालोचनस्य । न खल[2] तदात्मानमपि गोचरयति, दवीयसी त्वस्य स्वसमयगोचरता । स्वसंवेदनाऽभ्युपगमेऽप्यात्मा-ऽनात्मप्रकाशनमात्रं नात्मानं समयेनाऽऽत्मना वा नीलं समयेन वा घटयेत् ।

---

१. समय प्र० पा० ।   २. खल्व प्र० पा० ।

आलोचनमात्रतया विशेषणविशेष्यभावाऽविषयत्वात्[1]। आलोचनस्यापि तत्समयाऽविच्छेदेऽपि नीलादीनां नैकक्षणमात्रवर्त्तित्वसिद्धिः। आलोचनस्यापि द्वित्रादिक्षणवर्तित्वात् एकक्षणमात्राऽवस्थानाऽसिद्धेः। न चैकस्य क्रमवदनेकसम्बन्धो विरुध्यत इति निवेदयिष्यते। तत्सिद्धं प्रत्यक्षेण क्षणविवेकाऽप्रतिभासनान्नेन्द्रियविषयजविषयता[2]मानसस्य किन्त्विन्द्रिय[3]विषयग्राहित्वमेवेति।

ननु मा नाम क्षणभेदः प्रतिभासताम्, तदभेदस्तु कुत ? इत्यत आह—अभेदप्रतिभासनात्। सोऽयं स्फटिक इति प्रत्यभिज्ञैव भगवती स्थापयिष्यति स्फटिकम्। नन्वियं न स्फटिकस्य पूर्वाऽपरक्षणाऽवस्थानलक्षणं स्थिरत्वं गोचरयितुमर्हति। न खल्वेतद्विज्ञानमेकम्, कारणभेदाद् विषयभेदात् स्वभावविरोधाच्च। तथा हि। स इति पारोक्ष्यमयमिति च साक्षात्कारः। न त्वनयोः स्वभावविरुद्धयोर्दहनतुहिनयोरिव शक्या शक्रेणाप्यैकताऽऽपादयितुम्। त्रैलोक्यस्यैक्यप्रसङ्गात्। सत्यपि च स्फटिक इति व्यपदेशाऽभेदे देशकालभेदाद् विरुद्धधर्म्मसंसर्गादनयोर्गोचरो भिद्यते। न च संस्कारः पूर्वाऽनुभवयोनितया तद्गोचरनियतः सम्प्रतितनीमननुभूतचरीमस्य सत्तामवगमयितुमर्हति। न चेन्द्रियाणि सन्निहितविषयाणि प्राक्तनीं गोचरयन्ति तत्तास्पदस्य[4] सत्तामसन्निहिताम्। न च कारणभेदेऽपि कार्याऽभेदसम्भवः। कारणभेदाऽभेदाऽधीनत्वात्तद्भेदाऽभेदयोः अन्यथाऽऽकस्मिकत्वाऽऽपत्तेः। तत्तेदन्तास्पदे च स्वगोचरमात्रचारिणी स्मरणग्रहणे न परस्परस्य गोचरं सम्भिन्तः। न चाऽऽभ्यामन्यदेकं विज्ञानमुभयविषयाऽसंभेदसमर्थं सम्भवत्युक्तादेव क्रमात्। न चाऽस्य प्रामाण्यम्, विकल्पत्वेनाऽवस्तुनिर्भासित्वात् स्मार्त्तादविशेषाच्च। तस्मात्प्रत्यभिज्ञा स्थापयति भावानिति मनोरथमात्रम्।

अत्रोच्यते। एकमेवेदं विज्ञानं प्रत्यभिज्ञासमाख्यानम्। ननूक्तं स्वभावविरोधान्नेति, तत्किमिदानीं भवतामनुमानविज्ञानमपि नैकम् ? तदपि हि प्रत्यक्षमप्रत्यक्षं वा विकल्पोऽविकल्पश्च समारोपोऽसमारोपश्च। स्वाऽनुभवाऽवस्थापिताऽभेदस्य स्वरूपस्य तद्ग्राह्यभेदाऽपेक्षया प्रत्यक्षत्वादीनामविरोध इति चेत्। न। इहापि साम्यात्। न खल्वेतदपि विज्ञानं तत्तेदन्ताऽधिकरणमेकमाभ्यामनुरक्तं स्फटिकं गोचरयति, यदभिन्नं नानुभूयते अनुभूयते वा। एकत्वेऽपि च वस्तुनस्तदनुरञ्जकतत्तेदन्ताभे[5]दापेक्षया

---

१. विशेषविशेषस्य भावविषयत्वात् २ पु० पा०। २. इन्द्रियविषयता २ पु० पा०। ३. किञ्चिदि प्र० पा०। ४. तत्तास्पदमस्य प्र० पा०। ५. न्ताऽभे प्र० पा०।

प्रत्यक्षतापरोक्षते न विरोत्स्येते । सहसम्भवाद्विज्ञानैकत्वस्य च प्रमाणसिद्धत्वात् । न च स इति पूर्वदेशकालसंसर्गोऽयमिति च सन्निहितदेशकालसंसर्ग एकस्य विरुध्यते । अतो युक्तं यत्पद्मरागस्य स्वरूपे परिच्छिद्यमाने तदभावो व्यवच्छिद्यत इति । तदव्यवच्छेदे तत्स्वरूपाऽपरिच्छेदात् स्वप्रच्युतिव्यवच्छेदस्वभावत्वात् पद्मरागभावस्य । तदव्यवच्छेदे तत्परिच्छेदाऽनुपपत्तेः । कस्मात्पुनस्तदन्ये पुष्परागादयो व्यवच्छिद्यन्ते ? तदभावाऽविनाभावादिति चेत्, स एव कुतः ? प्रत्यक्षेण कदाचिदपि पुष्परागपद्मरागयोस्तादात्म्याऽनुपलम्भादिति चेत् । यत्र तर्हि सतस्तादात्म्यप्रतीतिः तत्र न तदभावाऽविनाभावः । समस्ति च सोऽयं पद्मराग इति देशकालभेदाऽनुगतमेकं पद्मरागतत्त्वमवभासयन्ती साक्षात्कारवती प्रतीतिः । तेन भवतु देशकालयोस्तत्संसर्गयोर्वा परस्परमतदात्मत्वं न तु तदवच्छिन्नस्य पद्मरागस्य । तस्य भावात्संसर्गाभ्यां चाऽन्यत्वात् । ततोऽन्यत्वे तत्संसर्गयोः कुतस्तदीयत्वमिति चेत् । स्वभावादेवेति संसर्गपरीक्षायां निपुणतरमुपपादयिष्यते । तस्मात्तत्तेदन्ताऽऽस्पदस्य पद्मरागस्य[1] तदवभासिनोऽनुभवस्य चैकत्वमनुभवाद्वा अनुमानाद्वा तदवभासलक्षणफलाऽभेदजन्मनः सिद्धम्[2] । विशदतरकार्यसिद्धौ चाऽप्रतीयमानमपि कारणं कल्पनीयं न पुनरप्रतीयमानकल्पनाभयात् कार्यवैशद्यमपह्नोतुमुचितम् । रूपादिविज्ञप्तीनामप्यपह्नवप्रसङ्गात्[3] । तदिह यद्यपीन्द्रियं केवलमसमर्थं यद्यपि च संस्कारमात्रं संस्कारसध्रीचीनं त्विन्द्रियं भावयिष्यति प्रत्यभिज्ञातद्भावाऽभावाऽनुविधानात् प्रत्यभिज्ञाभावाऽभावयोः । न हि नाऽजीजनद्[4] बीजमङ्कुरमिति मृदादिसहितमपि न जनयति । तेन भवतु स्थिरस्य भावस्य सहकारिप्रत्यय[5]समवधानसमासादिताऽतिशयस्य कार्यकारिता, भवतु वोपसर्पणं प्रत्ययपरम्परालब्धतथात्वादभेदस्य, उभयथाऽपि लोचनादीनां संस्कारसहितानामनुभववासनाभेदसहभुवां वा प्रत्यभिज्ञानजननसामर्थ्यसम्भवः । अनुभववासनामात्रजत्वेऽयमित्यनुपपत्तेरिन्द्रियमात्रजत्वे वा स इति अनर्थजत्वे वा अर्थसंनिधानाऽसंनिधानाभ्यां तत्प्रतिभासभेदाऽनुपपत्तेः । न चैवमतीतकालसम्बन्धितेन्द्रियाणाम् । तदसम्बन्धेऽप्यतीतकालतायास्तत्पारम्पर्यसम्बन्धसंस्कारद्वारेणाऽवभासोपपत्तेः । न चैवमतीतकालता न प्रत्यक्षेति साम्प्रतम् । इन्द्रियजविज्ञानविषयत्वात् तन्मात्रानुबन्धित्वाच्च प्रत्यक्षताया इन्द्रियसम्बन्धत्वे । तन्मात्रा[6]नुबन्धित्वे तु तज्ज-

१. तस्मान्नाऽभेदो नापि सादृश्यं पद्मरागस्येति २ पु० पा० ।
२. लक्षणाद्वा नाऽसिद्धम् २ पु० पा० ।
३. ज्ञप्तीनामप्यपह्नवप्रसङ्गात् ।
४. जनयति २ पु० पा० ।
५. एकप्रत्यय २ पु० पा०
६. इन्द्रियसंबन्धमात्र २ पु० पा० ।

विज्ञानाऽविषयाणामपि तद्गन्धादीनां[1] परमात्ममनःप्रभृतीनामप्रत्यक्षत्वप्रसङ्गः[2]। तस्मान्न कारणाऽभावः। नापि सामग्रीभेदः, यतः कार्यभेदः स्यात्। तस्मिन् जनयितव्ये नियमेन तत्पूर्वभाविनां संस्कारेन्द्रियादीनामेकत्र सामग्रीभावात्। तत्सिद्धमभेददर्शनं प्रत्यभिज्ञानात्मकमेकमनेकदेशकालाऽवस्थासम्बन्धं पद्मरागादि गोचरयतीति। च चेदं स्मार्त्तम्, पूर्वाऽपरदेशकालाऽवस्थानुगतेरधिकारात्[3]। न च विकल्परूपतयाऽस्याऽप्रामाण्यम्, अभिलापसंसर्गयोग्यप्रतिभासप्रामाण्ययोरविरोधात्। समारोपितगोचरत्वस्याऽसति वाधकेऽनुपपत्तेः। न चैतदनुसन्धानमात्रं यथा भिन्नानामपि यजमानानामेकीभूता वयमिह सत्रे इति व्यपदेशमात्रं तत्केनचिदुपाधिना न त्वेकत्वावगमः। इह तु देशकालाऽवस्थासंसर्गभेदेऽपि पश्यन्त्येकं पद्मरागतत्त्वमभिन्नदेशकालमिव लौकिकपरीक्षकाः। तत्सिद्धमभेदप्रतिभासनादिति।

नन्वस्त्वभेदप्रतिभासः, न पुनरयमक्षणिकतामावहति भावादीनाम्। बाधके सति समारोपितगोचरत्वात्। अस्ति हि वाधकं यत् सत्तत् क्षणिकं यथा घटादि। संश्च विवादाऽऽस्पदीभूतः शब्दादिरिति स्वभावहेतुः। भावमात्राऽनुवन्धिसाध्यविषयत्वात्। कथं पुनरिह सत्तामात्राऽनुबन्धसिद्धिः क्षणिकतायाः पूर्वाऽपरभागविकलकालमात्राऽवस्थितिलक्षणायाः? । इत्थम्। तथा हि। सर्वोपाख्यारहितविपरीतरूपनिरूपणा सत्ता भावानां नाऽर्थक्रियाकारिताया अतिरिच्यते। नो खलु समस्ताऽर्थक्रियाऽनुपयोगिभावसंभवः। तथा हि—स्वरूपमात्राऽनुबन्धिसार्वज्ञविज्ञानगोचरो न वा? अगोचरश्चेन्निरुपाख्यो न भावः। तद्विषयताव्याप्तस्य वस्तुरूपस्य तन्निवृत्तौ निवृत्तेः। तद्गोचरत्वे वा कथमनालम्बनम्? आलम्बनं चेत् कथमप्रत्ययः? प्रत्ययश्चेत्कथमर्थक्रियायां नोपयुज्यते? तदर्थक्रियाकारितैव सत्ता भावानाम्। सा च क्रमाऽक्रमाभ्यां व्याप्ता। तृतीयप्रकारविरहात्।

तथा हि। भावानां तासु तास्वर्थक्रियासु क्रमाऽक्रमौ परस्परपरिहारवन्तौ त्यक्षत एव चकास्तः। तथा च प्रकारान्तरमपि क्रमाऽक्रमात्मकमीदृशाभ्यामेवाऽनुभूताऽवसिताभ्यां क्रमाऽक्रमाभ्यां व्यतिरिक्तमङ्गीक्रियेत, ततो दृश्यमानयोस्तयोरपि क्रमाऽक्रमयोः परस्परसङ्करप्रसङ्ग इति दृश्यमानः क्रमोऽक्रमात्मकोऽक्रमश्च क्रमात्मक इति तथैवाऽनुभवक्रिये प्रसज्येयाताम्। तदेवं परस्परपरिहारवन्तौ क्रमाऽक्रमौ परिच्छिन्दत्

---

१. अपि तत्सम्बन्धवताम् २ पु० पा०।

२. प्रसङ्गात् २ पु० पा०।

३. अवस्थाऽवगतेरधिकारार्थत्वात् २ पु० पा०।

प्रत्यक्षमेव प्रतिक्षिपति, न मृष्यति च प्रकारान्तरमीदृक्क्रमाऽक्रमसंकीर्णमेकम्। तदनुपलम्भश्च दृश्यविशेषणरहितोऽपि दृश्यमानतादात्म्यनिषेधात्मकतया तदभावव्यवहाराय कल्पते। दृश्यमानस्तम्भनादात्म्येन स्वयमदृश्यानां पिशाचप्लवङ्गमादीनामविशेषेणाऽनुपलम्भमात्रेणाऽसद्व्यवहारसिद्धेः। अनेवंभूतक्रमयौगपद्यव्यतिरेकवति तु प्रकारान्तरे क्रमयौगपद्ये एव न संभवतः। ननु मा भूतामस्त्वन्य एव क्रमाऽक्रमाऽभिधानयौगपद्यादन्यप्रकारो अमास्थाय अर्थक्रियामुपयोक्ष्यत इति चेत्। नन्वेषां प्रकारान्तरवर्तिकमर्थक्रिया पिशाचायमानैव? तथा चेत्किं नश्छिन्नम्। दृश्यमानास्त्वनुभूताऽवसितपरस्परव्यावृत्तक्रमयौगपद्यरूपप्रकारद्वयसमालिङ्गितशरीरा अर्थक्रिया न प्रकारान्तराद् भवितुमीशते। न च तदपि। तथा हि। यत्र यत्प्रकारव्यवच्छेदेन यदितरप्रकारव्यवस्थानं तत्र प्रकारान्तरसंभवः। तद्यथा नीलप्रकारव्यवच्छेदेनाऽनीलप्रकारव्यवस्थानं पीते। अस्ति च क्रमयौगपद्ययोरन्यतरव्यवच्छेदेन तदितरप्रकारव्यवस्थानं व्यवच्छिद्यमानप्रकारान्तराऽविषयीकृते अर्थक्रिया सर्वत्र कार्यकारण[1] इति विरुद्धोपलब्धिः। निषिध्यमानप्रकारान्तरसम्भवविरुद्धं हि द्वयोरन्यतरनिषेधेऽन्यतरव्यवस्थानमिति प्रकारान्तराऽभावाद् भावानामर्थक्रिया क्रमाऽक्रमाभ्यां व्याप्ता, तौ च स्थिराद्व्यावर्तमानौ अर्थक्रियामपि व्यावर्तयतो वृक्षतेव शिंशपात्वमेकशिलामयादचलप्रदेशात्।

तथा हि। न तावत्क्रमेणाऽर्थक्रियासम्भवः, स्वेनैव हि रूपेण भावा अर्थक्रियासूपयुज्यमाना दृश्यन्ते यतो[2] यद्यत्कार्यान्वयव्यतिरेकाऽनुविहितभावाऽभावं तत्तत्कार्यप्रसवसमर्थम्, रूपं च तेषां कार्येणाऽनुकृताऽन्वयव्यतिरेकमिति तदेव समर्थम्। तच्च द्वितीयादिष्विव क्षणेषु प्रथमेऽपि क्षणे सदिति द्वितीयादिक्षणजन्यं कार्यकलापं प्रथमे एव क्षणे जनयेत् समर्थस्य क्षेपाऽयोगादिति नाऽक्षणिकस्य क्रमवद्व्यापारसम्भवः।

स्यादेतत्। असमर्थोपि क्रमवत्सहकारिसंनिधानात् क्रमे[3]ण करोतीति। तदनुपपन्नम्। विकल्पाऽसहत्वात्। किमस्य सहकारिणः कंचिदुपकारमादधति न वा? आदधाना अपि भावाद्भिन्नमभिन्नं वा? तत्र भिन्नोपकाराऽऽधाने भावरूपे सत्यप्यलब्धजनने सत्यप्यस्मिन्ननुपलब्धेरुत्पत्तिमत एवोपकारात्कार्यस्य निष्पत्तेर्न [4]तत्कारी भावः स्यात्। न चोपकारसहकारिणः कार्यजननमिति साम्प्रतम्। उपकारस्योपकारान्तरजननेऽनवस्थापातात्। तत एव

१. विषयीकृते सर्वकायकारण २ पु० पा०। २. तेनोपायात् २ पु० पा०।
३. किं प्र० पा०। ४. तत्कारीभावः प्र० पा०।

चोपकार्यस्योत्पत्तेर्भावस्याऽतत्कारित्वप्रसङ्ग इत्युक्तम् । अभिन्नोपकाराधाने भाव एवाऽभिधीयेत, न च स प्राक् सिद्धः शक्य आधातुम् । अनुपकारकत्वे वा सहकारिणो भावेन नाऽपेक्ष्येरन्नित्युत्पन्नमात्रमेव वीजमङ्कुरं जनयेत् । अनपेक्षस्य क्षेपाऽयोगात् । क्षेपे वा पश्चादपि न जनयेत् । यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणः, यस्मात्तैः सहभावः कार्यं करोति । न च नाऽपेक्ष्यन्ते । तैर्विना कार्यस्याऽनुत्पत्तेरिति । तन्न । स्वरूपेण चेत्कार्यजनको भावः कस्मान्नैतानन्तरेण जनयति ? । तेभ्यः प्रागपि रूपसद्भावात् । सहकारिरूपेण वा जनकत्वे त एव जनका न भावाः । अन्यरूपेण वाऽन्यस्य जनकत्वे गगननलिनस्यापि सत्त्वेन सद्व्यवहारगोचरत्वप्रसङ्गः । न चोभयभावाऽभावाऽनुविधानादर्थक्रियाभावाऽभावयोरेकैकस्माच्च व्यभिचारादस्माद्रुभयाऽधीनजन्मतेति साम्प्रतम् । चरमभाविनि सति हेतौ उत्पत्तिमति कार्योत्पत्तेरवश्यम्भावनियमेन व्यभिचाराऽभावात् । न च स्वकारणात्कतिपयकालकलाविलम्बेन कार्यजननस्वभावो भावो जात इति स्वभावादेव विलम्बकारीति साम्प्रतम् । विकल्पाऽसहत्वात् । किं कतिपयकालविलम्बेऽस्य विलम्बनकारितास्वभावो निवृत्तौ न वा ? निवृत्तश्चेत् कथं स[1] भावो न निवृत्तः ? स्वभावनिवृत्तेः । अनिवृत्तौ वा कथमस्य स्वभावः ? निवृत्ताऽनिवृत्तरूपविरुद्धधर्मसंसर्गात् । अतत्स्वभावत्वे वा न विलम्बत इति जन्माऽनन्तरमेव कृतकृत्यः प्रसज्येत । अनिवृत्तौ कतिपयकालकलाऽतिक्रमेऽपि न कार्यं जनयेत् । विलम्बकारिताया रूपस्य तादवस्थ्यात् । तदुक्तेन क्रमेण न क्रमेणाऽर्थक्रियाकारिता सम्भवति भावस्य । नापि यौगपद्येन युज्यते । तस्माद्यावत्कार्यं किमपि प्रथमे क्षणे तेनाऽक्षणिकेन स्वेनाऽऽत्मना संपादिता तावत्सर्वं द्वितीयादिक्षणे संपादयेत् । तावत्कार्यसंपादनयोग्यस्याऽऽत्मनो द्वितीयादिक्षणेषु संनिधानात् । तथा च संपादितस्य संपादनाऽनुपपत्तेः तदन्यत्वे द्वितीयादिक्षणसंपाद्यस्य न यौगपद्येन निखिलाऽर्थक्रियानिर्वर्त्तनमक्षणिकस्य युज्यते । तदनेन पर्यायेण नाऽक्षणिकस्य क्रमाऽक्रमाभ्यामर्थक्रियाकारिता कल्प्यत इति । विपक्षे अक्षणिकत्वे व्यापकाऽभावात्ततो व्यावर्त्तमानं सत्त्वं क्षणिकत्वेन व्याप्यत इति प्रतिवन्धसिद्धिः ।

स्यादेतत् । क्षणिकोऽपि भावोऽर्थक्रियाजननस्वभावो न वा ? न चेदसन्नेव । जनकस्वभावश्चेत् किमस्य सहकारिभिः ? इत्युत्पन्नमात्रमेव वीजमङ्कुरं जनयेत् । ननूत्पन्नो बीजक्षणः समर्थो जनयत्येवाऽङ्कुरं कुतः पुनस्तस्योत्पत्तिः पूर्वस्माद्बीजक्षणात् तर्हि तत्संतानपतितानां सर्वेषां बीजत्वाऽविशेषादङ्कुरजननसामर्थ्यमिति लब्धजन्ममात्रमेव वीजमङ्कुरं जनयेत् ।

---

१. स्व प्र० पा० ।

मैवम्। पूर्वपूर्वक्षितिबीजपवनादिक्षणसमवधानोत्पन्नाऽतिशयवत्तदुत्तरोत्तर-क्षणपरम्परालब्धजन्माऽन्यो बीजक्षणः समर्थः समर्थक्षित्यादिक्षणसहभूतोऽनपेक्ष एवाङ्कुरं जनयति। न चाऽस्य क्षित्यादिसहभुवस्तदनपेक्षस्यापि तैर्विना कार्यकरणम्। तदेकसामग्र्याधानस्य तदभावे अभावात्। न चाऽसहकारिता क्षित्यादीनाम्। तैरेव महाऽङ्कुरजननात्। तेषामपि तत्पूर्वभावित्वस्य नियमवत्त्वाऽविशेषात्, तन्मात्रत्वादेव च कारणतायाः। न चाऽनपेक्षाणामपि परस्परं कार्यान्तराऽऽरम्भणाम, तन्मात्रस्य तेभ्य उपलब्धेः तत्रैव सामर्थ्यनियमात्। न च कृतकरतयेतरेषामक्रिया, सहक्रियायां कृतमित्यसंभवात्। न च स्वकारणबललब्धपरस्परसंनिधयोऽप्रेक्षावन्तः शक्यमिदमेकेनाप्यस्मासु कर्त्तमिति कृतं संनिधिनेति निर्वर्तितुमीशते। न च सहकारिकारणभेदः कार्यभेदहेतुः, अपि तु सामग्रीभेदः। तस्मिन् सति कार्यभेदोपलब्धेः। अभिन्ना चेह सामग्रीति न कार्यभेदसम्भवः। परस्परसमवधानं चोपसर्पणप्रत्ययेभ्यः क्षित्यादीनामिति न क्षणिकस्याऽर्थ-क्रियाविरोधादसाधारणता हेतोः। न च साध्यधर्मिणि दृश्यमाने शब्दादौ व्याप्तिप्रसाधनादेव साध्यसिद्धेरसाधनाऽङ्गहेतुवचनम्। न खलु सर्वोप-संहारवती व्याप्तिर्दृश्यमात्रविषया भवितुमर्हति। शक्यं हि शङ्कितुं परेण दृश्यमानानां सत्त्वमक्षणिकत्वान्न व्यावर्त्तितं त्वयेति सत्त्वमनैकान्तिकं न क्षणिकत्वसाधनम् इति। तस्माद्यत्सद् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति दर्शनीया व्याप्तिः। नन्वेवमपि शब्दादेर्विवादाऽऽस्पदीभूतस्य व्याप्तिर्दर्शन-बलादेव सिद्धा क्षणिकतेति तदवस्थमेवाऽसाधनाङ्गत्वं हेतुवचनस्य। मैवम्। असत्यपि शशविषाणादौ यत्सद् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति यथा सर्वोपसंहारवती व्याप्तिः सिध्यति। न च शशविषाणादयो भवन्ति क्षणिकाः। एवमसत्यपि विवादास्पदीकृते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकतेत्यवश्यं दर्शयितव्यमेव तेषां क्षणिकत्वसाधनाय सत्त्वमिति नाऽसाधनाङ्गता हेतुवचनस्य। अपि च कृतका भावाः स्वहेतुभ्य उपजाय-माना विनश्वरा जायन्ते[1] अविनश्वरा वा? विनश्वराश्चेदुदयानन्तर-मेवाऽपवृज्येरन्निति सिद्धिः क्षणभङ्गः। अथाऽविनश्वराः, न कदाचिदपि नश्येयुः। न खल्वविनश्वरो विनष्टुमर्हति। न जातु स्वकारणादुत्पन्नं नीलं पीतं भवति। न च हेत्वन्तराऽधीनजन्मा विनाश एषामिति साम्प्रतम्। विकल्पाऽसहत्वात्। स हि हेत्वन्तरेण जन्यमानो विनाशो भावाद्भिन्नोऽभिन्नो वा। न तावदभिन्नः कारणभेदात्। भिन्नत्वे तु भावस्य तादवस्थ्यात

१. तद्धेतुना उपजायमाना जायन्ते २ पु० पा०।

पूर्ववदुपलब्ध्यादिप्रसङ्गः। तेन भावस्तिरोधीयत इति चेत्। न। तिरोधानस्यापि भेदे भावतादवस्थ्यम्। अभेदे वा हेतुभेदाऽनुपपत्तिः। तस्मादभावस्यापि समस्तरूपविरहिणो विकल्पितस्य क्रियाऽनुपपन्नेति अभावं करोतीति करोतिक्रियाया अभावेन निःस्वभावेन संबन्धाऽनुपपत्तेः। नञा सह सम्बन्धो भावं न करोतीति। यश्च न करोति तस्याऽकारकस्याऽहेतुत्वमिति न विनाशहेतवः।

केचित् तु तस्मात्स्वहेतोरयमेकक्षणस्थितिधर्मा भावो जात इति द्वितीयक्षणे स्वयमेव न भवति, न पुनरत्र हेतुमपेक्षते। न खलु स्वकारणतः स्वभावव्यवस्थितं नीलमुपजायमानमपीतादिभावे हेतुमपेक्षते पर्यनुयुज्यते[1] वेति। अपि च कृतकानां भावानामवश्यम्भावी विनाशः प्रतीयते तेनापि शक्या क्षणिकताऽनुमातुम्। तथा हि। यद्येषां ध्रुवं भावि तत्र तेषां हेत्वन्तराऽपेक्षा नास्ति यथा रूपादीनां लोहमयत्वे। ध्रुवभावी च कृतकानां भावानां विनाश इति विरुद्धव्याप्तोपलब्धिर्विनाशस्य हेत्वन्तरायत्ततां प्रतिक्षिपति। ध्रुवभाविता हि निषिध्यमानहेत्वन्तराऽपेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्त्या लब्धा हेत्वन्तराऽनपेक्षत्वमुपस्थापयति। तच्च स्वविरुद्धं हेत्वन्तराऽपेक्षत्वमपाकरोति। यथा हि। ये ये हेत्वन्तरापेक्षा न ते ध्रुवभाविनः तथा वाससि रागादयः। यथा यदि भावा अपि स्वहेतुभ्यो हेत्वन्तरं विनाशं प्रत्यपेक्षेरन् ततस्तस्य संनिधाननियमप्रमाणाऽभावात् कश्चित्कृतकोऽपि न विनश्येत्। सोयमवश्यम्भावी क्षणिकानां भावानां विनाशः स्वहेतुभ्य एवैकक्षणाऽवस्थायिनामुत्पत्तिं सूचयति। तथा च स्वयमेव न भवन्ति भावा द्वितीये क्षणे इति सिद्धः क्षणभङ्ग एतेषाम्।

सदृशपराऽपरोत्पत्तिविप्रलब्धबुद्धयस्तु क्षणानामन्योऽन्यस्य भेदमपश्यन्तोऽज्ञादिवदर्वाग्दृशस्तदेवेदं स्तम्भादीत्यध्यवस्यन्तीत्याशङ्क्याह—

क्षणिकत्वप्रतिक्षेपात्।

इदमाकूतम्। नैव तावत्सत्त्वं क्षणिकत्वसाधनसमर्थं क्षणिकत्वे व्यवस्थाऽनुपपत्तेरसाधारणत्वात्। तथा हि। अन्त्यक्षणप्राप्तानां क्षणानां कार्यजननमुपेयते। तत्रेदं भवान् पृष्टो व्याचष्टां किमेकस्मादेकं कार्यमुपजायते उताऽनेकम्? एवं किमनेकस्मादेकं कार्यमुताऽनेकमिति? न तावदेकस्मादेककार्येण खल्वनुकृताऽन्वयव्यतिरेकं कारणं तदुच्यते यस्य कार्योत्पादात्प्राङ् नियमवान् भावः। अनुकारयन्ति च बहव एव क्षितिबीजादयः स्वाऽन्वयव्यतिरेकावङ्कुरं यत् नियमेन तदुत्पादस्य पुरस्तात् सहभवन्तः।

१. वेति प्र० पा०।

काकतालीयन्यायेन तु क्षित्यादिक्षणानां प्राग्भावो न नियमवान् भवेत्। न चाऽङ्कुरमात्रं बीजक्षणस्य परस्तादवश्यम्भावि। क्षित्यदीनामपि तथाभावात्। तान्यपि खल्वङ्कुर इव बीजक्षणस्य परस्तादवश्यम्भावनियतानि। न च पौर्वापर्यनियमादन्यः कार्यकारणभावः। अपि च एकैककारणत्वाऽभावे न नियमेनाङ्कुरादिसहभुवो भूम्यादयो भवेयुः। तस्मा[1]दनेकस्मान्नैकम्? यदाह न किंचिदेकमेकस्मा दिति। नाप्येकस्मादनेकम्, अनेकक्षितिबीजतेजोऽनिलसलिलाऽनन्तरभावनियमादङ्कुरादीनामनेकेषाम्। नाप्यनेकस्मादेकस्यैवाङ्कुरस्य जन्मेति साम्प्रतम्। अङ्कुराद्भिन्नानां भूम्यादीनां तेन सहैकहेतुकत्वाऽभावे तत्सहभावनियमाऽभावप्रसङ्गात्। तत्सहभावनियमस्य चाऽङ्कुरवत्तेषामप्यविशेषात्। तदनेकस्मादनेकोत्पत्तिः परिशिष्यते।

तत्रेदमालोचनीयम्। किं पूर्वक्षणा उत्तरेषां क्षणानां परस्परनिरपेक्षा एव जनका आहो स्वित्सापेक्षा? इति। ननूक्तमन्त्यक्षणप्राप्ताः परस्परनिरपेक्षाः कार्याणि जनयन्तीति तत्किमनभ्युपेतारोपितप्रतिषेधप्रपञ्चेन। तत्किमिदानीं समर्थबीजक्षणजनकोऽपि तज्जनने इति कृतं सहकारिभिः। ननूक्तं नैते प्रेक्षावन्तः किं तु स्वप्रत्ययाऽधीननियतसंनिधयो न व्यवधेरीशते इति। किमयं कृषीवलोऽपि न प्रेक्षावान् यः कुसूलादपनीय बीजमावपति भूमौ परिकर्मितायां क्षित्यादिसहभाविन एवाऽतिशयोत्पादपरम्परयाऽङ्कुरजननसामर्थ्यदर्शनात्। बीजस्य कुसूल[2]स्थस्य वत्सरशतेनापि तददर्शनात्। तत्रावपतीति चेत्। अथ किमयं न स्वसंतानमात्रप्रभवसमर्थो बीजक्षणः? तथा चेत् कथं संतानान्तरं सहकारि नापेक्षेत कार्यकरणे? नन्वपेक्षत एव चैष स्वोत्पादे न स्वकार्ये तत्र चाऽस्याऽनपेक्षत्वमुच्यते न तु स्वोत्पत्तौ। ननूत्पत्तावप्यस्य स्वसंतानवर्ती जागर्ति पूर्व एव निरपेक्षः क्षणः। एवं तस्य पूर्वः पूर्वः स्वसंततिपतित एवाऽनपेक्षो जागर्ति जनने इति कुसूलनिहितबीजे एव स्यात्कृती कृषीवलः, कृतमस्य प्रेक्षावतः कृषिकर्मणला दुःखाकरेणेति।

यदि मन्येत द्विविधमिह कार्यम्। एकं सहकारिभिराहिताऽतिशयविशेषमपरम्पराप्रसवधर्मकं द्वितीयं तु सहकार्यतिशयनिरपेक्षजननम्। तत्राऽङ्कुरे आहिताऽतिशयविशेषं पराऽपेक्षजन्म। आद्योऽतिशयस्तु सहकारिकृताऽतिशयपरम्परानिरपेक्षोत्पादः। न चैतदुभयविधमपि कार्यं बीजस्य

---

१. तस्मादनेकस्मादेकम् प्र० पा०। तस्मादेकम् २ पु० पा०।

२. कुसूलस्थाद प्र० पा०।

संतानमात्रादुत्पत्तुमर्हतीति क्षित्यादिसंतानान्तराऽपेक्षमेव स्वसंतानवर्ति[1]त्वात्कादाचित्कं कार्यं करोतीति कल्पते कृषिकर्म। संतानान्तराणि तु कादाचित्कार्योत्पत्तौ ये सहकारिप्रत्यया: त एव यथाऽङ्कुरोत्पत्तौ सहकारिणो बीजस्य सामर्थ्यप्रबोधहेतवः कदाचित्त्वेषां क्षित्यादीनां ये मेलनहेतवस्त एव सामर्थ्याऽवबोधहेतवो भवन्ति तथा बीजानामाद्याऽतिशयोत्पादने सामर्थ्यप्रबोधहेतव उपसर्पणप्रत्ययाः। सर्वथा संतानान्तरैरनाहिताऽतिशयसामर्थ्यं न बीजं कार्यविशेषं कादाचित्कं करोति। सामर्थ्यप्रबोधहेतवश्च द्वये सहकारिप्रत्यया उपसर्पणप्रत्ययाश्चेति।

तदनुपपन्नम्। तथा हि। भवतु द्विविधं कार्यम्, अस्तु च तत् कादाचित्कत्वात्संतानान्तराऽपेक्षम्। अपेक्षाऽर्थस्तु वक्तव्यः। कारणस्य स्वसामर्थ्यप्रबोध इति चेत्। ननु सामर्थ्यतत्प्रबोधयोः समर्थभावतत्प्राकट्याऽव्यतिरेकात् समर्थप्रत्ययोत्पाद इत्युक्तं स्यात्। तथा च स्वोत्पादे अपेक्षेत कारणं सहकारिप्रत्ययान्[2]। सत्यम्। नाऽभ्युपगम एव दोषत्वेन चोद्यते। अथाऽयमङ्कुरसमर्थो वा क्षण आद्याऽतिशयो वा किं निरपेक्षेण स्वसंतानमात्रजन्मना पूर्वबीजक्षणेन जन्यते निरपेक्षेण न पुनः स्वसंतानमात्रजन्मना। तस्यापि पूर्वस्मादेव पुञ्जादुत्पत्तेः। ननु समानकुसूलजन्मसु बहुषु बीजसंतानेषु कस्मात्किंचिदेव बीजं परम्परयाऽङ्कुरजननाऽनुगुणमुपजनयति बीजक्षणाम्, नाऽन्ये बीजक्षणा भिन्नसंताने पतिताः। न खलु उपसर्पणप्रत्ययात्प्राक्तेषां समानाऽसमानसंतानवर्त्तिनां कश्चित्परस्पराऽतिशयो बीजक्षणानाम्। अथोपसर्पणप्रत्ययात्प्राक् न तत्संतानवर्त्तिनो जनयन्ति परम्परयाप्यङ्कुरजननाऽनुगुणं बीजक्षणम्। बीजमात्रजननात्तु तेषां कस्यचिद् बीजक्षणस्योपसर्पणप्रत्ययसहभुव आद्यातिशयोत्पादः। हन्त तर्हि तदभावे सत्युत्पन्नोऽपि जनयेदेव। न चाऽस्योपसर्पणप्रत्ययेन सहभावनियमः। तत्सन्तानानां कुसूलवर्तिनां बीजक्षणानां तेन सह समानयोगक्षेमाणामप्युपसर्पणप्रत्ययसहभावाऽभावात्। क्षणस्य चैकस्य क्षणान्तरेणैकेन कार्यकारणभावनिश्चयाऽयोगात्सामान्यविषयत्वादन्वयव्यतिरेकयोस्तत्रैवोपपत्तेः। न खलु कारणभेदेन। तथा च केवलानां व्यभिचारसम्भवादाद्याऽतिशयोत्पादमङ्कुरोत्पादं वा प्रति क्षित्यादीनां परस्पराऽपेक्षाणामेवोत्पादकत्वमकामेनाप्यङ्गीकरणीयम्।

अपि चाऽन्त्यक्षणप्राप्तं बीजमनपेक्षमङ्कुराऽवनिपवनपाथस्तेजांसि जनयेत्। किं येनैव रूपेणाङ्कुरं जनयति तेनैव तदितराण्यपि किं वा रूपान्तरेण ? न तावत्तेनैव। क्षित्यादीनामप्यङ्कुरस्वाभाव्यापत्तेः। न खलु कारणा-

१. वर्ती २ पु० पा०। २. सहकारिप्रत्यात प्र० पा०।

ऽभेदे भेदवत्कार्यं भवितुमर्हति । कार्यभेदस्याऽऽकस्मिकत्वप्रसङ्गात् । यदाह — 'अयमेव हि भेदो भेदहेतुर्वा य द्विरुद्धकर्माऽध्यासः कारणभेदश्चे' ति । नापि सामग्रीभेदः । तस्या अप्येकत्वात् । अन्यथा सहभावे नियमाऽभावात् । रूपान्तरेण तदितरेषां जनकम् । तथा हि । बीजमङ्कुरादि जनयदुपादानं तद्विक्रियया तदुपपत्तेः । तदितरेषु पुनरस्य सहकारिप्रत्ययता । तेषां तु पूर्वे पावनादयो यथास्वमुपादानानि, तद्विक्रियया तदुत्पादादिति चेत् । ननु सहकारितोपादानतेति किमेकं तत्त्वं नाना वा ? एकं चेत्कथं रूपान्तरेण जनकम् ? नानात्वेऽप्यनयोर्बीजाद्भेदोऽभेदो वा ? भेदे कथं बीजस्य जनकत्वम् ? ताभ्यामेवाऽङ्कुरादीनामुत्पत्तेः[1] । अभेदे वा कथं बीजस्य नानात्वं ? भिन्नतादात्म्यात् । एतयोर्वैक्यमेकतादात्म्यात् ।

यच्चुच्येत क्षित्यादौ जनयितव्ये तदुपादानभूतमेव क्षित्यादिर्बीजस्य रूपान्तरमिति । न तर्हि बीजं तदनपेक्षं क्षित्यादीनां जनकम् । तदनपेक्षत्वे तेषामङ्कुराद्भेदाऽनुपपत्तेः । न चाऽनुपकारकाण्यपेक्ष्यन्त इति त्वयैवोक्तम् । न च क्षणिकस्योपकारसंभवोऽन्यत्र जननात् । तस्याभेद्यत्वात् । तथा चाऽर्थक्रियाकारिताया एकाऽनेकत्वसाऽपेक्षत्वव्याप्तत्वात् । तृतीयप्रकारविरहादनयोरन्यतरनिषेधस्याऽन्यतरविधाननान्तरीयकत्वात् क्षणिकत्वे च तद्व्यापकयोरेकाऽनेकत्वप्रकारयोरभावादुक्तेन क्रमेण सत्त्वं न निवृत्तमित्यसाधारणाऽनैकान्तिकं गन्धवत्त्ववदिति ।

यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणोऽपेक्षणीयाश्च कार्येणाऽनुविहितभावाऽभावत्वात्सहकार्यकरणाच्च । नन्वनेन क्रमेणाऽक्षणिकोऽपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः कार्येणाऽनुकृताऽन्वयव्यतिरेकानपेक्षिष्यते करिष्यते च क्रमवत्सहकारिसमवधानवशात्क्रमेण कार्याणीति व्यापकाऽनुपलब्धेरसिद्धेः संदिग्धव्यतिरेकमनैकान्तिकं सत्त्वं क्षणिकत्वसिद्धाविति । नन्वयमक्षणिकः स्वरूपेण कार्यं जनयति । तच्च स्वरूपं तृतीयादिष्विव क्षणेषु द्वितीयेऽपि क्षणे सदिति तदाऽपि जनयेत् । अकुर्वन्वा तृतीयादिष्वपि न कुर्वीत स्थिरस्य तादवस्थ्यात् । अतादवस्थ्ये वा तदेवास्य क्षणिकत्वमिति ।

अत्रोच्यते । सत्यं स्वरूपेण कार्यं जनयति, न तु तेनैव, सहकारिसहितस्य तस्य जनकत्वात् । क्रमवत्स्वप्रत्ययाऽपेक्षिणस्तत्सहकारिसमवधानस्य द्वितीये क्षणे भावात् स्वरूपवत् सहकारिसमवधानमप्यात्मनोऽन्वयव्यतिरेका-

---

1 अङ्कुरत्वापत्तेः । २ पु. पा. ।

वनुकारयति तत्कार्योत्पादने । न चैतावता सहकारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धेः कृतमेतेषां स्वरूपेणेति साम्प्रतम् । तत्सहितादेव ततस्तदुत्पत्तिदर्शनाद्रूपे सत्यप्यनुत्पादात् । समवधाने तु उत्पादादेव कार्यस्य तदेव हेतुः न पुना रूपमपीति चेत् । नन्वेवमहेतुत्वे समानेऽपि बीजे रूपस्य रासभादिभिः सह कस्माद्बीजरूपे सत्येवाङ्कुरोत्पादो न रासभादिषु ? सत्स्वेव बीजादिस्वरूपसमवधानस्यैव हेतुत्वादिति चेत् ? तद्धेतुत्वे कथं तन्निवेशि स्वरूपमपि न हेतुः ? अहेतुत्वे वा कथं न रासभादितुल्यता ? न चाऽवर्जनीयतया रूपनिवेशः । समवधानमात्रस्य तदन्तरेणापि भावात् । विशेषस्तु रूपमेव । तस्माद्यथोभयाऽधीननिरूपणा व्याप्तिर्व्यापकस्य व्याप्ये भाव एव, नाभाव इति व्याप्यस्य तु व्यापक एव भावो, नाऽन्यत्रेति निरूप्यते तथा कार्यकारणभाव उभयाधीननिरूपणोऽपि कारणस्य कार्यात्प्रागभाव एव नाभाव इति कार्यस्य कारणे सत्येव नाऽसति भाव इति अनुभवाऽनुसारान्निश्चीयते । तथैव लौकिकपरीक्षकाणां कार्यकारणभावाऽवगतेः । न च कारणतैव सत्तास्वरूपं नीलादेरनुभवाऽवसितम् । तद्धि तेनैव स्वरूपेण स्वभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते, न पुनस्तत्कारितैवास्य रूपम् । मा भूदपर्यायेणाऽनेकार्थक्रियाकारणे रूपभेदः, मा च भूदुपाध्यपेक्षमस्यापि निरूपणं कार्यत्वस्यैव सत्त्वस्य शुद्धस्यैव निरूप्यमाणत्वात् कारणत्वे तु सत्त्वे यथा कार्यत्वं भावस्वभावोऽपि वस्तुतः कारणाधीननिरूपणं तथा कारणत्वमपि स्वसम्बन्धिकार्यमन्तरेणाऽशक्यनिरूपणमिति सत्त्वं शुद्धं न निरूप्येत । ततश्चोपाध्यपेक्षः शुद्धो वा नाशे कार्यत्वसत्त्ववदिति व्याहन्येत । तथा च यद्यस्ति सर्वज्ञः तथाऽपि सिद्धं सद्रूप एव भावस्तद्विज्ञानालम्बनप्रत्ययत्वमनुभविष्यति । अथ नास्ति, तथाऽपि स्वस्वहेतुतो लब्धस्वरूप एवापाततोऽकिञ्चित्करः समर्थोऽपि तत्तत्सहकारिसंनिधेस्तासु तास्वर्थक्रियासूपयोक्ष्यते । न च प्रथमतः कार्याऽनुपलब्धेरसामर्थ्यं, तथा सति रासभादेरपि क्षित्यादिसमवधानादङ्कुराद्युत्पत्तिप्रसङ्ग इत्युक्तम् । ननु जनकत्वमजनकत्वं च विरुद्धौ धर्मौ कथमेकत्र समाविशतः ? तथैकत्रैव बीजेऽङ्कुरजनकत्वं तदजनकत्वलक्षणं च क्षित्यादिजनकत्वं कस्मान्न विरुद्धे ? विरोधिनी चेत्कथमभेदः ? भेदश्चेन्नैकं जगति किंचिदिति नाऽनेकमपि स्यादिति सुनिरूपितमत्रभवता भावानां तत्त्वम् । सकृदुपलभ्यमाने कार्यभेदेऽपि बीजरूपस्य जनकस्याऽभेदाऽवगतेः प्रत्यक्षेणाऽभेद इति चेन्न । इहापि समानत्वात् । न खल्वत्रापि क्रमवत्कार्यभेदेऽपि बीजरूपमन्यदन्यदपेक्ष्यते । न च नञः प्रयोगाऽप्रयोगमात्राभ्यां विरोधाऽवगतिः । अतिप्रसङ्गात् । न च बीजस्यापि यदैव जनकत्वं तदैवाऽजनकत्वम् । न च जनकत्वमस्य स्वभावोऽपि तु बीजं जनकत्वं न

अपि च मनोवैगुण्ये चक्षुराद्यभावे च रूपाद्यवेदनादुभयवेद्यताऽवसीयते। केवलमनोवेद्यता तु कुतः ? द्वितीयक्षणोपलब्धेरिति चेत् । न । तत्र चक्षुरा-

नदितरप्रत्ययसमवधानं वा सामर्थ्यं वा धर्मभेदः । समवधानं चोपसर्पणप्रत्यया-ऽधीनमस्य । न च न धर्म्मधर्मिणोरभेदः । तस्य ततोऽन्यत्वात् । अन्यत्वेऽपि च तदाश्रितत्वात्तस्योपलब्धेः तेन च सहकार्यकरणात्तत्सम्बन्धः । तत्सिद्ध-मक्षणिकस्यापि क्रमाऽक्रमाभ्यामर्थक्रियाकारितोपपत्तेः सन्दिग्धव्यतिरेकित्वा-दनैकान्तिकं सत्त्वमसाधनाङ्गं क्षणभंगुरत्वे भावानामिति ।

यच्च विकल्पितं, स्वभावतो भावा विनश्वरा अविनश्वरा वा जायन्त इति, तत्रोच्यते । न वयं विनश्वरत्वमविनश्वरत्व वा जानीम, किन्तु सन्तः स्वहेतुभ्यो जायन्ते, ध्वंसन्ते च हेत्वन्तरेभ्यः स्वप्रत्ययाऽधीनसंनिधानेभ्य इति। ध्वंसश्च ध्वंस्यमानाऽभिन्नो हेतुभेदात्स्वभावभेदाच्च । उपपादितश्च स्वभाव-भेदो नियोगपरीक्षायाम् । नन्वस्मिन्नुत्पन्नेऽपि भिन्नमूर्तौ किमायातं भावस्य? न किञ्चिदायातम् । अस्त्ययमायुष्मान् भावः । अस्तु स्वकारणाधीनजन्मना, तदभावेन तत्स्वरूपविरहलक्षणेन स्वलक्षणशालिता स्वाऽनुरूपं व्यवहारं प्रवर्त्तयता निरस्तसमस्तार्थक्रियाः किं नच्छिन्नम् ? न च ध्रुवभाविना विनाशस्य हेत्वन्तरानपेक्षतामावहति । असिद्धत्वादनैकान्तिकत्वाच्च । इदं हि भवान्निरूपयतु, किं घटसन्तानात्संविभागा कपालसंततिर्ध्रुवभाविनी न वा? न चेद्विनाशोऽपि घटस्याऽध्रुवभावी । न खलु संविभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहेऽपिहितचक्षुषः । तथा चाऽसिद्धा ध्रुवभाविता विनाशस्य । अथ ध्रुवभाविनी, तस्यामेव विभागसंततौ ध्रुवभाविन्यामपि मुद्गरापेक्षि-ण्यामनैकान्तिकं ध्रुवभावित्वं नाऽनपेक्षत्वेन व्याप्तमिति हेत्वन्तराऽपेक्षत्वं निषेद्धुमर्हति । तस्मात् क्षणिकत्वसाधनाऽनुमानप्रतिक्षेपादबाधितं प्रत्यभिज्ञानं स्थापयति भवानिति सिद्धम् ।

तदेवं क्षणिकत्वप्रतिक्षेपान्नेन्द्रियजविज्ञानसमयभावी तद्विषयजन्मा क्षणोऽस्ति यो मनोविज्ञानगोचरः स्यादित्युक्तम् । अस्तु वा, तथाप्ययमपि चाक्षुषो, न तु मनोमात्रगोचरः । उभयभावाऽनुविधानात्तद्विज्ञानभावाऽभावयोरि-त्याह—अपि चाऽन्यविषयव्यावृत्तमनसां मनोवैगुण्येऽप्रणिहितमनसामन्धादीनां चक्षुराद्यभावे च रूपाद्यवेदनात् इतरथा च वेदनात् उभयवेद्यताऽनुमीयते । केवलमनोवेद्यता कुतः ? शङ्कते—प्रथमे एव क्षणे इन्द्रियसामर्थ्योपक्षयात् द्वितीयक्षणोपलब्धेः केवलमनोवेद्यताऽनुमीयते इति चेत् ? निराकरोति—न । कुतः ? तादृशतज्जातीयक्षणावधृतसामर्थ्यानां चक्षुरादीनां सामर्थ्यपरिक्षये हेत्वभावात् न चैकस्मिन्नेव क्षणे सामर्थ्यमेतेषां येन क्षणान्तरे तन्न स्यादि-

दीनां सामर्थ्यपरिक्षये हेत्वभावात् । तज्ज्ञानधारावाहिकत्वदर्शनाच्च । स्मरणे तु प्रतीतमेव पारतन्त्र्यमनुमानादिषु लिङ्गाद्यभावे प्रत्ययात् पारतन्त्र्यमिति न क्व[1] चिदप्यनान्तरे मनःसाक्षात्स्वतन्त्रं प्रवर्तत इति आन्तर एव साक्षाद्विषयस्तत्रैव साक्षाद् वृत्त्या प्रकर्षमनुभवेत् नाऽविषये ।

त्याह—तज्ज्ञानधारावाहिकत्वदर्शनाच्च। ननु स्मरणे केवलमेव मनः प्रवर्तते, अन्धादीनामपि रूपादिस्मरणोपलब्धेरित्यत आह—स्मरणे तु प्रतीतमेव पारतन्त्र्यं मनसः। प्रमाणान्तराऽधिगतगोचरत्वात्। प्रमाणान्तरजन्माऽनुभवाऽऽहितभावनासहितं हि मनः स्मरणे हेतुः, न निरपेक्षमित्यर्थः। न चाऽनुमानादिज्ञानेषु स्वतन्त्रमित्याह—अनुमानादिषु लिङ्गाद्यभावे प्रत्ययात्पारतन्त्र्यं मनसः प्रतीतमिति। तस्मान्न क्वचिदनान्तरे मनः साक्षात्स्वतन्त्रं प्रवर्तत इत्यान्तर एव सुखादिरस्य साक्षादव्यवधानेन संयुक्तसमवायलक्षणेन संनिकर्षेण स्वतन्त्रस्य विषयो न तु बाह्यम्। तेन साक्षाच्चक्षुरादिवदसंबन्धादस्वतन्त्रत्वाच्च। तेन तन्मनस्तत्रैव साक्षाद्वृत्त्या प्रकर्षमनुभवेद् न तदविषये बाह्ये। तत्सिद्धमेतत् विवादाध्यासितानि चक्षुरादीनि नाऽतीताऽनागतविषयविज्ञानजनकानि विषयसहकारिणां तत्कार्यजनकत्वाद् यद्यत्सहकारि यत्कार्यजनकं तत्तदभावे न कार्यं जनयति यथा बीजमङ्कुरजनकक्षित्यादिसहकारिक्षित्यादावतीतेऽनागते वा नाऽङ्कुराय कल्पते। न चाऽर्थसहकारित्वमिन्द्रियाणामसिद्धं, विज्ञानजनने तदसहकारित्वेऽस्मदादीनामप्यतीताऽनागतार्थप्रत्यक्षत्वप्रसङ्गात्। सिद्धौषधमन्त्रतपः समाधीनां चक्षुराद्यतिरोधायकत्वेऽपि न स्वविषयाऽतिलङ्घनमित्युक्तम्। न च संदिग्धव्यतिरेकिता। तथा हि। सहकारित्वमपेक्षणीयतया व्याप्तं तदभावे तु कार्यजनने [2]**अपेक्षणीयत्वविरुद्धमनपेक्षणीयत्वं** व्यापकविरुद्धोपलब्ध्या सहकारितामपि निवर्त्तयतीति प्रतिबन्धसिद्धिः। एवं विवादाऽऽस्पदं मनो न चक्षुरादिनिरपेक्षं बाह्ये प्रवर्त्तते तत्तन्त्रप्रवृत्तित्वाद्यद् यत्तन्त्रप्रवृत्ति न तत्तन्निरपेक्षं तत्र प्रवर्त्तते यथाऽऽलोकापेक्षं चक्षू रूपे न संतमसे इति विरुद्धोपलब्धिः। न च बाह्ये न चक्षुरादितन्त्रं मन इति साम्प्रतम्। अन्धबधिराद्यभावप्रसङ्गात् इति विपञ्चितम्। ननु मा भूदिन्द्रियजं मानसं च प्रत्यक्षं सर्वविषयं, भावनामयं तु भविष्यति। तथा हि। श्रुतमयेन विज्ञानेन समस्तवस्तुविषयनैरात्म्यादि गृहीत्वा युक्तिमयेन च भूततामस्य

१. क्वचिदप्यन्तरे। प्र० पा०।

२. अपेक्षणीयत्वंविरुद्ध। प्र० पा०।

व्यवस्थाप्याऽसकृच्चेतोनिवेशनरूपभावनाप्रकर्षपर्यन्त-जन्मप्रत्यक्षं विज्ञान[1]-मनवयवेनाऽऽत्मादिरूपविश्वालम्बनं करतलाऽरविन्दविषयमिवाऽतिविशदं भावयिष्यति तथागतः। न चाऽयमीदृशः प्रत्ययो न सम्भवति भावना-प्रकर्षात्। तथा हि। भावनाऽभावाद्वा तत्प्रकर्षाऽभावाद्वा तत्सामर्थ्याऽभावा द्वा न भवेद्। न भावनाऽ[2]भावात् सर्वधर्मनैरात्म्यभावनाऽसम्भवः। स खल्वेवं न भवेद् यदि जगति दुःखं नाम न स्यात्, सद्वा न जिहासितं स्यात्, जिहासितं वा न शक्यहानम्, अशक्यहानता च तन्नित्यत्वाद्वा, तदुपाया-ऽपरिज्ञानाद्वा, उपायाऽपरिज्ञानेऽपि च शक्यहानत्वेऽपि च नैरात्म्यभावनाया अनुपायत्वाद्वा, लघतरोपायान्तरसम्भावाद्वा। न तावत् दुःखं नाम नास्ति जगति, परिणामतापसंस्कारैः खल्वनवयवेन पञ्चापि स्कन्धा भवन्ति संसारिणाम्। न चैते स्वस्य परेषां वा नाऽपनिनीषिताः। श्रावकबोधिप्रति-नियतेन सा नैसर्गिककरुणापराधीनचेतसा वा पुरुषधौरेयकेण परदुःखदुःखिना प्रतिकूलवेदनीयत्वात्। नाप्यशक्यहानता। न हि नित्यो नाम भावः संभवी, तस्य समस्तक्रियाविरहिणो व्योमोत्पलायमानत्वात्। नाप्युपायाऽपरिज्ञानम्। तथा हि। दुःखस्य समुत्पादका दोषाः रागद्वेषादयो मदमानादयश्च ते चोत्पादका अपि तदवयवान्निवर्तमानास्तदपि निवर्त्तयन्ति, यथा कफोद्भवो ज्वरः कफनिवृत्त्या निवर्त्तते। दोषाश्च नित्यात्मादिदर्शनजन्मानः तदवग-वास्तदविभागवर्त्तिनस्तदभाव न भवन्ति। तदभावहेतुर्न तत्प्रतिपक्षसाक्षा-त्कारादन्यः। तस्यैव तद्विरोधित्वात्। तथा हि। यत्र यद्विरुद्धसमवधानं तत्राऽवश्यं तदितरनिवृत्तिः। यथा विरुद्धवह्निसंनिधाने शीतनिवृत्तिः। संभवति च चित्ते स्थिराऽऽत्मदर्शनविरुद्धसर्वधर्मनैरात्म्यस्वात्मीभाव इति स्व-भावविरुद्धोपलब्धिः। एवं च तद्धेतुरागादीनामप्यत्यन्तनिवृत्तिः। तथा हि। ये सभवत्स्वहेतुविरुद्धाऽत्यन्तविवृद्धयः ते संभवदत्यन्तसमुच्छेदाः यथेन्द्रलुप्त-नितान्तविवृद्धयः केशाः। संभवत्स्वहेतुविरुद्धात्यन्तविवृद्धयश्च रागादय इति स्वभावहेतुः। सर्वधर्म्मनैरात्म्यं च तत्प्रतिपक्षस्तत्साक्षात्कारश्च न भावनाप्रकर्षादन्यतः। न चाऽसौ भावनामन्तरेणेति। न च सर्वधर्म्मनैरात्म्य-विज्ञानं प्रति च समर्थो **भावनाप्रकर्षः**।

तथा हि। यन्मनोविज्ञान सम्भवद्भावनाप्रकर्ष तद्भावनाऽऽधेयज्ञेयाऽऽ-कारवैशद्यं यथाकामार्त्ताद्यवस्थासु मनोविज्ञानं कामिनीवस्त्वाद्यालम्बनं

---

१. **विज्ञानमनवयवेना। प्र० पा०।**

२. **न भावनाऽभावात्... न भवेदित्यन्तः पाठः नास्ति।**

भावनाप्रकर्षेऽऽधेयविशदभावम् । सम्भवद्भावनाप्रकर्षश्च नैरात्म्यविकल्प इति स्वभावहेतुः, भावनाप्रकर्षमात्रनिमित्तत्वात् । प्रतिभासवैशद्यस्य यस्य भावनाप्रकर्षस्तस्य विशदप्रतिभासत्वं नियतसंविधानमिति सम्भवद्भावनाप्रकर्षमात्रानुबन्धिना विशदप्रतिभासतेति सत्यपि भावनाप्रकर्षसम्भवे यदि प्रतिभासवैशद्यं नोत्पद्येत निमित्तान्तरसापेक्षं स्यात् । निरपेक्षतया च व्याप्तः प्रकर्षो दृष्टः, ततो व्यापकविरुद्धोपलब्ध्या विपक्षाद् व्यावर्तमानो भावनाप्रकर्षो वैशद्येन व्याप्यत इति न संदिग्धव्यतिरेकः । नाप्यसिद्धः । कारुण्येन दुःखभयाद्वा भावनाप्रकर्षप्रारम्भसम्भवात् । न च लङ्घनोदकतापवद्व्यवच्छिन्नोत्कर्षता सर्वधर्म्मनैरात्म्ये चेतसो येन क्वचिन्न विवादः सम्भवेत् । यतो यः स्थिराऽऽश्रयो धर्मो यत्र यथोत्पन्नो यथाहितस्य भागस्य प्रवृत्तये न पुनर्यत्नमपेक्षते सोऽत्यन्त निष्ठां तत्र गच्छति । तद्यथा कलधौतस्य पुटपाकप्रबन्धाऽऽहिता विशुद्धिः रक्तसारताम् । स्थिराश्रयश्च सर्वधर्मनैरात्म्यबोधे उत्पन्ने विशेषे पुनः प्रयत्नाऽनपेक्षः सम्भवदत्यन्ताऽभ्यासः पुंसामिति स्वभावहेतुः स्थिराश्रयत्वं परलोकसिद्धेः । अप्रधानमपि भावाद्भिन्नमभिन्नं वा ? तत्राऽभिन्नोपकाराऽभावरूपे सत्यप्यलब्धजन्मनः सत्यप्यस्मिन्ननुपलब्धेरुत्पत्तिमत एवाऽपकरात् कार्यनिष्पत्तेरशक्ताद्भावः स्यात् । न चोपकारिणः कार्यजननमिति साम्प्रतम् । उपकारस्योपकारान्तरजननेऽनवस्थापातात् । तत एव कार्यस्योत्पत्तेर्भावस्याऽतत्कारित्वप्रसङ्ग इत्युक्तम् । अभिन्नोपकाराऽऽधाने वा भाव एवाधेयः । न च स प्राक्सिद्धः शक्य आधातुम् । अनुपकारित्वे वा सहकारिभावेन नापेक्षेरन्नित्युत्पन्नमात्रमेव बीजमङ्कुरादि जनयेत् । अनपेक्षस्य क्षेपाऽयोगात्तत्क्षेपे वा पश्चादपि न जनयेदविशेषात् । यदि मन्येताऽनुपकारका अपि भवन्ति सहकारिणो यस्मात्तैः सहभावः कार्यं करोतीति । न च नाऽपेक्ष्यन्ते, तैर्विना कार्यस्याऽनुपपत्तेरिति । तत्र स्वरूपेण चेत् कार्यस्य जनको भावः तस्मान्नैवाऽभावयोरेकैकस्माद् व्यभिचारादुभयाऽधीनजन्मतेति साम्प्रतम् । हेतोरुक्तकार्योत्पत्तेरवश्यम्भावनियमेन व्यभिचाराऽभावात् । न च स्वकारणात् कतिपयकालकलाविलम्बेन कार्यजननस्वभावो भावो जात इति स्वभावादेव विलम्बकारीति साम्प्रतम् । विकल्पाऽसहत्वात् । किं कतिपयकालकलाविलम्बनकारितास्वभावो निवृत्तो न वा ? निवृत्तश्चेत् कथं भावो न निवृत्तः ? स्वभावनिवृत्तेः । अनिवृत्तौ बाधकमस्य स्वभावो निवृत्तरूपविरुद्धधर्मसंसर्गात् । अतत्स्वभावत्वे वा न विलम्बेत इति जन्मानन्तरमेव भावः कृतकृत्यः प्रसज्येत । अनिवृत्तौ कतिपयकालकलातिक्रमेऽपि न कार्यं जनयेत् । विलम्बकारिताया रूपस्य तादवस्थ्यात् । तदुक्तं 'न क्रमेणाऽर्थ-

क्रियाकारिता सम्भवति भावस्य नापि यौगपद्येन युज्यते यस्माद्यावत्कार्यं किमपि प्रथमे क्षणे तेनाऽक्षणिकत्वेनात्मना सम्पादितं तावत्सर्वं द्वितीयादिक्षणेषु सम्पादयेत् तावत्कार्यम्। क्षणिकस्य तु क्रमाऽक्रमाभ्यामर्थक्रिया कल्पत इति। विपक्षे क्षणिकत्वे व्यापकाभावात्ततो व्यावर्त्तमानं सत्त्वं क्षणिकत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः।

स्यादेतत्। क्षणिकोऽपि भावोऽर्थक्रियाजननस्वभावः। न चेदमत्रैव जननत्वाऽभावश्चेत् किमस्य सहकारिभिरित्युत्पन्नमात्रमेव बीजमङ्कुरं जनयेत्। ननूत्पन्नो बीजक्षणः समर्थो जनयत्येव, कुतः पुनस्तस्योत्पत्तिः पूर्वस्माद्बीजक्षणात्? तर्हि तत्सन्तानपतितानां सर्वेषां बीजत्वाऽविशेषादङ्कुरजननसामर्थ्यमिति लब्धजन्ममात्रमेव बीजमङ्कुरं जनयेत्। मैवम्। पूर्वं क्षितिबीजपवनादिक्षणसमवधानोत्पन्नाऽतिशयवत्तदुत्तरोत्तरक्षणपरम्परालब्धजन्माऽन्योऽपि क्षणस्समर्थः समर्थक्षित्यादिक्षणसहकृतोऽनपेक्ष एवाऽङ्कुरं जनयति। न चाऽन्यक्षित्यादिसहभुवस्तैस्तदनपेक्षितस्यापि तैर्विना कार्यकरणं, तदेकसामर्थ्याऽधीनस्य तदभावेऽभावात्। न चाऽसहकारिता क्षित्यादीनां सिद्धेति नोदकतापवद्व्यवस्थितोत्कर्षता। तत्राऽत्यन्ततापेन तदाश्रयाणमपामुपरतेरस्थिराश्रयत्वात्। नापि लङ्घनवद्व्यवस्थितोत्कर्षम्। यथाहितस्य भागस्योत्पत्तौ तत्र पुनर्यत्नापेक्षत्वात्। न हि तत्र पूर्वसिद्धाऽऽलम्बनमात्रा सतो[1] लङ्घनान्तराय कल्पते, अपि त्वसौ विनष्टा। लङ्घनान्तरं तु पूर्वलङ्घनवद्बलप्रयत्नाभ्यां प्रवर्तते। सर्वधर्मनैरात्म्यप्रकाशनस्वभावस्तु चेतसः स्वरसवाहीति न पुनः प्रयत्नमपेक्षते। तस्य हि पूर्वभावनाऽऽहिताऽविकाऽधिकोत्तरविशेषप्रतिलम्भेनाऽत्यन्तप्रकर्षोत्पत्तेराश्रयस्वभावभूतत्वात्। इह प्रकर्षविशेषणं लङ्घनं तु न देहस्वाभावः। सत्यप्याश्रये पुनर्यत्नापेक्षत्वात्। एवमुदकतापोऽपि नोदकस्वभावः। तद्विनाशत्वात्। भावनां वा पक्षीकृत्योच्यते। तथा हि। या याऽऽदरनैरन्तर्यदीर्घकालाऽऽसेविता भावना सा सर्वा करतलाऽमलकायमानाऽऽलम्बननिर्भासविज्ञानफला। तद्यथा कामातुरस्य कामिनोभावना विशेषणत्रयवती कामिनीविषयविज्ञानविशदाभताहेतुः। तथा च समस्तवस्तुनैरात्म्यभावनाविशेषणत्रयशालिनीति स्वभावहेतुः। मनोविज्ञानं हि विशदाभमियमीदृशी भावना स्वाऽन्वयव्यतिरेकावप्यनुकारयन्ती कारणान्तरनिरपेक्षा कामातुरादिषु दृष्टा। तद्यदि सत्यामप्यस्यां विशदाभत्वं समस्तवस्तुनैरात्म्यग्राहिणो विज्ञानस्य नोपजायेत, कारणान्तरसापेक्षत्वमस्याः प्रसज्येत। तथा च दृष्टं निरपेक्षत्वं भावनाया व्यापकं

१. लम्बनमात्मनश्च २ पु० पा०।

भावनामयमपि विज्ञानं श्रुताऽनुमितविषयम् अकस्माद्भावनाऽयोगा-दागमाऽनुमानपरतन्त्रम् । पूर्वज्ञानभूतार्थत्वविपर्ययाऽनुविधानात् सापेक्षत्वाद-प्रमाणम् ।

व्याहन्येतेति विपक्षे व्यापकविरुद्धस्य सापेक्षत्वस्य दर्शनाद्धीवैशद्यजननाद् व्यापकविरुद्धोपलब्ध्या व्यावर्तमाना भावना वैशद्यजन्मनियताऽवशिष्यत इति भावनाविशेषाऽनुविधानात्स्फुटत्वोत्पादस्य न भावनामात्रानुबन्धितेति स्व-भावहेतुः, हेतोश्च समग्रस्य कार्योत्पादनसामर्थ्याऽनुमानम् । तथा च सत्यामेव तस्यां सामग्र्यामप्रतिबन्धायां नियमेन फलमुत्पद्यत इति न पाक्षिक-फलसम्भवविषयत्वं सामग्र्या निश्चीयत इति निश्चयान्नाऽनुमानत्वविरोधः । न चाऽसिद्धो हेतुः । सम्भवति हि भावना विशेषणत्रयवती सांसारिकदुःख-निमित्ताद् बिभ्यतां श्रावकबोधिप्रतिनियतानां निखिलदुःखनिमित्तशमनी कारुणिकानां च सकलानेव दुःखिन आत्मतयाऽभ्युपगच्छतां दानादिपार-मिताभ्यासतनूकृतान्तर्मलानामीदृग्भावनाप्रकर्षजन्मविज्ञानमभ्रान्तं च । प्रमाणसिद्धवस्तुविषयत्वात् । अविकल्पश्च विशदाभत्वात् । समस्तवस्तुविषयं च तन्नैरात्म्यसाक्षात्काररूपत्वात् । न च नैरात्म्यं नाम भावेभ्यो भिन्नं किं-चिदस्ति, यदप्रत्यक्षगोचरेष्वपि तेषु प्रत्यक्षगोचरं स्यात् । विकल्पारूढं च स्फुटं नाऽविकल्प्य विज्ञानं प्रतिभाति । तदेतद्भावनाधेयवैशद्यं सद्विशदभावात्म-नैव स्यात् । तथा च विश्वनैरात्म्यवैशद्यं विश्ववैशद्यमेवेति । यदिदं सार्वज्ञं तद्भूतार्थभावनाया एवाऽऽदरनैरन्तर्यदीर्घकालाऽऽसेवितायाः सर्वाऽऽकार-सकलवस्तुसाक्षात्कारहेतोः सम्भवादसिद्धो हेत्वभावो न फलाऽभावसिद्धा-वङ्गमित्याशङ्क्याह—भावनामयमपि विज्ञानं श्रुताऽनुमितविषयम् । कुतः ? अकस्माद्भावनाया अयोगात् । आगमाऽनुमानपरतन्त्रं तद्विषय एव साक्षाद्-वृत्त्या प्रकर्षमनुभवेद् न तदविषय इति पूर्वेण सम्बन्धः । न च तदपि प्रकर्षवत्प्रमाणमित्याह—पूर्वज्ञानभूतार्थत्वविपर्ययाऽनुविधानाच्च साऽपेक्षत्वा-दप्रमाणम् ।

एतदत्रार्थतत्त्वं विवक्षितमाचार्यस्य । सत्यं, श्रुताऽनुमानगोचरचारिणी भावना विशदाभविज्ञानहेतुरिति नाऽत्रजानीमहे, किं तु यद्विषये जातं तदेव विशदप्रतिपत्तिगोचरो न जातु रूपभावनाप्रकर्षो रसविषयविज्ञानवैशद्याय कल्पते । ननु न विषयान्तरवैशद्यहेतुभावं भावनायाः सङ्गिरामहे, किं तु श्रुताऽनुमानविषयवैशद्यहेतुतामेव । तद्विषयं च समस्तवस्तुनैरात्म्यमिति

तद्भावनाप्रकर्षः समस्तवस्तुनैरात्म्यं विशदयन् समस्तवस्तुविशदतामन्तरेण तदनुपपत्तेः समस्तवस्तुवैशद्यमावहती[1]-त्युक्तम् ।

सत्यमुक्तम् । अयुक्तं तु तत् । तथा हि । नाऽऽगमाऽनुमानगोचरत्व निरात्मनां वस्तुभेदानां परमार्थसताम् । न हि ते एतेषामन्यनिवृत्तिमात्रावगाहिनी परमार्थसत्स्वलक्षणं गोचरयितुमर्हति । नापि तद्विषया भावना तदग्राह्यमपि स्वलक्षणं तदध्यवसेयतया तद्विषय इति तद्योनिरपि भावना तद्विषयेति तत्प्रकर्षं वैशद्यहेतुरिति चेत् । न । तदवसेयस्यापि परमार्थसत्त्वाऽभावात् । तथा हि । यदनुमानेन गृह्यते यच्चाऽवसीयते द्वे अप्यन्यनिवृत्ती न वस्तुनी । स्वलक्षणाऽवगाहित्वे अभिलापसंसर्गयोग्यप्रतिभासत्वाऽनुपपत्तेः ।

मा भूत्तयोः स्वलक्षणं विषयः । [2]तत्प्रभवभावनाप्रकर्षजन्मनस्तु विशदाभस्य[3]चेतसो भविष्यति कामिनीविकल्पप्रभवभावनाप्रकर्षादिव कामाऽऽतुरस्य कामिनीस्वलक्षणसाक्षात्कारः । करिकुम्भकठोरकुचकलश हरिणशावलोल[4]लोचने चम्पकदलाऽवदातगात्रलते लावण्यसरसि निरन्तरलग्नललितदोःकन्दलीमूलमालिङ्गनमङ्गने प्रेयसितरे प्रयच्छ सञ्जीवय पतितोऽस्मि तव चरण[5]नलिनयोरिति वचनकायचेष्टयोरुपलब्धेः । अस्ति च विकल्पाऽविकल्पयोः कथंचित्समानविषयतेति नाऽतिप्रसङ्ग इति । सत्यम् । सम्भवत्यनुभवो न पुनरस्याऽर्थ प्रामाण्यसम्भवः । अतदुत्पत्तेः अतदात्मनस्तदव्यभिचारनियमाऽयोगादतादात्म्य चाऽर्थस्य विज्ञानादतिरेकात् अनतिरेकेऽपि च विज्ञानानामन्योन्यस्य भेदतादात्म्यात् एकस्य विज्ञानस्येतरविज्ञानवेदनाऽनुपपत्तेः । विज्ञानस्वलक्षणैकत्वाऽभ्युपगमे तन्नित्यमेकमेवाऽद्वितीयं ब्रह्माऽभ्यमनीयमिति क्षणिकनैरात्म्याऽभ्यासाऽभ्युपगमो दत्तजलाञ्जलिः प्रसज्येत । तन्न तादात्म्यादस्याऽव्यभिचारः । नापि तत्कार्यत्वात् । भावनाप्रकर्षकार्यं खल्वेतन्न विषयकार्यम् ।

यद्युच्येत पारम्पर्येण तत्कार्यमनुमानवत् । यथा हि वह्निस्वलक्षणाद् धूमस्वलक्षणं ततो धूमाऽनुभवस्ततो दहन[6]विकल्पस्ततश्चाऽनुमानमुत्पन्नमिति पारम्पर्येण वह्निप्रतिबन्धात्प्रापकं च वह्नेर्दाहपाककारिणः, तथैतदप्यनुमानजनितभावनाप्रकर्षपर्यन्तजं पारम्पर्येणाऽर्थप्रभूततया तदव्यभिचारनियमान्न प्रमाणमिति चेत् । किमनुमानेन वह्निं व्यवस्थाप्य भावयतो यद्वह्निविषय

---

१ आवहति । २. पु० पा० । २. तत्प्रभावभवना । पु० पा० ।
३ विशदाभस्याऽचेतसो । पु० पा० । ४ लोलोचने । पु० पा० ।
५. चरणनलिनयोः । पु० पा० । ६. धूम । १ पु० पा० ।

विशदं विज्ञानं तत्प्रमाणमिति ? ओमिति ब्रुवाणस्य पर्वतनितम्बारोहणे सति इन्द्रियसंनिकर्षजन्मनो दहनविज्ञानस्य भावनाऽऽधेयविशदाभविज्ञानेन सह सम्वाद[1]नियमप्रसङ्गः। विसंवादश्च बहुलमुपलभ्यते। लक्षणयोगिनि च व्यभिचारसम्भवे तल्लक्षणमेव बाधितमिति विशदाभमपि प्रातिभमिति संशयाक्रान्तमप्रमाणम्। तद्भावनाया भूतार्थत्वं न तज्जन्मविशदविज्ञान-प्रामाण्ये हेतुर्व्यभिचारात्। एवं च प्रसर्प्पकस्येव सक्तुकर्करीप्राप्तिमूललाभ-मनोरथपरम्परानीतो द्रविणसम्भारसाक्षात्कारस्तथागतस्य निरात्मकसमस्त-वस्तुसाक्षात्कार इत्यापतितम् सर्वार्थवस्तुभावनापरिकर्मितचित्तसन्तानवर्त्ति ज्ञानं प्रत्यालम्बनप्रत्ययत्वमर्थस्य। तथा च तदुत्पत्तेस्तदव्यभिचारनियम इति चेत्। नार्थस्याऽऽलम्बनप्रत्ययत्वं विज्ञानं प्रतीन्द्रियाऽपेक्षत्वेन व्याप्तं, तच्चा-ऽस्माद्विरुद्धोपलब्ध्या व्यावर्तमानमालम्बनप्रत्ययतामप्यर्थस्य निवर्त्तयति। न खल्विन्धनविशेषो धूमहेतुरिति विनापि दहनं सहस्रेणापि संस्कारैर्धूममा-धत्ते। तदाधाने वा समस्तकार्यहेतुताऽनुमानोच्छेदप्रसङ्गः। भावनायाश्च भूतार्थाया अर्थाऽनपेक्षाया एव विशदविज्ञानजननसामर्थ्यमुपलब्धं कामातुरा-दिवर्त्तिन्या इति भूतार्थापि तन्निरपेक्षैव समर्थेति नाऽर्थस्यालम्बनप्रत्ययत्वं शक्याऽवगमम्। अपि चाऽऽलम्बनप्रत्यया अपि त एवाऽस्य क्षणा युज्यन्ते, ये तस्य पुरस्तात्तना अव्यवधानाः। तथा च त एवाऽस्य ग्राह्या न पुनः पूर्वतरास्तत्काला अनागताश्चेति न सर्वविषयता। अथ दृश्यमाना धातुत्रय-पर्यापन्नाः प्राणभृतो जन्मान्तरपरिवृत्तौ यत्राऽतीताऽनागतस्कन्धकदम्बको-पादानोपादेयात्मान इति तद्दर्शनं दृश्यमानतादात्म्येन तद्विशेषणतयाऽतीता-ऽनागतान्यपि गोचरयति। न चाऽस्मदादिदर्शनस्यापि तथा प्रसङ्गो, रागादिमलावृतत्वात्। तस्य हि भगवतो निर्मृष्टनिखिलक्लेशोपक्लेशमलं विज्ञानमना[2]वरणं परितः प्रद्योतमानं स्वालम्बनं प्रत्ययं सर्वाऽऽकारं गोचरयत्तस्य च साक्षात्परम्परया च कथंचित्सर्वेण सम्बन्धाद्देशकालविप्र-कीर्णवस्तुविशिष्टस्वभावतया तथैव गोचरयेत्। न च सर्वग्रहणमन्तरेणेति सर्वविषयमस्य विज्ञानमनावरणं सिद्धम्।

तदनुपपन्नम्। विचाराऽसहत्वात्। तथा हि इयमालम्बनप्रत्ययस्य सर्वविशिष्टता स्वाभाविकी चेन्न तावत्सर्वस्मिन्नालम्बनप्रत्यये चैका भवति। एकस्याऽनेकवृत्तित्वाऽनुपपत्तेः। नाना चेदालम्बनप्रत्ययाश्च सर्वे चेति तत्त्वम्। तथा च न सम्बन्ध इति न तद्ग्रहणे सर्वग्रहणविकल्पारोपिततथात्वविल्पकं वस्तुविषयं सर्वत्र प्रतीयत इति सुभाषितम्। स्वालम्बनप्रत्ययमात्रगोचरमेवा-

---

१. सम्भवाद। पु० पा०। २. मनाचरणं। पु० पा०।

ऽविकल्पकं समस्तवस्तुविशिष्टालम्बनाऽध्यवसायजननम्। तेनाऽध्यवसायाऽनुगतव्यापारमविकल्पकमपि समस्तवस्तुविषयं भवति। यथाऽऽह—'व्यवस्य[1]न्ति क्षणादेव सर्वाकारं महाधिय' इति चेत। अथ कतिपय[2]वस्त्वालम्बनस्याऽनुभवस्य कुतः स एष महिमा? यतः समस्तवस्त्ववसाय इति। रागाद्यावरणविगमादिति चेत्तर्हि यथावस्तु तानि पश्येत्, न पुनरस्मादपार्थत्वमेवेति। तदयुक्तम्। विकल्पनिर्माणकौशलमस्य युज्यते। तत्त्वाऽऽवरकता हि मलानां केशादीनां न पुनर्विकल्पनिर्माणप्रतिबन्धता। तस्माद्भावनाप्रकर्षमात्रजत्वादर्थाऽव्यभिचारनियमाऽभावाद्विशदाभमपि संशयाक्रान्तत्वादप्रमाणमप्रत्यक्षं चेति साम्प्रतम्।

यदपि सदर्थप्रकाशनं बुद्धेः स्वभावोऽसदर्थत्वं त्वागन्तुकमित्यसति बाधके सदर्थत्वमेवेति। तदयुक्तम्। अनुमितभावितवह्निविषयविशदाभविज्ञानादिप्रामाण्यप्रसङ्गात्। तद्विषयस्य क्वचिद्बाधदर्शनादप्रामाण्यमिहापि समानम्। अन्यत्राऽभिनिवेशात्। तदिह यदि विशदाभविज्ञानहेतुत्वं भावनाया विशेषणयोगेन साध्यते ततः सिद्धसाधनम्। भवतु तथागतस्तथाभूतविज्ञानवान्, न तत्त्वे तद्विज्ञानमस्य प्रत्यक्षमप्रमाणत्वात्। तथा चाऽपक्षधर्मतया हेतोरसिद्धता, प्रसिद्धधर्मिणोऽजिज्ञासितविशेषणतयाऽनुमेयत्वाऽभावात्। अथ प्रत्यक्षविज्ञानहेतुता भावनायाः परं प्रत्यक्षसिद्धा साध्यते, तथा सति साध्यविपर्ययव्याप्तेर्विरुद्धता हेतोः। विशेषणत्रयवत्या अपि भावनाया विशदाभभ्रान्तिविज्ञानजनकत्वात्। दृष्टान्तस्य च साध्यहीनत्वात्। यदा च भूतार्थभावनाजनितत्वेऽपि नाऽस्य प्रामाण्यमभूतार्थत्वात्तदा, यदुच्यते

'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः।
न बाधोऽयत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः'॥ इति,

तदनुपपन्नम्। भूतार्थत्वे हि बुद्धेस्तत्प[3]क्षपातित्वेऽभूतार्थैः प्रतिपक्षैर्बाधो न भवेत्। अभूतार्था त्वियं स्वात्माऽभावमापन्नाप्यात्मीयदृष्टिरिव सम्भवद्बाधा। तस्मात्प्रतिपक्षविवृद्धिमात्रम्। न चाऽऽत्यन्तिकी विवृद्धिः सम्भवति। यथा समूलकाषं कषिता दोषा न पुनरुद्भविष्यन्ति अत एवाऽस्थिराश्रयत्वेऽप्यपुनर्यत्नापेक्षित्वेऽप्यस्य नाऽऽत्यन्तिकी निष्ठा सम्भवति। आत्मीयदृश इव विरोधिप्रत्ययसम्भवात्। तत्सम्भवश्चाऽभूतार्थत्वात्। तच्च न। श्रुता[4]नुमितविषयं तु प्रत्यक्षं न सम्भवत्येव। तयोः परोक्षरूपाऽवगाहित्वात्। प्रत्यक्षस्य च

१. व्यवस्यान्ति। पु० पा०।
२. कतिपय। पु० पा०।
३. पतिताऽभूतार्थैः। पु० पा०।
४. अनुमित। पु० पा०।

ननु न का[1]लतोऽपि नियमश्चक्षुरादीनाम् । अवर्तमानरजता[2]द्युपलब्धेः । न हि सा शुक्तिकाद्युपलब्धिः । अन्याकारसंविदोऽन्यविषयत्वाऽयोगात् अनाश्वासात् ।

तद्विपरीतार्ऽर्थत्वात् तद्गतभूतार्थत्वाऽनुविधायित्वेन स्वविष[3]ये श्रुताऽनुमानज्ञानापेक्षतया प्रामाण्याऽनुपपत्तेश्च । तत्सिद्धमेतद्भूतार्थभावनाप्रकर्षपर्यन्तजं विज्ञानमप्रत्यक्षम्, अर्थे प्रमाणत्वात् यदप्रमाणं तदप्रत्यक्षमर्थे । यथा कामाऽऽतुरस्य कामिनीविज्ञानम् । अप्रमाणं च तत् । नितान्तविशदाभत्वे सति भावनाजन्यत्वात् । यन्नितान्तविशदाभत्वे सति भावनाप्रकर्षजं विज्ञानं तदप्रमाणं, यथाऽनुमितभावितवह्निविषयविशदाभविज्ञानमिति समानहेतुकत्वं समानरूपतया व्याप्तम् । यथाह 'तदतद्रूपिणो भावास्तदतद्रूपहेतुजा' इति । तदस्याः प्रामाण्यं निवर्तमानं तुल्यहेतुजत्वमपि निवर्तयति । न चैषा भूतार्थे भावनाप्रकर्षपर्यन्ताऽतीन्द्रियसंनिकृष्टाऽनुमितभावितवह्निवैशद्ये च निरात्मकसमस्तवस्तुवैशद्येऽपि च विशिष्यते । न च रागाद्यावरणविरहो वा विशेषः । न खल्वेते कम्बलादिवदावरका विज्ञानस्य, किं तु तदाक्षिप्तमना विविधविषयभेदतृष्णादिपरिप्लुतो न शक्नोति भावयितुमिति भावनाऽऽदरमात्रे एव तद्विरहोपयोगः । अस्ति चेहापि शिशिरतरसंभूतजडिममन्थरतरकायकाण्डस्याऽनुमितवह्निभावनाभियोग इति न हेतुभेद इति प्रतिबन्धसिद्धिः । न चैकपार्थिवाऽणुसमवायिकारणजन्मभिरभिन्नौष्ण्याऽपेक्षैकवह्निसंयोगाऽसमवायिकारणैर्गन्धरसरूपस्पर्शैर्नानाभावैर्व्यभिचारः । सामर्थ्यवैचित्र्यादेकत्वेऽपि पार्थिवस्य परमाणोः । तद्वैचित्र्यं च कार्यवैचित्र्योपलम्भात् । तच्च नित्यसमवेतं नित्यं कारणसामर्थ्यक्रमेण च पार्थिवाऽवयविनि कार्ये जायत इत्यवदातम् । परिशिष्टं ग्रन्थव्याख्यानसमये वक्ष्यामः । तदास्तां तावत् ।

सम्प्रति व्यवस्थापितोन्मूलनेन कश्चित्प्राभाकरगन्धी प्रत्यवतिष्ठते—ननु न कालतोऽपि नियमश्चक्षुरादीनाम् । कुतः ? इदं रजतमित्यवर्त्तमानरजताद्युपलब्धेः । नन्विदं रजतमिति पुरोवर्त्तिनीं शुक्तिमवलम्बमाना कथमसंनिहितदेशकालरजतोपलब्धि ? रित्यत आह—न हि सा शुक्तिकाद्युपलब्धिः । कस्मात् ? अन्याऽऽकारायाः संविदोऽन्यविषयत्वाऽयोगात् । तद्योगे विषयत्वस्याऽनियमात् । सर्वं विज्ञानं सर्वविषयमित्ययत्नसिद्धा सर्वज्ञता स्यादिति फलितं तथागतमनोरथेन । तस्माद्यदाकारविज्ञानं[4] स एवास्य विषय एषि-

---

१. कालतो । पु० पा० । २. द्यनुपलब्धेः । पु० पा० ।
३. श्रुतानुमित । ४. यदाकारविषयं विज्ञानम् । २ पु० पा० ।

अधिगतस्वातन्त्र्यं च मनः स्वप्ने । न च स्वप्नज्ञानं स्मृतिः । अतद्रूपत्वात् । नैतत्सारम् । तथा हि—

अर्थाऽपेक्षा मुधा तुल्यमन्याकारप्रवेदनम् ।
देहिनो वर्त्तमानाभा स्वप्ने स्पष्टाऽपि हि स्मृतिः ॥

चक्षुरादयस्तावद्वर्त्तमानमेव शुक्तिकाशकलाद्यर्थं दर्शयन्ति, तदपेक्षणात् । अन्यथा वैफ[1]ल्यात् तत्सन्निधेः तदसन्निधावपि रजतवेदनप्राप्तेः ।

तव्यो नियमाय । रजताऽऽकारं चेदमिति तदेवास्य विषयो न पुनः शुक्तिः । अवेदनात् अनाश्वासाच्च । यदि ह्यन्याऽऽकारा संविदन्यविषया भवेत्तदा संविदः स्वार्थव्यभिचारात् सर्वत्रैवाऽनाश्वासप्रसङ्ग इति न प्रेक्षावान् क्वचित् कुतश्चिद्वा प्रवर्तेत निवर्तेत वा । तस्मादपि रजतविषयमेव । न चेदं रजतमिति सामानाधिकरण्यप्रथेयमपि त्वसामानाधिकरण्याऽग्रहो दोषवशात् । न च स्मृतिः । साक्षात्काराऽऽस्पदत्वात् । न च नास्ति । स्वसंवेदनसिद्धत्वात् । तदस्य कृप्तसामर्थ्यं चक्षुर्वा मनो वा कारणमकामेनाऽप्यभ्युपगन्तव्यम् । न च रजतं वर्त्तमानमित्यवर्तमानमपि चक्षुर्मनो वा गोचरयति । तथा च न कालतोऽपि नियमः ।

परतन्त्रं बहिर्मन इत्याक्षिपति—अधिगतस्वातन्त्र्यं च मनः स्वप्ने । तेनाऽन्यत्रापि बाह्ये स्वतन्त्रमेव । यद्युच्येत स्वप्नेऽपि पूर्वाऽनुभवभावनासहकारि स्मृतिं जनयति मनः, तेनाऽस्वतन्त्रमेवेति, तत्राह—न च स्वप्नज्ञानं स्मृतिः । कस्मात् ? अतद्रूपत्वात् । अनुभूतविषयाऽसंप्रमोषो हि स्मृते रूपम् । असंप्रमोषश्चाऽनुभूततयाऽनुभाव्यस्याऽनुसन्धानम् । न चैवंविधं स्वप्नज्ञानं, तस्मान्न स्मृतिः । न च चाक्षुषं, चक्षुर्व्यापाराऽभावात् । तत्सिद्धमेतद्बाह्ये मनः स्वतन्त्रमिति ।

तदेतन्निराकरोति—नैतत्सारम् । तथा हि—

अर्थाऽपेक्षा मुधा तुल्यमन्याकारप्रवेदनम् ॥
दोषतो वर्त्तमानात्वं स्वप्ने स्पष्टा ऽपि हि स्मृतिः ॥

यत्तावदुक्तम् अनीताऽविषयं चक्षुरादीति, तत्राह—चक्षुरादयस्तावद्वर्त्तमानमेव शुक्तिकाशकलाद्यर्थं दर्शयन्ति । कुतः? तदपेक्षणात् । शुक्तिकाद्यपेक्षणात् । अन्यथा तदनपेक्षणे वैफल्यात्तत्संनिधेः शुक्तिसंनिधानस्य । कुतोऽस्य वैफल्यप्रसङ्ग ? इत्यत आह—शुक्तिकाऽनपेक्षणे तदसंनिधावपि रजतवेदनप्राप्तेः । अयमभिसंधिः । न तावच्चक्षुरादिवद्रजतविज्ञानं कारण-

---

१. वैकल्यात् । पु० पा० ।

रजतताऽवभासनं यदि न शुक्तिविषयं वर्तमानाभासनमपि तर्हि नाऽवर्त्तमान-गोचरम् ।

तामात्रेणाऽपेक्षते शुक्तिशकलम् । चक्षुराद्यभाव इव तदभावेऽन्यत्र रजतसंनिधावपि रजतविज्ञानाऽभावप्रसङ्गात् । तस्माद्विषयतयैवाऽपेक्षते रजतविज्ञानं शुक्तिशकलमिति ।

यच्चोक्तमन्याऽऽकारासंविन्नाऽन्यविषयेति, तत्राह—रजतावभासनं यदि न शुक्तिविषयं वर्तमानाभासनमपि तर्हि नाऽवर्तमानगोचरम्[1] ।

अयमभिसन्धिः । अतीतरजतगोचरं चेदेतद्विज्ञानमतीततयैवाऽस्मिन् रजतं प्रपद्येत, तथा च तत्प्रेप्सवो न प्रवर्तेरन्, अतीतस्य प्राप्त्यभावात् । न खल्वतीतं तत्तयाऽवगम्य शब्दाद्वदान्यप्रेष्ठं युधिष्ठिरं क्षुत्क्षामात्माऽपि भिक्षुको याचितुं प्रवर्तते । अतीतस्यापि रजतस्य दोषतस्तत्राऽनवभासनाद्वर्तमानस्य च शुक्तिकेय[2]मिति तत्तया गृहीतस्य रजतसाधारणरूपवेदनात् । तद्भेदहेतु-शुक्तिकात्वसामान्यविशेषाऽनवभासाच्च । समीहितसंनिहितरजतमतितुल्यता-भेदाऽनध्यवसायसामर्थ्याऽभ्यासात्[3] । ततश्च रजतमिदमिति सामानाधिकरण्यव्यपदेशः समीचीनं संनिहितरजतप्रत्ययतुल्यव्यवहारप्रवर्तनं च शुक्तिकेयमिति भेदधियः स्वविषयविरुद्धभेदाऽग्रहनिवारणेन पूर्वप्रत्ययप्रसञ्जितरजतोचितव्यवहारनिराकरणाद्बाधकताऽभ्युपपन्नेति चेन्न । भेदाऽग्रहमात्रस्य तथाभूतव्यवहारप्रवर्तकत्वाऽनुपपत्तेः । सन्निहितरजताऽवभासो हि तद्व्यवहारहेतुर्न पुनरतथाऽनवभासः । तत्तुल्यतया सोऽपि तद्व्यवहाराय कल्पते । भेदाऽनवभासश्च तत्तुल्यतेति चेत् । यद्येवमवर्तमानाऽवभासनयाऽतीतरजताऽवभासविज्ञानतुल्यताऽप्यस्यास्तीति तत्तुल्यव्यवहारप्रवृत्तिरप्येतस्य स्यात् । तदयं रजत**विज्ञानवान्** पुरोवर्त्तिनि शुक्तिकाशकले प्रवर्त्तेत निवर्त्तेतेति तव विरुद्धं क्रियाद्वयमापन्नम् । पुरोवर्त्तिवस्त्ववभास एव रज. विज्ञानादगृहीतभेदः समीचीनसंनिहितरजताऽवभाससदृशव्यवहारहेतुरिति नाऽयं प्रसङ्ग इति चेत् । अथ रजतं तदिदं तु शुक्लभास्वरमिति बुद्धेर्व्यवहारं कस्मान्न प्रवर्त्तयति ? यथैव हि **समीचीनसं**निहितरजतधीतुल्यतयाऽस्य भेदा-ऽनध्यवसायात्तथा तद्रजतमिदं तु शुक्लभास्वरमितीत्येतत्तुल्यताऽप्यभेदा-नध्यवसायात् । न चाऽध्यवसाययोः कश्चिद्विशेषः, येनैक एव स्वोचितं

---

१. वर्तमानगोचरः—१ पु० पा० । २. न शुक्तिकेयम्—२ पु० पा० ।
३. सामर्थ्यात्—२ पु० पा० ।

साम्यं संपादयति नाऽपरोऽपीति । सोऽयमस्य तदवस्थ एव विरुद्धक्रियाद्वयस्य समावेशप्रसङ्गः । न च चेतनव्यवहारोपायतुल्यता ज्ञानोपायानां, येन ज्ञानहेतोरेव चरमवस्तुव्यवहार इत्युच्येत । अजातरूपतत्कार्यतत्संबन्धानामपि चक्षुरादीनां ज्ञानोपायत्वदर्शनात् । चेतनव्यवहारस्य तु विज्ञानजत्वनियमेन पर्यनुयोगाऽनर्हत्वात् । तत्सिद्धमेतद्विवादाध्यासितं रजतविज्ञानं दृश्यमानपुरोवर्त्तिवस्तुगोचरं तदुपायाऽविषयत्वेऽपि सति तदर्थिनस्तत्रैव नियमेन प्रवर्तकत्वात् । तदुपायाऽविषयं सद्यत्रैव यदर्थिनं प्रवर्तयति तत्तद्विषयं, यथोभयसिद्धसमीचीनरजतविज्ञानमिति । तथा ह्ययं प्रवृत्तिनियमो हेतुमत्तया व्याप्तः स चाऽतद्विषयत्वाद् व्यावर्तमानः स्वव्याप्यं प्रवृत्तिनियममपि व्यावर्त्तयति तद्विषयत्वे एव व्यवस्थापयतीति प्रतिबन्धसिद्धिः । न चाऽसावतद्विषयत्वेऽपि भेदाऽग्रहमात्राद्भवितुमर्हति । अभेदाग्रहणस्यापि स्वोचितव्यवहारप्रवर्तनेन विरोधिक्रियासमावेशेन व्यवहर्तुः प्रवृत्तिनिवृत्तिप्रसङ्गादित्युक्तम् । तस्मादन्यस्याऽन्यथाग्रहणमेषितव्यम् । एवं च वर्तमानतयाऽवभासनमुपपद्यते । तथा च रजताऽवभासनं यदि न शुक्तिविषयम् अन्यत्वाद्वर्त्तमानाऽवभासनमपि तर्हि नाऽवर्त्तमानगोचरम् । अन्यत्वतादवस्थ्यात् ।

यद्युच्येत, अवर्तमानगोचरं भविष्यति वर्तमानाऽवभासं विज्ञानदोषसामर्थ्यात् । न च दोषाणां कार्यकारणसामर्थ्यविहतिमात्रे व्यापारो न कार्यान्तरविषयशक्त्याऽऽधाने, न जातु यवबीजमुपहतं दोषैः शाल्यङ्कुराय कल्पते इति साम्प्रतम् । भस्मकादिदोषवशादुदरजस्य वह्नेर्बहुविधाऽन्नपानपाचनोपलम्भात् व्यभिचारात् । अशितपीताहाररसभावः कार्यमुदरजस्य तेजसस्तत्प्रतिघातेन भस्मकस्यापि दोषभाव इति न व्यभिचार इति चेन्न । इहापि समानत्वात् । इन्द्रियादीनामपि परमार्थविज्ञानजननसामर्थ्यं स्वाभाविकमपबाध्य विपर्ययविज्ञानहेतुतामादधाना दोषा न च्यवन्ते तत्ताया । न चाऽनवभासनात् अवर्तमानं न विषय इति युज्यते । विकल्पाऽक्षमत्वात् । किमवर्तमानं रजतमवर्त्तमानतया न विषय इति साध्यते आहो स्वित् रजततयाऽपि विषय ? इति । तत्र प्रथमे कल्पे न विप्रतिपद्यामहे । रजततया त्वविषयत्वे साध्ये तत्त्वेनाऽनवभासनमसिद्धं न हेतुर्भवति । तथोक्तमाचार्येण 'आभासते कथंचिच्च तन्नात्यन्तं न भासते, तेन नावेदिके'ति । तस्माद्दोषवशादवर्त्तमानमपि वर्त्तमानतया प्रतीयत एवेत्याह--दोषतस्तथात्वमवर्त्तमानगोचरस्य विज्ञानस्य वर्त्तमानाऽवभासनमितरस्यापि शुक्तिकागोचरस्यापि रजताऽवभानं तुल्यमेव ।

दोषतस्तथात्वमितरस्यापि तुल्यम्। वर्तमाने चाऽवर्तमानाऽवभासो नाऽवर्तमाने वर्तमानाऽवभासः। अर्थसन्निधेः साफल्यात्। नेदं रजतमिति च प्रसक्तस्य प्रतिषेधोपपत्तेः। तैमिरिकस्य केशोण्ड्राभं ज्ञानमालोकांशेष्विति नाऽर्थापेक्षो व्यभिचारः। स्वप्नेऽपि किं स्मृतेर्वर्तमाना[1]ऽवभासत्वम्, उत मनसः स्वातन्त्र्यमिति? स्मृतेर्वर्तमानाऽवभासता युक्ता। अनन्तर-दिवसाऽनुभूतस्याऽविकलाऽनधिकस्य विस्पष्टस्मृतेः वर्तमानवद्वेदनाद्दोषो-पप्लवेन। न त्वदृष्टं मनसः स्वातन्त्र्यम्। दोषतश्च न सामर्थ्याऽतिरेको,

एवमापाततस्तुल्यतामभिधाय स्वाऽभिमतस्यास्य विशेषमाह—वर्तमाने शुक्तिशकले चाऽसमवर्त्तमानरजतावभासो नाऽवर्तमाने रजते वर्तमानाऽव-भासः। पुरोवर्त्तिवस्तुविषयं नाऽतीतविषयं रजतमिदमिति विज्ञानमित्यर्थः। कस्मात्? अर्थसंनिधेः साफल्यात्। कुतश्च नेदं रजतमिति प्रसक्तस्य प्रति-षेधोपपत्तेः। अङ्गुलीनिर्देशेन शुक्तिकाशकलमेव रजततया प्रतिषेधन्ति विप्रतिपत्तारः। तत्तत्र रजतं प्रसञ्जितं पूर्वविज्ञानेनेति गम्यते। न च विवेकाऽग्रहणेन तत्प्रसञ्जनं, जीवत्यविवेकाऽग्रहे परिपन्थिनि। तस्माद्विपरी-तग्रहे तत्प्रसञ्जकं कल्पते नान्यथा। न च पुरोवर्त्तित्वमनेनाऽतीते प्रसञ्जि-तम्। इदन्तया तस्य प्रतिषेधाऽसम्भवात्। तत्पुरोवर्त्तिवस्तुविषयमेव तद्वि-ज्ञानमित्यवदातम्।

ननु तैमि[2]रिकस्य केशाभविज्ञानमुपजायते। न च तत्रास्ति केशानां संनिधिः। नाप्यन्यस्य कस्यचित्। येन तत्तदालम्बनं भवेत्। तस्मादसंनि-हितकेशावलम्बनमेषितव्यं तद्विज्ञानम्। ततश्चाऽर्थापेक्षो व्यभिचारश्चक्षु-रादीनामित्यत आह—तैमिरिकस्य केशोण्ड्राभं विज्ञानमालोकांशेष्विति नाऽर्थापेक्षो व्यभिचारः।

यच्चोक्तमधिगतस्वातन्त्र्यं मनः स्वप्नाऽवस्थायां बाह्य इति तन्नि-राचिकीर्षुर्विमृशति स्वप्नेऽपि किं स्मृतेर्वर्त्तमानाऽवभासित्वमुत तस्मिन्मनः-स्वातन्त्र्यमिति? विमृश्य स्वपक्षं प्रतिजानीते—स्मृतेर्वर्त्तमानाऽवभासता युक्ता। हेतुमाह—अनन्तरदिवसाऽनुभूस्या [3]**विकलानाधिकस्यापि** स्पष्टस्मृते-र्वर्त्तमानवद्वेदनाद्दोषोपप्लवेन। न त्वदृष्टं मनसः स्वातन्त्र्यं बाह्ये युक्तम्। अथ कस्माद्दोष एव मनसो नाधत्ते तथाविधसामर्थ्याऽतिशयं? येन बाह्ये स्वतन्त्रमेव तद्वर्तेतेत्यत आह—दोषतश्च न सामर्थ्याऽतिशयो दृष्टो येन मनः

---

१. स्मृतेर्वर्तमानावभासता 'युक्ता। इत्येव'पाठोऽन्यत्र। २. तैमिरिमस्य। पु० पा०।
३. कल्पनाधिकस्यापि। पु० पा०।

दोषस्य तदपनयनहेतुत्वात् । सत्यस्वप्नदर्शनं तु यदि वर्तमानस्य तथा-ग्रहणात्तददृष्टम् । प्रबोधे स्वप्नाख्यानार्थसंवाददर्शनाद् दृष्टमिति चेत् । न । आख्यानसंवादाऽभावात् । आख्यानसंवादस्तु काकतालीयः । भविष्यतस्तु वर्तमानवद्दर्शनं कथं सत्यम् ? मा भूत् सत्यम् । अस्ति तावत् स्वातन्त्र्यं मनसः । तदपि तद्विविधस्याऽनुभूतस्य स्मरणम् । इतरथा मनसोऽदृष्ट-स्वतन्त्रं तद्बाह्ये तत्त्वज्ञानं प्रसुवीत । विपर्यासस्तु संस्कारतन्त्रादेव मनस इत्युक्तम् । कस्मान्न दोषतो मनसः सामर्थ्याऽतिरेक इत्यत आह—दोषस्य तदपनयनहेतुत्वात् । तदिति तच्च विज्ञानजननसामर्थ्यं परामृशति ।

यदि मन्येत अस्ति खलु सत्यं स्वप्नदर्शनमपि । तद्यथा । वल्लभा-लिङ्गितमात्मानम[1]नुभूय स्वप्ने जागरायामपि तथैव पश्यति । न चेयं वर्त-मानाऽवभासा स्मृतिरिति साम्प्रतम् । असति बाधके तदनुपपत्तेः । तदभावश्च संवाददर्शनात् । तस्मादत्र मनसः स्वातन्त्र्यमुपेतव्यमिति, तत्राह—सत्यस्वप्न-दर्शनं तु यदि वर्तमानस्य तथाग्रहणात् तददृष्टम् । न खल्वयमपि प्रत्ययः संवादी । तथा हि स्वप्ने जागराऽवस्थाऽऽपन्नमयमात्मानं वल्लभाबाहुकदली-वलयितमुपलब्धवान्, विनिद्रनयनोत्पलस्तु पश्यन्नपि प्रियाऽऽलिङ्गनं निद्रा-णोऽहमासं सम्प्रत्येव प्रबुद्ध इत्यवगच्छति । कुतोऽस्य स्वप्नदृष्टाऽर्थसंवाद ? इत्यर्थः ।

शङ्कते—प्रबोधे स्वप्नदृष्टार्थसंवाददर्शनान्मनसः स्वातन्त्र्यं दृष्टमिति चेत् । यदा खलु स्वप्ने शुक्लमाल्याम्बरधरो ब्राह्मणायनमाह 'सोमशर्मन्ना-युष्मन् पञ्चमेऽहनि प्रातरेव भूपतिरुर्वराप्रायभुवा ग्रामवरेण मानयिष्यति त्वामिति, स च पञ्चमेऽहनि प्रातरेव तथा संमानितः सोमशर्मा भवति सत्यस्वप्नवानित्यर्थः । निराकरोति—न । कस्मात् ? आख्यानसंवादाऽभा-वात् । आख्यानेन हि प्रबुद्धः सोमशर्मा स्मरन्नप्याख्यातारं ब्राह्मणायनं न पश्यति तत्प्रणीततां चाऽऽख्यानस्य स्मृत्यारूढस्य मन्यते इति । मैवं भूदा-ख्यानसंवादः स्वप्नस्यास्तीति, तथा च सत्यतेत्यत आह—आख्यानसंवादस्तु काकतालीयो दैवप्राप्तो न स्वप्नज्ञानं प्रमाणयति,, यथाविधस्यैव तत्साम-ग्रीकस्य विसंवादवतो बहुलमुपलब्धेः । संवादस्य दैवाऽधीनत्वात् । ननु यत्राऽतीतस्य वर्त्तमानवद्भासनं तत्र संस्कारतन्त्रमस्तु मनो भावनायोनि-पूर्वाऽनुभवात् । यत्र पुनरनागत एव वर्तमानतयाऽवभासते स्वप्ने कुतस्तद-नुभवः कुतस्तरां च तद्भावना कुतस्तमां च मन[2]स स्वतन्त्रते ? त्यत आह—भविष्यतस्तु वर्तमानवद्दर्शनं कथं सत्यम् ? चोदक आह—मा भूत्सत्य-

१. मभूय । पु० पा० । २. मनससःस्वतन्त्रता । पु० पा० ।

सामर्थ्यस्य कल्प्यत्वात् । धर्मविशेषश्चेद्यथार्थदर्शनप्रसङ्गात् । तस्य कार्यं प्रत्यदृष्टसामर्थ्यस्य कल्प्यत्वात् । यदि च न स्मृतिः स्वप्नज्ञानं प्रमाणं तर्हि न प्रमाणमपि । बहिस्तथा ग्राह्यस्याऽभावात् । न तर्हि बहिरर्थे स्वतन्त्रं मनः । स्वप्ने तस्याऽग्राह्यत्वात् । ग्राह्यत्वे वाऽनुभूतस्य ग्रहणं, तथा दृष्टत्वात् । न दोषतोऽदृष्टसामर्थ्याऽतिरेककल्पनेत्युभयथा न स्वतन्त्रं बहिर्मनः । एतेन तिमिरतः केशादिदर्शनं प्रत्युक्तम् ।

मस्ति तावत्स्वातन्त्र्यं[1] मनसः संस्कारस्य भविष्यत्यसम्भवात् । समाधाता स्वाऽभिप्रायमुद्घाटयति—तदपि तद्विधस्यान्यत्राऽनुभूतस्य स्मरणम् । न हि सर्वथाऽननुभूतमुपलभ्यते स्वप्ने । परस्परविरुद्धानामपि क्वचित्कदाचित्कंथंचिदुपलब्धानां सहानुभवविभ्रमसम्भवः । कस्मात्पुनः क्लेशेन सर्वत्र स्मरणमाश्रीयते ? इत्यत आह—इतरथा मनसोऽदृष्टस्वातन्त्र्यकल्पनाप्रसङ्गात् ।

यद्युच्येत स्वप्नेऽपि प्रेयसीसंभोगजन्मनः सुखोद्भवस्योपलब्धेरस्ति समुदाचाराद् वृत्ति[2]रस्य धर्मः, तेन तद्विशिष्टमेव मनः प्रियानुभवं भावयिष्यतीति कृतं संस्कारेणेति, तत्राह—धर्म्मविशेषश्चेद् यथार्थदर्शनप्रसङ्गात् । धर्म्मविशेषो हि यथार्थदर्शनहेतुरवगत आगमतः कथं मिथ्याज्ञानाय कल्पते ? अपि च लौकिकं कारणमसाधारणमाश्रित्य स्वकार्यं जनयति । न च तन्मनसः स्वातन्त्र्यं प्रति किंचिदुपलभ्यते । तेन धर्मविशेष एवाऽसहायः कारणमिति कल्पनीयं, तच्चाऽदृष्टप्रमाणेनेत्याह—तस्य धर्म्मविशेषस्य मनःस्वातन्त्र्यं कार्यं प्रत्यदृष्टसामर्थ्यस्य कल्पनाप्रसङ्गात् । यदि च न स्मृतिः स्वप्नज्ञानं भवन्मते प्रमाणं तर्हि स्वतन्त्रस्य मनसस्तद्विषये प्रवृत्तिः । अथ न प्रमाणमपि । कुतः ? स्वप्नज्ञाने भासते वस्तु, तस्य बाधके सति बहिस्तथा ग्राह्याऽभावात् ।

उत्तरं—न तर्हि बहिरर्थे स्वतन्त्रं मनः, स्वप्ने तस्य तथाविधस्याऽग्राह्यत्वात् । प्रकारभेदरहितवस्तुरूपग्राह्यत्वे वा भावनैव जागर्ति स्मरणहेतुः । तस्याश्च पूर्वाऽनुभवमन्तरेणाऽसम्भवादनुभूतस्य ग्रहणम् । तथा सिद्धोपप्लववशात्संस्कारतन्त्रस्य मनसो बाह्यस्मृतेः कारणत्वेन दृष्टत्वात् । न तु दोषतोऽदृष्टसामर्थ्याऽतिरेककल्पना । तस्माद्यदि ग्राह्यत्वं बाह्यस्य यदि वाऽग्राह्यत्वमुभयथाऽप्यस्वतन्त्रं बहिर्मनः । एतेन मनसः स्वप्नविज्ञाने स्वातन्त्र्यप्रदर्शनमार्गेण तिमिरतः केशादिज्ञानं मानसमिति प्रत्युक्तम् । अलोकांशालम्बनतया तद्विज्ञानस्य दोषवल्लोचननिमित्तत्वात् ।

---

१. स्वन्त्र्यं । पु० पा० ।

२. समुदाचरप्रवृत्ति पा० २ पु० ।

यत्तूक्तमनाश्वासादिति तदन्यत्राऽऽचार्येण—

'बोधादेव प्रमाणत्वमिति मीमांसकस्थितिम् ।
विदन्नव्यभिचारेण तां व्युदस्यत्यपण्डितः' ।।

इत्यादिना प्रबन्धेन दूषितमिति नेह दूषितम् । तथा दूषणकणिकेह सूच्यते ।

किमव्यभिचारितैव प्रामाण्यमथ तत्कारणं तद्व्यापिका वा ? येन क्वचिद्व्यभिचारदर्शनात्तदभावे सति ज्ञानमात्रेऽनाश्वासः स्यात् । न तावद-व्यभिचारितैव प्रामाण्यम् । अव्यभिचारिणामपि वह्न्यादौ धूमादीनां कुतश्चिन्निमित्तादनुपजनितकृशानुप्रत्ययानामप्रामाण्यं स्यात् । व्यभिचारि-णामपि चक्षुरादीनां नीलादिभेदे तद्विषयविज्ञानहेतूनां प्रामाण्यमिति साम्प्रतम् । प्रमितिक्रियां प्रति साधकतमत्वसम्भवात् । अन्यथा काष्ठादी-नामपि पाकादावपि असाधनत्वप्रसङ्गात् । नापि प्रामाण्यकारणम् । अत एवाऽन्यथा चक्षुरादीनां नीलादिभेदव्यभिचारिणां तत्प्रतिमितिहेतूनाम-प्रामाण्यप्रसङ्गात् । केचिदेव हि धूमादयो वह्न्यादिबोधजननायाऽव्यभिचार-मपेक्षन्ते, नाऽपेक्षन्ते च चक्षुरादयः । स्वभावनियमात् । एतेन व्यापकत्वम-व्यभिचारितायाः प्रमाण्यं प्रत्युक्तं वेदितव्यम् । ज्ञानेनाऽव्यभिचारोऽपेक्ष्यते स्वकार्ये इति चेत् । न । विकल्पाऽसहत्वात् । अथापि स्यादव्यभिचारितोपेतं विज्ञानं प्रमाणं तस्याऽभावस्तत्त्वम् । तद्धि तथाविधं सत्स्वकार्ये पर्याप्तं मिथ्याज्ञानस्य तत्राऽसामर्थ्यादिति । तन्नास्ति । विकल्पाऽनुपपत्तेः । तथा हि । विज्ञेयाऽवभासोऽस्य कार्यमुच्यते स्वगोचरोचितव्यवहारप्रवर्त्तनं वा । तत्र न तावत् ज्ञेयाऽवभासेऽस्य स्वभावप्रतिलम्भमात्राऽधीनजन्मनि सम्भवत्यव्यभि-चारग्रहाऽपेक्षा । न हि वयमुत्पन्नविज्ञानविषयाऽवभासायाऽस्य स्वविषयस्य स्वविषयाऽव्यभिचारमुदीक्षमाणाः स्म । भूतिरेव हि विज्ञानस्य विषयाऽवभासे क्रियेति । यथाह—'तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते । तदेव च प्रमाण-रूपमिति ।

'न हि तत् क्षणमप्यास्ते जायते वा प्रमात्मकम् ।
येनाऽर्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत् ।।इति च ।

अथ स्वगोचरोचितव्यवहारप्रवर्त्तने ज्ञानमव्यभिचारितामपेक्षते । न हि विज्ञानं विज्ञानमित्येव व्यवहारं प्रवर्तयति, मिथ्याज्ञानादपि तत्प्रसङ्गात् । तस्मान्मिथ्याज्ञानाद् व्यावृत्तमस्य संवादकत्वमर्थक्रियाप्रापणसामर्थ्यमव्यभि-चारितालक्षणं प्रेक्षावत्प्रवृत्त्यङ्गमवगन्तव्यम् । न खल्वव्यभिचारमन्तरेण

ततस्तत्प्राप्तिः स्वार्थव्यभिचारश्च । ततोऽन्यस्य ज्ञानस्य तस्मादनुत्पत्तेः । अन्यथाऽतिप्रसङ्गात् । यथाह—

'अर्थस्याऽसंभवे भावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबन्धस्वभावस्य तद्धेतुत्वे समं द्वयम्' ।। इति ।

तद् द्विविधं प्रत्यक्षज्ञानम् । अर्थक्रियासाधननिर्भासकं प्रवर्तकं प्रमाणम्, अभ्यासदशाऽऽपन्नं तद्विपरीतं च । तत्र तद्विपरीतस्याऽर्थक्रियानिर्भासाद्विज्ञानात्प्रामाण्यमभ्युपगन्तव्यम् । यथाह 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाण'मिति । तथा 'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः, असंवादन'मिति । तदर्थनान्तरीयकाऽर्थान्तरदर्शनादभ्यासदशापन्नात् । तद्यथा । आराद्वह्निविज्ञानस्य वह्निकिंशुकनिचयसंशयेन तिरोहितप्रामाण्यस्य [1]धूमदर्शनात् प्रामाण्यविनिश्चयः । अर्थक्रियानिर्भासस्य ज्ञानस्याऽगृहीतप्रामाण्यस्य न प्रवर्तकविज्ञानप्रामाण्यनिश्चायकत्वं, गृहीतप्रामाण्यस्य वा[2] तन्निश्चायकत्वेनाऽनवस्थाप्रसङ्ग इति चेत्, न । अर्थक्रियानिर्भासस्य ज्ञानस्य स्वरूपेणेष्यमाणतया फलत्वेनाऽप्रवर्तकतया प्रमाणलक्षणाऽयोगितया व्यभिचारनिश्चयस्याऽनुपयोगात् । तद्रूपस्य च स्वसंवेदनसिद्धस्य शङ्काऽनास्पदत्वात् । यदाह—'स्वरूपस्य स्वतो गति'रिति । निबन्धारोऽप्याहुः—

अर्थक्रिया सुखाद्यात्मज्ञानमेव तथाविधम् ।
प्रमाणलक्षणाऽयोगि स्वतोऽधिगतशक्तिकम्' ।। इति ।

अन्योन्यसंश्रयान्नैवमिति चेत् । न । प्रवृत्तिद्वैविध्यात् । तत्रैतत्स्यात् । अर्थक्रियानिर्भासाद्विज्ञानाच्चेदव्यभिचारनिश्चयश्चेतसस्तदेव कुतः ? प्रेक्षावतां प्रवर्तकविज्ञानान्निश्चिताऽव्यभिचारादिति चेत् प्राप्तमन्योन्यसंश्रयमिति तत्र प्रेक्षावत्प्रवृत्तिद्वैविध्यात् । द्वयी खल्विह प्रवृत्तिः प्रेक्षावतां, तत्राऽऽद्या प्रवर्त्तकविज्ञानपरीक्षार्था, द्वितीया तु परीक्षितसाधननिर्भासस्य विज्ञानस्य तज्जातीयाद्विज्ञानादर्थक्रियाप्राप्त्यर्था । यथा किल कृषीवलस्य कर्परस्थितायां कृषिपरिकर्मितायां बीजाऽऽवपनलक्षणा प्रवृत्तिराद्या बीजपरीक्षार्था । स तु तत्राऽङ्कुरोत्पादनादवगतबीजतत्त्वः सस्याऽधिगमकाम्यया द्वितीयां प्रवृत्तिमारभते परिकर्मितायां भुवि तज्जातीयबीजाऽऽवपनलक्षणां, तथेयमपि प्रवृत्तिर्द्वयीति नाऽन्योन्यसंश्रयः । न च प्रेक्षावत्त्वव्याघातः । परीक्षोपाये प्रवर्तमानस्याऽनुपाये संदिग्धोपाये वाऽप्रवृत्तेः । प्रवर्ततां वोपायसंदेहादपि तथापि न प्रेक्षावत्त्वविघातः । अर्थसंशयस्य प्रेक्षावत्प्रवृत्त्यङ्गत्वात् निवृत्त्यङ्गत्वाच्चाऽनर्थसंशयस्य । अभ्यासदशापन्नस्य तु प्रत्यक्षस्य प्रापिताऽर्थक्रिया-

१. धूमाऽदर्शनात् । पु० पा० । २. प्रमाणकस्य १ पु० पा० ।

ज्ञानसाधर्म्यादनुमानात् प्रामाण्यविनिश्चयः । अनुमानस्य तु नान्तरीयकाऽर्थदर्शनजन्मतया निश्चितव्यभिचारस्य स्वत एव प्रामाण्यनिश्चयः । तत्स्वगोचरोचितव्यवहारप्रवर्त्तनायाऽस्त्वव्यभिचारनिश्चयाऽपेक्षा प्रमाणस्येति ।

तदिदमसाम्प्रतम् । अर्थक्रियानिर्भासिनो हि विज्ञानस्याऽर्थाव्यभिचारस्य स्वार्थे विनिश्चायकत्वं दुर्लभं, किमङ्ग पुनः पूर्वविज्ञानस्य प्रापणसामर्थ्ये स्वसंवेदनसिद्धस्य तस्य प्रयोजनतया किमर्थाऽव्यभिचारनिरूपणेन किं च प्रामाण्येनेत्युक्तमिति चेत् । तत्किमिदानीं यत्र स्वप्ने कामुकस्य स्वोचिताऽर्थक्रियासामर्थकामिनीविज्ञानं तदनन्तरं प्रवृत्तिज्ञानमथ संभोगविज्ञानमन्तरं सुखं चरमधातुविसर्गश्चेति तत्र तावदाद्यं कामिनीविज्ञानमस्तु प्रामाण्यं, न ह्यन्यत्राऽर्थक्रियानिर्भासं नास्ति विज्ञानम् । तदनन्तरं तस्य भावाज्जागरायां तदर्थकारिणः कामिनीरूपस्य वाधनात् । सुखचरमधातुविसर्गयोश्च मनोमात्रयोनितया कामिन्यामसत्यामपि तज्ज्ञानमात्रादुत्पादनात् जागरायामनुवृत्तेरविरोधात् । अन्यथा कामिनीवस्तुसाध्याऽधरपल्लवनखक्षतादिवद्व्यावृत्तिप्रसङ्गादयमदोष इति चेत् । न । प्रकृतेऽर्थक्रियानिर्भासस्य ज्ञानस्याऽव्यभिचारित्वाऽग्रहेणाऽर्थक्रियाया अनिश्चयेन प्रवर्त्तकस्य ज्ञानस्याऽर्थक्रियासमर्थवस्तुपरिप्रापणलक्षणप्रामाण्याऽनिश्चयेन स्वप्नविज्ञानसाम्यात् ।

यदि मन्येत अर्थक्रियानिर्भासं ज्ञानं स्वतः प्रमाणम् । अर्थक्रियानिश्चयात्मकत्वात् । न च स्वप्नादौ प्रसङ्गः । तत्राऽवस्थान्तरे पुरुषान्तरे कालान्तरे वा वाधकोत्पादादप्रामाण्यात् । तत्प्रवर्त्तकेष्वपि ज्ञानेषु समानमन्यत्राऽभिनिवेशात् । अपि चाऽव्यभिचारित्वं नाम ज्ञानस्यार्थेन सह । न च तदर्थग्रहणादृते शक्याऽवसानम् । न खल्वगृहीतदहनो धूमस्य तदव्यभिचारमवधारयितुमर्हति । क्षणिकत्वमपि ज्योतिर्विदागमेषु पूर्वाऽपरभागरहितकालकलामात्रस्य प्रसिद्धेस्तन्मात्रवर्त्तित्वं भावस्येति नाऽत्यन्ताऽप्रसिद्धं येन सत्त्वस्य तदव्यभिचारो न शक्याऽवगमो भवेत्। मा भूद्वा कापि न नः क्षतिः । न चाऽप्रमाणमप्रमाणेन वा ऽनवधृतप्रामाण्येन तद्ग्रहणमव्यभिचारग्रहणाऽङ्गम् । न खल्वप्रमाणेनाऽगृहीतप्रमाण्येन वा प्रमाणेन विषयीकृतो वह्निर्धूमाऽव्यभिचारग्रहणाय कल्पते । तस्मादव्यभिचारग्रहणमन्तरेण नाऽर्थग्रहणं, न चाऽर्थग्रहणमन्तरेणाऽव्यभिचारग्रहणम् इति परस्पराश्रयप्रसक्तिः । एवं च दृष्टसामर्थ्यसाधर्म्याऽनुमानेनाऽभ्यासदशापन्नप्रत्यक्षज्ञानानां स्वार्थव्यभिचारग्रहणं पराऽस्तं वेदितव्यम् ।

यच्चाऽनुमानस्य स्वतःप्रामाण्यमुक्तं तस्मिन् दर्शने प्रत्यक्षस्य स्वाऽर्थाऽव्यभिचारग्रहणादुक्तेन क्रमेण तत्पूर्वकत्वाऽनुमानस्योदय एव दुर्लभः कुतो-

ऽस्य प्रामाण्यं कुतस्तरां च तत् स्वतः? नन्वव्यभिचाराऽग्रहे ज्ञानमात्राद-नाश्वासः प्रेक्षावतामित्युक्तम्। सत्यमुक्तमिदं तु वक्तव्यं, कोऽयमनाश्वासः, किं संशय आहोस्विदज्ञानम्? न तावदज्ञानं बोधस्यैव ज्ञानत्वात्। नापि संशयः। विशेषस्मृत्यपेक्ष विमर्शं त्रिकारणं पञ्चकारणं वा संशयं रोचयन्ते[1] समानाऽनेकधर्मोपपत्तेः[2]। 'विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य[3]वस्थातश्च विशेषा-ऽपेक्षो विमर्शः संशय' इत्याचक्षाणास्तद्विचक्षणाः। न चाऽगृहीते विशेषे[4] स्मरणसंभवः। न च संशयात्मैव तद्ग्रहणं स्मृतिहेतुः। स्मृतौ सत्यां यद्भावात्तस्मिंश्च स्मृत्युपपत्तेरन्योन्याश्रयप्रसङ्गात्। संस्कारजत्वेऽपि च प्रसङ्गतादवस्थ्यात्। अनादितायाश्च गत्यन्तरसम्भवेऽनाश्रयणात्। तत्सिद्धं नाऽव्यभिचारनिश्चयो ज्ञानस्य स्वाऽर्थनिश्चयनिमित्तं, तस्योत्पत्तौ तद-पेक्षत्वात्। यत्स्वरूपस्योत्पत्तौ यदपेक्ष्यते न तत्तस्य हेतुः। यथाऽनुमेयविज्ञानं लिङ्गविज्ञानस्य। न चाऽसिद्धता हेतोः। उक्तं हि—'स्वाऽर्थनिश्चयापेक्षं तदव्यभिचारविज्ञान'मिति। कार्यात्प्राग्भावित्वेन हि कारणत्वं व्याप्तं, तद्विपक्षाद्विरुद्धोपलब्ध्या व्यावर्तमानं कारणत्वमपि व्यावर्तयतीति प्रतिबन्ध-सिद्धिः। अर्थप्रापण[5]शक्तिरपि तस्याऽर्थत्वप्रदर्शनान्नाऽन्या। न हि ज्ञानमात्मीय-हस्ते वस्तूानयति, अपि तु तत्र प्रवर्तयति ज्ञातारम्। न चास्य तत्र प्रवर्त्तन-मन्यदतो वस्तुतत्त्वोपदर्शनात्। न च वस्तुतत्त्वमर्थस्याऽन्यदतः स्वरूपात्। तच्चास्य रूपमनुभवः स्वभावत एवाऽनुभवति, न पुनरव्यभिचाराद्यपेक्षते। तदिदमनुभवस्याऽर्थे स्वतःप्रामाण्यमुच्यते। यत्पुनरनुभूयमानाद्रूपादर्थस्याऽ-न्यथात्वं न तदनुभवत्यनुभवः। रजतविभ्रमेण तदन्यथात्वग्रहणे रजतार्थि-नस्तत्राऽप्रवृत्तेर्बाधकाऽनुपपत्तेश्च। ततश्च ज्ञानान्तराऽवसेयमन्यथात्वं, तेन तत्राऽन्यदपेक्षत इति तदस्य परत इत्युच्यते। यत्पुनरस्य तत्त्वाऽवबोधरूपत्वं विज्ञानस्य तदपि तद्ग्राहिणः प्रत्ययान्तरान्मानसादानुमानिकाद्वाऽवगम्यमानं स्वत इत्युच्यते। तत्स्वरूपग्राहिणः प्रत्ययात्प्रत्ययान्तराऽनपेक्षणात्। न चास्य बाधकाशङ्कायामाप्रामाण्यमाशङ्कनीयम्। बाधाऽनर्हे तदाशङ्काऽनुपपत्तेः। सन्ति हि कानिचिद्विज्ञानानि स्वस्थेन्द्रियस्वान्तस्य पुंसः स्फीताऽऽलोकमध्यवर्ति-प्रमेयविषयाणि, यत्र न मनागपि बाधा दृष्टचरी कथं तत्र बाधार्हता, यत्रापि निपुणेन प्रतिपत्रा भवितव्यम्। स यदि प्रयत्नेनाऽनुसरन्नपि नाऽऽपादयत्यस्य बाधां तदौत्सर्गिकमस्य प्रामाण्यमविहतमनपेक्षमवतिष्ठते। यदि तु पश्येत्त-तस्तदपोहितमिति नान्यत्र तदुत्प्रेक्षितव्यम्। यथोक्तम्—

---

१. रोचन्ते। पु० पा०। २. पपत्तेर्विप्रतिपत्ते। का० वि० पा०।
३. लब्धिव्यवस्था। पु० पा०। ४. विशेषे न। पु० पा०।
५. प्रमाण २ पु० पा०।

लिङ्गाद्याभासजं लोके प्रतिभानमनिश्चयः ।
सर्वतः पूर्णविज्ञानः पूर्णे न्यूने न कश्चन ॥

यदपि किल श्वो मे भ्राताऽऽगन्तेति प्रतिभायामक्षलिङ्गाद्यपेक्षाऽभावाद् बहिः स्वतन्त्रं मनो दृष्टं, सर्वं च सर्वमिति वा सदसत्पदार्था द्रव्यादयः

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थाऽन्यथात्वहेतूत्थदोषज्ञानादपोद्यते ।
द्वावेव निन्दितौ लोके निरशङ्काऽतिशङ्कितौ ॥
एवं त्रिचतुरज्ञानजन्मनो नाऽधिका मतिः ।
अर्थ्यते[1] तावदेवैकं स्वतः प्रामाण्यमश्नुते ॥
उत्प्रेक्षते हि यो मोहादज्ञानमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥ इति ।

न चेदं शापमात्रम् । उक्तं हि—'न बाधाऽनर्हे तदाशङ्का युज्यते अतिप्रङ्गादि'ति । बाधकारणदोषाभ्यामप्रामाण्यज्ञानात्तदभावग्रहाऽपेक्षप्रामाण्य[2]निश्चये, न तु स्वत इति चेत् । न एकहेतुत्वकल्पनायां कार्योत्पत्तावनेकहेतुत्वकल्पनाऽनुपपत्तेः । बाधकारणदोषग्रहणस्य चाऽप्रामाण्यनिश्चयहेतुभावमात्रेण प्रामाण्योपहन्तृत्वेन तदभावे बोधमात्रादेव प्रामाण्योपपत्तौ न तदभावोऽपेक्षणीयः । स च सत्यामाशङ्कायां, सा च यादृशे विपये दृष्टचरी तादृशे एव न सर्वत्रेत्यावेदितम् । तत्सिद्धं स्वतः सर्वप्रमाणानां प्रामाण्यं, तदन्याऽनपेक्षणात् । यद्यतोऽन्यत्राऽपेक्षते तत्तस्य स्वत एव । तद्यथा वह्नेर्दहनसामर्थ्यमिति । तदन्याऽनपेक्षत्वं च साधितमुक्तेन प्रवन्धेन । तदन्याऽपेक्षस्य हि तत्स्वभावाऽनधीनत्वे तदाश्रितत्वविरुद्धतदनाश्रितत्वप्रसक्तिबाधकं प्रमाणमिति न सन्दिग्धो व्यतिरेकः । तदिदमुक्तम्—

'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्त्तुमन्येन शक्यते' ॥इति ।
तस्मान्नाऽनाश्वास इति सिद्धम् ।

सम्प्रति नैयायिकाऽभिमतयोगिज्ञानविषयत्वं विश्वस्य निराकरोति—

लिङ्गाद्याभासजं लोके प्रतिभानमनिश्चयः ।
सर्वः संपूर्णविज्ञानः पूर्णे न्यूने न कश्चन ॥

यदपि किल श्वो मे भ्राता आगन्तेति लौकिकवचां प्रतिभायामक्षलिङ्गाद्यपेक्षाऽभावाद्[3] बहिः स्वतन्त्रं मनो दृष्टम् । ननु तत्र भ्रातुः स्वरूपस्य

१. प्रार्थ्यते २ पु० पा० । २. प्रामाण्या पु० पा० । ३. लिङ्गाद्यभावात् २ पु० पा० ।

प्रकृतिपुरुषौ पञ्चस्कन्धा इत्यादि वाऽभेदेन लोकप्रमाणवशेन मनसो विषय इत्यपि स्वातन्त्र्ये बहिः सर्वज्ञत्वसिद्धिः । अत्रोच्यते —

लोकोत्तरं तावत् प्रतिभानं विवादपदं, लौकिकं तु प्रियाऽप्रियगोचरं प्रायः सहप्रवृत्तहृदयप्रसादोद्वेगादिलिङ्गाद्याभासप्रभवमत एवाऽनिश्चयात्मकं तथा व्यपदिशन्ति प्रतिभानमेव, न तु निश्चयः । उभयकोटिसंस्पर्शित्वा-त्तुल्यत्वाच्च न संशयात्मकम् । प्रतिभैव । न प्रमाणम् । अनिश्चयफलत्वात् । प्रमाणान्तरापेक्षनिश्चयत्वात् । एवं लिङ्गादिजातीयाऽपेक्षत्वात् तत्रापि

प्रागुपलब्धेर्भवत्वेवमिह तु विश्वेषां भावानां देशकालाऽवस्थाविशेषविप्र-कीर्णानां न रूपतोऽप्युपलम्भसम्भव इति कथमत्र मनसः स्वातन्त्र्यमित्यत आह—सर्वं च सर्वमिति वा प्रकाररहितेन रूपेण व्यूढं प्रकारभेदवता यतो नेदानीं व्यूहे हेतुप्रकारान्नैयायिकः स्वपराऽभिमतानाह—सदसत्पदार्था द्रव्या-दयः प्रकृतिपुरुषौ पञ्चस्कन्धा इत्यादिना वा भेदेन लोकप्रमाणवशेन मनसा विषयीकृतं भावनामयस्य स्फुटाऽवभासस्य लोकोत्तरस्य प्रत्यक्षस्य विषय इत्यपि सर्वज्ञतासिद्धिः स्वातन्त्र्ये मनसः । एतदुक्तं भवति । निष्प्रकारं सप्रकारं वा लौकिकेन प्रमाणेन गृहीत्वा भावयतो भावनाऽपनीताऽऽवरणं मनः स्वतन्त्रमेव विश्वमवगाहते इति ।

अत्रोच्यते । लोकोत्तरं तावत्प्रतिभानं सत्तया विवादपदमेवेति न तत्र मनसः स्वातन्त्र्यं स्वरूपेण प्रतिषेधनीयम् । लौकिकं तु प्रियाऽप्रियाऽगोचरं न स्वतन्त्रमनोजन्यं, यतः प्रायः सहप्रवृत्तहृदयप्रसादोद्वेगादिलक्षणलिङ्गाद्या-भासप्रभवमत एव लिङ्गाद्याभासप्रभवत्वादेव तदनिश्चयात्मकम् । तथा च व्यपदिशन्ति 'एवं प्रतिभानं न तु निश्चय' इति । उभयकोटिसंस्पर्शस्या-ऽतुल्यत्वाच्च न संशयात्मकम् ।

ननु यदि न संशयो नापि निश्चयः तर्हि तद्विज्ञानतत्त्वं वाच्यमित्यत आह—प्रतिभैव । न ह्येतद्विज्ञानतुल्यवदुपप्लवमानविरुद्धकोटिद्वयविषयो येन संशयात्मकं, नाप्येककोटिविषयामपि प्रमामवधारयति येन निश्चयः स्यात् । न चैककोटिविषयं न च प्रकाशते येन न स्यात् । तस्मात्सिद्धं प्रतिभैवेति । तर्हि स्वयमनिश्चयात्मापि निश्चयजननादस्तु प्रमाणं चक्षुरादिवदित्यत आह—न प्रमाणम् । कस्मात् ? अनिश्चयफलत्वात् । ननूपजाते प्रतिभाभेदे यत्र तदनन्तरं निश्चयो भवति तत्र निश्चयफलकः प्रमाणभेदः कस्मान्न प्रमाणम् ? इत्यत आह—प्रमाणान्तराऽपेक्षनिश्चयत्वात् । न तावत्प्रतिभाया एवाऽनपेक्षया एव निश्चयजनकत्वं, सर्वत्र तथाभावप्रसङ्गात् । लिङ्गाद्य-

पारतन्त्र्यम् । अन्यथा तदनपेक्षो मनोमात्रसाधनो बहिरर्थसंबन्धः सर्वस्य सर्वस्मिन् सर्वदा स्यादिति । अदृष्टविशेषादक्षलिङ्गाद्य[1]नपेक्षं मनः कस्यचिद् बाह्येऽप्यर्थेऽसति चक्षुराद्यारम्भवैयर्थ्यप्रसङ्गः । तत एवाऽदृष्टविशेषाऽभिसंस्कृतात् सर्वप्रतिपत्तिसिद्धेस्तस्यापि वैयर्थ्यात् । अकरणस्यैव कर्तुरात्मनोऽदृष्टविशेषादेव परिच्छित्तिक्रियासिद्धेः । न खल्वनुपायमदृष्टमप्यर्थं साधयति शरीराद्यार[3]म्भात् न तर्हि अक्षलिङ्गाद्यनपेक्षं चैभिर्मनसः प्रवृत्तिः स्वतः । अत एव योगजाद्धर्मात् सर्वार्थेषु न मानसं प्रत्यक्षं, संनिकर्षोपायत्वात् सिद्धेः ।

पेक्षायां च तद्धेतुत्वे कृतमनया, लिङ्गादीनां तन्निरपेक्षाणामेव तत्र तत्र सामर्थ्यप्रतीतेरिति ।

उपसंहरति—एवं लिङ्गादिजातीयाऽपेक्षत्वाल्लिङ्गाद्याभासाऽपेक्षत्वात् तत्रापि प्रतिभानेऽपि लौकिके परतन्त्रं मनः । अन्यथा स्वातत्र्ये तल्लिङ्गाद्याभासाऽनपेक्षमनोमात्रसाधनो बहिरर्थसंबन्धो मनसो नित्यसंनिधानात् सर्वस्य पुंसः सर्वस्मिन्नर्थे सर्वदा स्यादिति सर्वः सर्वदा सर्वदर्शी स्यात् । अदृष्टविशेषाद् बाह्ये मनः स्वतन्त्रं कदाचित्कस्यचिदेवेति नाऽतिप्रसङ्गः । तदाह—अदृष्टविशेषादक्षलिङ्गाद्यनपेक्षं मनः कस्यचित्क्वचिद्बाह्येऽप्यर्थे चक्षुराद्यारम्भवैफल्यप्रसङ्गः । कस्मात् ? तत एव मनसोऽदृष्टविशेषाऽभिसंस्कृतात्सर्वरूपादिप्रतीतिसिद्धेः । आसतां चक्षुरादयः, तस्य मनसोऽपि वैयर्थ्यम् । कुतः ? अकरणस्यैव कर्तुरात्मनोऽदृष्टविशेषादेव रूपादिपरिच्छित्तिक्रियासिद्धेः ।

यद्युच्येत, न खल्वनुपायमदृष्टमप्यर्थं साधयति । कुतः ? शरीराद्यारम्भात् । न तर्ह्यक्षलिङ्गाद्यनपेक्षा बहिर्मनसः प्रवृत्तिः । ततोऽदृष्टत एवाऽनुपायस्याऽसाधनत्वादेव योगजाद्धर्मात्सर्वार्थेषु न मानसं प्रत्यक्षं, यत्तत्तारकमित्याचक्षते स्वायम्भुवाः । कुतः ? इन्द्रियाऽर्थसंनिकर्षोपायत्वात्तद्बाह्यविषयप्रत्यक्षत्वसिद्धेः ।

यद्युच्येत नेन्द्रियार्थसंयोग एव, तदुपायगुणादिज्ञानस्याऽप्रत्यक्षत्वप्रसङ्गात् । नाऽपीन्द्रियसमवाय एव । शब्दज्ञानस्यैव प्रत्यक्षत्वापत्तेः । अपि तु संयुक्तसमवायादयोऽपि तदुपायाः । अत एव सर्वाऽविरोधार्थ'मिन्द्रियार्थसंनिकर्षोत्पन्न'मित्याह स्म तत्रभवानक्षपादः । तद्गुणादिग्रह इव संयुक्तसमवायादिहापि समाधिजधर्म्मसंस्कृतस्य मनसो बाह्येन्द्रियस्य वा तत्संयुक्त-

---

१. लिङ्गाद्यपेक्षं । पु० पा० । २. संस्तुतात् । पु० पा० ।
३. शरीराद्यारम्भतेन । पु० पा० ।

संयुक्तसंयोगाऽनभ्युपगमात् । अन्यथा कुड्यादिव्यवहिताऽर्थोपलब्धिप्रसङ्गात् । अनुमानेऽपि प्रत्यक्षत्वाऽऽपातात् । अजाताऽतिवृत्तेषु तस्याप्ययोगात् । अत एव नेन्द्रियाऽर्थयोः सिद्धयोः सन्निकर्षः । अतीताऽनागतानां तदाप्यसत्त्वाद् व्यवहिताऽर्थोपलब्धिप्रसङ्गात् । अनुमानादिषु च प्रत्यक्षत्वाऽऽपातात् । सन्निकर्षग्रहणाऽऽनर्थक्याच्च । नन्वतीताऽनागतानां देशादिविशेषणत्वेन ज्ञानाज्ज्ञानस्य विशेषदेशाद्यालम्बनत्वात् तैश्चक्षुषो मनसो वा सन्निकर्षसम्भवात् । तेषां च सत्त्वात्सन्निधानादव्या[1]हतमनुत्पन्नाऽतिवृत्तज्ञानस्येन्द्रि-

संयोगादिराश्रयिष्यते तत्तद्व्यवहितादिग्रहणसिद्ध्यर्थमित्यर्थत आह—संयुक्तसंयोगस्य प्रत्यक्षज्ञानहेतोरनभ्युपगमाद् भवद्भिः ।

न केवलमनभ्युपगतोऽनुपपन्नश्चाऽतिप्रसङ्गादित्यत आह—अन्यथा कुड्यादिसंयोगव्यवहिताऽर्थोपलब्धिप्रसङ्गादस्मदादीनाम् । न च समाधिसंस्कृतस्य मनसो लोचनादेर्वा सामर्थ्यमेवंविधं सम्भवतीत्युक्तं बौद्धसर्वज्ञपरीक्षायाम् । ततः सर्वस्य सर्वज्ञत्वप्रसङ्गात् अस्ति हि कथंचित्सर्वस्य सर्वेण सम्बन्धः । तथाऽनुमानेऽपि प्रत्यक्षत्वापातात् । इन्द्रियार्थसन्निकर्षोत्पन्नत्वेन ह्यनुमानात् प्रत्यक्षं व्यावर्तते । यदा त्वनुमानमपि तथा तदपि प्रत्यक्षं स्यात् । तथा हि । धूमादि यावच्चक्षुरादिसंयुक्तं धूमादिश्च वह्न्यादिना तदनेन प्रकारेणाऽस्ति कश्चित्कथंचिदिन्द्रियस्य संनिकर्ष इति तदुत्पन्नमनुमानं प्रत्यक्षं प्रसज्येत । न च प्रत्युत्पन्नचक्षुरादिनिरपेक्षमत्र धूमाद्येव कारणमिति युक्तम् । संनिकर्षस्यैव तत्र तत्र क्लृप्तसामर्थ्यस्य सम्भवे लिङ्गादिसामर्थ्यकल्पनाऽनुपपत्तेः । न चैतावता सर्वज्ञता सिध्यतीत्याह—अजाताऽतिवृत्तेषु तस्याप्ययोगात् । अत एव नेन्द्रियाऽर्थयोः सद्भावो ज्ञानजननं प्रति परस्पराऽऽनुकूल्येनाऽवस्थानं संनिकर्षः ।

अत एवेति विभजते—अतीताऽनागतानां तदा विज्ञानसमयेऽसत्त्वाद्व्यवहितार्थोपलब्धिप्रसङ्गात् । अनुमानादिषु च प्रत्यक्षत्वाऽऽपातात् । हेत्वन्तरमाह—संनिकर्षग्रहणाऽऽनर्थक्यप्रसङ्गाच्च । इन्द्रियार्थोत्पन्नमित्येतावतैव तयोः सद्भावसिद्धेः । असत उत्पादकत्वाऽयोगात् ।

चोदयति—नन्वतीताऽनागतानां देशादिविशेषणत्वेन ज्ञानात् । तद्यथा । इयमतीताऽनागतबहुराजा जगतीति तज्ज्ञानस्य विरोधिदेशाद्यालम्बनत्वात्तस्यैवाऽङ्गुल्या निर्देशात् तत्र प्रवृत्तेश्च देशादिभिर्विशेष्यैर्यथायथं चक्षुषो मनसो वाऽवधृतप्रत्यक्षता न हेतुभावस्य, संनिकर्षसम्भवात् । कुतः सम्भव ? इत्यत आह—तेषां च विशेष्याणां देशादीनां च सत्त्वात् संनिधानादव्याहतमनुत्पन्नाऽतिवृत्तज्ञानस्येन्द्रियार्थसंनिकर्षजत्वाऽविशेषेणाऽनवभासोऽपि विशेष्य-

१. दप्याहत । पु० पा० ।

याऽर्थसन्निकर्षजत्वम् । अनुमानादिलक्षणा[1]भावे च इन्द्रियाऽर्थसन्निकर्षोत्पन्नं ज्ञानमिति नाऽनुमानादिषु तत्त्वम् । यदि तावद्यः कश्चिदर्थस्ततः स्मृतौ प्रत्यक्षत्वप्रसङ्गः । अथ प्रमेयो देशादिप्रज्ञानं भवतु प्रत्यक्षं, तन्मात्रसन्निकर्षात् न तु विशेषणज्ञानम् । विशिष्टज्ञानं प्रत्यक्षमिति तदाक्षेपात् विशेषणमपि प्रत्यक्षमिति चेत् । न तस्याऽसन्निकर्षात् । न ह्यसति विशेषणे विशिष्टो वर्तमानोऽपि भवति । सर्वस्य तथात्वप्रसङ्गात् । कथं तर्हि अतिवृत्तायां मातरि देवदत्ता[2]पुत्रो यज्ञदत्त उच्यते । किमत्र ? न स तया तदा विशिष्टतया व्यवहारमनुवर्तेदिति । यदि तर्ह्यवर्त्तमानं न व्यवहाराङ्गं देवदत्ताऽपि

स्यैवार्थत्वादिति भावः । नन्वेवमपि पर्वतादेरिन्द्रियसंनिकृष्टस्याऽनुमानविषयत्वादनुमानस्यापि प्रत्यक्षत्वापात इत्यत आह— पृथगनुमानादिलक्षणप्रणयनसामर्थ्यादनुमानादिलक्षणाभावे इन्द्रियाऽर्थसंनिकर्षोत्पन्नमिति प्रत्यक्षलक्षणमिति नाऽनुमानादिषु तत्त्वं प्रत्यक्षत्वम् । तल्लक्षणविरहात् ।

तदेतद्विकल्पय्य दूषयति—यदि तावद्यः कश्चिदर्थः तेन सहेन्द्रियाऽसंनिकर्षाद्यद्विज्ञानं तत्प्रत्यक्षं, ततः स्मृतौ प्रत्यक्षत्वप्रसङ्गः । सापि खलूद्बुद्धसंस्कारेणाऽऽत्मना सह मनसः संनिकर्षादुपजायते । न चैतस्याः पारमर्षं पृथगस्ति लक्षणम् । अथ प्रमेयः स एव खलु अर्थ्यमानतयाऽर्थो, न चाऽऽत्मा स्मृतावर्थ्यमानः, किं तु पूर्वाऽनुभूतो देशादिरिति दूषयति— देशादिमात्रज्ञानं भवतु प्रत्यक्षं, तन्मात्रसन्निकर्षात्, न तु विशेषणज्ञानम् ।

शङ्कते—विशिष्टज्ञानं प्रत्यक्षमिति तदाक्षेपाद्विशेषणमपि प्रत्यक्षमिति चेत् ? निराकरोति—न । तस्याऽविधेयस्य विशेषणवदसंनिकर्षात् । कस्मात्तर्ह्यसंनिहितविशेषणोऽतीतविशेषणो विशिष्टावर्त्तमानो भवति रूपमात्रस्य वर्त्तमानत्वेऽपि । कुतः ? सर्वस्य तथात्वप्रसङ्गात् । असंनिधानाऽविशेषात् । चोदयति—देशाद्यवर्तमानविशेषणे विशिष्टो वर्त्तमानः, कथं तर्ह्यतिवृत्तायांमातरि देवदत्तापुत्रो यज्ञदत्त इत्युच्यते ? समधातुं निगूढाऽभिसन्धिः पृच्छति किमत्र कथं ? चोदक आह—न स तया तदा विशिष्ट इति न देवदत्तापुत्र इति हि विशिष्टतया व्यवहारमनुवर्तेत । अवर्तमानस्य व्यवहाराऽनङ्गत्वादिति । समाधाताऽऽह—यदि तर्ह्यवर्त्तमानं न व्यवहाराऽङ्गं देवदत्ताऽप्यतीतयो-

१. लक्षणमपि पु० पा० ।

"अत्रटीकां विलोक्य पृथगनुमनादि, इत्यादि पाठः शोधनीयः । इति निवेदनम्मम–कृपाचार्यस्य ।

२. देवदत्तपुत्रो । पु० पा० ।

विशेषणतया न व्यवहाराऽङ्गं स्यात् । अथ भूतपूर्वेण विशेषणेन व्यवहारः, विशिष्टतयाऽपि तादृश्या न दण्डवारितः । न चेदृशं विशेषणमुपलक्षणं तु, रूपतो भिन्नस्याऽसन्निधानात् । सन्निध्यसन्निधिकृत एव चैतयोर्भेदः । तस्मान्नाऽसंनिहितविशेषणो विशिष्टः सन्निहितः । यदि विशेषणं प्रमेयं जाताद्यर्थश्च प्रमेयः । अनर्थसन्निकर्षजमपि प्रत्यक्षं प्राप्तम् । न च तथा । तल्लक्षणविरहादिन्द्रियस्याऽर्थापेक्षत्वात् ।

अथ देशविशेष एव प्रमेयो न तद्विशेषणं तथा । न च तल्लक्षणविरहः । अर्थ्यमानसंनिकर्षात् । न तर्हि देशाद्यालम्बनज्ञानेनाऽनुत्पन्नादिवेदिनो ध्यायिनः । प्रमेयैकदेशसन्निकर्षाच्च प्रत्यक्षज्ञानोदये सर्वः सर्वप्रत्यक्षदर्शी

भयसिद्धा न तद्व्यवहाराङ्गं स्यात् । समाधातैवाऽऽशङ्क्य तुल्यतामापादयति—अथ भूतपूर्वेण विशेषणेन व्यवहारो न विशिष्टतयाऽपि तादृश्या दण्डेन वारितः । अपि चाऽभ्युपेत्य विशेषणत्वमेवंविधस्येदमुदितं, परमार्थतस्तु नेदं विशेषणं देवदत्तादिकं नामेत्यत आह—उपलक्षणं तु, रूपतो भिन्नस्य स्वलक्षणस्याऽऽकारिण इति यावत् । असंनिधानाद्विशेष्यस्याऽभिमतवस्त्वनाकारत्वादिति । अथ मा भूत् संनिधानं, तथापि विशेषणं कस्मान्न भवती ? त्यत आह—संनिध्यसंनिधिकृत एव एतयोर्विशेषणोपलक्षणयोर्यथाक्रमं भेदः । कस्मात् ? नाऽसंनिहितविशेषणो विशष्टः संनिहितः । स्वरूपेण संनिहितोऽपि तदसंनिहितविशेषणस्य वस्तुनः स्वरूपं संनिहितस्य तन्मात्रं प्रत्यक्षं न पुनर्विशिष्टत्वमपीति सिद्धम् ।

यदि च विशिष्टप्रमेयतासिद्ध्यर्थं विशेषणमपि प्रमेयमङ्गीक्रियेत तदन्तरेण विशिष्टप्रमेयताऽनुपपत्तेः । ततो जाताद्यर्थश्च प्रमेय इति अनर्थसंनिकर्षजमपि ज्ञानं प्रत्यक्षं प्राप्तम् । विशेषणस्याऽर्थ्यमानस्य तत्र संनिकर्षाऽभावात् । न च तथा सम्भवति । कुतः ? प्रत्यक्षलक्षणविरहात् । इन्द्रियार्थसंनिकर्षोत्पन्नमिति हि तल्लक्षणम् । अथ मा भूत् लक्षणं विशेष्येन्द्रियसंनिकर्षमात्रात्तज्जनिष्यते, लप्स्यते च प्रत्यक्षं वैशद्यादित्यत आह—इन्द्रियस्याऽर्थाऽपेक्षत्वादिति तत्त्वज्ञानोत्पत्तौ यत्तदवोचाम तत्त्वविज्ञानजननमिन्द्रियाणामर्थसहकारितया नियतमिति ।

तदेतत्समुत्थानं शङ्कते—अथ तेषु देशविशेष एव प्रमेयो न तद्विशेषणम् अतीतादि । तथा च न प्रत्यक्षलक्षणविरहोऽर्थ्यमानेन्द्रियसंनिकर्षात् । उत्तरं—न तर्हि देशाद्यालम्बनेन ज्ञानेनाऽनुत्पन्नादिवेदिनो ध्यायिनः । यदि मन्येत प्रमेयैकदेशसंनिकर्षादेव ध्यायिनो ध्यानसंस्कृतस्वान्तवृत्तयो युञ्जाना विश्वमेव

स्यात् । सर्वस्येन्द्रियसन्निकृष्टं प्रति कथंचिद्विशेषणत्वोपपत्तेः । अनुमानलक्षणाऽभावेऽपि प्रत्यक्षविद्यमानाऽर्थस्मृतौ प्रत्यक्षप्रसङ्गः । संस्कारस्तत्र कारणं नाऽर्थसत्ता । असत्यप्यर्थे भावात् । इतरत्रापि तुल्यम् । योगजधर्म्मस्य हेतुत्वात् । न हि तत्राऽर्थोपयोगे प्रमाणम् । सन्निहितेऽसंनिहिते, व्यवहितेऽव्यवहिते, वर्तमानेऽवर्तमाने च सर्वत्र योगिप्रत्यक्षोत्पादाऽभ्युपगमात् । वर्तमानदेशाद्यालम्बनत्वं लिङ्गाद्यभावे इति वदता संप्लवो निरस्तः स्यात् । उत्सूत्रं च कल्पितमनुमानादिति बाधनासूत्रं कल्पितम् । अनुमानादिबाधना-

वर्त्तमानाऽवर्त्तमानं कथंचिदिन्द्रियसंनिकृष्टं प्रमेयैकदेशविशेषणतया साक्षात्करिष्यन्तीति, तत्राह—प्रमेयैकदेशसंकिर्षात्तु कथंचिद्विशेषणीभू[1]तावर्त्तमानविश्वविषयप्रत्यक्षज्ञानोदये सर्वः सर्वप्रत्यक्षदर्शी स्यात्सर्वस्येन्द्रियसन्निकृष्टमर्थं प्रति कथंचिद्विशेषणत्वोपपत्तेः । उक्तं हि—'नाऽन्यत्र योगः प्रभवती'ति । अनुमानलक्षणाऽभावे च अनुमानलक्षणाऽनवरुद्धे विषये प्रत्यक्षलक्षणे व्यवस्थाप्यमाने प्रत्यक्षे कस्मिंश्चित् सदृशे गवयादौ दृष्टे संस्कारबोधात्सदृशान्तरस्य गवादेरर्थस्य विद्यमानस्य स्मृतौ प्रत्यक्षप्रसङ्गः ।

सम्भवति हि गवादेरपि हि विद्यमानस्य कथंचित् प्रत्यक्ष[2]गवयादिविशेषणत्वमिति शङ्कते—संस्कारस्तत्र स्मृतौ कारणं नाऽर्थसत्ता । कुतः ? असत्यप्यर्थे सति संस्कारे स्मृतेर्भावात् । उत्तरम्—इतरत्रापि तुल्यम् । कुतः ? अर्थसत्तानिरपेक्षस्य योगजधर्मस्य हेतुत्वात् । तद्दर्शयति—न हि तत्र योगिनां सर्वविषयप्रत्यक्षजन्मनि समस्तार्थोपयोगे[3] प्रमाणम् । कस्मात् ? संनिहितेऽसंनिहिते, व्यवहितेऽव्यवहिते, वर्त्तमानेऽवर्त्तमाने च सर्वप्रकारे योगिप्रत्यक्षोत्पादाऽभ्युपगमात् शास्त्रे ।

यद्युच्यते अतीतादिविशिष्टसंनिहितवर्त्तमानदेशाद्यालम्बने तत्राऽतीतादिगोचरमिति, तत्राह—वर्त्तमानदेशाद्यालम्बनत्वं योगिज्ञानस्यातीतादिविशिष्टाऽर्थग्राहिणः प्रत्युक्तमधस्तात् । अपि च प्रमाणत इति सर्ववचनोपसंग्रहार्थं तसिं प्रयुञ्जानेन तदर्थं चोपरिष्टात्तु विशदयता तत्र भवता पक्षिलस्वामिना प्रमाणेन प्रमाणाभ्यां प्रमाणैश्चैकस्यैव प्रमेयस्याऽऽत्मादेः प्रमितिरिति प्रमाणसंप्लवो दर्शितः, तद्व्याकोपश्च प्रसज्येतेत्यत आह—लिङ्गाद्यभावे प्रत्यक्षमिति वदता संप्लवः प्रमाणानां निरस्तः स्यात् । उत्सूत्रं च कल्पितम् । न खलु लिङ्गाद्यभाव इति उद्देशो लक्षणं परीक्षासूत्रं वा समस्ति ।

---

१. भूतवर्त्तमान । पु० पा० । २. गवादि । पु० पा० ।
३. अर्थक्रियायोगे २ पु० पा० ।

न्नोत्सूत्रमिति चेत् । शब्दनिवृत्त्यर्थमव्यपदेश्यपदव्याख्यानमयुक्तम् । षड्विधसन्निकर्षाभ्युपगम इन्द्रियग्रहणं चाऽनुमानादिनिवृत्त्यर्थमित्यादि पराहतं स्यात् । तस्मादक्षलिङ्गादिपरतन्त्रं मनः । सर्वं च परिपूर्णं चेल्लौकिकप्रमाणगोचरो लौकिकप्रमाण[1]व्यवहार्य्यपि परिपूर्णज्ञान इति न लोकोत्तरज्ञानाऽभिमतस्य विशेषः । स्पष्टाऽवभासं ज्ञानं यदि, न तत्र तस्योपयोगः । अथ निश्चयः, स इतरस्यापि प्रमाणतुल्यः । प्रमितेः प्रत्यक्षदर्शिनः सर्वार्थेषु

शङ्कते—अनुमानादिलक्षणप्रणयनबाधनान्नोत्सूत्रमिति चेत् ? सूत्राऽऽहिताऽर्थसामर्थ्यलभ्यमपि तदर्थ एव, तन्मूलत्वादित्यर्थः । निराकरोति—शब्दनिवृत्त्यर्थमव्यपदेश्यपदव्याख्यानमयुक्तम् । भाष्यकारो हि शाब्दज्ञाननिवृत्त्यर्थम् अव्यपदेश्यपदं वर्णयांबभूव । तथा हि । यत्र प्रत्यक्षेण दृश्यमाने केसरादिमति वस्तुनि नागरिकेणाऽऽरण्यकं प्रत्युच्यते तुरङ्गोऽयमिति तत्राऽऽरण्यकस्तस्य वस्तुनस्तुरङ्गमपदवाच्यतामवैति, मानद्वयव्यापारात् । तथा हि । तुरङ्गमपदाऽभिधेय इत्येतावता शब्दः पुरोवर्तिनि च विशेषे तदभिधेयताश्रये इन्द्रियतदुपदेशस्य तत्र शब्दस्य प्रवृत्तेः । तच्चैतदुभयजमपि ज्ञानं शाब्दमेव, शब्दस्य तत्र साधकतमत्वात् । सत्यपीन्द्रियाऽर्थसंनिकर्षे शब्दाऽभावे तदनुपपत्तेः । असति तु तस्मिन्यदा सदेव वस्त्वनुभूतमारण्यकेनाऽनुस्मर्य सङ्केतं प्रतिपद्यते स केसरादिमान् पदार्थस्तुरङ्गम इति तदा वाक्ये सति तदवबोधात् । तस्मादुभयजस्य विज्ञानस्य शब्दस्य निवृत्त्यर्थमव्यपदेश्यपदव्याख्यातमयुक्तं स्यात् । लिङ्गाद्यभावे प्रत्यक्षलक्षणव्यवस्थापनात्, उभयजस्य शाब्दत्वेन प्रत्यक्षत्वप्रसक्त्यभावात् ।

एतदुक्तं भवति । तदेव सूत्राऽभिहितसामर्थ्येन लभ्यते न यत्सूत्राऽवयवमुपहन्ति न तूपघातकमपीति, तथा देशकालविप्रकीर्णमात्रविषयप्रत्यक्षज्ञानाऽभ्युपगमो लिङ्गाद्यभावे प्रत्यक्षलक्षणम्, इन्द्रियग्रहणं चाऽनुमाननिवृत्त्यर्थमित्यादि पराहतं स्यात् । तद्विषयं प्रत्यक्षमित्यादिशब्दसूचितं पराहतं वेदितव्यम् । प्रकृतमुपसंहरति—तस्मादक्षलिङ्गादिपरतन्त्रं बहिर्मनः । अपि च सर्वं परिपूर्णं लौकिकं प्रमाणगोचरो न्यूनं वा ? तत्र सर्वं च परिपूर्णं चेल्लौकिकप्रमाणव्यवहार्येऽपि परिपूर्णज्ञान एवेति न ततो लोकोत्तरज्ञानाऽभिमतस्य विशेषः ।

शङ्कते—स्पष्टाऽवभासं ज्ञानं यदि विशेषः । एतदुक्तं भवति । पूर्णविषयमपि लौकिकमविशदाभमलौकिकं तु भावनाऽऽधेयविशदाभमित्यस्यास्ततो विशेष इति । निराकरोति—न । तत्र सर्वस्मिन् सम्पूर्णगृहीते न

१. प्रमाणाऽव्यवहार्य्येपि । पु० पा० ।

नैराकाङ्क्ष्यं नेतरस्य । अप्रत्यक्षमपि यदि परिपूर्णं मानान्तरेण मितं किमन्यदाकाङ्क्षेदिति । न हि प्रमाणान्तराऽऽकाङ्क्षा, प्रमेयसिद्ध्यर्थत्वात्तदाकाङ्क्षायाः । पुनः प्रमेयसिद्ध्यर्थं प्रमाणान्तराकाङ्क्षा । न । पूर्वस्मादप्यसकृत्तत्सिद्धेः । सिद्धस्य पुनः सिद्ध्यपेक्षाहेत्वभावाच्च । उपायान्तरसद्भावश्चोपायान्तराकाङ्क्षैव स्यात् । प्रीति[1] विशेषश्चेत्पूर्वप्रमाणजाद्दर्शनात्सिद्ध्यतीति

स्पष्टाऽवभासस्योपयोगः । लौकिकप्रमाणाऽन्वितमर्थमवगमयता विस्पष्टं तेन पिष्टं पिष्टं स्यात् ।

शङ्कते—अथ निश्चयः ? निराकरोति—स इतरस्यापि लौकिकस्य प्रमाणत्वेन तुल्यः । शङ्कते—प्रमितेः सर्वस्या एव प्रत्यक्षपरत्वात् सर्वार्थेषु नैराकाङ्क्ष्यं नेतरस्य प्रमाणान्तरेण समस्तवस्तुदर्शिनो लौकिकस्याऽप्रत्यक्षे सर्वस्मिन्नैराकाङ्क्ष्यम् । तथा हि प्रमाता आगमादर्थमवगम्य अनुमानात् बुभुत्सते अनुमाय च तं प्रत्यक्षेण दिदृक्षते । अथ साक्षात्कृत्य निराकाङ्क्षतामापद्यते । सेयं सर्वैव प्रत्यक्षप्रमितिः प्रमातॄणाम् । निराकरोति—अप्रत्यक्षमपि यदि मानान्तरेण परिपूर्णमितं किमन्यदाकाङ्क्षेदिति । यत्र खल्वनुमायाऽपि प्रत्यक्षेण दिदृक्षते न नूनं तत्राऽनुमानेन सम्पूर्णप्रमेयाऽधिगतिरभूत् तद्भावे दिदृक्षाऽनुपपत्तेः । यथाहुरत्रभवन्तो वार्त्तिककारमिश्राः ।

यावदज्ञातसन्दिग्धं मेयं तावत्प्रमित्स्यते ।
प्रमिते तु प्रमातॄणां प्रमोत्सुक्यं विहन्यते ।। इति ।

अथ मानान्तरमाकाङ्क्षति तत्राह—न हि प्रमाणान्तराऽऽकाङ्क्षा । कुतः ? प्रमेयसिद्ध्यर्थत्वात्तदाकाङ्क्षायाः । हिताऽहितप्राप्तिपरिहारार्थिनो हि तदुपायमर्थयन्ते, स च प्रमाणाऽधीननिरूपण इति प्रमाणमनुसरन्ति, स चेत् कुतश्चित्प्रमाणात्सिद्धः कृतं तर्हि प्रमाणान्तरानुसरणेन तेषाम् । तथापि चेदनुसरन्ति नूनं प्रमेयान्तरमप्यमी बुभुत्सन्ते इत्यर्थः । अथ ततः प्रमेयसिद्धावपि तस्याऽऽशुतरविनाशित्वेन[2] पुनस्तत्प्रमेयसिद्ध्यर्थं प्रमाणान्तराकाङ्क्षां निराकरोति—न । पूर्वस्मादप्यसकृत्तत्सिद्धेरनेकजन्मपरम्पराऽऽयाससाध्ययोगजविज्ञानगोचरप्रयत्नाऽनुपपत्तेः । कुतश्चित्सिद्धस्य पुनः प्रमाणान्तरात्सिद्ध्यपेक्षाहेत्वभावाच्च । तदनुभवभावितभावनोद्बोधवशादेतद्विषयस्मृतिसन्तानसम्भवात् ।

शङ्कते—विचित्राऽभिसन्धित्वात् प्रमातॄणामुपायान्तरसद्भावस्तस्मिन्प्रमेये विशेषणतया बुभुत्सिते चेत् । निराकरोति—तर्हि प्राप्ताऽप्राप्तविवेकेन उपायान्तराऽऽकाङ्क्षैव स्यात् न प्रमेयान्तराऽऽकाङ्क्षा । शङ्कते—

१. प्रतीति. मू० पा० । २. आशुतरस्याशुतरविनाशित्वेन २ पु० पा० ।

व्यर्थं प्रमाणान्तरम्। उपायान्तरसद्भावाच्च पुनर्जिज्ञासमानं दृष्टमपीतरै- र्जिज्ञासेत, विशेषनिश्चयात्मकं प्रत्यक्षमनिश्चयात्मकमनुमानादिति व्यभि- चारात्। अप्रमितत्वादेव तर्ह्याकाङ्क्षा। व्यभिचारिणोऽनिश्चयात्मकस्याऽ- प्रमाणत्वात्। भानादियोग्यं प्रत्यक्षं सन्निकर्षान्नाऽनुमानादि। सन्निकर्षसाधनं तर्हि गमनाद्यपेक्षतां न तु प्रमासाधनं, सिद्धत्वात्प्रमायाः प्रमिते च सन्निकर्षस्य भानादिहेतुत्वात्। प्रकृतं च प्रत्यक्षमसन्निकृष्टगोचरमिति न नैराकाङ्क्ष्या- याऽलमित्यविशेष एव लौकिकलोकोत्तरयोः प्रमात्रोः। अनुमानादेः सामान्य- विषयत्वात्प्रत्यर्थनियतात्मविशेषाऽनवधारणात् साकाङ्क्षत्वं लौकिकस्य

प्रीतिविशेषश्चेत्। यथा हि श्वश्रूरेकेन गवाक्षेण वीक्ष्य जामातरमपरेण वीक्षते प्रीतिविशेषात् तथेदमपीत्यर्थः। निराकरोति—सुकरे पूर्वप्रमाण- जादपि पुनर्दर्शनात्सिध्यतीति व्यर्थं प्रमाणान्तरम्। अत्यन्तदुष्करमपि चोपायान्तरसद्भावाच्च पुनर्जिज्ञासमानं प्रत्यक्षदृष्टमपीतरैरनुमानादिभिरयं विचित्राऽभिसन्धिः प्रतिपत्ता जिज्ञासेतेति न प्रत्यक्षपरा सर्वप्रमितिः। प्रत्यक्षपरत्वमिच्छता वाच्यो विशेषः प्रत्यक्षस्य मानान्तरेभ्यः। अथाऽय- मुच्यते निश्चयात्मकं प्रत्यक्षं विशदत्वादनिश्चयात्मकमनुमानादि व्यभिचार- दर्शनात्। तदिदमनुपपन्नम्। अनुमानादेरपि यथोक्तलक्षणोपपन्नस्य व्यभि- चाराऽभावात्। आभासव्यभिचार[1]स्तु प्रत्यक्षेऽपि तुल्य इत्यनभिधाय स्थूलनिराकराणान्तरमाह[2]—अप्रमितत्वादेव तर्ह्याकाङ्क्षा। कुतः? व्यभि- चारिणोऽत एवाऽनिश्चयात्मकस्याऽप्रमाणत्वात्। शङ्कते—भानादियोग्यं प्रत्यक्षम्। कुतः? सन्निकर्षाद्विषयस्य सन्निहितत्वात् असन्निधाने तदनु- पपत्तेः। न पुनरेवमनुमानादि। तस्य देशकालविप्रकीर्णवस्तुगोचरत्वात्। निराकरोति—सन्निकर्षसाधनं तर्हि गमनाद्यपेक्षतां न तु प्रमासाधनम् प्रमाणम्। कुतः? अनुमानादेरेव सिद्धत्वात्प्रमायाः। न च प्रमैव भानादिहेतुरित्याह—सन्निकर्षस्य प्रमाण[3]मात्रसहायस्य भानादिहेतुत्वात्। अपि च प्रकृतं प्रत्यक्षं देशकालविप्रकीर्णवस्तुमात्रविषयमसन्निकृष्टवस्तुगोचर- मिति न नैराकाङ्क्ष्यायाऽलमिति। तस्मादविशेषो लौकिकलोकोत्तरयोः प्रमात्रोः सर्वप्रमायाम्।

पुनः शङ्कते—गृहीतसम्बन्धलिङ्गादिप्रभवतया[4] विशेषे च सम्बन्ध- संवेदनाऽनुपपत्तेः अनुमानादेः सामान्यविषयत्वात्प्रत्यर्थनियताऽनन्तविशेषाऽ-

१ अथ व्यभिचारः २ पु० पा०।

२ इति स्थूलतयाऽनभिधाय दूषणान्तरमाह २ पु० पा०।

३ संनिकर्षप्रमाण २ प० पा०। ४ लिङ्गादितरथा २ पु० पा०।

प्रमातुः। लौकिकोत्तरस्याऽपि कालरूपाऽवधारणान्नैराकाङ्क्ष्यमिति नाऽविशेषः। यदि तर्हि लौकिकं प्रमाणं विकलवस्तुविषयः लोकोत्तरमपि भावनामयं तत्परतन्त्रं न तद्गोचरयितुमर्हति। स्वातन्त्र्यं तु बहिर्मनसो नेत्यावेदितमेव। तस्मात्सर्वं मनसो विषया इति प्रलापः। अपि च—

मिथ्यैव वर्तमानाभं न तु प्रत्यक्षमन्यथा।
क्रमाऽक्रमौ न कल्पेते न प्रमेयं निरूप्यते॥

कालत्रयपरिवृत्त्यर्थगोचराणि मानान्तराणि वर्तमानविषयं प्रत्यक्षं तत्र वर्तमानात्मना पश्यतो मिथ्याज्ञानं, सर्वस्याऽतथाभावात्। यथार्थं तु पश्यतो न प्रत्यक्षम्। अतीताऽनागतविषयत्वाऽभावात् तस्य। अथ वाऽवश्यमनेन बहुविधस्य प्रत्यक्षस्यैकं लक्षणं वाच्यम्। अन्यथा प्रमाणान्तरत्वाऽभिधानम-

नवधारणात् साकाङ्क्षत्वं लौकिकस्य प्रमातुः। लोकोत्तरस्य त्वविकलरूपसर्वाऽवधारणादप्रमितस्य वस्तुनो ऽभावान्नैराकाङ्क्ष्यमिति नाऽविशेषः। दूषयति—यदि तर्हि लौकिकं प्रमाणं नाऽविकलवस्तुविषयं, लोकोत्तरमपि भावनामयं भवानया कृतं तत्परतन्त्रम्, भावना च विकलविषयलौकिकप्रमाणपरतन्त्रेति न तदविकलं गोचरयितुमर्हति। न च भावनाऽऽहितसंस्कारं मनो वहिः स्वतन्त्रं प्रवर्तत इत्याह—स्वातन्त्र्यं तु बहिर्मनसो नेत्यावेदितमेव। एतच्च बौद्धसर्वज्ञपरीक्षायां निपुणतरमुपपादितम्। प्रकृतमुपसंहरति—तस्मात्सर्वं मनसो विषय इति प्रलापः। अपि च।

मिथ्यैव वर्तमानाभं न तु प्रत्यक्षमन्यथा।
क्रमाऽक्रमौ न कल्पेते न प्रमेयं निरूप्यते॥

यथा लोकप्रतीतिकालत्रयपरिवृत्त्यर्थविषयाणि मानान्तराण्यनुमानादीनि वर्तमानविषयं प्रत्यक्षं तत्र सर्वज्ञस्य प्रत्यक्षेण सर्वं वर्तमानात्मना पश्यतो मिथ्याज्ञानम्। कुतः? सर्वस्याऽतीताऽनागतवर्त्तमानस्याऽतथाभावात् वर्तमानत्वाऽभावात्। यथार्थं तु पश्यतोऽतीतादित्वेन पश्यतो न तद्विषयं ज्ञानं प्रत्यक्षं स्यात्। अतीताऽनागतविषयत्वाऽभावात् तस्य प्रत्यक्षस्य। प्रत्यक्षता हि वर्तमानविषयतया व्याप्ता। वर्तमानविषयता चातीताऽनागतविषयाद्विज्ञानान्निवर्तमाना प्रत्यक्षत्वमपि निवर्तयतीत्यर्थः।

न तु प्रत्यक्षमन्यथेत्यस्याऽन्या व्याख्या। अथ वा अवश्यमनेन वहुविधस्य प्रत्यक्षस्यैकं लक्षणं वक्तव्यम् अन्यथा यद्येकं लक्षणं नोच्येत तस्य प्रत्यक्षस्याऽपरिगृहीतस्यैकस्याऽनुमानादिभ्यः प्रमाणान्तरत्वाऽभिधानमप्रत्ययकारणकं स्यात्। यदि पुनरसालक्षण्येऽपि प्रत्यक्षमेकं प्रमाणमभ्युपेयेत ततः

प्रत्ययं प्रमाणान्तराऽभ्युपगमो वा परिभाषाप्रयोजनाऽभावात्। भिन्नलक्षणेष्वपि केषुचिल्लौकिकाः प्रत्यक्षशब्दं प्रयुञ्जते इति मिथ्यालोकोत्तरे तदयोगात्। तत्र नाऽक्षजत्वं लक्षणं मनसोऽतिव्याप्तेः। तस्मादिन्द्रियार्थसन्निकृष्टाऽर्थजत्वं तल्लक्षणम्। यथोक्तम्। 'अर्थसामर्थ्येन समुद्भवादिन्द्रियाऽर्थसन्निकर्षोत्पन्नं सत्संप्रयोग इति'। मनसोऽक्षत्वे सुखादिज्ञानव्याप्तेः अर्थसामर्थ्यजत्वेन अनुमानादिव्यवच्छेदात्। न च सूक्ष्मविप्रकृष्टव्यवहितानां ज्ञानोत्पत्तौ सामर्थ्यमिति न सर्वविषयप्रत्यक्षस्योपपत्तिः। कल्पनाऽपोढत्वं

प्रमाणान्तराऽभ्युपगमो वा प्रत्ययः स्यात्। भिन्नलक्षणानामपि प्रत्यक्षत्वेऽनुमानादीनामपि प्रत्यक्षत्वप्रसङ्गात् न मानान्तराणि तान्यभ्युपेयेरन्नित्यर्थः। यदुच्येत भिन्नत्वाऽविशेषेऽपि द्रव्यगुणकर्म्मणामेवाऽर्थशब्दाऽभिधेयता परिभाषिता न सामान्यविशेषसमवायानाम्। एवं कासुचिदेव ज्ञानव्यक्तिषु प्रत्यक्षशब्दः परिभाषितो नाऽनुमानादिव्यक्तिष्वित्यत आह—परिभाषाप्रयोजनाऽभावात्। अप्रयोजनस्य परिभाषणेऽतिप्रसङ्गादित्यर्थः। भिन्नलक्षणेष्वपि केषुचिल्लौकिका वाचकमेव प्रत्यक्षशब्दं प्रयुज्जते। न खल्वेते पर्यनुयोज्याः। यथा जातित्रये अक्षशब्दमेकमित्यपि मिथ्या। कुतः ? लोकोत्तरे भवदभिमते लोकोत्तरत्वादेव तस्य लौकिकप्रयोगस्याऽयोगात्। तदवस्थितं प्रत्यक्षलक्षणमेकं वक्तव्यमिति।

ननूच्यते अक्षजत्वं नाम प्रत्यक्षाणामेकं लक्षणं, तथा च सर्वज्ञज्ञानं मनोऽभिधानाऽक्षप्रभवमिति नाऽतिवर्तते प्रत्यक्षतामित्यत आह—तत्र नाऽक्षजत्वं लक्षणम्। कुतः ? तथा हि—मनोनामाऽक्षं न वा। तत्र मनसोऽक्षत्वेऽनुमानाद्यपि मनोजन्मैवेति तस्यापि प्रत्यक्षत्वं प्रसक्तमित्यतिव्याप्तेर्न लक्षणम्। अनक्षत्वे वा सुखादिज्ञानस्य बाह्येन्द्रियाऽजनितस्याऽप्रत्यक्षत्वप्रसक्तेरव्याप्तेः। तस्मादिन्द्रियाऽर्थसामर्थ्यजत्वमेव तत्प्रत्यक्षलक्षणमास्थेयं सर्वैरेव वादिभिः॥

अत्रैव सर्वेषामनुमतिं दर्शयति—यथोक्तमर्थस्य सामर्थ्येन समुद्भवात्। अन्धादीनामनुपपत्तेरिन्द्रियस्येत्यपि शेषः। तथेन्द्रियार्थसन्निकर्षोत्पन्नं तथा सत्सम्प्रयोग इति। एवं च सति नाऽव्याप्तिः। मनसोऽक्षत्वे सति सुखादिज्ञानव्याप्तेर्नाऽतिव्याप्तिः। अर्थसामर्थ्यजत्वेनाऽनुमानादिव्यवच्छेदात्। नन्वेवमपि सर्वविषयं विज्ञानं कस्मान्न प्रत्यक्षम् ? इत्यत आह—न च सूक्ष्मविप्रकृष्टव्यवहितानामर्थानां विज्ञानोत्पत्तौ सामर्थ्यमिति न सर्वविषयप्रत्यक्षतोपपत्तिः।

प्रत्यक्षलक्षणमिति चेत्। केयं कल्पना ? यदि शब्दाभासा प्रतीतिः, श्रौत्रं ज्ञानमप्रत्यक्षम् अथाऽभिलापसंसर्गयोग्यप्रतिभासा।

शङ्कते—कल्पनापोढत्वं प्रत्यक्षलक्षणमिति चेत्। इदं खल्वनुमानादिभ्यो विकल्परूपेभ्यः प्रत्यक्षतां निवर्त्तयति व्यवस्थापयति च सुखादिषु ज्ञानरूपतया स्वसंवेदनसिद्धेष्वपोढेषु कल्पनायाः प्रत्यक्षत्वं, सङ्गृह्णाति च सर्वज्ञविज्ञानमखिलं कल्पनानिर्मुक्तमित्यर्थः।

तदेतद्यथासम्भवं विकल्प्य दूषयति—केयं कल्पना यस्या अपोढत्वमुच्यते प्रत्यक्षत्वं ? यदि शब्दाऽऽभासा शब्दाऽऽकारप्रतीतिः श्रौत्रं ज्ञानं शब्दविषयं विशदाभमप्रत्यक्षं प्रसज्येत। अथाऽभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना।

अयमर्थः। अभिलापसंसर्गयोग्यः प्रतिभास आकारो यस्याः प्रतीतेः सा कल्पना। एतदुक्तं भवति। स एवाऽभिलापसंसृष्टो[1] भवति यत्राऽयमभिलापः कृतसङ्केतः। स एव च तथा यो देशकालाऽवस्थाऽनुगतः प्रतिभासते। न च वस्तुसतः स्वलक्षणस्याऽनुगतिः सम्भाविनी। न च जात्यादयो वस्तुसन्तः सम्भवन्ति। विचाराऽसहत्वात्। अत एव तद्वन्तोपि भेदा न तात्त्विकाः। तदभावे तद्वत्ताऽनुपपत्तेः। तस्मात् स्वाऽऽभासं वा अलीकं वा वाह्यं पश्यन्ति यादृशम् एको गोविकल्पः तादृशमेव गोविकल्पान्तरमपि। न च स्व[2]विषयविकल्पान्तरविषयाद्भेदस्तेनैव गृह्यते नापि विकल्पान्तरेणेति भेदाऽग्रहादेको विकल्पविषयः। तदेकत्वाद्विकल्पानामप्येकत्वम्। तदेकविकल्पनिर्माणसामर्थ्याच्चाऽनुभवानामप्येकत्वम्। तदेकत्राऽतद्धेतूनां व्यक्तीनाप्येकता यथाऽऽह—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
एकधीहेतुभादेन व्यक्तीनाप्यभिन्नता ॥ इति।

तच्चा[3]ऽऽरोप्यमाणं रूपमन्यव्यावृत्तिस्वभावं भावाऽभावसाधारणत्वाच्चाऽत्यन्तविसदृशानां सादृश्याऽऽपादाकत्वाच्चाऽबाह्यसादृश्याच्च। तथा हि। यद्भावाऽभावसाधारणं रूपं तदन्यव्यावृत्तिनिष्ठमेव यथा मूर्त्तत्वादि। तथा च गवादि विकल्पविषय इति स्वभावहेतुः। साधारणं खल्वेतद्गोत्वादि भावाऽभावयोः, अस्ति गौर्नास्ति गौरिति विकल्पास्पदत्वात्। असाधारण्ये तदनुपपत्तेः विरोधपौनरुक्त्याभ्याम्। तथा यदत्यन्तविसदृशानां सादृश्य-

---

१. संस्पृष्ट इति २ पु० पा०।
२. अपि स्वस्य स्वस्येति २ पु० पा०। ३. तत्रेति २ पु० पा०।

सामान्याकारस्वसंवेदनेप्यप्रत्यक्षत्वम् । अथ वस्तुनि वस्त्वन्तरयोजना, सामान्याऽऽकारप्रतीतेः प्रत्यक्षत्वम् । सामान्यस्य वस्त्वन्तरस्याऽनभ्युपगमात् ।

मापादयति तदन्यव्यावृत्तिनिष्ठमेव, यथा वराहमहिषमातङ्गादीनामत्यन्तविसदृशानामक्रमेलकत्वम्[1] । तथा च अत्यन्तविसदृशानां शाबलेयादिस्वस्वलक्षणानां गोत्वमिति स्वभावो हेतुः । तथा ज्ञानप्रतिभासस्य वा अलोकस्य वा बाह्येन वा परमार्थतो वाऽत्यन्ताऽसद्रूपेण सादृश्यमन्यव्यावृत्तिकृतमेव कल्पते नाऽन्यथा । अत एव ज्ञानाऽऽभासो वाऽलीकं वा गोत्वं प्रति विकल्पं विद्यमानं[2] सदृशतयाऽनाकलितभेदमप्यश्वादि विकल्पविषयव्यावृत्तमेव बाह्यतयाऽऽरोप्यत इति नाऽन्यव्यावृत्तिरूपताऽस्य न प्रथते । न चाऽनिरूपितेनाऽगवा तद्व्यावृत्तिरूपगोनिरूपणाद् गोनिरूपणाऽधीनत्वाच्चाऽगोनिरूपणस्याऽन्योन्याश्रयमिति साम्प्रतम् । अन्यतरस्याऽन्यतः प्रसिद्धेः । गोरूपस्य विज्ञानाऽऽकारस्य वा अलीकस्य वाऽन्यतो व्यावृत्तिर्न पुनरस्य तदधीनं निरूपणम् । अन्यथा सामान्येऽपि पारमार्थिके दोषस्य साम्यात् । तस्मात् ज्ञानाकारो वा अलीकं वा बाह्यत्वेनाऽवसितं संकेतसम्भवाद्भवति शब्दसंसर्गयोग्यं तद्विषया व्युत्पन्नानां च प्रतीतिः कल्पनेति । तज्ज्ञानाकारवादिनां कल्पनां दूषयति—सामान्याकारस्वयंवेदनेऽप्यप्रत्यक्षम् ।

इदमभिसंहितम् । ज्ञानाऽतिरिक्तस्य वेदनाऽनुपपत्तेरन्यव्यावृत्तिरूपं सामान्यं ज्ञानाकार इति निरूपितं साऽऽकारवादिभिः । न च तद्बाह्यत्वं विकल्पस्य ग्राह्यमध्यवसेयं वा सम्भवतीति निवेदयिष्यते 'न निरालम्बनं ज्ञान'मित्यत्रान्तरे । तत्पारिशेष्यात् ज्ञानाऽऽकारसामान्यस्य स्वसंवेदनेऽपि विकल्पनीयतया स्यादप्रत्यक्षता प्रागेव ताद्बाह्यतायास्तस्या अग्राह्याया अनध्यवसेयाश्च सर्वथा विकल्पगोचरत्वादिति ।

सम्प्रति निराकारज्ञानवादिनां[3] मतकाशङ्कते—अथ वस्त्वन्तरस्य रजतादेः पुरोवर्तिनि शुक्तिकादौ यो जनो रजतमिदमिति विज्ञानकल्पनां निराकरोति सा सामान्याऽऽकारा प्रतीतिः सामान्यमाक्रियते व्यज्यते यया प्रतिपत्त्या सा प्रत्यक्षं स्यात् कुतः ? सामान्यरूपस्य वस्त्वन्तरस्याऽनभ्युपगमात् । यथाह—

> तस्यां यद्रूपमाभाति बाह्यमेकमिवाऽन्यतः ।
> व्यावृत्तमिव निस्तत्त्वं परीक्षाभङ्गभावतः ।। इति ।

---

१. **विसदृशानां पशुत्वम् । २ पु० पा० ।**

२. **भिद्यमानम् २ पु० पा० ।** ३. **विज्ञाकारज्ञानवादिनाम् २ पु० पा० ।**

अथाऽभिधानयोजना, अव्युत्पन्नाऽभिधानस्य तथा स्यात् ।

अथाऽरूपस्याऽऽरोपः कल्पनापोढं रूपमात्रवेदनं प्रत्यक्षम् । न तर्ह्यजाताऽतिवृत्तेषु योगिनोऽन्यस्य वा ज्ञानं प्रत्यक्षम् । ज्ञानप्रतिभासिनो रूपस्य तेष्वभावात् । भावे वा प्रत्युत्पन्नत्वाऽऽपातात् ।

शङ्कते—अथाऽभिधानयोजना । अभिधेये कल्पनां निराकरोति—अव्युत्पन्नाऽभिधानस्य पुंसो याऽभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः शब्दयोजनारहिता सा तथा प्रत्यक्षं स्यात् । न चेष्यते । शङ्कते—अथाऽरूपस्याऽलीकस्याऽऽरोपो बाह्यत्वेन कल्पना । यथोक्तं भदन्तेन 'बुद्ध्या कल्पितया विविक्तमपरैर्यद्रूपमुल्लिख्यते तद्बुद्धिर्न बहि'रिति । इयं च कल्पना व्युत्पन्नानामव्युत्पन्नानां च साधारणी । तेन तदपोढं रूपमात्रवेदनं प्रत्यक्षम् । तथा च नोक्तदोषप्रसङ्ग इति । निराकरोति—न तर्ह्यजाताऽतिवृत्तेषु योगिनोऽन्यस्य वा ज्ञानं प्रत्यक्षम् । कुतः ? ज्ञाने प्रतिभासिनो रूपस्य तेष्वजाताऽतिवृत्तेष्वभावात् । कस्मादभाव? इत्यत आह—भावे वा प्रत्युत्पन्नत्वाऽऽपातात् ।

अयमभिसन्धिः । न खलु विकल्पानामलीकप्रकाशनेऽपि समानविषयत्वसम्भवः । प्रतिविकल्पमलीकस्याऽभेदात् । ननूक्तं भेदेऽप्यलीकानां यादृशमेको गोविकल्पः कल्पयत्यलीकं तादृशमेवाऽपर इति भेदाऽग्रहादलीकानां भेदाऽवसाय[1] इति । सत्यमुक्तमिदं त्वालोचनीयम् । किमलीकात्मनामस्ति तत्तिरोहितं स्वरूपं यदेषु प्रथमानेष्वपि न प्रथते, नास्ति वा ? न तावदवस्तुसतां कल्पनामात्राऽधीनमूर्तीनां कल्पनाऽनुपदर्शितरूपसम्भवः । तस्याऽकल्पितत्वेन वस्तुसतोऽलीकरूपत्वाऽनुपपत्तेः । तस्मादप्रथमानं नास्तीति वेदितव्यम् । यथा च नास्तितैव पारमार्थिको तेषाम् । अस्तितता पुनः कल्पनामात्रमापतेत् । ननु भेदाऽग्रहादभेदाऽध्यवसायो विकल्पविषयाणामित्यन्य एवैषां विषय आश्रयणीयः । यः शब्दः संसर्गयोग्यः स्यात् प्रतिविकल्पं त्वलीकानां भेदात्स्वलक्षणवदशक्यसमयतया अभिलापसंसर्गयोग्यत्वाऽभावेन विकल्पगोचरत्वाऽनुपपत्तेः । न चाऽभेदस्यापि सम्भवः । न खलु कल्पनामात्राऽधीनसत्त्वस्य तद्भेदात् एकत्वमुपपद्यते । तद्धि तस्यां तदिव तज्जन्मनि जातमिव तद्विनाशे विनाशि चेति कथं तद्भेदो न भिद्येत । भेदश्चेदशक्यसमयतयाऽभिलापसंसर्गयोग्यत्वाऽभावेनाऽलीकं तद्बाह्यभावात् स्वलक्षणवन्न विकल्पगोचर इति नाऽऽत्माकारो नाऽलीकं न तद्बाह्यता न स्वलक्षणं बुद्धे-

---

१. अलीकान्यतमभेदेति २ पु० पा० ।

र्विषयः। सर्वेषामशक्यसमयतयाऽभिलापसंसर्गाऽनर्हत्वात्। न चाऽगोव्यावृत्तिरूपतयाऽलीकानामभेदः केषांचिदिति साम्प्रतम्। तत्स्वभावत्वे तेषामन्योन्याश्रयदोषेण ग्रहणाऽभावप्रसङ्गात्। यथाहाऽत्रभवान्वार्त्तिककारः।

सिद्धश्च गौरपोह्येत गोनिवृत्त्यात्मकश्च सः।
तत्र गौरेव वक्तव्योऽन्यतायाः प्रतिषिध्यते।
गव्यसिद्धे त्वगौर्नास्ति तदभावे न गौः कुतः॥ इति।

न चेयमन्यव्यावृत्तिरपि कल्पनानिर्मिता तद्भेदे भेदवती साधारणी भवितुमर्हति। अतएव च विधिरूपमपि विकल्पते गोत्वम्। यत्किल विजातीयमात्रव्यावृत्तं परमार्थसतः सजातीयाऽसजाती[1]यव्यावृत्तात्स्वलक्षणात् भिन्नमप्यभेदेनाऽवसितम्। यथोक्तं 'यथाऽभिनिवेशाऽऽयत्तत्वात् यथातत्त्वं च समीहितत्वा'दिति। तदपि न विकल्पास्पदम्। अस्यापि ज्ञानाऽऽकारस्याऽलीकस्य वा प्रतिविकल्पं भेदेन विकल्पनीयताऽनुपपत्तेः।

यदि मन्येत यथैवासद् रूपं सदात्मना प्रथते तथैकत्वरहितमप्येकत्वेन प्रकाशते। न चैतावताऽस्य भेदः। तस्यापि वस्त्वधिष्ठानतया कल्पितेऽनुपपत्तेः। तस्मादेतद्गोत्वादि न भिन्नं नाप्यभिन्नम्, संभिन्नं तु वाह्यतया प्रकाशते। तथा च सिद्धाऽभिलापसंसर्गयोग्यताऽस्येति। तत्किं य एवैकस्य विकल्पस्य विषयः स एव विकल्पान्तरस्यापि? ओमिति चेत्। तस्यापि विकल्पनाऽधीनदेहत्वात्। इदमेव हि कल्पितस्य कल्पनाऽधीनत्वं यत्कल्पनाभेदाऽभेदाद्यनुविधानं नाम। तदनधीनत्वे तु कल्पितत्वाऽनुपपत्तेरनलीकत्वप्रसङ्ग इत्युक्तम्। यच्चाऽलीकस्य न भाविके नाऽनलीकत्वे इति। तत्र सर्वप्रतीयमानाऽवस्थायां त्वापादयामः, न भिन्नकल्पनाऽनुशयि शक्यमेकत्वेन प्रतिपत्तुम्। तदनुपातित्वाऽनुपपत्तेः। कल्पनायां प्रथनान्तरेण तस्य तत्त्वाऽसम्भवात्।

स्यादेतत्। कल्पनैव स्वहेतोस्तथाभूतोपजाता यया स्वविषयः केषुचिदेक इति केभ्यश्चिद्व्यावर्तत इव प्रदृश्यते। नन्वेवंविधोऽपि किं विकल्पान्तरविषयो न? न चेत् नाऽभिलापसंसर्गयोग्यः। तस्याऽदृष्टपूर्वस्याऽशक्य-[2]समयत्वात् विकल्पान्तरविषयत्वे वा तदधीनत्वाऽनुपपत्तिरित्युक्तम्। अपि चाऽत्यन्ताऽसतो गोत्वादेः स्वभावभेदभाजो न प्रकाशसम्भवः। गगननलिननरविषाणादीनामपि नात्यन्ताऽसत्ता। संसर्गभेदमात्रस्याऽसत्त्वात्। संसर्गिणां तु गगनादीनां नलिनादीनां च तत्र तत्र सद्भावात्। संसर्गमात्रस्य च क्वचित्सद्भावात् तत्रापि च कथंचिदुपपत्तेः। अत्यन्ताऽसतां

१. विजातीय २ पु० पा०। २. तस्याशक्य० मु० पा०।

आरोपितरूपाऽनुकारित्वात्तत्र कल्पनात्वप्राप्तेः। न ह्यविद्यमानरूपानुकारादन्यो ज्ञानस्याऽध्यारोपः। ननु निरधिष्ठान आरोपोऽतो वस्तुनोऽन्यरूपप्रतीतिः कल्पना। निरधिष्ठानं तर्हि तैमिरकस्य केशादिज्ञानं

संसर्गभेदानां सद्रूपसंसर्गिभेदाऽधीननिरूपणतया परस्परव्यावृत्तरूपाऽवभाससम्भवात्। इह तु स्वलक्षणज्ञानाऽधीननिरूपणानां गोत्वादीनां स्वलक्षणं, तद्विज्ञानव्यक्तीनामत्यन्तव्यावृत्तेः। भेदे सत्यभिन्नत्वाऽनवभासनात् अर्थक्रियायाश्चैकत्वाऽनुपपत्तेः। अतद्व्यावृत्तेश्च परस्तादाश्रयप्रसङ्गेनाऽनवकल्पनात्। न च कल्पितस्य गोत्वस्य विधिरूपस्याऽन्यव्यावृत्तिरूपस्य वा ऽभिलापसंसर्गयोग्यता। ननु परमार्थसत्सामान्याऽभिधानेऽपि भावाऽभावसाधारण्यं न कल्पते। तदाश्रयाणां व्यक्तीनां तल्लक्षितानां देशकालविप्रकीर्णतया शब्दार्थस्य भावाऽभावसाधारण्यसंम्भवात्। न चाऽत्यन्तवैधर्म्यं व्यक्तीनां, येनाऽन्यव्यावृत्तिरेव साधर्म्यममूषामाश्रीयेत। सामान्यस्यैव वस्तुसत आश्रयभूताऽवसितस्य समानस्य धर्मस्योपपत्तेः। तद्बाधानिरासश्च निवेदयिष्यते संसर्गपरीक्षायाम्। तत्सिद्धमेतन्नाऽभिलापसंसर्गयोग्यता ज्ञानाऽऽकाराऽलीकबाह्यत्वयोरभिलापेनाऽशक्यसमयत्वात्। यदभिलापेनाऽशक्यसमयं न तत्तत्संसर्गयोग्यं, यथा सुखादीनामात्मेति। यथोक्तम्—

अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक्।
तेषामतः स्वसंवित्तिर्नाऽभिजल्पाऽनुषङ्गिणी॥ इति।

शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता। अन्यथाऽतिप्रसङ्गात्। सा ज्ञानाऽऽकाराऽलीकबाह्यताभ्यां निवर्तमानाऽभिलापसंसर्गयोग्यतामपि निवर्त्तयतीति प्रतिबन्धसिद्धिः। तदिदं प्रसिद्धतरतया दूषणमनुद्भाव्य प्रकृतस्यापि सिद्धिरुद्भाविताऽऽचार्येण दूषणतयेति।

नन्वारोपितरूपाऽनुकारिणी कल्पना। न चाऽतीताऽनागतेषु विज्ञानं योगिनस्तथेति न तत्कल्पनेत्यत आह—आरोपितरूपाऽनुकारित्वात् तत्राऽजाताऽतिवृत्तज्ञाने कल्पनात्वप्राप्तेः। नन्वारोपितरूपाऽनुकारित्वमेवाऽस्याऽसिद्धमित्यत आह—न ह्यविद्यमानरूपाऽनुकारादन्यो ज्ञानस्याऽध्यारोपः। न चेदं विद्यमानम्। उक्तं हि भावे वा प्रत्युत्पन्नत्वाऽऽपातादिति।

चोदयति—ननु निरधिष्ठान आरोपः। यथोक्तम् 'आरोपविषयारोपे वा ज्ञानं रजतभ्रम'मिति। ततः किम्? इत्यत आह। अतो वस्तुनः स्वलक्षणस्य परमार्थसतोऽन्यरूपेण सामान्यरूपेण प्रतीतिः कल्पना। तथा च नाऽजाताऽतिवृत्तः साक्षात्कारो योगिनः कल्पना। न हि तत्राऽजाताऽतिवृत्ते सामान्यरूपतया चकास्त इति। अत्रैकदेशी परिहरति—निरधिष्ठानं तर्हि तैमिरि-

प्रत्यक्षम् । अथ तत्र किंचिदधिष्ठानमुच्यते । खपुष्पमिति तु ज्ञानमकल्पना प्रत्यक्षं स्यात् । सामन्ये च सामान्याऽऽकारा प्रतीतिः स्वसंवित्ताविव तत्राऽनारोपरूपत्वात् । अथ रूपमात्रकल्पना, अतीताऽजातादिषु ज्ञानं न कल्पनापोढम् । अथ सामान्याकारप्रतीतिर्वस्तुनि कल्पना तत्प्रत्यक्षं सामान्ये तु भ्रान्तत्वात् ।

कस्य केशादिज्ञानं प्रत्यक्षं प्रसज्येत । चोदकमुत्थाप्य दूषयति—अथ तत्र किञ्चिदालोकांशाद्यधिष्ठानमुच्यते । परमार्थदूषणमाह—खपुष्पमिति तु ज्ञानमविकल्पना यतः प्रत्यक्षं स्यात् । न हि तत्र किंचिदधिष्ठानं सम्भवति । न खलु बौद्धानां मूर्ताऽभावादन्यदस्ति गगनं नाम । अभावश्च सर्वोपाख्याविरहलक्षणो नाऽधिष्ठानं कस्यचिदिति । अपि च सामान्ये सामान्याऽऽकारा प्रतीतिः प्रत्यक्षं स्यात् । नन्वियं ज्ञानाऽऽकारमलीकं वा बाह्य[1]मध्यवस्यन्ती समानाऽऽरोप एवेति कथं न कल्पने ? त्यत आह—स्वसंवित्ताविव तत्र सामान्ये अनारोपरूपत्वात् । यथा हि विकल्पविज्ञानं विकल्पनीयप्रवणमपि स्वसंवित्तावकल्पना एवं सामान्यमलीकं वा ज्ञानाऽऽकारं बाह्यमध्यवस्यदेव कल्पना । न तद्रूपमात्रे नाऽऽरोपमपहाय तत्सामान्यरूपमात्राऽऽवेदनं कदाचिदपीति चेत् । अथ विकल्पनीयमपहाय संविद्रूपताऽवेदनमपि किं कदाचिद्विकल्पनीयं, समानसमयतया तु तद्वेदनं बाह्यसमारोपसमयसामान्यवेदनेऽपि समानं तत् । तस्मात् स्वसंवित्ताविव सामान्यरूपमात्र[2]विकल्पतया प्रत्यक्षं प्रसज्येतेत्यर्थः ।

शङ्कते—अथाऽविद्यमानस्वरूपसामान्यादेः रूपमात्रकल्पनापि भवति कल्पना । न चैवं सति स्वसंवित्तौ कल्पनात्वप्रसङ्गः । विकल्पविज्ञानस्वरूपस्य विद्यमानत्वादिति भावः । निराकरोति—अतीताऽजातादिविज्ञानं कल्पनापोढं तत्प्रतिभासिनो रूपस्य जात्यादेरिवाऽविद्यमानत्वात् ।

शङ्कते—अथ सामान्याऽऽकारा प्रतीतिर्वस्तुनि कल्पना समाऽऽरोपरूपत्वात् न प्रत्यक्षम् । अथ मा भूद्वस्तुनि, सामान्ये तु स्यादित्युक्तं, तत्राह—सामान्ये तु भ्रान्तत्वात् । असत्खल्वेतत्सामान्यं विचाराऽसहत्वात्[3] । तत्तद्विषया प्रतीतिरसदर्थतया विभ्रमः । न खलु 'प्रत्यक्षं कल्पनापोढमन्यनिर्दिष्टलक्षण'मिति प्रणयतो दिङ्नागस्यैव कल्पनापोढमात्रं प्रत्यक्षलक्षणमपि तु तदेवाऽभ्रान्तत्वसहितं प्रत्यक्षलक्षणमिति मन्यते स्म कीर्त्तिः[4] । यथाह—'प्रत्यक्षं

---

१. ज्ञानाकारं बाह्यम्. २ पु० पा० । २. सामान्यमात्रके. २ पु० पा० ।
३. विचारासपादत्वात् २ पु० पा० । ४. अकीर्तिः २ पु० पा० ।

का पुनिरयं भ्रान्तता? यद्यसदर्थता तुल्येयं सर्वज्ञ[1]वेदने अथाऽत्यन्ताऽसदर्थता, तैमिरिकस्वप्नादिज्ञानं प्रत्यक्षम्। अथार्थक्रियासंवादित्वमभ्रान्तत्वं, यद्यर्थनिबन्धनौ सुखदुःखप्राप्तिपरिहारौ उपादानपरित्यागाऽयोग्यवेदनस्य

कल्पनापोढमभ्रान्त'मिति। एतेनाभ्रान्तविशेषणोपादानेन निरधिष्ठाने केशादिज्ञाने भ्रान्तत्व[2]मप्रत्यक्षतया व्याख्यातम्। तदेतद्विकल्प्य दूषयति—का पुनरियं भ्रान्तता? यद्यसदर्थता तुल्येयं सर्वज्ञ[3]वेदने। अजाताऽतिवृत्तयोरसत्त्वात्। अथाऽत्यन्ताऽसदर्थता तैमिरिकस्वप्नादिज्ञानं प्रत्यक्षं प्रसज्येत। तस्याऽर्थस्याऽत्यन्तासत्त्वाऽभावात्। अथाऽर्थक्रियासंवादित्वमभ्रान्तत्वम्। यथाह—'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिरविसंवादन'मिति, तद्विकल्प्य दूषयति—यद्यर्थनिबन्धनौ ज्ञानविषयनिबन्धनौ यथाक्रमं सुखदुःखप्राप्तिपरिहारौ अर्थक्रियासंवादित्वमिष्यते तत उपादानपरित्यागाऽयोग्यविषयं यद्वेदनं तस्य चन्द्रतारकारादिविषयस्य विज्ञानस्य भ्रान्तत्वप्रसङ्गः। अथोत्तरोत्तरज्ञाननिर्वृत्तिरेकस्मिन्नर्थे संवादः, स चास्ति चन्द्रतारकादिविषयस्यापि विज्ञानस्येति तदप्यभ्रान्तं प्रत्यक्षं चेति न व्यभिचारः। दूषयति—क्षणिकविषयस्य विज्ञानस्य भवतामस्माकमाशुतरविनाशिविद्युदादिविषयस्य विज्ञानस्य तथात्वं भ्रान्तत्वं प्रसज्येत। न हि तत्रैकस्मिन् विषये उत्तरोत्तरज्ञानोत्पत्तिसम्भवः।

यदि मन्येत उपदर्शिताऽर्थप्रापणसामर्थ्यमेव प्रापकत्वमविसंवादकत्वं, प्रवर्तकत्वमेव च प्रापणसामर्थ्यमुपदर्शकत्वमेव प्रवर्तकत्वम्। न हि अर्थक्रियासमर्थवस्तूपदर्शनादन्यद् विज्ञानस्य प्रवर्त्तकत्वं प्रापकत्वं वा सम्भवति। न च देशकालाऽऽकारनियतं चन्द्रतारकाऽन्यसामर्थ्यमर्थक्रियासु स्वोचितासु च न तादृशमुपदर्शितं विज्ञानेन। न च न तादृशं प्राप्येत यदि न देशतो विप्रकृष्येत विद्युदादि वा न कालत इति। तदयुक्तम्। विकल्पाऽसहत्वात्। किमर्थमात्रप्राप्तिः संवाद आहो यथोपदर्शिताऽर्थप्राप्तिः? न तावत्पूर्वः कल्पः। विज्ञानमात्रादर्थमात्रप्राप्तेरविसंवादसम्भवेन तन्मात्रस्याऽभ्रान्तत्वप्रसक्तेः। नाप्युत्तरः। साऽऽकारनिराकारविज्ञानयोर्विच्छिन्नस्थूलाऽवभासस्य प्रत्यक्षतया नियतस्याऽभ्रान्तत्वेन तत्त्वाऽनवक्लृप्तेः। न खलु स्थौल्यं नाम परमार्थसद्विज्ञाने वा बाह्ये वा सम्भवति। अनेकविधविरुद्धधर्मसंसर्गाप्ततयोभयत्राप्यपास्तत्वात्। यथाह—

तस्मान्नाऽर्थे न विज्ञाने स्थूलाऽऽभासस्तदात्मनः।
एकत्र प्रतिषिद्धत्वाद् बहुष्वपि न सम्भवः॥ इति।

१. ज्ञानं ध्वान्तम् पु० पा०। २. सर्ववेदने पु० पा०। ३. सर्ववेदने पु० पा०।

भ्रान्तत्वप्रसङ्गः । अथोत्तरोत्तरज्ञाननिवृत्तिः, क्षणिकविज्ञानस्य तथात्वम् । तस्मादतदात्मनि तादात्म्यप्रतीतिर्भ्रान्तिः । तथा च सर्वज्ञज्ञानं न कल्पनापोढमभ्रान्तमिति न प्रत्यक्षलक्षणमन्वेति । अथाऽनुभवाऽऽकारप्रवृत्तं ज्ञानमतोऽन्वेत्येव । यथोक्तं 'मानसमप्यनुभवाकारप्रवृत्तं प्रत्यक्ष'मिति । अथ केयमनुभवाकारता ? यदि बोधात्मकता, सर्वं तथा ज्ञानम् । अथ व्यक्त्यन्तराऽवभासता, प्रथमोपनिपात्यपि दूरत्वादिनाऽव्यक्तपीतादिपरिच्छेदं न प्रत्यक्षं स्यात् । अथाऽदूरान्तराऽतिरोहितवेदना, सामान्यवेदनस्य प्रत्यक्षत्वप्रसङ्गः ।

न च निराकारविज्ञाननये बहवो रूपपरमाणवो निरन्तरोत्पादवन्तः समर्था एकविज्ञानोपारोहिणः स्थूलाऽऽभासभाजः । यथाह—'अप्रतिभासधर्मोऽस्ति स्थौल्य'मिति । प्रतिभासनकालधर्म्मः प्रतिभासधर्म्म इति । न च न ते रूपपरमाणवः, न च न निरन्तरमुत्पन्नाः, न च नैकविज्ञानोपारोहिणः, न च न तादृशस्थूलव्यपदेशभ्राज इति कस्मात् भ्रान्ततेति साम्प्रतम् ? नैरन्तर्याऽनुपपत्तेः । तद्ग्रहस्य भ्रान्तत्वापातादन्तरालाऽग्रहे नितान्तविच्छिन्नेषु तरुष्वेकघनवनप्रत्ययवत् । न हि न ते तरवः । न च नैकस्मिन्विज्ञाने भासन्ते । निरन्तराऽनुत्पादश्च तुल्यः । न खलु तरव इव रूपपरमाणवो निरन्तरमुत्पन्नाः, विजातीयैर्गन्धरसस्पर्शपरमाणुभिरन्तरितत्वात् तादृशस्यापि चाऽभ्रान्तत्वे द्विचन्द्राऽलातचक्रचलद्वृक्षादिदर्शनानामप्यभ्रान्तत्वप्रसङ्गः । तदियमभ्रान्तता भवत्स्वेव प्रहरतीत्युपेक्षिता आचार्येण ।

उपसंहरति—तस्मात्परिशेष्यादतदात्मनि तादात्म्यप्रतीतिर्भ्रान्तिः । भवत्वेतद् भ्रान्तिलक्षणं, तथापि का नः पीडे ? त्यत आह—तथा च भ्रान्तिकल्पनयोः समारोपरूपेणैक्ये सति सर्वज्ञज्ञानं न कल्पनापोढम् । अविद्यमानरूपयोरतीताऽनागतयोः रूपवत्वेनाऽऽरोपात् । तदवेदने प्रत्यक्षत्वाऽनुपपत्तेरसाक्षात्कारत्वप्रसङ्गात् । नाप्यभ्रान्तमरूपाऽऽरोपादेवेति न प्रत्यक्षलक्षमन्वेति ।

लक्षणान्तरं प्रत्यक्षस्य शङ्कते—अथाऽनुभवाऽऽकारप्रवृत्तं प्रत्यक्षम्, अतोऽन्वेत्येवाऽतीताऽनागतविषयं सर्वज्ञज्ञानम् । यथोक्तं 'मानसमप्यनुभवाऽऽकारप्रवृत्त'मिति । तद्विकल्प्य दूषयति—केयमनुभवाकारता ? यदि बोधात्मकता ततः सर्वं तथाबोधात्मकं ज्ञानमिति सर्वमेव प्रत्यक्षं प्रसक्तम् । अथ व्यक्तचन्तराऽवभासता प्रथमोपनिपात्यपि निर्विकल्पकं दूरत्वादिना दोषेणाऽव्यक्तपीतादिपरिच्छेदं न प्रत्यक्षं स्यात् । अथाऽदूरान्तरस्याऽतिरोहितस्य च वेदनाऽनुभवाऽऽकारप्रवृत्तिरस्ति चाऽव्यक्तपरिच्छेदस्याप्यदूरान्तराऽतिरो-

यदि मन्येत सन्निहितवर्त्तमानाऽवभासाऽनुभवाऽऽकारप्रवृत्तिः, तथाभूतं च सर्वार्थेषु योगिनां तथागतानां च दर्शनमिति । तदसत् । पूर्वदोषाऽनतिवृत्तेः । अपि च तथाभूतेऽतथादर्शनाद् वर्तमानं मिथ्याज्ञानमेव, तैमिरिकदर्शनवत् । न तु प्रत्यक्षमन्यथा भवति, तदिन्द्रियार्थसामर्थ्य[1]जन्यलक्षणमितरथा तिमिराद्युपप्लवजकेशादिदर्शनं कस्य हेतोरवाकीर्य्येत ? सर्वमेव प्रत्यक्षमसंनिहिताऽवभासम् । अर्थज्ञानयोः कार्य्यकारणभावेन कालभेदात् । किं तर्हीदं

हितगोचरत्वं दूरान्तरत्वेऽतिरोहितत्वे च[2] तद्गोचरस्याऽवेदनाप्रसङ्गादिति दूषयति च । तद्गोसामान्यस्याऽवस्तुसतो न दूरान्तरत्वं नापि तिरोहितत्वम् । उभयोर्वस्तुधर्म्मत्वात् । ततस्तद्वेदनं प्रत्यक्षं स्यात् ।

यदि मन्येत संनिहितवर्तमानाऽवभासा खल्वनुभवाकारप्रवृत्तिः । न च सामान्यमलीकं संनिहितं च वर्त्तमानं च । तथाभूतं च सर्वार्थेषु योगिनां कतिपयभूमिसमारूढानां तथागतानां च दशभूमिगतानां च[3] दर्शनमिति । दूषयति—तदसत् । कुतः ? पूर्वदोषाऽनतिवृत्तेः । यद्यपि सामान्यमपरमार्थकतयाऽसंनिहितमवर्त्तमानं च तथापि तथाऽवभासत इत्यनुभवाऽऽकारप्रवृत्त्या तत्प्रतिपत्तिः प्रत्यक्षं प्रसज्येतेति पूर्वदोषाऽऽपत्तिरित्यर्थः । अत्रैव कारिकायाः पूर्वार्द्धेन दूषणान्तरमाह—अपि च तथाभूते वर्तमानेऽतीतेऽनागते च तथाभूतदर्शनात् । तथाभूतत्वमाह—वर्तमानं मिथ्याज्ञानमेव, तैमिरिकदर्शनवत् । कस्मात्पुनर्न प्रत्यक्षम् ? इत्यत आह—न तु प्रत्यक्षमन्यथा भवति । कुतः ? तदिन्द्रियार्थसामर्थ्यजन्यलक्षणं प्रत्यक्षं यत्खलु तत्राऽर्थ्यमानं तस्य चेन्द्रियस्य च सामर्थ्याज्जायमानं प्रत्यक्षं विज्ञानमिति तस्य लक्षणं, न पुनरनुभवाऽऽकारप्रवृत्तिस्त्वदभिमता लक्षणमित्यर्थः । कस्मात्पुनरिदं न लक्षणम् ? इत्यत आह—अन्यथा हि तिमिराद्युपप्लवजकेशादिदर्शनं कस्य हेतोः प्रत्यक्षताया अवाऽकीर्यत ? न हि भवतामनुभवाऽऽकारप्रवृत्तित्वं प्रत्यक्षलक्षणमिच्छतां तैमिरिकज्ञानस्य प्रत्यक्षत्वमभिमतमित्यर्थः ।

सम्प्रति साऽऽकारज्ञानवादी प्रत्यवतिष्ठते—सर्वमेव प्रत्यक्षमसंनिहिताऽवभासं तत्सर्वत एव मा निर्वर्तिष्ट प्रत्यक्षतेति नाऽयमन्यथाग्रहोऽप्रत्यक्षतामावहतीत्यर्थः । कस्मादसंनिहिताऽवभासं सर्वज्ञानम् ? इत्यत आह—अर्थज्ञानयोः कार्यकारणभावेन कालभेदात् । यथासङ्ख्यमत्र नेष्यते । दूषणवादी तु गूढाऽभिसन्धि पृच्छति—किं तर्हीदं नीलादि[4]संनिहितदेशकालं

१. र्थ्याऽजन्य पु० पा० । २. दूरान्तरस्याऽतिरोहितत्वे च २ पु० पा० ।
३. अतीताऽनागतां च २ पु० पा० । ४. नीलादिसन्निहितदेशकालं पु० पा० ।

प्रकाशते ? ज्ञानाऽऽकारम् । न ह्रीदानीं सर्वैकदेशस्यापि प्रत्यक्षदर्शी । ज्ञानाकारेऽर्थे वेदनाऽध्यवसायेनैव व्यवहारदर्शनान्नाऽर्थदर्शनहानिः । कथमन्यवेदनेऽन्याऽध्यवसायः ? निरूढत्वादनादेरर्थग्रहाऽभिनिवेशाऽपस्मारलक्षणाया अविद्यायाः । स्वस्ति तर्हि सर्वज्ञत्वाय भूयिष्ठाऽविद्याऽपस्माराय, वरं कनीयोऽविद्यमेकदेशदर्शित्वमेव । अपि च परिभाषयापि तावदेकदेश एव प्रत्यक्षं स्यात् । ग्राह्यत्वं हेतुत्वमेव ज्ञानाकाराऽर्पणक्षममिति न पुनः सर्वः । तस्याऽहेतुत्वाद्देशतः कालतो वाऽसंनिधानात् । अन्यथा सर्वस्य सर्वदर्शित्व-

प्रकाशते ? चोदक आह—ज्ञानाकारम् । प्रष्टा सोपहासं स्वाऽभिप्रायमाविष्करोति—न ह्रीदानीं सर्वैकदेशस्याप्यर्थरूपस्य प्रत्यक्षदर्शी विद्यत इति । साधु समर्थितः सर्वार्थप्रत्यक्षदर्शी चोदयति—ज्ञानाकारेऽर्थवेदनाऽध्यवसायेनैव व्यवहारान्नाऽर्थदर्शनहानिः । द्विविधो हि विषयः प्रमाणानां ग्राह्यश्चाऽध्यवसेयश्च । तत्र स्वाऽऽकारो ग्राह्यः । तस्य तु बाह्यत्वमध्यवसेयम् । यथाह—'स्वप्रतिभासे[1]ऽनर्थेऽर्थाध्यवसायेन प्रवृत्ति'रिति । न ह्यस्मिन्दर्शने प्रकारान्तरेण ग्रहणमुपपद्यते । तेन ज्ञानाऽऽकारस्य बाह्यत्वेनाऽध्यवसाय एव सर्ववेदनम् । न चैतावता भ्रान्तः । न खलु चित्तेन ग्रहणव्यापारेण गृह्णन् भ्रान्तो भवति कदाचिदन्यथा गृह्णन् कदाचिदुचितादुपायात् उपायान्तरेणाऽऽभिमुख्येन प्रवृत्तो भ्रान्तः । न त्वेतदुभयमपि सर्वविदि समस्तीति कथं भ्रान्तः ? दूषयति—कथमन्यवेदने स्वाऽऽकारवेदने अन्यवेदनस्य बाह्यवेदनस्याऽध्यवसायः ? चोदक आह—निरूढत्वादनादेरर्थग्रहाऽभिनिवेशाऽपस्मारलक्षणाया अविद्यायाः । सोपहासं दूषयति—स्वस्ति तर्हि सर्वज्ञत्वाय भूयिष्ठाऽविद्याऽपस्माराय, वरं कनीयोऽविद्यमेकदेशदर्शित्वमेव । न हि स्वाऽऽकारमनर्थमप्यध्यवस्यन्ननन्योपायतयाऽपि भवत्यभ्रान्तः । न च भ्रान्तत्वं न्यायसिद्धं समस्तप्रत्यक्षभ्रान्तत्वप्रसङ्गभिया शक्यमपह्नोतुं, प्रमाणसिद्धस्य प्रयोजननिरोधेनाऽशक्यनिह्नवत्वादिति भावः । अध्यवसायकत्वनिराकरणं च दर्शयिष्यते 'न निरालम्बनं ज्ञान'मित्यत्र । अपि च परिभाषयाऽपि तावदेकदेश एव प्रत्यक्षं स्यात् । परिभाषामाह—ग्राह्यत्वं हेतुत्वमेव ज्ञानाऽऽकारार्पणक्षममिति । यथाह सौत्रान्तिकनये ।

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव तद् युक्तं ज्ञानाऽऽकारार्पणक्षणम् ।। इति ।

तच्चेतद्ग्राह्यत्वमलौकिकतया पारिभाषिकम् । तेन चैकदेश एव प्रत्यक्षो न पुनः सर्वः । कुतः ? तस्य सर्वस्याऽहेतुत्वात् । तदेव कुतः ?

१. भासेऽर्थे पु० पा० ।

प्रसङ्गात्। अथवा प्रत्युत्पन्नाकारमेव ज्ञानमतीताऽनागताऽऽकारमपि वा। पूर्वत्र सर्वस्याऽतथाभावान्मिथ्या। उत्तरत्राऽतीतादिरूपकल्पनाप्रवृत्तत्वान्न प्रत्यक्षम्। सर्वं वा ज्ञानकाले प्रत्युत्पन्नात्मना ज्ञायेत, तथावस्थं वा। पूर्वस्मिन्मिथ्यात्वम्। उत्तरत्र न सर्वं प्रत्यक्षमवस्थान्तराऽप्रत्यक्षीकरणात्। अपि च सर्वं न क्रमेण शक्याऽवगममानन्त्यात्। न हि पूर्वाऽपरकोटिविर-

देशतः कालतो वा तस्याऽसन्निधानात्। अतो हि ते भावने ये देशतः कालतो वा विप्रकृष्येते न तु तथा सर्वमित्यर्थः। अथाऽसन्निहितः कस्मान्न हेतुः? इत्यत आह—अन्यथा संनिधिविरहिणोऽपि हेतुत्वे सर्वस्याऽस्मदादेरपि सर्वदर्शित्वप्रसङ्गः। योगस्य च सामर्थ्यमत्र निरस्तमेव यथा पूर्वार्द्धे।

अस्याऽन्या व्याख्या। अथ वा प्रत्युत्पन्नाऽऽकारं वर्तमानाऽऽकारमेव वा सर्वस्मिस्त्रैकाल्यभाजि वस्तुविस्तारे विज्ञानमतीताऽनागताकारमपि वा। तत्र पूर्वस्मिन् कल्पे सर्वस्याऽतथाभावान्मिथ्या सर्वज्ञविज्ञानं स्यात्। उत्तरत्र त्वतीताऽनागतादिरूपकल्पनाप्रतीतत्वा[1]न्न प्रत्यक्षम्। कल्पनारहितस्य तत्त्वात्। न तावदतीताऽनागते रूपमात्रेण प्रमेये निर्विकल्पकप्रमेयस्य रूपमात्रस्य तयोर्वर्त्तमानादविशेषात्। न हि वर्तमानमपि वर्तमानताविशिष्टं निर्विकल्पके प्रथते, अपि तु रूपमात्रेण। तस्मादतीतत्वादिना विशिष्टत्वमनयोर्ज्ञातव्यम्। तथा च कल्पनात्वं विशेषणविशेष्यभावेन ग्रहणमेव हि तत्त्वं कल्पनानाम्। तथैवाऽभिलापसंसर्गाऽर्हत्वात्। न तु शब्दाऽर्थयोरेकविज्ञानोपारोहे, निर्विकल्पकेऽपि तथा संभवात्। तस्मादतीतादिविशिष्टालम्बनस्य ज्ञानस्य कल्पनात्वादप्रत्यक्षतेत्युपपन्नम्।

यस्तु मन्यते अस्तु वर्त्तमानविषयमेव प्रत्यक्षं, तथापि सर्वविषयमतीताऽनागतयोरप्यतीताऽनागतत्वाभ्यां वर्तमानत्वादिति तन्निरासायाऽस्यैव व्याख्यान्तरमाह—सर्वं वा ज्ञानकाले प्रत्युपन्नात्मना ज्ञायेत तथाऽवस्थं वा। यो यदवस्थः स तथेत्यर्थः। तत्र पूर्वस्मिन्मिथ्यात्वम्, अन्यावस्थस्याऽन्यथाग्रहणात्। उत्तरत्र न सर्वं प्रत्यक्षम्। कुतः? अवस्थान्तराऽप्रत्यक्षीकरणात्। एतदुक्तं भवति। यस्तु[2]ज्ञानकालेऽतीतः प्रत्युत्पन्नोऽनागतो वा स तथैव प्रत्यक्षीकर्त्तव्यः। स च स्वज्ञानकालेऽतीत आसीदनागतो वर्तमानश्च तथा स्वज्ञानकाले वर्त्तमानोऽभूदनागतः भविता चाऽतीतः। एवं स्वहीनकालेऽनागतस्य भवितारौ वर्त्तमानत्वाऽतीतत्वे इति स्वज्ञानसमयवर्त्यवस्थाभेदवद्वस्तुग्रहणेऽवस्थान्तरमस्यामगृहीतमिति न सर्वज्ञः स्यात्।

---

१. प्रवृत्तत्वात् १ पु० पा०। २. यस्त्वज्ञा पु० पा०।

हिणो ज्ञेयस्योत्पादवतः परिनिष्ठाऽस्ति । न यौगपद्येन, आनन्त्यादेव । इयत्ताऽनवधारणे सर्वैकदेशप्रतिपत्त्योरविशेषात् । नन्वनवधारयन्नपीयत्तां रूपतो यौगपद्येन सर्वमवैति । नैतत्सारम् । न ह्ययत्ताऽनवधारणे सर्वमवधारितं भवत्येकदेशो वा । अन्यतराऽव्यवच्छेदात् । बहुद्रव्यसमवाये इयत्तावधारणादेव सर्वप्रतिपत्तिः, सा च परिमिते सम्भवति नाऽपरिमिते । ज्ञानाऽऽकाराऽधीनश्च ज्ञेयाऽधिगमः । न चैकविज्ञानवर्त्तिनामाकाराणां युगपद्भुवामा-

पश्चार्द्धं विवृणोति—अपि च । सर्वं न तावत्क्रमेण शक्याऽवगमम् । कस्मात् ? आनन्त्यात् । तदेव दर्शयति—न हि पूर्वाऽपरकोटिविरहिणो ज्ञेयस्योत्पादवतः परिनिष्ठाऽस्ति । नित्यस्यापि तावत्परमाण्वादेर्व्यवस्थितरूपस्यापि नेयत्ता किमङ्ग पुनरव्यवस्थितरूपस्योत्पादवत इत्यर्थः । न यौगपद्येन । कुतः ? पूर्वोक्तादानन्त्यादेव इयत्ताऽनवधारणात् । साकल्यवचनो ह्यं सर्वशब्दः, साकल्यं चेयत्तानिःशेषतायामापतेत्, सा चेन्नाऽवधारिता नाऽवधारितं सर्वमित्यर्थः । अथेयत्ताऽवधारणाऽधीनं सर्वाऽवधारणमित्येतदेव कुत ? इत्यत आह--तदियत्ताऽनवधारणे सर्वैकदेशप्रतिपत्त्योरविशेषात् । एतदुक्तं भवति । बहूनामेकदेशप्रत्तिपत्तौ हि न सर्वप्रतिपत्तिरिति लोकप्रसिद्धं ब्रवन्ति वक्तारः, एकदेशमेषां जानीमो न सर्वमिति । यदि रूपमात्रमेव सर्वं भवेत् ततस्तस्योभयत्राऽविशेषात् सर्वैकदेशप्रतिपत्त्योरभेदप्रसङ्ग इति ।

चोदयति—नन्वनवधारयन्नपीयत्तां रूपतो यौगपद्येन सर्वमवैति । अनियतमेव च सर्वमिति कथं तदपरिमाणरूपाऽवधारणे सम्भवतीयत्ता प्रमेयस्याऽपराध्यते । यदनियतं न पुनस्तद्विषयं विज्ञानं तस्य यथाप्रमेयमवस्थानात्, अनवस्थाने वा प्रामाण्याऽनुपपत्तेरित्यर्थः । निराकरोति—नैतत्सारम् । न हीयत्ताऽनवधारणे सर्वमवधारितमेकदेशो वा । कस्मात् ? अन्यतरस्यैकदेशस्य परिमितरूपमात्राऽग्रहणे अव्यवच्छेदात् । अन्यतराऽव्यवच्छेदेन चाऽन्यतरप्रतिपत्तेः । व्यतिरेकं दर्शयित्वाऽन्वयमाह—बहुद्रव्यसमवाये इयत्ताऽवधारणादेव सर्वप्रतिपत्तिः नैकस्मिन्नसंबद्धेषु वा परस्परं बहुष्वपि सर्वत्वमेकदेशत्वं वा सम्भवतीति बहुद्रव्यसमवाय इयुक्तम् । सा चेयत्तानिःशेषता परिमिते सम्भवति नाऽपरिमिते, तत्सिद्धमानन्त्यादनिःशेषता । तथा च न सर्वाऽवभासकृत् । सर्वग्रहणमेव यौगपद्यग्रहणमिति तस्याप्यभाव इति । इतश्च नाऽनन्तस्य सर्वस्य युगपद्ग्रहो यत्सौत्रान्तिकनये ज्ञानाकाराऽधीनश्च ज्ञेयाऽधिगमः । न चैकविज्ञानवर्त्तिनामाकारणां युगपद्भुवामानन्त्यं समस्ति । कुतः सर्वेषां प्रत्युपन्नत्वात् ।

नन्त्यं समस्ति । सर्वेषां प्रत्युत्पन्नत्वात् । अव्यवच्छिन्नदेशकाला ह्यजाताऽतिवृत्तप्रत्युत्पन्ना अनन्ताः सहाऽपेक्षमाणा अतीताश्च, पूर्वकालकोटेः अनवच्छेदात्, अवच्छेदेऽपि पुरस्तात् । प्रत्युत्पन्नास्तूभयकोटिव्यवच्छिन्ना यावन्त उत्पन्नास्तावन्त एवेति कथमानन्त्यम् ? अतो नाऽनन्ताऽऽकारमेकं ज्ञानमनन्तानि वा युगपद् ज्ञानानि । किं चेदं सर्वं यद्विद्वान् सर्ववित्? न तावत्प्रत्येकमर्थाः, नाप्यन्यसहिताः केनचित्सामान्येन वशीकृताः कियन्तोऽपि । न चेत्थंभावोऽनन्तेषु सम्भवति । मुख्यमनन्तमेव सर्वमिति चेत् । न । अन्यतर-

अथ प्रत्युत्पन्नानामपि कस्मान्नानन्त्यम् ? इत्यत आह—अव्यवच्छिन्नदेशकाला ह्यजाताऽतिवृत्तप्रत्युत्पन्ना अनन्ताः । ननु प्रत्येकं भावानां नात्मावच्छिन्नदेशकालत्वमपीत्यत आह—सहाऽपेक्षमाणाः समुच्चीयमानाः न केवलं त्रयः, किं तु अतीताश्चाऽनन्ताः । नन्वेकयैव कालकलया तस्याः पुरस्तात्तनाः सर्वे एवाऽतीताऽवच्छिन्ना इति कथमतीता अनन्ता ? इत्यत आह—पूर्वकालकोटेरनवच्छेदात् अवच्छेदेऽपि पुरस्तात् । न चेयं विधा एकाऽनेकविज्ञानोपारोहिणामाकाराणामस्ति, येनाऽऽनन्त्यमेव तेषां भवेदित्याह—प्रत्युत्पन्नास्तूभयकोटिव्यवच्छिन्ना यावन्त उत्पन्नास्तावन्त एवेति कथमानन्त्यम् ? उपसंहरति—अतो नाऽनन्ताकारमेकं ज्ञानमनन्तानि वा युगपत् ज्ञानानि, उभयत्राप्युभयकोटिव्यवच्छेदात् ।

न प्रमेयं निरूप्यते इति कारिकार्द्धार्थं विवृणोति—किं चेदं सर्वं यद्विद्वान् सर्ववित् ? न तावत्प्रत्येकमर्थाः प्रत्येकमन्यनिरपेक्षेषु सर्वशब्दाऽप्रयोगात् । नाप्यसम्बद्धाऽन्यसहिताः । मा भूदेकस्मिन्नपि देवदत्तपुत्रे यं कं चिदन्यमपेक्ष्य सर्वशब्दप्रयोगः, अपि तु केनचित्सामान्येन वशीकृताः कियन्तोऽपि । यथा सर्वे ब्राह्मणाः सर्वे गाव इति । भवत्वेवं को दोषः ? अत आह—न चेत्थंभावोऽनन्तेषु सम्भवति ।

शङ्कते—मुख्यमनन्तमेव सर्वमिति चेत् । तथा हि । प्रकरणादावसति नियामके अयं कथमसंकुचितवृत्तिः सर्वशब्दोऽनन्तेषु वर्तत इत्यनन्त एवास्य मुख्योऽर्थ इत्यर्थः । निराकरोति—नाऽन्यतरकालकोटिभाजामतीतानामनागतानां वाऽऽनन्त्येऽप्यतीतया तावत्यैवैकयाऽप्युपहितानामसर्वत्वात् । पूर्वाऽपराऽव्यवच्छिन्नानां च प्रत्युत्पन्नानां प्रत्युत्पन्नतोपहितानां सर्वत्वात् । अपि चाऽऽनन्त्यमेव सर्वत्वे तदवधारणं न सम्भवति । तथा हि । सर्वा व्यक्तयोऽवधारिता न वा ? अवधृताश्चेत् तावत्य एव नाऽनन्ताः । अनवधारणे ह्यनन्तता तासाम् । तथा चाऽनवधारणेत्याह—अनवधारणं चाऽनन्तमिति कथम् ? तस्य सर्वस्याऽवधारणात् । न चाऽनवधार्यमाणं प्रमेयमिति भावः ।

कालकोटिभाजामानन्त्येऽप्यसर्वत्वात् पूर्वाऽपराऽव्यवच्छिन्नानां च सर्वत्वात् । अपि चानन्त्यमेव सर्वत्वे तदवधारणं न सम्भवति । तथा हि । सर्वा व्यक्तयोऽवधारिताश्चेत्तावत्य एव नाऽनन्ताः । अनवधारणे ह्यनन्तत्वं तासां तदनवधारणं चाऽनन्तमिति कथं तदवधारणम् ? कालत्रयाऽवच्छिन्नास्तर्ह्यर्थाः सर्वे, न, तेष्ववच्छेदाऽभावादेकदेशाऽविशेषात् । तस्मात्क्रमाऽक्रमाऽतिरिच्यमानविधाऽभावात्ताभ्यां व्याप्तेर्ज्ञानस्य तदनुपपत्तावनुपपत्तिः । प्रमेयाऽभावाच्च । प्रत्यक्षपूर्वत्वाच्चाऽनुमानादीनामपि सर्वस्मिन्न कारणत्वम् । प्रत्यक्षेण साक्षात्पारम्पर्येण वा सम्बन्धग्रहणाऽभावान्नाऽनुमानम् । न शब्दोऽत एव । पदार्थान्तरोपहितविशेषपदार्थस्यैव वाक्यार्थत्वात् । नाऽऽर्थापत्तिः । तदभावेऽनवकल्पमानदर्शनाऽनुपपत्तेः । नोपमानम् । सादृश्यविषयत्वात् ।

शङ्कते—कालत्रयाऽवच्छिन्नास्तर्ह्यर्थाः सर्वे । वयमनन्ततामेव सर्वतां ब्रूमः, किं त्वेकेनैव कालेनोपाधिवशलब्धाऽतीताद्यर्थव्यवस्थाभेदेनाऽवच्छिन्नाऽभावात्सर्वमित्यर्थः । निराकरोति—न तेष्ववच्छेदाऽभावात् । हेतोरेकदेशाऽविशेषात् सर्वप्रतिपत्तेरनुपपत्तेः । न ह्येकेनोपसंगृहीता इत्येतावन्तः किं तु एतावता । न च यावदयमेको दोषग्रहणाऽनवच्छिन्नो नित्यः कालोऽन्तवानिति कथं तदवच्छिन्नोऽप्येतावान् । न चाऽतीताऽनागतप्रत्युत्पन्नत्वान्यप्यस्य समुच्चितान्यन्तवन्तीत्यर्थः । कारिकायाः पश्चार्धं प्रमाणयन्नुपसंहरति—तस्मात् क्रमाऽक्रमाऽतिरिच्यमानविधाऽभावाद्धेतोस्ताभ्यां व्याप्तेः ज्ञानस्य तदनुपपत्तावनुपपत्तिः । प्रमेयाऽभावाच्च प्रमेयं च न निरूप्यते । प्रमेयाऽनिरूपणादेव च सर्वग्रहणसामर्थ्यमात्रेण सर्वज्ञता प्रत्युक्ता वेदितव्या । ननु मा नाम सर्वं प्रत्यक्षेण ज्ञासीत्, अनुमानादिभिस्तु ज्ञास्यतीत्यत्राह—प्रत्यक्षपूर्वकत्वाच्चाऽनुमानादीनामपि सर्वस्मिन् अकारणत्वम् प्रमाणत्वम् ।

प्रत्यक्षपूर्वकत्वं प्रमाणानां प्रत्येकमादर्शयति—प्रत्यक्षेण साक्षात्पारम्पर्येण वा सम्बन्धस्य पक्षधर्मतानियमलक्षणस्याऽग्रहणं हेतुस्तस्य च सर्वस्मिन्नभावन्नाऽनुमानम् । न शब्दोऽत एव प्रत्यक्षेण सम्बन्धग्रहणलब्धजन्मत्वात् । नन्वगृहीतसम्बन्धं सर्वं मा भूत्पदार्थो वाक्यार्थस्तु भविष्यतीत्यत आह—पदार्थान्तरोपहितविशेषस्य पदार्थस्यैव वाक्यार्थत्वात् । कृतोपपादनमेतन्नियोगपरीक्षायाम् । नाऽर्थापत्तिः । कुतः ? तस्य सर्वस्याऽभावेऽनवकल्पमानस्याऽघटमानस्य कस्यचित् दर्शनाऽनुपपत्तेः । नोपमानम् । दृष्टस्य[1] स्मृत्यारूढस्य गवादेर्दृश्यमानेन गवयादिनोपमेयत्वात् । सर्वस्य क्वचिददर्शनात् । सादृश्यविषयत्वाच्च । सर्वस्य चाऽसादृश्यरूपत्वात् । न प्रमाणाऽभावस्तस्य प्रमेयाऽभाव-

१. सदृशस्य । २ पु०पा० ।

नाऽभावः। अभावविषयत्वात्। प्रत्यक्षस्येव चेतरेषामपि प्रमाणानां क्रमाऽक्रमौ न कल्पेते प्रमेयं न च निरूप्यते। एवं तावदनुपपत्तिः। ज्ञानमपि।

सर्वादृशामन्यवित्तमिन्द्रियाणां न गोचरः।
अत एव न सर्वज्ञज्ञानकार्य्यं प्रसिद्ध्यति॥

न तावदनतीन्द्रियदृशः सदपि परवर्ति संवेदनं प्रत्यक्षम्। अत एव नाऽनुमेयम्। तदसिद्धौ तत्कार्याऽसिद्धेः। नन्वतिशयानां काष्ठाप्राप्तिः

विषयत्वात्। सर्वस्य च सदसद्रूपतया तदनुपपत्तेः। प्रत्यक्षस्येव चेतरेषामपि प्रमाणानां क्रमाऽक्रमौ न कल्पेते न घटेते। प्रमेयं च न निरूप्यते।

एवं तावदनुपपत्तिप्रमाणादारु परिशोधितम्। ज्ञानमपि परिशोध्यते। तथा हि—

सर्वादृशामन्यवित्तमिन्द्रियाणां न गोचरः।
अत एव न सर्वज्ञज्ञानकार्यं प्रसिद्ध्यति॥

न तावदनतीन्द्रियदृशोऽस्मदादेः सदपि परवर्त्ति सर्वसंवेदनं प्रत्यक्षगम्यम्। ननु यथा जातमात्रस्य बालस्य स्मितरुदितादिकार्यदर्शनादप्रत्यक्षा अपि हर्षविषादादयः प्राग्भवीयश्चाऽनुभवोऽनुमीयते तथोपदेशादिलक्षणकार्यदर्शनात्परवृत्तिसर्वविषयं विज्ञानमनुमास्यत इत्यत आह—अत एव चात्यन्ताऽप्रत्यक्षत्वादेव नाऽनुमेयम्। ननूक्तं कार्यदर्शनादनुमेयमित्यत आह—तत्सर्वज्ञज्ञानाऽसिद्धौ प्रत्यक्षेण तत्कार्याऽसिद्धेः। न जात्वपरिदृष्टधूमकेतनो धूमं तत्कार्यमवैति। स्मितरुदितादयस्तु मानसप्रत्यक्षसमधिगमनीयशोकादिकार्यतया स्वात्मनि प्रतीता इति वैषम्यम्। उपदेशस्तु मन्वादीनां चरकादीनां वा वेदात् उपदेशान्तरप्रभवप्रवृत्तिप्रसूतादन्वयव्यतिरेकाऽवगमाद्वा। न च वैद्यचरको[1]पदेशानामादिरस्ति। न खलु सर्वासामौषधीनां तत्संयोगानां च सहस्रेणापि [2]पुरुषायुषैरागमा[3]नधीनः शक्तः कर्तुं कश्चिदन्वयव्यतिरेकौ। चैत्यवन्दनाद्युपदेशस्तु व्यामोहाद्विप्रलम्भाद्वेति निरवद्यम्। परोक्तास्तु हेतवोऽधस्तादेव निरस्ता इति नाऽत्र तिरोहितमिव किंचित्।

सम्प्रति स्वायम्भुवाऽभिमतं सार्वज्ञं निरसितुमुपन्यस्यति—ननु साऽतिशयानां काष्ठाप्राप्तिः परिमाणानामुपलब्धा, तद्यथा कुवलाऽऽमलकबिल्वेषु महत्त्वस्य साऽतिशयस्याऽऽकाशे काष्ठाप्राप्तिः। यत आकाशं परममहद्भ-

---

१. न चरक २ पु० पा० । २. पुरुषै पु० पा० ।
३. रागमाधीनः पु० पा० ।

परिमाणानामुपलब्धा, साऽतिशयं च ज्ञानम्, अतः क्वचित्काष्ठाप्राप्तं सर्वविषयमिति । उच्यते—

काष्ठा यद्यवधिः कामं परं यस्मादसम्भवि ।
कार्य्यद्रव्यैरनेकान्तो गुणैश्च गरिमादिभिः ।।

यदि यतः परं नास्ति सा काष्ठा, भवतु तत्प्राप्तिः । न च तया सर्वविषयत्वसिद्धिः । भूयिष्ठविषयत्वं तु भवेत् । पार्थिवस्येव गोलकस्य पार्थिवान्तराऽपेक्षं बहुतराऽऽकाशाऽवकाशव्यापित्वं न सर्वव्यापिता । अथ यतः परं न सम्भाव्यते, कार्य्यद्रव्यैर्व्यभिचारः । न हि साऽतिशया अपि घटादयः परिमाणतः पराऽसम्भवनीयाऽतिशायिनः । अन्याऽनवकाशप्रसङ्गात् । एकेन सर्वव्याप्तेः । न च गुणधर्म्मोऽयमिति साम्प्रतम् । तद्गतानां गरिमादीनां[1]

वति । साऽतिशयं चेदं विज्ञानमुपलभ्यते । तत्तदेकद्विबहुविषयादिव्याप्त्या तदिदमपि क्वचित्काष्ठाप्राप्तं युक्तम् । इयमेव चाऽस्य काष्ठाऽऽप्तिः यद्विदितसमस्तवेदितव्यस्य तदभावेऽव्यवस्थानमिति । यथाह भगवान् पतञ्जलिः 'तत्र निरतिशयं सर्वज्ञविज्ञानमि'ति । अत्रोत्तरमाह । उच्यते—

काष्ठा यद्यवधिः कामं परं यस्मादसम्भवि ।
कार्यद्रव्यैरनेकान्तो गुणैश्च गरिमादिभिः ।।

तामिमां काष्ठां विकल्प्य दूषयति—यदि यतः परं नास्ति स काष्ठा, भवतु तत्प्राप्तिर्न तया सर्वविषयत्वसिद्धिः । सर्वमेव विज्ञानं स्वहेतुसमासादितजन्मभेदं स्वगोचराऽवधि नाऽतिवर्त्तते इत्यत्र न विप्रतिपद्यामहे । नो खल्वेतावता सर्वविषयविज्ञानसिद्धिरित्यर्थः । भूयिष्ठविषयत्वं तु भवेत् प्राज्ञानां षट्प्रमाणीनिपुणानां विज्ञानस्य पार्थिवस्येव गोलकस्य सकलजीवलोकाऽधिष्ठानस्य गण्डशैलशिलादिपार्थिवान्तराऽपेक्षं बहुतराऽऽकाशाऽवकाशव्यापित्वं, न पुनः सर्वव्यापिता ।

कल्पान्तरमाशङ्कते—अथ यतः परं न सम्भाव्यते सा काष्ठा, यथा व्योम्नः परममहत्परिमाणं परमाणूनां पारिमाण्डल्यम् । न ह्याभ्यां परं महीयः क्षोदीयो वा सम्भवति । तद्दूषयति—कार्यद्रव्यैर्व्यभिचारः । तं दर्शयति—न हि साऽतिशया अपि कुटकुम्भमणिकादयः परिमाणतः पराऽसम्भवनीयरूपदेशाऽतिशायिनः । कस्मात् ? अन्याऽनवकाशप्रसङ्गात् । स्पर्शवता गगनपरिमाणेन एकेनैव द्रव्येण सर्वव्याप्तेः स्पर्शवतामन्येषामनवकाशः स्यात् । प्रथमं गुणत्वे सतीति विशेषणान्न कार्यद्रव्यैर्व्यभिचार इति

---

१. परिमाणादीनाम्० मू० पु० पा० ।

तदवस्थाऽसम्भवात् । सर्वैर्गुरुत्ववद्भिरेककार्य्यारम्भाऽभावात् । प्रयत्न-विशेषाच्चाऽन्तिकदूरप्राप्तिर्मनुष्यवातहरिणहरिपतत्रिणाम् । न च तस्याऽसम्भवनीयपरावस्थोऽतिशयः । अनन्तत्वान्नभसः । केषांचिन्निरतिशयप्राप्तानां[1] पातप्रसङ्गात् । निरवशेषगन्तव्य[2]देशप्राप्त्या हि प्रयत्नो निरतिशयः स्यात् । तदनन्ततया कुतोऽस्य निरतिशयता ? तस्मात्प्रयत्नेनैवाऽसाधारणगुणेन बुद्धिगुणेन वा व्यभिचारः । ऐश्वर्य्यफलस्य धर्मस्य न सा काष्ठा । तद्वदैश्वर्य्यजननाद्धर्मस्यापि । ईश्वरैश्वर्य्यस्य धर्म्मफलत्वाऽभावात् । क्लेशकर्म्मविपाकाऽऽशयाऽपरामर्शादनेकैश्वर्य्यप्रसङ्गादैश्वर्य्यव्याघातात् । अपि च—

तत्राह—न च गुणधर्मोऽयमिति साम्प्रतम् । कुतः ? तत्कार्यद्रव्यगतानां गरिमादीनां तदवस्थायाः काष्ठाया असम्भवात् । एवं हि गरिमा नाऽवस्थोदयं पश्येद्यदि सर्वैरेव गरिमगुणशालिभिः सम्भूय परमगरिमगुणमेकं कार्यमारभ्यते । न त्वेतत्सम्भवतीत्याह—सर्वैर्गुरुत्ववद्भिरेककार्यारम्भाऽभावात् । अथाऽसाधारण्ये गुणत्वे सतीति विशेषणान्न व्यभिचारः । तत्राह—प्रयत्नविशेषाच्चाऽन्तिकदूरप्राप्तिर्मनुष्यवातहरिणहरिपतत्रिणाम् । न च तस्य विशेषस्याऽसम्भावनीयपराऽवस्थोऽतिशयः । कस्माद् ? अनन्तत्वाद्गन्तव्यस्य नभसः । केषांचिन्निरतिशयप्रयत्नानां पात[3]प्रसङ्गात् । निरवशेषगन्तव्यदेशप्राप्त्या हि प्राप्तप्रापणीयतया गतिहेतुः प्रयत्नो निरतिशयः स्यात् । तदनन्ततया कुतोऽस्य निरतिशयता ? तस्मात्प्रयत्नेनैवाऽसाधारणगुणेन बुद्धिगुणेन वा व्यभिचारस्तदवस्थ इत्यर्थः ।

यद्युच्येत धर्मात् खल्वशुक्लादकृष्णात् ज्ञानवैराग्यैश्वर्याणि जायन्ते,[4] तत्र यथा धर्मविशेषजन्मनी वैराग्यैश्वर्ये निरतिशयमेव तज्जन्मविज्ञानमति तत्र व्यभिचार इति, तत्राह—ऐश्वर्यफलस्य धर्मस्य न साऽस्ति काष्ठा तद्वदैश्वर्यादिजननाद्धर्म्मस्यापि तद्वत्तया व्यपदेश इति । कुतः पुनरशुक्लकृष्णस्य न सा काष्ठे ? त्यत आह—ईश्वरैश्वर्यस्य धर्मफलत्वाऽऽपातात्[5] । अशुक्लाऽकृष्णौ धर्मौ योगिनां भाक्तस्यैश्वर्यस्य न पुनर्निरतिशयस्य । तत् खल्वनुपचरितं भगवति परमेश्वरे एव । न च तद्धर्म एवं तज्ज्ञानमपि । तदयमसिद्धो हेतुः । दृष्टान्तश्च साधनहीनः । कुतः पुनरैश्वर्यं परमेश्वरस्य न धर्मजनितम् ?

---

१. प्रयत्नानामिति २ पु० पा० । २. निःशेषगन्तव्य मू० पु० पा० ।
३. निरतिशयप्राप्तानां पात २ पु० पा० ।
४. कार्यन्ते पु० पा० । ५. अभावात् पु० पा० ।

नाऽसम्भाव्यपराऽवस्थं नभः परिमितं यदि ।
अथाऽनन्ततया तत्त्वं न त्वेषां परिमाणता ।।

इत्यत आह—क्लेशकर्मविपाकाऽऽशयाऽपरामर्शात् । यथाहाऽत्रभगवान् पतञ्जलिः 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति । अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः क्लेशाः । कुशलाऽकुशलानि कर्माणि । तद्विपाका जात्यायुर्भोगाः । आशेरते इत्याशयाः कर्मवासनाः धर्मधर्म्म-विषयत्वात् । तथापि मुक्तात्मभ्यश्च प्रकृतिलयवैदेह्यप्राप्तेभ्यश्च क्लेशादि-भिरपरामृष्टेभ्योऽस्य भग[1]वतो न भेद इत्याशङ्क्योक्तं पुरुषविशेष इति । मुक्तात्मनां खलु पूर्वा बन्धकोटिः, उत्तरा च विदेहप्रकृतिलयानां सनत्कुमार-प्रभृतीनां समस्ति । तस्य तु भगवतोऽयमेव विशेषस्तेभ्यो यतः क्लेशादीना-मिह वैकल्पिकता इति तत्र कुतोऽस्य धर्म्मविशेषजनितमैश्वर्यम् ? इत्यर्थः ।

यस्तु वैधात्यात् वृद्धवचनमतिक्रम्य परमेश्वरैश्वर्यस्यापि धर्मजनित्वम-भ्युपैति तं प्रत्याह—अनेकेश्वरप्रसङ्गाद्धेतोः सर्वेषामैश्वर्यव्याघातात् । अयमर्थः । धर्मजनितत्वे हीश्वरत्वस्य य एव तद्वान् स एवेश्वरो बहवश्च तद्वन्त इति तद्वशाद् बहव ईश्वराः प्रसज्येरन् । तत्रैकस्यैश्वर्येण सर्वेषां समं न्यूनं वा ऐश्वर्यम् । न्यूनत्वे च यदेवाऽतिशायि तदेव तत्स्यादिति भाक्तमैश्वर्य-मितरेषाम् । तच्च स्वाभाविकत्वादुपपद्यते । स्वभावस्याऽव्यवस्थानात् । ननु धर्मजत्वे तस्याऽव्यवस्थितेः साम्येऽपि वा अविरोधेन संभूयेशते परिषद्वत् प्रत्येकं वा ? पूर्वस्मिन्कल्पे परिषदिव न कश्चिदीश्वरः स्यात्, संभूयेशत्वात् । उत्तरत्र त्वेकेनैवेशनायाः कृतत्वादन्यः किं कुर्वन्नीशः स्यात् ? न हीशनाम-कुर्वन्नोशः, न च स्वतन्त्राणामेकाऽभिप्रायसंभवः । ततश्च विरुद्धाऽभिप्रायत्वे सति न कस्यचित्कार्यस्योत्पादः । उत्पादे वा परस्परविरुद्धस्वभावसमलिङ्गि-तमपर्यायेण जगदुपलभ्येत । कर्म्मवदैश्वर्यं कर्मजनितमित्यप्यागमविरुद्धम् । धर्मजस्याप्यपर्यायेण श्रुतेरिति । यच्च काष्ठाप्राप्तिरुपलभ्यते परिमाणा-नामित्युक्तं, तद्विकल्प्य दूषयति—अपि च—

नाऽसंभाव्यपरावस्थं नभः परिमितं यदि ।
अथाऽनन्ततया तत्त्वं न त्वेषां परिमाणता ।।

परिमितं चेदाकाशमिति ततोऽधिकं किमिति न संभाव्येत । साऽ-तिशयपरिमाणदर्शनादेव कुवलाऽऽमलकबिल्वादिषु संभावनीयमेतत् । इयतोऽपि नभसो भविष्यति किंचिदधिकपरिमाणमिति शङ्क्यते—अनन्तत्वान्नभसोऽसम्भा-

१. भूतवतो पु० पा० ।

अनन्तत्वादिति चेत्। किमिदमानन्त्यम्? अपरिच्छिन्नता। नन्वेष परिमाणाऽभावः। एतावत्तर्हि परिमाणम्। ईदृशीं च काष्ठाप्राप्तिमीश्वरज्ञानस्य वदन्नज्ञानमाविर्भावयति। सोऽयं शान्तिकर्म्मणि वेतालोदयः। सर्वकार्य्याणां कर्तृत्वादेव तर्हि सर्वज्ञत्वम्। उपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञा हि कुलालादयः कर्त्तारः। सर्वेषां च का[1]र्याणामीश्वरः कर्तेति समस्तकार्य्योपादानाद्यभिज्ञः। तथा च सर्वज्ञ इति। किमेते स्वकार्यस्य निरवशेषोपकरणवेदिनः कतिपयोपकरणवेदिनो वा? न तावदशेषोपकरण-

वनीयमेतत्। शङ्कां निराचिकीर्षुः पृच्छति—किमिदमानन्त्यम्? शङ्किता ब्रूते। अपरिच्छिन्नतैवाऽऽनन्त्यम्। नैतस्या अन्यदानन्त्यं नाम किंचित्। उत्तरम्—नन्वेष परिमाणाऽभाव एव वचनव्यक्त्यन्तरेणाऽऽश्रितः। तदेव स्फुटयति—एतावत्तर्हि परिमाणं तद्विपरीतता तु तदभावः। अस्तु तर्हि व्योमवदनन्तमीश्वरज्ञानं सैवाऽस्य काष्ठाप्राप्तिः किं नः परिमाणग्रहणेने? त्यत आह—ईदृशीं च काष्ठाप्राप्तिमीश्वरज्ञानस्य वदन्नज्ञानमीश्वरस्याऽऽविर्भावयति। आत्मीयस्यैव विज्ञानस्य साकल्येनाऽपरिज्ञानात्। ज्ञाने वा कुतोऽस्याऽऽनन्त्यं साकल्ये परिच्छेदनान्तरीयकेण इयत्ताऽवधारणेनाऽपास्तत्वात्। सोऽयं शान्तिकर्मणि ईश्वरज्ञानस्याऽऽनन्त्येन विज्ञत्वसमर्थनलक्षणे ईश्वरस्यैव वस्त्वज्ञानलक्षणोपेतो वेतालोदयः।

संप्रति नैयायिकाः प्रत्यवतिष्ठन्ते—सर्वकार्याणां कर्तृत्वादेव तर्हि सर्वज्ञत्वम्। सर्वकार्याणां तनुभुवादीनामुपलब्धिमान् कर्ता प्रतीयमानोऽन्तर्भावितसर्वज्ञत्व एव प्रतीयते प्रदीप इवाऽन्तर्भावितप्रभावितानः, स्वप्रमाणादित्यर्थः। ननु भवतु कर्तृता, सर्वज्ञता तु कस्मादि?त्यत आह—उपादानोपकरणसंप्रदानप्रयोजनाऽभिज्ञा हि कुलालादयः कर्त्तारः। उपादानमिह परमाणुजातिचतुष्टयम्। उपकरणं समस्तक्षेत्रज्ञसमवायिनौ धर्माऽधर्मौ। संप्रदानं क्षेत्रज्ञाः, यानयं भगवान् स्वकर्मभिरभिप्रैति। प्रयोजनं सुखदुःखोपभोगः[2] क्षेत्रज्ञानां। कुलालादिकर्तृव्यापारविषयस्तूपादानादिः प्रसिद्ध एव। एतदुक्तं भवति। ये यत्कर्तारः ते तदुपादानाद्यभिज्ञाः कुलालादयः। सर्वेषां च कार्याणामीश्वरः कर्त्तेति समस्तकार्योपादानाद्यभिज्ञः। तथा च सर्वज्ञ इति।

तमेतं परतन्त्रसिद्धान्तं सनिदर्शनमुपन्यस्य दूषयितुमुपक्रमते—किमेते कुलालादयः स्वकार्यस्य निरवशेषोपकरणादिवेदिनः कतिपयोपकरणादिवेदिनो

१. कार्य्याणा पु० पा०। २. पभोगः। क्षेत्रज्ञानाम् पु० पा०।
३. दूषयितु।

वेदिनस्ते । अदृष्टस्याऽज्ञानात् । नापि सम्प्रदानप्रयोजनविशेषवेदिनः । तस्याऽनेकस्यापि सम्भवात् तन्मात्रज्ञाने न सर्वज्ञतासिद्धिः । बालोन्मत्ताद- यश्च सर्वकार्य्याणां न प्रयोजनादिवेदिनः । साध्यं चेत्कर्तृत्वं तत्कथमनन्त- र्भावितसर्वज्ञत्वं हेतुमन्तरेण सेद्धुमर्हति ।

ननु सिद्धमेव, सन्निवेशादिमतां बुद्धिमत्पूर्वकत्वात् ।

वा ? न तावदशेषोपकरणादिवेदिनस्ते । कुतः ? अदृष्टस्य सर्वोत्पत्तिमतां निमित्तहेतोरपरिज्ञानात् । नापि संप्रदानप्रयोजनविशेषवेदिनः । तस्य संप्रदानभेदस्य देवदत्तादेः प्रयोजनभेदस्य मधूदकादिधारणादेरनेकस्यापि संभवात् । अथोपकरणादिमात्रविज्ञानं न समस्तोपकरणादिज्ञानं कुलालादीनां तर्हि तेनैव निदर्शनेनेश्वरस्यापि तदुपकरणादिमात्रज्ञानं तन्मात्रज्ञाने च न सर्वज्ञतासिद्धिः । कतिपयज्ञो हि तथा सति स्यादिति ।

न च तन्मात्रज्ञानपि ईश्वरस्य बालादिवदित्याह—बालोन्मत्तादयश्च स्वकार्याणां न प्रयोजनादिवेदिनो, निरभिप्रायाणां तत्र प्रवृत्तिदर्शनात् । न च कुलालादयो निदर्शनं न बालादय इत्यत्र नियमहेतुरस्ति । साध्यं चेत्तत्कर्तृत्वं तत्कथमन्तर्भावितसर्वज्ञत्वं हेतुमन्तरेण सेद्धुमर्हति ?

अत्र चोदयति—ननु सिद्धमेव । कुतः ? संनिवेशादिमतां बुद्धिमत्पूर्व- कत्वात् । त्रयो हि खलु जगति भावा भवन्ति । प्रसिद्धचेतनकर्त्तृकाश्च यथा प्रासादाऽट्टालगोपुरतोरणादयः । प्रसिद्धतद्विपर्ययाश्च यथा परमाण्वा- काशादयः । संदिग्धतत्कर्तृकाश्च यथा तनुतरुमहीमहीध्रादयः । तत्र विवादाध्यासिता उपलब्धिमत्कर्तृकाः कार्यत्वादचेतनोपादानत्वाद्वा, यत्कार्य- मचेतनोपादानं वा तत्सर्वमुपलब्धिमत्कर्तृकं यथा प्रासादादि, तथा च तनु- भुवनादयः, तस्मात्तेऽप्युपलब्धिमत्पूर्वका इति । उक्तहेतुद्वयोपलक्षणार्थं संनिवेशादिमत्त्वग्रहणम् । इतरथा गुणकर्मणोरव्यापनेन हेतोरेकदेशाऽसिद्धत्व- प्रसङ्गात् । न च पृथिव्यादीनां कार्यत्वमसिद्धं महत्त्वे सति क्रियावत्त्वेन वा साऽवयवत्वेन वा वस्त्रादिवत्तत्सिद्धेः । यदि [1]मन्येतबुद्धिमत्त्वमात्रे साध्ये सिद्धसाधनम्, अभिमतं हि परेषामपि कर्मजत्वात्कार्यजातस्य कर्म्मणश्चेतन- हेतुत्वात्तत्कारणत्वं जगतः । सर्वज्ञपूर्वकत्वे तु न तेन हेतोर्व्याप्तिर्दृष्टचरी । दृष्टान्तश्च साध्यहीनः । कुलालादीनामसर्वज्ञत्वात् । विरुद्धता च हेतोः । असर्वज्ञपूर्वकत्वेनैव कुम्भादावुत्पत्तिमत्त्वस्य वाऽचेतनोपादानत्वस्य वा व्याप्ते- रुपलब्धेः । न चोपलब्धिमत्पूर्वकत्वमात्रं साधनविषयः । तद्विशेषस्य तु

---

१. ताऽबुद्धिमत् पु० पा० ।

सर्वज्ञपूर्वकत्वस्याऽतद्विषयस्यापि ततः सिद्धिरिति साम्प्रतम्। तथा हि। यद्यसौ विशेषो न साधनव्याप्तः कथमतस्तत्सिद्धिः, सिद्धत्वात्कथमविषयः, विषयश्चेत्कथं न स्वाश्रयात्तद्दोषगतिं स्पृशे दि ?ति। तदयुक्तम्। सामान्यमात्रव्याप्तावप्यन्तर्भावितविशेषस्यैव सामान्यस्य पक्षधर्मतावशेन साध्यधर्मिण्यनुमानात्। इतरथा सर्वाऽनुमानोच्छेदप्रसङ्गात्। तथा हि वह्न्यनुमानमपि न वह्निसामान्यमात्रविषयं, तस्य प्रागेव सिद्धत्वात्। नापि तद्विशिष्टगिरिगोचरो, वह्नित्वसामान्यस्य तत्सम्वन्धाऽभावेन तद्विशेषत्वाऽनुपपत्तेः। इतरथा गोत्वसमवायादिव गावः शावलेयादयः पर्वतोऽपि वह्नित्वसमवायाद्वह्निः प्रसज्येत। अस्ति च वह्नित्वेन गिरेः संयुक्तसमवायः सम्वन्ध इति चेत्, तर्हि नाऽप्रतिपद्य पर्वतसंयुक्तं वह्निविशेषमसौ शक्यप्रतिपत्तिरिति वह्निविशेषास्याप्यनुमानम्। तथा[1] न पूर्वोक्तदोषप्रसङ्गः।

एवमिन्द्रियाऽनुमानेऽपि स एव दर्शनीयः। तथा हि। तत्रापि नेन्द्रियकरणिका काचित् क्रियोपलब्धा। न खलु च्छिदादयः क्रिया इन्द्रियसाधनाः, व्रश्चनादीनामनिन्द्रियत्वात्। न च व्रश्चनादिसाधनाः सम्भवन्ति रूपादिपरिच्छित्तिलक्षणाः क्रियाः। तस्माद्यथैव क्रियात्वसामान्यस्य सत्यपि करणमात्राऽधीनत्वाव्याप्तत्वे पक्षधर्मतावशादिन्द्रियलक्षणकरणविशेषसिद्धिः तथेहापि सत्यप्युत्पत्तिमत्त्वस्याऽचेतनोपादानत्वस्य चोपादानोपकरणसंप्रदानप्रयोजनज्ञकर्तृमात्रव्याप्तत्वे विवादाध्यसितेषु पक्षधर्म्मतावलाद्विशिष्टस्य तस्य सिद्धिः। अन्यथा सामान्यस्यापि व्यापकाऽभिमतस्याऽसिद्धिः स्यात्, निर्विशेषस्याऽसम्भवात्, विशेषस्य चाऽन्यस्याऽनुपपत्तेः। असर्वज्ञस्य चाऽत्रादृष्टादिभेदविज्ञानरहितस्याऽधिष्ठातृभावाऽसम्भवात्। तेन यद्यप्युपलब्धिमत्कर्तृकत्वं व्याप्तिविषयस्तथापि तद्विशेषस्य पक्षधर्म्मतावलात् प्रतिलम्भ इति विशेषविषयमनुमानम्। न चोक्तदोषप्रसङ्गः। तस्य साध्यदृष्टान्तयोर्द्धर्म्मविकल्पादुत्कर्षाऽपकर्षाऽनुयोगस्य सर्वाऽनुमानसाधारण्येनाऽनुमानमात्रप्रामाण्यप्रतिक्षेपहेतुत्वात्। तत्सिद्धं विवादाऽध्यासिता उपलब्धिमत्कर्तृका इति।

अत्रेप्सितप्रसिद्ध्यायत्तसाधनं शब्दोक्तं तदायत्तोपादानादिविषयत्वात् यस्य यदायत्तमुपादानादिविषयत्वं तत्तत्प्रसिद्ध्यायत्तसाधनं यथा धूमो वह्न्यादेर्द्देशविशेषसिद्ध्यधीनोपादानादिविषयत्वन्तदधीनसिद्धिरिति। न चाऽस्य सकलक्षेत्रज्ञसमवायिधर्म्माऽधर्मज्ञानकारणाऽभावेन तदज्ञानम्। तत्समवेतानां ज्ञानचिकीर्षाप्रयत्नानां नित्यत्वात्। न च बुद्धितन्नित्यत्वयोः कश्चिद्विरोधः।

---

१. तथा च पूर्वोक्तदोषप्रसंगः पु० पा०।

बुद्धेरनित्यायास्तत्र तत्रोपलब्धेर्विरोध इति चेत् ? तर्हि तोयादिपरमाणवोपि न रूपादिमन्तः प्रसज्येरन् । पार्थिवानां रूपादीनां कार्याणामुपलब्धेः, इह च तेषामकार्यत्वात् । हिमकरकादौ रूपादिदर्शनात् कार्यद्रव्यगतानां च तेषां कारणगुणप्रक्रमेण भावात् । पाथसीयानामपि रूपादिमत्ता । सद[1]कारणतया च तद्गतानि रूपादीनि नित्यानीति चेत् । इहापि कार्यत्वेनाऽचेतनोपादानत्वेन वा समस्तविषयज्ञानाऽनुमानात् तस्य च सद[2] कारणतया नित्यत्वसिद्धेः समानत्वात् परपुरुषसमवेतावपि धर्म्माऽधर्मावधिष्ठातुं शक्नोति सम्बन्धात् । न हि साक्षात्संयोगसमवायावेव सम्बन्धौ, संयुक्तसंयोगिसमवायस्यापि तद्भावात् । प्रयुक्ताः खल्वीश्वरेण परमाणवः तैरेव[3] क्षेत्रज्ञाः तत्समवेतौ धर्माधर्माविति, संयुक्तसमवायो वा क्षेत्रज्ञैरीश्वरस्य संयोगात् । अनुमानात् संयोगसिद्धेः। ईश्वरः क्षेत्रज्ञसंयुक्तो मूर्त्तद्रव्यसंयोगित्वात् यो मूर्त्तद्रव्यसंयोगी स क्षेत्रज्ञसंयुक्तः यथा घटादिः । स चास्य संयोगोऽन्यतरोभयकर्मसंयोगानां तत्कारणानामभावादजन्यः । कार्यारम्भाऽऽभिमुख्यमेव धर्म्माऽधर्मयोः प्रवृत्तिः । सा च देशकालादिवदीश्वरप्रत्नमप्यपेक्षते । न चैवं वाच्यं धर्म्माऽधर्म्मौ परमाणून्वा स्वधर्मा[4]नुपगृहीतान् कथमीश्वरः प्रयत्नेन प्रेरयतोति । विषविद्याविदा तदीयधर्म्माऽनुपगृहीतस्य विषशकलस्य प्रेरणदर्शनात् । ज्ञानेच्छाप्रयत्नानां च तद्वर्तिनां नित्यत्वसिद्धौ कृतमस्य शरीरग्रहणेन । तन्मात्रादेव परमाणूनामदृष्टादीनां च प्रवृत्तौ शरीरपृथिव्यादिलक्षणस्य कार्यस्योत्पत्तेरुपपत्तेः, न चैतद्वाच्यं नेश्वरः कर्त्ता पृथिव्यादीनां, प्रयोजनाऽभावादनित्यं चेश्वरविज्ञानं विज्ञानत्वादिति । ईश्वरस्य तज्जानस्य च धर्म्मिणोऽप्रसिद्धौ हेतोराश्रयाऽसिद्धत्वात् । तत्सिद्धौ वा कर्तुर्नित्यज्ञानस्येश्वरस्याऽनुमानादेव धर्म्मिग्राहिणः सिद्धेस्तद्विरोधान्न तदाश्रयमनुमानम् आत्मानमापादयितुमर्हति । तत्किमीश्वरज्ञानाऽनित्यत्वग्राहिणोऽनुमानस्य विशेषविषयतया बलीयस्त्वप्रसाधनप्रयत्नेन ? मूल एवास्य विहितः कुठारः । न चाऽज्ञातरूपाणामिन्द्रियमनसां विज्ञानोत्पत्तिं प्रति साधनभावस्य च वत्सविवृद्धिनिमित्तस्याऽचेतनस्य क्षीरस्य स्वातन्त्र्येण प्रवृत्तेश्च । वनविटपिनां च विना प्रयत्नमुत्पादस्य च दर्शनाद्व्यभिचार इति साम्प्रतम् । सर्वेषामेव तेषां विवादास्पदत्वेन पक्षपक्षे निक्षेपात् । न च शशशृङ्गाऽस्तिता, तदनुपलब्धिविरोधात् । अपरोक्षदर्शना[5]नर्हतया भगवतस्तद्विरोधाऽनुपपत्तेः । अन्यथा सर्वाऽनुमानोच्छेदप्रसङ्गात् । शृङ्गस्य तु शशशिरोवर्त्तिनो गवादिगतस्येव दर्शनार्हस्याऽनुपलब्धिनिराकृतस्य साधनार्ह-

१. सदाकारणतया च पु० पा० । २. सदाकारणतया ।
३. तेवक्षेत्रज्ञाः पु० पा० । ४. स्वधर्मागृहीतान् पु० पा० ।
५. नार्हतया पु० पा०

वार्त्तमेतत् ।

त्वात् । न च पक्षेण व्यभिचारः । सर्वत्र तस्य सुलभतया सर्वानुऽमानोच्छेद-प्रसङ्गात् । व्यतिरेको वा हेतुः कार्यमात्रं पक्षीकृत्य प्रयोक्तव्यः । स चैवं प्रयोगमारोहति । नित्येतरत्समस्तसर्वज्ञपूर्वकमुत्पत्तिमत्त्वादचेतनोपादान-त्वाद्वा । यत्पुनर्न सर्वज्ञपूर्वकं न तदुत्पत्तिमत् अचेतनोपादानं वा । यथा परमाण्वादि । न चेदं तथा तस्मात्सर्वज्ञपूर्वकमिति । सर्वज्ञपूर्वकत्वेन च परं प्रत्यसिद्धेन कार्यमात्रमेव पठ्यत इति भवति पक्षः । यदि पुनश्चेतनाऽनधिष्ठि-तानि स्वं कार्यं कुर्युः ततो यत्र क्वचनाऽवच्छिन्नानि कार्यं जनयेयुरिति न देशकालप्रतिनियतप्रसवं कार्यमुपलभ्येत । हेतुसमवधानजननतया कार्यं न प्रत्येकं कारणैर्जन्यत इति चेत्सत्यं, समवधानमेव तु कारणानामन्योन्यम्[1] कुतः ? कादाचित्कपरिपाकाददृष्टविशेषादिति चेत्, स खल्वयमप्यचेतनः कथं यथावत्कारणानि संनिधापयेत् । नो खलु यत्र क्वचनाऽवस्थितानि दण्डादीनि विना कुम्भकारप्रयत्नमदृष्टविशेषादेव परस्परं संनिधीयन्ते, सन्नि-हितानि वा कार्यस्येशते । तस्मात् कारणसमवधानव्याप्तत्वात् कार्योत्पाद-नस्य तस्य चोपलब्धिमत्पूर्वकत्वाऽभावेऽनुपपत्तेः व्यापकनिवृत्त्या विपक्षात्का-र्योत्पादे निवर्तमाने उपलब्धिमत्त्वेन व्याप्यत इति प्रतिबन्धसिद्धिः । न चेश्वरज्ञानमप्रत्यक्षमिन्द्रियार्थसंनिकर्षाऽनुत्पादादिति साम्प्रतम् । लोकस्य हि प्रत्यक्षस्य तल्लक्षणम् । अस्य हि निखिलाऽर्थसाक्षात्कारित्वं लक्षणं वेदि-तव्यम् । अत्र चाऽऽम्नायो भवति "एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः", "द्यावाभूमी जनयन् देव एक" इति । स्मृतिश्च भवति ।

"अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा" ।।

न चेश्वरज्ञानस्य शरीरेन्द्रियाऽपेक्षयोत्पादः । अस्ति हि श्रुतिः 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न हि तस्याऽस्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इत्यादिका । तदनुमाना-ऽऽगमाभ्यां सिद्धमीश्वरस्य कर्तृत्वं सर्वज्ञत्वं चेति ।

तदेतद्दूषयति—वार्त्तमेतत् । इदमत्राऽऽकूतम् । न तावत्पक्षधर्मताव-शात्तदधिष्ठानविशेषो युगपदसंख्येयस्थावरादिलक्षणकार्यदर्शनादखिलविषय-नित्यविज्ञानमात्रशाली षड्गुण ईश्वरः सेद्धुमर्हति, न ह्येतावता विश्वं कार्य-

१. मन्योन्यं कुतः

मुपजायते । न जातूपादानादिज्ञोऽपि कुम्भकारः कुम्भमचिकीर्षुश्चिकीर्षुर्वा तदुपादानादिष्वलसतयाऽप्रयतमानः कुम्भाऽऽरम्भाय कल्पते । तस्मात् ज्ञान-चिकीर्षाप्रयत्नसमुदायजन्मा कार्योपादो न ज्ञानमात्राद् भवितुमर्हति ।

मा भूदार्द्रेन्धनदहनजन्मा धूमः केवलाऽऽर्द्रेन्धनाद्वह्ने र्वा पृथग्जनज्ञान-विलक्षणमीश्वरज्ञानमसहायमेव विश्वस्मिन् कार्ये पर्याप्तमिति चेत् ? हन्त भोः किमस्य ज्ञानेनापि स्वरूपाऽतिशय एवाऽस्याः सहायस्तत्र तत्र कार्ये वर्त्स्यतीति न किंचित्कार्यमसहायादेकस्मादिति चेत्। ननु तस्यैव स्त एव क्षेत्रज्ञगतौ धर्माऽधर्मौ, सन्ति च परमाणवः सहाया इति किमस्य ज्ञानेन ? अविज्ञातास्ते न प्रवर्त्तन्त इति ज्ञानमेषि व्यमिति चेत् । अथाऽविज्ञातास्ते कस्मान्न प्रवर्त्तन्ते ? तथाऽनुपलम्भात् कुम्भाद्युपायेष्विति चेत् । तर्हि ज्ञानवच्चिकीर्षाप्रयत्नावप्यास्थेयौ तत्रापि च ज्ञानं चिकीर्षाविशेषे उपयुज्येत । स च प्रयत्नभेद इति प्रयत्नहेतुभेद एव साक्षात्कारोदये हेतुरिति कथं तमन्त-रेण तत्सम्भवः ? न हि वह्निमन्तरेण तुषप्रक्षेपफूत्कारमात्रादेवौदनं सिद्ध्यति ।

यदि मन्येत स्त एव चिकीर्षाप्रयत्नावपि भगवतीश्वरे इति ? अथ किमेतौ नित्यावनित्यौ वा ? नित्यौ चेत्कृतमीश्वरस्य ज्ञानेन चिकीर्षा-प्रयत्नोत्पादाऽनुपयोगिना । तयोर्नित्यतया स्वोत्पादोपयोगाऽनपेक्षणात् । न च प्रयत्नवत् ज्ञानमपि साक्षात्कार्योत्पादनाङ्गम् । प्रयत्नभेदेन खल्वयम-धितिष्ठत्युपादानादि, न तत्समये ज्ञानस्य कश्चिदुपयोगश्चिकीर्षाया वा निष्पादितक्रिये कर्म्मण्यविशेषाधायिनः साधनस्य साधनन्यायाऽतिपातादिति दत्तजलञ्जालिरीश्वस्य[1] सर्वज्ञता । अथाऽनित्यौ, ततस्तयोरुत्पत्तिकारणं वक्तव्यम् । ननु नित्यज्ञानमेवोत्पत्तिमूलकारणमस्ति । ततः किमपरेण कारणेन ? अहो बत प्रमादो यदयमात्ममनःसंयोगविशेषाऽसमवायिकारणौ इच्छाप्रयत्नौ तमन्तरेण ज्ञानमात्रादेव भवत इत्यपि वक्तुमध्यवसितः । तथा सत्ययमतण्डुलमपि मण्डं साधयेदेव ।

सन्त्येवाऽस्य मुक्तात्ममनोभिः संयोगास्तेन तत्सहायस्तत्र चिकीर्षा-प्रयत्नप्रचयं युगपत्प्रसूते तत्कार्योपजननायेति चेत् ? ननु मनांसि तत्संयो-गाश्च किमनधिष्ठितानि चिकीर्षाप्रयत्नौ प्रसुवते अधिष्ठितानि वा ? यद्य-नधिष्ठितानि[2] ततस्तैरेव व्यभिचारः । अधिष्ठानं तु प्रयत्नमन्तरेणाऽयुक्त-मेव । प्रयत्नान्तरेण चिकीर्षान्तरजन्मना तदधिष्ठानम् । अनादित्वाच्चिच-कीर्षाप्रयत्न-प्रवाहस्येति चेत् ? यथाऽयमुत्पन्नसंजिहीर्षुः ईश्वरः क्षेत्रज्ञेषु

१. जलञ्जलिरीश्वरस्य पु० पा० । २. अधिष्ठितान्यनधिष्ठितानि २ पु० पा० ।

सन्निवेशादिमत्सर्वं बुद्धिमद्धेतु यद्यपि ।
प्रसिद्धेः सन्निवेशादेरेककारणता कुतः ॥

प्रतिबन्धवृत्तिधर्म्माधर्मनिचयेषु जगति च परमाण्ववस्थामापन्ने निर्व्यापारः कियन्तमपि कालं स्थित्वा यदा चिकीर्षति प्रयतते वा तदा तस्य चिकीर्षा-प्रयत्नयोर्जनयितव्ययोर्न स्थितं चिकीर्षान्तरं वा प्रयत्नान्तरं समस्तीति कुतो मनसां तत्संयोगानां वाऽधिष्ठानमि?त्यनधिष्ठितेभ्यो मनस्तत्संयोगेभ्यो न प्रयत्नचिकीर्षे उत्पद्येयाताम् । उत्पद्यमाने वा कथं कार्यत्वमचेतनोपादा-नत्वं वा न हेतुं व्यभिचारयतः । न च सवितृप्रकाशवदीश्वरस्य ज्ञानमात्र-मिच्छामात्रं प्रयत्नमात्रं तत्तद्भावभेदोपधानात्तद्विषयं भवतीत्यपि साम्प्रतम् । परस्पराश्रयदोषप्रसङ्गात् । तत्तद्भावोपधाने तत्तद्विषयत्वे च तत्तदुपधानम् । उपधीयमानाऽनधिष्ठाने तदुपधानस्य कार्यस्याऽनुत्पादात् । तस्य चाऽधिष्ठा-नादुत्पत्तेरिति । ज्ञानानित्यत्वपक्षे च दूषणमुपरिष्टात्प्रवेदयिष्यते ।

सोऽयमीदृशो विशेषो विचाराऽसहः कथं पक्षधर्म्मतावलादपि साध्य-धर्मिण्युपसंह्रियते ? न हि स्वयमनुपपद्यमानमन्यस्योपपादनायाऽलम् । का तर्हि सामान्यस्याऽऽनुमानिकस्याऽसति विशेषे गतिः ? किमवश्यंभवितव्यमस्य गत्या ? ननु प्रमाणसिद्धमुपपादनीयं यस्याऽनुमोपपद्यते यत् नामाऽनुपपद्य-मानम् अस्तु तस्य परमनुपपत्तिरेव । ननु प्रमाणसिद्धमनुपपन्नमिति विप्रति-षिद्धम् । एवं तर्हि प्रमाणसिद्धिप्रतिघात एवास्त्वविप्रतिषेधाय, न पुनरनुपपन्न-स्योपपत्तिः । कतमत्तर्हि साधनस्येदं दूषणम् ? न दूषणम् साधनस्य तस्य नाम वादिनः यः ससहायनिःसहायनित्याऽनित्यत्वादिविशेषपरिहाराय गगनकुसुमाय-माने क्षित्यादिवर्त्तिनि बुद्धिमत्पूर्वकत्वसामान्ये साधनाऽनर्हं साधनं प्रयोजयति । न च सम्भवति तादृशो विशेषो यमास्थाय क्षित्यादौ बुद्धिमत्पूर्वकत्वसामान्यं व्यवतिष्ठेत । न चैवं सर्वाऽनुमानोच्छेदप्रसङ्गः । सम्भवद्विशेषविषयत्वादि-तरेषामनुमानानाम् । न हि न सम्भवति पर्वतनितम्ववर्त्तिवह्निविशेषोऽ-नुद्भूतरूपस्पर्शो वा तैजसश्चक्षुरवयवो रूपोपलब्धिसाधनम् । कारणानां च चित्ररूपसंस्थानसामर्थ्यानां तत्र तत्रोपलब्धेः । तस्माद्यथा कश्चिन्निशा-तमसिमच्छेद्यमाकाशं प्रति व्यापारयन्पुरुषो निगृह्यते न पुनरसिमाकाशं वा तद्वत्कार्यत्वमचेतनोपादानत्वं वा तर्कसहायं लब्धपरिपाकाऽदृष्टवत्क्षेत्रज्ञ-परमाण्वादिसंयोगकारणमात्रविषयमीश्वरे सर्वज्ञे इति तदिदमुक्तं वार्त्तमेतदिति ।

यत्तु वृद्धैर्दूषितं तदतिप्रसिद्धतयोपेक्ष्य दूषाणन्तरमाह—

संनिवेशादिमत्सर्वं बुद्धिमद्धेतु यद्यपि ।
प्रसिद्धेः संनिवेशादेरेककारणता कुतः ॥

तत्र वृद्धा दूषयांबभूवुः। किमुत्पत्तिमत्त्वमात्रमत्र हेतुः क्रियते किं वा तद्विशेषः ? यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुपजायते। एतदुक्तं भवति। त एव खलूत्पत्तिमन्तोऽचेतनोपादानबुद्धिमत्पूर्वका ये बुद्धिमदन्वयव्यतिरेकाऽनुविधायिभावाऽभावाः प्रमाणेनोपलब्धाः, प्रासादाऽट्टालकगोपुरतोरणादयश्च तथा, न तु तनुभुवनादयः। न खलु तद्भावाऽभावयोर्बुद्धिमद्भावाऽभावाऽनुविधानं कदाचिदप्युपलब्धम्। घटादेरुत्पत्तिमतस्तथोपलम्भादनुत्पत्तिमतश्च गगनादेरनुपलम्भादुत्पत्तिमत्त्वस्य च तनुभुवनादावप्यभेदात् तथाभाव इति चेत् ? तत्किमिदानीं मृद्विकारस्य घटादेर्मनुष्यकार्यत्वमुपलब्धमिति शक्रमूर्धाऽपि तत्कार्यः। न च मृद्विकारत्वं संस्थानं वा भिद्यते। तद्विधसंस्थानस्यापि मृद्विकारस्य मनुष्यनिर्माणदर्शनात्। तादृशत्वेऽपि तस्य तदन्वयव्यतिरेकाऽनुविधानाऽदर्शनात् न तत्कार्यत्वमिति चेत्। न। इहापि साम्यात्। अत्रापि हि यस्य यस्य बुद्धिमद्भावाऽभावाऽनुविधानमस्ति तस्य तस्य सर्वस्याऽस्तु नाम तत्पूर्वता प्रासादादेः, न पुनस्तद्विधस्यापि भुवनादेर्भवितुमर्हति। तस्य तदन्वयव्यतिरेकाऽनुविधानाऽभावात्। नन्वयं योऽसौ धूमविशेषो वह्निभावाऽभावाऽनुविधायिभावाऽभाव उपलब्धः स सर्वो वह्निपूर्वोऽस्तु न तु पर्वतनितम्बवर्ती तथेति कथं ततो वह्निरनुमीयते। सामान्यवद्विषयत्वेऽपि तु कार्यकारणभावाऽवधारणस्येहापि साम्यम्।

तत्किमिदानीं मनुष्यकार्याः कुड्यादय उपलब्धा इति शक्रमूर्द्धापि[1] तथास्तु ? कस्यचिद्विशेषस्य कुड्यादिभ्यः शक्रमूर्द्धादेः सम्भवान्नैवमिति चेत्। स तर्हि प्रासादादिभ्य[2] संभ[3]वति तनुभुवनादावपीति न विशेषः। न त्वयमेवंविधो धूमविशेषाणां वह्न्यन्वयव्यतिरेकाऽनुविधायिनामस्ति पर्वतगतधूमात्स्वरूपेण विशेषः। अत एव न पाण्डुद्रव्यमात्रात्कुमुदकपोतादेरनुमानम्। धूमत्वसामान्यस्यैव तेभ्यो भेदाऽऽपादकत्वात्। न च हेतुसमवधानं चेतनमन्तरेणाऽसम्भवि। अदृष्ट[4]परिपाकादेव कादाचित्काद्देशकालभेदसमासादितजन्मनस्तदुपपत्तेः। ततश्च कार्यनियमसिद्धेः। न खलु नियतप्रकारसामर्थ्येभ्यः कारणेभ्यः कार्यमनियमेनोत्पत्तुमर्हति। अन्यथा कर्तृचैतन्येऽप्ययं दुर्वारः प्रसङ्गः। तस्यापि कारणसामर्थ्याऽनुरोधेन नियोजकत्वात्। न च चेतनमन्तरेण कुम्भादिकारणानि न प्रवर्त्तन्ते इति पृथिव्यादिकारणैरपि न प्रवर्त्तितव्यम्। यथा हि देहवत्प्रयत्नमन्तरेण कुम्भादिकारणेष्वप्रवर्तमाने-

---

१. राजमूर्धा २ पु० पा०। २. छ्विनानुमानं २ पु० पा०।
३. संवति पु० पा०। ४. अदृष्टपरिका पु० पा०।

दृष्टा प्रेक्षापूर्वप्रासादादिसन्निवेशवैलक्षण्येऽपि चेतरेषां तरुगिरिसागरादीनां यद्यपि सन्निवेशमात्रसामान्यात्, तथा सति विभक्तेशतया स्वार्थे पराऽनुग्रहे वा दुःखोत्तरसर्गदर्शनात् प्रयोजनाऽभावनिराकृताऽपि चैतन्यमात्रसिद्धिः स्यात् एकत्वं तु तस्य कुतस्त्यम् ? न हि घटरथादय एकबुद्धिमत्पू-

ष्वपि पृथिव्यादिकारणानि न देहवतः प्रयत्नमपेक्षन्ते स्वप्रवृत्तिं प्रति तथा चेतनमात्रप्रयत्नमपि नाऽपेक्षिष्यन्ते, किं त्वदृष्टपरिपाकवत्क्षेत्रज्ञसंयोगा[1]देव प्रवर्त्स्यन्तीति किं तदभिज्ञेन कल्पितेन ? तस्माद्विशिष्टमुत्पत्तिमत्त्वमसिद्धम् ।

पृथिव्यादिषु उत्पत्तिमत्त्वमात्रं त्वप्रयोजकं विशेषप्रयुक्तव्याप्त्युपजीवित्वेन स्वाभाविकप्रतिबन्धवैकल्यात् । स्वाभाविकप्रतिबन्धवतश्च हेतोरनुमानाऽङ्गत्वात् । इतरथोपाध्यायदर्शनादेरपि शिष्याद्यनुमापकत्वप्रसङ्गात् । अपि च प्रेक्षावतां प्रवृत्तिः प्रयोजनवत्तया व्याप्ता । न चेश्वरस्य प्रेक्षावतो जगन्निर्माणे प्रयोजनं पश्यामः । प्राप्तनिखिलप्राणीयस्य प्राप्तव्याऽभावात् । अन्ततः क्रीडासाध्यस्यापि सुखस्याऽवाप्तत्वात् । नापि कारुण्येन परार्थं प्रवर्तते । सुखमयजीवलोकसर्जनप्रसङ्गात् । दुःखमयी तु सृष्टिर्बहुल-[2]मुपलभ्यते । न च धर्म्माऽधर्म्मसहायस्य निर्माणवैचित्र्यमिति साम्प्रतम् । अधर्मस्य जगद्दुःखाऽहेतोः कारुणिकाऽनधिष्ठानाऽनुपपत्तेः । अनधिष्ठितस्य वा कार्यकरणे हेतोर्व्यभिचारप्रसङ्गात् । न च दुःखाऽनुभवनं वैराग्योत्पादनद्वारेणाऽपवर्गोपयोगीति परहितकाम्यया तदीग्रमधर्ममधितिष्ठतीति साम्प्रतम् । ईश्वराऽधीनत्वाद् दुःखोत्पादनस्य तस्य च तत्र वैमुख्येन[3] तदनुत्पादे तदत्यन्तविमोक्षलक्षणस्याऽपवर्गस्य फलतः प्राप्तेः । न चाऽप्रयोजनमपि स्वभावादेव भावयतीति युक्तं, प्रेक्षावत्त्वव्याघातात् । तथा च तत्प्रणीतेष्वागमेष्वनाश्वास इति तत्रोपेक्षां दर्शयित्वा दूषणान्तरमाह—

दृष्टा प्रेक्षापूर्वप्रसादादिसंनिवेशवैलक्षण्येऽपि चेतरेषां तरुगिरिसागरादीनां यद्यपि संनिवेशमात्रसामान्याच्चैतन्यमात्रसिद्धिः स्यादिति परेण सम्बन्धः । तथा सति विभक्तेशतया स्वार्थे पराऽनुग्रहे वाऽसति कस्मान्न परार्थाऽनुग्रह ? इत्यत आह—दुःखोत्तरसर्गदर्शनात् । प्रयोजनाऽभावनिराकृतापि चैनन्यमात्रसिद्धिः स्याद् यद्यपि एकत्वं तु तस्येश्वरस्य कुतस्त्यं घटरथादीनां कर्तुस्तथा दर्शनादिति चेत् तत्राह—न हि घटरथादय एकबुद्धिमत्पूर्वकाः ।

---

१. परिपाकवदेवज्ञसंयोगात् २ पु० पा० ।

२. बहुला २ पु० पा० ।

३. वैगुण्येन २ पु० पा० ।

र्वकाः। ईश्वरपूर्वकत्वेन तथेति चेत् साध्यं तच्चेतनमात्रनान्तरीयकत्वात्सन्निवेशस्य केषांचित्तथा दर्शनात् अन्यत्रापि तथाभाव इति चेत्। दृष्टान्तसाध्याभ्यामनेकान्तः। सर्वसाध्यत्वे दृष्टान्ताऽभावः। द्विकर्तृकत्वे च घटादेर्भुवनाद्यपि तथेति ईश्वरेश्वरप्रसङ्गादनवस्था। अत एव न द्वितीयाऽनुमानम्। एकाऽनुमानमपि तर्हि मा भूत्, तथाप्यनवस्थायास्तुल्यत्वात्। अथ न द्व्यधिष्ठातृका घटादयः सर्वमेकाधिष्ठातृकमिति। न सर्वज्ञत्वसिद्धिः।

शङ्कते—ईश्वरकर्तृकत्वेन सर्वस्य कार्यजातस्य तथैककर्तृकत्वमिति चेत् साध्यमीश्वरपूर्वकत्वं सर्वस्य कार्यजातस्य तत्कथं तदेव साधनतयोपादीयत इत्यर्थः। पुनः शङ्कते—तच्चेतनपूर्वकत्वमात्रनान्तरीयकत्वात् संनिवेशस्य केषांचिद् घटरथादीनां तथा दर्शनादन्यत्रापि क्षित्यादौ तथाभाव इति सिद्धमीश्वरपूर्वकत्वम्। तथा चैककर्तृकत्वमिति चेत्। निराचष्टे—दृष्टान्तसाध्याभ्यामनेकान्तः। दृष्टान्ते हि घटादावेकः कर्त्ता कुलालादिः, साध्ये च क्षित्यादौ ईश्वर इति व्यभिचारान्नोत्पत्तिमत्त्वमचेतनोपादानत्वं वा चेतनात्मानं कर्त्तारं तनुभुवनादीनां साधयितुमर्हति। अनेककर्तृकस्य दृष्टान्तसाध्ययोर्दर्शनादित्यर्थः।

यदि तु सर्वमेवेश्वरपूर्वकत्वेन साध्येत ततो घटादीनामीश्वरपूर्वकत्वेन पक्षविनिक्षेपात् दृष्टान्ताऽभाव इत्याह—सर्वसाध्यत्वे दृष्टान्ताऽभावः। न च व्यतिरेकी हेतुः सम्भवति। कादाचित्काऽदृष्टपरिपाकादेव देशकालादिप्रतिनियतकार्योत्पादोपपत्त्या व्यतिरेकाऽव्यभिचारस्याऽनिश्चयादिति भावः। यथा चैतत्तथोपपादितमधस्तात्।

अपि चाऽस्त्वीश्वरः कर्त्ता घटादीनां तथापि प्रत्यक्षपरिदृष्टकुलालादिरपि कर्त्तेति द्विकर्तृकत्वे च घटादेर्भुवनाद्यपि तथा तेनैव निदर्शनेन द्विकर्तृकत्वमितीश्वरस्येश्वरप्रसङ्गादनवस्था।

एतदुक्तं भवति। यथा प्रत्यक्षपरिदृष्टकुलालादिकर्तृकेऽपि घटादौ तावतैवोपपद्यमानोत्पादे चेतनान्तरमीश्वरस्तत्कर्त्तारं कुलालमधिष्ठातुं कल्पते तथेश्वरमधिष्ठातुमीश्वरान्तरम्, एवं तमित्यनवस्थेति। अत एव चोदयति—अनवस्थाप्रसङ्गादेव न द्वितीयेश्वरस्याऽनुमानम्। ततो न द्विकर्तृकतेति चेत्। परिहरति—एकाऽनुमानमपि तर्हि मा भूत्। कस्मात्? तथा एकानुमानेऽप्यनवस्थायास्तुल्यत्वात्। लब्धपरिपाकाऽदृष्टवत्क्षेत्रज्ञसंयोगादेव क्षित्यादिलक्षणकार्योत्पत्तावेकस्यापीश्वरस्याऽनुमाने तुल्यैवाऽनवस्थेत्यर्थः।

शङ्कते—अथ न द्व्यधिष्ठातृका घटादयः किं त्वेकैककुलालाद्यधिष्ठातृकाः सर्वे। ततश्च नेश्वरान्तराऽनुमानं न चाऽनवस्थेति। निराकरोति—न

रथाङ्गाद्यवयवा नानातक्षनिर्मिता अपि दृश्यन्ते जगति प्राय उपकार्योपकारकाः, एवं च रथाङ्गाद्येकतक्षपूर्वकं दृष्टम् । तस्माज्जगदप्येककर्तृपूर्वकमिति । तदेतद् व्यभिचारि । नानातक्षपूर्वकस्यापि दर्शनात् ।

हेत्वभावप्रतिक्षिप्तं न कार्य्यमनुमीयते ।
हेतुर्न चेतनामात्रं प्रेक्षा त्वनुपपत्तिका ॥

न हि कर्म्माशयाऽभावे तस्य शरीरेन्द्रिययोगो बुद्धिरैश्वर्य्यं वा सम्भवतीति प्रमाणविरुद्धस्तदुपगमः । हेत्वभावे कार्य्याऽनुपपत्तेः । उपपत्तौ वा न संनिवेशात्तदनुमानम् । कर्म्माशयपूर्वकत्वे वा तज्ज्ञानमन्यतः स्यात् ।

सर्वज्ञत्व[1]सिद्धिः । यदि हि सर्वकार्याणामेकः कर्त्ता स्यात्ततोऽज्ञस्य तत्त्वाऽनुपपत्तेः सर्वज्ञता स्यात् । अथ पुनरेकैककार्यमेकैकेन कर्त्ता जन्यत इति यो यज्जनयति स तत्कारणमात्रज्ञ एवेति न सर्वज्ञ इत्यर्थः ।

यदपि कश्चित् प्रमाणयेत् यत्परस्परोपकार्योपकारकत्वेन व्यवस्थितं तदेककर्तृकं दृष्टं, यथा रथाऽवयवा एकतक्षपूर्वका दृष्टाः, तथा च तनुभुवनानि ।

अत्रापि समस्ति कथंचित् परस्परोपकार्योपकारकभाव इत्यत्राह रथाद्यवयवा नानातक्षनिर्मापिता अपि दृश्यन्ते जगति प्राय उपकार्योपकारकाः । सर्वं जगत् परस्परोपकार्योपकारकं दृष्टं, ततः किमेवंविधं रथाङ्गाद्येकतक्षपूर्वकं दृष्टम् ? तस्माज्जगदप्येककर्तृपूर्वकं तथा च जगत्कर्त्ता सर्वज्ञ इति ।

दूषयति—तदेतद् व्यभिचारि । कुतः ? नानातक्षपूर्वकत्वस्यापि दर्शनात् ।

हेत्वभावप्रतिक्षिप्तं न कार्यमनुमीयते ।
हेतुर्न चेतनामात्रं प्रेक्षा त्वनुपपत्तिका ॥

ईश्वरस्य क्लेशकर्मविपाकाशयाऽपरामर्शाऽभ्युपगमात् । न हि कर्माऽऽशयाऽभावे तस्य शरीरेन्द्रियादियोगो बुद्धिरैश्वर्यं वा सम्भवतीति प्रमाणविरुद्धस्तदुपगमः । प्रमाणविरोधमाह—हेत्वभावे कार्याऽनुपपत्तेः । न ह्यस्ति सम्भवो वह्निर्नास्ति समस्ति च धूम इति । कर्माशयहेतवश्च शरीरादयस्तदभावे न भवितुमीशते इत्यर्थः । उपपत्तौ वा हेत्वभावे कार्योत्पादस्य भवत्पक्षेऽपि न संनिवेशात् तस्य बुद्धिमतोऽनुमानं, कारणमन्तरेणापि कार्योत्पत्तेः । यस्तु कश्चिद्वैयात्यादीश्वरेऽपि कर्माऽऽशयपरामर्शमभ्युपगच्छेत्

---

१. सर्वविरत्व २ पु० पा० ।

नन्वत एव हेत्वभावे कार्य्याऽभावात् तदनुमानम् ? अन्यथा दूषणमपि न स्यात् । वक्तव्यो वा विशेषो यतो दूषणं न साधनमिति । उच्यते । प्रत्यक्षेण विलक्षणा[1]ह्यप्रत्ययपूर्वाः सन्निवेशा अतद्धेतवः स्युः । न चैवं बुद्धिरनुमेया, दृष्टसालक्षण्येनाऽनुमानात् । अपि च तुल्यत्वेऽपि प्रतिबन्धमात्राद् दूषणं साधनमपि, साधनं तु निरस्तप्रतिपक्षं साध्यसिद्धाविति । न च बुद्धिमात्रं

तं प्रत्याह—कर्माशयपूर्वकत्वे वा तज्ज्ञानमन्यतः स्यात् येन कर्म्माशयेनाऽस्य शरीरादयो जनयितव्याः स तावदविज्ञातोऽनधिष्ठितश्च चक्षुराद्युपजननाय न पर्याप्त इति ज्ञातव्यः । न च तज्जन्येन शरीरादिना, इतरेतराऽश्रयप्रसङ्गात् न च प्राग्भवीयेन शरीरान्तरादिना । जन्मसमये तस्याऽतिवृत्तत्वात् । न चेश्वरान्तरमभ्युपेयते परैः । तदुपगमे वा तत्रापि दुर्वारः प्रसङ्गः । चोदयति—नन्वत एव हेत्वभावे कार्याऽभावादेव तस्य बुद्धिमतस्तनुभुवनादिहेतोरनुमानम् । अन्यथा यदि हेत्वभावेऽपि भवेत्कार्यं ततो दूषणमपि 'हेत्वभावप्रतिक्षिप्तं न कार्यमनुमीयते' इत्येतत् न स्यात् । वक्तव्यो वा विशेषस्तादृशः, यतो दूषणं न तु साधनमिति । उभावपि हि साधनदूषणवादिनौ कारणाऽभावे न कार्यमिति वक्तुं प्रवृत्तौ । तत् कथमनेनैकः पर्यनुयुज्यते ? वदन्ति हि वृद्धाः 'यश्चोभयोः पक्षयोर्दोषो न तत्रैकश्चोद्यो भवती'ति ।

स्वपक्षे विशेषमादर्शयन् परिहरति—उच्यते । प्रत्यक्षविलक्षणा ह्यप्रत्ययपूर्वकाः क्षित्यादिसंनिवेशाः अतद्धेतवोऽप्रत्ययवद्धेतवः स्युः । अथ यथा प्रासादादीनां संनिवेशाः प्रत्यक्षेण विलक्षणाः क्षित्यादिसन्निवेशेभ्य उपलभ्यन्ते तथा बुद्धिरलौकिकेभ्यो विलक्षणा अनुमानादुपलभ्यत इत्यत आह—न चैवं बुद्धिरनुमेया । कुतः ? दृष्टसालक्षण्येनाऽनुमानात् । एतदुक्तं भवति । प्रत्यक्षमिन्द्रियजन्मनिदर्शननिरपेक्षमुपजायमानमदृष्टचरमपि त्रैलोक्यविलक्षणमप्यर्थं स्वलक्षणं गोचरयितुं पारयत्येव । अनुमानं व्युत्पत्त्यपेक्षितया व्युत्पत्तेश्च पूर्वदर्शनाऽधीनतया दृष्टसलक्षणमेव गोचरयेन्न तु विलक्षणम् । अदृष्टलिङ्गसम्बन्धं हि तत् । तदिह बुद्धिरनुमीयमाना यथादर्शनमनुमीयेत । सा चाऽनित्या शरीरात्ममनःसंयोगहेतुः । असर्वविषयोपलब्धाऽस्मदादाविति तद्विधैवाऽनुमातव्या । तथा च नित्यत्वसर्वविषयत्वादिव्याहतिरिति । न चैवं दहनाद्यनुमानेषु प्रसङ्गः । न खलु तत्र महानसादिदृष्टदहनविलक्षणः पर्वतनितम्बवर्ती दहनेऽनुमीयते । न च देशभेदस्त-

१. प्रत्यक्षविलक्षणाः १ पु० पा० ।

सन्निवेशहेतुर्विन्यासप्रयोजनविचारनिर्णयात्मिका प्रेक्षा। न च सा तत्र सम्भवति, स्वार्थपरार्थाऽभावादिति। ननु मा भूत्सर्वज्ञो नियोक्ता, धर्म्मज्ञस्त्विवष्यताम्। न हि रूपतश्चक्षुरादीनां विषयनियमो निरूप्यत इत्युक्तम्। कालतस्तु नियमे यदा वर्त्तमानत्वं तदाऽतिशयवच्चक्षुरादिविषयभावो न[1] विरुद्धः। आत्यन्तिके चा[2]ऽवर्त्तमानत्वेऽत्यन्ताऽसत्त्वं खपुष्पादिवदित्युक्तम्।

द्वैलक्षण्याय पर्याप्तः, अन्यत्वात्। कथं तर्हि रूपाद्युपलब्धेरिन्द्रियाऽनुमानम्? न हि तत्र दण्डादिकरणसालक्षण्यं, रूपादिपरिच्छित्तिकरणानामिन्द्रियाणामनुमानाऽगोचरत्वात्। रूपादिपरिच्छित्त्यन्यथानुपपत्तिप्रभवा खल्वियमर्थापत्तिरिन्द्रियगोचरा, सा च सम्वन्धदर्शननिरपेक्षया न दृष्टसालक्षण्यमपेक्षते। न चैवं बुद्धिमत्पूर्वकत्वेऽप्यर्थापत्ति, रन्यथाऽनुपपद्यमानस्य कस्यचिदप्यदर्शनात्। तनुभुवनादेश्चाऽदृष्टवत्क्षेत्रज्ञपरमाणुसंयोगादुत्पत्तेरित्यसकृदावेदितम्। तदेवमस्ति साधनदूषणस्य विशेषः।

अपि चाऽविशेषेऽपि न वैतण्डिकः शक्यो निराकर्त्तुं यः स्वपक्षस्थापनाहीनं परपक्षमाहन्तीत्याह—अपि च तुल्यत्वे प्रतिबन्धमात्राद् दूषणं साधनमपि सप्रतिपक्षमपि। साधनं तु निरस्तप्रतिपक्षं साध्यसिद्धौ साधनतायामवतिष्ठते न तु सप्रतिपक्षं प्रतिवन्धमात्रादिति।

तदेवं पूर्वार्द्धं कारिकाया व्याख्याय पश्चार्धं व्याचष्टे—न च बुद्धिमात्रं सन्निवेशहेतुः, अपि तु विन्यासप्रयोजनयोर्यौ विचारनिर्णयौ तदात्मिका प्रेक्षाबुद्धिविशेष इति यावत्। प्रेक्षैव तर्हि भवतु भगवतीश्वरे, इत्यत आह—न च सा च सम्भवति, स्वार्थपरार्थाऽभावात् दर्शितश्च तदभावः पुरस्तात्।

सम्प्रत्यन्यथा प्रत्यवतिष्ठते परः—ननु मा भूत्सर्वज्ञो नियोक्ता प्रत्यक्षेण, धर्मज्ञस्त्विवष्यतां, यथाह—

हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः॥
कीटसङ्ख्यापरिज्ञानं तस्य नः क्वोपयुज्यते।
दूरं पश्यतु वा मा तत्त्वमिष्टं तु पश्यति॥
प्रमाणं दूरदर्शी चेद् व[3]यं गृध्रानुपास्महे॥ इत्यादि।

नन्वयं धर्मो रूपपिशेषाऽभावात् कथं प्रत्ययपूर्व? इत्यत आह—न हि रूपवतश्चक्षुरादीनां विषयनियमो निरूप्यत इत्युक्तम्। नन्वेतदप्युक्तं

---

1. नेति नास्ति मू० पु० पा०। 2. वा—१ पु० पा०।
3. एहि, इति पाठान्तरम्।

तत्र कुर्वित्यर्थो[1] धर्म्मः, यागादेर्विषयस्य धर्म्मत्वेनोपगमात्[2] । उत्पाद्यत्वात्तस्याऽप्रत्यक्षत्वमिति चेत् । उत्पन्नस्याऽस्तु । ननूत्पन्नमपि स्वरूपेण धर्मः, श्रेयः साधनत्वेन तु तच्चाऽतीन्द्रियम् । किं पुनरिदं श्रेयः साधनत्वम् ? यदि तावच्छक्तिः सा चाऽतीन्द्रियेति । उक्तमत्र नेन्द्रियाणां परिमाणतो वा[3] विषयनियमः सुनिरूपितः । अथ तदाऽसत्त्वात् । कालान्तरभावित्वात् श्रेयसः । भवतु, अन्यथा धर्मत्वहानेः । श्रेयःसाधनं तु वर्त्तमानमिति

वर्त्तमानकालविषयमेव चक्षुरादीति । न च धर्मो वर्तमान इत्यत आह—कालतस्तु नियमे यदा धर्म्मस्य वर्त्तमानत्वं तदाऽतिशयवच्चक्षुरादिविषयभावो न विरुद्धः । यद्युच्येत न कदाचिदप्ययं वर्तमान इति, तत्राह—आत्यन्तिके चाऽवर्त्तमानत्वे अत्यन्ताऽसत्त्वं खपुष्पादिवत् इत्युक्तम् ।

ननु कुर्विति नियोगो धर्मः, न चैष वर्तमानः । करोषीत्यविशेषप्रसङ्गात् । वर्तमानाऽवस्थस्तु न नियोग इति न धर्म इत्यत आह—तत्र कुर्वित्यर्थो धर्म्मः । कस्मात् ? यागादेर्नियोगविषयस्य धर्म्मत्वोपगमात्तत्रैव धर्म्मत्वप्रसिद्धेः । शङ्कते—उत्पाद्यत्वादवर्तमानत्वात्तस्याप्यप्रत्यक्षत्वमिति चेत् । निराकरोति—उत्पन्नस्यास्तु । पुनः शङ्कते—उत्पन्नमपि यागादि न स्वरूपेण धर्म्मः, श्रेयःसाधनत्वेन तु तच्चातीन्द्रियम् । तदेतद् दूषयितुं विकल्पयति—किं पुनरिदं श्रेयः साधनत्वं ? यदि तावच्छक्तिः सा चाऽतीन्द्रियेति । दूषयति—उक्तमत्र नेन्द्रियाणां परिमाणतो वा विषयनियमस्तु निरूपित इति । अथ साधनस्य श्रेयसा संवन्धः श्रेयःसाधनत्वं, कृत्तद्धितसमासेषु संवन्धाभिधानं त्वतल्भ्यामिति वार्त्तिककारवचनात् । संवन्धश्च संवन्धिद्वयाऽधीननिरूपणो नाऽन्तरेण संवन्धिना शक्यो निरूपयितुमित्यसति श्रेयसि कालान्तरभाविनि कथं तत्सवन्धो यागादीनाम्प्रत्यक्षमीक्ष्येतेति शङ्कते– अथ तदा यागादिसमयेऽसत्त्वात् । कुतोऽसत्त्वमि?त्यत आह– कालान्तरभावित्वादामुष्मिकस्य स्वर्गादेः श्रेयसः । उत्तरम्—भवतु कालान्तरभावि श्रेयः, तत्साधनत्वं त्वतिशयो यागादिसमवेतो यः स तत्कालो यो यागादिकालः । न खलु भिन्नकालयोराधाराऽऽधेयभावः सम्भवति । तत्सम्भवे तत्त्वमेव कुतः ? इत्यत आह– अन्यथाऽसमवायादतिशयस्य यागादीनामश्रेयः साधनत्वाद्धर्म्मत्वहानेः । तस्माद्यदा तदा भवतु, श्रेयः साधनत्वं तु वर्तमानमिति नाऽक्षाणामविषयो धर्म्मः श्रेयःसाधनरूपः ।

---

१. **कुर्वीतेत्यर्थः** सू० पु० पा० । २. **तदुत्पाद्यत्वात्** १ पु० पा० ।
३. **परिमाणतो वा स्वरूपतो वा०** सू० पु० पा० ।

नाऽक्षाणामविषयः। ननु प्रागनुष्ठानाद्धर्मज्ञानमिष्यतेऽनुष्ठातृभिः। तथा च भविष्यद्वा[1]ऽक्षाणामविषयः। नैवाऽधिष्ठातृणां[2] प्रत्यक्षं धर्मं ब्रूमः, अपि तूपदेष्टुरतिशयवतः। स चाऽतिशयः स्वाभाविको महत्त्वमिव व्योम्न उपदेशान्तरजः क्रियानिबन्धनो वेत्यदोषः।

उच्यते—

अतुल्यकालं सामर्थ्यं कर्म्मणः क्षणभङ्गिनः।
चिरकालफलायाऽऽहुर्न तदध्यक्षमीक्षते॥

प्रलीयमानकर्म्मलब्धोपजनः। पूर्वाऽपराङ्गोपपादिताऽवस्थान्तरो देश-

एतदुक्तं भवति। भवतु नाम श्रेयःसाधनत्वशब्दः संबन्धवचनो न पुनर्द्धर्म्मशब्दोऽपि श्रेयःसाधन एव। तस्य लौकिकपरीक्षकैरविवादं प्रयोगात्। अतिशयवच्च यागाद्येव तत्साधनमिति त एव धर्म्मपदास्पदम्। ते च तद्भाजो वर्तमाना इति तेषां तद्वतां प्रत्यक्षतेति।

चोदयति—ननु प्रागनुष्ठानात् धर्म्मज्ञानमिष्यतेऽनुष्ठातृभिस्तज्ज्ञानस्याऽनुष्ठानाऽङ्गत्वात्। तथा च भविष्यद्वाऽक्षाणामविषयः। परिहरति—नैवाऽनुष्ठातृणामस्मदादीनां प्रत्यक्षं धर्मं ब्रूमः, किं तूपदेष्टुरतिशयवतः। यः खलु परेणाऽनुष्ठीयमानं यागादिप्रत्यक्षेण श्रेयःसाधनं पश्यति। कुतः पुनरस्याऽयमतिशय? इत्यत आह—स चाऽस्यातिशयः स्वाभाविको महत्त्वमिव व्योम्न उपदेशान्तरजः क्रियानिबन्धनो वा कस्यचिदाप्तोपदेशादष्टाङ्गयोगमवगम्य तदनुष्ठानात्तत्परिपाके सति तां तां योगभूमिमधिरूढस्य संप्रज्ञातसमाधिप्रभावादेवाऽयमतिशयो जायते। तस्याऽचिन्तनीयसामर्थ्यत्वात्। यथाह—को हि योगप्रभावादृते अगस्त्य इव समुद्रं पिबतु, स इव दण्डकाऽरण्यं सृजतीति। सोऽयमुभयविधोऽतिशय उपायप्रत्यय उपेयप्रत्ययश्चेत्याख्यायते योगाचार्यैरिति। तस्माददोषः।

तदेवं प्रत्यवस्थितं परं निराकरोति—उच्यते।

अतुल्यकालं सामर्थ्यं कर्म्मणः क्षणभङ्गिनः॥
चिरकालफलायाहु[3]र्न तदध्यक्षमीक्षते[4]।

तदेतद् व्याचष्टे—आशुतरविनाशित्वात् कर्मणः प्रलीयमानकर्म्मलब्धोपजनः। कर्माऽऽनन्तर्यमपि तस्य नास्ति, किमङ्ग पुनस्तत्कालतेत्याह[5]—

---

१. भविष्यत्त्वात् मू० पु०। २. अधिकर्तृणां मू० पु० पा०।
३. फलायातम् २ पु० पा०। ४. इष्यते १ पु० पा०।
५. तत्काल इत्याह २ पु० पा०।

कालाद्यासादितपरिणतिभेद आनन्तर्यमपि कर्म्मणोऽतिवर्तमानः कोऽप्यतिशयः कर्त्तरि कर्म्मणश्चिरभाविनः फलस्य साधनं कथ्यते। तदसौ न कर्म्मकाले वर्तमानः। स्वकाले वर्तमानोऽपि कर्म्मणोऽतिवृत्तत्वान्न कर्मसम्बन्धितयाऽध्यक्षमीक्षते। तदुक्तं "फलसाधनरूपेण तदानीं येन नास्त्यसावि"ति। कर्म्मकाले तस्य भावित्वं तत्काले च कर्म्मणोऽभावः। कथं तर्हि कर्म्मणः साधनत्वं तदन्यसमवायि? तदाहितत्वात्। न हि स्वसमवाय्येव साधनं भवतीति कश्चिन्नियमः। कार्य्याऽनुमेयं तद्यत्र कार्य्यायाऽलं तत्रैव युक्तं तदाहितत्वात्तस्य शक्तिः। न चौपचारिकः कर्म्मणः साधन-

पूर्वपराङ्गाऽग्न्यन्वाधानब्रह्मणतर्प्पणादिना पूर्वोपपादिताऽवस्थान्तरः। एतावताऽप्यसौ नाऽतिशयः, अपि तु देशकालाद्यवस्थाद्यपेक्षाऽऽसादितपरिणतिभेदः। सोऽयमुक्तकारणक्रम आनन्तर्यकर्मणोऽतिवर्त्तमानः किं पुनः समानकालतां कोऽपि कर्म्मणोऽतिशयः[1]। ननु निराधारस्य कार्यस्याऽनुपपत्तेरुत्पत्तिधर्म्मा किमाधारोऽयमतिशय? इत्यत आह—कर्तरि नित्यात्मनि। तत् किं[2] कर्तृस्थः कर्त्तुरेव न किं तु कर्म्मणः ननु कर्मैव फलाय चोदितं तत्साधयतु किमन्तर्गर्भिणाऽपूर्वेणे? त्यत आह—चिरभाविनः फलस्य साधनं कथ्यते वृद्धैः। न हि चिरविनष्टं कर्माऽनुपजनिताऽतिशयभेदं चिरभाविने फलाय कल्पते इत्यर्थः भवत्वेवं प्रकृते किमायातमि?त्यत आह—तदसौ न कर्म्मकाले वर्त्तमानः। अथ सर्वदैव किमवर्त्तमानः? तथा च गगनकमलिनीकल्पः प्रसज्येतेत्यत आह—स्वकाले वर्त्तमानोऽपि। अथ मा भूदसौ कर्मकाले, तत्काले, तु कर्म्म कस्मात्? इत्यत आह—आशुतरविनाशितया तत्काले कर्मणोऽतिवृत्तत्वात्। तस्मात्कर्मतदतिशययोरसमानकालतयाऽतिशयवतोऽत्यन्ताऽवर्त्तमानतया वर्तमानविषयनियतं प्रत्यक्षं न तद्गोचरयियितुमर्हतीत्याह—न कर्मसंबन्धितयाऽध्यक्षमीक्षते। तदुक्तं 'फलसाधनरूपेण तदानीं येन नास्त्यसावि'ति। तदेव स्फुटयति-कर्म्मकाले तस्याऽतिशयस्य उक्तकालक्रमस्य भावित्वं तत्काले च कर्मणोऽभावः।

चोदयति—कथं तर्हि कर्म्मणः साधनत्वं तदपूर्वमन्यसमवायि? परिहरति—तदाहितत्वात्। न हि स्वसमवाय्येव साधनमिति कश्चिन्नियमः। ननु तथाप्यात्मसमवायित्वादात्मन एव कस्मान्न भवतो? त्याह—कार्याऽनुमेयं तदपूर्वं यत्र च कार्यायाऽलं तत्रैव युक्तम्। अयमर्थः। यदि हि तद्रूपमन्यनिरपेक्षमेव गम्यते ततो यत्प्रत्यासन्नमवगम्यते तस्य स्यात् यथा घटस्य शौक्ल्यं, न त्वेतत्तथा, अपि तु कर्म्मणि करणत्वेन फलाय चोदिते

१. विरामः २ पु० पा०। २. आत्मनि किम् २ पु० पा०।

भावः । काष्ठादिषु तथैव सिद्धेः । ननु न तदस्तीति मन्यन्ते । प्रमाणाऽभावात् । न च श्रुताऽर्थापत्तिः प्रमाणम् । फलसम्बन्धे चोदनाप्रामाण्यविघातात् । असिद्धो हि स तदा चोदनातोऽर्थापत्तितः सिद्धिं समासादयतीत्यर्थापत्तिकारणः स्यात् । अन्यथा कर्म्मफलसम्बन्धसिद्धेरर्थापत्तिप्रसङ्गः । सिद्धे तस्मिन्किमन्यदपेक्ष्य तदुपकल्प्यते ? न हि निरपेक्षा । अपेक्षयामपि यागफलसम्बन्धप्रतीतावर्थान्तरं चेदपेक्षेत कथं तदप्रतिपत्तौ तत्प्रतिपत्तिः ?

तदुपपत्त्यैतत्कल्प्यमानं प्रतिपत्तिदशायां कर्म्मसंवद्धमेवाऽवगतम् । न ह्यन्यसंवद्धमेतत्फलसंवन्धमुपपादयति कर्म्मणः । तथाप्रतीयमानमपि चेत्कर्म्माऽपहायाऽन्येन संवध्येत स्वरूपादेव हीयेतेति कर्म्मण्येव तत् । ननु प्रथमं प्रतीयतां नाम कर्म्मसंवन्धः, वास्तवस्तस्य तेन संवन्धो वक्तव्यः । इतरथा तत्प्रतीतेर्मिथ्यात्वप्रसङ्गादित्यत आह—तेन कर्म्मणाऽऽहितत्वात्तस्य कर्म्मणः शक्तिः ।

अपरः कल्पः—कस्मादन्यसमवायि तदपूर्वं न तु कर्म्मसमवायि कल्प्यते ? इत्यत आह—कार्याऽनुमेयं तत्तद्यत्र कार्यायाऽलं तत्रैव युक्तं, न खलु तदाशुतरविनाशि कर्म्माधारं तद्विनाशे विनष्टमामुष्मिकाय फलाय कल्पते । तस्मान्नित्यात्मसमवायीत्यर्थः । यद्यात्मसमवायि तत्तस्यैव शक्तिः न कर्म्मण इत्यत आह—तदाहितत्वात्तस्यैव शक्तिः । न चेत्थमौपचारिकः कर्म्मणः साधनभावः, काष्ठादिषु तथैव सिद्धेः । न खलु काष्ठादीनामपि साक्षाद्व्यक्तिसाधनता, किं त्वौष्ण्याऽपेक्षस्य वह्निसंयोगप्रचयभेदस्य । अथ च काष्ठैः पचन्तीति मुख्यैव साधनता काष्ठानामग्नितन्डुलसमवाय्यपि वह्निसंयोगस्तत्पूर्वं इति तथा यागादीनामपि । कृतोपपादनं चैतद् नियोगपरीक्षायाम् ।

ननु न तदपूर्वमस्तीति मन्यन्ते देवानां प्रियाः । कुतः ? प्रमाणाऽभावात् । न च श्रुताऽर्थापत्तिरेवाऽत्र प्रमाणमिति कथं प्रमाणाऽभावः ? इत्यत आह—न च श्रुताऽर्थापत्तिः प्रमाणम् । कस्मात् ? कर्म्मणः फलसंवन्धे चोदनाप्रामाण्यविघातात् । असिद्धो हि स तदाऽपूर्वकल्पनायाः प्राक्कर्म्मफलसंम्वधश्चोदनातोऽर्थापत्तितोऽपूर्वकल्पनायां सत्यां सिद्धिमासादयतीति तद्भावभावादर्थापत्तिकारणोऽर्थापत्तिप्रमाणकः स्यात् । अन्यथाऽनपेक्षाच्छब्दात् कर्मफलसंवन्धसिद्धेरेव हेतोरर्थापत्तिप्रसङ्गः । उत्तरम् सिद्धे सति कर्मफलसंवन्धे तत्प्रतीत्या किमन्यदपूर्वं विनाऽनुपपद्यमानमपेक्ष्य तदपूर्वमुपकल्प्यते ? न ह्यन्यथाऽनुपपद्यमाने निरपेक्षा प्रतीतिः कल्पनायै प्रभवति । यद्युच्येत यागफलसम्बन्धप्रतीतिरेव नोपपद्यते किमन्येनाऽनुपपद्यमानेनेति ?

नाऽप्रतिपन्नपदार्थो वाक्यार्थो यतः प्रमाणान्तरं चेत् अपेक्षते अनपेक्षत्वं व्याहन्येत। अपि च। श्रुतं वाक्यमनुपपन्नं साऽपेक्षत्वात् 'विश्वजिता यजेते' तिवत् अध्याहार्य्यनिर्देशात्। अर्थो वाऽनुपपन्नः। पूर्वत्र वाक्यशेष-कल्पना। न 'चाऽनुपपत्तिः। स्वर्गकामो यजेते' ति परिसमाप्तेर्वाक्यशेषा-ऽनुपपत्तेश्चाऽपूर्वं कृत्वेति प्राग्यागादपूर्वोत्पत्तिप्रसङ्गः। यागेनाऽपूर्वं कृत्वेति द्विरुच्चारणं यजेः, पूर्वश्च दोषः। उत्तरत्रापि श्रुततया चेदनुपपन्नः, पूर्व एव विकल्पः। स्वभावान्तरेणाऽनुपपत्तौ श्रुतसिद्ध्यर्थमपूर्वकल्पनेत्यसमीचीनम्।

तत्राह—अपेक्षायामपि यागफलसंबन्धप्रतीतौ अर्थान्तरं चेत्स्वोत्पत्तावपक्षेत, तदनुपपन्नम्, कथं हि तस्याऽर्थान्तरस्याऽप्रतिपत्तौ तत्कर्मफलसंबन्धसिद्धेः प्रतीतिः। नाऽप्रतिपन्नपदार्थो वाक्यार्थो यतः प्रमाणान्तरं चेदपेक्षते न त्वर्थान्तरं तत्राह—अनपेक्षत्वं व्याहन्येत। अपि चाऽनुपपत्तिरपि किं वाक्यस्याऽथ तदर्थस्य? इति विकल्पयति—अपि च श्रुतं वाक्यमनुपपन्नं साऽपेक्षत्वात्।

कुतः साऽपेक्षत्वम्? इत्यत आह—विश्वजिता यजेतेतिवदध्याहार्य-निक्षेपात् स्वर्गकामदस्य वाक्यैकदेशस्याऽध्याहार्यत्वं तत्समुदाये वा वाक्ये उपचरितमध्याहारो वाऽस्यास्तीति अध्याहारि स्वर्गकामदं, तस्याऽनिर्देशात्सा-पेक्षत्वमिति द्वितीयपक्षमाह—अर्थो वाऽनुपपन्नः। एवं विकल्प्य दूषयति—पूर्वत्र वाक्यशेषपरिकल्पना स्यात्। न हि वाक्यमपरिपूर्णमतज्जातीयेनाऽर्थेन पूरयितुं शक्यमपि तु शब्देनैवेति लौकिकी स्थितिः। तदेतद्वाक्यं नोपपद्यत इत्यङ्गीकृत्योक्तम्। परमार्थतस्तु—चाऽनुपपत्तिः। कुतः? दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति पदैः स्वार्थाऽभिधानद्वारेण वाक्यार्थप्रतीतेः परिसमाप्तेः। यश्च वृद्धैर्वाक्यशेषः परिकल्प्यतेऽपूर्वं कृत्वेति सोऽप्यनुपपन्न इत्याह—वाक्यशेषाऽनुपपत्तेश्चाऽपूर्वं कृत्वेत्यपूर्वकत्वात्। स्वर्गकामो यजेतेति हि वाक्यादयमर्थः प्रतीयते येन केनचिदपूर्वं कृत्वा यजेत स्वर्गकाम इति। तथा सति प्राग्यागादपूर्वोत्पत्तिप्रसङ्गः। यदि पुनरपूर्वकरणेऽपि यागेनेति सम्बध्येत ततः फलेऽपि तत्संबन्धनीयमिति द्विरुच्चारणं यजेः पूर्वश्च दोषः। न तावद्येनैव यागेनाऽपूर्वं क्रियते तेनैव पश्चात्फलमपि, कर्म्मणो विरम्य व्यापाराऽनुपपत्तेः। अर्थाद्यागान्तरेण। तथा च प्राग्यागात्फलसाधनादपूर्वो-त्पत्तिप्रसङ्ग इति पूर्वोक्तदोषः। उत्तरत्रापि च श्रुततया चेदनुपपन्नो वाक्यार्थः पूर्व एव विकल्पः। तेन सह तुल्यदोषत्वात्। तेनात्रापि च शाब्दतयैवार्थान्तरकल्पनीयं यतः। यदि तु तत्त्वं परित्यज्य स्वभावान्तरेणा-

१. पदार्थकः मू० पु पा०।

ऽनुपपत्तिरास्थीयेत तत्राह—स्वभावान्तरेणाऽनुपपत्तौ श्रुतसिद्ध्यर्थमपूर्वस्य कल्पनेति वृद्धवचनमसमीचीनं स्यात्। सोऽयं देवानांप्रियैः प्रणीतो दूषणगणो देवचूडामणिभिरेव परिहरणीय इत्याचार्येणापि नोदधारि, तत्र के वयं ते तव ममेति तत्रोपक्षीणमतिविभवा इति।

अपि च पौरुषेयत्वे सति वेदानां सर्वज्ञप्रणीततया तदनुविधायिनां तेभ्यः प्रतिपत्तिर्भवेदपि, न पुनरस्ति पौरुषेयता। ननु वाक्यमात्रं पुरुषाऽधीनवचनम्। तथा हि दुर्भणत्वेन वर्णाऽनुपूर्व्यभेदसंबन्धेन विशिष्टेन वा विषयाऽऽनयनादिकार्येण समानात्मानः पौरुषेया अपि पदक्रमास्तेषु तेषु बौद्धाद्यागमेष्वपि प्रतिपन्नपौरषेयत्वेषु दृश्यन्ते। यच्च यस्मादभिन्नस्वभावं न तत्ततो भिन्नहेतुकं यथैकस्मात्कलमाऽङ्कुरादभिन्नस्वभावं कलमाङ्कुरान्तरं तत्समानहेतुकं, तथा लौकिकीभ्यः पदानुपूर्वीभ्योऽभिद्यमानस्वभावा वैदिकाः पदसंनिवेशा इति स्वभावहेतुः। भिन्नकरणत्वाद्धि स्वविरुद्धभिन्नस्वभावत्वव्याप्तात्स्वभावविरुद्धोपलब्धान्निःस्वभावत्वं व्यावर्त्तमानं कारणाऽभेदेन व्याप्यत इति प्रतिबन्धसिद्धिः।

अत्रोच्यते। किं वेदवाक्यानां पुरुषप्रणीतत्वमात्रं साध्यते आहोस्वित् स्वतन्त्रपुरुषप्रणीतत्वमि?ति। पूर्वस्मिन् सिद्धसाधनम्। न खलु वयमपि नित्यत्वेऽपि वर्णानामानुपूर्वीविशेषोपहितसीमपदमभेदवाक्यानामपौरुषेयता[1]माऽऽचक्ष्महे। तथा हि। वर्णानां नित्यतया विभुतया च देशतः कालतो वा न संभवत्यानुपूर्व्यमित्यभिव्यक्त्याश्रयं तद्वक्तव्यम्। सा च पुरुषप्रयत्नयोनिरिति कथं तद्भेदोपहितमर्गादानां गवादिपदानां वेदवाक्यानां च पौरुषेयते? ति। अथ स्वतन्त्रपुरुषप्रणीतत्वं 'मा निषादा'दिवाक्यवत्। प्राचेतसः खल्वत्रभवानादिकविः स्वतन्त्रः, तद्वद्वेदवाक्येष्वपि कश्चिदीश्वरादिरिति साम्प्रतम्। अनैकान्तिकत्वात्। स्वतन्त्रप्राचेतस[2]पुरुषप्रणीतत्वाऽभावात्।

स्यादेतत्। न स्वतन्त्रपुरुषप्रणीतत्वं वेदवाक्यानां साधयामः, अपि तु स्वतन्त्रपुरुषपूर्वकत्वम्। अस्ति चाऽस्मदादिपुरुषप्रणीतेष्वपि 'मानिषादा'दिपदसंनिवेशेषु पारम्पर्येण पुराणस्य कवेः स्वातन्त्र्यमिति नानेकान्त इति। तदनुपपन्नम्। पुरुषप्रणीततामात्रेण कारणाऽभेदेन लौकिकात्पदसंनिवेशाद्वैदिकानामभेदोपपत्तावप्रतीतस्य वेदेषु पुरुषस्वातन्त्र्यस्याऽप्रयोजनकस्य

१. तया पु० पा०।

२. प्राचेतसादिप्रणीतान्मानिषादादिवाक्यात्तत्परतश्चास्मदादिप्रणीतस्य मा निशादादिवाक्यस्याभेददर्शनेपि च स्वतन्त्रताभावात्।

कल्पनानुपपत्तेः (तत्समानसन्निवेशत्वस्य पुरुषपारतन्त्र्येणाऽऽत्यन्तिके नास्ति कश्चिद्विरोधः। येन तद्विपक्षादात्यन्तिकपारतन्त्र्याद्व्यावर्त्तमानं पुरुष-स्वातन्त्र्याऽप्रयोजनकस्य कल्पनाऽनुपपत्तेः)। तत्समानसन्निवेशे च पुरुष-पारतन्त्र्येणाऽऽत्यन्तिकेन नास्ति कश्चिद्विरोधः। येन तद्विपक्षादात्यन्तिक-पारतन्त्र्याद्व्यावर्तमानं पुरुषस्वातन्त्र्येण व्याप्येत। तेन यथा समानमैत्री-जन्मस्वपि मैत्रीतनयेष्वन्नपानविशेषोपयोगनिमित्ता श्यामता केषांचिदेव न सर्वेषामिति तत्तनयतया न श्यामताऽनुमानमेवं विलक्षणप्रयत्नस्थाना-ऽभिघातादिजन्मवाक्यनिष्पत्तेस्तद्भेदाऽभेदाऽनुविधायिभेदाऽभेदो युज्यते न पुनः पुरुषपारतन्त्र्ये तन्त्रीकर्तुमुत्सहते। सोऽयं सन्दिग्धव्यतिरेकतयाऽनैकान्तिको हेत्वाभासः।

यस्तु दर्शनकथन्तासंवोधरहितो यथादर्शनपूजकः प्रमाणयेत् दृष्टानि हि भारतादिवाक्यानि स्वतन्त्रपुरुषप्रणीतानीति वेदवाक्यान्यपि वाक्य-त्वात्तथाविधानीति, स वक्तव्यः, विवादाध्यासितं वेदाऽध्ययनमध्यनान्तर-पूर्वकं वेदाध्ययनत्वादस्मदादिवेदाध्ययनवत्। नैवं भारतादिषु अस्याऽनु-मानम्। तत्र दृढतरेण कृष्णद्वैपायनादिस्मरणेनाऽनुमानस्य वाधेन विधेय-त्वादनुत्पादात्। वेदे तु कर्तृस्मृतिद्रढिमाऽसम्भवात्काठकादिसमाख्यातस्य प्रवचनमिति वचनोपपत्तेरबाधितविषयस्याऽनुमानस्याऽप्रत्यूहमुत्पत्तेः। न च भवदनुमानमस्य विषयबाधे प्रभवति। तस्य सामान्यतोदृष्टसंबन्धात्सा-मान्यशास्त्रस्यैव विशेषशास्त्राद् दुर्बलत्वात्। तथाह—

प्रसिद्धाऽवयवं यत्स्याद्विशेषे वा प्रतिष्ठितम्।
तत्साध्याङ्गकसामान्यदृष्टात्तु वलवत्तरम्॥ इति।

स्यादेतत्। शब्दानामर्थप्रत्यायनस्य पुरुषसङ्केताऽधीनजन्मत्वात्त-त्सम्वन्धा केनचिल्लौकिकसंव्यवहारार्थं शब्दानामर्थैः सम्बन्धान् कृत्वा[1] वेदः प्रणीतः। न चाऽर्थप्रत्यायनं प्रति शब्दानां स्वाभाविकी शक्तिः सङ्केतेन व्यज्यत इति साम्प्रतम्। यदि हि सत्यपि सङ्केते कश्चिद् ध्वनिः कंचनाऽर्थं नाऽवभासयेत् ततः कस्यचित् सङ्केताऽभिव्यक्तसामर्थ्यस्य स्वाभाविकमुप-पद्येत वाचकत्वं, न त्वेतदस्ति। सङ्केतमन्तरेण ध्वनेरर्थरूपस्याऽप्रतिपाद-कत्वात्। सति तु सङ्केते सर्वस्मादपि सर्वार्थप्रत्ययोत्पत्तिदर्शनात्। तद-युक्तम्। अन्तरेणापि सङ्केतमनादिवृद्धव्यवहारदर्शनादभिव्यक्तसामर्थ्येभ्यः शब्देभ्योऽर्थप्रतिपत्तेरुपपत्तेः। सम्बन्धकल्पनायामर्थापत्तिपरिक्षयात्। न च व्यवहारदर्शनमेव सङ्कोच इति साम्प्रतम्। न खल्वेतदनेन शब्देनाऽयमर्थः

१. संबन्धाद्वेदः-२ पू० पा०।

उच्यते—

उपदेशो नियोज्यार्थकर्म्माप्रस्थितचोदना ।
प्रथितो गुरुवैद्यादौ नित्येऽपि न न कल्पते ॥

यद्यप्याज्ञाऽभ्यर्थना वेदेऽनुपपन्नाः, उपदेशस्तु युज्यते । सोऽपि तद्वदेव प्रेरणात्मकश्चतुर्थो लोके प्रज्ञायते । तथा हि—आज्ञाऽभ्यर्थने हि प्रत्येतव्य इत्येवमाकारम्, अपि तु शब्दोच्चारणसमनन्तरप्रवृत्तिनिवृत्तिहर्षाद्याभासम् । तच्च स्वप्रवृत्त्यादिनिवन्धनाऽर्थभेदविषयप्रख्याऽनुमान-[1]द्वारेण शब्दस्य तत्र कारणतायां प्रमाणम् । न च व्युत्पद्यमानास्तदा सङ्केतं सङ्केतस्य कर्त्तारं वा प्रतियन्ति । न चेह सङ्केतं तस्य च कर्त्तारमन्तरेण कस्यचित्परिदृश्यमानस्याऽनुपपत्तिः । ततो नूनं स्वभावतः शब्द एवाऽर्थभेदप्रत्ययस्यहेतुरित्यध्यवस्यति । न च गवादिशब्दानामश्वादौ देवदत्तादिशब्दानां च तत्र तत्र सङ्केताऽधीनतया प्रवृत्तेर्गोत्वादावपि गवादिशब्दाः सङ्केताऽऽयत्तप्रवृत्तय इति शक्याऽनुमानम् । अनादिवृद्धव्यवहारपरम्पराऽभिव्यक्तस्वाभाविकाऽर्थप्रत्ययहेतुभावानां स्वार्थवृत्तेः सङ्केताऽभावेन सह सम्भवादविरोधात् । यथादर्शनपूजकं प्रति तु शक्यमेवं प्रत्यवस्थातुम् । विवादाऽध्यासिताः पुमांसो गवादिपदेभ्यो गोत्वादिषु सङ्केताऽनायत्तप्रतिपत्तयो गवादिपदेभ्यो गोत्वादिप्रतिपत्तिमत्त्वादस्मदादिवदिति । विपञ्चितं चैतद्वृद्धैरिति दिङ्मात्रमत्र सूचितं, क्षन्तव्यं च किञ्चिदुद्ग्रन्थाऽभिधानं सूरिभित्युपरम्यते ।

॥ इति पूर्वकणिका समाप्ता ॥

सिद्धान्तमुपक्रमते—उच्यते ।
उपदेशो नियोज्यार्थकर्माऽप्रस्थितचोदना ।
प्रथितो गुरुवैद्यादौ नित्येऽपि च न कल्पते ॥

तत्र यत्तावदुक्तम् 'अपौरुषेये प्रैषादिर्न धर्मो नाऽवकल्पत इति । तेन यद्याज्ञाऽभ्यर्थनाऽनुज्ञाः प्रतिषिध्यन्ते तदनुजानीमहे एव, उपदेशप्रतिषेधं तु न मृष्यामह इत्याह—यद्यप्याज्ञाऽभ्यर्थनानुज्ञा वेदेऽनुपपन्नास्तस्याऽपौरुषेयत्वेन चेतनस्य नियोक्तुरभावात् । उपदेशस्तु युज्यते । तस्याऽपौरुषेयेऽपि सम्भवात् । न ह्यसौ नियोजकार्थकर्म्मेति वक्ष्यति, येन चेतनकर्तृकः स्यात् । न चासौ न लौकिकोऽप्रेरणात्मको वा, येनाऽविधिः स्यादित्याह—सोऽपि तद्वदेवाऽऽज्ञावदेव प्रेरणात्मकश्चतुर्थो लोके प्रज्ञायते । ननु च यदि प्रेरणात्मकः कथमाज्ञादिभ्यो भिद्यते ? भिद्यते चेत्कथं प्रेरणात्मकः ? इत्यत आह—तथा हि । आज्ञाऽभ्यर्थने हि नियोक्त्रर्थमनादृतनियोज्यफलं कर्म गोचरयतः,

---

१. प्रस्थानुमान । २ पु० पा० ।

नियोक्त्रर्थमनादृतनियोज्यफलं कर्म्मगोचरयतः। नियोज्यार्थं तूपदेशः। अनुज्ञा तु यद्यप्येवं क्वचित्तथापि प्रवृत्तपुरुषविषयत्वान्नोपदेशः। नियोज्यार्थकर्म्मगोचरमप्रवृत्तप्रवर्तनमुपदेशमाचक्षते धीराः। न हि गामभ्याज, माणवकमध्यापय, कुरु यथाऽभिमतमित्युपदेशप्रतीतिः। नापि भैक्ष्यं चरेत्, ज्वरितः पथ्यमश्नीयादित्याज्ञादि[1]प्रतीतिः। भूयसा चैष पौरुषेयेषु कामार्थशास्त्रादिष्वाज्ञादिभिरनारूषितो लोके प्रज्ञायते। गोपालादिवचःसु च मार्गाऽऽख्यानपरेषु-अनेन पथा गच्छेति। न हि हीनस्याज्ञानात्मा[2]र्थे कर्मण्य- नियोज्यार्थं तु कर्मोपदेशो गोचरयति। तदनेनैवोपदेशो नियोज्याऽर्थकर्मेति कारिकार्थो विवृतः।

एतदुक्तं भवति। आज्ञाऽभ्यर्थनोपदेशाः कर्मणि प्रवृत्तिजननेन तद्गोचरयन्तो भवन्ति प्रेरणात्मतया समानास्तेषामाज्ञाऽभ्यर्थनाभ्यां गोचरीक्रियमाणं कर्माऽनादृतनियोज्यप्रयोजनमाज्ञापयितुरभ्यर्थयमानस्य वा प्रयोजनायाऽवकल्पते। उपदेशगोचरस्तु कर्माऽनादृतोपदेशकप्रयोजनमुपदेष्टव्यार्थमेवेत्ययमाज्ञाऽभ्यर्थनाभ्यामुपदेशस्य भेदः प्रेरणात्मकत्वं चेति नियोज्यार्थं कर्म यस्योपदेशस्य न तु नियोक्त्रर्थं स तथोक्त इत्यक्षरयोजना।

ननु यदि नियोज्यार्थकर्मोपदेशः हन्ताऽनुज्ञाऽप्युपदेशः प्रसज्येत। सोऽपि हि क्वचिन्नियोज्याऽर्थकर्मेत्यत आह—अनुज्ञा तु यद्यप्येवं क्वचित्तथापि प्रवृत्तपुरुषविषयत्वान्नोपदेशः। नियोक्त्रर्थंकर्मापि अनुज्ञा भवत्येव। तथा हि। भृत्यस्य प्रभवे हितं चिकीर्षोरप्यस्ति हितकामितया सहसा कुर्वतः प्रभोरभ्यनुज्ञेति क्वचिद्ग्रहणम्। अनेनाऽप्रस्थितचोदनेति विवृतम्। अप्रस्थितस्याऽप्रवृत्तस्य पुंसः प्रस्थापना चोदनेत्यक्षरयोजना। लोकप्रसिद्धोऽयमीदृश उपदेश इति कुत ? इत्यत आह—नियोज्याऽर्थकर्मगोचरमप्रवृत्तप्रवर्त्तनमुपदेशमाचक्षते धीराः। न चाऽऽख्यानमात्रमवगतिरप्याज्ञादिविलक्षणोपदेशालम्बनाऽस्तीत्याह—न हि गामानयेत्याज्ञायां माणवकमध्यापयेत्यभ्यर्थनायां कुरु यथेहितमित्यनुज्ञायामुपदेशप्रतीतिः। नापि भैक्ष्यं चरेज्ज्वरितः पथ्यमश्नीयादित्याज्ञादिप्रतीतिः। न चाऽस्योपदेशस्य क्वचित्कथंचिदवगतिः, भूयसा प्रकारेण सर्वत्राऽवगतेरित्याह—भूयसा चैव पौरुषेयेषु कामाऽर्थशास्त्रादिष्वाज्ञादिभिरनारूषितो लोके प्रज्ञायते। शास्त्रकारा हि नैसर्गिकवैनयिकबुद्ध्यतिशयसंपन्ना लौकिकाः न केवलं शास्त्रेषु निकृष्टबुद्धिवचनेष्वपीति प्रसिद्धतरत्वमाह – गोपालादिवचस्सु च मार्गाऽऽख्यानपरेष्वनेन पथागच्छेति। अथैतदाज्ञादीनामन्यतमत्कस्मान्न भवति ? इत्यत आह—न हि

---

1. **दितिप्रतीतिः मू० पु० पा०।** 2. **त्माख्ये मू० पु० पा०।**

भ्यर्थनानुज्ञानमप्रवृत्तस्य। अत एव चोपदेशः। इत्याज्ञादिभ्यो भेदेन तस्य प्रतीतत्वात्तस्य ज्ञानमुपदेश इति ततो भिन्न उपदेशशब्देन दर्शितः। भवतु ततो भिन्नः, कः पुनरसौ? ननूक्तमुपदेश इति विशिष्टस्य शब्दस्योच्चारणम्। यद्येवमव्युत्पन्नस्यापि प्रवृत्तिप्रसङ्गः। उच्यते—

विशिष्टः पुरुषार्थस्य शुद्धस्योपायमाह यः।
पुरुषार्थो यदा येन यो नरेणाऽभिकाङ्क्ष्यते॥

पुरुषार्थस्योपायमनवगतमवगमयन्नुत्कर्षाद्विशिष्टः शब्द उक्तः। अन्यथा सर्व एव शब्दः शब्दान्तराद् भिन्न इति अविशेषणमेव स्यात्। अतो

हीनस्याऽज्ञानात्मार्थे कर्मण्यभ्यर्थनाऽनुज्ञानमप्रवृत्तस्य। यत एव तद् गोपालवचोऽत एव प्रसक्तानामाज्ञादीनां प्रतिषेधादन्यत्रोपाख्यानादावप्रसङ्गाच्छिष्यमाणे संप्रत्यय इत्याह—अतएवोपदेशस्तत एव चाऽयमपौरुषेयेऽपि सम्भवतीति सत्रकारेण दर्शित इत्याह—इति तस्मादाज्ञादिभ्यो भेदेन लब्धप्रतीतित्वात्तस्य ज्ञानमुपदेश इति तत आज्ञादिभ्यो भिन्न उपदेशो दर्शितः। भवतु ततो भिन्नः, कः पुनरसौ? समानाऽसमानजातीयव्यवच्छेदकमस्य वाच्यमित्यर्थः।

ननु चोक्तं भाष्यकृता उपदेश इति विशिष्टस्योच्चारणं विशिष्टस्येति वदता शब्दस्य रूपगतो विशेष उक्तः। स च प्रत्यक्षशब्दवर्त्तितथा प्रत्यक्ष इति प्रथमश्राविणोऽपि प्रवृत्तिप्रसङ्ग इत्याह—यद्येवमव्युत्पन्नस्यापि प्रवत्तिप्रसङ्गः। न प्रत्यक्षं व्युत्पत्तिमपेक्षत इत्यर्थः। उच्यते—

विशिष्टः[1] पुरुषार्थस्य शुद्धस्योपायमाह यः।
पुरुषार्थो यदा येन यो नरेणाऽभिकाङ्क्ष्यते॥

शब्दगतो विशेषः प्रतिशब्दं समवायादप्रयोजक इत्यर्थगतेन हेतुना विशेषेण विशिष्टः शब्द उक्तः। स चाऽयमर्थगतो विशेष इत्याह—पुरुषार्थस्योपायमनवगतमवगमयन्नुत्कर्षाद्विशिष्टः शब्द उक्तः। अन्यथा सर्वः शब्दः शब्दान्तराद्भिद्यत इत्यविशेषणमेव स्यात्। अनवगतमित्यनुज्ञाया व्यवच्छिनत्ति। यतश्चाऽर्थविशेषेणोपदेशता शब्दस्य तस्य च नाऽनवगतसङ्गतिना पुरुषेण प्रतीतिः अतोऽपि व्युत्पत्तेरपेक्षेत्याह—अतो नाऽविदितार्थस्य प्रथमश्राविणः पुरुषस्योपदेशात्प्रवृत्तिः ननूपदेशो विधिः, स चाऽर्थभेदाऽभिधायकः शब्द इति क्वचित्क्वचिदुच्चारणमाह शब्दस्योच्चारणमिति। क्वचिदर्थम्, विध्युद्देशेनैकवाक्यत्वादिति। क्वचिद्वचनं चोदनेति।

१. विशिष्टम् पु० पा०।

नाऽविदितार्थस्य प्रवृत्तिः। प्रदर्शनार्थं चेदम्। अतोऽर्थशब्दाऽभिधोच्चारणादिज्ञानं च कर्म्मकर्तृकारणभावसाधनेनोपदेशशब्देनोच्यते प्रेषणादिवत्। तैरपि हि यथाविवक्षितमर्थादयो निर्दिश्यन्ते। अर्थस्तर्हि प्रवर्त्तकः। सत्यं, शब्दोऽपि, तत्प्रतिपादनात्। कथं तर्ह्यङ्गोपदेशः? अपेक्षितो ह्यर्थः पुरुषाऽर्थः। अन्यथा ग्रामादिरपि न तथा स्यात्। अपेक्षितश्चोपदिष्टसाधनाऽनुग्रहः। ननु लिङादिभ्यः प्रवर्त्तनाऽवगम्यते। पराहतं चेदम्

क्रियायाः प्रवर्तकं वचनमिति। क्वचित् ज्ञानं शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमिति। वार्तिककारश्चाऽभिधाभावनामाहुरित्यभिधामिति। अत आह—प्रदर्शनार्थं चेदं, विशिष्टः शब्दो विधिरिति। अतोऽर्थशब्दाऽभिधोच्चारणादिज्ञानं च कर्मकर्त्तृकरणभावसाधनेनोपदेशशब्देन यथायथमुच्यते। तेषु तेषु शास्त्रप्रदेशेषु चोदनाविधिशास्त्रशब्दा उपदेशशब्दा एवेत्यर्थः। अत्रैव लौकिकं निदर्शनमाह—प्रेषणादिवत्। कथमेतन्निदर्शन मि?त्यत आह—तैरपि हि प्रेषणादिशब्दैः कर्मकरणसाधनैर्यथाविवक्षमर्थादयो निर्दिश्यन्ते। यद्यर्थभेदाऽभिधायित्वेन उत्कर्षः तर्हि प्राप्ताऽप्राप्तविवेकेनाऽर्थ एव प्रवर्तको न शब्द इति चोदनालक्षणोऽर्थो धर्म इति शास्त्रकृद्ववचनव्याघातः प्रसज्यत इत्याह—अर्थस्तर्हि प्रवर्तकः।

परिहरति—सत्यं, शब्दोपि प्रवर्तकस्तत्प्रतिपादनात्। अयमभिसन्धिः। न तावत्साक्षादपेक्षितोपायताऽपि प्रवृत्तिहेतुः, तस्याः प्रवृत्तेः प्रागभावादपि तु स्वज्ञानेन प्रवर्त्तयतीति तत्र शब्देनैव जन्यत इति यथाऽर्थस्तद्विषयत्वात्प्रवर्तकस्तथा शब्दोऽपि तज्जनकत्वादित्यविशेषः। तथा च न व्याघातः। एतेन पूर्वार्धं कारिकाया व्याख्यातम्। अत्र च पुरुषार्थस्येति पुरुषो नियोज्योऽभिमतः शुद्धस्येति नियोज्यार्थस्यैव न नियोक्त्रर्थस्येत्यर्थः। ननु यदि पुरुषार्थोपायाऽभिधायी शब्द उपदेशः, कथं तर्ह्यङ्गोपदेशः? न खल्वङ्गानि पुरुषार्थसाधनानि, अपि तु क्रत्वर्थानि। परिहरति—अपेक्षितो ह्यर्थोऽत्र पुरुषार्थो, न हि जात्या कश्चित्पुरुषार्थो व्यवस्थितः। अन्यथा ग्रामादिरपि न तथा स्यात्। तस्यापि स्वयमसुखवत् कदाचित्कथंचिदिष्यमाणत्वाच्चेन्न तर्हि जात्या पुरुषार्थत्वम्। यथाह न्यायवादी 'सोऽयं प्राण्यर्थोऽपरिसंख्येयः प्राणभृद्भेदस्याऽपरिसंख्येयत्वा[1]दिति। न चाङ्गकार्यं प्रति जात्यैवाऽपेक्षा नास्ति पुरुषाणामित्याह—अपेक्षितश्चोपदिष्टसाधनस्य श्रेयःसाधनाऽनुग्रहः। अननुग्रहे साधनवैगुण्येन श्रेयसोऽजननात्।

---

१. प्रमादि १ पु० पा०।

उपदेशो नियोज्यार्थकर्मा[1] प्रस्थितचोदनेति । नेदं पराहतम्[2] । तथा हि—

पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥

प्रवृत्तिसमर्थो हि कश्चिद्भावाऽतिशयो व्यापाराऽभिधानः प्रवर्त्तना । सा च क्रियाणामपेक्षितोपायतैव । न हि तथात्वमप्रतिपद्य तत्र प्रवर्त्तते

अत्र चोदयति—ननु लिङादिभ्यः प्रवर्तनाऽवगम्यते । अन्यथा तच्छ्राविणः प्रवृत्त्यनुपपत्तेः । न पुनः पुरुषार्थोपायता । न खलु भूतार्थप्रतीतिः प्रवृत्तिहेतुः । पराहतं चेदमुपदेशो नियोज्यार्थकर्माऽप्रस्थित[3]प्रचोदनेति । यदि हि नियोज्यप्रयोजनं कर्मभूतमाहुः कथमसावप्रवृत्तप्रवर्त्तना ? सेयं पराहतिः । नेदं पराहतं पराहतिपरिहारेण सर्वं परिहृतं भवतीत्याशयः । कुतः ? तथा हि—

पुंसो नेष्टाऽभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।

प्रेक्षावतां हि कायवचनचेष्टे प्रयत्नपूर्विके, प्रयत्नश्च रागपूर्वः, सुखानुशयी च रागो न दुःखे नाप्यसुखे[4] भवितुमर्हति, द्वेषादुपेक्षणाच्च । क्रिया च दुःखेत्यनुभवो लोकस्य । सा यदि सुखसाधनमपि न स्यान्नाऽस्यां सुखार्थिनः प्रवर्त्तेरन् । चैते उपायाः साक्षात् सुखे प्रवर्त्तितुमीशते इति प्रेक्षावद्व्यापारोपरमप्रसङ्गः । तस्माद् दुःखरूपासु क्रियासु सुखसाधनतैवेच्छोपहारमुखेन प्रवर्त्तयति । स्वविज्ञानेन चाऽसाविच्छां प्रवृत्तिहेतुमुपहरतीत्युक्तम् । यदि पुनः शब्दः सुखसाधनतां न प्रतिपादयेन्न क्रियायां पुरुषं प्रवर्त्तयेत् । ननु तथापीष्टसाधनतामात्रं शब्देन प्रतिपादितं, कुतः पुनरतः प्रवर्त्तनाप्रत्ययः ? इत्यत आह—

प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ॥

तद् व्याचष्टे—प्रवृत्तिसमर्थो हि कश्चिद्भावाऽतिशयो व्यापाराऽभिधानः प्रवर्त्तना । अयमर्थः । न वयं परिस्पन्दमेवैकं व्यापारमाचक्ष्महे, येनाऽस्पन्दनात्मनः समीहितसाधनताया अप्रवर्त्तनात्मत्वेन पर्यनुयुज्येमहि, अपि तु भावधर्म एव कश्चित्समीहितसाधनाऽनुगुणो व्यापारपदार्थः । तद्यथा आत्मनो बुद्ध्यादिजननप्रवृत्तस्य मनःसंयोग एवाऽयं भावधर्मः[5] । तद्वदत्रापि स्पन्दस्तदितरो वा भावधर्मः प्रवृत्तिजननाऽनुकूलतया व्यापारविशेषः प्रवर्तना । न चाऽसौ शब्दस्तद्भावना चेत्याह—सा च क्रियाणामपेक्षितोपायतैव । कुतः ?

१. मर्माप्त मू० पु० पा० । २. परिहृतम् मू० पु० पा० ।
३. कर्माप्रस्थित । ४. असुखदुःखे १ पु० पा० ।
५. संयोगस्तत एवायं धर्मः २ पु० पा० ।

कश्चित् । याप्याज्ञा[1]दिभ्यः प्रवृत्तिः सापि कथं चिदपेक्षितनिबन्धनत्वमुपाश्रित्यैव । अन्यथाऽभावात् । ननु कर्त्तव्यमिति प्रतिपत्तेः प्रवृत्तिः । कथं

न हि तथात्वमपेक्षितोपायत्वमप्रतिपद्य तत्र क्रियासु प्रवर्त्तते कश्चित् । नन्वनपेक्षितोपायेऽप्याज्ञया राज्ञः प्रवर्त्तन्ते प्रेक्षावन्त इति कथमपेक्षितोपायतैव प्रवृत्तिहेतुः ? इत्यत आह—याप्याज्ञादिभ्यः प्रवृत्तिः साऽपि कथंचिदपेक्षितनिबन्धनतामुपाश्रित्यैव । यद्यप्याज्ञादयो नियोक्त्रर्थकर्माणस्तथापि तद्विषयसंपादनस्य कथंचिन्नियोज्याऽपेक्षितनिबन्धनत्वमप्यस्ति । तथा हि । तत्संपादनपरितोषित आज्ञापयिता समीहितमस्मै प्रयच्छति अहितं वा न विधत्ते । तदिदमपेक्षितमुपाश्रित्य भृत्यस्य प्रवृत्तिः । कुतः पुनरेतदि?त्याह—अन्यथा तदनुपाश्रये प्रवृत्तेरभावात् न खलु यस्य यो न हिताऽहितप्राप्तिपरिहाराभ्यां यतते स तदाज्ञामनुरुध्यते । न चैतावतोपदेशस्याऽऽज्ञादिभिरविशेषः, तेषां नियोजकाऽर्थसमुद्देशेन प्रवृत्तेरानुषङ्गिकत्वान्नियोज्यार्थस्योपदेशस्य तद्वैपरीत्यात् । तस्माल्लिङादिभ्यः प्रवर्तनाऽवगतिरुपपन्नाऽनुपपन्ना च पराहृतिरिति ।

अत्र केचिदाम्नायं प्रति श्राद्धमानिनः प्राहुः । ननु कर्त्तव्यमिति प्रतिपत्तेः प्रवृत्तिः । इदमाकूतम् । कार्यदर्शनोन्नेयव्यापृतयः खल्वमी लिङादयः । कर्यं च प्रवृत्तिलक्षणं वृद्धानां लिङादिश्रवणसमनन्तरमुपलभ्यते । तच्च बुद्धिपूर्वकं, स्वतन्त्रप्रवृत्तित्वात् अस्मत्प्रवृत्तिवत् । अनुमिता च बुद्धिरस्मत्प्रवृत्तिहेतुबुद्धिगोचरचारिणी प्रवृत्तिहेतुबुद्धित्वात् अस्मत्प्रवृत्तिहेतुबुद्धिवदिति । तस्याश्च विषयं स्वयमेव चक्षुरुन्मील्य पिण्डिकरोगं[2] परित्यज्य पर्यालोचयन्तः शब्दव्यापारपुरुषाशयतत्समीहिततत्साधनताव्युदासेन कर्त्तव्यतामेव प्रतिपद्यामहे । तथा हि । स्तनपानादावपि न जातु समीहितोपाय इत्येव प्रवृत्ताः स्मः, किं तु कर्त्तव्यमेतदिति । अतीते वर्त्तमानेऽनागते च सामुद्रविदाख्याते एतत्ते भवितेतिवत्कर्त्तव्यतात्मना प्रवृत्तेः । तदवगमे च तदात्मनि प्रवृत्तेः कर्त्तव्यतैव प्रवृत्तिहेतुरिति लिङादिश्रवणाऽनन्तरा प्रवृत्तिः कर्त्तव्यताऽभिधानमेव लिङादीनामापादयति । तथा च विदितसङ्गतितया लिङादयो वेदेऽपि तामेवाऽभिदधते । एतावांस्तु भेदो लौकिकवचसः प्रमाणान्तराऽपेक्षप्रवृत्तित्वादपेक्षितोपायताप्रतीतिपुरःसरत्वाच्च दुःखरूपक्रियाकर्त्तव्यताऽवगतेरपेक्षितोपायतां तत्प्रमाणभूतामन्तर्भाव्य कर्तव्यताऽवगतिः । अपौरुषेयस्तु वेदो न स्वार्थे प्रमाणान्तरमपेक्षत इत्यपेक्षितो-

१. यद्यप्याद्या मू० पु० ।

२. चक्षुषो निमील्य डिण्डिधरोगम् २. पु० पा० ।

हि तथा प्रतिपद्यमानो न प्रवर्त्तेत ? यो हि स्वर्णमुपलभ्य मृत्तिकेत्याह कस्तस्योत्तरं दद्यात् ? कः पुनरयमर्थः कर्त्तव्यमिति ? न कश्चित्। प्रतिभा। का पुनरियम् ? नियतसाधनावच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा[1] प्रतिभाक्रियाविषयत्वे हि क्रियाप्रतीतिः स्यात्। सा च प्रवृत्तिहेतुः।

पायताऽवगमनिरपेक्ष एव कर्त्तव्यताऽवगमहेतुः। तथा च सा वेदादवगम्यमानाऽनुष्ठातारमधिकारिणं नियोज्यमपेक्षते, न पुनः साध्यमस्या एव, ताद्रूप्यात्। नियोज्यश्च यत्र साध्यविशिष्टो भवेत् तत्र साध्यबुद्धिर्यथा स्वर्गकामो यजेतेति। यत्र त्वसौ निमित्तवान्यथा यावज्जीवमिति निषिध्यमानक्रियाकर्त्ता वा यथा न कलञ्जं भक्षयेदिति तत्र भगवानाम्नाय एव निरस्ताऽखिलदोषाशङ्को भावार्थविषयं नञर्थविषयं वा कार्यं हिताऽहितसाधनताऽवगमनिरपेक्षोऽवगमयन्प्रवृत्तिं निवृत्तिं वा विधत्त इति किमपेक्षितोपायतयेति।

नन्वपेक्षितोपायतामन्तरेण कर्त्तव्यमिति शतशोऽप्यभिधीयमानं न प्रवृत्तये कल्पत इत्यत आह—कथं हि तथा प्रतिपद्यमानो न प्रवर्त्तेत ? शब्दस्तावत्कर्तव्यतायां विदितसङ्गतिस्तामवगमयति। तथा नैमित्तिकनिषेधाऽधिकारयोरसौ प्रतीयमाना न शक्या नेति वक्तुम्। न चाऽपेक्षितोपायतानिवृत्तौ तस्या अपि निवृत्तिरिति साम्प्रतम्। सा हि तस्यां न प्रमाणम्। न चैकप्रमाणनिवृत्तौ प्रमाणान्तरेण प्रतीयमानं तदेव निवर्त्तितुमर्हति। न हि संतमसे द्रव्यं चक्षुषा न गृह्यते इति न त्वचा व्यवस्थाप्यते। न च निमित्तान्तरं नैमित्तिकाऽपूर्वं न कर्त्तव्यं प्रेक्षावता। असुखत्वे सति हिताऽहितप्राप्तिपरिहाराऽनुपायत्वात् काकदन्तपरीक्षावदित्यनुमानं सम्भवति। आम्नायजन्मना कर्तव्यताबोधेन बाधितविषयत्वात्। तदाह—यो हि स्वर्णमुपलभ्य मृत्तिकेत्याह कस्तस्योत्तरं दद्यात् ? तस्मादनपेक्षादाम्नायात् कर्त्तव्यताऽवगताऽनुष्ठान[2]माक्षिपत्येव। अन्यथा तत्त्वाऽनुपपत्तेः। तस्यास्तन्नान्तरीयकत्वात्। तस्मात्सूक्तं कथं हि तथा प्रतिपद्यमानो न प्रवर्त्तेत।

ननु यदि न हितसाधनता कर्त्तव्यता तर्हि तदर्थतत्त्वं वाच्यम्, न च तदस्तीत्याशयवान्सिद्धान्ती पृच्छति—कः पुनरयमर्थः कर्त्तव्यमि?ति। तत्रान्तरे पूर्वपक्ष्येकदेशी प्राह—न कश्चित्। नन्वेवमसदर्था कर्त्तव्यतावगतिरप्रमाणम्। अप्रमाणं च न व्यवहाराय कल्पत इत्यत आह[3]—प्रतिभा। ननु व्यभिचारादर्था[4]निश्चयात्मकमनैकान्तिकलिङ्गप्रसूतं संवेदनं प्रतिभेति

१. प्रज्ञा प्रतिभा पु० पा०। २. कर्तव्यताऽनुष्ठानं २ पु० पा०।
३. इत्याह पु० पा०। ४. दर्थम पु० पा०।

अप्रमाणं न व्यवहाराङ्गम् । संशयविपर्ययौ हि तथा । न हीदमित्थमनेन कर्तव्यमिति अनुपजातप्रतिभाभेदः प्रवर्तते प्रत्यक्षाद्यवगतेऽप्यर्थे । तत्र हि प्रमाणकार्य्यसमाप्तिः । प्रतिभानेत्रो हि लोक इतिकर्तव्यतासु समीहते ।

प्रतिभाविदः। न चाऽनिश्चयात्मकं विज्ञानं व्यवहाराङ्गं भवतीत्याशयवानाह—का पुनरियम् ? एकदेशिन उत्तरं—नियतसाधनाऽवच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञेति । न हि ते प्रतिभाविदः, ये संवेदनमनिश्चयात्मकं प्रतिभामाचख्युः । संशयो हि सः । वयं तु साध्यसाधनेतिकर्त्तव्यताऽवच्छिन्नायाः क्रियायाः प्रतिपत्तावनुकूलां तत्प्रतिपत्त्या कार्येऽनुष्ठानलक्षणे कर्त्तव्ये सहकारिणो कर्त्तव्यमिति प्रज्ञां प्रतिभामध्यगीष्महि । एवं तर्हि क्रियैऽवास्या विषय इति न निर्विषयेत्यत आह—प्रतिभाक्रियाविषयत्वे हि क्रियाप्रतीतिः स्यात् । सा च त्रैकाल्याऽवच्छिन्नक्रियागोचरा । यथा पचति पक्ष्यत्यपाक्षीदिति । इयं पुनरतीताऽनागतवर्त्तमानानामन्यतमेनाप्यनवच्छिन्नमद्भुतार्थमिव प्रतिभासयन्तो प्रज्ञा । न पुनरस्याः परमार्थसद्विषयः, कालत्रयरहितत्वात् खपुष्पवत् । न खलु कुर्यामिति वर्त्तमानाख्या, करोमीत्यविशेषप्रसङ्गात् । नाऽनागता, करिष्यामीति । नाऽतीता, अकार्षमिति । तदेषा न प्रमाण[1]मसद्विषयत्वान्न संशयः एकान्ताऽवसायान्न विपर्ययः सर्वेषां सर्वत्र व्यवहारदर्शनात् । अत एव चित्तवृत्ति तामिमामाचक्षते विकल्परूपामाचार्याः 'शब्दज्ञानाऽनुपाती वस्तुशून्यो विकल्प' इति वदन्तः ।

ननूक्तमप्रमाणं प्रतिभा कथं व्यवहारं प्रवर्तयेदि?ति, अत आह—सा च प्रवृत्तिहेतुः । कुत एतदप्रमाणं न व्यवहाराङ्गमि?ति । संशयविपर्ययौ हि तथा । प्रतिभा पुनस्ताभ्यामन्या व्यवहारं प्रवर्तयतीत्यभिप्रायः । तत्किमन्यतामात्रेण प्रवृत्तिहेतुः ? नैवमिति, तदन्वयव्यतिरेकाऽनुविधानात्प्रवृत्तिभावाऽभावयोः । तत्र व्यतिरेकं तावदाह—न हीदमित्थमनेन कर्तव्यमित्यनुपजातप्रतिभाभेदः प्रवर्तते प्रत्यक्षाऽवगतेप्यर्थे । ननु प्रत्यक्षादेरेव हानोपादानोपेक्षाः फलमिति किमर्थं प्रतिभा? इत्यत आह—तत्र हि प्रमाणकार्यसमाप्तिः । प्रमाणानां हानादिलक्षणं कार्यं तत्प्रतिभाभेदे सति समाप्यते नाऽन्यथा । तेन हानादिक्रियासु प्रवृत्तानि प्रत्यक्षादीनि काष्ठानीव पाके ज्वलनं प्रतिभारूपमपेक्षमाणान्यपि नाऽकारणमित्युक्तं भवति । अन्वयमिदानीमाह—प्रतिभानेत्रो हि लोक इतिकर्तव्यतासु समीहते । इतिकर्त्तव्यतास्वनुष्ठानेषु कायवचनचेष्टासु समीहते प्रयतते कार्यमिति प्रतिभासाधनो हि लोक इत्यर्थः । तदनेन क्रियाप्रतिपत्तावानुकूल्यं प्रतिभासु दर्शितम् । नन्वयं विकल्पः, स च शब्द-

१. प्रमाणम असविषयत्वान्न पु० पा० ।

किं पुनरस्या निमित्तम्? शब्दः। तत्र व्युत्पन्नानां साक्षाद्भावनामुखेन वाऽप्रसिद्धशब्दनिबन्धनव्यवहाराणां बालादीनामनादिशब्दभावना। अन्यथा आद्यकरणविन्यासाद्यसम्भवात्। यथोक्तम्।

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम्।
स्थानानामभिघातश्च न विना शब्दभावनाम्॥

ज्ञानाऽनुपातीति तद्विदः। न च प्रतिभा शब्दज्ञानमनुपतति। बालादीनां तदभावेन तदनुत्पादादप्रवृत्तिप्रसङ्गात्। तस्मान्निमित्तान्तरं वाच्यम्, न च तदस्तीत्याशयवानाह—किं पुनरस्या निमित्तम्? उत्तरं—शब्दः[1]। तत्र ये तावद् व्युत्पन्नास्तेषां प्रतिभायाः साक्षाद्भावनामुखेन वाऽप्रसिद्धशब्दनिबन्धनव्यवहाराणां बालादीनाम्।

नन्वियं पट्वभ्यासाऽऽदरप्रत्यययोर्निर्भावनानाऽसति पूर्वाऽनुभवे भवितुमर्हति, अनुभवोऽप्यविदितसंबन्धशब्दविज्ञानजन्मा नास्ति। नाऽस्मिन जन्मनि बालादीनां प्राग्भवीया तु भावना सर्वसंस्कारच्छिदः प्रयाणात् ध्वंसतेस्मेति न सम्प्रतितनीं प्रतिभां भावयेत्, भावने वा जात्यन्धबधिरादयस्तज्जन्माऽनुभूतानिव जन्माऽन्तराऽनुभूतान् रूपशब्दादीनपि व्याचक्षीरन्नित्यत आह—अनादिशब्दभावनाऽवश्याऽभ्युपेतव्या। कुतः? आद्यकरणविन्यासादीनामन्यथाऽसंभवात्। यथोक्तं प्रतिभाविद्भिः।

आद्यः करण[2]विन्यासः प्राणस्योर्ध्वं समीरणम्।
स्थानानामभिघातश्च न विना शब्दभावनाम्॥

जातमात्रः खल्वयं बालकः पित्रा मुखहुते मधुसर्पिषी जिह्वया लेढि, सोऽयमाद्यः करणविन्यासः। प्राणांश्चोर्ध्वं समीरयति यच्छ्वसतीत्युच्यते। अपि चोदीरितेन वायुना हृदयादीनि स्थानान्यभिहन्ति यतः शब्दभेद आविरस्ति। तदेतत्सर्वं प्राग्भवीयशब्दभावनाविजृम्भितम्। अत्र प्रयोगः, बालानामेवंविधा चेष्टा कर्त्तव्यताऽवगतिपूर्विका स्वतन्त्रचेतनप्रवृत्तित्वाद्या या स्वतन्त्रचेतनप्रवृत्तिः सा सा कर्तव्यताऽवगतिपूर्विका यथाऽस्मदादीनाम्। तथा विवादाध्यासिता कर्तव्यताऽवगतिः शब्दयोनिः कर्त्तव्यताऽऽकारत्वात् यो य एवमाकारः स सर्वः शब्दयोनिर्यथाऽस्मदादीनाम्। स च शब्दः साक्षादनुपलभ्यमानो भावनामुखेनाऽधिकरणसिद्धान्तन्यायेन करणभावमापद्यते। भावना च यथाकार्यदर्शनोन्नेया यावत्कार्यदर्शनं व्यवस्थाप्यत इति न जात्यन्धबधिरादीनां जन्मान्तराऽनुभूतरूपादिव्याख्यानप्रसङ्गः।

---

१. **निमित्तं शब्दः** २ पु० पा०। २. **कारण** २ पु० पा०।

विच्छिन्नप्रतीतीनामपि च पदार्थानां किं कथमनुसन्धीयेत, विचारविकलाऽप्रत्यवमृष्टपूर्वशक्तिः समाविष्टपूर्वशक्तिप्रतिभासेवोदीयमानोपश्लेषं

व्युत्पन्नानामपि शब्दभावनायोनिरस्ति प्रतिभेत्याह—विच्छिन्नप्रतिपत्तीनामपि च पदार्थानां किं कथमनुसंधीयत इति विचारकल्पनाप्रत्यवमृष्टपूर्वशक्तिः समाविष्टपूर्वशक्तिप्रत्यवभासेवोदीयमानोपश्लेषं विदधाति। अयमर्थः। संतापतप्ततनवो हि शीतह्लददर्शनमात्रादप्सु मिमङ्क्षवः प्रवर्त्तन्ते, नान्तरा विचारयन्ति। दृश्यमानह्लदगता आपस्तापमपनेतुं समर्थाः सति शिशिरभावे तोयत्वाद्यतोयं शिशिरं तत्तत्सर्वं तापाऽपनोदनसमर्थं यथा गङ्गातोयम्, वयं च तप्तास्तदिह तत्प्रशमनाय निमज्जाम इति। न चैतेषां परस्परोपश्लेषमन्तरेण कर्त्तव्यता। न वास्यामसत्यां स्वतन्त्रचेतनप्रवृत्तिः। न चोपश्लेषे समुदाचरद्वृत्ति किंचित्प्रमाणमस्ति। तस्मादसंविदितरूपा शब्दभावनैव इदमित्थमनेन कर्त्तव्यमिति प्रतिभाहेतुरास्थेयः। न चैवं वाच्यं, प्राग्भवीयं तज्जन्मजं वा यत्र यत् प्रतिभाति तत्र तद्भावनाबीजमस्तु, किं शब्देने? ति। आनुमानिकाऽनुभवजन्मनो भावनाया भूतार्थगोचरत्वेन कर्त्तव्यताऽऽकारप्रतीत्यकारणत्वात्। कर्त्तव्यताकाररहितस्य चाऽत्रोपश्लेषमात्रस्य प्रतीतेः। अत्र किं कथमनुसंधीयते इति विचारविकलेति अनुमानबीजभूतानां धर्मिस्वरूपदर्शनतद्धर्मसंदेहजिज्ञासापक्षहेतुधर्मपरामर्शप्रमाणान्तराबाधानामभावं सूचयति। अप्रत्यवमृष्टपूर्वशक्तिरिति व्याप्तिस्मरणाऽभावमाह। न जातु गृहीतव्याप्तिरपि तस्या अस्मरन्ननुमातुमर्हति।

ननु न यदि पूर्वशक्तिपरामर्शः किमिति तापदूनं शिशरह्लदाऽवगाहने प्रवर्त्तयेन्न दहनज्वालाकलापाऽऽलिङ्गने? एतन्निराकरोति—समाविष्टपूर्वशक्तिप्रत्यवभासान्नेदमनुमानं येन पूर्वशक्तिपरामर्शमपेक्षते, अपि तु स्वकारणात्पूर्वशक्त्याकारोपजायमाना क्वचित्प्रवर्त्तयति क्वचिन्न। ननु यदि पूर्वशक्त्यवभासा प्रतिभा तर्हि पूर्वैव शक्तिरस्या विषय इति न निर्विषयेति, एतन्निराकरोति—इवेति। न तु सैव। तथा हि। कर्त्तव्यतावभासा प्रतिभा पूर्वशक्तिमपि तदवच्छेदकतया गोचरयति, कर्तव्यता च न परमार्थसतीति तदवच्छेदेन प्रतिभारूढेनात्मना शक्तिरप्यवस्तुसती। स्वरूपेण तु सत्त्वमप्रयोजकं प्रतिभायामनारोहात्। सेयमेवंविधा प्रतिभा भावानामुपश्लेषं विदधाति। कुतः? तादर्थ्यात्प्रवृत्त्यर्थत्वादस्याः।

ननु भवतु प्रवृत्त्यर्था भावना[1], उपश्लेषविधानादित्यत आह—अनुपश्लेषे तदभावात्। विशिष्टार्थप्रतिपत्तिनिबन्धनो व्यवहारोऽनविच्छिन्न-

१. भावना विना का० पा०।

विदधाति। तादर्थ्यादनुपश्लेषे तदभावात्। दुर्ज्ञानोपायेषु च प्राज्ञैरपि स्वरविशेषाश्रयभेदेषु पक्षिणां पूर्वं शब्दभावनाऽनुगमात्प्रत्युत्पन्नशब्दव्यापारा[1] प्रतिभा प्रवृत्तिनिबन्धनं, नोपायज्ञानम्। उपदेशाऽसकृद्दर्शनयोरभावात्। आहारविशेषप्रतिपत्तिश्च तज्जातोयानामविदितप्रीत्युपायत्वेन प्रथमज्ञाननिबन्धना न भवेत्। जातिभेदाऽभिव्यक्तप्रतिभाभेदानां प्लवनादिक्रियायां प्रवृत्तिश्चाऽज्ञातोपायानामेकजातीयानां च रागादिमयी प्रवृत्तिः, शाश्वतिक-

प्रतिपत्तिपदार्थमात्रान्नोत्पत्तुमर्हतीत्यर्थः। अपि च यत्प्राज्ञानामपि प्रमाणैरेकान्तदुष्करं तन्मन्दधियामपि पक्षिणां प्रत्युत्पन्नशब्दव्यापाराभावेऽपि पूर्वशब्दभावनाऽनुगमलब्धजन्मप्रतिभाभेदवशादीषत्करमिति प्रमाणेभ्योऽपि सामर्थ्यातिशयं प्रतिभाया दर्शयति—दुर्ज्ञानोपायेषु च प्राज्ञैरपि स्वरविशेषाऽऽश्रयभेदेषु पक्षिणां पूर्वशब्दभावनाऽनुगमाद्विप्रकृष्टशब्दव्यापारा प्रतिभा प्रवृत्तिनिबन्धनम्।

ननूपायज्ञानमेव प्रमाणभूतमस्ति, तन्नः प्रवृत्तिनिबन्धनमिति किं प्रतिभया? इत्यत आह—नोपायज्ञानं प्रवृत्तिनिबन्धनम्। कुतः? उपदेशाऽसकृद्दर्शनयोरभावाद्धि कारणम् उपायज्ञानं कारणद्वयनिवृत्तौ निवर्त्तते धूम इव धूमध्वजनिवृत्तावित्यर्थः। अथ कुलायनिर्माणे कलविङ्कानां स्वरभेदविकारे च मधौ पुंस्कोकिलानामुपायज्ञानवीजमसकृद्दर्शनमध्यारोप्येतेत्याह—आहारविशेषप्रतिपत्तिरस्मदादिभिरेतदादरणीयमिति प्रतिभेति यावत्। तज्जातीयानां तज्जातिर्येषां तेषां समानजातीयानामुत्पन्नमात्राणामसकृद्दर्शनाऽभावादविदितप्रीत्युपायत्वेन प्रथमज्ञाननिवन्धना न भवेत्। प्रथमग्रहणेनाऽसकृद्दर्शनाऽभावं सूचयति।

नन्वनादित्वात्प्रेत्यभावस्य पुनः समानाऽसमानजातीयविविधदेहोपधानसमधिगततत्तज्जातिनियततत्तद्भावनानिचयस्यैकस्यामपि जातौ समस्तप्रतिभोदयप्रसङ्गः, कारणसन्निधानादित्यत आह—जातिभेदाऽभिव्यक्तप्रतिभाभेदानाम्। एतदुक्तं भवति। येन कर्माशयेन यदुपात्तं जन्म स तज्जन्मोचितामेव भावनामभिव्यनक्ति, न जात्यन्तरोचिताम्। तस्यास्तत्राऽनुपयोगात्। अभिव्यक्तभावनाभेदः प्रतिभाभेदमुत्पादयन्नभिव्यनक्ति। उत्पत्तौ सत्यां प्रतीतेः प्लवनादिक्रियाप्रवृत्तिश्चाऽज्ञातोपायानां जातमात्राणां चक्रवाकादीनां न भवेत्। एकजातीयानां च पारावतोरगादीनां रागद्वेषमयी प्रवृत्तिर्जातमात्राणामज्ञातसुखदुःखोपायानां न भवेत्। शाश्वतिकविरोधिनामहिनकुलादीनां द्वेषवती प्रवृत्तिर्न भवेत्।

---

१. व्यापाराभावेपि मू० पु० पा०।

विरोधानां द्वेषप्रवृत्तिः । अतो नेष्टाऽभ्युपायमात्रं प्रवृत्तिहेतुः, अपि तु प्रतिभेत्यादर्शयन् वृद्धाः । यथाऽवोचन्—

उपश्लेषमिवाऽर्थानां सा करोत्यविचारिता ।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्त्तते ॥
साक्षाच्छब्देन जनिता भावनाऽनुगमेन वा ।
इतिकर्त्तव्यतायां तां न कश्चिदतिवर्त्तते ॥
प्रमाणत्वेन तां लोकः सर्वः समनुगच्छति ।
व्यवहाराः प्रवर्त्तन्ते तिरश्चामपि तद्वशात् ॥

[1]पूर्वपक्ष्येकदेशी प्रकृतमुपसंहरति--अतो नेष्टाऽभ्युपायता प्रवृत्तिहेतुरपि तु प्रतिभेति । एतच्चाऽदर्शयन् वृद्धाः । यदवोचन्—

उपश्लेषमिवार्थानां सा करोत्यविचारिता ।

अविचारिते किं कथमनुसंधीयत इति विचारविकलेति व्याकृतम् । न चासौ व्यतिरिक्तविषयेत्याह—

सार्वरूप्यमिवापन्ना विषयत्वेन वर्त्तते ।

विच्छिन्नप्रतिपत्तीनां तापह्रदतोयादीनां सहसोपश्लेषं विदधाति । तेषां सार्वरूप्यमापन्नेव न त्वापन्ना । तेषां तदारोहिणां वस्तुसत्ताया विचाराऽसहत्वात् । तस्मात्प्रतिभैव ताद्रूप्यमापन्ना विषयत्वेन वर्तते । न तद्व्यतिरिक्तोऽस्ति विषयः । एतदपि च विच्छिन्नाप्रतिपत्तीनामपि बहुपदार्थानां समाविष्टपूर्वशक्तिप्रत्यवभासेवोदीयमानेति व्याख्यातम् । न चेयमाकस्मिकी, न वा प्रमाणभूताऽपि न व्यवहाराङ्गमित्याह—

साक्षाच्छब्देन जनिता भावनाऽनुगमेन वा ।
इति कर्तव्यतायां तां न कश्चिदतिवर्त्तते ॥

अप्रमाणभूतामपि च निर्विषयतया व्यवहारान् प्रत्यन्तरङ्गतया चाऽव्यभिचारितया च ।

न केवलं प्रेक्षावतां मनुष्याणामपि तु—

प्रमाणत्वेन तां लोकः सर्वः समनुगच्छति ।
व्यवहाराः प्रवर्तन्ते तिरश्चामपि तद्वशात् ॥

तदुदाहरणप्रचयमात्यन्तिकप्रसिद्धिख्यापनायाह, अन्यथा

---

१. **पूर्वपक्षैकदेशी पु० पा० ।**

स्वरवृत्तिं विकुरुते[1] मधौ पुंस्कोकिलः कथम् ।
जन्त्वादयः कुलायादेः करणे शिक्षिताः कथम् ।।
आहारप्रीतिविद्वेषप्लवनादि[2]क्रियासु च ।
जात्यन्वयप्रसिद्धासु[3] प्रयोक्ता[4] मृगपक्षिणाम् ।।
उच्यते—
न निरालम्बनं ज्ञानं क्रियासाधनयोगिनि ।
सामान्येऽस्मिन्विप्रकृष्टे यच्छब्दवदुपायधीः ।।

सा खलु प्रतिभाऽऽलम्बनवती न वा ? आलम्बनवती चेत्तदेवाऽवबोद्धव्यं प्रवृत्तिनिबन्धनं, न च तदन्यदीहितोपायतायाः ।

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलः कथम् ।
जन्त्वादयः कुलायादिकरणे शिक्षिताः कथम् ।।
आहारप्रीतिविद्वेषप्लवनादिक्रियासु कः ।
जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ।।

तत्र सिद्धान्ती पूर्वपक्ष्ये[5]कदेशिनमनन्तरतया निराकरोति—
उच्यत इति ।

न निरालम्बनं ज्ञानं क्रियासाधनयोगिनि ।
सामान्येऽस्मिन्विप्रकृष्टे यच्छब्दवदुपायधीः ।।

यद्यपि प्रतिभा निर्विषयेत्युक्तं, तथापि कदाचिदिदमभ्युपगतसिद्धान्तमात्रं स्यान्न तात्त्विकमिति दूषणाऽभिधित्सया विकल्पितम् । सा खलु प्रतिभा आलम्बनवती न वा । तत्र प्रथमं पक्षमाश्रित्याह—आलम्बनवती चेत्तदेव वा बोध्यं प्रवृत्तिहेतुर्न प्रतिभा । नन्वेतावतापि किमभिमतसिद्धिः ? इत्यत आह—न च तदन्यदीहितोपायतायाः । एतच्चोपरिष्टान्निपुणतरमुपपादयिष्यते । तथा चाऽभिमतसिद्धिः ।

द्वितीयं पक्षमवलम्बते परः । ननु न विज्ञानं बाह्यविषयं सम्भवति । विकल्पाऽसहत्वात् । निराकारस्य वा विज्ञानस्य तद्विषयः साकारस्य वा । न तावन्निराकारस्य । विषयलक्षणाऽयोगात् । तथा हि यदि सत्त[6]या विषयः सर्वेऽर्थाः सर्वेषां सत्तामात्रस्याऽविशेषाद्विषया इति सर्वसर्वज्ञतापत्तिः । अथोत्पादकत्वाद्विषयत्वं तच्च कस्यचिदेवार्थस्य कस्यचिदेव प्रतिपत्तुः कस्यचिदेव प्रत्ययं प्रतीति नाऽतिप्रसङ्गः, तथापि चक्षुरादीनामप्युत्पादकत्वाद्विषयत्वं प्रसज्येत, विज्ञानसमये च तदुत्पादकस्याऽतीतत्वात् । क्षणिकत्वेन कार्यकारणयोरयौगपद्यात् । वर्तमानताज्ञानाऽभावप्रसङ्गः । एमसामग्री-

१. स्वरप्रवृत्तिं कुरुते मू०पु०पा० । २. आहारप्रीत्युपश्लेषाद्भावनादि मू०पु०पा० ।
३. प्रयुक्तासु मू० पु० पा० । ४. प्रत्ययः मू० पु० पा० ।
५. पूर्वपक्षै पु० पा० । ६. सत्ताया ।

प्रतिवन्धेन वा वर्त्तमानविषयत्वे नेत्रादीनामपि तदेकसामग्रीनिवेशिनां विज्ञानकालानां ग्रहणप्रसङ्गः ।

स्यादेतत् । प्रत्ययः स्वकारणाऽऽसादितसामर्थ्यभेदः कंचिदेवाऽर्थं वर्त्तमानमवभासयति न सर्वं, स हि तस्य महिमेति न नेत्रादिविषयता । यथाऽऽह'विषयग्रहणं धर्मो विज्ञानस्ये'ति । अत्रैतदालोचनीयं, किं विषयः पुनरयं सामर्थ्यभेदः स्वकारणाऽधीनजन्मा विज्ञानस्ये ?ति । अर्थविषय इति चेत् ? किमयमस्य निर्वर्त्यो यथा संयवनस्य पिण्डः, विकार्यो वा यथाऽवघातस्य व्रीहयः, संस्कार्यो वा यथा प्रोक्षणस्योलूखलादिः प्राप्यो वा यथा दोहनस्य पयः ? किमनेनाऽनभ्युपेताऽऽरोपणेन ? अर्थप्राप्तौ तु विज्ञानं समर्थमिति ब्रूमः । का पुनरियं प्राप्तिः ? प्रमितिरर्थधर्मः कंचिदेव प्रमातारं प्रति द्वित्वादिसंख्येवाऽपेक्षाबुद्धिमन्तं प्रति बुद्धिध्वंसाच्च ध्वंसते द्वित्वादिकमिवाऽपेक्षाबुद्धिविनाशादिति चेत् । न तावदुन्मीलितलोचना द्वि[1]त्वादिकमिव तद्धर्मं प्रमितिमीक्षामहे । अपि चाऽतीतानागतयोरप्रमितिप्रसङ्गः । न ह्यस्ति सम्भवः, अप्रत्युत्पन्नो धर्मी धर्मश्च तस्य प्रत्युत्पन्न इति ।

यद्युच्यते, न विज्ञानादन्योऽर्थप्रकाशः किं तु विज्ञानप्रकाश एव सः । विज्ञानप्रकाशश्च विज्ञान[2]मेव । कथमन्यप्रकाशोऽन्यस्येति चेत् । स्वभावभेदात् । रूपादयो हि स्वप्रत्ययादुपजायमाना नात्मनः परस्य वा प्रकाशकाः, ज्ञानं तु स्वप्रत्ययसमासादितजन्माऽऽत्मपरप्रकाशनपरमार्थं न जातु तदर्थमन्तरेण दृष्टरूपं पश्चाद्येन सम्बध्यते परशुरिव शुद्धः स्वकारणाऽधीनजन्मा पश्चाच्छिदया, किंत्वर्थसहितमेवेति न पर्यनुयोगमर्हति । न हि परशुः स्वकारणादयोमयस्तत्त्वे किंचिदपेक्षते पर्यनुयुज्यते वा । स्वभावभूतं चाऽस्य परप्रकाशनमप्रकाशननिवृत्त्या कथंचित्कल्पितभेदं फलमिति स्वपरप्रकाशनसामर्थ्यमसामर्थ्यनिवृत्त्या कथंचित्कल्पितव्यतिरेकेण[3] प्रमाणमिति न निर्विषयं सामर्थ्यमिति ।

तत्र ब्रूमः । कः पुनरर्थः स्वपरप्रकाशनपरमार्थं विज्ञानमि?ति । यदि प्रकाशनस्वभावं, सिद्धमेतत् । अथ परस्परसम्बन्धस्वभावं, कः पुनरेषां सम्बन्धः ? विषयविषयिभावः सम्बन्ध इति चेत् । तस्याऽर्थज्ञानसमवायेन नानात्वमनेकवृत्तितया प्रसज्येत । तथा च ते एव तत्त्वम् । अतीताऽनागताऽर्थवृत्तिता च कथमस्येत्यभिहितप्रायम् । विज्ञानमात्राऽऽश्रयत्वे तु कथम-

१. नीला पु० पा० । २. विज्ञानम् २ पु० पा० ।
३. व्यतिरेकि २ पु० पा० ।

स्याऽर्थाऽन्वयः ? तस्मादात्मपरप्रकाशनपरमार्थं विज्ञानमिति वर्णयता बलाद्विज्ञानतादात्म्यं नीलादेरभ्युपगतं भवति । तथा च निराकारं विज्ञानं प्रति विषयलक्षणाऽयोगात् साकारस्य विषयोऽर्थ इति ।

अपि च विज्ञानप्रकाश एव चेदर्थप्रकाशस्ततस्तद्भेदेनाऽर्थभेदो व्यवस्थापनीयः । तस्य च निराकारतया विशेषस्याऽभावात् इदं नीलस्य संवेदनमिदं पीतस्येति विभागाऽभावादर्थक्रियाविशेषाऽर्थिनो न प्रवर्त्तेरन् । आकारभेदवत्त्वे तु विज्ञानस्य नीलसारूप्यं व्यवस्थापनहेतुत्वात् प्रमाणं संविद्रूपता त्वस्य नीलेऽर्थे व्यवस्थाप्यमानत्वात् फलम् । यद्यपि सारूप्यं विज्ञानं चेत्येकमेव तत्त्वं तथापि कथंचिदेकव्यावृत्तिनिष्ठरूपाऽवगाहन-स्वभावैर्विकल्पैर्व्यावर्त्यभेदाऽऽरोपितभेदं प्रमाणफलभावमश्नुते । यदाह—"न हि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राऽविशेषादविशेषप्रसङ्गात् । तां तु सारूप्यमाविशत्स्वरूपवन्तं घटयेदिति । तत्सारूप्यतदुत्पत्तिभ्यां च विषयत्वेन नेन्द्रियादिषु तत्प्रसङ्गः । अर्थाऽऽहिताऽऽकारवेदनमेव चाऽर्थवेदनं ज्ञानाकाराश्च वर्त्तमाना इति वर्त्तमानताऽप्युपपन्नेति । यथाह—

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव तद् युक्तं ज्ञानाऽऽकाराऽऽर्पणक्षमम् ।। इति ।

तथाप्युक्तं स्यादर्थवेदनमिति । तस्मात्साकारज्ञानगोचरोऽर्थ इति सौत्रान्तिकाः प्रपेदिरे ।

तदिदमनुपपन्नम् । तथा हि । साकारं विज्ञानमर्थविषयमित्यनुभवाद्व्य-वस्थाप्यतेऽनुमानाद्वा । न तावदनुभवः स्वाकारमात्रपर्यवसायी नीलमपरं गोचरयति । नीलमिति हि प्रतिभासो न पुनर्नीले इति । न च भिन्नं सद्वि-षयो भवितुमर्हतीत्युक्तम् ।

स्यादेतत् । द्विविधो हि विषयः प्रमाणानां, ग्राह्योऽध्यवसेयश्च । तद्यथा प्रत्यक्षस्य ग्राह्यः क्षण एकोऽध्यवसेयश्च प्रवृत्तिविषयः सन्तानः । अन्यथाऽर्थक्रियाऽर्थिनः प्रमाणमवर्त्तकं स्यात् । प्रवृत्तिविषयोपदर्शनं हि प्रवर्तकत्वं प्रापकत्वं च प्रमाणानाम् । न च ग्राह्यक्षण एव प्रवृत्तिविषयास्तस्य तदानीमतीतत्वात् । सन्तानस्तु स्यात् । न चाऽसौ ग्राह्य इत्यध्यवसेयत्व-मभ्युपेतव्यम् । तथाऽनुमानविकल्पस्यापि ग्राह्यं सामान्यमन्यव्यावृत्तिरूपम् । अध्यवसेयस्तु प्रवृत्तिविषयोऽर्थक्रियाक्षमः । प्रवृत्तिविषयाऽपेक्षं हि प्रामाण्यं तयोः । यथाह—"न ह्याभ्यामर्थं परिच्छिद्याऽध्यवसायप्रवर्तमानोऽर्थक्रियायां विसंवाद्यते" इति । तदेवं वाह्यमग्राह्यमध्यवसेयतया विषय इति तत्राऽध्य-वसायार्थाऽपरिज्ञानात् विकल्पोऽध्यवसायः । तत्रानुमानं विकल्परूपत्वात्त-

द्विषयं तु विकल्पजननादिति चेत्। ननु विकल्पोऽपि स्वाऽऽकारविषयत्वात्कथं बाह्यमध्यवसातुमर्हति ? यदि मन्येत न विकल्पानां विषयः स्वाकारोऽपि तु संवेदनस्य। प्रत्यक्षस्य हि विकल्पविषयो यो विकल्प्यते। न च स्वरूपं विकल्प्यते। तस्य सर्वतो व्यावृत्तस्याऽभिलापसंसर्गयोग्यत्वाऽभावाद्विशदप्रतिभासत्वाच्च। तस्मादात्मन्यविकल्पाः स्वाऽवभासं बाह्यतया विकल्पयन्तस्तत्र तत्र प्रवर्तयन्ति स्वव्यवहारार्थिनः। पारम्पर्येण च बाह्यादुत्पत्तेस्तत्प्रतिबन्धात्तत्प्राप्तेर्न विसंवादयन्ति लोकमिति। यदाह—'स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्ति'रिति। आह अनर्थे स्वभासमर्थमध्यवस्यतीति निर्वचनीयमेतत्। नन्वर्थमारोपयन्तीति किं विकल्पस्य स्वरूपाऽनुभवाऽऽरोप उत व्यापारान्तरं स्वरूपाऽनुभवः ? न पूर्वः कल्पः। अनुभवसमारोपयोर्विकल्पाऽविकल्परूपतया द्रवकठिनवत्तादात्म्याऽनुपपत्तेः। व्यापारान्तरत्वे क्रमः समानकालता वा। न तावत् क्रमः। क्षणिकस्य विज्ञानस्य क्रमवद्व्यापाराऽयोगादक्षणिकवादिनामपि बुद्धिकर्मणोर्विरम्य व्यापाराऽयोगान्न क्रमवद्व्यापारसम्भवः। अनुभवसमारोपौ समानकालाविति चेत्। भवतु समानकालत्वं केवलमात्मभावाऽवस्थित एव वेद्यः। परभाववेदने स्वरूपवेदनाऽनुपपत्तेः। तथा चात्मज्ञानस्य ग्राह्यग्राहकाऽऽकाराऽनुभूतोऽर्थश्च समारोपितः। न त्वात्माऽवेद्यमाने समारोपितो[1] नार्थः समारोप्यमाणः प्रत्यक्षवेद्यः। स च समारोपः सतोऽर्थस्याऽसतो वा ग्रहणमेव। न च ज्ञानाऽतिरिक्तस्य ग्रहणं सम्भवतीत्युक्तम्। स्वप्रतिभासस्य बाह्याद्भेदाऽग्रहो बाह्यसमारोपस्ततो बाह्ये प्रवृत्तिरिति चेत्। स किं गृह्यमाणे बाह्ये न वा ? न तावद् गृह्यमाणे। उक्तं ह्येतत् न तद्ग्रहः सम्भवतीति। अगृह्यमाणे तु भेदाऽग्रहेण न प्रवृत्तिनियमः स्यात्। अन्येषामपि तदानीमग्रहणात्। अन्यत्रापि प्रवृत्तिप्रसङ्गात्। तस्मान्नाऽनुभवव्यवस्थाप्यो नाप्यनुमानव्यवस्थाप्यः। तदपि प्रत्यक्षवदेव ग्रहीतुमध्यवसातुं वा बाह्यं नाऽर्हतीत्युक्तप्रायम्। न च तादृशो बाह्यप्रतिबन्धस्तदात्मा तत्कार्यो वा हेतुरप्यस्ति। नन्वयमस्ति। ये यस्मिन्सति कादाचित्कास्ते सर्वे तदतिरिक्तहेतुसापेक्षा यथा विच्छिन्नाऽऽगमवचनप्रतिभासप्रत्ययाः सन्तानान्तरापेक्षाः। तथा च विवादाध्यासिताः सत्यप्यालयविज्ञानसन्ताने षडपि प्रवृत्ति[2]प्रत्यया इति स्वभावहेतुः। यश्चाऽसावालयविज्ञानसन्तानाऽतिरिक्तः सोऽर्थो वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत्। नन्वेकसन्ततिपतितानामालयविज्ञानानां तत्तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना। तस्याश्च स्वकार्यजननं प्रत्याभिमुख्यं परिपाकस्तस्य च प्रत्ययः स्वसन्तानवर्तिपूर्वक्षणः। सन्तानान्तरापेक्षाऽनभ्युपग-

---

१. समारोपितः इत्यारभ्य........स च इत्यन्तः पाठः का० पु० नास्ति।
२. संतानेऽप्यप्रवृत्ति २ पु० पा०।

मात्। तथा च सर्वेऽप्यालयसन्तानपतिताः परिपाकहेतवो, न वा कश्चिदपि। विशेषाऽभावात्। यो यथाऽभिप्रेतः परिपाकहेतुः क्षण आलयसन्तानपतितस्तथा सर्वेऽपीत्यविशेषः। क्षणभेदाच्छक्तिभेदस्तस्य च कादाचित्कत्वात्कार्यकादाचित्कत्वमिति चेत्। नन्वेवमेकस्यैव नीलविज्ञानजननसामर्थ्यं तत्प्रबोधजननसामर्थ्यं चेति क्षणान्तरस्य तन्न स्यात्। सत्त्वे वा कथं क्षणभेदाच्छक्तिभेदः? इत्यालयसन्तानवर्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे वा कार्यक्षेपाऽनुपपत्तेः। स्वसन्तानमात्राऽधीनत्वे निषेध्यस्य कादाचित्कत्वस्य विरुद्धं सदातनत्वम्, तस्योपलब्ध्या च कादाचित्कत्वं निवर्त्तमानं हेत्वन्तरापेक्षत्वे व्यवतिष्ठत इति प्रतिबन्धसिद्धिः। न च सन्तानान्तरनिमित्तत्वं सर्वेषां प्रवृत्तिविज्ञानानां विज्ञानवादिभिरङ्गीकृतमपि तु कस्यचिदेवाऽऽगमवचनप्रतिभासस्य विज्ञानस्य। अपि च सन्तानान्तरनिमित्तत्वे तस्यापि सदा सन्निधानान्न कादाचित्कत्वं स्यात्। न खलु सान्द्रतरस्य सन्तानस्य कादाचित्कत्वस्य देशतो विप्रकर्षसम्भवो, विज्ञानवादे व्यतिरिक्तदेशाऽभावात् अमूर्त्तत्वाच्च विज्ञानानामदेशात्मकत्वात्। नापि कालतः। अपूर्वसत्त्वप्रादुर्भावाऽनभ्युपगमात्। तस्मादनुमानमस्ति[1] बाह्यसाधनमिति तदिदमनुपपन्नम्। स्वसन्तानमात्रप्रभवत्वेऽपि प्रत्ययकादाचित्कत्वोपपत्तौ सन्दिग्धविपक्षव्यावृत्तिकत्वेन हेतोरनैकान्तिकत्वात्। बाह्यनिमित्तत्वेऽपि कथं कदाचिन्नीलसंवेदनं, कदाचित्पीतसंवेदनं, बाह्यनीलसन्निधाने स्वकारणनिबन्धनः शक्तिभेदोऽपि भविष्यति। सन्तानिनो हि क्षणभेदहेतवस्ते च प्रतिकार्यं भिद्यन्त एव सन्ताने सन्निधानाऽसन्निधानाभ्यामिति चेत्। अथ पीतसन्निधाने किमिति नीलादिज्ञानं न भवति पीतज्ञानं वा भवति? सामर्थ्यादसामर्थ्याच्चेतरस्मिन्निति चेत्। कुतः पुनरयं सामर्थ्यभेदः? स्वहेतुभेदादिति चेत्। एवं तर्हि क्षणानामपि स्वकारणभेदनिबन्धनः शक्तिभेदो भविष्यति। सन्ताना हि क्षणभेदहेतवः प्रतिकार्यं भिद्यन्त एव। न च सन्तानो नाम कश्चिदेक उत्पादकः समस्ति, यदभेदात् क्षणा न भिद्येरन्। ननूक्तं न [2]क्षणभेदाऽभेदाभ्यां शक्तिभेदाऽभेदौ, भिन्नानां क्षणानामेकस्य सामर्थ्यस्योपलब्धेः। अन्यथैक एव पूर्वक्षणो नीलविज्ञानजननः स्यान्न क्षणान्तराणीति न नीलाकाराणि विज्ञानान्तराण्युत्पद्येरन्, यदि भिन्नानां नैकं सामर्थ्यम्। ननु नीलसन्तानिनामपि मिथो भिन्नानां नैकमस्ति नीलाकारादिसामर्थ्यमिति सन्निधानेऽपि नीलान्तरस्य न नीलविज्ञानमुत्पद्यते। सन्तानिभेदेऽपि शक्त्यभेद इति चेत्। क्षणभेदेन किमपराद्धं? येन तस्मिन्नपि न भवति। अथ सन्तानिभेदे शक्तिभेद एव, तथा च कार्यभेदः। न हि यदे-

१. अनुमा....इत्यारभ्य तदिदमित्यन्तः पाठः का० पु० नास्ति।
२. भेदाभेदाभ्यां शक्ति इति पाठः का० पु० नास्ति।

निरालम्बनं तु ज्ञानमयुक्तमेव ।

कस्मिन्नीलाकारं ज्ञानं ज्ञानान्तरमपि नीलाकारं तदेव भवितुमर्हति । तदस्माकं क्षणभेदेऽपि समानम् । अन्यत्राऽभिनिवेशात् । अपि चोत्पत्तिसारूप्याभ्यां विषयत्वे चक्षुरालोकसंस्काराणामपि यथाक्रमं रूपग्रहणं प्रति नियमस्पृष्टताज्ञानजनकत्वसारूप्यैस्तदुत्पत्त्या च नीलवद्ग्रहणप्रसङ्गः । अत्यन्तसारूप्याद्वा विषयत्वे नीलविज्ञानसमनन्तरप्रत्ययस्य नीलार्थादपि सदृशतरस्य नीलज्ञानविषयत्वाऽऽपत्तिः । सतोरप्युत्पत्तिसारूप्ययोरध्यवसायाद्विषयभावः स चार्थ एव नान्यत्रेति चेत् । न । उक्तोत्तरत्वात् । निवेदितमेतदधस्तात् । यथा 'नाऽध्यवसायगोचरो बाह्य' इति ।

तदनेन प्रबन्धेन वेद्यत्वलक्षणो हेतुः समर्थितो विज्ञानवादिनाम् । स चैवं प्रयोगमारोहति । यद्वेद्यते येन वेदनेन ततस्तन्न भिद्यते यथा ज्ञानस्याऽऽत्मा, वेद्यन्ते च नीलादय इति विरुद्धव्याप्तोपलब्धिः । निषेध्यभेदविरुद्धः खल्वभेदस्तेन व्याप्तं वेद्यत्वं भिन्नस्य साऽऽकारनिराकारविज्ञानप्रवेदनीयस्याऽनुपपत्तेरिति प्रपञ्चितमधस्तात् । तस्माद्विरुद्धाऽभेदव्याप्तवेद्यत्वोपलब्धिरूपाऽनुपलब्धिरेव भेदाऽभावसाधनीति[1] स्थिता बुद्धीनां बाह्याऽनालम्बनत्वसिद्धिः ।

अतश्चैतदेवं सहोपलम्भनियमो ज्ञानस्यार्थेन । तथा हि । यद्येन नियतसहोपलम्भनं तत्ततो व्यतिरिच्यते यथैकस्माच्चन्द्राद् द्वितीयश्चन्द्रः । नियतसहोपलम्भनज्ञानमर्थेनेति व्यापकविरुद्धोपलब्धिः । अभेदो हि सहोपलम्भनियमेन व्याप्तः । न खलु नीलपीते भिन्ने नियमेन सहोपलभ्येते । तद्विरुद्धश्चाऽयं नियमः स्वविरुद्धमनियमं निवर्त्तयंस्तद्व्याप्तं भेदमपि निवर्त्तयति । तद्व्यापकविरुद्धोपलब्ध्या भेदाऽभावसिद्धिः । यथाह 'सहोपलम्भनियमादभेदो नीलतद्धियोरि'ति । कथं तर्हि ज्ञानात्मकात्प्रतिपत्तुरर्थस्य भेदबुद्धिर्नीलमेतदिति ? बलवद्वेद्यत्वसहोपलम्भनियमाऽनुमानेन बाधिता भ्रान्तिरेव । यदाह 'भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवद्वयम्' इति ।

अपि च यः प्रत्ययः स सर्वो बाह्याऽनालम्बनः । यथा स्वप्नप्रत्ययः, प्रत्ययश्च विवादाध्यासित इति स्वभावहेतुः । निरालम्बनं विज्ञानं तन्मध्यपातिनी च प्रतिभेति सापि तथेत्यत आह—निरालम्बनं तु ज्ञानमयुक्तमेव । इदमत्राऽऽकूतम् । नैतन्निरालम्ब[2]नत्वे प्रमाणं भवितुमर्हति । तथा हि । किमनुभवसिद्धस्य नीलादेर्वेद्यस्य तत्त्वं हेतुः क्रियेत, अहो स्विदन्यस्य ? तत्र यद्यनुभवसिद्धस्य ततोऽनहङ्कारास्पदमसितादिरूपं स्थूलं नीलादिविच्छिन्नं वेद्यमनुभूयते, नास्याऽऽन्तरज्ञानस्वभावता शक्यसाधना । यथाहाचार्यः 'स

१. भावं साधयतीति २ पु० पा० । २. त्वं पु० पा० ।

वहिर्देशसम्बन्धः प्रत्यक्षमुपलभ्यते' इति। अथाऽन्यस्य। तस्याऽसिद्धं वेद्यत्वम्। ज्ञानाकारत्वे चास्य न काचित्क्षतिः। यद्युच्येत नाऽनुभूतत्वमात्रस्य हेतुत्वमपि त्वनुभूताऽवसितत्वस्य। अवसायश्च स्वभावत एकव्यावृत्तिनिष्ठ-रूपाऽवगाही न मनागपि व्यावृत्त्यन्तरमवगमयति। मा भूदिह सदभिलाप-विकल्पपर्यायिता सर्वेषां गवादिशब्दविकल्पानाम्। व्यावर्त्त्यभेदाऽनुविधायिनश्च व्यावृत्तिभेदाः। तदिहाऽवेद्यव्यावृत्तिकृतवेद्यत्वाऽवगाही विकल्पो नाऽवाह्य-व्यावृत्तिकृतं वाह्यत्वं विगाहत इति यदेव किंचित्पांसुलपादकेन हालिकेनापि नीलादेर्वेद्यत्वमनुभूतावसितं तद् वाह्यत्वनिरासाय समर्थमिति न विरोधः। तदसत्। न खल्वेकाऽवसायागोचरतया विरोधमापादयामो, ऽपि तु यद्वाह्यत्वं स्थूलत्वं चाऽनुभूतावसितं नीलादेस्ताभ्यां विरोधी। तथा हि। ज्ञानकारत्वे नीलस्य नानादिग्देशव्यापिता स्थूलत्वं विच्छिन्नदेशता च वाह्यत्वं न स्याताम्। न खल्वेकत्वेन ग्रहणाऽग्रहणे एव परं विरुध्येते येन विज्ञानदेशे नीलादेः स्थूलस्य ग्रहणादेवाऽविरोधः स्यादपि तु तद्देशत्वाऽतद्देशत्वेऽपि। तथा हि। भिन्नदेशयोरपि परस्परपरिहारेण स्थितिरस्ति विच्छिन्नाऽवभास-ज्ञानकारणशक्तिर्भिन्नदेशत्वम्। तत्र पूर्वदिग्भागस्थितान्नीलाद्विच्छिन्नमव-भासते प्रत्यक्षेण, न तु परस्परात्मकमनुभवाऽनुसारिणा निश्चयेन यथाऽवसी-यते तथाऽनवसायात्परस्परविच्छेदेन चाऽवसायात्। दृश्यमानं चाऽनुभवाऽनु-सारिणा निश्चयेन यथाऽवसीयते तथैव सदसति वाधके। यदि च पूर्वदिक्क-मितरदिक्कं गृह्येत नैव दिग्भिन्नभावदर्शनं भवेदस्ति च तत्। तस्माद्दिगन्तर-सन्निविष्टं रूपमितरदिक्कं न गृह्यते। तथा सति यथा नीले पीतमदृष्टमिति नीलपरिच्छेदे तदभावो व्यवच्छिद्यते तद्वच्च पीतादिवत्पूर्वदिक्के रूपे तदितर-दिक्कं रूपमदृष्टमिति पूर्वदिक्करूपपरिच्छेदे तदभावो व्यवच्छिद्यते। इतरथा तादूप्यमेव न परिच्छिन्नं स्यात्। तदभाववच्च पूर्वदिक्काऽभाववन्तस्तदितर-दिग्भागवर्त्तिनः स्वभावाद् व्यवच्छेत्तव्याः नीलपरिच्छेदेनेव नीलाऽभाववन्तः पीतादय इति सिद्धस्तद्देशत्वाऽतद्देशत्वयोः परस्परपरिहारस्थितिलक्षणो विरोधः। यत्र चैवं विध्योर्विरोधः तत्र मानाऽभेदो यथा नीलपीतयोः। एवंविधश्चाऽनुभूयमाने नीले स्थूले विरोध इति व्यापकविरुद्धोपलब्धिः। प्रतिषेद्धव्यः खलु भेदो विरोधाऽभावेन व्याप्तस्तद्विरुद्धश्च विरोध इति। तेन यावदुक्तं भवति नीलं वा नेति तावदुक्तं भवति नीलं स्थूलमिति। न च नानैकज्ञानात्मेति युक्तम्। एकत्वस्य नानात्वविरोधात्। न च नानाविज्ञाना-नीति साम्प्रतम्। प्रत्येकं स्वाऽवभासमात्राऽवसायित्वे नानाविज्ञानानां स्थूला-भासाऽनुभवाऽभाव[1]प्रसङ्गात्। न च नानाकाराऽनुभववासनाजन्मा विकल्प-

१. स्थूलाऽभाव. २ पु० पा०।

स्तदनुभवाकारसङ्कुलनात्मकस्थूलाकारभाग्भवितुमर्हति । तस्याप्येकत्वेऽनुभववत्तदाभासत्वाऽनुपपत्तेः । नानात्वे वा स्थूलाभासाऽभावप्रसङ्गात् । विकल्पविषयत्वेन च विशदाभसताऽनुपपत्तेः । यदाह । 'न विकल्पानुबन्धस्य स्पष्टार्थप्रतिभासते'ति । न चाऽनुभूतं स्थूलत्वं येन तदुपाधिर्विकल्पे विस्पष्टाभासः[1] स्यात् । तस्मादर्थे विज्ञाने च स्थूलत्वाऽनुपपत्तेरसदेतदभ्युपगन्तव्यम् । न च तद्विज्ञानं सम्भवति । सदसतोरेकत्वाऽनुपपत्तेः । एतेनेदमिति विच्छिन्नाऽवभासो व्याख्यातः । तस्मादनिच्छताऽपि विज्ञानानां मनोवेद्यत्वमभ्युपगन्तव्यम् । तथा च वेद्यत्वमभेदस्य न व्याप्यमिति विरुद्धव्यापकोपलब्धिरसिद्धा नाऽभेदोपस्थापननेन भेदं निषेद्धुमर्हति । ननु न परप्रतिबन्धमात्रादर्थसिद्धिः, उक्तं च 'साकारमनाकारं च विज्ञानमनात्मभूतवेदनासमर्थ'मिति । तत्किमिदानीं समर्थनीय एव स्थूलाऽनुभवो नास्ति वा ? न तावन्नास्ति, नीलवत्तस्याप्यनुभवात् । तदपह्नवे चाऽनिर्मूलतया नीलाऽनुभवस्याऽपह्नवप्रसङ्गः । तथा चास्य कुतो भेदो वा ? अथास्ति न चाऽसमर्थनीयः । न च ज्ञानाऽऽकारः । का तर्हि तस्य समर्थना ? अत एवाऽनात्मनः प्रकाशनविज्ञानं स्वकारणाऽऽसादिताऽदृष्टान्तसिद्धस्वभावभेदं न कथन्तास्पदं भवितुमर्हति । न खल्वनुभवो दृष्टान्तमपेक्षते । मा भूद्भूम्यादावसाधारणगन्धादिगुणाऽननुभवनम् । कः पुनरस्याऽनात्मसम्बन्ध ? इति चेत् । अथाऽन्यत्रापि सम्बन्धस्य कः सम्बन्धिभ्यां सम्बन्धः ? रूपेणैव स तथेति न सम्बन्ध्यन्तरमपेक्षते । न जातु सम्बन्धिनावन्तरेणाऽसौ निरूप्यते । न च जातु तस्मिन्सति सम्बन्धिनावसम्बन्धिनौ भवतस्तेन सम्बन्धिस[2]म्बन्धनपरमार्थः । सम्बन्धसम्बन्धिनौ तथोत्पन्नौ सम्बन्ध इति चेत् । ननु स्थूलाऽनुभवोऽपि न स्थूलमन्तरेण निरूप्यते । न च तस्मिन्सति स्थूलमननुभूतं भवतीति रूपेणैव सोऽपि स्थूलप्रकाशनपरमार्थः सम्बन्ध इव वा तथोत्पन्नौ सम्बन्धिनाविव वा सम्बन्धनपरमार्थौ । सेयं समर्थना । यद्येवमियमनुभवमात्रस्यैवाऽनात्मग्राहितामापादयति, न हि नीलाद्यनुभवेऽपि नीलादिमन्तरेण निरूप्यते । न च तस्मिन्सति नीलादयो नाऽनुभूता इति स्थूलाऽनुभववदनात्मनो नीलादेरनुभवः स्वभावत एव न सम्बन्धान्तरेणेति तत्त्वम् । अतदात्मनोऽपि वेद्यत्वोपपत्तेरनैकान्तिकं वेद्यत्वम् । एवं सहोपलम्भनियमोऽप्यनैकान्तिकः । स्वकारणाऽधीनो हि तादृशः स्वभावभेदो विज्ञानस्य येनात्माऽनात्मनोरसावेक एवोपलम्भः । न च स्वभावः कथन्तागोचर इत्युक्तम् । एतेनैव प्रत्ययत्वमपि प्रत्युक्तम् । स्वप्नादिप्रत्ययानां च समारोपितबाह्यविषयत्वात्साध्यविहीनत्वं दृष्टान्तस्य । तथा च विरुद्धो हेतुः ।

---

१. विस्पष्टाकृता स्यात् २ पु० पा० । २. सम्बन्धानपरमार्थः पु० पा० ।

अपि चाऽसिद्धः सहोपलम्भः। न हि य एव नीलस्योपलम्भः स एव तदुपलम्भस्येति नियमः समस्ति। न खल्वयमनुभवगोचरः। तथा हि। विस्फा[1]रिताक्षः प्रतिपत्ता नीलमिदमिति पश्यन्न तदैव तदनुभवमपि पश्यति। नीलप्रवणो हि तदनुभविता नाऽनु भ[2]वप्रवणोऽनुभूयमानोपाधितयाऽनुभवमपि परिच्छिनत्ति। न खल्वनुभवा[3]नवभासे नुभूयत इति भवति। न ह्यस्ति सम्भवो दण्डो न गृह्यते गृह्यते च दण्डीति। तस्माद्विशेषणतयाऽनुभवग्रहणेऽप्यनुभूयमानप्रवणोऽनुभवितेति सिद्धः सहोपलम्भनियम इति चेत्। नैतत्। न ह्यनुभूयते नीलमित्यनुभवोऽपि तु नीलमिति। असत्यनुभवप्रकाशे विषया न प्रकाशेरन्। तदधीनं हि प्रकाशं तेषाम्। न खलु न लीनो नीलाऽनुभवस्तानलमवभा[4]सयितुम्। न ह्यनुभवादन्यो विषयाऽवभासः, यमयमनवभासमानोऽपीन्द्रियादिवशादधीतोऽपि तु परप्रकाशनपरमार्थोऽनुभव एव तत्प्रकाशः। तथा च यदि निलीयते तन्निलीनस्वभावत्वाद्विषयानपि नाऽऽभासयेदिति नाऽनुभवो न विषया भासन्त इत्यायातमान्ध्यमशेषस्य जगतः। तस्मादनुभवप्रकाशाऽयत्तप्रकाशत्वमेषितव्यं विषयाणाम्। अपि चैकस्मिन्नर्थे स्फुटाऽस्फुटाऽवभासो युगपदुपलभ्यते प्रतिपत्तॄणाम्। न चाऽसावर्थधर्मः स्फुटत्वादिरेकस्मिन्युगपद्विरुद्धधर्मसमावेशाऽसम्भवात्। विज्ञानभेदस्तूपपद्यत इति विज्ञानस्य धर्मः। तथा च तज्ज्ञानमनुभवसिद्धम्।

तदेवमनुभवादेव स्वसंवेदनसिद्धौ यो नाम स्वसिद्धान्ताभ्यासाऽऽहितव्यामोहो विप्रतिपद्यते तं प्रत्यनुमानमुपन्यस्यते। यद्यत्प्रकाशाऽऽयत्तप्रकाशं तत्तस्मिन्प्रकाशमान एव प्रकाशते, यथा दण्डप्रकाशाऽऽयत्तप्रकाशो दण्डी। प्रत्ययप्रकाशायत्तप्रकाशश्च प्रत्येतव्यो रूपादिरिति स्वभावहेतुः। न च प्रत्ययप्रकाशाऽऽयत्तप्रकाशत्वं रूपादीनामसिद्धम्। उक्तं हि 'तदनायत्तत्वे प्राप्तमान्ध्यमेव जगतोऽशेषस्येति। न च स्वसंवेदने स्वात्मनि वृत्तिविरोधः। न हि संवेदनस्य स्वरूपादन्या वृत्तिरस्ति। यतः स्वात्मनि कर्तृकर्मभावो विरुध्येत। संवेदनमेव त्वपराधीनप्रकाशमाविर्भूतस्वभावमात्मसंवेदनमाचक्षते। न च स्वभावेन भावो विरुध्यते। तस्मादात्मसंवेदनसिद्धेः सिद्धः सहोपलम्भनियम इति।

तदनुपपन्नम्। हेत्वसिद्धेः। न हि नीलादयोऽनुभवप्रकाशाऽऽयत्तप्रकाशाः किं त्वनुभवाऽधीनप्रकाशाः। एवं चेन्नेत्रादिभिरनेकान्तः। किं पुनर्नीलादीनामनुभवे आयत्तता ? नन्वनुभवप्रकाशेऽपि किमायतते ? यदि

१. विस्फुरिताक्षः पु० पा०। २. प्रवणे पु० पा०।
३. अनुभवावसाने पु० पा०। ४. भासतुम् पु० पा०।

न किञ्चिन्नाऽतिरिक्तं वचः । अनुभवप्रकाशाऽऽयत्तः प्रकाश इति चेत् । ननु स एव तदधीन इत्युक्तं भवति, तच्चाऽयुक्तम् । न ह्यात्मन्यायतते, भेदाऽ[1]-श्रयत्वात्तद्भावस्य अनुभव एवात्मनः परस्य च संबन्धितयाऽनुभवभेदोऽनुभवप्रकाशो नीलप्रकाशः, तथा चाऽनुभवप्रकाशाधीनता नीलप्रकाशस्येति चेत् । एवं तर्हि स्वप्रकाशाऽधीनस्य नीलसम्बन्धितेत्युक्तं स्यात् । तत्रैतावद्वक्तव्यम् । भवतु स्वप्रकाशः कुतस्तु नीलसम्बन्धिते?ति । स्वभावादिति चेत् । कृतं तर्हि स्वप्रकाशेन, स्वभावत एव तत्सम्बन्धोपपत्तेः । एतावांस्तु विशेषः, तवासौ कल्पिता तत्सम्बन्धिता, मम तु पारमार्थिकी, यां किल ज्ञेयाऽभिव्यक्तिरिति ज्ञाततेति वा कर्मतेति वाऽऽचार्याः प्रचक्षते । ननु कर्मतेति चेयमर्थधर्मः, कथमर्थधर्मोऽयमतीतादिषु सम्भवतीत्युक्तम् । नेयमर्थधर्मः, किं तु ज्ञातुरात्मनो ज्ञेयसम्बन्धभेद एव ज्ञातता । स च ज्ञातृधर्मो ज्ञायमानार्थाऽवच्छिन्नो ज्ञेयं प्रति गुणभाव आत्मनः सुखादिवत्प्रमित्साऽनपेक्ष[2]समनन्तरप्रत्ययोत्पन्नमानसप्रत्यक्षवेदनीय एकसमवेतोऽप्युभयाऽधीननिरूपणताद्याश्रयः शक्तिरिव सम्बन्धः सम्भवति । नन्वयमनुभव एव । तथा हि । सोऽपि विज्ञेयविशेषप्रतिबन्धव्यवहाराऽनुगुणः पुंसो धर्मभेद आख्यायते । सत्यमीदृशः । न त्वसौ सम्बन्धः[3]। व्यापारो हि स आत्मनः । तस्य तु फलं सम्बन्ध आत्मनो ज्ञेयप्रवणतालक्षणः । कुतः पुनरनुभवाऽवगतिः ? अस्मादेव तु सम्बन्धलक्षणात्फलात् । यदाह 'ज्ञाते त्वनुमानादवगच्छती'ति । आत्मनःसंयोगविशेषादेव कादाचित्कफलसम्भवान्नाऽनुभवाऽनुमानमिति चेत् । तत्किमिदानीमात्मनः संयोगविशेषो जात इत्यात्मनाऽर्थं प्रति गुणभूतेन भवितव्यम् ? क्रिया हि गुणप्रधानभावमापादयति भावानां पाकादिषु तथोपलम्भात् चैत्रौदनादीनाम् । ननु क्रियोपधाननिबन्धनश्चेत्सम्बन्धः कथमप्रतीतायां क्रियायां शक्यः प्रतिपत्तुम् ? प्रतीता चेत्क्रिया न तर्हि सम्बन्धात्फलभूतात्तत्प्रतीतिः । नैतदस्ति । क्रियामन्तरेण हि न सम्बन्धः, न पुनः क्रियाप्रतीतिं विना न तत्प्रतीतिरप्रतीतायामपि क्रियायां सम्बन्धप्रतीतेः । यथाऽऽग्नेय इति शब्दाऽवगताद् द्रव्यदेवतासम्बन्धादनुमीयते यजिस्तथोत्पन्नविज्ञा[4]नादर्थं प्रति गुणभूतमात्मानं मनसैव सहसाऽवगम्य तद्धेतुं संवेदनक्रियामनुमिमीते । आत्ममनःसंयोगमात्रात्तदनुपपत्तेः । यथाह—'पूर्वं सा गृह्यते पश्चाद् ज्ञानं तज्ज्ञातताविशादि'ति ।

स्फुटत्वमपि ज्ञेयताविशेष एव न संवेदनविशेषः । तथा हि । सामान्यविशेषतद्वतां संवेद्यता स्फुटता, तद्विपरीतत्वमस्फुटता, यतो दूरे वृक्ष इति

---

१. भेदाश्रयत्वात इति पाठान्तरम् । २. प्रमित्सितस्य सापेक्षः २ पु० पा० ।
३. स नामेदृशः २ पु० पा० । ४. विज्ञानार्थं प्रति पु० पा० ।

तस्य ज्ञेयाऽवभासकार्यलक्षणत्वात् ।
विषयाऽभावाच्च व्युत्पत्त्यसम्भवे तदनपेक्ष[1]स्य प्रवृत्तिः स्यात् ।

प्रतियन्ति न पुनरशोक इति वा सहकार इति वा । प्रत्यासीदन्तस्तु मलयमारुताऽऽकम्पमाननवपल्लवमानन्दनिष्पन्दमधुपमालानिपीयमानमधुरमधुरसस्तवककदम्बकं रक्ताऽशोकपादम् । तस्माज्ज्ञेयतायामयं विशेषो न ज्ञाने इति सिद्धं पराञ्चः प्रत्यया न प्रत्यञ्च इति ।

प्रयोगस्तु विवादाऽध्यासिताः प्रत्ययान्तरेणैव वेद्याः प्रत्ययत्वात् ये ये प्रत्ययास्ते सर्वे प्रत्ययान्तरवेद्याः यथा न प्रत्ययान्तरेणैव वेद्याः । अविद्यमानस्याऽवभासेऽतिप्रसङ्गात् ज्ञायमानस्यैवाऽवभासोऽभ्युपेयः । तथा च विज्ञानस्य स्वसंवेदने तदेव तस्य कर्म क्रिया चेति विरुद्धमापद्येत । यथोक्तम्—

"अङ्गुल्यग्रं यथात्मानं नाऽऽत्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति" ।। इति ।

यत्प्रत्ययत्वं वस्तुभूतमविरोधेन व्याप्तं, तद्विरुद्धविरोधदर्शनात्स्वसंवेदनान्निवर्त्तमानं प्रत्ययान्तरवेद्यत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः । एवं प्रमेयत्वगुणत्वसत्त्वादयोऽपि प्रत्ययान्तरवेद्यत्वहेतवः प्रयोक्तव्याः । तथा च न स्वसंवेदनं विज्ञानमिति सिद्धम् ।

असिद्धश्च सहोपलम्भनियमः । फलभेदसमुन्नेयं च विज्ञानमभिन्नं सन्न फलभेदायाऽलमिति विनापि नीलाद्याभासं स्वभावत एव भेदात्प्रतिकर्म व्यवस्थाप्यते । तदेवमसति बाधकेऽनुभव एवात्मग्राही बाह्यसद्भावे प्रमाणं, न प्रमाणान्तरमत्राऽनुसरणीयम् । न हि करिणि दृष्टे चीत्कारेण तमनुमिमते प्रेक्षावन्तः । प्रमेयपरीक्षा तूपेक्षिता विस्तरभयात् । तदनेन प्रबन्धेनोक्तोऽभिसन्धिराचार्यस्य निरालम्बनं ज्ञानमयुक्तमेवेत्यवधारयतः ।

निराकरणान्तरमाह—तस्य ज्ञेयाऽवभासकार्यलक्षणत्वात् । ज्ञेयाऽवभासो ज्ञेयताऽर्थस्य तयाऽत्यन्तपरोक्षं विज्ञानमनुमातव्यं, तत्र प्रमाणान्तराभावादित्युक्तम् । निरालम्बनत्वे तु ज्ञेयाऽवभास एव नास्तीति केन ज्ञानमनुमीयेत ? यस्य निरालम्बनत्वं साध्येत । तदनेन धर्मिणः साध्यधर्मेण विरोधो दर्शितः । तथा चाऽऽश्रयाऽसिद्धत्वं हेतोरिति भावः । अपि च व्युत्पन्नसम्बन्धः शब्दः प्रतिभां भावयेत् । व्युत्पत्तिश्चाऽर्थेन सह शब्दस्य न विज्ञानेन कार्येण तस्याऽऽनन्त्याद् व्यभिचाराच्च । सामान्यस्य च प्रतिभातवस्याऽकार्यत्वात्कारकस्य

१. तदपेक्षस्य पु० पा० ।

ननु कारकसंसर्गिणी क्रिया आलम्बनमिष्टैव । न । तस्या अपवर्त्तक-वचनजन्मन्यपि प्रख्यायां साम्याल्लिङादियुक्तेभ्यो वचनेभ्यः प्रतिभाभेदादप्रवृत्तिप्रसङ्गात् ।

ननु नाऽप्रवर्तकमनिवर्तकं वा वचः समस्ति । वैयर्थ्यात् । कर्तव्यता-पर्यवसायिनी हि वाक्यप्रवृत्तिः । कथं तर्हि भूताऽन्वाख्यायिनो वेदान्ता-लौकिकवचांसि च ? कर्तव्यताभेदात् प्रवृ[1]त्तिनिवृत्तिप्रतिपत्तिविषयत्वात् । सर्वा हि कर्त्तव्यता भेदवती । वेदान्तेषु तावदात्मतत्त्वप्रतिपत्तिकर्त्तव्यता । लोके चेदमिह निध्यादि प्रतिपत्तव्यमिति वाक्यपर्य्यवसानम् ।

स्वकार्ये व्युत्पत्त्यनपेक्षत्वात् । अर्थश्च निरालम्बनत्वाऽभ्युपगमे नास्तीति व्युत्पत्तेरसम्भवात्तदनपेक्षस्य च प्राक् प्रवृत्तिः स्याऽन्न चासावस्तीत्याह—विषयाभावाच्च व्युत्पत्तेरसम्भवे[2] तदनपेक्षस्य प्रवृत्तिः स्यात् ।

कश्चिदाह—ननु कारकसंसर्गिणी क्रियाऽऽलम्वनमिष्टैव, तथापि न भवदभिमतोपायता सिध्यतीति भावः । दूषयति—न, तस्याः काष्ठैः पचयतीत्यत्राऽप्रवर्त्तकवचनजन्मन्यपि प्रख्यायां साम्यात्प्रवृत्तिः स्यादप्रवृत्तौ वा काष्ठैः पचेदिति लिङादियुक्तादपि वाक्यात्प्रतिभाया अभेदादप्रवृत्तिप्रसङ्गात् ।

परस्त्वप्रवर्त्तकवचनजन्मनीत्यमृष्यमाण आह—ननु नाऽप्रवर्त्तकम-निवर्त्तकं वा वचः समस्ति । कुतः ? वैयर्थ्यात् । परप्रत्यायनाय हि वचन-मुच्चारयन्ति प्रेक्षावन्तः । तदेव च परः प्रत्याययितव्यो यत्प्रयोजनवत् । न च भूताख्यानं तथा । तस्मात्प्रवर्त्तकं निवर्त्तकं वा वचो नाऽन्या गतिरस्तीत्यर्थः ।

ननु भूतान्वाख्यानमपि दृश्यते लोके वेदे च निधिमानेष भूभागः, 'सदेव सोम्येदमग्र आसी'दिति, अत्राह—कर्त्तव्यतापर्यवसायिनी हि सर्वा वाक्यप्रवृत्तिः । यद्येवं कथं तर्हि भूतान्वाख्यायिनो वेदान्ता लौकिकानि च भूयांसि वचांसि ? उत्तरम्—कर्त्तव्यताभेदात् । प्रवृत्तिनिवृत्तिप्रतिपत्ति-विषयत्वात् । एतदेव स्फुटयति—सर्वा हि कर्त्तव्यता भेदवती[3] । तमेव भेदमाह—वेदान्तेषु तावदात्मप्रतिपत्तिः कर्त्तव्यता । आत्मा ज्ञातव्य इति हि प्रतिपत्तिरात्मनि विधीयते, तत्परत्वं च वेदान्तानाम् । लोकेऽपि चेदमिह निध्यादि प्रतिपत्तव्यमिति वाक्यपर्यवसानम् । दूषयति—नैतत्सारम् । इदमत्र विकल्पनीयम् । आत्मप्रतिपत्तिकर्त्तव्यतापरत्वमुपनिषदाम् । तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति । श्रुतमयी, चिन्तामयी, साक्षात्कारवती, चेति । तत्र

---

१. वृत्तिनिवृत्ति पु० पा० । २. व्युत्पत्तेर्सम्भवे पु० पा० ।
३. सर्वाणि कर्तव्यताभेदवन्ति २ पु० पा० ।

नैतत्सारम् । शब्दात्प्रतिपत्तेरुत्पत्तेः[1] पुनस्तत्राऽव्यापारात् । कर्म्म-फलसम्बन्धबोधवत् । निश्चयोऽपि यदि शब्दात्, संजात एव, अन्यतश्चेत्तदा-प्रामाण्यम् । अर्थपरतापि न दृष्टार्थत्वात्स्वाध्यायाऽध्ययनविधेः कर्म्मवत् । अविशिष्टस्तु वाक्यार्थ इति न्यायात् । अन्यथा सविधिकस्यैव विवक्षितार्थत्व-प्रसङ्गात् । न च पुरुषार्थत्वाय विधिः प्रार्थ्यते । ज्ञानस्य ज्ञेयाऽभिव्यक्ति-

श्रुतमयीमधिकृत्याह—शब्दात्प्रतिपत्तेरुत्पत्तेः पुनस्तत्राऽव्यापारात् । न श्रुत-मयो विधेया । शब्दाद्विधेयमवगम्यते उत्तरकाला प्रवृत्तिर्विधिप्रयोजनं न पुनः शब्दाऽवबोध एव, आत्माश्रयदोषप्रसङ्गादिति भावः । कर्मफलसंबन्ध-बोधवत् यथा कर्मविधिवाक्यं न कर्मफलसंबन्धबोधे विधीतरमपेक्षते तथोप-निषदोऽपि नाऽऽत्मबोधे इत्यर्थः । शङ्कते—निश्चय आत्मनि । विधेः फलं विकल्प्य दूषयति—यदि शब्दात् संजात एवाऽन्यतश्चेत् प्रमाणान्तरात् तत्सा-पेक्षतयाऽप्रामाण्यं शब्दस्य । अथ विधिं विना वेदान्तानां शब्दस्वरूपपरता स्यात् स्वरूपप्राथम्यात् । यदा तु वेदान्तैरात्मा ज्ञातव्य इति विधीयते तदा तैर्नाऽविवक्षितार्थैः शक्यमात्मज्ञानं कर्तुमिति विवक्षिताऽर्थमर्थ्यते विधि-रित्याह—अर्थपरताऽपि न विधेः प्रयोजनम् । कुतः दृष्टार्थत्वात् स्वाध्याया-ऽध्ययनविधेः । उपनिषदां कर्मविधिवत् । 'अविशिष्टस्तु वाक्यार्थ' इति न्यायात् । प्रयोजनवदर्थाऽवबोधनं हि दृष्टं प्रयोजनमध्ययनविधेः । अक्षर-ग्रहणार्थत्वे त्वदृष्टार्थता स्यात् । यथा कर्मविधीनां विनैव विध्यन्तरेणाऽर्थ-परत्वमौत्सर्गिकमेवं, वेदान्तानामपीत्यर्थः । यदि पुनर्न स्वाध्यायविधिर्दृष्टार्थो यदि वा नौत्सर्गिकमर्थपरत्वं वचसां तत्र सविधिकमेवाऽविवक्षितार्थं स्यादि-त्याह—अन्यथा सविधिकस्यैव विवक्षितार्थत्वप्रसङ्गात् । यद्युच्येत विध्यभावे हि धात्वर्थ एव भावनाभाव्यः, समानपदोपादानत्वात् भवेद्विधौ सति तदति-क्रमेणाऽसमानपदोपादानोप्यार्थवादिकोऽप्यपुनरावृत्तिरूपः पुरुषार्थो लभ्यत-इति विधिः प्रार्थ्यत इत्यत आह—न च पुरुषार्थत्वाय विधिः प्रार्थ्यत इति । कुतः ? ज्ञानस्य ज्ञेयाऽभिव्यक्तिफलत्वात् । तस्य च तन्नान्तरीयकतया विधिमन्तरेणापि प्रापणात् । नन्वपुनरावृत्तिः फलं, श्रूयते हि वचनं 'न स पुनरावर्त्तते इति, न चाऽसौ विधिं विना शक्या प्रतिपत्तुमित्यत्राह—फलान्त-राऽनभ्युपगमात् । अपुनरावृत्तिरिति हि मोक्ष उच्यते । न चाऽसौ साध्य इति वक्ष्यते । अपि च प्रतिपत्तिविधिपरत्वे वेदान्तानां ब्रह्मस्वरूपसत्तायामप्रा-माण्यप्रसङ्गः । न ह्यसौ विधिनाऽपि तद्विषयो नित्यत्वात्, येन विधिरपेक्ष्येत । प्रतिपत्तिविषयो हि विधिः प्रतिपत्तिविषयमात्मतत्त्वमपेक्षते । तथा च

१. रनुत्पत्तेः पु० पा० ।

फलत्वात्फलान्तराऽनभ्युपगमात् क्रियापरत्वाच्च विधेर्वस्तुस्वरूपसत्ताया अविवक्षितत्वात्तत्प्रतिपत्त्यर्थमनुष्ठानं गम्येत नात्मतत्त्वाऽवबोधः स्यात् । अतः श्रूयमाणो विधिरेवंजातीयेष्वविवक्षितः । नित्यप्राप्तेः ।

ननु विधिरहितस्याऽनुवादरूपस्य साकाङ्क्षस्य प्रामाण्यमलभ्यम् । अथ केयमनुवादता ? प्रमाणान्तराऽधिगतार्थता, आहोस्विद्भूतार्थता ? प्रमाणान्तराऽधिगतार्थता चेद्विधिशून्यमप्यतादृशमप्यपौरुषेयं नाऽनुवादः । भूतार्थता चेत् कुतः सापेक्षता ? यदि लौकिकवचसां प्रमाणान्तराऽधिगतगोचरत्वाद् भूतार्थानां सापेक्षत्वं दृष्टम् औषधपानादिषु, विधयोऽपि लौकि-

तथात्मशब्दः प्रमाणमिति चेत् । न । आत्मतत्त्वमन्तरेण समारोपेणापि प्रतिपत्तेरुपपत्तेः । एवं च तत्परत्वाऽवभावाद्वेदान्तानां ब्रह्मविद्यात्वं प्रसिद्धं बाध्येतेत्येतदाह—क्रियापरत्वाच्च विधेर्वस्तुरूपसत्ताया अविवक्षितत्वात् तत्प्रतिपत्त्यर्थमनुष्ठानं गम्येत नात्मतत्त्वाऽवबोधः स्यात् । नन्वात्मा ज्ञातव्य इति श्रुतिरस्ति, न चासौ प्रमादः । तुल्यं हि साम्प्रदायिकम्, तदेकवाक्यता च वेदान्तानाम्, अतो निष्प्रोजनतया नाऽवज्ञानमर्हतीत्येतदुपसंहारव्याजेन निराकरोति—अतः श्रूयमाणो विधिरेवंजातीयकेषु विधानाऽनर्हेष्वविवक्षितः, नित्यप्राप्तत्वात् । सिद्धा हि वेदान्तेभ्यो विधिं विनापि ब्रह्मस्वरूपप्रतिपत्तिः । न ह्यस्ति सम्भवो विदितरूपसङ्गतिः शब्दन्यायविद्वेदान्तेभ्योऽर्थं न प्रतिपद्यत इति प्राप्तत्वात्, एवंजातीयकेषु श्रूयमाणो विधिरविवक्षितः । न च प्रमादोऽनुवादतोऽप्युपपत्तेः । ननु मा भूत्प्रतिपत्तिविधिः फलं, प्रामाण्यायैव तु विधिराश्रयिष्यते, अन्यथा तदयोगादिति चोदयति—ननु विधिरहितस्याऽनुवादस्वरूपस्य तत एव साकाङ्क्षस्य प्रामाण्यमलभ्यम्, अनपेक्षलक्षणत्वात्तस्या,ऽन्यथा स्मृतेरपि प्रामाण्यप्रसङ्गात् । तदेतद्विकल्पयति—अथ केयमनुवादता ? प्रमाणान्तराऽधिगतार्थताऽऽहोस्विद्भूतार्थता ? दूषयति—प्रमाणान्तराऽधिगताऽर्थता चेत् । विधिशून्यमपि तर्हि भूतार्थमतादृशं प्रमाणान्तरविषयीकृतार्थमपौरुषैयं नाऽनुवादः । ज्ञानपूर्वको हि पश्चाद्वादोऽनुवादः । अपौरुषेये तु ज्ञातुः कर्तुरभावान्न ज्ञानपूर्वक इति नाऽनुवादः । सापेक्षत्वेनेत्यनुषज्यते । पौरुषेयं हि वचः प्रमाणान्तरेणार्थं प्रतीत्य निर्मीयमाणं प्रमान्तरापेक्षं स्यान्न त्वेवमपौरुषेयमित्यर्थः । द्वितीयपक्षमाश्रित्याह—भूतार्थता चेत्किकृता सापेक्षता ? भूतार्थत्वसापेक्षत्वयोर्न प्रतिबन्धोऽस्ति कश्चिदित्यर्थः ।

शङ्कते—यदि लौकिकवचसां प्रमाणान्तराऽधिगतगोचरत्वाद् भूतार्थानां सापेक्षत्वं दृष्टमिति वैदिकान्यपि भूतार्थानि सापेक्षाणि । तत्रोत्तरम्—औषधपानादिषु विधयो लौकिकास्तथा साऽपेक्षा इति विधिमद्वैदिकमपेक्षेत ।

कास्तथेति विधिमंत्तदप्यपेक्षेत । अथाऽपौरुषेयत्वान्नाऽपेक्षते ततोऽपौरुषेयत्वमितरत्राप्यपार्थम् । अथ प्रमाणान्तरसंभवाद् भूतार्थस्य साऽपेक्षता, न विधिमतः । विध्यर्थे तदसंभवाल्लौकिकस्यापि तदनपेक्षताप्रसङ्गः ।

पुरुषबुद्धिप्रभवत्वाद्विनियोगस्य तत्साऽपेक्षतया तत्र सापेक्षत्वम् अपौरुषेये वचसि । सोऽपि न केवलं बुद्ध्यन्तरनिरपेक्षः, मानान्तरविषयोऽपि । तद्ध्यपौरुषेयवचननिमित्ताऽनपेक्ष इति यतोऽसावपेक्षत्वकारणं न मानान्तराऽसम्भवः । पौरुषेयता च सापेक्षत्वे हेतुः । नियोगनिष्ठेऽपि लौकिके वचसि सापेक्षत्वान्न प्रमाणान्तरसंभवः । तथा च सापेक्षत्वे प्रत्यक्षाऽनुमानयोः परस्पर-

अथ विधिमद्वैदिकमपौरुषेयत्वान्नाऽपेक्षते ततोऽपौरुषेयत्वमितरत्रापि वैदिकभूतार्थेऽप्यपार्थमिति । अथ प्रमाणान्तरसंभवाद् भूतार्थस्य वैदिकस्य सापेक्षता न विधिमतः । कुतः ? विध्यर्थे तदसंभवात् । प्रमाणान्तरासंभवात् । उत्तरं लौकिकस्याप्यौषधादिविधेस्तदनपेक्षत्वप्रसङ्गः । यदि मन्येत शब्दानामौत्सर्गिकी नियोगार्थता तदर्थस्वार्थता वा । तन्न । तदर्थस्वार्थानि द्रव्यगुणकर्मवचनानि न स्वार्थं केवलमेव नियोगेन घटयितुमीशत इति विनियोगमन्तराश्रयन्ते । सोऽयमजहत्क्रियाकारकसंसर्ग एषामर्थस्य नियोगसंवन्ध इति वैदिकी स्थितिः । उत्सर्गस्याऽनपोदितस्य[1] तादवस्थ्यात् अतोऽपौरुषेये नियोगविनियोगयोरबुद्धिपूर्वकत्वादनपेक्षत्वं शब्दस्य । लोकस्तु प्रमाणेनोपलभ्याऽर्थमन्यत्रोपलब्धं[2] वा समारोप्य वचनानि रचयति । यथा 'ज्वरितः पथ्यमश्नीयाद्धि', मोक्षमाणो नैरात्म्यं[3] भावयेदि'ति । न च नियोगः प्रमाणान्तरविषये समारोपविषयो वा, अन्यत्राऽनुपलब्धेः । तद्विषयस्तु विनियोगः प्रमाणान्तरगोचरः समारोपगोचरो वा संभवति । यथोपलम्भनं च विवक्षा, यथाविवक्षितं वचनरचनेत्यौत्सर्गिकीं नियोगपरतामपहाय लक्षणया विनियोगपरतामवलम्बते, पौरुषेयं च वस्तुतः सापेक्षमिति चोदयति—पुरुषबुद्धिप्रभवत्वाद्विनियोगस्य सापेक्षतया तत्र सापेक्षत्वम् । अपौरुषेये तु सोऽपि विनियोगोऽपि न केवलं नियोगो वुद्ध्यन्तरनिरपेक्षः । पुरुषबुद्धिप्रभवत्वं चाऽऽप्तवाक्ये विनियोगस्य ज्ञेयतयाऽनाप्तवाक्ये चाऽऽरोपिततयाऽवगन्तव्यम् । परिहरति—मानान्तरविषयोऽपि भूतरूपोऽर्थो नियोग इवापौरुषेयवचननिमित्ताऽनपेक्षः । यतोऽपौरुषेयताऽनपेक्षत्वकारणं न मानान्तराऽसम्भवः । पौरुषेयता च सापेक्षत्वे हेतुः । अत्रैवाऽन्वयव्यतिरेकौ दर्शयति—नियोगनिष्ठेऽपि लोकवचसि सापेक्षत्वात् । अयमर्थः । यदि न लौकिकं वचनं नियोगनिष्ठं भवेत् ततो वैदिकमपि न

१. अनपेक्षितस्य. १ पु० पा० । २. अर्थमुपलभ्य २ पु० पा० ।
३. नैरर्थ्यम् २ पु० पा० ।

विषयसंभवात्सापेक्षत्वात्प्रमाणत्वहानिः। अतः प्रमाणान्तरोपलब्धिविवक्षा-पुरःसरप्रवृत्तित्वाद्विधिमदितरत्वाद्वा वचनं सापेक्षम्। अतथाभावाद्वैदिकमुभय-मप्यनपेक्षमिति चतुरस्रम्। तेन प्रमाणत्वार्थमपि न विधिविवक्षा।

स्यात्, लोकावगतसम्बन्धस्य शब्दस्य वेदेऽपि बोधकत्वात्। अगृहीतसम्बन्धस्य तु बोधकत्वे प्रथमश्राविणोऽप्यर्थप्रत्ययः प्रसज्येत। तस्माद्यद्यपि परेषां राद्धान्ते न नियोगनिष्ठता पौरुषेयाणां वचसामपि तु विनियोगप्रधानता तथाप्यापाद्य नियोगनिष्ठत्वमेतदुक्तमिति मन्तव्यम्।

न प्रमाणान्तरसम्भवः सापेक्षत्वे हेतुः। सत्यपि तस्मिन् वैदिकस्य विनियोगस्यानपेक्षत्वात्। अत्रैव प्रसङ्गान्तरमाह—तथा च सापेक्षत्वे प्रत्यक्षा-नुमानयोः परस्परस्य विषयसम्भवात्सापेक्षत्वात्प्रमाणत्वहानिः। एतदुप-संहरति—अतः प्रमाणान्तरोपलब्धिविवक्षापुरःसरप्रवृत्तित्वाद्विधिमदितरद्वा पुरुषवचः सापेक्षम्। अतथाभावात्तु वैदिकमुभयमप्यनपेक्षमिति चतुरस्रम्। प्रकृतमुपसंहरति—तेन प्रमाणत्वार्थमपि न विधिविवक्षा।

कश्चिदाह सत्यमपौरुषत्वादनपेक्षता, तदेव तु प्रमाणान्तराऽगोचरार्थ-तया सिध्यति। न खल्वनालिख्य बुद्धावर्थं तत्प्रत्यायनाय वचनं रचयन्ति लौकिकाः। न च प्रमाणान्तरागोचरोऽर्थः शक्यो बुद्धावालिखितुम्। औत्स-र्गिकी च नियोगपरता शब्दानां, नेयमसत्यपवादे शक्या निह्नोतुम्। आम्नाये नियोगश्च प्रमाणान्तराऽगोचरः शब्दैकसमधिगम्य इति तदर्थत्वा-दपौरुषेयताऽऽम्नायस्य। पौरुषेयत्वे हि मुख्या नियोगार्थता हीयेत। अत एव वाक्यत्वादयोप्यागमबाधितविषया नाम्नायस्य पौरुषेयतां साधयितुमीशते। ततश्चाऽनपेक्षता। न चेयं विधा 'ज्वरितः पथ्यमश्नीयाऽदि'त्यादिषु सम्भवति, स्पष्टदृष्टेन पौरुषेयत्वेन मुख्यमपि नियोगार्थत्वमपोद्य लक्षणया विनियोग-परत्वाऽऽपादनात्। यदि पुनराम्नायस्य भूतार्थता भवेत्तदा तस्य प्रमाणान्तर-योग्यतया शक्यवचनत्वेन पोरुषेयता दुर्वारा भवेदिति प्रयत्नेन भूतार्थताम-पनीय कार्यपरत्वमाम्नायस्य व्युत्पाद्यत इति।

तदनुपपन्नम्। सिध्येदयं मनोरथो यदि तथाविधो विधिराम्नाय-गोचरः स्यात्, न त्वयं तद्गोचरः संभवतीत्युपपादितं नियोगपरीक्षायाम्। अपि चाऽयमौपनिषदोऽपि पुरुषो न प्रमाणान्तरगोचर इति कथमुपनिषदामपि पौरुषेयता दुर्वारा? तथाविधस्यान्यस्य सिद्धरूपस्य प्रमाणान्तरगोच-रत्वमुपलब्धमित्यस्यापि सिद्धतया तदर्थत्व[1]मिति चेत्। एवं तर्हि क्रियात्मनः

१. कर्तव्य- मू० पु०।

नन्वन्यदेवेदं शब्दप्रभवादात्मतत्त्वगोचरं ज्ञानं विधीयते। न हि शाब्दज्ञानपरिवेद्यं ब्रह्मस्वरूपम्। वाक्यलक्षणो हि शब्दः प्रमाणं, पदार्थसंसर्गात्मा च तदर्थः, प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वं, तत्कथमस्य गोचरः? तस्मात्प्रलीनसकलाऽवच्छेदोल्लेखमद्वैततत्त्वाऽवभासात्मकं ज्ञानमन्यदेव शाब्दाद्विधीयते।

वार्त्तमेतत्। न खलु फलांशो विधिगोचरः। निष्प्रपञ्चात्मतत्त्वाऽवभासश्च फलमेव न ततोऽन्यदभीप्स्यते। मोक्ष इति चेत्। ततोऽव्यतिरेकात्। सप्रपञ्चात्मतत्त्वावऽभासो हि संसारः। निष्प्रपञ्चात्मावऽभासो

कार्यस्य मानान्तरगोचरतेति कार्यतया नियोगस्यापि तदर्थत्वमिति तदर्थस्यापि वेदस्य पौरुषेयता दुर्वारा भवेत्। स्वरूपेण वा तस्य प्रमाणान्तराऽगोचरत्वे औपनिषदस्याऽऽत्मनोऽपि तदिति सर्वं समानमन्यत्राभिनिवेशात्। तदास्तां तावत्।

एवं तावन्न श्रुतमयी प्रतिपत्तिर्विधातव्येत्युक्तम्। ननु मा नामेयं विधायि, साक्षात्कारवती तु विधायिष्यते इति चोदयति—नन्वन्यदेवेदं शब्दप्रभवाद्विज्ञानादात्मतत्त्वगोचरं ज्ञानं विधीयते। कस्मात्पुनरात्मतत्त्वगोचरत्वं न शब्दस्येत्यत आह—न हि शाब्दज्ञानपरिवेद्यं ब्रह्मस्वरूपं, वाक्यलक्षणो हि शब्दः प्रमाणं, पदमात्रस्याऽप्रमाणत्वात्। तथापि किम्? इत्याह—पदार्थसंसर्गात्मा च तदर्थः, संसर्गश्च संसृज्यमानाऽनेकार्थतन्त्रत्वादेकोऽपि नानात्वाद्दूषितः। न चाऽऽमतत्त्वमेवंभूतमित्याह—प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वं, तत्कथमस्य गोचरः? उपसंहरति—तस्मात्प्रलीनसकलावच्छेदोल्लेखमद्वैततत्त्वावभासनात्मकं ज्ञानमन्येव शाब्दाद्विधीयते।

एतद् दूषयति—वार्त्तमेतत्। न खलु फलांशो विधिगोचरो, यथाह महर्षिः—'तस्य लिप्साऽर्थलक्षणा निष्प्रपञ्चात्मतत्त्वावभासश्च फलमेव'। निष्प्रपञ्चेति विगलितनिखिलदुःखत्वमाह। प्रपञ्चो हि दुःखं, तत्त्वग्रहणेनाऽऽनन्दात्मतां सूचयति। बहुलमानन्दश्रुतेः फलत्वमेव दर्शयति। न ततोऽन्यद्धीप्स्यते विगलितदुःखत्वादानन्दात्मत्वाच्च।

चोदयति। मोक्ष इति चेत्। श्रूयते हि 'न स पुनरावर्त्तते' इति। परिहरति—न। ततो निष्प्रपञ्चाऽऽत्मतत्त्वाऽवभासादव्यतिरेकात्। अव्यतिरेकमेव दर्शयति—सप्रपञ्चात्माऽवभासो हि संसारः। निष्प्रपञ्चात्माऽवभासो मोक्षः। संसारविरुद्धस्वभावो मोक्ष इति तत्स्वभावकथनाय संसारोऽपि दर्शितः। न चाऽसौ प्रवृत्तिविषयोऽपि, सिद्धत्वादित्याह—स्वात्मनि स्थितिः।

हि मोक्षः स्वात्मनि स्थितिः। अन्यथा कार्य्यत्वादमोक्षात्। बन्धहेतुश्च कर्म्मादिप्रपञ्चोऽविद्या, तदुच्छेदश्च विद्यैव। यदि च न कथंचिदपि शब्दज्ञानविषयो ब्रह्म कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः? विषयतश्च ज्ञाननिरूपणं, सिद्धश्च तन्निरूपयति, तत्सिद्धिश्च प्रमाणान्तराऽभावात् स्यात्। तस्यापि चेदविषयः तदसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विध्यप्रतिपत्तिः। अथ कथंचिद्विषयः, न तर्हि शाब्दज्ञानाऽनपेक्षता। प्रतिपत्ति[1]कर्त्तव्यतापरत्वाच्च वचनस्येदृक्ता नाऽऽगमार्थः स्यादित्युक्तम्। नाप्यार्थोऽर्थः। अध्यारोपेणापि प्रतिपत्तेः संभवात्। अतो न नियोगाऽनुप्रवेशेन वस्तुतत्त्वं प्रकाश्यते। न हि

अनेन पराऽभिमता मोक्षावस्था व्युदस्ता वेदितव्या। तद्व्युदासहेतवश्च ब्रह्मसिद्धौ प्रपञ्चिताः। यदि तु न स्वात्मनि स्थितिः, अपि तु पराऽभिमतो मोक्षस्तत्राह—अन्यथा कार्यत्वादमोक्षात्। अथाऽविद्योच्छेदः कस्मान्न भवति? इत्यत आह—बन्धहेतुश्च कर्मादिरूपः प्रपञ्चोऽविद्या, नाऽन्या। ततः किं? तदुच्छेदकश्च विद्यैव। निष्प्रपञ्चात्मतत्त्वावभास आत्मतत्त्वमेव सः, स एव च मोक्ष इति न प्रवृत्तिविषयः। अत्रैव दूषणान्तरमाह—यदि च न कथंचिदपि शब्दज्ञानविषयो ब्रह्म, कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः? किमिति न शक्यप्रतिपत्तिः? इत्यत आह—विषयतश्च ज्ञाननिरूपणम्। चो हेत्वर्थे। निरूप्यतां विषयेण, को दोष? इत्यत आह—सिद्धश्च विषयो ज्ञानं निरूपयति सोऽपि सिध्यतु, का क्षतिः? इत्यत आह—तत्सिद्धिश्च प्रमाणान्तराऽभावाच्छब्दादभ्युपेतव्या। तस्यापि चेदविषयः तदसिद्धेर्विषयाऽसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विध्यप्रतिपत्तिः।

शङ्कते। अथ कथंचित्तद्विषयः। यद्यपि तत्स्वरूपं न शब्दगोचरस्तथापि भेदप्रपञ्चविलयद्वारेण निरूपणाद्विषयभाव इत्यर्थः। परिहरति—न तर्हि शब्दज्ञानाऽपरिच्छेद्यता। प्रथमपक्षोक्तं दूषणमत्रापि योजयति—प्रतिपत्तिकर्त्तव्यतापरत्वाच्च वचनस्य, ईदृशं प्रतिपत्तव्यमितीदृक्ता नाऽऽगमार्थः स्यादित्युक्तं, यत्परः शब्दः स शब्दार्थः। प्रतिपत्तिकर्त्तव्यतापरश्चेन्न प्रत्येतव्यत्वपर इत्यर्थः। स्यादेतत्। कर्त्तव्यतायाः प्रतिपत्तिगोचरत्वात्प्रतिपत्तेश्च प्रतिपाद्यविषयत्वात्कर्त्तव्यतैव प्रतिपत्तिं तद्विषयं[2] चाऽऽक्षेप्स्यति, ततश्च प्रत्येतव्यतत्त्वनिश्चय इत्यत आह—नाप्यार्थोऽर्थः। कुतः? अध्यारोपेणापि प्रतिपत्तिसंभवात्। सत्यं, प्रत्येतव्यमाक्षिपति प्रतिपत्तिविषया कर्त्तव्यता, न तु तस्य तथात्वमपि, समारोपेणापि प्रत्येतव्योपपत्तेरित्यर्थः। इदं दूषणपमु-

---

१. प्रमित्यर्थ. मू० पु०। २. कर्तव्यतेव प्रतिपत्तिस्तद्विषयम्. २ पु० पा०।

तत्र शब्दस्य प्रामाण्यम् । एवमनपेक्षतया प्रामाण्यसिद्धेः कार्य्याऽन्वयरहित-भूतादिकमप्यवगमयितुमलमाम्नाय इत्यसमञ्जसमेतत् । यदि कार्य्यरूप एव वेदार्थः कथं तर्हि मन्त्राऽर्थवादाः सोपनिषत्काः ? यस्माद् भूतादिकमर्थं चोदनैव गमयति । कथम् ? कार्य्यमर्थमेवमवगमयन्ती भूतादिकमपि गमयति ।

संहरति—अतो न नियोगाऽनुप्रवेशेन वस्तुतत्त्वं प्रकाश्यते । न हि तत्र वस्तु-तत्त्वे शब्दस्य प्रामाण्यम् ।

उपसंहरति—एवं भूतार्थत्वेऽप्यनपेक्षतया प्रामाण्यसिद्धेः कार्याऽन्वय-रहितः स्वरूपेणाऽपि भूतादिकमर्थमवगमयितुमलमाम्नाय इति । चोदना हीति भाष्यग्रन्थस्य निबन्धनकृतो व्याख्यानमसमञ्जसमित्याह—इत्यस-मञ्जसमेतत् । सर्वनामपरामृष्टं निबन्धनकृतो व्याख्यानमाह—यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्राऽर्थवादाः सोपनिषत्का भूतार्थाऽभिधायिन इत्या-शङ्क्याऽवतारितं चोदना हीति, तस्याऽर्थमाह—यस्माद् भूतादिकमर्थं चोदनैव गमयति । यदि भूतादिरर्थश्चोदनाया न स तर्हि कार्यरूपो वेदार्थः, न चाऽन-पेक्षेत्याशयवान्पृच्छति—कथम् ? उत्तरं—कार्यमवगमयन्ती भूतादिकमपि गमयति । द्विविधो हि शब्दः कार्याऽभिधायी लिङादिः, भूताद्यभिधायी च लङादिः । तत्र लिङादेस्तावत्कार्याऽभिधायित्वादेव तत्परत्वम् । लङादयस्तु[1] भूतादिकार्यपरतया तदन्वितमेवाऽभिदधति । ततश्च तेषामपि कार्ये तात्पर्या-त्कार्यार्थत्वं सिद्धम् । तथा च भूताद्यभिधायिनामपि निरपेक्षत्वम् । यथाह—नाऽन्यत्किंचनेन्द्रियमिति । इदं च व्याख्यातम्, न च प्रमाणान्तरगोचरोऽय-मित्यादिना । एतदुक्तं भवति न कार्यसम्बन्धिना रूपेण प्रमाणान्तरेणाऽव-गम्यत इति । तदिदमसमञ्जसम् । भूतार्थपरत्वेऽप्यनपेक्षत्वेन प्रामाण्योपपत्तेः । स्यादेतत् । वृद्धव्यवहाराऽवगम्यः शब्दाऽर्थसंबन्धः । स च प्रवृत्त्यात्मकः । प्रवृत्तिश्च कार्याऽवगमपूर्विका प्रेक्षावताम्, अतः कार्ये एव सर्वे साक्षात्तदन्वित-स्वार्थतया वा लब्धव्युत्पत्तयः शब्दा इति कार्यरूप एव वेदार्थ इति ब्रूमो न पुनः प्रामाण्यायेति । तदप्युक्तम् अन्यथापि व्युत्पत्तेरुपपत्तेः । तथा हि । इन्द्रमित्रः प्रतिपन्नदेवदत्तानन्दनिबन्धनपुत्रजन्मा देवदत्तगृहादेव वार्त्ताहरेण सह देवदत्ताभ्याशमागतः पटवासोपायनाऽर्पणपुरःसरं दिष्ट्या देवदत्त वर्धसे, ते पुत्रो जात इति वार्त्ताहरव्याहारसमनन्तरमुन्मीलत्पुलककपोलमुत्फुल्ललो-चनयुगलमतिस्मेरं मुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, तत्प्रमोदहेतुश्च पुत्रजन्मविज्ञानम्, अन्यस्य तदानीमनुपलब्धेः । वचनोच्चारणा-

---

१. लङादयस्तु. १ पु० पा० ।

अन्ये तु शाब्दज्ञानसंतानविधानमिच्छन्ति। तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात्। अत्रापि[1] नात्मरूपाऽवगतिः। ज्ञानप्रकर्षश्चाऽभ्यासनिबन्धनः प्रथित इति न चोदनार्थता। तस्माद् दृष्टार्थेषु कर्म्मसु विशेषविधयः। उपनिषदात्मतत्त्वं त्वनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते। अलं वा गुरुभिर्विवादेन।

नन्तरं च तद्भावाद्वचनस्य तत्र हेतुतामवगच्छति। न चाऽसमर्थस्याऽसाविति सामर्थ्यमवैति। एवंविधविषये हर्षजनकं हेत्वन्तरं शङ्कमाना जननीजारशङ्कयाऽऽत्मनोऽपि ब्राह्मण्यं प्रति संदिहाना नाऽधिकारभाजो ब्राह्मणोचितासु क्रियास्विति कृतं मीमांसाऽभ्यासपरिश्रमेण तेषाम्। अपि चाऽव्युत्पन्नकाष्ठशब्दार्थो व्युत्पन्नविभक्त्यर्थश्च वर्त्तमानाऽपदेशेऽपि देवदत्तः स्थाल्यामोदनं काष्ठैः पचतीति पचत्यर्थे करणं पश्यति, तस्य काष्ठप्रातिपदिकार्थतां च प्रतिपद्यत इति सिद्धं विवादाध्यासितं वचनं कार्याऽसङ्गताऽर्थगोचरं तत्र प्रमाजननात् यद्यत्र प्रमाजननं तत्तद्गोचरं यथारूपादिगतं चक्षुरादीति।

सम्प्रति चिन्तामयीं प्रतिपत्तिं निराचिकीर्षुस्तामुपन्यस्यति—अन्ये तु शाब्दज्ञानविधानसन्तानविधानमिच्छन्ति। न च तत्फलरूपं येन न विधीयते, अपि तु फलस्याऽऽत्मतत्त्वसाक्षात्कारस्य साधनम्, अतो विधातव्यमित्याह—तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात्। संशयादिपर्युदासो विशुद्धिः। साक्षात्कारो विशदता। तत्र तावत्पूर्वोक्तं दोषमासञ्जयति—अत्रापि नाऽऽत्मरूपाऽवगतिः, प्रतिपत्तिविधिपरत्वाद्वेदान्तानामिति। भावनाऽऽधेयविशदाभत्वं च विज्ञानानामन्वयव्यतिरेकसिद्धमिति प्राप्तत्वान्न शाब्दज्ञानसमानज्ञानसन्तानो भावनापरनामा विधेय इत्याह[2]—ज्ञानप्रकर्षश्चाऽभ्यासनिबन्धनः प्रथित इति न चोदनार्थता युक्ता।

ननु 'तस्माच्छान्तो दान्तः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येत्'-इत्यादिवाक्यान्यात्मदर्शनं शान्ततादिगुणोपेतं विदधत्येव, न चाऽविधीयमाने आत्मदर्शनाश्रयिणो गुणा विधातुं शक्यन्ते इति शान्ततादिगुणविधानायाऽऽत्मदर्शनमपि विधातव्यमित्यत आह—तस्माद् दृष्टार्थेष्विव कर्मसु विशेषविधयः, उपनिषदात्मतत्त्वं त्वनपेक्षितविध्यन्तराद्वाक्यात्प्रतीयते। इदमत्राकूतम्। गुणविधयो[3] हि भावार्थसिद्धिमपेक्षते न पुनस्तद्विधानमपि तेन, यथैव रागतः प्राप्ते द्रव्याऽर्जने ब्राह्मणादीनां प्रतिग्रहादयो नियम्यन्ते तथेहापि नित्यानन्दमयमात्मतत्त्वं विगलितनिखिलदुःखाऽनुषङ्गं साक्षाच्चिकीर्षोरन्वयव्यतिरेका-

१. तथापि मू० पु०। २. शाब्दं ज्ञानं विधेयमित्याह—२ पु० पा०।
३. विषयो पु० पा०।

भवतु वा प्रतिपत्तिकर्त्तव्यता[1] नियोगद्वारेणात्मतत्त्वावगतिर्लोकवचांसि भूयांसि भूताऽन्वाख्यानानीत्युक्तम् ।

ननु वैयर्थ्यमत्रोक्तम् । प्रतिपत्तिविधावपि तुल्यमेतत् । भूतार्थप्रतिपत्तेरनतिरेकात् । अथाऽविपरीतात्मप्रतिपत्तिरेव । सा भूताऽऽख्यानपर्य्यवसानेऽपि तुल्या । अस्तु तर्हि प्रवृत्तिपर्य्यवसायित्वमेव सर्ववचसां भूतोऽप्यर्थः कथ्यते । तेनाऽन्यत्र प्रवृत्तिं कर्तुं तत्रैव वा, अन्यथार्थाभावात् । न । कुतुहलनिवृत्तेरप्यर्थत्वात् । तथा हि । अजिहासिताऽनुपादित्सितदूरदेशराजसंज्ञाचरितगोचराः कुतूहलिनां दृश्यन्ते प्रश्नाः । कुतूहलनिवृत्तिपराणि च तज्ज्ञानां

ऽवगतध्यानसाधनस्याऽऽत्मध्याने प्रवृत्तस्य शान्तत्वादिविधिरिति । ततस्तिसृणामपि प्रतिपत्तीनां विधानाऽनर्हत्वादात्मतत्त्वप्रतिपादनपरत्वं हि वेदान्तानामुपपादितम् । सर्वं चैतद् ब्रह्मसिद्धौ कृतश्रमाणामनायाससमधिगमनीयमिति नेहाऽस्माभिरुपपादितम् ।

इदानीमभ्युपेत्याह—अलं वा गुरुभिर्विवादेन । अनुत्तरार्हतासाम्यादौपचारिकं गौरवम् । भवतु प्रतिपत्तिकर्त्तव्यता नियोगद्वारेणात्मतत्त्वावगतेः, लोकवचांसि तु भूयांसि भूताऽन्वाख्यानानीत्युक्तम् । तथाप्यप्रवर्त्तकवचनजन्मन्यपि प्रख्यायां साम्यादिति हेतुः सिद्धो भवतीत्यर्थः । ननु नाऽप्रवर्त्तकं वचो, यतो वैयर्थ्यमत्रोक्तम् । परिहरति—प्रतिपत्तिविधावपि तुल्यमेतत् । कुतः ? भूतार्थ[2] प्रतिपत्तेरनतिरेकात् । यदि भूतोऽर्थः प्रयोजनाऽभावान्नाऽऽख्यातव्यस्तर्हि प्रतीतिरपि तद्विषया न विधातव्या । न ह्येतस्याः प्रत्येतव्यव्याप्तेरन्यत् फलमस्तीत्यर्थः । अथाऽविपरीताऽऽत्मप्रतिपत्तिरेवार्थः प्रतिपत्तिविधेः । प्रतिपत्तिविधिपक्षे तावदयमर्थो न भवतीत्युक्तम् । अभ्युपगम्य परिहारान्तरमाह—सा प्रतिपत्तिर्भूताख्यानपर्यवसानेऽपि तुल्या ।

पुनश्चोदयति—अस्तु तर्हि प्रवृत्तिनिवृत्तिपर्यवसायित्वमेव सर्ववचसां भूतोऽप्यर्थः कथ्यते । तेनाऽन्यत्र प्रवृत्तिं कर्तुं तत्रैव वा, अन्यथाऽर्थाभावात् । इदमत्राऽऽकूतम् । सर्वो हि शब्दः परार्थमुच्चार्यते प्रेक्षावद्भिः, परश्च तमेवाऽर्थं प्रतिपद्यते यस्तेन प्रतिपित्सितः, यस्तस्य हेय उपादेयो वा, उपेक्षणीयप्रत्यायने प्रेक्षावत्त्वव्याघातात् । विशेषतस्तु वेदराशेः स्वाध्यायाऽध्ययनविधिसमयसमासादितपुरुषार्थशेषभावस्य । तेन भूतार्थप्रतिपत्तेर्भवतु तत्र शब्दस्य कारणत्वं, किं तु शब्दस्य प्रवृत्तिनिवृत्तिपरत्वमिति । परिहरति—न कुतूहलनिवृत्तेरप्यर्थत्वात् । एतदेव दर्शयति—तथा हि । अजिहासिताऽनुपादित्सितदूर-

१. ज्ञानविषयाइति मू० पु० । २. तुल्यमेतत् । भूतार्थ २ पु० पा० ।

वचांसि । अटवीवर्णकादयः प्रवृत्तिनिवृत्तिशून्या भारतादिषु भूतपर्य्यवसायिनो रूपादेव प्रीतिहेतवः, प्रीत्युत्पत्त्यर्थं चेष्टाख्यानानि न प्रवृत्तये निवृत्तये वा श्रोतुरित्यलमतिप्रसङ्गेन ।

शिशुशकुन्तादीनां यथा विप्रकृष्टः शब्दो निमित्तम् भावनाऽनुगमात् प्रतिभायाः, तथा तादृशमेवोपायज्ञानं प्रवृत्तिनिवृत्तिमुखेन किं नेष्यते ? जातिविशेषादयश्च शब्दभावनाया इवोपायज्ञानभावनायाः प्रबोधकाः ।

देशराजसंज्ञाचरितादिगोचराः कुतूहलिनां दृश्यन्ते प्रश्नाः । कुतूहलनिवृत्तिपराणि च तज्ज्ञानां वचांस्यटवीवर्णकादयश्च प्रवृत्तिनिवृत्तिशून्या भारतादिषु भूतपर्यवसायिनो रूपादेव प्रीतिहेतवः । प्रीत्युत्पत्त्यर्थं च इष्टा[1]ऽऽख्यानानि न प्रवृत्तये निवृत्तये वा श्रोतुरित्यलमतिप्रसङ्गेन । इदमत्राकूतम् । प्रेक्षावन्तो न प्रवृत्तिनिवृत्तिविषयमेवाऽर्थमवगमयन्ति, अपि तु प्रयोजनवन्तम् । प्रयोजनवत्ता च क्वचिदर्थस्वरूपप्रत्ययोत्तरकालाभ्यां प्रवृत्तिनिवृत्तिभ्यां परिसमाप्यते, क्वचिदर्थस्वरूपप्रत्ययेनैव । तदुक्तम्—कुतूहलिनिवृत्तेरप्यर्थत्वादिति । एवं ब्रह्मस्वरूपमप्यपहतपाप्मज्ञानमागमौपनिषदं स्वयमेव पुरुषार्थ इति स्वाध्यायविध्यविरोधान्नोपनिषदां प्रवृत्तिनिवृत्तिपरतेति साम्प्रतम् । तत्सिद्धं क्रियासाधनयोगिनी समाऽन्यस्मिन्निति न प्रतिभाया आलम्बनम् । न च निरालम्बनेयम् । तत्पारिशेष्यात् हितोपायताविषयेति ।

यदुक्तं स्वरविशेषादाश्रयविशेषात् शिशुशकुन्तादीनां पूर्वपूर्वशब्दभावनाऽनुगमाद्विप्रकृष्टशब्दव्यापारा प्रतिभा प्रवृत्तिनिबन्धनं नोपायज्ञानमिति, तत्राह—शिशुशकुन्तादीनां यथा विप्रकृष्टः शब्दो निमित्तं भावनानुगमात्प्रतिभायाः, तथा तादृशमेवोपायज्ञानं प्रवृत्तिनिवृत्तिनिबन्धनं भावनाऽनुगममुखेन किं नेष्यते ? किं विप्रकृष्टशब्देन ? उपायज्ञानस्येव प्रवृत्तिहेतुतया अन्यत्र स्वाऽनुभवसिद्धत्वात् । यथा चैतत्तथोपरिष्टाद्वक्ष्यते । यदि मन्येत उपायज्ञानाऽऽहिता चेद्भावना प्रवृत्तिहेतुः अथाऽनुभूतचरशकुन्तजन्मनो मनुष्यस्यापि किमिति न तया प्रवृत्तिः ? इत्यत आह—जातिविशेषादयश्च शब्दभावनाया इवोपायज्ञानभावनायाः प्रबोधकाः । अथ शब्दभावनापि किमिति न तथा ? जातिविशेषादृष्टादिति चेत् । उपायज्ञानभावनायामपि तुल्यमेतदित्यर्थः ।

---

१. इष्ट २ पु० पा० ।

ननु प्रतिभालम्बनस्य स्वरूपतोऽनिष्पत्तेः शब्दज्ञानाकारेणैव निरूपणा। न च प्रत्युत्पन्नः शब्दोऽस्ति। तदस्याश्रयणीया भावना। नैतत्सारम्। अनिष्पत्तिर्हि अवर्तमानत्वाद्वाऽनेकार्थसमाहारादेकात्मभावाद्वा प्रतिभालम्बनस्योच्यते। शब्देऽप्यसौ तुल्या। सोऽपि तर्ह्यतीतो वर्णसमाहारात्मको नैकः समस्ति। भेददर्शनाऽभावात्, अभेददर्शनाच्चेत्युक्तम्।

अत्र चोदयति—ननु प्रतिभालम्वनस्य समीहितोपायस्य क्रियाविशेषस्य स्वरूपतोऽनिष्पत्तेर्नाऽसाववलम्वनम्। न च निरालम्वनं ज्ञानमित्युक्तं भवतैव, अतः शब्दज्ञानाकारेणैव निरूपणा। न च प्रत्युत्पन्नशिशुशकुन्तादीनां शब्दोऽस्ति। तदवश्याऽऽश्रयणीयाऽपूर्वशब्दभावना। परिहरति—नैतत्सारम्। विकल्पाऽनुपपत्तेः। तत्र तावद्विकल्पयति—अनिष्पत्तिर्ह्यवर्तमानत्वाद्वाऽनेकार्थसमाहारादेकात्मभावाद्वा प्रतिभालम्वनस्योच्यते। वर्त्तमानविषयं खलूपायज्ञानं न प्रवर्तयति प्रवृत्तविषयत्वात्। अतोऽनागतविषयमेषितव्यम्। तथा चाऽसत्त्वनिष्पत्तिः प्रतिभालम्बनस्य। अथ वा प्रतिभाविषयस्य पदार्थसंसर्गात्मकत्वात्तस्य चैकस्याऽनुपपत्तेः परस्परव्यवच्छिन्नक्रियाकारकाऽनेकार्थसमाहारमात्रत्वात्। न चाऽनेकात्मकमेकं भवितुमर्हति, अनेकेषामप्येकत्वप्रसङ्गात्। तथा च न संसर्गः। नानात्वे च संसर्गिण एव। तथा च न संसर्ग इत्यन्ताभावो निष्पत्तिरित्यर्थः। तदेतदुभयं परपक्षे तुल्यमित्याह—शब्देऽप्यसौ तुल्या। सोऽपि ह्यतीतो वर्णसमाहारात्मको नैकः समस्ति।

ननु वर्णव्यतिरिक्तः स्फोटात्मा शब्दः परैरभिमतः, स चैक इति स युक्तः प्रतिभालम्वनमिति शङ्कां निराचिकीर्षुः स्फोटनिराकरणपराणि सिद्धवद्भाष्याक्षराणि पठति—भेददर्शनाऽभावादभेददर्शनाच्चेत्युक्तं भाष्यकृता। वर्णेभ्यो भिद्यते इति भेदः स्फोट उच्यते। तद्दर्शनाऽभावात्। भेददर्शनाऽभावात्। न जातु गौरिति चतुर्थ्यामपि बुद्धौ क्रमभेदवदनुभवकर्मतोऽप्रश्लिष्टवर्णत्रयाऽवगाहिन्यामन्यो वर्णेभ्यः कश्चिदाभासते। यद्युच्येत जरा राजेति तत्त्वेऽपि वर्णानामर्थधीभेदादन्यो वर्णेभ्यो वाचकः, स च स्फोट इति, तत्राह—अभेददर्शनाच्च। भिद्यन्त इति भेदाः, न भेदा अभेदा वर्णास्तेषां दर्शनात्। एतदुक्तं भवति, न तु जरा राजेति पञ्चम्योरपि बुद्ध्योर्वर्णाऽतिरिक्तौ परस्परविभिन्नवाचकौ चकास्तः, किं तु त एव वर्णाः क्रमभेदवदनुभवाहितसंस्कारभेदा भासन्ते, ते च स्फोटधीभेदमाधास्यन्ति। अवश्याभ्युपेतव्यत्वादनवयवपदवादिनामपि संस्कारभेदस्येति दिङ्मात्रमत्र सूचितमाचार्यमतमनुवर्त्तमानैः।

नन्वेवंजातीयकेष्वेवाऽभेदवस्तुबुद्धेरेकशब्दात्मकमुपागमन्। न ह्यवस्तुषु संसर्गसमूहात्यन्ताऽसदादिषु संसर्गिषु वा नानात्मस्वेकवस्तुप्रतिभासः संभवति विनैकस्य शब्दात्मनः प्रत्यासात् परिणामाद्विवर्त्ताद्वेति। न। अन्यथा सिद्धेः।

पुनः प्रकारान्तरेण परः प्रत्यवतिष्ठते—नन्वेवंजातीयकमेवाभेदवस्तुबुद्धेरेकशब्दात्मकमुपागमन् धीराः। तथा हि। क्रियाकारकगुणगुणिप्रयोजनप्रयोजनिप्रभृतिषु संसर्गिषु समूहिषु वा शिंशपाऽशोककिंशुकादिषु संसर्गः समूहश्चैको वस्तुभूतश्चकास्ति, चकासति वा शशविषाणाऽऽलातचक्रादयोऽवस्तुभूताः। सैवंविधेष्वेकबुद्धिर्वस्तुबुद्धिश्चैकमनवयवशब्दात्मानमेवाऽवलम्बते।

अथ संसर्गादय एव तद्वन्तो वा एकबुद्धेर्वस्तुबुद्धेश्च कस्मान्नाऽऽलम्बनम्? इत्यत आह—न ह्यवस्तुषु संसर्गसमूहाऽत्यन्ता[1]सदादिषु वा नानात्मस्वेकवस्तुप्रतिभासः संभवति। संसर्गादयो हि न परमार्थसन्तः संभवन्ति। तथा हि प्रसङ्गसाधनम्। यदनेकवृत्ति तन्नाना तद्यथा भिन्नभाजनगतानि तालफलानि। अनेकवृत्तिश्च पराभ्युपगतः संसर्गादिरिति स्वभावहेतुः। नानात्वाऽभावाच्चाऽनेकवृत्तित्वाभाव इत्यतिप्रसङ्गविपर्ययो व्यापकाऽनुपलब्धिः। न चैकत्वाऽनेकवृत्तित्वयोरविरोधात्संदिग्धो व्यतिरेक इति वाच्यम्। अविरोधाऽसिद्धेः। तथा हि। एकस्य सत्त्वं विरोध्यभावेन व्याप्तं तद्विरुद्धश्चेह विरोधी[2] व्यापकविरोधोपलब्ध्या भाविकमेकत्वं निवर्त्तयति। तथा चैकत्वाऽभावात्संसर्गिण एव न संसर्गः तथा हि एकस्मिन्संसर्गिणि परिच्छिद्यमाने तदभावो व्यवच्छिद्यते। तदभाववन्तश्चाऽन्ये संसर्गिण इति तेऽपि व्यवच्छिद्यन्ते। अन्यथाऽसौ संसर्गी[3] परिच्छेद्यो न स्यात्। तथा तत्संसर्गिसम्बन्धे च स्वभावे संसर्गस्य परिच्छिद्यमाने तत्संसर्गिस्वभावाऽभावो व्यवच्छेत्तव्यः। तदभाववन्तश्च संसर्ग्यन्तरसम्बन्धस्वभावा इति तेऽपि व्यवच्छेत्तव्याः। तदव्यवच्छेदे स एव तत्स्वभावः स एवाऽतत्स्वभावश्चेति विरुद्धमापद्येत। सोऽयं तद्देशत्वाऽतद्देशत्वलक्षणविरुद्धधर्माध्यासः। तदाह देशकालाऽवस्थाविशेषनियतैकसंसर्गव्यवच्छिन्नस्वभावान्तरविरहादनेकवृत्तेरेकस्य तद्देशादिविशेषवत्ताऽन्येन योग इति। अथैकस्मिन्नेव संसर्गिणि गृह्यमाणे तद्गतः संसर्गोऽपि गृह्येत, तेनैव स्वभावेन संसर्ग्यन्तरेष्वप्यस्तीति तान्यपि ग्रहीतव्यानि। न च तानि गृह्यन्ते, इति संसर्गोऽपि न गृह्येतेति सोऽयं ग्रहणाऽग्रहणलक्षणो विरोधः। तथा नानासंसर्गिषु वर्त्तमानः संसर्गो भागशो वर्तते, कार्त्स्न्येन वा? न तावद्भागशो, निर्भागत्वात्। सभागत्वे वाऽनवस्थापातात्। नापि कार्त्स्न्येन, संसर्ग्यन्तरे तदभावप्रसङ्गात्। न च प्रकारान्तरमस्ति, तयोरन्यतरनिषेधस्याऽन्यतरवि-

१. संसर्गि पु० पा०। २. विरोध्ये पु० पा०। ३. संसर्गाऽपरि पु० पा०।

संसर्गस्तावद्वाक्यार्थलक्षणः कारकोपसर्जनक्रियाप्रधानोऽतुल्यप्रधानसंसर्गी ।

धिनान्तरीयकत्वात् । तस्मान्न संसर्गसमूहौ परमार्थसन्तौ । एतेनाऽवयविसामान्यादयः प्रयुक्ता वेदितव्याः । शशविषाणादेश्चाऽसत्त्वं प्रसिद्धतरमेवेत्यभिप्रायः ।

न चैष संसर्गादिबाधकप्रकारः पदे निरवयवे समस्तीत्याह—विनेकस्य शब्दात्मनः प्रत्यासात्परिणामाद्विवर्ताद्वा । प्रत्यासोऽध्यासः । यथा वस्तुतः स्वच्छधवले लाक्षारसावसेकतिरस्कृतधवलिम्नि स्थवीयसि स्फटिकमणौ तनीयस्तया लाक्षालक्षणद्रव्यारोहणाल्लाक्षागुणाऽऽरोपेणाऽरुणः स्फटिकमणिरिति मतिरध्यासः । तथा नानापदार्थेषु तिरस्कृतभेदेषु तस्य स्फोटात्मनस्तात्त्विकमेकत्वमारोप्यैको वाक्यार्थः संसर्गात्मेति । समूहिषु च किंशुकादिषु च तिरस्कृतभेदेषु वनमिति वा समूह इति वा पदस्य तात्त्विकमेकत्वमारोप्यैकत्वबुद्धिः । एवं शशविषाणादिष्वसद्भूतेषु शशविषाणमित्यादिपदगतसत्त्वाऽध्यरोपेण प्रतीतिरिति प्रत्यासार्थः । परिणामोऽपि यथैकं सुवर्णतत्त्वं कटकमुकुटकर्णिकाङ्गुलीयादिभेदेन विपरिणमते तथा शब्दतत्त्वमपि नानापदार्थरूपेणेति । एतस्मिंश्च दर्शने भेदानां कथंचित्पदतत्त्वाद्भिन्नानां पारमार्थिकत्वम् । एवं स्फुरणमात्रेण चाऽस्य पक्षस्योपन्यासः । विवर्तस्तु यथा मुखमेकमनेकेषु मणिकृपाणदर्पणादिषु सद्भूतेषु विवर्त्तमानं तच्छायापत्तौ विभिन्नवर्णपरिमाणदेशं चकास्ति, न तु तत्र तत्त्वतो भिन्नवर्णपरिमाणदेशानि मुखानि सन्ति, एवमनाद्यविद्यावासनोपधानवशात्पदतत्त्वमेकमनेकपदार्थात्मना प्रथते, न तु पदार्थास्ततो विभिद्यमानात्मानः परमार्थतः सन्तीति । एते प्रत्यासपरिणामविवर्त्ता मतभेदेन मन्तव्या इति ।

परिहरति—न । अन्यथासिद्धेः । तामेवाह—संसर्गस्तावद्वाक्यार्थलक्षणः कारकोपसर्जनक्रियाप्रधानोऽतुल्यप्रधानसंसर्गी । अत्रेदमाकूतम् । यत्तावदिदमुक्तम् अनेकप्रवृत्तित्वान्नानात्वमिति, तदनेकवृत्तित्वस्यै[1]कत्वेनापि सह संभवात्संदिग्धव्यतिरेकतया नानात्वेन प्रतिबन्धासिद्धेरयुक्तम् । न चैकस्य नानावर्त्तिनस्तद्देशत्वाऽतद्देशत्वलक्षणो विरोधः संभवति । सह संभवात् । युक्तमेतत् । यद्वस्तुनि परिच्छिद्यमाने तदभावो व्यवच्छिद्यत इति स्वाऽभावव्यवच्छेदरूपत्वेन भवानां तदव्यवच्छेदे परिच्छेदाऽनुपपत्तेः, भावपरिच्छेदात्मकत्वात् तदभावव्यवच्छेदस्य । अथ संसर्गान्तरं कस्माद्व्यवच्छिद्यते ? तदभाववत्त्वादिति चेत् । तदेव कुतः ? प्रत्यक्षेण तादात्म्येनाऽप्रतिभासनात् । अन्यथैकसंसर्गिवत्संसर्ग्यन्तरमपि प्रथेत । यथाह तत्परिच्छि-

---

१. एकवृत्तित्वे पु० पा० ।

न्ति ततोऽन्यद् व्यवच्छिन्नति । त एव[1] तर्हि परस्पराऽभावात्मानो न ये प्रत्यक्षेण कदाचिदपि परस्परसंकीर्णाः प्रत्यवभासन्ते । संसर्गः पुनरयं नाना[2]-संसर्गिष्वभिन्नः प्रत्यक्षेण न विरोधमधिरोहति ।

स्यादेतत् । अमूल्यदानक्रयी खल्वयं संसर्गो नास्ति, यतो न विज्ञानेष्वाकारमर्पयति, प्रत्यक्षतां तु स्वीकर्तुमिच्छतीति ! तदयुक्तम् । निराकारविज्ञानवेद्यत्वव्यवस्थापनेन नीलादीनामप्यमूल्यदानक्रयित्वेनाऽसत्त्वप्रसङ्गात् । न च संसर्गिणः संसर्गं ज्ञातुमुत्सहते । न चायं संसर्गिभ्यो न भिद्यते । विरुद्धधर्मास्पदत्वात् । न खल्वयं संसर्गिषु परस्परं व्यावर्त्तमानेष्वनुवर्त्तमानोऽनुवर्त्तमानेषु च निवर्त्तमानस्तदात्मा भवितुमर्हति, त्रैलोक्यस्यैक्यप्रसङ्गात् । तेनास्तु तद्देशत्वतदभावयोर्विरोधो, न पुनस्तद्देशत्वाऽतद्देशत्वयोर्भवितुमर्हति । न हि नञः प्रयोगमात्राद्विरोधाऽवगतिः । मा भूत्पुत्रोऽपुत्र इति नानात्वमेकस्यापि पुत्रस्येति ।

स्यादेतत् । येनैव स्वभावेनैकस्मिन्संसर्गिणि संसर्गो वर्त्तते किं तेनैव संसर्ग्यन्तरेऽपि किं वा स्वभावान्तरेण ? इति । न तावत्स्वभावान्तरेण । स्वभावेनोपादेयभेदे भावभेदप्रसङ्गात् । तेनैव चेत्संसर्गिणामत्यन्ताभेदप्रसङ्ग इति । तत्र वक्तव्यम् । अथ रूपं येन स्वभावेनोपादेयं रूपान्तरं जनयति किं तेनैव स्वाऽऽलम्बनं विज्ञानं स्वभावान्तरेण वेति तुल्यमेवैतत् । यद्युच्येत, स्वभावो वा सामर्थ्यं वा न रूपादतिरिच्यते, तदेव तु स्वप्रत्ययाऽधीनजन्मभेदमुभयजननमेकं प्रत्यक्षेणाऽवसीयमानं न भेदमर्हति । न च [3]कारणाभेदः कार्याऽभेदमापादयति, अन्यत्वात् । तत्किमिदानीं नानासंसर्गिषु एको न भासते प्रत्यक्षेण संसर्गः स्वभावासंसर्गिणः, येन ते तदभेदादभिन्ना भवेयुः । प्रतीत्यसमुत्पादमात्रं कार्यकारणभावो न भाविकः कश्चिदुभयाश्रयः, तेनाऽन्यस्य कारणस्याऽभेदेऽपि न [4]कार्याभेद इति चेत् । ननु संसर्गिभिः संसर्गस्यापि न कश्चिदपरसंसर्ग इति तदभेदेऽपि न संसर्गिणामभेदोऽन्यत्वात् । असंबन्धः संसर्गः कथं तेषामेव ? इति चेत् । अथाऽसंबन्धे किमिति रूपमेव प्रतीत्य[5]रूपविज्ञाने समुत्पद्येते न पुना रसादिकमपि ? स्वभावभेदादिति चेत् । सोऽत्रापि तुल्यः । तस्माद्विरोधाऽसिद्धेः संदिग्धव्यतिरेकत्वादनेकवृत्तित्वं नानात्वं प्रत्यसाधनाङ्गम् । न च ग्रहणाऽग्रहणलक्षणविरोधः संसर्गे संभवति । सकलसंसर्गिग्र[6]हणाऽधीननिरूपणस्य तस्याऽग्रहणे ग्रहणादेव

१. त एव तर्हि पु० पा० । २. नानपि पु० पा० ।
३. कारणभेदः पु० पा० । ४. कार्यभेद पु० पा० ।
५. रूपमेव प्रतीत्यरूपविज्ञाने पु० पा० । ६. ग्रहाणधीन पु० पा० ।

समूहोऽपि नान्तरेण तद्भावनिमित्तमेकं समूहिनाम्। तत्र तदुपाधिरेकप्रकाशः। शशविषाणादयोऽपि जात्यन्तरपरिदृष्टवस्तुरूपेणोत्प्रेक्ष्यमाणा

तद्ग्रहणे वा ग्रहणादेवेति। वृत्तिविकल्पश्च साकल्यवैकल्यलक्षणोऽत्रानवकाश एव। नानात्वे कार्यसमवायिनी साकल्यवैकल्ये नाऽभिन्ने तत्त्वे संभवः। तस्मात्स्वभावतो वर्तते संसर्गिषु संसर्ग इत्येतावद् वक्तुमीश्महे, न पुनः कार्त्स्न्यभागाभ्यामिति। एतेन समूहो व्याख्यातः, प्रत्याख्याताश्च कतिपये अवयविसामान्यनिराकरणहेतवो न सर्वे विस्तरभयात्।

तदेवं प्रत्यक्षसंसर्गः संसर्गिद्वयाऽऽधार एको गुणगुणिनोर्जातिजातिमतोः क्रियाकारकयोरवयवाऽवयविनोर्द्रव्ययोरनुभवसिद्धो विना बाधकं न प्रत्याख्यानमर्हति। वाक्यार्थलक्षणस्तु देवदत्तः स्थाल्यामोदनं पचतीत्यादिर्यद्यपि प्रतिसंसर्गिद्वयं भिद्यते तथापि कारकाणां क्रियार्थत्वात्तस्याः प्रधानत्वेन वाक्यार्थभूताया एकत्वात्तत्प्रधानः संसर्गोऽप्येक उक्तः। नानाकारकोपरक्तक्रियार्थत्वेऽपि च वाक्यस्य पदार्थमात्रस्याऽन्यतः प्राप्तेः प्राप्ताऽप्राप्तविवेकेन संसर्गो वाक्यार्थः। तदिदमुक्तं, कारकोपसर्जनक्रियाप्रधान इति। यत्र तर्हि क्रियाद्वयं प्रतीयते यथा निजभुजवीर्यमास्थाय शूरानादिशूरो जयति, तत्र कथं वाक्यार्थस्यैकत्वम्? इत्यत आह, अतुल्यप्रधानसंसर्गी। अतुल्योऽत एव प्रधानं संसर्गी यस्य स तथोक्तः। एतदुक्तं भवति। न क्रियेत्येव वाक्यार्थोऽपि तु प्रधानमिति। जयार्थं च जिगीषोरादिशूरस्य निजभुजवीर्याऽऽश्रयक्रियेत्यप्रधानत्वान्न वाक्यार्थः। विजयक्रियैव तु प्राधान्यात्तथा।

समूहमुपपादयति—समूहोऽपि नान्तरेण तद्भावनिमित्तमेकं समूहिनाम्। समानदेशकालाः खलुः किंशुकादयः समूह इति वा वनमिति वा व्यपदिश्यन्ते, तेन सोऽपि समूहिनां संबन्धिनैकेन देशेन कालेन समूहभावनिमित्तेन विना न भवतीति। तत्र समूहिषु तदुपाधिरेकदेशकालोपाधिरेकप्रकाश एकविषयः प्रकाश इत्यर्थः। शशविषाणादयोऽपि गवादिजात्यन्तरपरिदृष्टविषाणवस्तुरूपेणोत्प्रेक्ष्यमाणाः समारोप्यमाणा वस्त्वात्मकाः प्रकाशन्ते। तेनाऽन्यथापि सिद्धेः संसर्गादिष्वेकप्रत्ययप्रत्यवभासस्य नैकशब्दात्मप्रत्यासादिकल्पना युक्ता। अपि चाऽन्यथैकस्य शब्दात्मनः प्रत्यासेन भिन्नेष्वभेदकल्पनायामेकवाक्यगम्येऽने[1]कत्राप्येकता स्यात्। यथा श्वेतो धावतीत्येकस्मादेव वाक्यादर्थद्वयमवगम्यते, शुक्रो निर्णेनेक्तीति कौलेयक इतो द्रुतं गच्छतीति। तदेतदर्थद्वयमेकवाक्यसमधिगम्यं तत्प्रत्यासादभिन्नमेव भासेतेत्यर्थः।

---

१. गम्येऽनैकत्राप्येकता पु० पा०।

वस्त्वात्मकाः प्रकाशन्ते । अन्यथैकवाक्यगम्ये नैकवाक्यता स्यात् । न च तत्र शब्दभेदः । रूपाऽभेदात् । अर्थभेदाद्भेद इति चेत् । कथमन्यथा प्रतीतोऽन्यथा । अर्थभेदाऽनुमानादिति चेत् । प्राक्तर्ह्यर्थभेदाभेदाववगम्येते पश्चाच्छब्दभेदाभेदाविति न शब्दप्रत्यासत्तिनिमित्तोऽर्थेष्वेकताऽवभासः । समूहैकशब्दयोश्चाऽविशेषः । अविदितसमूहशब्दस्य च तत्तदवभासो न दूरतः

नन्वत्रापि प्रत्यर्थं शब्दभेद इत्यत आह—न च तत्र शब्दभेदः कुतः ? रूपाऽभेदात् । न हि निर्णजने गतौ वा वाक्यस्वरूपस्य भेदकं प्रतिपाद्यामहे । शङ्कते—अर्थभेदाद्भेद इति चेत् । उत्तरम्—कथमन्यथा एकत्वेन प्रतीतोऽन्यथा नाना ? पुनः शङ्कते—अर्थभेदानुमानादिति चेत् । यथा ज्ञाता स्थिराऽवगम्यमानापि प्रत्यक्षेणाऽनुमानेनाऽऽशुतरविनाशिनी निश्चीयते एवं प्रत्यक्षाऽवगतैक्यमपि वाक्यमर्थभेदान्नाना निश्चीयत इति । परिहरति—प्राक्तर्ह्यर्थभेदाऽभेदाववगम्येते, पश्चाच्छब्दभेदाऽभेदाविति न शब्दप्रत्यासत्तिनिमित्तोऽर्थेष्वेकताऽवभासः । अगृहीतभेदः खल्वर्थः शब्दगताऽभेदाध्यवसायादभिन्नो भासते । न हि जातु शुक्तित्वप्रतिपत्तौ रजतसमारोपो भवति । अर्थभेदश्चेत्प्राक् शब्दभेदाऽभेदाभ्यां गृहीतो नाऽर्थस्य शब्दवर्त्यभेदः शक्यसमारोप इत्यर्थः । दोषान्तरमाह—समूहैकशब्दयोश्चाविशेषः । यदि शब्दैकत्वसमारोपाद्भिन्नानामप्यर्थानामेकता ततो यथैकमाकाशमित्यभिन्नस्यैकत्वमनौपाधिकमवगम्यते तथा समूह इत्यत्रापि नोपाध्यपेक्षमवगम्येत । उपाध्यपेक्षत्वे चैकमाकाशमित्यपि न शुद्धमवगम्येतेत्यविशेषः प्रसज्यते । क्वचित्पाठः समूहैकशब्दयोश्चाऽविशेष इति । तस्यार्थः । यथा बहूनां धवादीनां समूह इत्येकशब्दनिबन्धनमेकत्वमवभासते तथा वृक्षा इत्यत्राप्येकत्वमवभासेत । न चैतदस्ति । किं च यदि शब्दप्रत्यासक्तमेकत्वम् अविदितशब्दविशेषो न रूपत एव एकमर्थमवगच्छेदित्याह—अविदितसमूहशब्दस्य च तदवभासो न दूरतः स्यात् । अपि चाऽभावेऽशब्द इति च भावशब्दप्रतिपत्तेर्विवक्षितार्थहानिः । शब्दाऽध्यासे खल्वभाव इति शब्द एवाध्यस्य प्रतिपत्तव्यः स च भाव इति विवक्षितार्थहानमेवमशब्द इति च शब्द इत्यर्थः । विवर्त्तपरिणामयोरप्येते दोषाः प्रसञ्जनीयाः ।

एष त्वधिकोऽपि परिणामविवर्त्तयोर्दोष इत्याह—विवर्त्तपरिणामयोस्तु सर्वस्यैकत्वादवान्तरैकत्वं नैकशब्दालम्बनम् । ये हि परस्परविभिन्नानां शब्दानामध्यासमाहुस्तेषामवान्तरैकत्वं गौरिति वाऽश्व इति चोपपद्यतैव । ये पुनरभिन्नस्य शब्दब्रह्मणो विवर्तं वा परिणामं वाऽर्थमाचक्षते तेषां सर्वत्र

स्यात्। अभावे शब्द इति च भावशब्दप्रतीतेर्विवक्षितार्थहानिः। विवर्त्त-परिणामयोस्तु सर्वस्यैकत्वादवान्तरैकत्वं नैकशब्दालम्बनम्। वस्त्ववस्तु-विभागश्च न स्यात्। अथ तुल्येऽपि शब्दविवर्तेऽन्यनिबन्धनोऽयं विभागः। न, शब्दविवर्तनिबन्धनः। शशविषाणाऽलातचक्रादिषु वस्त्वाकारनिरूपणा। पराक्रान्तमेव च बहुधा स्वयूथ्यैरित्यलमतिप्रसङ्गेन। तस्मादीप्सितस्योपायता कर्तृप्रवृत्तिहेतुः।

ननु कर्त्तव्यतावगमात्प्रवर्त्तते, सैव तथाऽस्तु। का पुनरियम्? कर्त्तव्यतैव। केन प्रमाणेनाऽवगम्यते। नेन्द्रियैरध्यक्षमीक्ष्यते। तत्पुरः-

शब्दब्रह्मणोऽविशेषादवान्तरैकत्वं पदार्थानां वाक्यार्थानां च कुतस्त्यमित्यर्थः। किं च वस्त्ववस्तुविभागश्च न स्यात्। न ह्यस्मिन्दर्शने समस्ति तत्प्रमेयं न यच्छब्दब्रह्मणः परिणामो वा विवर्त्तो वा। तथाविधं च सर्वं सदेवेति नाऽसत्प्रमेयतेत्यर्थः। अत्र शङ्कते—अथ तुल्येऽपि शब्दविवर्त्तेऽन्यनिबन्धनेऽनाद्यविद्यावासनावैचित्र्यनिबन्धनोऽयं विभागः। उत्तरम्—न, शब्दविवर्त्तनिबन्धनः। अयमभिसंधिः। अनुभवसिद्धो नाऽसति बाधकेऽनाद्यविद्यानिबन्धनः शक्यो वक्तुम्। शब्दब्रह्मण्यपि तथाप्रसङ्गात्। तच्च शब्दविवर्त्तनिबधनस्तस्य तद्रूपतया निषेधात्मत्वाऽयोगात्। तस्मात्पारमार्थिक एवेति युक्तम्। यथाह न्यायवादी 'सत्सदिति गृह्यमाणं यथाभूतमविपरीतं च तत्त्वमि'ति। नन्वस्तु तात्त्विको विभागो भावाऽभावयोः। अभावानां पुनरनधिगतस्वलक्षणभेदानां कुतः परस्परविभागः? इत्यत आह—शशविषाणाऽलातचक्रादिषु वस्त्वाकार-निरूपणा। विभाग इत्यनुषङ्गः। यद्यपि शशविषाणाऽलातचक्राद्यभावानां न स्वरूपेण भेदस्तथाप्यवच्छेदकभावाऽधीननिरूपणत्वाद्भावानां च स्वरूपभेदात्तदुपाधिरभावानामपि परस्परविभाग इत्यर्थः। स्फोटस्वरूपनिराकरणप्रयत्नाभावं प्रति कारणमाह—पराक्रान्तमेव चाऽत्र बहुधा स्वयूथ्यैर्भाष्यकारवार्त्तिककारप्रभृतिभिरित्यलमतिप्रसङ्गेन।

प्रकृतमुपसंहरति—तस्मादीप्सितस्योपायता कर्त्तुः प्रवृत्तिहेतुः। एवं पूर्वपक्षैकदेशिनि निरस्ते सम्प्रति परमपूर्वपक्षी ब्रूते—ननु कर्त्तव्यताऽवगमात्प्रवर्त्तते, सैव तथाऽस्तु। दूषयति—का पुनरियं कर्त्तव्यता? न निरालम्बनं ज्ञानम्, न च श्रेयःसाधनता त्वयेष्यत इति भावः। पूर्वपक्षिण उत्तरम्—कर्त्तव्यतैव। यदाभासं विज्ञानं तदालम्बनम्, कर्त्तव्यताऽवगमश्च कर्त्तव्यताऽऽभास इति कर्त्तव्यतैवाऽस्यालम्बनमित्यर्थः। सिद्धान्ती पृच्छति—केन प्रमाणेनाऽवगम्यते? कर्त्तव्यताऽवगमो हि प्रमाणस्य कार्यमसति कारणे प्रमाणे न भवितुमर्हतीत्यर्थः। स एवैकग्रन्थ्येनाह—नेन्द्रियैरध्यक्षमीक्ष्यते। ननु मा

सरत्वान्नेतरैः । सत्यम् । न शब्दातिरेकिभिः । ननु शब्दोऽपि संविदपेक्षयेतरसिद्धिमपेक्षते । ननु नियोगतः, शब्देऽपि तत्सम्भवात् । नन्वितरेतराश्रयः स्यात् । न । अनादित्वाच्छब्दभावनायाः । न खलु शब्दः साक्षादेव कर्त्तव्यताप्रतिभामाविर्भावयति विप्रकृष्टः, अपि तु भावनाऽनुगममुखेन । तत्र विप्रकृष्टशब्दभावनाद्वारसिद्धेः कर्त्तव्यतात्मनि परत्र प्रवृत्तिप्रसवोन्नीतप्रत्यये नाऽसुकरा प्रत्युत्पन्नशब्दसंवित् । उक्तं च ।

साक्षाच्छब्देन जनिता भावनानुगमेन वा ।
इतिकर्त्तव्यता या तां न कश्चिदतिवर्त्तते ॥

नामेन्द्रियाणि प्रवर्त्तिषत, कस्मात्पुनर्नानुमानादिगोचरः कर्त्तव्यता ? इत्यत आह—तत्पुरस्सरत्वान्नेतरैः । अनुमानादयो हि प्रत्यक्षपुरस्सरास्तत्कार्यत्वान्नाऽसति प्रत्यक्षे प्रवर्त्तन्ते इत्यर्थः । पूर्वपक्षी ब्रूते—सत्यं, न शब्दाऽतिरेकिभिर्गम्यते । कर्त्तव्यताशब्देन तु गंस्यत इत्यर्थः । सिद्धान्ती ब्रूते—ननु शब्दोऽपि संविदपेक्षया संबन्धज्ञानाऽपेक्षया प्रथमश्राविणोऽप्रतीतेः इतरसिद्धिमितरेण कर्त्तव्यतायाः सिद्धिमपेक्षते । पूर्वपक्षी त्वाह—ननु नियोगतः प्रमाणान्तरादेव सिद्धिमर्थस्याऽपेक्षते । कुतः ? शब्दतः सिद्धेऽपि तत्सम्भवात्संबन्धज्ञानसंभवात् । सिद्धान्ती ब्रूते—नन्वितरेतराश्रयः स्यात् । शब्दतः सिद्धौ सत्यां संबन्धविज्ञानं संबन्धविज्ञाने च सति शब्दतः सिद्धिरिति । पूर्वपक्षिण उत्तरम्—अनादित्वाच्छब्दभावनायाः । यथा हि बीजादङ्कुरोऽङ्कुराद्बीजमिति बीजाङ्कुरजात्योरन्योऽन्याश्रयत्वेऽपि व्यक्तिभेदाद् व्यवस्था । न हि यस्या बीजव्यक्तेर्याऽङ्कुरव्यक्तिरुपजायते तस्या एवाऽङ्कुरव्यक्तेः सैव बीजव्यक्तिरपि तु तज्जातीयाया अन्यस्याः । इयमस्याश्चान्या जनिरिष्यते । तेन यत्राऽन्योन्याश्रयं न तत्र जन्यजनकभावः । यत्र च तद्भावो न तत्राऽन्योन्याश्रयत्वमिति । तथेहापि शब्दप्रवृत्तेः कर्त्तव्य ावगमेन भावना प्राग्भवीया । तस्याश्चेह जन्मनि कर्त्तव्यताऽवगमे तत्र विदितसंबन्धस्य शब्दस्य प्रवृत्तिः, ततः प्रत्युत्पन्नशब्दतः कर्त्तव्यताऽवगमः, ततो भावनेति । तदिदं शब्दप्रवृत्तिकर्तव्यताऽवगतिर्भावनाचक्रमनिशमावर्त्तते इति नेतरेतराश्रयत्वम् ।

ननु भावनायां किं प्रमाणम् ? अत आह-न खलु शब्दः साक्षादेव कर्त्तव्यताप्रतिभासमाविर्भावयति, यतो विप्रकृष्टः, अपि तु भावनामुखेन, एवं च सति शब्दैकसमधिगम्येऽपि कर्त्तव्यतात्मनि नासुकरा संविदित्याह—तत्र विप्रकृष्टभावनाद्वारसिद्धेः कर्त्तव्यतात्मनि स्वज्ञानेन प्रवृत्तिहेतौ परत्र प्रवृत्तिप्रसवोन्नीतप्रत्ययेनाऽसुकरा प्रत्युत्पन्नस्य वर्त्तमानस्य शब्दस्य संविद् ज्ञानमिति । उक्तं च ।

साक्षाच्छब्देन जनिता भावनाऽनुगमेन वा ।
इतिकर्त्तव्यता या तां न कश्चिदतिवर्त्तते ॥ इति ।

कर्त्तव्यतावगमादेव प्रवृत्तिः, नेप्सितोपायतायाः। नित्येष्वप्य-प्रवृत्तिप्रसङ्गात्। ईप्सितोपायत्वे वा नित्यत्वव्याघातः।

उच्यते—

पूर्वशब्दैर्व्यवहृतिर्व्युत्पत्तेरनपेक्षणम्।
भवेद्विशेषहेतुः को बीजमर्थेन तु श्रुतौ।

का पुनरियं शब्दभावना? शब्दविषया शब्दज्ञानबीजमुत शब्दाऽभिहिताऽर्थज्ञानबीजम्। यदि शब्दविषया तैरेवाऽनष्टस्मृतिसंस्कारैः प्राग्भवीयैः शब्दैर्व्यभिचारः स्यात्। व्युत्पत्तिश्च तदा नाऽपेक्ष्येत। शब्दाऽभिहिता चेत्तथापि पूर्वस्यां सत्यां स एव प्रसङ्गः। अथेयमेव। विशेष-हेतुर्वक्तव्यो, यत् तुल्येषु प्रत्ययपाटवाऽभ्यासाऽऽदरेषु शब्दार्थसंबन्धविषयेष्वर्थ

कृतव्याख्यानमेतत्। इदं च वेदवादिभिरवश्याभ्युपेतव्यं न पुनरभि-मतसाधनत्वम्, अव्यापकत्वादित्याह—कर्त्तव्यताऽवगमादेव प्रवृत्तिर्नेप्सि-तोपायतायाः। नित्येष्वप्यप्रवृत्तिप्रसङ्गात्। अथ नित्यमपि समीहितोपायः कस्मान्न भवति? इत्याह—ईप्सितोपायत्वे वा नित्यस्याऽनित्यत्वप्रसङ्गः। काम्यतया पुरुषेच्छातन्त्रत्वेनाऽवश्यकर्त्तव्यताऽनुपपत्तेः। तदेतद् दूषयति—उच्यते।

पूर्वशब्दैर्व्यवहृतिर्व्युत्पत्तेरनपेक्षणम्।
भवेद्विशेषहेतुः को बीजमर्थेन तु श्रुतौ॥

भवनाऽनुगमेनेत्युक्तम्, तत्र भावनां विकल्पयति—का पुनरियं शब्द-भावना? शब्दविषया वाचकत्वविशिष्टविषया शब्दवाचकत्वज्ञानवीज-मुत शब्दाभिहिताऽर्थज्ञानबीजम्, कर्त्तव्यतामात्रज्ञानस्य वा वीजं करणम्। भावनाविज्ञानयोः कार्यकारणभूतयोः समानविषयत्वात्। अत्र प्रथमं कल्पमधिकृत्याह—यदि शब्दविषया तैरेवाऽनष्टस्मृतिसंस्कारैः प्राग्भवीयैः शब्दैर्व्यभिचारः स्यात्। स्मृतिजनकः संस्कारो न वेगादिरित्यर्थः। स च वाचकतया शब्दः स्मर्यत इति व्युत्पत्तिश्च नापेक्ष्येत। तथा च प्रथम-श्राविणोऽप्यर्थप्रत्ययप्रसङ्गः। तदिदमुक्तं पूर्वशब्दैर्व्यवहृतिर्व्युत्पत्तेरनपेक्षणं भवेदिति। कल्पान्तरं शङ्कते—शब्दाऽभिहिताऽर्थविषया चेद्, भवतु, तथापि वाचकशब्दविषयाप्यस्ति भावनेति तस्यां पूर्वस्यां सत्यां स एव प्रसङ्गः। अथैवमर्थविषयैवास्ति भावना न पूर्वशब्दविषयः। उत्तरं—विशेषहेतुर्वक्तव्यो यत्तुल्येषु प्रत्ययपाटवाऽभ्यासाऽऽदरेषु शब्दार्थसंवन्धविषयेष्वर्थ एव भावना-बीजं तत्प्रत्ययपाटवादयो न तु शब्दसंबन्धयोः। त्रीणि कारणानि भावनायाः समस्तव्यस्तानि। तथा हि। सकृदनुभूतेषु प्रत्ययपाटवाद् भावना भवन्ति।

एव भावनाबीजं न शब्दसंबन्धयोः। प्रायणं दुःखं वोच्छेत्तृ जात्यन्तरव्यवधानं वा शब्दसंबन्धयोर्भावनाबीजानां नाऽर्थेषु। तेष्वपि च भावनानुगमश्चेत्, जात्यन्तरबधिरास्तज्जन्माऽनुभूतानिव रूपशब्दप्रकारान् जन्मान्तराऽनुभूताना-चक्षीरन्। अथापि पूर्वाऽभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः कासांचिद्भावनानामनुगमो न सर्वासाम्। व्युत्पन्नवदव्यवहाराद्बालस्य।

यथा दुर्जनवचनजनिते दुःखे मन्दस्यापि प्रत्ययस्याऽभ्यासो भावयति भावनाम्, यथा जडस्य शास्त्राऽभ्यासः, तथा सकृन्मन्दमनुभूयमानेऽपि प्रत्ययादराद् भवति भावना। यथा देवह्रदे महाचैत्र्यां बुद्बुदवत्किंचिदुत्पन्नं कनकनलिन-दर्शनादीनि व्यस्तानि समस्तानि चोह्नीयानि। तदेतत्त्रितयमपि संस्कार-कारणं शब्दार्थसम्बन्धेषु तुल्यमिति कथमर्थ एव संस्कारो न तु सम्बन्ध-शब्दयोरिति। तदिदमुक्तं विशेषहेतुः को बीजमर्थेन तु श्रुतौ। यदि मन्येत अर्थवच्छब्दसम्बन्धयोरप्युत्पन्नैव भावना, सा तु प्रायणेन वा दुःखेन वा गर्भवासजन्मना जातिव्यवस्थानेन वा विनष्टा न स्मृतिं जनयतीत्यत आह— प्रायणं दुःखं वोच्छेत्तृ जात्यन्तरव्यवधानं वा शब्दसम्बन्धयोर्भावनावीजानां नार्थेष्विति। विशेषहेतुर्वक्तव्य इत्यनुषज्यते। भावनारूपाणि वीजानि स्मृतेरित्यर्थः। न जातु कारणाऽनियमे कार्यनियमः संभवति, तस्याऽऽकस्मि-कत्वप्रसङ्गादिति भावः। यदि तु कश्चिद्धैयात्यादभ्युपैति, शब्दार्थसम्बन्धेषु भावनाऽनुवर्तत इति, तं प्रत्याह—तेष्वपि चाऽविशेषेण भावनाऽनुगमे जात्यन्धबधिरास्तज्जन्माऽनुभूतानिव रूपशब्दप्रकारान् जन्मान्तरानुभूतान् आचक्षीरन्।

तत्र चोदयति– अथापि पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभय-शोकसंप्रतिपत्तेः कासांचिद् भावनानामनुगमो न सर्वासाम्। अस्यार्थः। निकायविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिरभिसम्बन्धो जन्म, तत्कर्त्ता जातस्तस्याऽभिप्रेतविषयप्रार्थनायां तत्प्राप्तौ सुखाऽनुभवो हर्षोऽनिष्ट-विषयसाधनसन्निपाते तज्जिहासोर्हान्यशक्यता भयम्। इष्टविषयनियोगे सति तस्येष्टस्य प्राप्त्यशक्यस्य प्रार्थना शोकः। तदेतेषां हर्षभयशोकानां संप्रतिपत्तिरनुभवः पूर्वाभ्यस्तस्मृत्यनुसम्बन्धाद् भवति। पूर्वस्मिन् जन्मनि अभ्यस्तस्याऽन[1]र्थस्य स्मृत्यनुबन्धात्। एकविषयो वा एकाऽऽकारविषयो वा अनेकविज्ञानोत्पादोऽभ्यासः, तत्कर्माऽभ्यस्तं यथा देवदत्तोऽनेनाऽभ्यस्तः शालयो वाऽभ्यस्ता इति गृहीतिनिरोधे तदनुसंधानविषयः प्रत्ययः स्मृति-रनुबध्यतेऽनेनेत्यनुबन्धः स्मृतेरनुबन्धो भावना! तस्मात्पूर्वाऽभ्यस्तस्मृत्यनु-बन्धाद्धेतोर्जातस्य कुमारस्याऽसतीन्द्रियविषयसंप्रयोगे हर्षभयशोकसंप्रतिपत्तेः

१. यार्थस्य पु० पा०।

भवतु, किं तु

पूर्वसिद्धिव्यपेक्षत्वान्मानं तत्र न किंचन।
सिद्धे सामान्यतो वृत्तिर्विशिष्टे लिङ्गवाक्ययोः ॥

न तावल्लिङ्गादिजं ज्ञानं तत्र प्रमाणम्। संवित्प्रभवतया पूर्वसिद्धिव्यपेक्षत्वेन। नापि भावनाजं, तन्निमित्तज्ञानाऽपेक्षत्वेन। नापि लिङ्गवाक्यजे। तयोः सामान्यरूपप्रसिद्धेर्विशिष्टावगाहित्वेनाऽप्रसिद्धपदार्थवाक्यार्थप्रतीत्यनु-

प्राग्भवीयानां कासांचित्तदीयभावनानाम् अनुगमः। आसीच्च पूर्वं शरीरान्तरसम्बन्धः। हर्षादिसंप्रतिपत्तिरसिद्धेति चेन्न। स्मितरुदितादिमत्त्वेनैतदनुमानात् तथा हि। हर्षादिमदात्मवती बाल्यावस्था स्मितरुदितादिमत्त्वाद् यौवनावस्थावत्। एवं बाल्यावस्था स्मृतिमदात्मवती हर्षादिमदात्मवत्त्वात् यौवनावस्थावत्। तथा बाल्यावस्था संस्कारवदात्मवती स्मृतिमदात्मवत्त्वाद् यौवनावस्थावत्। तथा च बाल्यावस्थाऽनुभूतचरानुभववदात्मवती संस्कारवदात्मवत्त्वाद्यौवनावस्थावत्। तथा बाल्यावस्थाऽनुभवकाले शरीरसम्बन्धवदात्मवती अनुभववदात्मवत्त्वाद् यौवनावस्थावत् इति प्रसङ्गात्परलोकसिद्धिरपि सूचिता। तदेवं कासांचिदनुगमो न सर्वासां भावनानाम्। कुतः? व्युत्पन्नवदव्यवहाराद् बालस्य। कार्यदर्शनोन्नेया हि भावना यावत्कार्यदर्शनं व्यवतिष्ठत इत्यर्थः।

एवं सिद्धान्तैकदेशिनो दूषणे परिहृते पूर्वपक्षवादिना परमसिद्धान्ती दूषणमाह—भवतु, किं तु

पूर्वसिद्धिव्यपेक्षत्वान्मानं तत्र न किंचन।
सिद्धे सामान्यतो वृत्तिर्विशिष्टे लिङ्गवाक्ययोः ॥

तद् व्याचष्टे—न तावल्लिङ्गादिजं तत्र ज्ञानं प्रमाणं न पदं प्रत्ययो वा तत्र कर्त्तव्यतायां प्रमाणमिति। केन हेतुना? प्रथमश्रुतेभ्यो लिङ्गादिभ्योऽनुत्पादात्कर्त्तव्यता ज्ञानस्य संवित्प्रभवतया मानान्तरतः पूर्वसिद्धिव्यपेक्षत्वेन। नापि भावनाजं तन्निमित्तज्ञानापेक्षत्वेन, यदाकारं हि विज्ञानं भावनया जनयितव्यं तदाकारमेवानुभवं स्वकारणमेवापेक्षते मानान्तरतः, न च तदस्तीत्युक्तम् ननु लिङ्गवाक्ये कर्त्तव्यतावगाहिनी भविष्यतः, तयोः प्रमाणान्तराऽनवगतार्थगोचरत्वादन्यथा प्रामाण्याऽनुपपत्तेरित्यत आह—नापि लिङ्गवाक्यजे। हेतुमाह—तयोः सामान्यरूपप्रसिद्धेः विशिष्टाऽवगाहित्वेन गृहीतसम्बन्धं लिङ्गिनं गमयति, सम्बन्धश्च पक्षव्यापकत्वे सति स्वसाध्येन नियमः। न चाऽगृहीते दृष्टान्तधर्मिवर्तिनि साध्यधर्मे तेन सह हेतोर्नियमः

पपत्त्या सामान्यरूपप्रसिद्धिनिबन्धनप्रमाणाऽपेक्षायां तदभावे प्रामाण्याऽभावः। यथा चेह जन्मनि तथा पूर्वस्मिन्पूर्वतरेऽपि साऽपेक्षितेति प्रमाणाऽभावः। तत्र किं विकल्पमात्रमेवेदमनादिशब्दवासनानिबन्धनं स्यात्तच्च पुरस्तात्प्रत्युक्तम्।

शक्यसाधनः। न चाऽपूर्ववस्तुसत्तासाधने पक्षधर्मता। तथा हि। कदाचित्सत्तायां साध्यायां भावधर्मे वा हेतुरुच्येताऽभावधर्मो वा, प्रकारान्तराऽभावात्। तत्र बाह्या अप्याहुः।

'नाऽसिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः।
धर्मो विरुद्धो भावस्य तत्सत्ता साध्यते कथम्' ॥ इति।

तस्मादनुमानं सामान्यरूपेण यो वह्निः प्रसिद्धं तेन विशिष्टं वस्तु पर्वतादिकमवगाहते। वह्निभावाऽभावसाधारणेन रूपेण वा यः प्रसिद्धः पर्वतादिः साधनाश्रयस्तमेव वह्निविशिष्टमवगाहते। तदनेन नियमात्पक्षधर्मतारूपसम्बन्धद्वयसंवित्तावनुमानप्रवृत्तिर्नाऽन्यथेति सूचितम्। एवं वाक्यमपि सामान्यप्रसिद्धक्रियं पदार्थं सामान्यरूपप्रसिद्धेनैव पदार्थान्तरेण कारकरूपेण विशिष्टमवगाहते। तदनयोर्विशिष्टविषयता, न पुनरपरिदृष्टचरवस्तुसद्भावविषयतेत्युक्तं भवति। कुतो वाक्यमेवंविधम्? इत्याह—अप्रसिद्धपदार्थवाक्यार्थप्रतीत्यनुपपत्त्या पदार्थस्यैवेतरपदार्थविशिष्टस्यैव वाक्यार्थत्वात्। अगृहीतसम्बन्धस्य चाऽपदार्थत्वात्। अतः सामान्यरूपप्रसिद्धिनिबन्धनस्य च कर्त्तव्यतायां प्रमाणस्याऽभावाल्लिङ्गवाक्ययोर्विशिष्टायां तस्यां प्रामाण्याऽभावः।

ननूक्तं कथं शब्दप्रवृत्तिकर्तव्यताऽनुभवभावनाचक्रमनिशमावर्त्तत इति, किमत्र मानान्तरेण? इत्यत आह—यथा चेह जन्मनि तथा पूर्वस्मिन्पूर्वतरेऽपि साऽपेक्षितेति प्रमाणाऽभावः। अत्रेदमाकूतम्। प्राग्भवीयभावनाजनितकर्त्तव्यतावगमाद् बालस्य स्वयं प्रवृत्तौ सिद्धायामनादितापरिहारः स्यात्, सैव त्वसिद्धा। तथा हि। यद्विषयाऽनुभवभाविता या भावना सा तत्रैव स्मृतिमाधत्ते, न त्वर्थान्तरेऽपि, अतिप्रसङ्गात्। न च कर्त्तव्यतासामान्यमपि विशेषप्रवृत्तिहेतुः। न च यत्क्रियाभेदगोचरा प्रागपि भवे कर्त्तव्यताऽवगतात्तत्क्रियागोचरैव बालेन स्मृता क्रियान्तरे प्रवृत्तिमुत्पादयितुमर्हति। नापि क्रियान्तरे स्मर्यते। न खलु पाटलिपुत्रउपलब्धस्य प्रासादस्य शिलाह्रदे स्मरन्नभ्रान्तः। अतः स्तनपानादिगोचरकर्त्तव्यताऽवगतौ भावनाय अन्यत्कारणं वक्तव्यम्, न च तच्छक्यमिह जन्मनि सर्वेषु जन्मस्विति प्रमाणाऽभावः। अपेक्षितोपायतां स्तनपानादेः प्रत्यभिज्ञासिद्धया तज्जातीयतया बालोऽप्यनुमिमीते। तत्र विषयस्याप्यसिद्धौ सत्यां विकल्पमात्रमेवेदमनादिशब्दवासनानिबन्धनं स्यात्।

अपि च—

> **कर्त्तु रिष्टाऽभ्युपाये हि कर्त्तव्यमिति लोकधीः ।**
> **विपरीते त्वकर्त्तव्यमिति तद्विषये ततः ॥**

यः खलु प्रत्ययो यमर्थमन्वेति स तस्य विषयः शुक्ल इव शुक्लप्रत्ययस्य । अपेक्षितोपायतां तद्विपरीततां चाऽनुयातौ[1] कर्त्तव्यमकर्त्तव्यमिति प्रमितिप्रत्ययौ लौकिकानाम् । तेन तयोर्गोचराविति गम्यते ।

तच्च पुरस्तात्प्रत्युक्तं न निरालम्बनं ज्ञानमिति । तत्पारिशेष्यात्कर्तु रीप्सितोपायतैव प्रवृत्तिहेतुः कर्त्तव्यताज्ञानस्याऽऽलम्बनम् ।

अपि चाऽन्वयव्यतिरेकाभ्यामपि सैवाऽऽलम्बनमित्याह—

> कर्त्तुरिष्टाऽभ्युपाये हि कर्त्तव्यमिति लोकधीः ।
> विपरीते न कर्त्तव्यमिति तद्विषयें ततः ॥

ननु कृतिव्याप्यतद्विपरीततागोचरौ कर्त्तव्यत्वाऽकर्त्तव्यत्वप्रत्ययौ कथं समीहिततद्विपरीतसाधनते गोचरयितुमर्हतः ? न च साधनताकर्त्तव्यतयोस्तादात्म्यम्, सिद्धसाध्यत्वेन दहनतुहिनवत्स्वभावविरोधादित्यत आह—यः खलु प्रत्ययो यमर्थमन्वेति स तस्य विषयः शुक्ल इव शुक्लप्रत्ययस्या अपेक्षितोपायता तद्विपरीततां चाऽनुयातौ कर्त्तव्यमिति प्रत्ययौ प्रवृत्तिनिवृत्तिहेतू लौकिकानाम् । तेन ते अपेक्षितोपायतातद्विपरीतते तयोः[2] कर्त्तव्यमकर्त्तव्यमिति प्रत्यययोर्गोचराविति गम्यते अन्वयव्यतिरेकाभ्याम् । इदमत्राकूतम् । सत्यं, कृतिसाध्यतामात्र कर्त्तव्यता । न तु तन्मात्रं हेतुः, समीहितस्यापि कर्त्तव्यतया तद्धेतुत्वप्रसङ्गात् । न खलु फलं कर्त्तव्यमिति प्रवृत्तिगोचरस्तत्साधनं तु स्यात् । न चाऽन्यस्य कर्त्तव्यताऽन्यत्र प्रवर्तयति । अतिप्रसङ्गात् । साधनतया नाऽतिप्रसङ्ग इति चेत्, तर्हि प्राप्ताऽप्राप्तविवेकेन साधनत्वमेव प्रवृत्तिहेतुः, न तु तन्मात्रमपि तु कर्त्तुरिष्टाऽभ्युपाय इत्युपपादयिष्यति स्वयमेवाऽऽचार्यः । तस्मात्कर्त्तुरिति वचनादाचार्यस्य कर्त्तव्यतैकार्थसमवायिनी समीहितसाधनता प्रवृत्तिहेतुः कर्त्तव्यताज्ञानालम्बनमभिमता । न चाऽनयोर्भिन्नकालयोरैकाधिकरण्ये कश्चिद्विरोध इति उपपादयिष्यामः । न च कर्त्तव्यतामात्रोपयोगिनी समीहितसाधनता प्रमाणान्तःपातिनी न प्रवृत्तिहेतुः । कर्त्तव्यतैव तद्धेतुः । सा च क्वचित्साधनतयाऽवगम्यते, क्वचिच्छब्दतस्तेनाऽसत्यामपि समीहितसाधनतामनित्येषु कर्त्तव्यताऽवगम्यमाना प्रवृत्तिहेतुरिति साम्प्रतम् ।

---

१. कर्त्तव्यमिति पु० पा० । २. तद्विपर्ययतेतयोः पु० पा० ।

तस्मात्कर्त्तव्यतापि नाऽन्या कर्तुः समीहितोपायतायाः। यथोक्तं

तेन कर्त्तव्यतामात्रं प्रवृत्तिहेतुरित्युक्तम्। अपि च भवतु प्रमाणान्तःपातिनी, तथाप्यस्ति हि किंचित्प्रमाणं यदभावात्प्रमेयं निवर्त्तते, यथा कृतकत्वं भावानामनित्यत्वे प्रमाणम्। अथ च तदभावादनित्यत्वं निवर्त्तते, नैव ह्यस्ति संभवः अकृतकश्चाऽनित्यश्च भाव इति। तथेहापि कृतिव्याप्यता कार्यता, कृतिश्च पुरुषप्रयत्नः, स चेच्छाद्वेषजीवनयोनिः स्वयोनिनिवृत्तौ न भवति, धूम इव धूमध्वजनिवृत्तौ। न च हिताहितप्राप्तिपरिहाराऽसाधनसाधनेषु नैमित्तिकनिषेधाऽपूर्वेष्विवाऽसंभवः। द्वेषजीवने त्वनाशङ्कनीये एवाऽनुपादेयत्वाद् विधेयविषयत्वाच्च। नन्वेतदनुमानं, तच्चाऽपूर्वकर्त्तव्यताविधायिनि परिपन्थिनि नित्यतयाऽनपेक्षप्रमाण्ये सति शब्दे बाधितविषयतया नोदेतुमर्हति। अबाधितविषयत्वमपि हि पक्षधर्मतावदनुमानसामग्रीनिविष्टमिति तद्विदः। तत्किं सहस्रसंवत्सरे सत्रे सहस्रहायनजीविन एव सन्त्वधिकारिणः? सहस्रसंवत्सरनिर्वर्तनीयमेतदाम्नायते सत्रम्। सहस्रसंवत्सरजीविनां पुंसामसंभवात्संवत्सरशब्दो जघन्यप्रवृत्तिर्दिवसेष्विति चेत्। न असंभवस्याऽसिद्धेः। आम्नायत एव हि मानान्तरनिरपेक्षात्सहस्रसंवत्सरसत्रविधायिनः संभविष्यन्ति सहस्रायुषः पुरुषाः। स्यादेतत्। विवादाध्यासिताः पुरुषाः न सहस्रायुषः पुरुषत्वादस्मदादिवदित्यनुमानादसंभव इति। नन्वागमबाधितमनुमानं नोदीयत इत्युक्तम्। सत्यम्, प्रवृत्त आगमोऽनुमानं बाधते, तत्प्रवृत्तिरेव तु स्मारितपदार्थाऽन्वययोग्यताऽवधारणपुरःसरा, तदवधारणसमये च बाधितविषयमनुमानं प्रवृत्तं सत्रकर्त्तव्यतासहस्रसंवत्सराणामन्वयमयोग्यत्वान्निरुध्य संवत्सरशब्दं जघन्यवृत्तिमापादयतीति चेत्। न। इहापि समानत्वात्। न खलूपेक्षणीये नैमित्तिकनिषेधाऽपूर्वे प्रयत्नं प्रति प्राधान्येनाऽन्वयमर्हतः। न चैकशब्दवाच्ययोरन्वयो न योग्यतामपेक्षत इति युक्तम् शब्दाऽवधारणसमये योग्यताहीनयोरन्वयाऽनवधारणेनैकशब्दवाच्याऽन्वयाऽनुपपत्तेः। कामाधिकारे कामाऽनुकूलतया कृत्यन्वयोपपत्तिरिति चेत्। किमायातं नैमित्तिकनिषेधाऽधिकारयोः? तत्र तच्छब्दप्रत्यभिज्ञानात्कामस्याऽश्रुतेरपूर्वमात्रकर्त्तव्यताऽवगतिरिति चेत्। तर्हि कर्त्तव्यताशरीरनिवेशिनाऽकामेनापि भवितव्यं नियोज्येनेव निमित्तवत्ता निषिध्यमानक्रियाकर्त्रा वा श्रुतेनापि। तथा च न नियोगमात्रकर्त्तव्यता। नैमित्तिकनिषेधाऽधिकारयोस्तन्मात्रत्वे च कर्त्तव्यताहानिर्नियोज्याऽभाव इवेति कर्त्तुरपेक्षितोपायता कर्त्तव्यता, तद्विपरीतता चाऽकर्त्तव्यतेति सिद्धम्। तदेतदुपसंहरति—तस्मात्कर्त्तव्यतापि नाऽन्या

"कर्त्तव्यस्य सुखं फलमि"ति । कथं तर्हि नित्येषु नित्यता कर्त्तव्यता वा । यथाशक्ति चाङ्गोपसंहारः । तथा हि । यदि तावत्पुत्रादीप्सितं तत्रोपेयनित्यता विहन्येत । तदिच्छाया अनित्यत्वात् । तत्र यावज्जीवमित्यनर्थकम् । नाप्यधिकारिविशेषणतयार्थवत् । अर्थसिद्धेः ।

अथ, मतं सर्वेषां सर्वदा सर्वमीहितं फलं भविष्यत्युपात्तदुरितनिर्हरणम् । भवेदेवं नित्यता, फलवशेन न शब्दात् । तथा हि । फलस्य नित्यसमीहितत्वात्तद्वशेनाऽवश्यकर्त्तव्यता वास्तवी । शब्दस्तु नित्यसमीहितोपायप्रतीतिमात्रोपलक्षणः । तत्राऽसति शब्दव्यापारे ततो निर्हृत्यर्थकृच्छ्रादिवत्सर्वाङ्गोपसंहाराप्रसङ्गोऽन्यथा फलाऽभावात् । शाब्दे हि नित्यत्वे समहितोपायतायाः । अत्रैव भाष्यग्रन्थं पठति—तदुक्तं कर्त्तव्यस्य सुखं फलमिति ।

अत्र चोदयति—यदि कर्तुः समीहितसाधनतैव कर्त्तव्यता, कथं तर्हि नित्येषु नित्यता कर्त्तव्यता वा ? न ह्येतन्नित्यं समीहितसाधनं भवतीति भावः । क्वचित्पाठः कथं तर्हि नित्येऽप्यनित्यता कर्त्तव्यताया इति, स च सुगम एव । यदि च समीहितसाधनता ततो यथाशक्ति चाङ्गोपसंहारः कथमिति चेत्यनुकृष्यते । तदभावे न नित्यतेत्यर्थः । ननु समीहितसाधनत्वनित्यत्वयोः को विरोधः ? इत्यत आह—तथा हि । यदि तावत्पुत्रादीप्सितं तत्रोपेयनित्यता विहन्येत । कुतः ? तदिच्छाया अनित्यत्वात् । भवतु अनित्यत्वं को दोषः ? इत्यत आह—तत्राऽनित्यत्वे सति यावज्जीवमित्यनर्थकम् । नाप्यधिकारिविशेषणतयाऽर्थवत् । अर्थसिद्धेर्यावत्पदस्यानर्थक्यं स्थितमेव । यावज्जीवनमात्रस्याप्यधिकृतविशेषणत्वं न संभवति, व्यवच्छेद्याऽभावात् । न ह्यजीवतोऽधिकारप्रसक्तिस्तेनार्थसिद्धेरनर्थकत्वमित्यर्थः ।

अथ मतम्, सर्वेषां सर्वदा सर्वमीहितं फलं भविष्यति उपात्तदुःरितनिवर्हणम्, ततश्च नित्यसमीहितसाधनत्वान्नित्यत्वमुपपत्स्यत इति । निराचष्टे—भवेदेवं नित्यता । किं तु फलवशेन, न तु शब्दात् । स्फुटयति—तथा हि । फलस्य नित्यसमीहितत्वात्तद्वशेनाऽवश्यकर्त्तव्यता[1] वास्तवी । शब्दस्तु समीहितो[2]पायप्रतीतिमात्रोपक्षीणः[3] । ननु नित्यतया नः प्रयोजनं, सा च फलतोऽपि लब्धेति कृतं शब्देनेत्यत आह—तत्राऽसति शब्दव्यापारे नित्यतायामेनोनिर्हृत्यर्थकृच्छ्रादिवत्सर्वाङ्गोपसंहारप्रसङ्गः । कुतः ? अन्यथाऽनुपसंहारे सर्वेषामङ्गानां प्रायश्चित्तवदेव फलाऽभावात् । न चैप शब्देऽपि

१. कर्तव्यफल इति २ पु० पा० ।

२. समीहितोपायो विश्वजिदिति मू० पु० पा० । ३. त्रोपक्षरणः पु० पा० ।

परिपूर्णाङ्गं सर्वदा चेत्यसंभवाद्यथा शक्नुयादित्युपपद्यते[1]। इतरथाऽङ्गाम्नायस्याऽविकल्प्यत्वाद्यो यदेति विश्वजिदादिवत्स्यात्। न हि सर्वेषां समीहितोपायो विश्वजिति पङ्ग्वादयोऽधिकारिणः। नानुषङ्गिकमीप्सितम्, प्रमाणाऽभावात्। अर्थापत्तेरक्रियायां प्रत्यवायेनापि क्षयात्। स्मृतिवाक्यशेषाभ्यां च तत्कल्पनाया एव युक्तत्वात्। स्मृतितश्च पुनस्तदर्थावगमात्।

नित्यत्वे प्रसङ्ग इत्याह—शाब्दे हि नित्यत्वे परिपूर्णाङ्गं सर्वदा चेत्यसंभवात् शब्देनैवाऽवश्यकर्त्तव्यताऽभिधायिना सर्वाङ्गोपसंहृतौ सत्यामनुपपद्यमानेन यथा शक्नुयादित्युपपद्यते। अथ वास्तवेनापि नित्यत्वेन किमिति नोपपद्यते? इत्याह—इतरथा तु वास्तवे नित्यत्वे नित्यवदङ्गाऽऽम्नायस्याऽविकल्प्यत्वाद्यो यदेति विश्वजिदादिवदुपलभ्येत।

दृष्टान्तं विवृणोति—न हि सर्वेषां समीहितोपाये विश्वजिति पङ्ग्वादयोऽधिकारिणः। पङ्ग्वादय इत्यसमाधेयाङ्गवैकल्यं सूचयति। इदमत्राकूतम्। शाब्दमङ्गाम्नायं शाब्देनैव नित्यत्वेन शक्यं व्यवस्थापयितुं न वास्तवेन, तस्य प्रमेयत्वादङ्गाम्नायस्य च प्रमाणत्वात्प्रमाणतन्त्रत्वात्प्रमेयव्यवस्थितेः। ननु 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'ति यावज्जीवोपबन्धान्नित्यकर्त्तव्यताप्रतिपादनपरं शास्त्रम्, ततश्च नित्यकर्त्तव्यता शाब्दो भविष्यतीति तत्पराच्च शास्त्रादानुषङ्गिकं सर्वदा सर्वजनसमीहितं दुरितक्षयलक्षणं भवतीच्यत इत्यत आह—नानुषङ्गिकमीप्सितम्, प्रमाणाऽभावात्। न खलूपात्तदुरितनिबर्हणकाम इति यावज्जीववाक्यशेषमधीयते। नाप्यर्थापत्तिः। कुतः? अर्थापत्तेरक्रियायां प्रत्यवायेनापि क्षयात्।

नन्वेवमुभयथाऽप्युपपत्तेः कस्य कल्पनौचित्यम्? इत्यत आह—स्मृतिवाक्यशेषाभ्यां च तत्कल्पनाया एवाऽकरणे प्रत्यवायकल्पनाया एव युक्तत्वात्। तत्र स्मृतिः 'अकुर्वन्विहितं कर्मे'त्यादिका। वाक्यशेषोऽपि 'यो ह वै दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपातयेत्स स्वर्गाल्लोकाच्च्यवते' इति। तथा हि। यावज्जीवोपबन्धयोर्दर्शपूर्णमासयोः किमुपात्तदुरितक्षयः कल्प्यताम्, उताऽकरणे प्रत्यवायप्राप्तिः? इति संदेहे 'यो ह वै' इति वाक्यशेषात्स्मृतेश्चाऽकरणे प्रत्यवाय इति निर्णयः। अपि च लौकिक्या अपि स्मृतेस्तदर्थाऽवगमात्। तथा हि। यदवश्यकर्त्तव्यमिति लोके विधीयते यच्च निषिध्यते यथा ग्रामान्तराऽऽनीतानां राजाश्वादीनां नीराजनादि, भुजगाङ्गुलिदानादि वा तदकरणे। तत्करणं च प्रत्यवायो भवतीति प्रतिपद्यन्ते लौकिकाः। तदेवमनादिलौकिकस्मृतिद्रढिमलब्ध-

---

१. उपबध्यते. मू० पु० पा०।

प्रतिषिद्धस्य च नियोगतोऽकर्त्तव्यस्य क्रियायामिव नियोगतः कर्त्तव्यस्याऽक्रियायां प्रत्यवायो युक्तः। तथा नियोगोपपत्तेः। प्रत्यवायभयात् ईप्सितोपायेष्विच्छया प्रवृत्तेः। तथा च यादृशी प्रवृत्तिर्न्न तादृश्यभ्युदयाय। नित्येप्सितोपायनित्यत्वफलवत्त्वयथाशक्त्यनुष्ठेयत्वानां चासङ्गतेरकरणे प्रत्यवायकल्पना। तस्मान्नित्येप्सितोपायानि न नित्यानि। प्रवृत्तिश्च तेष्वकरणे प्रत्यवायकल्पनात्। दुःखात्मकत्वाच्च कर्म्मणः आनुषङ्गि-

व्युत्पत्तिरित्यवश्यकर्त्तव्यताऽकरणे प्रत्यवायकल्पनावीजेन पुनरुपात्तदुरितनिर्हरणकल्पनाया इत्याह—स्मृतेश्च पुनस्तदर्थाऽवगमात्प्रतिषिद्धस्य नियोगतोऽकर्त्तव्यस्य क्रियायामिव नियोगतः कर्त्तव्यस्याऽक्रियायां प्रत्यवायो युक्तः। न चात्र न संशयो येन वाक्यशेषादिभ्यो निर्णय इत्याह—तथा नियोगोपपत्तेस्तदकरणे प्रत्यवायकल्पनायामेव नियोगस्याऽवश्यभावस्य कर्त्तव्यताया उपपत्तेः। कुतः? अकरणे प्रत्यवायभयादीप्सितोपायत्वेनाऽवश्यंभावः प्रवृत्तेरित्याह—ईप्सितोपायेष्विच्छया प्रवृत्तेरिच्छायाश्चाऽवश्यंभावादिति भावः। ननु नेप्सितोपायतामात्रमपि तु नित्येप्सितोपायत्वम्, ततश्चाऽवश्यंभावनियमः प्रवृत्तेस्तद्धेतोः इत्यत आह—तथा च यादृशी प्रवृत्तिर्न तादृश्यभ्युदयाय। तथा हि। नितान्तसमीहितेष्वपि कदाचिदालस्यादुदासते तदर्थिनस्तदुपायेषु, न त्वक्रियमाणे प्रत्यवायहेताविति सर्वजनीनमेतदित्यर्थः। परपक्षे विरोधमादर्शयति—नित्येप्सितोपायनित्यत्वफलवत्त्वयथाशक्त्यनुष्ठेयत्वानां च का सङ्गतिः? विरुद्धं खल्वेतन्नित्येप्सितोपायनित्यत्वं फलवत्वं यथाशक्यनुष्ठेयत्वं चेति। तथा हि। सदातनाङ्गसाकल्यवत्ता हि साधननित्यता, सा यथाशक्यनुष्ठेयत्वेन कतिपयाङ्गवैकल्येन विरुध्यते। तथा तदेव फलवत्वेन नित्येप्सितोपायनित्यत्वं विरुध्यते। तथा हि। ईप्सितप्राप्ताविच्छा निवर्त्तते। न निवर्त्तते चेत् न नूनं तदीप्सितम्। इच्छानिवृत्तौ च न नित्यमीप्सितम्, सोयं फलवत्त्वेप्सितत्वयोर्विरोधाद्विरोधः। तस्माच्छब्दावगतनित्यत्वनिर्वाहायाऽकरणे च प्रत्यवायकल्पनैव ज्यायसी। उपसंहरति—तस्मान्नित्येप्सितोपायतया न नित्यानि कर्माणि। प्रवृत्तिस्तु तेष्वकरणे प्रत्यवायात्। ननु नित्येषु केषुचिदुपात्तदुरितक्षयोऽपि फलं श्रूयत इत्यत आह—दुःखात्मकत्वाच्च कर्मणस्तदानुषङ्गिकात् कार्यविरोधिनः पाप्मनः क्षयात्प्रवृत्तिर्न तच्छाब्दं फलं कर्मण्येव स्वभावतो दुःखात्मनि विधीयमाने दुःखविरोधित्वात्पाप्मनस्तत्प्रक्षयस्य हविर्विकारादिवदानुषङ्गिकत्वादित्यर्थः।

कात्कार्थ्यविरोधिनः पाप्मनः क्षयादिति । भावनायाश्च साध्यत्वात् अग्निहोत्रमितिवन्निर्देशार्थत्वाद्विपरिणस्यापि संभवात्तृतीयानिर्देशाऽविरोधः । वार्त्तमेतत् । तथा हि ।

नित्यं नित्येहितोपाये यावज्जीवमिति श्रुतेः[1] ।
अङ्गान्यतो यथाशक्ति न वा सर्वाणि चाऽन्यथा ।।

न तावदिष्टसाधनत्वेऽपि नित्यत्वविहृतिः । नित्येष्टस्यैव साध्यत्वकल्पनात् दुरितनिर्हरणस्य । सुखे तद्धेतौ वा कदाचिन्माध्यस्थ्यमेवेति दुःखतद्धेतुभ्यां तु सर्वदोद्विजमानस्य तन्निवृत्तौ सर्वदाकामः, हितमपि च

यदि नित्यानां कर्मणां नाऽभिमतसाधनत्वं किं तु तान्येव कर्त्तव्यतया चोद्यन्ते तदा तेषां करणवाचिनी तृतीया दर्शपूर्णमासाभ्यामित्यनुपपन्नेत्याशङ्क्याह—भावनायाश्च साध्यत्वात् । अयमर्थः । यद्यपि यजेर्नेष्टं प्रति साधनता । यद्यपि च प्रत्यवायप्रागभावो न साध्यस्तथापि भावनैव साध्या भविष्यति । यद्यपि भावनाव्याप्यतया तां प्रति कर्मत्वान्न करणत्वं यजेस्तथापि फलपक्षे यथा भावनाव्याप्यस्य साधनावच्छेदकतया करणभावस्तथेहापि भविष्यतीति ।

परिहारान्तरमाह—अग्निहोत्रमितिवन्निर्देशार्थत्वाद्विपरिणस्यापि संभवात्तृतीयानिर्देशाऽविरोधः । अयमर्थः । यथा'ऽग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यग्निहोत्रमिति तृतीयार्थे द्वितीया तथा दर्शपूर्णमासाभ्यामिति तृतीया द्वितीयार्थे भविष्यति । निर्देशार्थत्वादिति । निर्दिश्यत इतिनिर्देशः कर्मरूपार्थस्तदर्थत्वाद्विपरिणामस्तृतीयाया इत्यर्थः । परिहरति—वार्तमेतत् । तथा हि ।

नित्यं नित्येहितोपाये यावज्जीवमिति श्रुतेः ।
अङ्गान्यतो यथाशक्ति न वा सर्वाणि चान्यथा ।।

न तावदिष्टसाधनत्वे नित्यत्वविहृतिः, नित्येष्टस्यैव साध्यत्वकल्पनाद् दुरितनिर्हरणस्य विश्वजिदादिभ्यो वैलक्षण्यम् । प्रवृत्तेरवश्यंभावायाह—सुखे तद्धेतौ वा कदाचिन्माध्यस्थ्यमित्यालस्यादिभ्यो दुःखतद्धेतुभ्यां तु सर्वदोद्विजमानस्य तन्निवृत्तौ सर्वदा कामः । ननु हितकामनासमये नाऽसावस्तीति

१. श्रुतिः—मू० पु० पा० ।

प्रेप्सतस्तस्य प्रतिबन्धक्षये समीहाऽस्त्येव । तस्मादिष्टनिबन्धनः पाप्मनः क्षयः सदा समीहितः । नित्यानां कर्म्मणां फलनित्यत्वादेव यावज्जीवमिति शब्दावगतादिति न नित्यत्वविरोधः । अनित्ये हि साध्ये सा विहन्येत । यथाशक्त्युपसंहारश्च नित्यत्वादेवाऽहीनाङ्गस्य नित्यं क्रियासंभवात् । न चेदं वास्तवं नित्यत्वं, न हि फलवादिनो यावज्जीवशब्दं नामनन्ति[1] फलविशेषशब्दं वाऽधीयते, किं तु याज्जीवश्रुतेरवगतनित्यत्वास्तत एवाऽर्थापत्त्या फलभेदप्रयोगभेदौ कदाचिदुन्नयन्ति । अनित्ये साध्ये परिपूर्णाङ्गे च प्रयोगे यावज्जीवशब्दाधिगतनित्यकर्त्तव्यताऽनुपपत्तिः । न हि कदाचिदीप्सितोपायात्मिकायां कर्त्तव्यतायां परिपूर्णाङ्गसाधनात्मिकायां च यावज्जीशब्दोऽन्वेति । नित्यत्वाच्च कल्पितः फलभेदो न तदेव बाधते । कथं तर्हि नित्येप्सितोपायत्वान्नित्यत्वमुक्तम् ? शब्दाऽवगतस्यैव तस्याऽविघातः शब्दसामर्थ्यलभ्येनैव तेनोक्तो यथाशक्ति प्रयोगेण तन्त्रेण च । तत एवाऽनयोर्मानान्तरं मृग्यम् ।

कथं सर्वदा ? इत्यत आह—हितमपि च प्रेप्सतस्तयेष्टस्य प्रतिबन्धक्षये प्रतिबन्ध्यतेऽनेनेति दुरितं प्रतिबन्धस्तस्य क्षये समीहाऽस्त्येव । तस्मान्नित्येप्सितोपायत्वफलवत्त्वयोरविरोध इत्याह—तस्मादिष्टनिबन्धनः पाप्मनः क्षयः सर्वदा समीहितः । नित्यानां कर्मणां फलनित्यत्वादेव याज्जीवमिति शब्दाऽवगतादिति न नित्यताविरोधः । यदनुपपत्त्या यत्कल्प्यते न तेन तदेव बाध्यतइत्यर्थः । न च तस्य स्वभाव एव कर्मणो नित्यताविरोधीति व्यतिरेकमुखेन दर्शयति—अनित्ये साध्ये सा विहन्येत । इदं नित्यं समीहितम् । यथाशक्त्यनुष्ठेयत्वस्याऽविरोधमाह—यथाशक्त्युपसंहारश्च नित्यत्वादेव । कुतः ? अहीनाङ्गस्य नित्यं क्रियासंभवो यतः । न चेदं वास्तवं नित्यत्वं येन प्रमेयं सदङ्गविधं न व्यवस्थापयेत्, अपि तु शब्दमेव कुतः ? न हि फलवादिनो यावज्जीवशब्दं नामनन्ति, फलविशेषशब्दमेव वाऽधीयते । यतः शब्दावगतान्नित्यत्वान्नैवंविधं फलं कल्पयेरन् । किं तु यावज्जीवश्रुतेरवगतनित्यत्वात्तत एवार्थापत्त्या फलभेदप्रयोगभेदावुन्नयन्ति । अर्थापत्तिं दर्शयति—अनित्ये साध्ये परिपूर्णाङ्गे च प्रयोगे यावज्जीशब्दाऽवगतनित्यकर्त्तव्यताऽनुपपत्तिः न हि कदाचिदीप्सितोपायात्मिकायां कर्त्तव्यतायां परिपूर्णाङ्गसाधनात्मको यावज्जीवशब्दोऽन्वेति । नित्यत्वाच्च कल्पितः फलभेदो न तदेव बाधते अपि तु तदधीनाऽऽत्मलाभत्वात्तदनुगुणात्मलाभत्वात्तदनुगुणात्मतया व्यवतिष्ठते । यदि शब्दाऽवगम्यमेव नित्यत्वं कथं तर्हि नित्येप्सितोपायत्वान्नित्यत्वमुक्तम् ? परिहरति—शब्दाऽवगतस्यैव यावज्जीवमिति शब्दावगतस्यैव कर्मनित्यत्वस्याऽविघातः शब्दसामर्थ्यलभ्येनैव तेन नित्यसमीहितोपायत्वेनोक्तो यथाशक्ति प्रयोगेण तन्त्रेण च ।

---

१. स्वर्गादि. मू. पु.

कथं चेदं नित्यत्वं कर्मणो यदि नित्यसमीहितसाधनत्व मि? ति नित्याऽनुष्ठानादेतदकरणे प्रत्यवायान्नित्यक्रिया शब्दादेव। नैतत्। शब्दादेव चेदस्य कर्त्तव्यता किमर्थमकरणे प्रत्यवायकल्पना? शब्दादेव प्रवृत्तिसिद्धेः। न च शब्दः कारकत्वेन प्रवृत्तिहेतुरित्युक्तम् ज्ञापकत्वे चाकरणे प्रत्यवायज्ञापनान्नि-

प्रसङ्गात् किंचिदाह—तत एव यतो यावज्जीवश्रुतिविशिष्टया लिङा नित्येप्सितमिह फलं कल्पितं तत उभयोरपि काम्यनित्ययोः कर्मणोः कामनाकृतप्रवृत्तित्वेनाऽगृह्यमाणविशेषतया साधारणतया तन्त्रमनुष्ठानमस्मदभिमतं सिध्यति।

मीमांसकैकदेशिनस्तु काम्ये क्रियमाणे प्रवृत्तौ नियोगात् कामनाया बलीयस्त्वान्नित्यस्यैकदेशकालकर्तृकतया प्रासङ्गिकीं सिद्धिं मन्यन्ते। तदिदमसाम्प्रतम्। यदि हि नैसर्गिकी कामनिबन्धना प्रवृत्तिर्नियोगनिबन्धनायाः प्रवृत्तेर्बलीयसी स्यात् ततो भवन्मतेन प्रत्यग्रक्लेशधनव्ययपराङ्मुखा नित्यनैमित्तिकेषु प्रवर्त्तयत्यपि नियोगे न प्रवर्त्तेरन्। तथा निषिद्धेभ्यो हिंसादिभ्यो न निवर्त्तेरन्निति नित्यनैमित्तिकनिषेधगोचराः खलु विधयो दत्तजलाञ्जलयः प्रसज्येरन्। स्यादेतत्। केवला कामना विधेर्दुर्बला, विध्यनुगृहीता तु बलीयसी नाऽनुग्रहार्था भवेत्। न हि नित्यनैमित्तकेषु विधिना प्रवृत्तौ कर्त्तव्यतायां कामनायाः कश्चिदुपयोगः। नापि दृष्टार्थेषु काम्येषु तदा विधेरुपयोगः। तस्मान्न काम्येऽनुष्ठीयमाने प्रासङ्गिकत्वं नित्यस्य। तस्मादस्मन्मतावलम्बनेन तन्त्रतैव रमणीयेति।

क्वचित् पाठः न तु तत एवेति। अस्यार्थः न तु नित्यसमीहितोपायत्वाद्यथाशक्तिप्रयोगाच्च नित्यत्वकल्पना, किं तु श्रुतादेव नित्यत्वादेतदुभयमिति। अन्यथेति यथार्था स्यादिति। तयोश्च नित्यसमीहितोपायत्वं यथाशक्त्यनुष्ठानयोर्मानान्तरं मृग्यम्। यदि पुनर्यावज्जीवश्रुतिप्रतिपन्ननित्यत्वोपपादनार्थं नित्यसमीहितफलकल्पनायामपि वास्तवी नित्यता न शाब्दीति मन्येत तत्राह—कथं चेदं वास्तवं नित्यत्वं कर्मणो यदि नित्यसमीहितसाधनत्वमिति। नित्याऽनुष्ठानात्परस्याप्येतत्तुल्यमित्याह—अकरणे प्रत्यवायादितरस्याप्यनुष्ठानमिति तुल्यम्। शब्दपूर्वकत्वेन तत्कल्पनायामङ्गीक्रियमाणायां नाऽशब्दनित्यत्वमुभयोः परस्याऽऽत्मनश्च। पर आह—नाऽकरणे प्रत्यवायादस्मन्मते नित्यक्रिया किं तु शब्दादेव। परिहरति—नैतत्। शब्दादेव चेदवश्यकर्त्तव्यता किमर्थमकरणे प्रत्यवायकल्पना? शब्दादेव प्रवृत्तिसिद्धेः। ननु शब्द एव स्वरूपेण प्रवर्त्तयिष्यति मा च भूदकरणे प्रत्यवाय इत्याशङ्क्याह—न च शब्दः कारकत्वेन प्रवृत्तिहेतुरित्युक्तम्। ज्ञापकत्वे चाऽकरणे

त्यनुष्ठापयतीति वास्तवमेव स्यात् । तस्मादव्यवस्थितविधितत्त्वानामीदृशा नानाविधाः समुल्लासाः । कृच्छ्रविश्वजितोस्तु सदा सर्वस्य समीहितसाधनयोरपि सर्वस्य सर्वदेति शब्दस्याऽभावात्सर्वाङ्गप्रयोगः । ननु फलवत्त्वे शक्त्यनुसार एव न संभवति, वैगुण्यात्फलाभावप्रसङ्गात् किमिदं वैगुण्यम् ? चोदनार्थत्वहानिः, न तर्हि वैगुण्यम्, यावज्जीविके यथाशक्त्यङ्गोपेतेऽपि चोदनार्थत्वात् अचोदनार्थत्वे वा शक्तेरफलत्वेऽपि सर्वाङ्गोपसंहारोऽन्यथा चोदनार्थनिवृत्त्यभावाच्चेति । तदा क्रियाव्यतिरिक्तसाध्याभावान्नाङ्गापेक्षा । अनङ्गत्वमेव प्राप्तम्, कर्म्मणो विज्ञातोपायत्वात् । क्रियाऽपि विधेयरूपेण ज्ञातस्वभावा चोदनार्थनिर्वृत्तये अपेक्षतेऽङ्गानीति चेत्, सर्वाङ्गोपसंहारप्रसङ्गः । अथाऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति यावज्जीवश्रुतेः शक्तिश्चोदनार्थः । फलवादिनो न सा दण्डवारिता । किं चेदं रूपं चोदनायाः । यदि

प्रत्यवायज्ञापनान्नित्यमनुष्ठापयतीति वास्तवमेव नित्यत्वं स्यात् । उपसंहरति—तस्मादव्यवस्थितविधितत्त्वानामीदृशा नानाविधाः समुल्लासाः ।

यत्तु विश्वजिदादिवदित्युक्तम्, तत्र वैधर्म्यमाह—कृच्छ्रविश्वजितोस्तु सदा सर्वस्य समीहितसाधनयोरपि सर्वस्य सर्वदेति शब्दस्याऽभावत्सर्वाङ्गप्रयोगः । चोदयति—ननु फलवत्त्वे शक्त्यनुसार एव न संभवति, वैगुण्याद्धेतोः फलाऽभावप्रसङ्गात् । साधनाद्धि फलेनोत्पत्तव्यम्, । अङ्गसाकल्यवच्च साधनं नाङ्गवैकल्ये सति तत्त्वे व्यवस्थातुमर्हतीत्यर्थः । परिहरति—किमिदं वैगुण्यम् । ? यद्युच्येत चोदनार्थत्वस्य हानिस्तत्राह—न तर्हि वैगुण्यम् । कुतः ? यावज्जीविके यथाशक्त्यङ्गोपेतेऽपि चोदनार्थत्वात् । यावज्जीवशब्दस्यैष महिमा यत्कतिपयाऽङ्गविकलमपि साधनं फलाय कल्पते इत्यर्थः । न चेदेवं परमतेऽपि तुल्यः प्रसङ्ग इत्याह—अचोदनार्थत्वे वा शक्तेरफलत्वेऽपि सर्वाङ्गोपसंहारः । कुतः ? यावज्जीवशब्दाऽनादरे यो यदेत्युपबन्धात्साङ्गस्याऽफलस्यापि चोदनार्थत्वत्किञ्चिदङ्गवैकल्ये चोदनार्थनिर्वृत्त्यभावात् । यद्युच्येत तदा क्रियाव्यतिरिक्तसाध्याऽभावान्नाङ्गापेक्षा साध्याऽभावसूचनपरश्च यावज्जीवशब्द इति । दूषयति—अनङ्गत्वमेव तर्हि युक्तं कर्मणः । कुतः ? विज्ञातोपायत्वात् । शङ्कते—क्रियापि विधेयरूपेणाऽज्ञातस्वभावा चोदनार्थनिर्वृत्तयेऽपेक्षतेऽङ्गानीति चेत् । यद्यपि क्रियास्वरूपं लौकिकं लौकिकोपायसाध्यं च, तथापि चोदनागम्येन रूपेणालौकिकत्वात् साङ्गस्य चोदनार्थत्वादङ्गानामप्यनुष्ठानं युक्तमित्यर्थः । निराचष्टे—सर्वाङ्गोपसंहारप्रसङ्गः । आशङ्क्य साम्यमाह—अथाऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति यावज्जीवश्रुतेः शक्तिश्चोदनायाः । फलवादिनोऽपि सा न

१. किं चिदेव रूपम् मू पु. पा. ।

दर्शपूर्णमाससंज्ञकं तदुत्पत्तिवाक्याऽवगतमित्यनौत्पत्तिकानामभावः। अथान्यन्न तच्छ्रेयःसाधनत्वात्। यथोक्तम् 'श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते' इति। तस्याऽयमभ्युपाय इति हि तेषामुपदेश' इति च। नाऽप्य-करणे प्रत्यवायहेतुता, असतो हेतुत्वाऽनुपपत्तेः।

दण्डेन वारिता। अपि च किं चेदं रूपं चोदनार्थः, कर्मस्वरूपं हि देवतोद्देशेन पुरोडाशत्यागात्मकम्, तच्च मानान्तरात्समधिगम्यमिति न चोदनार्थस्तत्र प्रमाणमिति भावः।

ननु भवतु कर्मस्वरूपं मानान्तरवेद्यं यत्पुनरेतस्याष्टसु कपालेषु संस्कृतपुरोडाशद्रव्यत्वमग्निदेवतात्वं च त'दाग्नेयोऽष्टाकपाल' इत्येतस्मा-दुत्पत्तिवाक्यादन्यतोऽशक्यावगममिति। न चोत्पत्तिवाक्याऽवगतविविध-विशेषणे कर्मणि न्यूनाऽतिरेककरणाय प्रमाणान्तरं प्रभवति, तत्करणे तत्स्व-रूपग्रहणप्रसङ्गादन्यतस्तदविज्ञानादित्याशयवानाशङ्कते—यदि दर्शपूर्णमास-संज्ञकम्। निराकरोति—तदुत्पत्तिवाक्याऽवगतमित्यनौत्पत्तिकानामभावः प्रसज्येत। यन्मात्रमेव हि द्रव्यदेवतादिकमङ्गमुत्पत्तिवाक्याऽवगतं तावतो-ऽशक्यहानत्वात्तद्धाने कर्मस्वरूपहानप्रसङ्गात्। मा भूत्परित्यागः, अन्यानि यानि पुनरङ्गान्युत्पत्तिकर्मसंबन्धीनि सन्निपत्योपकारकाण्यवघातादीन्यारा-दुपकारकाणि च प्रयाजादीन्यनौत्पत्तिकान्याग्नेयाद्युत्पत्त्यसंबन्धीनि तेषाम-भावप्रसङ्गः। न खलु तेषां प्रहाणे कर्मस्वरूपं निरपेक्षोत्पत्तिवाक्यावगतं विद्यते। अथाऽन्यन्न तच्छ्रेयःसाधनत्वात्। यथोक्तं श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते' 'तस्यायमभ्युपाय इति हि तेषामुपदेश' इति च।

यत्पुनरुक्तं यावज्जीवोपधानाल्लिङोऽवश्यकर्त्तव्यता कर्मणोऽवगम्यते। लोकश्च तदवश्यकर्त्तव्यमवगच्छति यदकरणे प्रत्यवायो भवति, भयाद्धि यादृशी प्रवृत्तिर्न तादृशी लोभात्, तदकरणनिमित्तप्रत्यवायमेव कल्पयिष्यामो न पुनरुपात्तदुरितक्षयलक्षणं फलम्। तथा सत्यकुर्वन्विहितं कर्मेत्यादिभूयांसि वचांसि धर्मशास्त्रकाराणां वाक्यशेषश्च 'यो ह वे'त्युपपत्स्यते इत्यत आह—नाप्यकरणे प्रत्यवायहेतुता। असतो हेतुत्वाऽनुपपत्तेः। अयमर्थः। सत्यं करणेनाऽकरणं निवर्तते। किमिति पुनस्तन्निवर्त्तनीयम्। प्रत्यवायहेतु-त्वादिति चेत्। तदसत्। कुतः? असतो हेतुत्वाऽनुपपत्तेः। न च करणेन भावरूपेण प्रत्यवायाऽभावः प्रागभावरूपः शक्योपजनः। ननु च नित्या-ऽकरणे तत्कालेऽन्यान्येव कर्माणि कानिचिदन्ततो निमेषादीन्यपि तानि प्रत्यवायं जनयन्ति। नित्यक्रियायां तु सन्त्यपि तानि न जनयन्तीत्येवं

तुल्ये च साध्यत्वे नाऽनुपपत्तिः प्रयाजादीनाम् ।

न हि स्वरूपे कार्ये वाऽनुपयोग्यङ्गम् । प्रयुक्तेरप्येवंविधस्याऽभावात् । न च दुःखत्वात्कर्मण आनुषङ्गिकात्पापक्षयात्प्रवृत्तिरशास्त्रीयत्वे

किमिति न कल्प्यते ? न शक्यं कल्पयितुम् । तथा हि । यावज्जीवं जुहुयादिति होमाऽनुरक्तायां भावनायां पुरुषं प्रवर्त्तयतीति प्रवर्त्तना, सा चाऽन्वयव्यतिरेकाभ्यामपेक्षितोपायतैव प्रवृत्तिविषयस्य निवर्त्तना वाऽनर्थसाधनता निवृत्तिविषयस्य । तद्यत्र प्रवर्त्तयति यतश्च निवर्त्तयति तस्यैव हितोपायत्वमहितोपायत्वं च प्रतिपादयति । न पुनरन्यस्य नित्यसमये क्रियमाणस्य कर्मणः प्रत्यवायहेतुतामवगमयितुमुत्सहते । श्रुतिसंभवे लक्षणाश्रयणाऽयोगात् ।

यच्चोक्तं भयात् प्रवृत्तिर्ध्रुवभाविनी न तथा लोभादिति । सत्यमेतत् । वाङ्मनःशरीरचेष्टाभिर्दशविधाभिर्निषिद्धत्वेन विवेकिना परिह्रियमाणाभिरपि दैवाद्दिवानिशमुपगताभिराधीयमानात्पाप्मनो विविधदुःसहदुःखबीजाद्बिभ्यतस्तत्प्रत्यक्षलक्षणसमीहितसाधनेऽपि ध्रुवप्रवृत्तयो भवन्त्येव । न च क्वचित्समीहितसाधनता, क्वचिदपरामृष्टेष्टसाधनत्वं लिङर्थ इति युक्तम् । ऐकात्म्ये संभवत्यव्याप्यत्वादर्थवैचित्र्यस्याऽव्यवस्थाप्रसङ्गात् । न च स्मृतिविरोधः । समीहितसाधनत्वेऽपि नित्यानां यदा न तानि क्रियन्ते तदा दुरितान्यक्षीणानि प्रायश्चित्तान्तरेण क्षेष्यन्त इति नाऽनुपपत्तिः । वाक्यशेषोऽपि सन्देहेऽपेक्षितो निर्णयहेतुतां प्रतिपद्यते । अपेक्षितोपायत्वे विधावुपात्तदुरितक्षयप्रत्यवायाऽभावस्याऽसन्देहान्नित्यानां न वाक्यशेषापेक्षाऽस्तीति अर्थवादमात्रं वाक्यशेष इति कृतं विस्तरेण ।

किं चाऽस्मिन्मते तुल्ये च साध्यत्वे प्रयाजादीनां दर्शपूर्णमासयोश्च तृतीयाया अपि द्वितीयार्थे व्याख्यानाद्भावनायां वा कथंचित्करणभावेनोपपादनात्प्रयाजादीनामङ्गत्वाऽनुपपत्तिः । विनियोजकप्रमाणाभावात् । कर्त्तव्यस्य हीतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणमाचक्षते । तदिह दर्शपूर्णमासयोर्नित्ययोर्निष्फलत्वेन प्रयाजादीनां च यावद्दर्शपूर्णमासौ कर्त्तव्यतया प्रयाजादीन् नापेक्षेते तावत्प्रयाजादयोऽपि किमिति दर्शपूर्णमासौ अपेक्षन्ते ? इति न प्रकरणं विनियोजकं भवितुमर्हति । न च प्रकरणव्यतिरिक्तमेषां प्रयोजकं प्रमाणान्तरं प्रतिज्ञायते प्रज्ञायते वा । न च द्वारकार्याभावेऽङ्गता युक्ता । तस्यास्तद्व्याप्यत्वेन तन्निवृत्तौ निवृत्तेरित्याह—न हि स्वरूपे कार्ये वाऽनुपयोग्यङ्गम् ।

तप्तशिलारोहणादिवत् । पापकृतत्वे च पुरुषकारवैयर्थ्यात् । अतत्कृतत्वे वा नाशाऽभावात् । शास्त्रीयेण तूपायेन विपाचने न दोषः ।

यदि तर्हि फलवत्यपि न सर्वाङ्गोपसंहारः काम्येऽपि तथा स्यात् । यावज्जीवश्रुतेरितरत्रैवमिति चेत् । इहापि स्वर्गकामश्रुतेरस्तु । यथैव यावज्जीवमशक्यमहीनाङ्गं तथा सर्वेण स्वर्गकामेन तत्र यथा यदा यावन्ति शक्नोति तदा तावतामुपसंहारः, तथा यो यावन्ति शक्नोति स तावन्त्युपसंहरिष्यति । अङ्गविधिविरोधाद्धि स्वर्गकामश्रुतिरर्थिमात्रविषया विशेषमनुरुध्यते[1] शक्त्यपेक्षायां त्वङ्गविध्यविरोधे नित्यवन्न विशेषानुरोधहेतुः ।

ननु मा भूदविनियोजकम्, प्रकरणादिप्रयुक्तिरेव तु विधेराक्षेपाऽपरनामा लिङ्गसंख्यादीनामिव प्रयाजादीनामङ्गत्वं गमयिष्यतीत्यत आह—प्रयुक्तेरप्येवंविधस्याऽभावादेवंविधस्येति दर्शपूर्णमासाभ्यां साध्यत्वेन तुल्यस्यापि नियुक्तस्य न प्रयुक्तिरुपादानं संभवति विनियोगाऽनुसारित्वादुपादानस्य । अतएव 'नोद्यन्तमादित्यमीक्षेत', 'सुवर्णं भार्यं'मित्येवमादयो विनियोगाऽभावात् क्रतुविधिनाऽनाक्षिप्यमाणाः क्रत्वर्था न भवन्ति । न च दुःखत्वात्कर्मण आनुषङ्गिकात् पापक्षयात्प्रवृत्तिः अशास्त्रीयत्वे तप्तशिलारोहणादिवत् । अपि च तस्य नित्यक्रियाजन्मनो दुःखस्याऽऽक्षिप्तपापकृतत्वे विधानमनर्थकम्, नित्यानां कर्मणां प्राग्भवीयपापपरिपाकादेवोत्पादात्पुरुषकारवैयर्थ्यात् । अतत्कृतत्वे वा नाशाभावात्स्वफलविरोधित्वात्पापस्य । ननु यद्यकृतेन विधिना नाश्यते पाप्मा कथं तर्हि त्वन्मतेऽपि नित्यात्कर्मणो विनङ्क्ष्यतीत्यत आह—शास्त्रीयेण तूपायेन विपाचने न दोषः प्रायश्चित्तैरिव । पाचनं फलजननाऽभिमुखीभावः, तस्यैकान्तिकी निवृत्तिर्विपाचनं चिरंभावार्थः । शास्त्रगम्योऽयमर्थो न पर्यनुयोगमर्हति, तप्तशिलारोहणादि तु न शास्त्रयुक्तिगोचर इति भावः ।

अथ चोदयति—यदि तर्हि फलवत्यपि न सर्वाङ्गोपसंहारः, काम्येऽपि तथा स्यात् । चोदक एवाऽऽशङ्क्य परिहरति—यावज्जीवश्रुतेरितरत्र नित्ये एव न सर्वाङ्गोपसंहार इति चेत् । इहापि स्वर्गकामश्रुतेरस्तु । एकग्रन्थेनाह—यथैव यावज्जीवमशक्यमहीनाङ्गं तथा सर्वेण स्वर्गकामेन यत्र यथा नित्ये यदा यावन्ति शक्नोति तदा तावतामुपसंहारः तथा काम्येऽपि यो यावन्ति शक्नोति स तावन्त्युपसंहरिष्यति ।

स्यादेतत् । अङ्गानां नित्यवद्विधानात् व्यवस्थायां च तदनुपपत्तेनर्थिमात्रमधिकृत्य विधेरुपपत्तिः । अर्थिश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थविषयत्वेनाप्युपपन्ना । न ह्यसौ न स्वर्गकामस्तस्मात्काम्येषु यो यदेत्येव युक्तमित्यत

1. अवरुध्यते मू० पु० पा० ।

अथ मतम् अनुपरोधे स्वर्गकामश्रुतेरङ्गविषय एवोपरुध्येरन्नविशेषप्रवृत्ता यथाशक्तिव्यवस्थायाम् । नित्येऽपि तुल्यम् । यावज्जीवश्रुतेरनन्यगतित्वात् । तत्रैवंकामश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थेऽप्युपपन्नैव । तत्राऽविरोधात् कांस्यभोजिन्यायेन तदनुरोधेनाङ्गिवृत्तिः । सत्यमविरोधेन दर्शितस्तु स्वर्गकामश्रुतेर्विषयसंकोचलक्षणो विरोधः । तत्राऽप्रधानविरोधे प्रधानाऽनुरोधः श्रेयान्,

आह—अङ्गविधिविरोधाद्धि स्वर्गकामश्रुतिरर्थिमात्रविषयापि विशेषमनुरुध्यते । शक्त्यपेक्षायां त्वङ्गविध्यविरोधे च नित्यवन्न विशेषाऽनुरोधहेतुरस्ति तस्याः । अस्यार्थः । सति विरोधेऽङ्गविधिभिः स्वर्गकामश्रुतिरविशेषप्रवृत्ता विशिष्टविषया व्याख्येया, नित्यवत्तु यो यावन्ति शक्नोतीति शक्त्यपेक्षायामङ्गविधीनामविरोधेन स्वर्गकामश्रुतेः प्रस्थितायाः संकोचो न्याय्यः । अथोच्येत, विषयसंकोचलक्षणस्तावदुपरोधोऽङ्गविधीनां स्वर्गकामश्रुतेश्च तुल्यस्तत्राङ्गविधीनां वहुत्वात्तदनुरोधेन वरं स्वर्गकामश्रुतिरेकोऽवरुध्यतामिति ।

शङ्कते—अथ मतमनुपरोधे स्वर्गकामश्रुतेरङ्गविषय उपरुध्येरन्नविशेषप्रवृत्ता यथाशक्तिव्यवस्थायामिति । परिहरति—नित्येऽपि तुल्यमिति । तत्राप्येकैव यावज्जीवश्रुतिरङ्गविषयश्च वहव इति भावः । स्यादेतत् । यदि नित्ये यदा यावन्त्यङ्गानीति शक्त्यपेक्षा नाश्रीयेत ततो यावज्जीवश्रुतिरत्यन्तं बाध्येत । न ह्यस्ति संभवो यावज्जीवं यजेत सर्वाङ्गोपसंहारेणेति । अस्ति तु संभवः स्वर्गकामो यजेत सर्वाङ्गोपसंहारेणेति । नहि सर्वाङ्गोपसंहारसमर्थस्य स्वर्गकामस्य स्वर्गकामपदमवाचकमित्याह—यावज्जीवश्रुतेरनन्यगतित्वात् । तत्रैवंकामश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थेऽप्युपपन्नैवेति ।

ननु भवतु समर्थोऽपि स्वर्गकामस्तथापि तत्पदमनियतवृत्ति सत् कथमप्रधानैरङ्गविधिभिर्नियम्यते? इत्याशङ्क्याह—तत्राऽविरोधात् कांस्यभोजिन्यायेन तदनुरोधेनाङ्गिविधिवृत्तिरिति । अयमर्थः । कामिपदं हि कामोपाधिना प्रतिपुरुषवृत्त्यङ्गविधिविरोधेन समर्थे नियम्यमानमपि विरुध्येत कांस्यभोजिन्यायेन । तद्यथोपाध्यायः प्रधानो नित्यं तत्तत्पात्रभोजी शिष्यस्त्वप्रधानः कांस्यपात्र एव भुङ्क्ते, तत्र प्रवृत्तिलाघवादेकस्मिन्पात्रे उपादातव्ये यदि प्रधानोपायाऽनुरोधाद्यत्किंचित्पात्रमुपादीयेत शिष्यस्य भोजनं न संपद्येत । कांस्यपात्रे तूपादीयमाने नाऽनियतपात्रभोजनमुपाध्यायस्य भोजनविरोधः । तेनाऽविरोधे प्रधानमपि गुणाऽनुरोधान्नियम्यतएवेति तदनुरोधेनेति अङ्गविध्यविरोधेनाङ्गिविधिवृत्तिरिति । तदेतद् दूषयति-सत्यमविरोधो दर्शितस्तु स्वर्गकामश्रुतेर्विषयसंकोचलक्षणो विरोध इति । ना कांस्यपात्रभोजिन्यायस्य विषयः । तथा हि । तत्राऽनियतपात्रभोजनोऽप्युपाध्यायो न

लोकवत् । यथा हि ब्राह्मणान्भोजय नानाविधोपकरणेनाऽन्नेनेति यथाशक्त्युपकरणव्यवस्थानोपकरणाऽनुरोधेन ब्राह्मणनियमः । एवं चाऽङ्गविधीनामपि नाऽत्यन्तसापेक्षत्वम् । ततः काम्येष्वपि यथा शक्नुयादित्येवास्तु, न यो यदा शक्नुयादिति, अवैलक्षण्यात् । नैतत्सारम् । एकप्रयोगविधिवैरूप्यप्रसङ्गादनेक-

सहसैव सर्वेषु पात्रेषु भुंक्ते येन नियतपात्रभोजिना शिष्येण विरुध्येत, कामश्रुतिस्तु कामसंबन्धमात्रलब्धवृत्तिः सकृदेव समर्थमसमर्थं वाऽर्थिमात्रमुपस्थापयन्ती समर्थेऽर्थिनि व्यवस्थाप्यमाना कथं नाङ्गविधिभिरुपरुध्येत? इति ।

ननु भवतु विरोधस्तथापि भूयस्त्वादङ्गविषयो बलीयसो बाधिष्यन्त इत्याशङ्कयाह—तत्राङ्गप्रधानविरोधे प्रधानाऽनुरोधः श्रेयान् लोकवदिति । सर्वथा साम्ये हि भूयस्त्वं बलीयस्त्वे हेतुः, इह कामश्रुतिरेकापि प्राधान्याद् भूयसोऽप्यप्रधानतयाऽङ्गविधीन् व्यवस्थापयितुमर्हत्येवेत्यर्थः ।

लोकवदिति दृष्टान्तं व्याचष्टे—यथा ब्राह्मणान् भोजयाऽनेन नानाविधोपकरणेनाऽन्नेनेति यथा ब्राह्मणशक्त्युपकरणव्यवस्थानोपकरणाऽनुरोधेन ब्राह्मणनियमः । यदा तु कामश्रुतेरसंकोचो नाङ्गविधीनां यो यावन्त्यङ्गानि समर्थ उपहर्तुं स तावद्भिरुपेतं प्रधानं निवर्त्तयतीति व्यवस्थापना तदा प्रधानविधिरङ्गानि कानिचित्कदाचिदपेक्षते कदाचिन्नेति नैकान्तोऽङ्गविध्यपेक्षा भवति, यथा 'केशश्मश्रु वपते न वे'ति विधिप्रतिषेधसामर्थ्यलब्धजन्मनि विकल्पाऽवगमे सति नैकान्ततः प्रधानविधिरङ्गं वपनमपेक्षेतैव किं त्वपेक्षेतापि तथैते सर्वेऽपि कामविधयोऽङ्गानीति सिद्धं भवतीत्याह—एवं चाऽङ्गविधीनामपि नात्यन्तसापेक्षतेति । एवं च सर्वेषामेव नित्यकाम्यविधीनामवैरूप्यं स्यादित्याह—ततः काम्येष्वपि यथा शक्नुयादित्येवास्तु, न यो यथा शक्नुयादिति, अवैलक्षण्यात् ।

तदेतद् दूषयति—नैतत्सारम् । एकप्रयोगविधिवैरूप्यप्रसङ्गादिति । अयमर्थः । सकृत्प्रवृत्ता खल्वियं कामश्रुतिरर्थिमात्रविषया यदि सर्वानेवाऽविशेषेणार्थिनोऽन्धादीन् विकलाऽवयवांश्चोपस्थापयेत्तदा स्वर्गकामोपहितमर्यादोऽयं प्रयोगवचनो नयनवन्तं स्वर्गकामं प्रत्याज्यावेक्षणं विदधाति अन्धं च स्वर्गकामं प्रति स एव तदेव न विदधातीति वैरूप्यं प्रसज्येत । न ह्यन्धादिपदान्यर्थिपदेन सह समभिव्याहृतानि, येन व्यवस्था स्यात् । ननु नैकशः प्रयोगवचनाङ्गे प्रवर्त्तते येन तस्य वैरूप्यं स्यात् किं त्वेकफलसम्बन्धानर्थानेकप्रधानोपकार[1] संबन्धांश्चैकस्य कर्तुरेकव्यापारतामापादयति, तथा च न प्रयोगविधिरङ्गानि प्रापयति किं तर्हि प्राप्तान्यङ्गान्यभिसमीक्ष्योपसंहरति

१, प्रकारोपकार १ पु० पा० ।

प्रयोगकल्पनाप्रसङ्गात् । केवलपदार्थव्यवहाराभावाद्विशेषश्रुतेरविरोधाच्च । स एव प्रयोगविधिस्तस्यैवाऽङ्गस्य प्रयोगं तमेव प्रतिविदधाति न विदधातीति[1] स्यात् । कल्पनागौरवं च, सामर्थ्यभेदेन प्रयोगभेदात् । पदस्य च पदान्तर-

एकप्रयोगमापादयतीति यावत् । तेन यथा श्रुत्यादिप्रापितान्यङ्गानि तदनुसारेणैव प्रयोगवचनेनोपसंह्रियन्ते तथाऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति स्रुवाऽऽज्यावदानवत्कर्तृसामर्थ्यस्यापि प्रापकत्वादन्धस्वर्गकामकर्तृसामर्थ्याऽनुसारेणाऽऽज्यावेक्षणमात्रवर्जितमङ्गजातमुपसंहरिष्यति । चक्षुष्मन्तं तु प्रति तत्सहितमिति को विरोधः ? यदि चक्षुष्मन्तमेव प्रत्युपसंहरेत् नोपसंहरेच्च ततो भवेत्प्रयोगविधिवैरूप्यलक्षणो विरोध इत्याशङ्क्याह— अनेकप्रयोगकल्पनाप्रसङ्गादिति । मा प्रापद्विरोधलक्षणं वैरूप्यं समर्थाऽसमर्थार्थिसमन्वयव्यवस्थापनया तत्तदङ्गोपादानपरिवर्जनाऽऽपादितप्रयोगभेदरूपं तु प्रयोगवैरूप्यं कल्पनागौरवापादकं प्रयोगवचनः प्रतिपद्यत एवेत्यर्थः ।

ननु च प्रामाणिकं कल्पनागौरवमपि न दोषमावहति । अस्ति चाऽत्र प्रमाणं स्वर्गकामश्रुतेरसङ्कोचः सामान्येन प्रवृत्तायाः । ऐकरूप्ये तु प्रयोगस्य सङ्कोचे विरोधः स्यादित्याशङ्क्याह—केवलपदार्थव्यवहाराऽभावाद्विशेषश्रुतेरविरोधाच्च । अयमर्थः । प्रत्यायनाय पदान्युच्चारयन्ति प्रेक्षावन्तः, स एव च तैरर्थो बोधयितव्यो यो बुभुत्सितः परैः तमेव च परे बुभुत्सन्ते यो व्यवहाराङ्गम्, न चाऽविशिष्टपदार्थसाध्योऽस्ति कश्चिद्व्यवहारः, तेन यद्यपि पदात्पदार्थमात्रमवगम्यते तथापि तन्मात्रं न व्यवहाराङ्गमित्यपर्यवस्यत् पदार्थान्तरं विशेषमपेक्षमाणं यत्पदान्तरेण योग्यमुपनीयते पदार्थान्तरं तदवच्छेदमनुमन्यतेतरां प्रयोगे, न तु प्रति[2]क्षेपकरणमन्यथा वाक्यार्थप्रत्ययाऽभावात्तदुच्छिन्नपदशङ्क्यमत्यन्तं मूकं जगत्प्रसज्येत । तदिह स्वर्गकामश्रुतिरपि लोकाऽनुसारेण स्वार्थमात्रे पर्यवस्यन्ती पदान्तरेण वाक्यान्तरेण वा योग्येन य एव विशेषः कश्चिदुपनीयते तमनुमन्यमाना न सङ्कोचेन हूयते । न हि तथा सर्वाङ्गोपसंहारसामर्थ्यविशेषणेऽर्थिनि लभ्यमाने न लब्धः स्वार्थः कामिपदसम्बन्धोपहितसीम्नस्तस्यापि तत्त्वादित्यप्रामाणिकत्वात् कल्पनागौरवं दोषायेति ।

एकप्रयोगविधिवैरूप्यप्रसङ्गादित्युक्तम्, तद्विस्पष्टयति—एवं हि स एव प्रयोगविधिस्तस्यैवाङ्गस्य प्रयोगं तमेव प्रतिविदधाति न विदधातीति स्यादिति । अनेककल्पनाप्रसङ्गादिति स्फुटयति—कल्पनागौरवं चाऽङ्गसामर्थ्यभेदेन प्रयोगभेदादिति ।

---

१. तमेव प्रतिविदधातीति मू० पु० पा० । २. प्रागेव तु प्रति २ पु० पा० ।

सम्बन्धे विशेषपरत्वं सर्वत्रगमिति न कदाचिदन्यायकल्पना । नित्येऽपि तर्ह्येव-मेवास्तु जीवन्यदा शक्नुयात् । यावदित्यनुपपन्नमिति चेत् । अनियतनिमित्तेषु कथम्? अपि च सातत्येन होमप्रसङ्गः । अथ कालविशेषोपादानाऽनुरोधान्न तथा । हन्ताऽङ्गविध्यनुविधायिन्यपि यावज्जीवश्रुतिः सामर्थ्ये सम्बन्धमन्वेती-त्यङ्गविध्यनुरोधाद्यदेति स्यात् ।

अथ मतं—जीवन्नपि साङ्ग एव कर्म्मण्यधिक्रियते नाङ्गशून्यं विधान-

केवलपदार्थव्यवहाराऽभावाद्विशेषश्रुतेरविरोधादिति यदुक्तं तत्स्पष्टयति —पदस्य च पदान्तरसम्बन्धे विशेषपरत्वं सर्वत्रगमिति न कदाचिदन्याय-कल्पनेति । ननु यदि पदस्य पदान्तरसम्बन्धे विशेषपरत्वमविरुद्धमिति स्वर्ग-कामपदं समर्थं विषयमिति यो यदेति सम्बन्धः, हन्त तर्हि जीवनमपि सामर्थ्येनाऽवच्छिन्नं नित्येऽपि यो यदेत्युपबन्धमावेदयिष्यतीत्याह—नित्येऽपि तर्ह्येवमेवाऽस्तु जीवन्यदा शक्नुयादिति ।

शङ्कते—यावदित्यनुपपन्नमिति चेत् । अयमभिसन्धिः । एकैकत्र चेतने कामनानिवेशादेकस्मिन्नपि समर्थे स्वर्गकामश्रुतेः समवेताऽर्थत्वान्न विरोधः, इह तु यावच्छब्दस्य जीवनकालव्याप्त्यर्थत्वात् यदा शब्दस्य कालैकदेशव्यवस्था-पकत्वाद्व्याप्तिविरुद्धत्वादस्ति नास्तीतिवदसङ्गतिरिति । परिहरति—अनियतनिमित्तेषु कथमिति । नाऽयमेकान्तो, यावच्छब्दाऽननुबन्धेषु नैमित्तिकेषु ग्रहोपरागादिस्नानेषु यदा शक्नुयादित्युपबन्धो नोपपन्न इत्यर्थः ।

इदानीं तावच्छब्दोपबन्धेऽपि यदा शक्नुयादिति सम्बन्धयितुं प्रसङ्गमा-पादयति—अपि च सातत्येन होमप्रसङ्गः । यावज्जीवेत्पदं च जीवना-वच्छिन्नकालव्यापनार्थमिति यावदयं प्राणिति तावदनेन होतव्यमित्यनपेक्षिते प्रातःसायंनियमे निरन्तरमेव जगतः सर्वोऽपि पानाहारव्यवहारो विपद्येतेति । अथ कालविशेषोपादानाऽनुरोधान्न तथा, तत्राह—हन्त कालविशेषोपादान-वत्सर्वाङ्गविध्यनुविधायिन्यपि यावज्जीवश्रुतिः सामर्थ्ये सम्बन्धमन्वेतीत्यङ्ग-विध्यनुरोधाद्यदेति स्यात् । अयमर्थः । यथा सायंप्रातःसमयविधिसामर्थ्या-त्सायंप्रातःसमयाऽवच्छिन्नमेव जीवनं यावदित्युपबध्यते तथा सर्वाङ्गविधि-सामर्थ्यात्तदेकवाक्यतया सर्वाङ्गोपसंहारसामर्थ्यसमयावच्छिन्नमेव जीवनं यावदित्युपभन्त्स्यन्ते । ततश्च नित्येऽपि काम्यवदेव यदा शक्नुयादित्युप-बन्धसिद्धिरिति ।

अथ मतं जीवन्नपि साङ्ग एव कर्मण्यधिक्रियते, नाङ्गशून्यं विधानम्, साङ्गस्यैव तस्य करणभावेनाऽवगमात् । ननु तथापि काम्यान्नित्यस्य को विशेषः ? इत्याशङ्क्याह—अधिकृतस्य तु प्रयोगो यावदधिकारं नाङ्गानु-

मधिकृतस्य तु प्रयोगो यावदधिकारं नाङ्गाऽनुरोधेन निवर्त्तते । यथासम्भवं तु अधिकारायत्तत्वात्तस्य । न च काम्येऽपि प्रसङ्गः । कार्यनिष्ठत्वात्कामाधिकारस्य[1] प्रयोगनिष्ठत्वाच्च नैमित्तिकस्य । साधनापेक्षत्वात् कार्य्यस्य,

रोधेन निवर्त्तते । अयमभिसन्धिः । यद्यप्यङ्गविध्येकवाक्यताबलान्निखिलाङ्गोपसंहारसमर्थस्य जीवतोऽधिकारो विधेरवगतस्तथापि सामर्थ्यमालोच्य पुरुषः प्रवृत्तोऽनन्तरं तु यदि कश्चित्प्रमादतः कतिपयाङ्गकरणाऽसमर्थः समर्थश्चेतराणि सर्वाण्येव कर्त्तुं तत्र किमेषोऽसमर्थः कतिपयेष्वङ्गमिति सर्वथैव ततः प्रयोगादुपरमताम् ? अथ यत्राप्यसमर्थस्तदङ्गसहितमप्यधिकारप्रतीतिसामर्थ्यादनुतिष्ठतु ? आहोस्विदशक्यकतिपयाङ्गवर्जितमितराङ्गग्रामसहितं प्रधानम्प्रयुङ्क्ताम् ? इति यथासम्भवं त्वधिकारायत्तत्वात्तस्येति । अयमर्थः सत्यप्यधिकारप्रत्यये शक्यकरणाऽनुपपत्तेः सर्वथोपरमे चाधिकाराऽङ्गविरोधादधिकाराऽतिक्रमप्रसङ्गेनाऽन्तिमपक्षपरिग्रहः । अशक्याङ्गवर्जितेतराङ्गसहितप्रधानानुष्ठानं खल्वधिकारानुरोधादयं प्रयोगविधिरवलम्बते इति ।

ननु काम्येप्येतत्सर्वं समानमित्याशङ्क्याह—न च काम्येऽपि प्रसङ्गः, कार्यनिष्ठत्वात्कामाऽधिकारस्य प्रयोगनिष्ठत्वाच्च नैमित्तकस्य । अयमभिप्रायः । काम्ये हि स्वर्गकामो यजेतेति साध्यस्वर्गविशिष्टो नियोज्यस्तदेव कार्यं प्रतिपद्यते यत्स्वविशेषणाऽनुकूलम्, साध्यस्यैव सतो विशेषणत्वात्, तदननुकूलत्वे तु कार्यस्य, न तत्र स्वर्गकामो नियोज्यः स्यात्कार्यं च कृत्यवच्छिन्ने नाप्रतीयमानायां कृतौ शक्यनिरूपणम् । न ह्यनवगतविशेषणो विशिष्टमवगच्छति । कृतिव्याप्यं हि प्रधानं कार्यमुच्यते । प्राधान्यं च तदुद्देशेन कृतेः प्रवृत्तिः । कृतिश्चैवंविधेषु वाक्येषु चेतनव्यापारः प्रयत्नशब्दवेदनीय एवाऽऽस्थेयः । चेतनो हि नियोज्यस्तदेव कार्यं प्रतिपद्यते यत्र कार्ये तिरश्चीनमात्मानमवगच्छेत् । न चाऽन्यव्यापारव्याप्ये तथाऽवगन्तुमर्हति । प्रयत्नश्च प्रत्ययवन्न विषयमन्तरेण शक्यो निरूपयितुम्, विषयश्च तस्य प्रायेण भावार्थः । तदालम्बनस्यैव प्रयत्नस्याऽपूर्वाभिधानकार्योद्देशेन प्रवृत्तेः । न खलु लोकेऽप्यलब्धपाकरूपभावार्थविषयः पक्तुः प्रयत्न ओदनोद्देशेन प्रवर्तितुमर्हतीति । ततश्च कृतिमन्तरेण कार्यस्याऽनिरूपणात् कृतेश्च भावार्थं विनाऽप्रतीतेः कृतिप्रणाडिकया कार्यस्य भवति भावार्थो विषयः, तद्बन्धनत्वात् । षिञ् बन्धने इत्यस्माद्विषयपदव्युत्पत्तेः । तदेवं कामोपायस्य कार्यस्य विषयभावमुपगच्छन् भावार्थे नाऽनुपायः पारयति गन्तु[1]मित्युपायतामेव पुरोधाय विषयताऽवगम्यते भावार्थस्य काम्येषु । उपायता च निखिलाङ्गसंपादितो-

१. सेतुम् १ पु० पा० ।

यावदङ्गं च साधनभावाऽवगतेः सर्वाङ्गोपसंहारेणैव कार्य्यसिद्धेः । ननु उभय-

पकारतया नाऽन्यथा, मिलितानां च सर्वेषामङ्गभावः । प्रत्येकं तद्भावेऽ-ष्टविधदोषनिदानविकल्पाऽऽपत्तेः । तत्राऽऽगन्तुकेऽप्यक्रियमाणे समस्ताऽङ्ग-जन्यस्य करणोपायस्या[1]सम्पत्तेरुपायत्वाऽभावाद् विषयिणोऽधिकारस्याऽ-प्रतीतेर्न यद्बलेन हीनाङ्गं काम्यं कर्म संपादयति, अपि तु सर्वोपसंहाराय घटते । समर्थस्तु क्वचित्प्रयोगादेव निवर्त्तते । नित्ये तु नायं प्रकारः संभवी । न हि तत्र साध्यविशिष्टो नियोज्यः, येनाऽनुपायं कार्यं कार्यतया नावगच्छेत् । तेनाऽन्यतःसिद्धनिमित्तावच्छिन्नो नियोज्यः कृतेः प्रणाडिकया भावार्थमात्रविषयमेव तावत्प्रथमं कार्यमवगच्छति । प्रतिपन्नसविषयकार्यस्तु कृत्युपहितस्वरूपत्वात्कार्यस्य कृतेश्च क्रियात्वेन करणनान्तरीयकत्वात्कार्यं प्रति करणमपेक्षमाणः सन्निधानाद्विषयीभूतस्य भावार्थस्य करणतां प्रति-पद्यते । न च कृतिनिवृत्तस्य भावार्थस्य कथं तामेव कृतिं प्रति करणत्वमिति वक्तव्यम् । तदवच्छिन्नायास्तदपूर्वविशेषेण कृतिभावाल्लोके तथा प्रतीतेः । यथाच्छेत्तुरुद्यमननिपातनलक्षणया क्रियया व्याप्यमानमपि व्रश्चनं तामेव प्रति साधनं भवति, व्रश्चनविषययोरुद्यमननिपातनयोश्छिदारूपत्वप्रति-लम्भात् । न हि लोष्टसमाश्रये उद्यमननिपातने अनाहितद्वैधीभावे छिदेति निरूपयन्ति । तेन यद्यपि भावार्थो व्याप्यते कृत्या तथाप्यपूर्वाऽर्थप्रवृत्तयेति तां प्रति न भावार्थः कर्म, किं तु करणमपूर्वं तु प्रधानं कर्म, तदुद्देशेन कृतेः प्रवृत्तत्वात् । तदेवं नित्येऽपि विषयभूतस्य भावार्थस्य पश्चात्करणत्वप्रती-तेरवगतसाङ्गप्रधानकरणत्वस्तदनुष्ठानसमर्थः प्रवृत्तः कुतश्चिन्निमित्ताद्यदि किंचिदुपहर्तुं न पारयति तथाप्यधिकारप्रतीतेः प्रतीत्यनुबन्धीभूतभावार्थ-मात्रविषयाऽवगमनोपायान्नोपरन्तुमर्हति, किं तु किंचिदङ्गहीनं प्रयोगमनु-तिष्ठति । तदिदं प्रयोगनिष्ठत्वं कार्यनिष्ठत्वप्रतिपक्षतयोपन्यस्तम् ।

यदि कामाऽधिकारस्य कार्यनिष्ठत्वं ततः किं भवति ? इत्यत आह—साधनाऽपेक्षत्वात्कार्यस्य, यावदङ्गं च साधनभावाऽवगतेः सर्वाङ्गोपसंहारे-णैव कार्यसिद्धेर्न काम्ये प्रसङ्गः । ननूभयत्रापि काम्ये नैमित्तिके चाऽधिकार एव कर्त्तव्यः । नियोगस्यैव कार्यस्य विधिप्रत्ययादवगतेस्तस्यैव प्रधान-त्वात् । तत्कर्त्तव्यतायाश्चाऽनुष्ठानमन्तरेणाऽनुपपत्तेरनुष्ठानस्य च पुंसः कर्तृतामन्तरेणाऽसम्भवात् कर्तृतायाश्चाऽधिकारिणां कर्मणि स्वामितामन्त-रेणाऽसिद्धेरधिकारितायाश्च नियोज्यतां प्रधानीभूतकार्यं नियोगं प्रत्यात्मन-स्तिरश्चनभावबोद्धृतां विनाऽपर्यवसानात् नियोज्योऽपेक्षितः । स चाऽविशिष्टो न शक्यः प्रतिपत्तुमिति तद्विशेषणाकाङ्क्षायां क्वचित्सिद्धमेव विशेषणं

१. करणोपकारस्य २ पु० पा० ।

त्राप्यधिकार एव कर्त्तव्यः। सत्यम्। एकत्र निमित्तपर्य्यन्तोऽपरत्रफलपर्य्यन्तः। तत्र निमित्तपर्य्यन्ते निमित्तवतोऽधिकृतस्याऽप्रयुञ्जानस्याऽधिकाराऽतिक्रान्तिरिति यथासंभवं प्रयोगः। फलपर्य्यन्ते त्वङ्गवैकल्ये फलाऽनुपपत्तिः। फलकामिताऽधिकारहेतुर्निवर्त्तते इत्यधिकाराऽभावान्नाधिकाराऽतिक्रान्ति-

जीवनादि स्वीकरोति, क्वचिच्च कामादिपदाऽऽपादितसाध्यभावं स्वर्गादि। न च नियोगविशेषणस्य साध्यता नियोगस्य साध्यत्वमुपहन्ति, नियोगसाध्यत्वनिमित्तत्वान्नियोज्यविशेषणसाध्यत्वस्य। 'न च निमित्तं विधिरपबाधत' इति न्यायात्। तेनोभयत्र नित्ये काम्ये च नियोगस्यैव कर्त्तव्यत्वात्कार्यनिष्ठत्वादित्यविशेष इत्यर्थः।

समाधत्ते—सत्यमेकत्र निमित्तपर्यन्तोऽपरत्र फलपर्यन्तः। अयमर्थः। निमित्तपर्यन्ताऽधिकारात्[1] निमित्तस्य चाऽसाध्यत्वात् निमित्तवान्नान्योपायतया कार्यमवबुध्यते, किं तर्हि भावार्थविषयमेव[2]। तस्यां च दशायां प्रतिपत्त्यनुबन्धितया भावार्थः प्रतीयमानस्तदनुरञ्जकत्वेनैव परमवतिष्ठते नोपायतया। ततश्च नैमित्तिकाऽधिकारस्य भावार्थमात्रविषयता न तूपायीभूतभावार्थविषयता। ततश्च यावद्भावार्थरूपभावित्वादधिकाराऽवगतेस्तन्मात्रेण च निमित्तस्य निमित्ततापर्यवसानान्निमित्तपर्यन्त इत्युक्तम्। कामाधिकारे तु कामोपायस्यैव कार्यस्य प्रधानस्याऽवगतेः फलपर्यन्त इत्युक्तम्। यद्येवं ततः किं सिध्यति? इत्यत आह—तत्र निमित्तपर्यन्ते निमित्तवतः सर्वाङ्गोपसंहारसमर्थस्य प्रवृत्तस्य दैवात्किञ्चिदङ्गमुपसंहर्त्तुमपारयतोऽपि भावार्थमात्रविषयत्वान्नियोगस्य तस्य च किञ्चिदङ्गहानादप्रच्युते[3] रधिकृतस्याऽप्रयुञ्जानस्य प्रयोगमननुतिष्ठतोऽधिकाराऽतिक्रान्तिरिति यथासम्भवं प्रयोगः। फलपर्यन्ते त्वधिकारेऽङ्गवैकल्ये सति न साधनत्वम्, साङ्गस्य साधनभावात् असाधनात्फलाऽनुत्पत्तेरुत्पत्तौ वाऽतिप्रसङ्गात् फलकामिता निवर्त्तते।

ननु न प्रत्यात्मवेदनीया फलकामिताऽङ्गहानौ न निवर्त्तेत इति शक्यं वक्तुमित्याशङ्क्याह—अधिकारहेतुरिति। अयमर्थः। फलकामिता खलूक्तेन मार्गेण करणभूतस्य भावार्थस्याऽधिकारविषयभावमापादयन्त्यधिकारहेतुः। सा चाऽङ्गवैगुण्ये सति केवलस्य भावार्थस्योपायभावात् विषयाऽभावे[4] न विषयिणोऽधिकारस्यापि निवृत्तेः सत्यपि नाधिकारहेतुतयाऽस्तीति फलकामिता निवर्त्तत इत्युच्यते इति। तस्मादधिकाराऽभावान्नाऽधिकाराऽतिक्रान्तिदोष इति न यथा कथंचित्प्रयोगः।

१. निमित्तवतोऽधिकारात् २ पु० पा०। २. विषयं स्वनिष्ठमेव २ पु० पा०।
३. अप्रसिद्धेः पु० पा०। ४. विषयत्वाभावेन पु० पा०।

दोष इति न[1] यथाकथंचित्प्रयोगः। एवं न सातत्येन प्रयोगो नाऽर्थाऽवरुद्धेषु यथाशक्ति चोपसंहारो नित्येषु न काम्येष्विति सर्वं चतुरस्रम्।

नेदं चतुरस्रम्। इदमङ्ग[2] भवान्व्याचष्टां किं शक्त्यपेक्षोऽधिकारो

ननु यदि नैमित्तिकेष्वङ्गवैगुण्येष्वधिकाराऽनपगमो भावार्थमात्रविषयत्वाऽनपायात्[3] तथा सति यावज्जीवमग्निहोत्रं जुहुयादिति सायंप्रातःकालयोरनङ्गत्वेन तदभावेऽप्यधिकारस्याऽनपेतत्वान्मध्यन्दिनादिकालेऽप्यजुह्वदधिकारमतिक्रामेदिति निरन्तरमेव होमप्रसङ्ग इत्याशङ्क्याह—एवं सति न सातत्येन होमप्रसङ्गः। इदमत्राकूतम्। यद्यपि नैमित्तिकेषु प्रथमं भावार्थमात्रमेव विषयस्तथापि कार्यस्य कृत्युपहितत्वेन करणाऽपेक्षायां भावार्थः पश्चात्करणं भवति। लब्धकरणत्वस्य चाऽङ्गापेक्षायामङ्गान्युपतिष्ठन्ते, तेन साङ्गोपसंहारं[4] प्रति स्वाभाविकसामर्थ्यशालिन एव पश्चादधिकाराऽवगमादप्रतिसमाधेयाऽन्धत्वादिदोषाणामपेक्षमाणाद्यङ्गवति अत्र्यार्षेयाणां च त्र्यार्षेयचरणवत्यनग्न्याहितानां चाऽऽहवनीयादिभाजि मध्यन्दिनसमयवर्त्तिनां च पुंसां सायंप्रातःसमयाऽङ्गसङ्गिनि नाऽधिकारः कर्मणि, यथाविहितकर्मोपसंहारं प्रति निजसामर्थ्याऽभावात्। येषां पुनराजानिक[5]मस्ति सामर्थ्यं यथा दरिद्राणां प्रतिसमाधेयबाधिर्यादीनां च तेषां सत्यपि दरिद्राणत्वे सत्यपि च बाधिर्यादावस्त्येव धनसाधने श्रवणादिसाधने च कर्मण्यधिकार इति तदकरणे भवत्यधिकाराऽतिक्रमो नित्येषु न तु काम्येषु। स्वाभाविकसामर्थ्ये सत्यपि तदानीन्तनेन प्रतिसमाधेयेनाप्यसामर्थ्येनाङ्गवैकल्ये सति साधनत्वाऽपायेन साधनीभूतभावार्थविषयस्याऽधिकारस्य निवृत्तेः। ननु विशेषणेषु भवतु भावार्थमात्रमेव विषयः कार्यस्य, तथापि तस्यामपि कार्यत्वेन करणाऽधीनोत्पत्तित्वात् प्रतिसमाधेयेनाप्यसामर्थ्येनाङ्गाऽननुष्ठाने सति तद्विकल्पादनुत्पत्तेः कथमनपायोऽधिकारस्य नापायस्तस्य यावद्विषयं प्रत्यभिज्ञानाद्विषयस्य भावार्थस्य कतिपयाङ्गवैगुण्येऽप्यनपेतत्वान्निजस्य च सर्वाङ्गोपसंहारसामर्थ्यस्य च तदनपायेऽनपेतोऽधिकारस्तदानीन्तनमागन्तुकं कतिपयाङ्गाऽनुष्ठानसामर्थ्यमवलोक्य यावदुपसंहरणीयाङ्गसंपाद्यतामेवात्मनोऽवगमयति। न ह्यस्ति सम्भवोऽधिकाराऽवगतिरननुष्ठानं चेति। तस्मादधिकाराऽवगतिसामर्थ्यात्तस्यां दशायां यथाशक्त्युपसंह्रियमाणाङ्गाऽऽधेयोपकारतामेवाऽन्यथानुपपत्तेः स्वकरणस्य कार्यमवलम्बते। सोऽयमङ्गवैकल्याद् गौणः शास्त्रार्थ इत्युच्यते। औत्सर्गिकी तु सकलाङ्गग्रामसंपादनीयकरणोपकारितैव

१. नेति नास्ति मू० पु०। २. अत्र० मू० पु० पा०।
३. विषयस्याऽनपायात् पु० पा०। ४. सर्वाङ्गोपसंहारम् पु० पा०।
५. स्वाभाविकम् पु० पा०।

यथाधिकारं च प्रयोगः, आहोस्विच्छ्रुत्यपेक्षोऽधिकारो, ऽधिकृतस्य तु यथाशक्ति प्रयोगः? पूर्वस्मिन्कल्पे यथैव कालविशेषयुक्ते कर्म्मणि तत्कालजीविनोऽधिकृताऽन्यस्य तद्विशिष्टकर्म्मोपसंहाराऽसामर्थ्यात्। अन्यथाऽन्यदापि अकुर्वतोऽधिकाराऽतिक्रान्तिः। पश्चिमे तु नाङ्गशक्तिरधिकारं

नित्याऽधिकारस्येति सर्वाङ्गोपसंहारो मुख्यः शास्त्रार्थः। तस्मात्सूक्तं न सातत्येन प्रयोगो नाऽर्थाविरुद्धेषु कालेष्विति। नापि तस्यैव होमस्याऽऽहाराद्यवरुद्धेषु कालेषु यथा सततहोमो न सततं सायमादिकालमपेक्षते, किं तर्हि अर्थाऽविरुद्धकालाऽवलम्बनम्, अन्यथा संततत्वाऽभावप्रङ्गात्, ज्ञायत एवैतत्सततं होतव्यं न तत्सायमादिसमयाऽपेक्षमिति, तथेह होमे सायमादिसमयविधानात्तस्य च मध्यन्दिनादिसमयेऽवश्यमनुपसंहार्यत्वात्। तस्मान्न सातत्येन होमो यथाशक्ति चोपसंहारो नित्येषु न काम्येष्विति सर्वं चतुरस्रम्।

तदेकदेशिमतं दूषयितुं विकल्पयति—नेदं चतुरस्रम्। इदमङ्ग भवान् व्याचष्टां किं शक्त्यपेक्षोऽधिकारो यथाधिकारं च प्रयोगः, आहोस्वित्यंच्छ्रुत्यपेक्षोऽधिकारोऽधिकृतस्य तु यथाशक्तिप्रयोगः? इति। अयमर्थः। अङ्गोपदेशसामर्थ्यादश्रुतमपि सर्वाङ्गोपसंहारनिजसामर्थ्यमनुपादेयत्वादधिकारविशेषणतामापद्यत इति तदपेक्षोऽयमधिकारो भवति। यथाधिकारं च प्रयोग इत्येकः कल्पः। अपरस्तु यावज्जीवश्रुतिमात्राऽपेक्षोऽधिकारो नाङ्गोपसंहारसामर्थ्यमपेक्षते, तस्याऽश्रुतत्वादिति। तत्र प्रथमं कल्पं शक्त्यपेक्षोऽधिकार इति दृष्टान्तद्वयेनोपपाद्य दूषयति—यथैव कालविशेषयुक्ते कर्मणि 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'त्येवमादौ तत्कालजीवनाधिकृतादन्यस्याऽतत्कालजीवस्य तत्कालविशिष्टकर्मोपसंहारसामर्थ्याऽभावात्। अवश्यं च तदास्थेयमित्याह—अन्यथाऽन्यदापि पञ्चम्यादावपि अकुर्वतोऽधिकाराऽतिक्रान्तिः स्यात्। यथा राजसूये राजत्वमन्यस्य संपादयितुमशक्तेरधिकारं विशिनष्टि। न जातु ब्राह्मणवैश्यौ राजत्वमात्मनः संपादयितुमर्हतः, येन राजसूये राजकर्तृकेऽधिक्रियेयाताम्। तथाऽङ्गोदेशाऽपेक्षत्वादधिकारस्य तत्सामर्थ्यविशिष्टजीवनमधिकारकारणमिति। भवत्वेवं तथापि को दोषः? इत्यत आह—कुतः प्रथमे कल्पे तादृशस्याङ्गोपसंहाराऽसमर्थस्याऽधिकाराऽतिक्रान्तिः।

द्वितीयं कल्पं श्रुत्यपेक्षोऽधिकार इति दूषयति—पश्चिमे तु नाङ्गशक्तिरधिकारं विशिनष्टीति सातत्यप्रसङ्गः। अस्यार्थः। यदा हि श्रुत्यपेक्षोऽधिकारस्तदा जीवनमात्रस्य श्रुतत्वात्तन्मात्रमेवाऽधिकारिविशेषणमिति होमादिसातत्यप्रसङ्गः। किं च काम्ये चाङ्गहानादननुष्ठानेऽधिकाराऽतिक्रमः स्यात्। किं च पङ्ग्वादेश्चाऽधिकारप्रसङ्गः, न ह्यसौ न स्वर्गकामो न चाऽजीवनवान्।

विशिनष्टीति सातत्यप्रसङ्गः। न ब्रूमोऽङ्गशक्तिरधिकारं विशिनष्टीति, किं त्वङ्गशक्त्यपेक्ष एवाऽधिकार इति। तादृशस्यैव तु कस्यचिदङ्गस्याऽसंभवे न प्रयोगो निवर्त्तत इति। वैगुण्याच्चापि फलेऽधिकारहेतुरेव नास्तीत्युक्तम्।

कोऽयमसंभवः? तदुपसंहारासामर्थ्यम्, न तर्ह्यधिकृतस्तद्विशेषणत्वात्तस्य। अथाऽनुपसंहारोऽनङ्गत्वमेव। कादाचित्कमसामर्थ्यमसंभवो न तेनाऽधि-

अत्रैकदेशी गूढाऽभिप्रायः प्रथमं पक्षमाश्रित्याह—न ब्रूमोऽङ्गशक्तिरधिकारं विशिनष्टीति, किं त्वङ्गशक्त्यपेक्ष एवाऽधिकार इति। किमिति तर्ह्यङ्गवैकल्ये नैमित्तिकं प्रयुज्यते? इत्याशङ्क्याह। तादृशस्यैव ह्यधिकारिणः कस्यचिदङ्गस्याऽसम्भवेऽपि न प्रयोगो निवर्त्तत इति सामर्थ्यस्याऽधिकारिविशेषणस्य भावार्थमात्रस्याऽधिकारिविषयस्य च तदानीमपि नैमित्तिकेषु भावादित्यर्थः।

काम्ये तर्हि हीनाङ्गे प्रयुज्यमाने समर्थस्याधिकाराऽतिक्रान्तिः प्रसज्येतेत्याशङ्क्याह—वैगुण्याच्चापि फलेऽधिकारहेतुरेव नास्तीत्युक्तम्। अयमर्थः। वैगुण्ये सत्यविद्यमानफलत्वं काम्ये करणत्वमिति यावत्। करणीभूतस्य भावार्थस्य विषयत्वं वैगुण्ये चाऽकरणत्वे विषयत्वाऽभावा[1]-दधिकाराऽवगमविलय इति नाऽननुष्ठानेऽधिकाराऽतिक्रान्तिरित्युक्तं कार्य-निष्ठत्वात्काम्यस्येत्यनेन। तदेतद्विकल्प्य दूषयति—कोयमसम्भवो यदि तदुपसंहाराऽसामर्थ्यं न तर्ह्यधिकृतः, तद्विशेषणत्वात्तस्य। अयमर्थः। यद्यङ्गो-पसंहाराऽसामर्थ्यमङ्गस्याऽसम्भवस्तत्कारणत्वेनोपचारादुच्यते, तदा सामर्थ्यस्या-धिकारिविशेषणस्याऽसम्भवादनधिकृतः किमिति नैमित्तिकमङ्गविकलं प्रयुञ्जीत। अथाऽनुपसंहारोऽनङ्गमेव[2]। अथ समर्थोऽपि नोपसंहरति किंचिदङ्गमनुपसंहार एवाऽङ्गस्याऽभाव उच्यते तदा न नूनमेतदङ्गम्, न ह्यस्ति सम्भवो यद्विद्वान् समर्थः किञ्चिदङ्गमपहाय प्रधानं प्रयुङ्क्त इति सेयमुभयतस्पाशा रज्जुः।

साम्प्रतमेकदेशी स्वाऽभिप्रायमाविष्करोति—कादाचित्कमसामर्थ्यम-सम्भवो न तेनाऽधिकारात्पर्युदासो द्रव्याप्रतिसमाधेयाऽङ्गवैकल्य इव। इदमत्रा-कूतम्। द्वैधं खल्विह पुमांसो व्यवस्थिताः। केचिदसमर्थाः केचिच्च तिरोहि-तसामर्थ्याः। तत्र ये तावदसमर्था अन्धपङ्ग्वादयः शूद्रादयश्च तेषामनधिकार एव, सामर्थ्यस्याऽधिकृतविशेषणस्याऽभावात्। येऽपि समर्थाः कुतश्चिन्नि-

---

१. विषयाभावात् पु० पा०। २. अनङ्गत्वमेव २ पु० पा०।

कारात्पर्य्युदासो द्रव्याप्रतिसमाधेयाङ्गवैकल्यवत् । सत्यम्, न शूद्रवदेकान्ततो न त्वधिकारहेतुविगमेऽधिकारो न निवर्त्तते वीतायामिव फलेच्छायां

मितादभिभूतसामर्थ्यास्तेषामधिकृतविशेषणस्य सामर्थ्यस्य सद्भावात्कोऽधिकारविलयहेतुः ? न खल्वभिभूतसामर्थ्यो भवत्यसमर्थः । न च कार्यव्यवसेयत्वात्सामर्थ्यस्य कार्याऽभावे तदप्रमाणमिति वाच्यम् । प्रतीतचरसामर्थ्यस्य कार्यकारिणः पश्चादकरणे पुनश्च करणे किं सामर्थ्यविनाशोत्पादौ, आहोस्वित्तिरोभावाऽऽविर्भावौ ? इति विषये परैव कल्पना ज्यायसी, लाघवात्, न पूर्वा । तदा हि समर्थ्यरूपधर्मकल्पनायां गौरवप्रसङ्गः । ततश्च सामर्थ्यस्याऽधिकृतविशेषणस्य विद्यमानत्वादुपक्रमे प्रयोगस्य साध्वेव चाऽधिकृत इति यथाशक्ति नैमित्तिकमारभेत समापयेच्चेति । अत्रैव निदर्शनमाह—द्रव्याऽप्रतिसन्धेयाङ्गवैकल्यवत् ।

तद्दूषयति—सत्यं न शूद्रवदेकान्ततो न त्वस्याऽधिकारहेतुविगमेऽधिकारो न निवर्त्तते । अयमत्राऽभिसन्धिः । इदमत्र भवान् व्याचष्टां यदेतत्सामर्थ्यमधिकृतविशेषणमुच्यते तत् किं साक्षात्सामर्थ्यस्य श्रुतेराहोस्विदङ्गोपदेशबलात् ? तत्र तावत्प्रथमः कल्पोऽनुपलब्धिनिराकृत एव । द्वितीये तु कल्पेऽङ्गोपदेशसामर्थ्याद्यथाविनियोगमधिकारव्यवस्थितेरयमधिकारविधिः साङ्गस्य प्रधानस्याऽनुष्ठानमाक्षिपन् कर्त्तारमन्तरेण तदनुपपत्तेः कर्त्तारमाक्षिपति । न चाऽसामर्थ्यस्य कर्तृत्वं कारकविशेषस्य तद्भावाच्छक्तिमतश्च कारकत्वात् । क्रियानिमित्तं हि कारकं, निमित्तं च नाम तदुच्यते यस्मिन् सति नैमित्तिकं भवत्येवेत्युपरिष्टाद्वक्ष्यते । न च द्रव्यस्वरूपमात्रे सति क्रिया भवत्येव । तस्माच्छक्तिमद्रूपकारकत्वाऽव्यवसानम् । यथा न द्रव्यमात्रं कारकं तथा न शक्तिमदपि । अभिभूतशक्तेरपि शक्तिमतः क्रियाया अनुपजननात् । ततश्चोद्भूतशक्तेरेव सहकारिसमवधानशालिनः कर्तृत्वं कारकत्वं चेति रमणीयम् । न चाऽधिकारमन्तरेण कर्तृत्वं न च नियोज्यमन्तरेणाऽधिकार इति तदाविर्भूतसामर्थ्यं कर्तृताप्रणाडिकया नियोज्यताऽवस्थामुपगतमनुपादेयं सन्नियोज्यविशेषणतामनुभवति । यथा चाऽसमर्थवदभिभूतसामर्थ्योऽप्यनियोज्यो नाऽधिकृतश्च । तदुक्तं 'न त्वस्याऽधिकारहेतुत्वविगमेऽधिकारो न निवर्त्तत' इति । न सामर्थ्यमात्रमनुष्ठानाऽनुपयोगि सदप्यधिकारमनुवर्त्तयति, किं तर्हि यदनुष्ठानहेतुरुद्भवविशिष्टम्, तस्यैवाऽधिकारहेतुत्वात् । तच्चेद्विगतमधिकारोऽपि निवर्त्ततएवेति न कस्यचिदङ्गस्योपसंहारसामर्थ्ये तिरोभावेऽप्यप्रयुञ्जानस्य नैमित्तिकाऽधिकाराऽतिक्रान्तिरित्यर्थः । अपि च जातेष्टौ भवतां संवलिताऽधिकारपक्षे जन्मवतः

कामिनः। अन्यथाऽधिकृतस्य समर्थस्य स्वर्गकामस्य कादाचित्काङ्ग-

पुत्रस्येन्द्रियादिकामस्य पितुरधिकारादितरकाम्यवत्करणीभूतस्यैव भावार्थस्य विषयभावात्तन्मात्रविषयत्वे काम्यत्वाऽनुपपत्तेर्नैमित्तिकस्य च करणीभूतभावार्थविषयत्वेऽप्यविरोधात् यथाशक्तिप्रयोगाऽनुपपत्तिरित्यास्तां तावत्।

अथोच्येत अधिकाराऽवगमः प्रवृत्तिहेतुत्वात्प्रवृत्तेः पूर्वमुपयुज्यते, न प्रवृत्तावुपजातायाम्, न जातूपजनितकुम्भः कुम्भकारः कुम्भकरणाय घटते। तदुद्भूतसाङ्गप्रधानकरणसामर्थ्योऽधिकृतः सन्यदि कुतश्चित्प्रमादतोऽङ्गैकदेशे न स्वसामर्थ्यमुत्पश्यति तथापि तदाऽनधिकृतो न विरन्तुमर्हतीत्यत आह—वीतायामिव फलेच्छायां कामिनः। इदमत्राकूतम्। अस्ति हि किंचिन्निमित्तिकारणमपि यदुपजनितकार्यं निवर्त्तमानं कार्यमपि निवर्त्तयति। यथाऽपेक्षाबुद्धिर्द्वित्वसंख्यानिमित्तमुत्पादितद्वित्वा निवर्त्तमाना द्वित्वमपि निवर्त्तयति। समवायस्य समवायिकारणेषु सर्वत्र प्रायेणेयमेव गतिः। तदिहापि स्वर्गकामः प्रवृत्तोऽप्युपरतकामो नाऽधिकारी केवलं शिष्टविगर्हणभियाऽनधिकृतोऽपि कर्म समापयति। तथा निमित्तवानपि तिरोहितसामर्थ्योऽसन्ननधिकारीत्यकुर्वन्नाधिकारमतिक्रामेत्। शिष्टगर्हणभयात्तु समापनं काम्येऽपि समानमिति न नैमित्तिकस्य विरोधायाऽलमिति।

यदि च समर्थस्य प्रवृत्तस्य पश्चात्सामर्थ्याऽभिभवेन प्रवृत्त्युपरमेऽधिकाराऽतिक्रान्तिर्नैमित्तिके काम्येऽपि[1] प्रसज्येतेत्याह—अन्यथाऽधिकृतस्य समर्थस्य स्वर्गकामस्य कादाचित्काऽङ्गवैकल्ये[2] फलाऽनुत्पत्तावधिकाराऽतिक्रान्तिः स्यात्। ये पुनराहुः। एकाङ्गवैकल्येऽपि प्रयोगस्य प्रत्यभिज्ञानात्प्रवृत्तस्यापि नाऽधिकारविगमः, न खलु भग्नश्रृङ्गो गौरिति। तान् प्रति काम्येऽपि समानमित्युत्तरम्। प्रसिद्धतरत्वाच्च तदुपेक्ष्य दूषणान्तरमाह—अप्राप्तकालं चाऽकुर्वतोऽधिकाराऽतिक्रान्तिः स्यादिति चेनाऽनुषज्यते। अप्राप्तकालं च पञ्चम्यामिष्टिप्रयोगमकुर्वतोऽधिकाराऽतिक्रान्तिर्भवेदित्यर्थः। अथापि स्यात् किमित्येवमप्राप्तकालमननुतिष्ठन्नधिकारमतिक्रामति। न हि निमित्तानन्तरमेव नैमित्तिकं कर्त्तव्यमिति प्रमाणमस्ति, किं तर्हि निमित्ते सतीति सत्तामात्रमवगम्यते। शास्त्रान्मीमांसित्वा व्यवस्थापितमिदं हि जातेष्टौ। एवं हि श्रूयते। 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इति। तत्र संशयः किं पुत्रजन्माऽनन्तरमेव निर्वप्तव्यम्, उत कृते जातकर्मणि? इति। किं प्राप्तम्। पुत्रजन्माऽनन्तरमिति। कुतः? जात इति निमित्तश्रुतेः।

---

१. नैमित्तिकस्य काम्येऽपि २ पु० पा०। २. अङ्गशक्तिवैकल्ये २ पु० पा०।

संपत्तिमपेक्ष्य कुर्वंस्तथा स्यात् । अथाङ्गभूतकालावच्छिन्नमेव जीवनमधिकारहेतुः, अन्याङ्गेष्वपि तुल्यम् । अपि च परिपूर्णाङ्गोऽधिकृतः किमङ्गविकलं प्रयुङ्क्ते ? असंभवादिति चेन्न । कल्पनात्रयोपप्लुतेः[1] । तथा हि । कर्म्मपर्य्यन्तापेक्षित्वाद्वा नियोगस्याऽधिकरानिर्वृत्तेरप्रयोगः, अधिकारवशाद्वा यथासंभवमधिकाङ्गोपदेशाऽनुरोधाद्वा । यदा तादृशस्य संभवः

अथाङ्गमपि कालो निमित्तमवच्छिन्दन्नङ्गतामुपयाति, नाऽनवच्छिन्दन्निति निमित्ते कालोपसंहारो नाङ्गोपसंहार इत्याह—अथाऽङ्गभूतकालावच्छिन्नमेव जीवनमधिकारहेतुः । अत्रोत्तरम्—अन्याङ्गेष्वपि तुल्यम् । मा नाम भूवन्नङ्गानि साक्षान्निमित्तावच्छेदकानि, अङ्गोपदेशवलसमासादितनिर्णयं तु सर्वाङ्गोपसंहारसामर्थ्यमुद्भूतं निमित्तमवच्छेत्तुं पारयतीति तुल्यताऽङ्गान्तराणां कालेनेत्यभिप्रायः ।

एवं तावदितराङ्गविरहवच्चोदितकालविरहेऽप्यनुष्ठानप्रसङ्गमापाद्य सम्प्रति किञ्चिदङ्गवैगुण्येऽपि प्रयोगप्रत्यभिज्ञानं यदुक्तं तदपि दूषयन्नाह—अपि च परिपूर्णाङ्गोऽधिकृतः किमङ्गविकलं प्रयुङ्क्ते ? विधिगम्योऽयमर्थो नात्र प्रमाणान्तरं क्रमते । विधिना च यावदङ्गग्रामसहितः प्रयोगोऽवबोधितस्तत्राऽङ्गतुषत्यागेऽपि तत्प्रयोगत्वमनवबोधितं विधिना । पुरुषस्य प्रतिभामात्रं न प्रामाणिकमिति भावः ।

अत्र शङ्कते—असम्भवादिति चेत् । शङ्कां निराकर्तुमसम्भवशब्दार्थं विकल्पयति—न । कल्पनात्रयपरिप्लुतेः । तिस्रः खल्विह कल्पनाः परिप्लवन्ते । परिप्लुतिरुपपत्तिः । सह वैकग्रन्थेन स्वाऽनुगुणां तावत्कल्पनामादितो दर्शयति—तथा हि । क्रमपर्यन्तापेक्षित्वाद्वा नियोगस्याऽधिकाराऽनिर्वृत्तेरप्रयोगः । विनियोगोपादानाऽवगतशेषभावं पदार्थाऽवगमे शब्दाभिहितं च तत्क्रममनङ्गमप्यपेक्षमाणः स्वोत्पत्तौ नियोगो यावज्जीविको नाऽङ्गहानावुत्पत्तुमर्हतीति । सर्वथैव प्रयोगाऽभावोऽसंभवशब्दार्थ इति चोदकाऽनुगुणां कल्पनामाह—अधिकारवशाद्वा यथासम्भवम् । अयमर्थः । यद्यप्ययं परिपूर्णाङ्गोऽप्यधिकृतस्तथापि तदधिकारप्रतीतिसामर्थ्यात्तत्प्रवृत्तौ हीनाङ्गमपि समापयति । क्वचिदङ्गकरणे सामर्थ्याऽभावे संपूर्णाङ्गप्रयोगकरणादिति । सोऽयमसम्भवः । कल्पनां तृतीयामाह—अधिकाङ्गोपदेशाऽनुरोधाद्वा यदा तादृशस्य सम्भवः अधिकं तत्कालशक्याङ्गापेक्षया यदशक्यमङ्गं तदुच्यते । यदा साङ्गमुपसंहतुं शक्यते तदा तस्य सम्भवः ।

---

१. कामनात्रयोपपत्तेः मू० पु० पा० ।

तत्रोभयाऽनुग्रहादानन्तर्यस्याऽशब्दार्थत्वाज्जातपुत्रेष्टिवद्यदेति युक्तम्। अङ्ग[1] शक्त्या वा कालवदधिकारावच्छेदादप्रयोगः। न चैक एव विधिस्तेषामेव प्रयोजकश्चाऽप्रयोजकश्च। अपि च किमर्थं विकलाङ्गे प्रवर्त्तते? अधिकारनिर्वृत्तय इति ब्रूमः। किमधिकारनिर्वृत्तिर्नाङ्गापेक्षा फलनिर्वृत्तिरिव? यद्येवमनङ्गत्वमेव। सापेक्षा चेद्यथाशक्त्यङ्गसाध्यैवेति वैकल्ये

तत्राऽनन्तराऽभिहितां तावत्कल्पनामुपपादयति—तत्रोभयाऽनुग्रहादानन्तर्यस्याऽशब्दार्थत्वाज्जातेष्टिवद्यदेति युक्तम्। अस्यार्थः। अधिकारप्रतीतेरधिकाङ्गोपदेशस्य चाऽनुग्रहाद्यदेति युक्तम्। नन्वेवं निमित्ताऽनन्तरमकरणान्निमित्तत्वव्याहतिरित्याशङ्क्याह—आनन्तर्यस्याऽशब्दार्थत्वाज्जातपुत्रेष्टिवदिति। व्याकृतमेतद्युक्तम्। ननु यथासम्भवमङ्गानुष्ठानं तथा काम्यनैमित्तिकयोरविशेष इति दूषणम्। यदि पुनरङ्गोपसंहारसामर्थ्यस्याऽनुपादेयतया कालवदधिकारावच्छेदकत्वान्नाङ्गवैगुण्ये कालाऽभावइव क्रिया, न चाऽवैगुण्यं यावज्जीवं कस्यचिदपि सम्भवति। ततश्च यावज्जीवसर्वाङ्गसमवेतं प्रयोक्तव्यमित्ययमर्थो विरुद्धत्वान्न सम्भवति। ततोऽशक्यार्थविधानात् ज्वरहरतक्षकचूडारत्नालङ्कारोपदेशवदप्रामाणिकत्वं शास्त्रस्येति सर्वदैवाऽप्रयोग इत्याह—अङ्गशक्त्या च कालवदधिकारावच्छेदादप्रयोगः। ननु यावज्जीवमुपदेशसामर्थ्यात्किमिति विगुणः प्रयोगोऽपि न कल्पते? इत्याशङ्क्याह—न चैक एव विधिस्तेषामेव प्रयोजकश्चाऽप्रयोजकश्च। एवं हि स एवैकोपि विधिस्तान्येवाऽङ्गान्याक्षिपति प्रतिक्षिपति चेति व्याहतमापद्यते। तस्मादात्यन्तिक एव प्रयोगाऽसम्भवोऽसम्भववादिनाऽभिहितः। सोऽयमात्मीय एव बाणो भवन्तं प्रहरतीत्यागतमित्यर्थः।

एवं तावद्यावदधिकारप्रधानं निखिलाङ्गग्रामसहितं प्रयोज्यतयाऽवगतं तावदेव प्रयोक्तव्यम्। न चाऽन्यूनप्रयोगस्तु प्रातिभ इत्युक्तम्। सम्प्रति न्यूनप्रयोगस्य निष्प्रयोजनवत्तामपि प्रतिपादयति—अपि च किमर्थं विकलाङ्गे प्रवर्त्तते। प्रेक्षावतां हि प्रवृत्तिः प्रयोजनवत्ताव्याप्ता प्रयोजनवत्ताभावे न भवति, शिंशपात्वमिव तरुत्वाऽभाव इत्यर्थः।

अत्रैकदेशी प्रयोजनमाह—अधिकाराऽनिर्वृत्तये इति ब्रूमः। एतदुक्तं भवति। यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनं प्रयुज्यतेऽनेनेति व्युत्पत्त्या, कार्यं चाऽधिकृत्य लोकः प्रवर्त्तते, कार्यं चाऽधिकारः, तदयं विकलाङ्गेऽपि कर्मणि कार्यनिर्वृत्तये प्रवर्त्तते इति। तदेतद् दूषयति—किमधिकारनिर्वृत्तिर्नाङ्गापेक्षा, फलनिवृत्तिरिव। ननु मा भूदधिकारनिर्वृत्तिरङ्गापेक्षा, को दोष? इत्याशङ्क्याह—यद्येवमनङ्गत्वमेवाङ्गैर्विनापि करणोपकारस्य

१. श्रद्धा० मू० पु०।

वृथा चेष्टा स्यात्। अथ यथाशक्त्यङ्गसाध्येति। न कार्य्यनिष्ठता विशेषायालम्। अपि चाऽधिकारात्फलनिर्वृत्तिः, तत्र यथाशक्त्यङ्गोपेतेऽधिकृतस्य तादृशादेवाऽधिकारनिर्वृत्तिमुखेन तन्निमित्तमिव। अथ न तादृशे? अधिकारनिर्वृत्तिरपि न स्यात्। परिपूर्णाङ्गेऽधिकृतस्य विकलाङ्ग-

कार्यसिद्धेरिति भावः। सापेक्षा चेद्यथाम्नाताङ्गसाध्यैवेति वैकल्ये वृथा चेष्टा स्यात्। शङ्कते—अथ यथाशक्त्यङ्गसाध्येति। निराकरोति—न कार्यनिष्ठता विशेषायाऽलम्। एतदुक्तं भवति। कार्यनिष्ठतायां सत्यां काम्येऽप्युपकरणीभूतभावार्थस्य विषयत्वात्सकलाङ्गग्रामजनितोपकारस्य च भावार्थस्य करणभावादेकाङ्गवैकल्ये च तदनुपपत्तेर्विषयाऽभावादधिकार-प्रविलयः। नैमित्तिकेषु तु भावार्थमात्रस्य विषयभावाद्वैकल्येऽपि च विषय-भावोपपत्तेरप्रलीनोऽधिकार इति काम्यनैमित्तिकयोर्यो विशेषः स नोपपद्यते। यथाशक्त्यङ्गसाध्येऽधिकारेऽधिकारश्चेदङ्गविकलादपि प्रधानाद्भवति नून-मङ्गहीनमपि करणमकरणादनुपपत्तेः। करणं चेत्कथमविषयः, विषय-श्चेत्कथमनधिकारः, अनधिकारश्चेत्कथं काम्यनित्ययोर्विशेषः? इति। यद्युच्येत नैमित्तिके भावार्थमात्रस्य विषयभावादङ्गवैकल्येऽपि तदस्तीत्यनपेतोऽधिकारः स्वसिद्ध्यर्थं यथाशक्त्यङ्गजनितोपकारमेव स्वकारणमाक्षिपति अङ्गबाधायामिवाऽबाधिताङ्गमात्राहितोपकारमिति। तदसत्। अधिकार-प्रविलयात्। न हि विषयमात्रमयमधिकारस्य व्यवस्थापनायाऽपेक्षते, अपि त्वधिकारिविशेषणमपि। आविर्भूतसर्वाङ्गकरणसामर्थ्यश्चाधिकारी नाङ्ग-सामर्थ्याऽभिभवेऽधिकारवानित्युक्तमित्युपरम्यते।

एवं पुरुषप्रवृत्तिं पर्यनुयुज्याऽधिकारोत्पत्तिं प्रति पर्यनुयोगमाह—अपि चाऽधिकारात् फलनिर्वृत्तिः काम्येऽपि कर्मणीति भवन्मते सिद्धम्। अस्तु वा को दोषः? इत्याशङ्क्याह—तत्र यथाशक्त्यङ्गोपेतेऽधिकृतस्य तादृशा-देव यथाशक्त्यङ्गोपेतादेवाधिकारनिर्वृत्तिमुखेन तत्फलं संपद्यते। अत्रैव दृष्टान्तमाह—निमित्तमिव। यथा निमित्तं विकलाङ्गमपि नैमित्तिकं प्रयोजयेदधिकारनिर्वृत्तिमुखेन निमित्तभावेन संपाद्यते तथा फलमपीत्यर्थः। अथ न तादृशेऽङ्गहीने काम्येऽधिकारः। एवं तर्हि काम्यवन्नैमित्तिके विकलाङ्गेऽनधिकारनिर्वृत्तिरपि न स्यात्। यतः परिपूर्णाङ्गाऽधिकृतस्य विकलाङ्गप्रयोगे कर्मान्तरप्रयोग इव। यथैव खल्वग्निहोत्रेऽधिकृतश्चैत्यवन्दनां कुर्वन्नाऽधिकारं संपादयति एवं साङ्गे तस्मिन्नधिकृतोऽङ्गहीनं निर्वर्त्तयन्न कृताधिकार इत्यर्थः।

स्यादेतत्। अग्निहोत्रेऽधिकृतश्चैत्यं वन्दमानो नाऽधिकारं संपादयति। अधिकारविषयकरणस्य होमस्याऽननुष्ठानात्। जुह्वत्युत्तराङ्गहीनमप्यधिकार-

प्रयोगे कर्म्मान्तरप्रयोग इव अङ्गप्रधानभेदोऽप्यत्राऽनुपकारकोऽधिकारविधिविषयत्वेनाऽभेदात् । भेदे चाऽनङ्गत्वप्रसङ्गः । अङ्गप्रधानभावस्य चासंप्रधार्य्यत्वात् ।

विषयसंपत्तेस्तथाभूतस्यैव होमस्याऽधिकारेण करणभावाऽऽक्षेपादधिकारं संपादयतीत्ययमङ्गप्रधानयोर्विशेषो यत्प्रधानाऽभावे नाऽधिकारो भवति अङ्गाभावे च सति प्रधानं भवतीत्याशङ्क्याह—अङ्गप्रधानभेदोऽप्यत्राऽनुपकारकः । कुतः ? इत्याह—अधिकारविधिविषयत्वेनाऽभेदात् । यद्यपि नियोगस्य भावार्थ एव प्रतिपत्त्यनुबन्धित्वाद्विषयस्तथापि साङ्गप्रधाने प्रयोजकत्वादङ्गानां प्रधानस्य च नियोगस्य विषयत्वेनाऽभेद युक्तः । यदि पुनरेतद्ब्रूयादधिकारनियोगस्याऽङ्गेषु प्रयोजकत्वं नाऽऽस्थीयेत ततो भेदे चाऽप्रधानस्य प्रयोज्यत्वेनाऽङ्गानां चाऽप्रयोज्यत्वेन विषयत्वाऽविषयत्वलक्षणेऽङ्गीक्रियमाणेऽनङ्गत्वप्रसङ्गः । येन येन विनाऽयं कार्यस्वभावोऽधिकारो नोत्पद्यते तत्तदात्मोपपत्तिनान्तरीयकत्वादाक्षिपति, नाक्षिपति चेदङ्गानि तर्हि तैरपि नोत्पद्येत, ततश्चाऽनङ्गत्वप्रसङ्ग इति भावः ।

किं चाऽस्यैकदेशिनो मतेऽङ्गप्रधानभावस्य चासंप्रधार्यत्वादनुपकारक इति सम्बन्धः । इदमत्राऽऽकूतम् । कार्यरूपमपूर्वं प्रत्ययार्थः । कार्यं च कृतिं पुरुषप्रयत्नं प्रति यदुद्देश्यं प्रधानम्, तच्च यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'[1]त्येतस्मिन्प्रतीयते तथा समिदादिवाक्येष्वपीति कार्यान्तरविषयकारणानां समिदादीनामधिकारं प्रत्यै[2]दमर्थ्याऽनुपपत्तेः कार्यस्य च समिदादिविषयस्य "कार्यमेव हि तन्न स्याद्यदन्यार्थमि"ति न्यायादधिकारकार्यं प्रति तादर्थ्याऽभावादङ्गप्रधानभावाऽनुपपत्तिः ।

स्यान्मतम्, न हि कार्यमित्येव नाऽन्यार्थमपि तु यदनुष्ठेयम् । अनुष्ठेयं तदुच्यते यत्पुरुषेण ममेदं कार्यमिति निरपेक्षं कार्यमवगम्यते । परमाऽपूर्वं च तन्न जातु तस्याऽन्यार्थप्रवृत्तेः कृतिव्याप्यताप्रतीतिः । अन्यस्य[2] प्रधानस्याऽनवगमात् । ननु फलमीप्सितमवगम्यते न प्रथमतः प्रतीतेन कार्येण नियोज्यं विना पर्यवस्यता विशिष्टनियोज्याऽपेक्षिणा स्वर्गकाम इति नियोज्यविशेषणतया ग्रहणान्न फलप्रतिपादनपरं तत्पदं तदेव तु निरपेक्षं कार्यमवगतं साध्यस्वर्गविशिष्टेन नाऽनुत्पादयत्स्वर्गमुत्पद्यत इति स्वर्गोपायतामश्नुत इति निरपेक्षमपरकार्याऽपगमे सति फलाऽवगतिर्न पुनः फलाऽवगतौ सत्यां कार्याऽवगतिः । यतः साऽपेक्षत्वेन परमाऽपूर्वमनुष्ठेयं स्यात् । तदेव तु निरपेक्षं प्रयोजनं सत्परमाऽपूर्वमभिदधाति लिङ् स्वसन्निधिसमाम्नानैः स्वयं प्रयोजनीभूतैरवघातादिभिः समिदादिभिश्च प्रयोजनिभिरन्वितमभिधत्ते इति

१. अधिकारनियोगं प्रति० २ पु० पा० । २. अन्यथा० २ पु० पा० ।

सत्यपि चोदनार्थाऽनिर्वृत्तेर्वृथा चेष्टाप्रसङ्ग इत्युक्तम् ।

कश्चायमधिकारो यस्य निर्वृत्तिः ? नियोगश्चेत् न निर्वृत्तिवि-

तदिदं ग्राहकग्रहणमभिधीयते । तदेवं साऽधिकारविधिसन्निधिसमाम्नातेषु समिदादिविधिषु तदुपगृहीतविषये[1]षु ततः परमाऽपूर्वलक्षणकार्यप्रत्यभिज्ञानान्न द्रागित्येव कार्यान्तरबुद्धिरुदयमासादयति । पश्चात्तु कथमपि समिदादयः क्रियारूपतया विशरारवः परस्परमसंभवन्तः प्रोक्षणादिवदपूर्वसाधनीभूतद्रव्य-संस्कारादिद्वारेणाऽपूर्वविषयाऽननुप्रवेशिनः परमाऽपूर्वेण ग्रहीष्यन्ते इति प्रसिद्धतरैदमर्थ्यानामवान्तराऽपूर्वं कार्यं समिदादीनामवकल्प्यमानं समिदादि-गताऽऽख्याताऽभिधेयमपि परमाऽपूर्वपारतन्त्र्येणाऽभिधीयमानत्वात्कार्यमप्य-ननुष्ठेयमित्युपपन्नोऽङ्गभावः कार्यविषयाणामपि समिदादीनाम् ।

अत्रोच्यते । अधिकारवाक्येषु तावदमी लिङादयो निरपेक्षकार्याऽभि-धानविदितशक्तयो न समिदादिवाक्येष्वनन्यनिष्ठं कार्यमभिधातुमीशते । यदि परमवहन्त्यादिवत्किमाधिकाराऽपूर्वस्यैतेऽनुवादा, उताऽपूर्वान्तराऽभिध्यायिनः ? इति पदान्तरमवशिष्यते न पुनर्लिङाद्यभिधेयस्य स्वप्रधानस्य कार्यस्य प्राधान्यपरित्यागो युक्तः । ननूक्तमधिकारसमाम्नाताः खल्वमी समिदाद-यस्तेनैवाऽधिकारविधिनाऽभिधानत एवाऽऽपादितैदमर्थ्या न स्वनिष्ठकार्य-विषयतां प्रतिपत्तुमर्हन्ति, प्रकृताऽपूर्वैदमर्थ्यविरोधात् । न चाऽवहन्त्यादि-वत्प्रकृताऽपूर्वविषयाऽनुप्रवेशिनः, ततश्च नाऽनुवादाः । न च स्वनिष्ठकार्या-ऽभिधायीनि तत्पदानीत्यभिधेयशून्यतया प्रमत्तगीतानि प्रसज्येरन्निति वरं प्राधान्यमात्रत्यागेन कार्याऽभिधायित्वमस्तीति ।

सत्यमुक्तम् । अयुक्तं तु तत् । न हि साऽधिकारो विधिः संनिधि-समाम्नातमात्रमेव गृह्णातिमात्रं ही (?) ज्योतिष्टोमविधिर्द्वादशोपसत्ताम् अपि तु यद्ग्रहणार्हम् । न च स्वनिष्ठकार्यविषयाः समिदादयो ग्रहणमर्हन्ति । ननु ग्राहकविरोधात्प्राधान्यं समिदादिविषयस्य नियोगस्य नास्ति । अथ प्राधान्यप्रतीतिविरोधाद् ग्राहक एव किमिति न परिह्रियते ? तत्र श्रुतिमात्रा-देव नियोगप्राधान्यप्रतीतेर्निरपेक्षत्वाद्वाक्यान्तराऽऽलोचनया ग्राहकगृहीतेः साऽपेक्षतया प्राधान्यप्रतीतेर्बलीयस्त्वेन रात्रिसत्रादिवत्स्वतन्त्राऽधिकारकल्पनायां सत्यां नाऽङ्गभावः प्रयाजादीनां प्रधानभावश्च दर्शपूर्णमासादीनामुपप-द्येत इति सुष्ठूक्तमङ्गप्रधानभावस्य चासंप्रधार्यत्वादिति ।

अभ्युपेत्याङ्गप्रधानभावं दूषणान्तरमाह—सत्यङ्गप्रधानभावे नैमित्ति-कस्याऽनङ्गत्वेऽस्य प्रयोगे चोदनार्थाऽनिर्वृत्तेर्वृथा चेष्टाप्रसङ्ग इत्युक्तम् । किं

१. उपगृहीतविधिविषयेषु० पु० पा० ।

चारिता। नियोज्यता चेत् सापि नियोगादेव निर्वृत्ता। स्वामिता चेत् न तत्कृतं किंचिदभुञ्जानः स्वामी, इत्युभावप्यधिकारौ कार्य्यनिष्ठौ स्याताम्। तस्मान्न कार्य्यनिष्ठत्वप्रयोगनिष्ठत्वाभ्यां काम्यनैमित्तिकाऽधिकारयोर्भेदः शक्यः समाधातुमित्यन्यथा समाधेयः।

तदुच्यते—

जीवनादेर्निमित्तस्य साम्यात्कालो विशेषकः।
निमित्तार्थस्तत्र जाते कर्म्मणोऽवश्यकार्य्यता॥

चाऽयमधिकारो विचारं न सहते यस्य निर्वृत्तिरङ्गविकलेऽपि नैमित्तिकस्य प्रयोगे त्वयोच्यत इत्याह—कश्चाऽयमधिकारो यस्य निर्वृत्तिः? त्वयोच्यत-इति शेषः। एकदेशी स्वपरिभाषयाऽऽह—नियोगश्चेत्। दूषयति—तन्निर्वृत्तिर्विचारिता। उक्तं हि "नियोगस्य न कार्यते"त्यत्र 'विषयः कार्यो न नियोज्यस्य नियोक्तृत्वप्रसङ्गादि"ति। भाषान्तरेणाऽऽह—नियोज्यता चेत् परिहरति—सापि नियोगादेव निर्वृत्ता भावार्थविषयं नियोगमवबुद्धयमान एवायमधिगतनियोज्यभावो न तदधिगमायाऽनुष्ठानं यावद्गच्छेदिति। व्यर्थीकृतपरिभाषो लौकिकमधिकारपदस्यार्थमाह—स्वामिता चेत्। ईश्वर-वचनो ह्ययमधिकृतशब्दो लोके प्रसिद्ध इति भावः। एतद्दूषयति—न तत्कृतं किंचिदभुञ्जानः स्वामी, एवं हि नैमित्तिकं कर्म संभवति पुरुषस्य स्वामिनः, यदि तत्कर्म तस्योपकारे वर्त्तते। द्वयी चेयमुपकारजातिर्हितप्राप्ति-रहितनिवृत्तिश्च। न च हिताऽहितप्राप्तिपरिहाराऽनुयायि त्वन्मते नैमित्तिकं कर्म कल्पते। यदुच्यते नैमित्तिकादन्यपूर्वपुरुषगुणो जायते, जायतां नाम न पुनरयमधिकारः[2] स्वयमसुखरूपत्वादतद्धेतुत्वाच्च। यदि त्वेतद्ब्रूयान्नैमित्ति-कस्यापि पुरुषोपकारकत्वमङ्गीक्रियेत तत उभावप्यधिकारौ[3] कार्यनिष्ठौ स्याताम्। इतिशब्दस्तस्मादर्थे। प्रकृतमुपसंहरति—तस्मान्न कार्यनिष्ठ-त्वप्रयोगनिष्ठत्वाभ्यां काम्यनैमित्तिकाधिकारयोर्भेदः शक्याऽध्यवसानः[4]।

स्वमतपातनिकां करोति—तस्मादन्यथा समाधेयः। तदुच्यते।
जीवनादेर्निमित्तस्य साम्यात्कालो विशेषकः।
निमित्तार्थस्तत्र जाते कर्मणोऽवश्यकार्यता॥

यदि श्रुतिमात्राऽपेक्षोऽधिकारो भवेत् ततोऽन्धशूद्रादीनां काम्ये नैमित्तिके चाऽविशेषेण प्रसज्येत, त्रैवर्णिकानां चाऽग्निहोत्रं सततमकुर्वता-मधिकाराऽतिक्रान्तिः स्यात्। न त्वस्माकं श्रुत्यपेक्षोऽधिकारः किं त्वङ्गो-

१. तत्र क्लृप्तम् मू० पु०। २. उपकारः—२ पु० पा०।
३. उपकारौ—२ पु० पा०। ४. अध्यवसायः २ पु० पा०।

पदेशाऽनुरोधेन शक्त्यपेक्षः । तथा चाऽशक्तानामन्धशूद्रादीनां त्रैवर्णिकानां च मध्यन्दिने सायमादिसमयमुपसंहर्तुमसमर्थानां नाऽधिकारः । नन्वेवं काम्यवन्नैमित्तिकेष्वप्यङ्गोपदेशाऽनुरोधेन यदेत्युपपद्येत ।

तत्रोच्यते । इदं तावदत्र भवान् पृष्टो व्याचष्टाम्, यदेतत्काम्ये सर्वाङ्गोपसंहारसमर्थोऽधिकारीति, तत्किं स्वर्गकामवत्साक्षाच्छब्दाऽवगतम्, उताङ्गोपदेशाऽनुरोधात् ? तत्र न तावत्स्वर्गकामपदमिव सर्वाङ्गोपसंहार-समर्थपदमधीयते[1] समाम्नातारः । अथाङ्गोपदेशाऽनुरोधादसमर्थं प्रति तदुपदेशाऽनुपपत्तेः । आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति । यथा 'स्रुवेणाऽवद्यती'त्यत्राऽश्रुतमपि द्रव्यादि यच्छक्यत इत्युपबन्धात्सम्बध्यते एवम-श्रुतमपि सर्वाङ्गोपसंहारसामर्थ्यमनुपादेयं सदधिकृतविशेषणतया सम्भन्त्स्यते । युक्तं काम्ये तत्र सर्वाङ्गोपसंहारसामर्थ्यविषयाया अर्थापत्तेः परिपन्थ्यभावेनाऽ-प्रत्यूहमुपपत्तेः अर्थिपदस्य च समर्थेऽपि सम्भवादविरोधात् । न खलु समर्थः स्वर्गकाम इत्युक्तम् । इह तु निमित्तश्रुतिविरोधः । तथा हि । 'यावज्जीवं जुहुयादि'ति यावदुपसंबद्धं जीवनं कर्त्तव्यतायां निमित्तम् । यस्मिन् सति नैमित्तिकं भवत्येव भाक्तमितरदित्युपरिष्टादुपपादयिष्यते । तेन जीवने सति कर्त्तव्यमेव न न कर्त्तव्यमिति प्रतीतेर्निमित्ते[2]सम्बन्धाऽवश्य-कर्त्तव्यताऽऽपत्तिः, निमित्तवदङ्गोपदेशाऽनुरोधात् । तदुपसंहारसामर्थ्यविशेष उद्भवसमाधौ ख्यातः प्रतीयते । स चाऽनित्य इति तन्नान्तरीयकत्वाद-वश्यकर्त्तव्यताऽऽपतति । न चास्ति कश्चिदपि पुरुषधौरेयस्तथापि[3] विधौ दैवसंपन्नो यो यावज्जीवं सायंप्रातरप्रत्यूहमविकलाङ्गमग्निहोत्रमपि प्रयोक्तुं समर्थः । अन्तरायाणां व्याधितोदप्रमादादीनामवश्यम्भावनियमात् । तत्स-हभुवां च दुःखदौर्मनस्यादीनाम् । तदनयोर्निमित्तोपदेशसर्वाङ्गोपसंहार-सामर्थ्ययोर्विरोधान्निमित्तस्य च श्रौतत्वेन तदनुगुणं सामर्थ्यमुपवर्णनीयम् । नन्वङ्गान्यपि श्रुतान्येव किमतस्तान्यपि नित्यवच्छ्रुतानीति बहूनां श्रुतीनाम-नुरोधेन वरमेका निमित्तश्रुतिः 'त्यजेदेकं कुलस्याऽर्थे' इतिवत्परित्यज्यताम् । तत्किमियं निमित्तश्रुतिस्तपस्विनी प्रमत्तगीतमेव अपि तु मुख्यं परित्यज्य गौणं निमित्तभावं यस्मिन्सत्येव नाऽसतीत्येवं भूतमवलम्बते ?

अत्रोच्यते । न तावत्साक्षादङ्गश्रुतयो निमित्तश्रुतिविरोधिन्यः । न हि तस्य तस्याङ्गस्य क्रिया निमित्ते सति न सम्भवति । ननु नित्यवच्छ्रु-तानि न चाङ्गानीति विरोधः । सत्यं नित्यवच्छ्रुतानि न त्वङ्गविधयः प्रधानविधिनिरपेक्षा अङ्गानुष्ठानं प्रयोक्तुमीशते । तथा ह्यङ्गभावना-

१. सामर्थ्यमधीयते २ पु० पा० । २. अनैमित्तिकं २ पु० पा० ।
३. मुधापि २ पु० पा० ।

यस्तावद्यथोक्ताय प्रयोगायैकान्ततोऽसमर्थः स दूरपर्युदस्त एवाऽधिकारात्। न त्वसौ[1] तादृशे नियोज्यतया प्रत्येतुं पार्यते। तेन शक्त्यङ्गोभाव्याऽऽकाङ्क्षा स्ववाक्ये भाव्यमपश्यन्ती विध्यापादितत्वेन चाऽपुरुषार्थाद्वाच्यार्थात्प्रच्याविता पुरुषार्थात्मकं भाव्यमपेक्षते, प्रधानभावना च निमित्तवत्यवश्यकर्त्तव्यतागोचरो लब्धनित्यसमीहितसाध्यतत्साधना स्वसाधनोपकारहेतुमपेक्षते। तदियमङ्गभावना करणोपकारलक्षणं भाव्यमासाद्य प्रधानभावना च करणोपकारं प्राप्य निर्वृणुतः। ततश्च प्रधानविध्याकाङ्क्षितोपकारसाधनेष्वङ्गेषु प्रधानाऽधिकृताऽधिकारप्राप्तिलब्धानुष्ठानेऽप्यप्रधानानुरोधेन निवृत्तिर्व्यवस्थापनीया। तद्विरोधे तु तदधिकृताऽधिकारभावेनाऽनुष्ठानाऽनुपपत्तेरङ्गविधीनां तत्त्वं हीयेत। न च निमित्तसम्बन्धादवश्यङ्कर्त्तव्यं प्रधानं कादाचित्केनाङ्गसाकल्येन सम्बन्धार्हम्, नित्याऽनित्यसम्बन्धविरोधात्। ननु प्रधानमपि कथं निमित्तेन संभन्त्स्यते? न ह्यग्निहोत्रमङ्गहीनमपि यावज्जीवं शक्यसंपादम्। अन्तरायाणामपि संभवात्। यद्युच्येत विधिसामर्थ्यादनुष्ठात्रा निपुणेन भवितव्यम्। तदङ्गसाकल्येऽपि तुल्यम्। मैवम्। यस्य हि निमित्तसम्बन्धस्तदवश्यकर्त्तव्यम्, स च प्रधानस्येति तदेव तथा। तत्र च स्वरूपेणाऽन्याऽसत्त्वादनुष्ठानुर्नैपुण्यमपि सम्भवति न त्वङ्गेषु निमित्तश्रुतिः। यतस्तेषामप्यवश्यकर्त्तव्यता स्यात्। प्रधानसम्बन्धात्तेषामप्यवश्यम्भाव इति चेत्, नाऽवश्यकर्त्तव्यतोपहितमर्यादेन प्रधानविधिना वास्तवमङ्गसाकल्यस्यावश्यम्भावमननुरुध्यमानेन यदा[2] यावन्त्यङ्गानीत्युपबन्धात्। तदेवं निमित्तश्रुतिः प्रधानवाक्यस्था प्रथममेव स्वविषयं प्रधानेन सहैकलोलीभावमुपनयन्ती भूयसीरप्यङ्गश्रुतीः स्वाऽनुगुणतया व्यवस्थापयन्ती नैताभिर्जघन्यवृत्तितामापाद्यते। न चैवमितराङ्गवैकल्यवत्कालापगमेऽपि प्रधानप्रयोगसम्भवान्न तस्य हि गुणत्वेऽपि निमित्ताऽनुप्रवेशोऽपि वक्ष्यते। न चान्धशूद्रादीनामधिकारः। यतो 'यावज्जीवमग्निहोत्रं जुहुयात्' इति भावनालब्धसाध्यतत्साधना[3] कथमिति स्वकरणोपकारजनकाकाङ्क्षा अङ्गोपदेशैर्निराकाङ्क्षीक्रियते। तत्र सर्वाङ्गोपदेशानुरोधादसमर्थस्यानुष्ठानाऽसम्भवात् समर्थस्यापि चाऽनुभूततद्भावस्य तदनुपपत्तेः सर्वाङ्गोपेतप्रधानाऽनुष्ठानगोचरसामर्थ्योद्भूतिरधिकारी काम्यवदिति सामर्थ्यं तदुद्भूतिश्चाऽधिकृतविशेषणतयाऽवगम्यते। तत्र निमित्तश्रुतिविरोध इति तदविरोधायाऽवश्याऽवहेयेऽन्यतरस्याऽनुद्भवमात्रं हीयतां नाङ्गसामर्थ्यम्, उभयहानिप्रसङ्गादिति नाऽन्धशूद्रादीनामधिकारो नापि शक्यप्रतिकारव्याधीनामनधिकारो नैमित्तिक इति सिद्धम्।

---

१. न ह्यसौ मू० पु०। २. अनुरुध्यमानत्वाच्च न यदा २ पु० पा०।
३. साध्यसाधना० २ पु० पा०।

पदेशावपेक्ष्य समर्थस्य तावदधिकारप्रतीतिः। सा चेयमधिकारप्रतीतिर्न्नेति पर्य्यवसिता अनित्यत्वात्सामर्थ्यस्य अन्यथाऽधिकृतस्य सर्वाङ्गोपसंहाराऽभावे नाऽनुष्ठानं यथासंभवम् अन्यथाऽन्यादृशेऽधिकारात्तादृशप्रयोगस्याऽशास्त्रीयत्वान्नानुष्ठानमनधिकारात्। अतः पुनरपि शक्त्यपेक्षाऽधिकारप्रतिपत्तिपर्य्यवसानाय। शक्तिर्हि प्रमाणैकदेश इत्युक्तम्। न प्रयोगनिश्च-

तदिदमाह—यस्तावत् यथोक्ताय प्रयोगायैकान्ततोऽसमर्थः शूद्रपङ्ग्वादिः स दूरपर्युदस्त एवाधिकारात्[1]। कुतः? इत्याह—न त्वसौ तादृशे[2] नियोज्यतया प्रत्येतुं पार्यते। तेन शक्त्यङ्गोपदेशावपेक्ष्य समर्थस्य तावदधिकारप्रतीतिस्तावदिति। स्फोटयति—साचेयमधिकारप्रतिपत्तिर्नैमित्तिके नेति पर्यवसिता अनित्यत्वात्सामर्थ्यस्याऽनैमित्तिकस्य चाऽवश्यकार्यत्वात् अवश्यमनवश्यम्भावयोश्च विप्रतिषेधादिति भावः। ननु भवतु सर्वाङ्गोपसंहारसामर्थ्यमनित्यं तथापि तेनैवाऽधिकारप्रतिपत्तिः पर्यवस्यतु, समर्थस्त्वधिकृतः कुतश्चित्प्रतिबन्धात्किञ्चिदङ्गमुपसंहर्तुं तदानीमशक्तोऽपि यथाकथंचित्प्रयोक्ष्यत इत्येतन्निराकर्त्तुमाह—अन्यथाऽधिकृतस्य सर्वाङ्गोपसंहाराभावे सति नाऽनुष्ठानं यथासम्भवमन्यथेति। यद्येतावत्यधिकारप्रत्ययः पर्यवस्येदित्यर्थः। कस्मादित्याह—अन्यादृशेऽधिकारात्सर्वाङ्गोपपन्ने तत्समर्थस्याऽधिकारात् तादृशप्रयोगस्य न्यूनाङ्गस्य प्रयोगस्याऽशास्त्रीयत्वान्नानुष्ठानम्, न्यूनाङ्गस्याऽनधिकारात्।

एतदुक्तं भवति। अधिकारप्रतीत्या सह प्रवृत्तेः संप्रतिपत्तौ सत्यां शास्त्रीयत्वम्, इह त्वङ्गसाकल्यवैकल्यलक्षणे विरुद्धधर्मसंसर्गाद्विषयभेदेऽपि प्रतिपत्तौ सत्यां प्रातिभत्वं प्रयोगस्येत्युपसंहरति—अतः पुनरपि शक्त्यपेक्षाऽधिकारप्रतीतिपर्यवसानाय। शक्त्यपेक्षेति याऽसावङ्गोपदेशासामर्थ्यलब्धाऽशक्तिश्रुतिस्तस्या यदेत्युपबन्धस्य नित्यश्रुतिविरोधादुपबन्धान्तरापेक्षोपबन्धावशक्तिरिति शक्त्यपेक्षेत्युक्तम्। शक्त्या च विषयेण विषयिणीं शक्तिश्रुतिं लक्षयति। यथा धूमादग्निः प्रतीयते इति धूमेन धूमज्ञानलक्षणा। अथ कस्मादधिकारप्रतिपत्तिपर्यवसानाय शक्तिश्रुतिरपेक्ष्यते। यावतोपबन्धविशेषशून्यायामधिकारप्रतिपत्तौ पर्यवसितायां पश्चाद्यथाशक्तिप्रयोगं शक्तिरेव निश्चाययिष्यतीत्यत आह—शक्तिः शक्तिश्रुतिः प्रमाणैकदेशश्चोदनैकदेश इत्युक्तमाचार्यैः। तथा च तदन्तर्भावेनैवाऽधिकारप्रतीतिपर्यवसानमित्यर्थः। यदि तु न चोदनैकदेशः स्यात्प्रमेयमात्रं शक्तिर्न प्रयोगनिश्चयाय कल्पेतेति शेषः। इदमत्राकूतम्। तत्त्वनिश्चयो हि प्रमाणस्य, कार्यप्रमेया

१. अधिकारी २ पु० पा०। २. न चासौ तादृशे २ पु०।

याय, अनन्यप्रमाणकत्वात्तस्य । सा कालतोऽङ्गतो वाऽऽश्रीयेत । तत्राङ्गतः संश्रये शब्दाऽवगतानामङ्गान्तराणां हानाच्छब्दविरोधः । कालतस्तु कालान्तराणामशब्दार्थत्वान्न कश्चिद्विरोधः । स चाऽयमविरोधो निर्निमित्तेऽधिकारे इदमनेनेदृशेनेत्येतावन्मात्रस्य शब्दार्थत्वात् । सन्निमित्ते तु निमित्तश्रुतिविरोधः । संप्राप्ते च तस्मिन्कार्य्यस्य तन्निमित्तत्वव्याघातात् । इतरत्रापि स्वर्गकामश्रुतिविरोध इति चेत् । उक्तम् । न च पुरुषविशेषनिर्देशो-

च शक्तिरिति कारणविरुधोपलब्ध्या प्रयोगनिश्चयो निवर्त्तत इति । अथ शक्तिज्ञानमेव प्रमाणं सत्प्रयोगं निश्चाययेत् । किं चोदनैकदेशत्वेन शक्तिश्रुतेः ? इत्याह—अनन्यप्रमाणकत्वात्तस्य प्रयोगस्य न[1] शक्तिज्ञानं प्रमाणमिति ।

संप्रति पूर्वपक्षी यस्मिन्सत्येव नाऽसतीति नित्यवदङ्गोपदेशाऽनुरोधान्निमित्तभावं मन्यमानो विमृशति—सा च शक्तिः कालतो वाऽङ्गतो वाऽऽश्रीयते कालाद्वेति । सर्वाङ्गोपसंहारसामर्थ्यमपेक्ष्य यदा शक्नुयादिति यावत् । एवं विमृश्याङ्गत इति प्रतिपक्षनिराकरणपूर्वकं कालादिति पक्षमवधारयति—तत्राङ्गतः संश्रये शब्दाऽवगतानामङ्गान्तराणां हानाच्छब्दविरोधः । कालतस्तु कालान्तराणामशब्दार्थत्वान्न विरोधः । नित्यवदङ्गानामुपदेशादन्यतमत्यागे तद्विरोधः । यदेत्युपबन्धे तु कालान्तराणामनुपदिष्टत्वान्नोपदेशविरोध इति काम्ये नैमित्तिके च यदेत्येव युक्तम् ।

परिहरति—स चाऽयमविरोधो निर्निमित्तेऽधिकारे[2] । कुतः ? इदं भाव्यमनेन करणेनेदृशेनेतिकर्त्तव्यताविशेषवतेत्येतावन्मात्रस्य शब्दार्थत्वान्नाऽवश्यकर्त्तव्यता प्रतीयत इत्यर्थः । सन्निमित्ते तु निमित्तश्रुतिविरोधे कस्मात्सम्प्राप्ते च तस्मिन्न कार्यस्य तन्निमितत्वव्याघातात्सम्प्राप्त इति प्रकृतिप्रत्ययाभ्यामनुपादेयतां निमित्ततां च कथयति । चशब्दोऽपेरर्थे विरोधद्योतनः । सति भवत्येव न भवतीति निमित्तार्थो न भवदुक्त इति वक्ष्यते । न चाङ्गविधिविरोध इति प्रपञ्चितम् इति भावः[3] ।

पार्श्वस्थः सिद्धान्तिनं पर्यनुयुङ्क्ते—इतरत्रापि स्वर्गकामश्रुतिविरोध इति चेत् । समर्थमसमर्थं चाऽर्थिमात्रं प्रत्यसंकुञ्चितवृत्तिरर्थिश्रुतिः समर्थं प्रति नियम्यमाना पीड्यतइत्यर्थः । समाधत्ते—उक्तमिति । केवलपदार्थव्यवहाराऽभावादित्यादिना प्राक् । अर्थिपदस्य चाऽधिकारिवचनतामभ्युपेत्येदमुक्तम् । परमार्थतस्तु नेदमधिकारिप्रतिपादनपरम्, अपि तु भावनाकाङ्क्षितभाव्यविशेषपरम् । अर्थात्त्वधिकारिप्रतिपत्तिरित्युपरिष्टादिहैव वक्ष्यते ।

१. अनन्योपायकत्वात्तस्योपायस्य न० २ पु० पा० ।
२. अधिकारः २ पु० पा० । ३. विरोध इति भावः २ पु० पा० ।

ऽत्र विवक्षितः, साध्यत्वात्। न च सातत्येन प्रयोगः[1]। निमित्ते कालविशेषवतः कर्त्तव्यताऽवगमात्। कालविशेषेण तस्याऽर्थाद्विशेषणात्। तस्या निमित्ताऽनुप्रवेशित्वात्। तदुक्तं "न कालो गुणो निमित्तं ह्येतद्वि"ति। न गुण एवेत्यर्थः। नत्वङ्गान्तराण्येवम्, असाम्याद्वचनव्यक्तिभेदात्।

उक्तं च भावनाविवेके, ततो"ऽधिकारिपदाऽभावात्कुतस्तद्विरोधिते"ति इति दर्शयति—न च पुरुषनिर्देशोऽत्र विवक्षितः, साध्यपरत्वात्।

एवमुक्तां कारिकामुक्त्वा कारिकार्थपातनिकां करोति च किंचित्—न च सातत्येन प्रयोगः। अत्रैव शङ्कते—यदि निमित्तश्रुतिवशादङ्गहीनमपि यथाशक्ति प्रयुज्येत ततः कालस्यापि सायमादेरङ्गत्वेन विधानात्तदभावे मध्यन्दिनादौ जीवनस्य निमित्तस्य विद्यमानत्वादग्निहोत्रप्रयोगप्रसङ्गः। सायमाद्यङ्गापगमेन वा[2] तदा तदप्रयोगे[3]ऽङ्गान्तराभावेप्यप्रयोग इति काम्यवद्यदेवेत्येवं प्राप्तमिति। तदनेन निराक्रियते—न च सातत्येन प्रयोग इति। निमित्ते कालविशेषवतः कर्त्तव्यतावगमात्। एतदुक्तं भवति। प्रयोगाङ्गमप्ययं कालोऽनुपादेयत्वादङ्गोपसंहारसामर्थ्यमिव नियोज्यं विशिनष्टि। तेन तदभावान्मध्यन्दिनादौ नाऽधिकारे विष्णुक्रमणादिसामर्थ्याऽभावादिव पङ्ग्वादीनामिति। नन्वङ्गतया कालः श्रूयते नाधिकृतविशेषणतया। तथा हि। अप्रवृत्तप्रवर्तन्तात्मको विधिः प्रवर्त्यपुरुषविशेषसमधिगतसाङ्गप्रधानतया, तत्कथं तद्वतोऽधिकारावगमः? इत्यत आह—कालविशेषेण तस्यार्थाद्विशेषणात्। यद्यप्यङ्गत्वेन श्रूयते कालस्तथाप्यधिकृतविशेषणम्। तथा ह्यप्रवर्तप्रवर्तनात्मको विधिः प्रवर्त्यपुरुषसमधिगतसाङ्गप्रधानविषयोऽनुपादेयवस्त्ववच्छिन्नं प्रवर्त्यपुरुषविशेषं कल्पयितुमुद्यतः तस्य विषयं चाऽनुपादेयत्वविधेयत्वलक्षणयोः प्राप्त्याप्तिभ्यां विरोधाद्विशेषणतया स्वीकर्तुमसमर्थो यथाविनियोगमधिकारावगमाच्च तन्नान्तरीयकसाङ्गप्रधानोपसंहारसामर्थ्यमनुरुध्यमानोऽनुपादेयाङ्गसामर्थ्यं च निमित्तं चाङ्गमपि प्रवर्त्यपुरुषविशेषणतया गृह्णाति। न च कालस्येतराङ्गग्रामवत्स्वक्रियोपसंहारसामर्थ्यमपि सम्भवति कार्याङ्गत्वात्सामर्थ्यस्य कार्यस्योपसंहारलक्षणस्य तदनुपादेयाऽनुपपत्तेः। काले हि कर्म क्रियते न कर्मणि कालः। तस्मात्कालविशेषेणाङ्गेनापि सता विधिः प्रवर्त्यपुरुषविशेषाऽपेक्षायामर्थात्तद्विशेषणात्तद्वतः कर्त्तव्यताऽवगमः। ततश्च न सातत्येन प्रयोग इति। कुतः? इत्यत आह—तस्यापि निमित्ताऽनुप्रवेशित्वान्निमित्तसम्बन्धश्चैकं नियोज्याऽवच्छेदलक्षणो यथा सामान्यगुणयोरेकव्यक्तिसमवायः

१. प्रसङ्गः—मू० पु० पा०। २. सायमाद्यनभ्युपगमेन वा० २ पु० पा०।
३. तदा प्रयोगे १ पु० पा०।

उपादेयानि ह्यङ्गान्तण्यनुपादेयं निमित्तम्। एभिरेतानि वा कुर्य्यादित्यङ्गेषु वचनव्यक्तिः। अस्मिन् सतीति निमित्ते। ततोऽङ्गान्तराणि नालं निमित्तमनुप्रवेष्टुम्। कालस्त्वनुपादेयः समानवचनव्यक्तिरङ्गमपि सन्निमित्तमनुप्रविशतीति युक्तम्। अथ निमित्तोपसंहार एव किं नेष्यते? काम्येऽपि तत्कालेच्छया। ननु प्रयोजनमेतत्? सत्यम्।

सम्बन्धो गौः शुक्ल इति सामानाधिकरण्यहेतुः। आचार्यस्यापि तत्रभवत एतदभिमतमित्याह—तदुक्तं 'न कालो गुणो निमित्तं ह्येतदि'ति। ननु प्रयोगाङ्गं काल इति स्वतन्त्रसिद्धान्तभङ्गः प्रसक्त इत्याशङ्क्याव्याचष्टे—न गुण एवेत्यर्थः। निमित्तत्वं च निमित्तसम्बन्धाद् भाक्तं न पुनस्तत्त्वमेव, तत्कल्पनायां प्रमाणाऽभावात्। ननु यद्यङ्गमपि कालो निमित्ताऽनुप्रवेशी कस्मान्नाङ्गान्तराण्यप्येवम्? अत आह—न त्वङ्गान्तराण्येवम्। कुतः? असाम्यान्निमित्तेन। तदेव कुतः? वचनव्यक्तिभेदात्। किं पुनः कारणं वचनव्यक्तिभेदे? इत्यत आह—उपादेयानि ह्यङ्गान्तराणि कालात् अनुपादेयं निमित्तम्, ततो वचनव्यक्तिभेदः। तद्दर्शयति—एभिरेतानि वा कुर्यादिति अङ्गेषु वचनव्यक्तिः। अङ्गैः खलु करणोपकारे क्रियमाणेऽकृतानि न सन्तीति तान्यपि क्रियन्तएव। तदिदमुपादेयत्वमङ्गानाम्। तेन तत्रोभयो वचनव्यक्तिरुपपन्ना। एतैरेतानि पुरुषप्रयत्नाऽगोचरे त्वस्मिन्सतीति निमित्ते वचनव्यक्तिः। ततो वचनव्यक्तिभेदादङ्गान्तराणि नाऽलं निमित्तमनुप्रवेष्टुम्। कालस्त्वनुपादेयो यतस्तस्मान्निमित्तसमानवचनव्यक्तिः कालोऽङ्गमपि सन्निमित्तमनुप्रविशतीति युक्तम्। यथा अनुपादेये निमित्ते कर्म विधीयते तथा कालेऽपि न त्वङ्गान्तरेष्विति निमित्तवत्कालोऽधिकृतविशेषणं नाङ्गान्तराणीति सिद्धम्।

अत्र पार्श्वस्थश्चोदयति—अथ निमित्तोपसंहार एव किं नेष्यते? प्रथमङ्गत्वेन सम्बध्यते कालः पश्चात्त्वर्थान्निमित्तमनुप्रविशतीति किमनया परम्परया? यत्सामान्येन यावज्जीवमिति श्रुतेः प्रसृतं जीवनं श्रुत्यैवाऽयं कालविधिः कालविशेषे उपसंहरिष्यति। नेयं कालश्रुतिरङ्गश्रुतिरपि तु निमित्तश्रुतिरेवास्त्वित्यर्थः।

पार्श्वस्थान्तरं परिहरति—काम्येऽपि तत्कालेच्छया। अयमर्थः। यदीयं पौर्णमास्याममावास्याममावास्यायामिति निमित्तश्रुतिः स्यात् तत्काम्येन न सम्बध्येत, न चैकमेव वाक्यं तस्यैव निमित्ततामङ्गतां च बोधयितुं पारयति वैरूप्यात्। निमित्ततया चोभयसम्बन्धे काम्येऽपि यथाशक्ति प्रयोगप्रसङ्गः। असम्बन्धे वा काम्यस्याऽनियतकालत्वाऽऽपत्तिरिति।

हेतुस्तु यावज्जीवश्रुतेरनतिरिक्तार्थत्वम्। प्रकरणिनोऽप्यङ्गार्थत्वं च। तदेवमविरोधादनिमित्ते कालतः शक्त्याश्रयो यदेति, निमित्तवति तु निमित्तविरोधात्कालवत एवाङ्गतो यथेति।

तदेतद् दूषयति—ननु प्रयोजनमेतत्। अयमभिसन्धिः। यदि प्रमाणप्रत्यालोचनया काम्यस्याऽनियतकालत्वं भवति भवतु का नः पीडा प्रामाणिकानाम्? न जातु प्रयोजनाऽनुवर्ति प्रमाणम्, प्रमाणवशवर्त्तित्वात्तस्येति।

परमसिद्धान्ती ब्रूते—सत्यम्, न प्रयोजनाधीनं प्रमाणमित्यर्थः। हेतुस्तु यावज्जीवश्रुतेरनतिरिक्तार्थत्वम् इदमत्राकूतम्। तत्र नाम सामान्यश्रुतिर्विशेषे उपसंह्रियते यत्र सा विशेषशास्त्रादतिरिक्ताऽर्था भवति, तद्यथा पुरोडाशं चतुर्धा करोतीति सामान्यश्रुतिराग्नेये उपसंह्रियते 'आग्नेयं चतुर्धा करोती'त्यनेन, तत्र यद्याग्नेयं चतुर्धा करोतीत्येतावन्मात्रं न श्रूयते अनाग्नेयस्यापि प्रसज्येत तदुभयमर्थवत्। यदि तु पौर्णमास्याममावास्यायां वा निमित्ते कर्म क्रियमाणं तर्हि नाऽजीवतो नाप्ययावज्जीवं स्यात्। निमित्ते सत्यवश्यकर्त्तव्यत्वात् नैमित्तिकस्येति यावज्जीवश्रुतेरनतिरिक्तार्थत्वप्रसङ्गः। अथोच्येत यदि यावज्जीवं दर्शपूर्णमासाभ्यामिति न पठ्यते ततः समुदायद्वयस्य प्रत्येकं निमित्तसम्बन्धात्प्रत्येकमधिकारविषयत्वं प्रपद्येत[1]। तन्माऽत्र प्रसाङ्क्षीदिति यावज्जीवं दर्शपूर्णमासाभ्यामिति वाक्यार्थः। अनेन हि यागषट्कस्यैकाऽधिकारविषयत्वमापाद्यत इति। तथापि यावज्जीवमिति व्यर्थम्, दर्शपूर्णमासाभ्यां यजेतेत्येतावन्मात्रमेव पठितव्यम्। न चात्र स स्वर्गः स्यादिति स्वर्गकामाऽधिकारः। स्वर्गकामो यजेतेत्यनेनैव तस्याऽवगतेः। न च यावज्जीवमग्निहोत्रमित्यत्रायं परिहारः संभवति। अग्निहोत्रं जुहोतीत्युत्पन्नस्याऽग्निहोत्रस्य सायंप्रातरग्निहोत्रं जुहोतीति सायंप्रातर्लक्षणनिमित्तविधाने सति यावज्जीवमग्निहोत्रं जुहुयादिति वाक्यस्य वैयर्थ्यप्रसङ्गादिति। हेत्वन्तरं समुच्चिनोति—प्रकरणिनोऽप्यङ्गार्थत्वं च। संसाध्यसाधना खल्वियं प्रधानभावना स्वसाधनाऽनुग्रहाऽपेक्षा यद्यदङ्गे संनिध्यानुपतितं तत्स्वसाधनाऽनुग्राहकतया गृह्णातीति। तत्प्रकरणे च कालविधिवाक्यं श्रुतं स्वगोचरस्याङ्गतामवगमयति न निमित्तभावम्, प्रकरणिनोऽङ्गाऽनपेक्षितत्वात्। तस्मात्कालविधिवाक्यं प्रकरणसहायं कालस्याङ्गतायां प्रमाणं न निमित्ततायामिति रमणीयम्।

---

१. प्रसज्येत २ पु० पा०।

किं पुनरिदं यद्विरुणद्धि ? कालतः शक्त्याश्रयम्। कस्य चेति कुतो गम्यते निमित्तनैमित्तिकभावः ? कथं चाऽस्य नैमित्तिकसम्बन्धः ? यदि तावद्यस्मिन् सति। को विरोधः ? न हि कालतोऽपि शक्त्याश्रये तस्मिन्नसति तत्क्रिया सत्येव। अथ तस्मिन् सति क्रियते एव। स्याद् विरोधः। न त्वीदृशो निमित्तार्थः। हेतुर्हि निमित्तम्। न चाऽवश्यं हेतवः कार्य्यवन्तः। कार्य्यन्तु नाऽसति हेतौ। तस्मान्न विरोधः।

सहेतुकं प्रकृतमुपसंहरति–तदेवमविरोधादनिमित्ते कालतः शक्त्याश्रयो यदेति, निमित्तवति तु निमित्तविरोधात् कालवत एवाङ्गतो यथेति। सुगमम्।

एवं पूर्वार्द्धं कारिकाया व्याख्याय पश्चार्धं विवरीतुकामस्तदवतारयितुं निमित्तमाक्षिपति—किं पुनरित्यादिना। किमाक्षेपे। तत्र किं पुनरिदं तन्निमितं यद्विरुणद्धि कालतः शक्त्याश्रयमिति स्परूपाक्षेपः, कस्य चेति संबन्ध्यन्तराक्षेपः कुतो गम्यते। निमित्तनैमित्तिकभाव इति प्रमाणाक्षेपः कथमिति। तत्र स्वरूपाक्षेपं विभजते—यदि तावद्यस्मिन् सति। को विरोधः कालतः। शक्त्याश्रयेणेति शेषः। अविरोधं दर्शयति—न हि कालतोऽपि शक्त्याश्रये तस्मिन्नसति तत्क्रिया, अपि तु सत्येव सा। अथोच्यते। तस्मिन् सत्येव क्रियते नाऽसतीति नाऽवधार्यते, अपि तु क्रियते एव न न क्रियते इति भवत्यक्रियायां निमित्तविरोध इत्याह—अथ तस्मिन् सति क्रियतएवेति। दूषयति—स्याद्विरोधो न त्वीदृशो निमित्त-शब्दस्यार्थः। हेतुर्हि निमित्तम्। ततः किम् ? न चावश्यं हेतवः कार्य-वन्तः, ततश्च पूर्व एव निमित्तार्थः सत्येव नाऽसतीति। तथा च न विरोध इत्याह—कार्यं तु नाऽसति हेतौ, तस्मान्न विरोधः। इदमभि-संहितम्। लोकप्रयोगाऽवधारणाधीनो हि शब्दार्थसंवन्धः। हेतुशब्दश्चाऽ-विवादं यस्मिन् सत्येव नाऽसति कार्यं तस्मिन् प्रयुज्यते। न खलु कुसूलस्थं बीजमजनयदङ्कुरं हेतुतया न प्रतियन्ति लौकिकाः। तेन यथा व्याप्यव्या-पकभाव उभयाश्रयोपि व्यापकसंवन्धितया व्याप्ये भाव एवऽनाभाव इति व्याप्तसंवन्धितया च नाऽन्यत्रेति निरूप्यते तथा कार्यकारणभावोऽपि कार्यस्य कारणे सत्येव नाऽसति भाव इति कारणस्यापि कार्यात्प्राग्भावो नाभाव इति निरूपणीयः। ततश्चायं निमित्तशब्दः। तस्मात्सोऽतदर्थ इति। कस्येत्याक्षिप्तं विभजते—यदि कर्मणो निमित्तं ततः कर्मप्रवृत्ते-र्विधिवैयर्थ्यम्, सकलवचोवैयर्थ्यं च।

यदि कर्मणो निमित्तं तत एव कर्म्मप्रवृत्तेर्विधिवैयर्थ्यम्। अनिरूपितादपि निमित्तान्निमित्तवद्दर्शनात् पुरुषकाराऽभावात्। न तस्य निमित्तादुत्पत्तिः। नित्यत्वात्। तस्य तस्मिन् सति न बोधः। वाक्यादेव तत्सिद्धेः। कर्मवैयर्थ्यम्। सति भवत्येवेति। सत्येव तस्मिन् कर्म्मणः फलमिति चेत्। विरोधाभावः सर्वाङ्गोपसंहारेण। अथाऽधिकारस्य। न, नियोगादधिकारः। स एव नियोगसम्बन्धस्तन्निमित्तः। यदि तर्हि

ननु किमिति वचोवैयर्थ्यम्? यावता वचो निमित्तमवगमयिष्यति ततो निमित्तावगमात्पुरुषः कर्मणे घटिष्यते इत्याशङ्क्याह—अनिरूपितादपि निमित्तान्निमित्तवद्दर्शनात्पुरुषकाराऽभावात्। अयमभिप्रायः। तन्नाम हेतुभूतमपि शब्देन ज्ञायतां यदज्ञानमनुपात्तं सत्कार्यायाऽपर्याप्तम्। यथा यथास्वमुपादेयानि द्रव्यगुणकर्माणि कर्मणः न चेदमुपादेयं जीवनादि। तस्मात्सत्तामात्रेणैव कर्मणो हेतुरिति न पुरुषकारस्तन्निरूपणं चाऽर्थवदिति। अथ विधेर्निमित्तमित्यनुषज्यते। दूषयति—न तस्य निमित्तादुत्पत्तिः। कुतः? नित्यत्वात्स्वाभाविकत्वात्। श्रेयःसाधनता हि कर्मणो विधिः। न चाऽसौ निमित्तेन जीवनादिना कर्मण्याधीयते, अपि तु स्वकारणादेव श्रेयःसाधनमुत्पद्यते कर्मणः। न च जीवनादि कर्मनिमित्तमित्युक्तमित्यभिप्रायः। ननु मा भूद्विधेस्तद्बोधस्य भविष्यतीत्यत आह—तस्य तस्मिन् सति न बोधः। कुतः? वाक्यादेव तत्सिद्धेः। अथ फलस्य निमित्तमित्यनुषज्यते। दूषयति—कर्मवैयर्थ्यम्। यतः सति निमित्ते फलं भवत्येवेति। पुनः शङ्कते—सत्येव तस्मिन्निमित्ते कर्मणः फलमिति चेत्। न कर्माऽपेक्षा निमित्तभावं विहन्ति, मोपघानि तथा सर्वत्रेति भावः। सत्यमेवम्, अभिमतं तु नास्तीत्याह—विरोधाभावः सर्वाङ्गोपसंहारेण। निगदव्याख्यातम्। अथाऽधिकारस्य निमित्तमिति संबन्धः। एतदुक्तं भवति। येयं कर्मणि स्वामिता कर्मैतदस्य तदभिमतस्य जनकमिति पुरुषस्य प्रतीतिरसौ निमित्तादिति। निराकरोति—निमित्तात्किं तु नियोगादधिकारः। नियोगमवगच्छत् कार्ये भावार्थे विषये तिरश्चीनमात्मानं नियोज्यं प्रतिपद्यमानः पुरुषो नियोगविषये भावार्थे स्वामितामात्मनो नियोगसामर्थ्यादेव विजानातीति किं निमितेन? इत्यर्थः। सत्यम्, नियोज्यता भावार्थविषयां स्वामितामाक्षिपति, सैव तु नियोज्यता नियोगसंबन्धः पुंसो न निमित्तमन्तरेण भवति, तत्र निमित्तस्य सद्भावो भविष्यतीत्याशङ्कते—स एव नियोगसंबन्धस्तन्निमित्तः। दूषयति—यदि तर्हि तन्निमित्तको नियोगो न नियोगान्निमित्ताऽवगतिः। अयमभिसंधिः। जीवनादि निमित्तं नियोगसंबन्धं पुंसो वदंस्त-

तन्निमित्तको नियोगो न नियोगान्निमित्ताऽवगतिः । प्राक्सिद्धनिमित्तापेक्षः स शब्देनोच्यत इति सापेक्षत्वम् ।

अथ नियोज्यविशेषणस्याऽर्थान्निमित्तभावस्तस्मिन् सत्यधिकारात् । न चात्र प्रत्यक्षादि क्रमते । नापि शब्दः । विधिप्रधानत्वात् । तस्य च भावविषयत्वात् । तस्य चांशत्रयाऽतिरेकात् । तत्र विधीयमानस्य कर्म्मणः फले विधानात् तत्र विधौ निमित्ते उभयविधौ वाक्यभेद इति ।

न्निमित्तं नियोगमेव ब्रूते । न हि कार्यमित्येवाऽवगम्यते, अपि तु ममेदं कार्यमिति । एवं च स्वसम्बन्धिकार्यप्रतिपत्तिरेव नियोगप्रतीतिः । अतो निमित्ताऽवगतिपुरःसरं नियोगसंबन्धं ब्रुवाणो नियोगमेव तत्पुरःसरमाह । ततश्च न नियोगान्निमित्ताऽवगतिः स्यादिति । मा भूत्को दोषः ? इत्यत आह—प्राक्सिद्धनिमित्तापेक्षः स शब्देनोच्यते इति सापेक्षत्वम् । निमित्तं हि नियोगस्य कारकं वा स्याद् ज्ञापकं वेति तृतीयस्य प्रकारस्य निमित्तताया मभावात् तत्कारकत्वे कर्मानुष्ठानवैयर्थ्याद् ज्ञापकत्वमवशिष्यते । तथा च प्राक्सिद्धेनैव निमित्तेन नियोगस्याऽवगमितत्वात्तदपेक्षमभिधानं शब्दस्येत्यप्रामाण्यप्रसङ्गः ।

अथोच्येत न वयं निमित्ताऽवगमान्नियोगाऽवगतिं ब्रूमहे, यदेवमुपालभ्येमहि । किं तु शब्द एव निरपेक्षो जीवनवतो नियोगमवगमयति । नियोगेन नियोज्यविशेषणस्यैव प्रथममपेक्षितत्वात् जीवनादेस्तदवच्छेदकत्वेन सम्बन्धः । नियोज्यविशेषणमेव तु जीवनादि निमित्तमित्युच्यते । तन्नियोज्यविशेषणे सत्येवाऽऽत्मसंबन्धितया नियोगप्रतीतेः कर्मणि च स्वामिताऽवगमात् कर्तुरधिकारसिद्धेरित्याह—अथ नियोज्यविशेषणस्यार्थान्निमित्तभाव[1]स्तस्मिन् सत्यधिकारात् । अर्थान्निमित्तत्वं स्वर्गकामनाया अपि संभवति । न च सर्वाङ्गोपसंहारेण विरोधस्तथा यावज्जीवमित्यत्रापि स्यादित्यर्थः ।

एवं कस्य चेति विभज्य कुतो वेति विभजते—न चाऽत्र निमित्तभावे जीवनादेः प्रत्यक्षादि क्रमते । ननु मा नाम क्रमन्तां[2] प्रत्यक्षादीनि, शब्दस्तु क्रंस्यते इत्यह आह—नापि शब्दः । कुतः ? विधिप्रधानत्वात् । तथापि कुतो न निमित्तविषयत्वम् ? इत्यत आह—तस्य च विधेर्भावविषयत्वाद्भावशब्दश्च ण्यन्ताद्भवतेरेरजित्यचिव्युत्पत्तेर्भावनामाह । यद्युच्येत भवतु भावनाविषयो विधिस्तत्संवन्धात्तु निमित्तमपि गोचरयन् तत्र शब्दं प्रमाण-

1. विशेषणात् स्यान्निमित्तभावः २ पु० पा० । 2. नाम क्रंसत० पु० प० ।

उच्यते । यत्र जाते कर्म्मणोऽवश्यकर्त्तव्यता तन्निमित्तम् । कथम् ? यस्मिन् सति भवत्येव स हेतुर्मुख्यः, इतरस्तु भक्त्या । तदवस्थाभेदसम्बन्धात् । गौणमुख्ययोश्च मुख्ये संप्रत्यय इत्यावश्यकसिद्धिः । तन्निमित्त-

यिष्यतीत्यत आह—तस्य चांशत्रयाऽतिरेकात् । भावनासंबन्धे सिद्धे निमित्तस्य चोदनार्थत्वम् स एव तु साध्यसाधनेतिकर्त्तव्यताऽतिरेकादसिद्ध इत्यर्थः ।

कथं चास्येति विभजते—तत्र निमित्ते विधीयमानस्य कर्मणः फले नित्यसमीहिते विधानात्तत्र फले विधौ निमित्ते विधानादित्यनुषङ्गः । उभयविधौ तूभयस्मिन् फले निमित्ते च कर्मविधौ वाक्यभेद इति । इतिश्चाऽऽक्षेपपरिसमाप्तौ ।

एवमाक्षिप्योत्तरतयोत्तरार्धं कारिकाया अवतारयति—उच्यते । यत्र जाते कर्मणोऽवश्यकर्त्तव्यता तन्निमित्तम् । जाते इत्यनुपादेयतां निमित्तभावोपयोगिनीं सूचयति । कर्त्तव्यतायां निमित्तमित्याह कर्मणां कर्त्तव्यतेति । यस्मिन् सति भवत्येव न न भवति तन्निमित्तमित्यवश्यग्रहणेन दर्शयति । एवं च वदता कर्त्तव्यतारूपविधिविशेषणतया निमित्तं संवध्यत इति वाक्यार्थाऽन्वयप्रकारोऽपि निमित्तस्यार्थात्सूचित इति । पूर्वोक्तानि प्रायेण पृच्छति—कथम् ? उत्तरम्—यस्मिन् सति भवत्येव स हेतुर्मुख्यः । ननु कार्यमकुर्वाणो सत्येव नाऽसतीति विवक्षित्वा हेतुशब्दं लौकिकाः प्रयुञ्जते, तत्र कथमसौ मुख्यो हेतुः ? इत्यत आह—इतरस्तु भक्त्या लक्षणया । सत्यमकुर्वत्यपि कार्यं धूमादिलक्षणं वह्न्यादौ हेतुशब्दः प्रयुज्यते । न त्वेतावताऽसौ मुख्याऽर्थः । न खल्वयं हेतुशब्दो यद्यत् कार्यं जनयति तत्र सर्वत्र विशेषेण प्रवर्त्तमानो जनयति प्रवर्तितुमर्हति । न जातु दण्डविशेषणाऽधीनप्रवृत्ति दण्डिपदं दण्डविरहिणि चैत्रादौ वर्त्तते जनयतीति स एवोच्यते यस्मिन् सति कार्यं भवत्येव न तु यस्मिन्सत्येव तद्धि करोति न करोति च । करणं चोपाधिः प्रवृत्तौ हेतुशब्दस्य कथम् ? यत् करिष्यत्यकार्षीद्वा न तत्र हेतुशब्दः प्रवर्त्तते, अवर्त्तमानस्योपाधेरसत्त्वात् । असतश्च प्रवृत्तिनिमित्तत्वेऽतिप्रसङ्गात् । तस्माद्यस्मिन् सति भवत्येवेति तत्राऽयं निमित्तशब्दो मुख्यो भाक्त इतरत्रेति साम्प्रतम् । लक्षणायां बीजमाह—तदवस्थाभेदसंबन्धात् । बीजादय एव हि परस्परसमवधानसमासादिताऽवस्थाविशेषा नियमेन कार्यशालिनः । यदाहुर्बाह्या अपि "न किंचिदेकमेकस्मात्सामग्र्या[1] सर्वसम्भव" इति । तस्मादवस्थाविशेषा वा[2]ऽवस्थाविशेषशालिनो वा निमित्तपदाऽ-

१. सामग्र्यात् २ पु० पा० । २. अवस्थाविशेषा वा इति नास्ति २ पु० ।

सामर्थ्यादेव । निमित्तमेव हि तन्न स्याद् यस्मिन् सति न क्रियेत ।

अवश्यकर्त्तव्यता च कर्म्मणः प्रतीता नोपसंहार्य्यनिखिलाङ्गस्य कल्पते, न कदाचिदहितोपायस्येत्यतो यथाशक्त्यङ्गसमवेतं सदा समभिलषितोपायं कर्म्मेति गम्यते । निमित्तता च कर्त्तव्यताया विधिरूपायाः । तस्मिन् सति तत्कुर्वतो यथाकथंचित्सदा समीहितमेनःक्षयं साधयत्येव ।

भिधेयाः । यत्र तु सोऽवस्थाविशेषो न वर्तमानस्तत्र सोऽभूद्भविष्यति वेति कथंचिदवस्थाभेदसंबन्धाल्लाक्षणिक इत्यर्थः । ननु भवतु भाक्तम्, तथापि स एव हेतुः किमिति न ? इत्यत आह—गौणमुख्ययोश्च मुख्ये संप्रत्यय इति । तस्मादावश्यकसिद्धिः कर्त्तव्यतायाः । कुतः ? निमित्तसामर्थ्यादेव । सामर्थ्यमेव व्यतिरेकमुखेन दर्शयति—निमित्तमेव हि तन्न स्याद् यस्मिन् सति न क्रियेत । ततश्च सिद्धः सर्वाङ्गोपसंहारविरोधान्नैमित्तिके यथाशक्तिप्रयोगः । सदा समीहितोपायता चेत्याह—अवश्यकर्त्तव्यता च कर्मणः प्रतीता नोपसंहार्याऽखिलाङ्गस्य कल्पते । न कदाचिदीहितोपायस्येत्यर्थाद्यथाशक्त्यङ्गसमवेतं सदा समभिलषितोपायं कर्म नैमित्तिकमिति गम्यते । कस्य निमित्तमिति यदुक्तं तत्रोत्तरमाह—निमित्तता च कर्त्तव्यतायाः फलकर्त्तव्यताया व्यवच्छिनत्ति विधिरूपाया इति ।

ननु तस्य नित्यत्वादित्युक्तम्, तत्राह— तस्मिन्सति कुर्वतो यथा कथंचित्सदा समीहितमेनःक्षयं साधयत्येव । इदमाकूतम् । सत्यं कर्तृसमीहितोपायता कर्मधर्मो विधिः । स च स्वकारणादुत्पत्स्यमानस्य स्वाभाविकस्तथापि निमित्ते सत्यवश्यकर्त्तव्यत्वाद्यथा कथंचित् क्रियमाणं कर्तुः समीहितमुपात्तदुरितक्षयलक्षणं फलं साधयत्येव । एतदुक्तं भवति । निमित्ते सति स्वकारणेभ्यः कर्मोपजायमानमविकलाङ्मितरथा कर्त्तुः समीहितोपायतां कर्त्तव्यतामासादयति । नाऽसतीति भवति कर्त्तव्यतायाः कर्तृसमीहितसाधनताया विधेर्निमित्त[1] श्रवणादिति ।

यदुक्तं निमित्तभावे प्रमाणाभाव इति, तत्र शब्दव्यतिरिक्तानामभावंमृष्यामहे, न तु शब्दस्य । ननु विधिप्रधानः शब्दो विधौ तद्गोचरभावनायां तदङ्गेषु वा तत्संबन्धात्प्रमाणम् । न च निमित्तमेषामन्यतमम्, कथं तत्र चोदनात्वेन शब्दः प्रमाणम् ? इत्यत आह—भावव्यतिरेकेऽपि च चोदनाभूतशब्दप्रमेयत्वं निमित्तस्येति संबन्धः । भावशब्देनांशत्रयोपेतां भावनामाह ।

ननु निमित्तस्याऽनुपादेयत्वादविधेयस्य वाक्यभेद[2]प्रसङ्गाच्चाऽनु-

---

१. निमित्ते २ पु० पा० । २. वाक्यर्थभेद १ पु० पा० ।

भावव्यतिरेकेऽपि च शब्दप्रमेयत्वम् । अविधेयस्यापि विधिवद्विध्यनुप्रवेशा[1]-द्विधिविशेषणत्वात् । अत एव चास्य कर्म्मणा सह सम्बन्धे विकल्पोऽनवकाश इति चतुरस्रम् ।

ननु नियोज्यविशेषणं जीवनादि स्वर्गादिवन्मन्यन्ते, नियोगेन नियोज्यस्य प्रथममपेक्षितत्वात् । न ह्यनाश्रितनियोज्यविशेषो नियोगो लोके

द्देश्यस्य कथं चोदनाभूतशब्दविषयत्वम् ? इत्यत आह—अविधेयस्यापि विधिवत् । अयमभिसंधिः । नास्त्ययं नियमो यद्विधेयमेव सोद्देश्यं चोदनार्थ इति । विधेरविधेयस्य चाऽनुद्देश्यस्य चाऽचोदनार्थत्वप्रसङ्गात्, अपि तु यच्चोदना बोधयति निमित्तमिति विधिवत्तदपि तदर्थः । ननु विधिं विधेयं वा बोधयन् शब्दश्चोदनात्वेन प्रमाणम्, न च निमित्तं विधिर्विधेयं वा, तत्कथं तत्र चोदनात्वेन शब्दः प्रमाणम् ? इत्यत आह—विध्यनुप्रवेशात् । स एवाऽविधेयस्य कुतः ? इत्यत आह—विधिविशेषणत्वात् । अयमभिसंधिः । वैश्वानरं द्वादशकपालकर्म्म, तत्कर्त्तव्यता पुत्रजन्मनि सत्यसति चाऽविशेषेण प्रसक्ता न चाऽवश्यभाविनी स्यात् । अनेन त पुत्रजन्मना निमित्तेन जाते एव नाऽजाते कर्त्तव्यतैव नाऽकर्त्तव्यतेति व्यवस्थाप्यमाना निमित्तमविधेय मप्यनुद्देश्यमपि स्वयमनुद्देश्या वाऽविधेया च विशेषणतया गृह्णातीति विशेषणाऽभिधाने चोपपन्नं शब्दस्य चोदनात्वमिति ।

कथं चाऽस्य नैमित्तिकसंबन्ध इति यदुक्तं तत्रोत्तरमाह—अत एव चास्य[2] कर्मणा सह संबन्धे विकल्पोऽनवकाशः । यत एवाऽविधेयस्य विशेषणतया विध्यनुप्रवेशित्वेन शब्दप्रमेयतया विधिसंबन्धः[3] अत एव विधेयेन कर्मणा सह निमित्तस्य संबन्धे यो विकल्पः किं निमित्तोद्देशेन कर्म विधीयते, आहोस्वित्कर्मोद्देशेन निमित्तमिति, तत्र यो दोषः प्रसञ्जितः स सर्वोऽनवकाशः । विधेयसम्बन्धनिबन्धनो विकल्पप्रसङ्गो नाऽविधेय-संबन्धे भवितुमर्हतीत्यर्थ इति । तस्माच्चतुरस्रम् ।

यदुक्तं प्रथमत एव जीवनादिर्निमित्ततया संबध्यत इति, तत्प्रत्याचक्षाण आह—ननु नियोज्यविशेषणं जीवनादि स्वर्गादिवन्मन्यन्ते । न मननमात्रा-द्वस्तुसिद्धिरिति हेतुमुपन्यस्यति—नियोगेन नियोज्यस्य प्रथममपेक्षितत्वात् । अयमर्थः । कार्यं हि कृत्यधीनसत्त्वमननुष्ठीयमानं न तत्त्वे पर्यवस्यति, अनुष्ठानं च न कर्त्तारमन्तरेण, कर्त्तृता च नाधिकारं विना, अधिकारश्च

१. विध्यर्थानुप्रवेशात्—मू० पु० पा० ।

२. निमित्तस्य च—मू० पु० पा० । ३. संबन्धनिबन्धनः २ पु० पा० ।

दृश्यते। तदभावे प्रतिपत्तिरेव न स्यात्। तद्विशेषणमेव तु स तस्मिन् सत्यधिकारान्निमित्तत्वेनाऽवतिष्ठते। स्वर्गादि तु साध्यतया काम्यत्वेन।

नैतत्सारम्। विशेषणाऽनुपपत्तेः। न हि यावज्जीवनं तावता विशिष्टः कश्चित्कदाचिद्वा यो नियुज्यते नानावसन्तकालविशिष्टो वा।

ममेदं कार्यमिति बोद्धारं नियोज्यमपेक्ष्य भवतीति कार्यबोद्धा नियोज्यभेदो न नियोगेन कार्येणाऽनन्यप्रयुक्ता[1]ऽनुष्ठानेनान्तरङ्गतया निमित्तान्नियोज्यस्यैव प्रथमपेक्षितत्वाद्विशेषणमन्तरेण च नियोज्यभेदाऽसिद्धिर्निमित्तस्याऽनुपादेयतया तदुपपत्तेर्नियोज्यविशेषणतयैव तावत्प्रथमं सङ्गतिर्न तु निमित्ततयेति। लोकेऽपि चैतत् सिद्धमिति तत्पूर्वकत्वाद्वेदे न कथं सा सेत्स्यति? इत्याशयवानाह—न ह्यनाश्रितनियोज्यविशेषो नियोगो लोके दृश्यते। निमित्तमन्तरेण पुनर्लोके वेदे च यथायथं नियोगो दृश्यत एवेत्यर्थः। ननु नाऽदर्शनमात्राद्व्यावृत्तिरित्यत आह—तदभावे नियोज्यविशेषस्य प्रतिपत्तुरभावे प्रतिपत्तिरेव न स्यात्। तदुक्तमाचार्येण 'न हि देवदत्तं यज्ञदत्तं वाऽनुद्दिश्य लिङादयः प्रवर्त्तन्त" इति। ननु यदि निमित्तमप्यधिकृतविशेषणं ततो निमित्तत्वेनाऽसंबन्धान्न नैमित्तिकत्वं कर्मण इति स्वसिद्धान्तव्याकोपः प्राप्त इत्यत आह—तद्विशेषणमेव तु स तस्मिन् सत्यधिकारान्निमित्तत्वेन अवतिष्ठते। जीवनादेरधिकृतविशेषणस्यापि सतस्तस्मिन् सत्यधिकारादर्थान्निमित्तत्वमस्तीति तद्योगान्नैमित्तिकं कर्मेति कुतः सिद्धान्तव्याकोप इत्यर्थः। नन्वीदृशं स्वर्गादेरपि निमित्तत्वमिति काम्यस्यापि नैमित्तिकत्वप्रसङ्ग इत्यत आह—स्वर्गादि तु साध्यतया काम्यत्वेनाऽवतिष्ठत इत्यनुषङ्गः। अयमभिसंधिः। सत्यप्यधिकृतविशेषणत्वे स्वर्गादेर्न निमित्तभावः। कर्मियोगाऽऽपादितेन साध्याभावेन विरोधान्निमित्तत्वस्य च सिद्धतया सहैकार्थसमवायनियमाद्व्यापकविरुद्धोपलब्ध्या विनिवृत्तेः। जीवनादेस्तु सिद्धत्वे निमित्तत्वमविहितमिति सिद्धः काम्यनैमित्तिकविवेक इति।

तदेकदेशिमतं सिद्धान्ती दूषयति—नैतत्सारम्। कुतः? विशेषणाऽनुपपत्तेः। तामेवाह—न हि यावज्जीवनं तावता विशिष्टः कश्चित्कदाचिद्वा यो नियुज्यते[2] नानावसन्तकालविशिष्टो वा। अयमर्थः। जीवनं नाम प्राणधारणमुच्यते। तत्पदं चेह यावच्छब्दसमभिव्याहृतं यावतां वा प्राणिनां जीवनानि यावन्ति वा यावत्कालं वा पुंस एकस्य जीवनमभिदधीत। तत्र प्रथममध्यमयोः कल्पयोर्दूषणं—न हि यावतां पुंसां यावन्ति वा जीवनानि

१. अन्याऽनायत्तप्रयुक्तः २ पु० पा०। २. नियोक्ष्यते २ पु० पा०।

न जीवनमात्रं वसन्तमात्रं वा विशेषणम् । अवाच्यत्वाज्जीवनस्य । यावद्वीप्स-योरनन्वयाच्च । न च प्राप्तयोरनुवादः । जीवतोऽपि स्वर्गकामस्यैवाऽधिकारे यदा शक्नुयादित्युपबन्धाद्विरोधाऽभावात् । क्रमपर्यन्ताऽपेक्षित्वान्नियोगस्य नाऽङ्गहानम् । तस्माद्यावद्वीप्सार्थाऽनन्वयाद्यथा न कर्तृविशेषणं जीवनम-

संभवन्ति, जात्यभिप्रायमेकवचनम्, तावता विशिष्टः कश्चिदेकः पुरुषः संभवति । तृतीयकल्पदूषणाम्—कदाचिदिति । न हि कालत्रयविप्रकीर्ण्ण-जीवनवानेकदा पुरुषः संभवी, संभवे व्यभिचारे वाऽर्थवद्विशेषणम् असंभवे कथं भवेत् ? इति नानावसन्तकालविशिष्टो वा । कदाचिदिति वाक्यान्त-रेण हि ज्योतिष्टोमस्य कालसंबन्धे विहिते वसन्ते ज्योतिषा यजेतेति निमित्तार्था श्रुतिरित्याशयः । अथोच्येत न यावद्वीप्से अधिकृतविशेषणे अपि तु जीवनवसन्तौ, तयोश्चाऽस्ति संभव इत्यत आह—न जीवनमात्रं वा वसन्तमात्रं वा विशेषणम् । तत्र जीवनमात्रस्याऽविशेषणत्वे हेतुमाह—अवाच्यत्वाज्जीवनस्य । सत्यमस्ति संभवो न तु व्यभिचारः । नो खल्व-जीवतो नियोज्यता संभवति, या जीवनेन व्यवच्छिद्येत, ततश्चास्य व्यवच्छे-द्याऽभावाद्विशेषणत्वेनाऽवाच्यत्वं जीवनस्येत्यर्थः । जीवनवसन्तसाधारणं च हेत्वन्तरं समुच्चिनोति—यावद्वीप्सयोरनन्वयाच्चैकपुरुषसंबन्धितया एकदाऽध-स्तादसंभव उक्तः ततोऽनन्वयाद्यावद्वीप्सयोः प्रमत्तगीतत्वप्रसङ्गादित्यर्थः ।

स्यादेतत् । यद्यपि शाब्दमधिकृतविशेषणत्वं जीवनवसन्तयोः तथाप्यर्थं निमित्तत्वमप्यस्ति । यदा यदा निमित्तसद्भावस्तदा तदा भाव्यं नैमित्तिके-नेति प्राप्तावेव यावद्वीप्सार्थावनूद्येते इति कुतोऽनन्वयः ? इत्यत आह—न च प्राप्तयोरनुवादः । कुतः ? जीवतोऽपि स्वर्गकामस्येवाऽधिकारे यदा शक्नुयादित्युपबन्धात् । नन्वार्थेनापि निमित्तत्वेनाऽवश्यकर्त्तव्यताप्रतीतेर्यदा शक्नुयादित्युपबन्धो विरोधादनुपपन्न इत्यत आह—विरोधाऽभावात् । एतदुक्तं भवति । अधिकारिविशेषणदशायां तावज्जीवनादीनां यदेत्युपबन्धेन न विरोधोऽस्ति, यदि परमार्थेन निमित्तभावेन वक्तव्यः । स च नित्यवदाम्ना-तनानाङ्गोपदेश[1]बललब्धनिखिलाङ्गोपसंहारसामर्थ्य[2]विरोधात् आत्मानमेव तावदासादयितुं नार्हति किमङ्ग पुनर्विरोधम् ? अतस्तदनुगुणतया व्यव-तिष्ठते । न चाऽधिकारवाक्यविरोधः । न हि तन्निमित्तश्रुत्यनपेक्षमवश्य-कर्त्तव्यतामवगमयति । न च तामन्तरेण नोपपद्यते येनादावेवं कल्पयेत् । तस्माद्विरोधाऽभावात्क्रमपर्यन्ताऽपेक्षित्वमप्रतिहतं नियोगस्येति यदा शक्नु-

---

१. आम्नातमङ्गोपदेश २ पु० पा० । २. सामर्थ्यम् २ पु० पा० ।

वाच्यत्वात्, वसन्ते वसन्ते इति च न कालार्थसंयोगस्तथा नाऽधिकारविशेषणे अपि। अतो निमित्तमेव तन्निमित्तम्। तथा हि—

तयोरनन्वयः। निमित्तमेव हि तन्न स्याद्यदि तस्मिन्सति न क्रियेत। निमित्तवांश्च नियोगो यस्य तस्येत्यधिकारिविशेषसिद्धेर्नाऽप्रतिपत्तिः। तेन निमित्तं सदधिकारिविशेषणं नाऽधिकारिविशेषणं सन्निमित्तम्। शाब्दत्वाच्च निमित्तभावस्य। लिङ्गादयो हि 'दहेद्भिन्ने आरभमाण' इति तत्र तत्र स्मृतेस्तदभिदधति। तत्र शब्दार्थं परित्यज्याऽन्यपरः[1] शब्दसामर्थ्या-

यादित्युपबन्धान्नाङ्गहानम्। तदिदमुक्तम्——क्रमपर्यन्तापेक्षित्वान्नियोगस्य नाङ्गहानम्।

अपि च। त्वयाऽप्येतदवश्याङ्गीकरणीयमित्युपसंहारमुखेनाह—तस्माद्यावद्वीप्सार्थाऽनन्वयाद्यथा न कर्तृविशेषणं जीवनमवाच्यत्वात् वसन्ते वसन्ते इति च न कालार्थसंयोगस्तथा नाऽधिकारिविशेषणे अपि। यथा जीवनं तवापि न कर्तृविशेषणं यावच्छब्दाऽनन्वयाद्व्यवच्छेत्तव्याऽभावेनाऽवाच्यत्वाच्च तथा वसन्ते वसन्ते इति न कार्यः संयोगः, वीप्साया अनन्वयादित्यर्थः।

स्वमतमुपसंहरति—अतो निमित्तमेव निमित्तं नाऽधिकारिविशेषणं प्रथममित्यर्थः। कस्मात्? तथा हि। तयोर्यावद्वीप्सयोरनन्वयः। कस्मात्पुनर्निमित्तत्वे सत्यनन्वयः? इत्यत आह—निमित्तमेव हि तन्न स्याद्यस्मिन्सति न क्रियेतेति। उक्तमेतत्प्राक्। ननूक्तं नियोगेन नियोज्यस्य प्रथममपेक्षणादिति, तत्राह—निमित्तवांश्च नियोगो यस्य पुंसस्तन्निमित्तमस्ति तस्य कर्मकर्त्तव्यतेत्यधिकारिविशेषणसिद्धेर्नाऽप्रतिपत्तिः। अस्ति तावन्न प्रथममित्युपरिष्टादिहैव वक्ष्यामः। निमित्तश्रुतेरेवार्थादधिकारविशेषणलाभ इति प्रतिपत्तिप्रतिलम्भान्नाऽप्रतिपत्तिः कर्त्तव्यताया इत्यर्थः। तेनैतदुक्तं भवतीत्याह—तेन निमित्तं प्रथममवगतं सदधिकारिविशेषणं नाऽधिकारिविशेषणं प्रथममवगतं सदर्थान्निमित्तमिति।

ननु यावद्वीप्सार्थयोरनन्वयाज्जीवनवसन्तयोरस्तु निमित्तभावः, न तु गृहदाहादिष्वेतदस्ति प्रमाणमित्यत आह—शाब्दत्वाच्च निमित्तभावस्य। श्रुतिरेव मूलं निमित्तत्वाऽवगम्यस्य, सौकर्यमात्रेण तु यावद्वीप्से अप्युपन्यस्ते इत्याशयः। शाब्दत्वं दर्शयति—लिङादयो हि 'दहेद्भिन्ने आरभमाण' इति तत्र निमित्तस्मृतेस्तन्निमित्तमभिदधति। दहेदिति लिङ्, भिन्ने इति निमित्त-

---

१. अनन्यपरः—मू० पु० पा०।

त्तत्पर इतरोऽर्थादिति शब्दवृत्त्यनुसारोऽन्याय्यः[1]। यथा च निमित्तं सदधिकारिविशेषणमेवं फलं सदधिकारिविशेषणं नाऽधिकारिविशेषणं सत् फलमित्युक्तं भावनाविवेके।

सप्तमी। दर्शपूर्णमासावारभमाण इति लक्षणहेत्वोः क्रियाया इति हेतौ लकारः। यावज्जीवमित्यत्रापि यावति विन्दजीवोरिति णमुल्प्रत्ययो यद्यपि साक्षान्निमित्ते स्मृतस्तथापि समानकर्तृकधात्वर्थान्तरसम्बन्धे स्मरणाज्जीवनस्य होमादिधात्वर्थान्तरसम्बन्धमाह। न चासौ निमित्तनैमित्तकभावादन्य इति णमुलो निमित्तभावः। तथापि किमति नाऽधिकरणविशेषणपरता निमित्तशब्दस्य? न खल्वभिधीयमानपरतैव सर्वत्रेत्यत आह—तत्र शब्दार्थनिमित्तभावं परित्यज्याऽन्यपरशब्दार्थभूताऽधिकारिविशेषणपरो निमित्तशब्दः, स च शब्दार्थभूतो निमित्तभावोऽर्थादनेनायुक्तपक्षस्वी[2]कारो दर्शितः।

युक्तपरित्यागं दर्शयति—न पुनस्तत्परः शब्दार्थीभूतनिमित्तभावपरः। अधिकारिविशेषणपरस्त्वर्थादिति। अनेन प्रकारेण शब्दवृत्त्यनुसारोऽन्याय्यतयाऽनर्ह इत्यर्थः। क्वचित्पाठः—तत्र शब्दार्थं परित्यज्याऽन्यपरः शब्दसामर्थ्यात्तत्पर इतरोऽर्थादिति। तस्यार्थः। विमर्श एव विमृश्यते—किं शब्दार्थनिमित्तभावं परित्यज्याऽन्यपरोऽधिकारिविशेषपरः सामर्थ्यात्तु तत्परो निमित्तपर उताऽधिकारविशेषोऽर्थान्निमित्तपरस्तु शब्दः? इति विमृश्य निमित्तमवधारयति—शब्दवृत्त्यनुसारो न्याय्यः। नाभिधेयपरत्वे सम्भवत्यन्यपरता न्याय्या। अभिधेयता च निमित्तस्य वर्णिता। तस्मान्निमित्तपरतैव साध्वीत्यर्थः। नन्वेवं सति स्वर्गकामपदमधिकारिविशेषणप्रतिपादनपरं प्रसज्येत, न ह्येतद्भाव्यतया स्वर्गं बोधयति, अपि तु पुरुषविशेषणतयेत्यत आह—यथा च निमित्तं सदधिकारिविशेषणमेवं फलं सदधिकारिविशेषणं नाधिकारिविशेषणं सत् फलमित्युक्तं भावनाविवेके। भावना हि कस्यचिदुत्पादना, तेनासावपि किंचिदुत्पाद्यं भावमन्तरेणाशक्या निरूपयितुम्। न च समानपदोपात्तं धात्वर्थं भाव्यतया स्वीकर्तुमर्हति। विध्यापादितत्वेन पुरुषार्थभाव्यापेक्षणात्। धात्वर्थस्य च दुःखतया तद्वैपरीत्यात्ततः प्रच्याविता प्रथमतरमपेक्षितत्वाद्भाव्यस्य स्वर्गकामपदस्य 'दण्डी प्रैषानन्वाहे'तिवद्विशेषणप्रधानतामापादयतीत्युपपादितं भावनाविवेके।

---

१. क्वाचित्कोऽयं पाठ इति टीकाकारः। तन्मतेन सार्वत्रिकः पाठः—"तत्र शब्दार्थं परित्यज्याऽन्यपरः शब्दः स च शब्दार्थीभूतो न पुनस्तत्परः। इतरेवाऽर्थात् इति शब्दवृत्त्यनुसारोऽन्याय्यः" इति प्रतिभाति।

२. पक्षीकारो। मु० पु० पा०।

यद्यपि स पूर्वमपेक्षितः, प्रतिपत्तिस्त्वस्य पश्चादेव, अनुष्ठानापेक्षत्वात्, तथा च क्रमपर्य्यन्तात्परा निरूपणेति ।

नन्वेवं विधिमति सर्वत्रेष्टाऽनुबन्धादुत्पत्तिचोदनाऽभावः । तथा च

स्यादेतत् । यथा प्रथममपेक्षितत्वाद्भाव्यस्य स्वर्गकामपदं तत्परमेवं नियोगेन नियोज्यस्य प्रथमपेक्षितत्वान्निमित्तश्रुतयोऽपि नियोज्यपराः प्रसज्येरन्, वक्तव्यो वा विशेष इत्यत आह—यद्यपि सोऽधिकारी नियोज्यः पूर्वमपेक्षितः प्रतिपत्तिस्त्वस्याऽधिकारिणः साङ्गप्रधानप्रतीतेः पश्चादेव । इदमत्राकूतम् । न हि प्रथममपेक्षित इत्येव प्रथमं प्रतीयते । अपि तु यच्छक्यप्रतिपत्ति । शक्यप्रतिपत्ति च भाव्यं, न च सा तादृशाऽधिकारि-विशेषणमिति । कुतः ? अनुष्ठेयज्ञानाऽपेक्षित्वादधिकारविशेषस्य । नो खल्वर्थिमात्रं निमित्तमात्रं वाऽधिकारिविशेषणतां प्रतिपद्यते । मा भूत् पङ्गुशूद्रादीनामधिकारः, किं तु यथाविनियोगमधिकारव्यवस्थितेर्निखिलाङ्गो-पेतप्रधानोपसंहारसमर्थोऽधिकारिविशेषः । तथा च पङ्गुशूद्रादीनामन-धिकारः । सामर्थ्यं च तद्गोचराऽधीननिरूपणक्रमपर्यन्ताङ्गग्रामोपेतं च प्रधानं तद्गोचर इति तज्ज्ञानमपेक्षते । ततश्च प्रथममपेक्षितोऽपि नियोज्यो न द्रागित्येवाऽवगन्तुं शक्यत इति भावनाकर्त्तव्यता निमित्तफलं करणेति कर्त्तव्यतां परिज्ञाय पश्चान्निरूप्यत इति युक्तम् । महर्षेरपि क्रमलक्षणाऽनन्तर-मधिकारलक्षणं प्रणयत एतदेव संमतमित्याह—तथा चाऽस्याधिकारविशेषस्य क्रमपर्यन्तात्प्रधानाङ्गग्रामगोचरविचारात्परा विचारणापि । एतेन ज्ञाप्यज्ञाप-कभावसम्बन्धान्निरूप्यस्याऽवसरलक्षणं सम्बन्धं ये नाऽधिकारलक्षणस्याचक्षते ते निरस्ता वेदितव्याः । पूर्वेषामधिकारगोचरविचारद्वारेण ज्ञापकत्वादेतस्य ज्ञाप्यत्वात् । न चैकेनैव लक्षणार्थेन ज्ञापकेन भवितव्यमिति कश्चिन्नियम-हेतुरस्ति । तदाहुरत्रभवन्तो वार्त्तिककारमिश्राः 'कार्ये ज्ञानेऽधिकारः स्यात्' । क्रमपर्यन्ताङ्गग्रामसहितं च प्रधानं कार्यमुक्तमिति सर्वं रमणीयं स्थितं तावत् । समीहितसाधनतायामपि विधौ यदा शक्नुयादित्युपबन्धः काम्ये यथा शक्नुयादिति तु नैमित्तिक इति समीहितसाधनतैव तत्र विधिरिति ।

तत्र चोदयति—नन्वेवं विधिमति सर्वत्रेष्टाऽनुबन्धादुत्पत्तिचोदना-भावः । अयमर्थः । समीहितसाधनता चेद्विधिः स च लिङाद्यर्थ इति 'यदाग्नेयोऽष्टाकपाल' इत्यादिषूत्पत्तिचोदनास्वपि विधिप्रतिपत्तेस्तस्य च समीहितसाधनात्मकत्वात्तत एव फलाऽवगतेर्दर्शपूर्णमासाभ्यां स्वर्गकाम इतिवदधिकारचोदनात्वादुत्पत्तिचोदनाऽभावप्रसङ्ग इति ।

परस्पराऽनपेक्षत्वात्सन्निधावपि न फलार्थेन पुनः श्रुतिरिति सर्वत्र कर्म्मभेदः स्यात् । क्रत्वर्थश्च न स्यात । दध्ना जुहोतीति च न गुणफलसंबन्धः स्यात् । न चाऽन्यत् सुखादिष्टम्, तच्च स्वर्ग इति स्वर्गाऽवरोधात्पश्वाद्यवकाशो दुर्लभः । उपादानाद्वा तेऽपि स्युः । नित्यस्तु स्वर्गः स्यात् ।

भवतूत्पत्तिचोदनाभावः, किमेतावता? इत्यत आह—तथा च परस्पराऽनपेक्षत्वात्सन्निधावपि न फलार्थेन पुनः श्रुतिरिति सर्वत्र कर्मभेदः स्यात् । अयमर्थः । उत्पत्तिवाक्यानां खलु कर्मस्वरूपप्रतिपादनपराणां तद्रूपस्याऽन्योत्पादे स्वाभाव्यादुत्पाद्यमाकाङ्क्षितम्, कर्मफलसम्बन्धप्रतिपादनपराणां च वाक्यानां स्वरूपप्रज्ञापनमपेक्षमाणानां परस्परसम्बन्धसम्भवादुत्पत्तिवाक्यविहितकर्मसन्निधौ तस्यैव कर्मणः फलसम्बन्धार्थेन पुनः श्रुतिः फलवाक्य उपपद्यत इति न कर्मान्तरं कल्प्येत । यदा तु समीहितोपायतैव विधिस्तदा तत एवोत्पाद्यप्रतिलम्भान्न तस्य फलवाक्याऽपेक्षाऽस्ति । फलवाक्यमपि च तद्वाक्योपात्तफलाऽवरुद्धं कर्मफलान्तरसम्बन्धाय नाऽपेक्षितुं क्षमत इति कर्मान्तरमेव फलसम्बन्धाय कल्पयतीति सर्वत्र कर्मभेदप्रसङ्ग इति । प्रसङ्गान्तरमाह—क्रत्वर्थश्च न स्यात्प्रयाजादि । न जातु श्रुत्युपात्तसमीहितफलप्रतिलम्भे प्रकरणलब्धकरणोपकारलक्षणफलसंबन्धसंभवः । श्रुतेः प्रकरणाद् वलीयस्त्वादिति भावः ।

प्रसङ्गान्तरं समुच्चिनोति—दध्ना जुहोतीति च गुणस्य दध्नः समीहितेन फलेन संबन्धः स्यात् । इह हि प्राप्ताऽप्राप्तविवेकेन दध्नेन्द्रियकामस्येत्यत्र नैतावता होमो निष्फलस्तस्यापि स्ववाक्यसमधिगतफलत्वेन तद्वत्त्वात् । न च प्रकृतात्कर्मान्तरं दधि फलविशिष्टं विधीयत इति साम्प्रतम् । न खलु तदानीमेव तस्यैव कर्मणः फलोद्देशेन विधेयता दधिविधौ चोद्देश्यता संभवति । तस्मात्प्रकरणलब्धहोमाश्रयस्य दध्नः फलसम्बन्धप्रसङ्ग इति युक्तम् । किं च समीहितसाधनता चेद्विधिः समीहितं च पुंसां सुखमेव न दुःखं नाप्यसुखं द्वेषणादुपेक्षणाच्च । तच्चाऽनवच्छिन्नं स्वर्ग एव । अवच्छेदे लौकिकं स्यात् । न च 'चित्रया यजेत पशुकाम' इत्यत्र यजेतेति श्रुतेरेवाऽवऽच्छिन्नं पश्वादिभिः समीहितमवगम्यते । न च पशुकामपदसम्बन्धादवच्छेदस्तस्य पदान्तरपर्यालोचनया वाक्यसमधिगम्यत्वात्स्वर्गस्य च श्रुतिमात्रात्प्रतीतेर्बलीयस्त्वात् । स्वपदोपात्तसमीहितरूपभाव्यलाभेन च भावनयाऽनपेक्षितत्वात् । यथाश्रुतपुरुषविशेषणत्वेन व्यवस्थानं न भाव्यपरत्वमिति स्वर्गाविरोधात्पश्वादीनां चित्रादिष्वसंबन्धप्रसङ्ग इत्याह—न चाऽन्यत्सुखादिष्टम् । ततः किं ? तच्च स्वर्ग इति स्वर्गाऽवरोधात्पश्वाद्यवकाश दुर्लभः । अथाऽन्यदिच्छत्यन्यत्करोतीति विरोधः । न तावत्पुरुषविशेषणपरतामात्रपरेण पशु-

तस्मात्किमित्यवशिष्टं भावनायाः ? पुरुषार्थतैव विशेषणम् । तथाऽपि च निमित्ते कर्म्मैव साध्यम् । अन्यथा निमित्तफलयोरुपादेये वाक्यभेदः । जीवनेन होमो होमेन फलमिति वैरूप्यात् । द्वयोरुद्देश्ययोरेकवाक्याऽस-

कामपदेनास्याऽन्वयः । तत्र यदि फलतया नाऽन्वियात् प्रमत्तगीतं प्रसज्येत । तस्मात्फलपरमेतदित्याह—उपादानाद्वा तेऽपि पश्वादयः स्युः । नित्यस्त्ववश्यंभावी तु स्वर्गः स्यात्तथापि समुच्चयोऽनिष्टस्ते प्रसज्यत इति भावः । स्वपक्षमुपसंहरति—तस्मात्किमित्यविशिष्टं भावनायाः ? किमिति भावनाभाव्यमुपलक्षयति । तद्यदा समीहितसाधनता न विधिर्न पुरुषार्थतैव विशेषणं न पुरुषार्थेनैव विशेष्यते अपि त्वन्येनाऽपीत्यर्थः । क्वचित्पाठः—पुरुषार्थतैव विशेषणमिति । तत्र केभ्यश्चित्पदेभ्य उत्तरम् । ननु भवत्पक्षेऽपि भावनैव विधिवद्भाव्यमुपस्थापयति पश्वाद्यवकाशो दुर्लभ इति पदानि तेभ्य उत्तरं पुरुषार्थेनैव विशेषणम् । अयमर्थः । अस्मन्मते हि भावनास्वाभाव्याद्भाव्यमात्रमेवाऽवगतमिति तद्विशेषापेक्षायामणुगुणतया पुरुषार्थेनैव पश्वादिनैव किमंशो विशेष्यत इति युक्तम् । त्वन्मते तु भाव्यविशेषणाऽपेक्षैव नास्ति । स्वर्गस्यैव तद्विशेषस्य प्रतीतिरिति । तथा च यदुक्तं नित्यसममीहितोपायो नैमित्तिककर्मेति तदपि निरस्तमित्याह—तथापि च किमंशस्याऽविशिष्टत्वे निमित्ते कर्मैव साध्यं न पुरुषार्थः । नैमित्तिककर्मभावना हि भाव्याकाङ्क्षा पुरुषार्थं च भाव्यमादातुमशक्ता धात्वर्थमेव स्वपदोपात्तमादाय निर्वृणोतीत्यर्थः । यदि पुनः पुरुषार्थोऽस्या भाव्यो भवति ततः को दोषः ? इत्यत आह—अन्यथा नित्यत्वसमीहितसाधनत्वे निमित्तफलयोरुपादेये च कर्मणि वाक्यभेदौ । वचनव्यक्तिभेदात् । तमेव दर्शयति—निमित्ते सति कर्मैव विधेयं भावनाभाव्यतयाऽवसीयते इति । ईदृशं हि तत्र वचनं व्यज्यते, जीवत्वे हि सति निमित्ते होमः कर्त्तव्य इति । यदा तु फले कर्म विधीयते तदा फलस्य निमित्तवदसिद्धत्वात्साध्यत्वेन प्रतीतेः, तत्र कर्म चेत्साध्यं तदोभयोरसंवन्धादेकस्य त्वितरार्थत्वान्नेष्टं परनिष्पत्तय इति कर्मणः फलं प्रति करणत्वेन संवन्धादीदृग्वचनं व्यज्यते होमेन फलमिति । तदिदं वैरूप्यम् । अतो वाक्यभेदः स्यात् । एतन्मा भूद्वैरूप्यम्, यता फलमुद्दिश्य कर्म विधास्यत इत्यत आह—द्वयोरुद्देश्ययोरेकवाक्यासमवायात् । लोकाऽधीनाऽवधारणा हि वाक्यगतिः । लोके च प्रत्युद्देश्यं विधिवाक्यपरिसमाप्तिः । न खलु येनैव प्रयत्नेनैकमर्थं विधातुमेकमुद्दिशामस्तेनैवाऽपरमप्युद्देष्टुमीशमह इति स्वाऽनुभवसिद्धमेतत् । तस्माद् द्वयोरुद्देश्ययोर्नैकवाक्य[1]-समवायसंभव इत्यर्थः ।

---

१. नैकविधिवाक्य २ पु० पा० ।

मवायात्। न ह्येकस्मादशुभक्षयोऽक्रियायामपायश्च सुलभः। एवं चाऽनङ्ग-त्वमेव प्रज्ञातत्वात्कर्म्मरूपस्य, न यथाशक्त्युपादानमिति।

उच्यते—

उत्पत्तिविनियोगार्थप्रयोगाऽधिक्रियात्मकः।
सर्वो विधिस्तत्परताविशेषान्न विभज्यते॥

एकस्यैव ज्ञापकत्वविरोधात् निमित्तस्य विधिविशेषणत्वमपि न संभवतीत्य-भिमान आक्षेप्तुरिति मन्तव्यम्। न चैवं वाक्यभेदप्रसक्तिः। इदं चाऽपरं प्रसज्यत इत्याह—न ह्येकस्मादशुभक्षयोऽक्रियायामपायश्च सुलभः[1]। यदा निमित्ते कर्म विधीयते न तदा फले विधातुं शक्यते। न च तत्स्वरूपमात्र-विधानं प्रेक्षावत्प्रवृत्तिहेतुरिति तदक्रियायामपायः कल्पनीयः, तद्भयात्प्रवृत्ति-सिद्धेः। यदा तु फले विधीयते तदा तदेव दुरितं क्षिणोतीति तदर्थमनेक-कल्पनागौरवप्रसक्तिरिति निमित्तेन कर्मैव भावनाभाव्यं न समीहितमपि इत्याक्षेपः। एष चाक्षेपान्तरमपि प्रसूत इत्याह—एवं चाऽनङ्गत्वमेव नैमित्ति-कस्य नाऽङ्गसम्बन्ध इत्यर्थः। कुतः? प्रज्ञातत्वात्कर्मस्वरूपस्य। उपकारक-तया खल्वङ्गता व्याप्ता, सा चोपकारता स्वरूपे कार्ये वा स्यात्। न तावत्कार्ये क्रियाया उपकारकत्वे नैमित्तिकस्य कर्मणः कार्याऽभावादित्युक्तम्, पारिशेष्यात्कर्मस्वरूपजनकत्वमङ्गत्वं वाच्यम्, न च तत्संभवति, प्रज्ञातत्वा-त्कर्मणः। उपायतो रूपतश्चोपकारकताव्याप्ताऽङ्गता तदभावे न भविष्यती-त्यर्थः। न केवलमनङ्गत्वमिदं चाऽपरमापतितमित्याह—न यथाशक्त्य-ङ्गोपादानं नैमित्तिककार्येऽस्तीति। परिहरति—

उत्पत्तिविनियोगार्थप्रयोगाधिक्रियात्मकः।
सर्वो विधिस्तत्परताविशेषान्न विभज्यते॥

नापेक्षितोपायतायामपि विधौ उत्पत्त्याद्यभावः, सहसंभवे नाऽवि-रोधात्। सर्वस्यैव विधेरुत्पत्त्यर्थविनियोगार्थप्रयोगाधिक्रियात्मकत्वात्। नन्वस्मिन्पक्षे प्रयोगात्मकत्वमनुपपन्नम्, कर्त्तव्यताऽवगमो ह्यनुष्ठापयति, नेष्टसाधनतावगमः। न चेष्टसाधनतैव कर्त्तव्यता, कृतिसाध्यता हि सोच्यते। साधनतात्र सिद्धता, न च स्वभावविरुद्धयोर्दहनतुहिनयोरिव सिद्धतासाध्यतयोरेकत्वं शक्यसाधनम्, त्रैलोक्यस्यैक्यप्रसङ्गात्। अपि च कर्त्तव्यता चेदभिमतसाधनता अभिमतमपि कर्त्तव्यत्वमविवादमित्यभिमत-साधनं स्यात्। निदाघसमयसंवन्धिमध्यन्दिनाऽर्कविकीर्णखरतरकरनिकर-

---

१. अपायश्च तुल्यः २ पु० पा०।

नेष्टसाधनतामात्रं विधिरपि तु कर्त्तुः । एवंकारं च प्रवर्त्तनाप्रत्ययः ।

निपाताऽऽहितदुःसहसंतापदूनतनवो हि पिहितगगनमण्डलां बलाहकोन्नतिमाकस्मिकीमम्भःसंसारगम्भीरामभिनवतमालमालाभामतिरुचिरां रोचयन्ते, न च कर्त्तव्यतामस्या मन्यन्ते । न चाऽवग्रहविशोषितसस्य सीमानः कृषीवला यजमानसमापितामभिमतवर्षोपायभूतामपि कारीरीं कर्त्तव्यतयाऽवगच्छन्ति । तस्माद्विरोधाद् व्यभिचाराच्च नाऽभिमतोपायता कर्त्तव्यता ।

न चेत्कर्त्तव्यता कथमनुष्ठापयति ? इति न प्रयोगात्मको विधिरित्यत आह—नेष्टसाधनतामात्रं विधिः, अपि तु कर्तुः । असमर्थः । न वयमिष्टसाधनतामात्रं कार्यतां ब्रूमहे, यदेवमुपालभ्येमहि, किं तु कर्तुर्यदिष्टसाधनं यत्तस्य कर्त्तव्यम्, अकर्त्तव्ये कर्त्तुस्तत्त्वाऽनुपपत्तेः । न च साध्यतासिद्धतयोर्विरोधः, भिन्नकालत्वात् । न खलु प्रवृत्तेः पूर्वं कर्मणः कृतता क्रियमाणता वा, किं तूपरितनस्य क्रियमाणता तदनन्तरस्य कृतता । शब्दश्च त्रैकाल्यवस्तुविषयत्वेन शक्नोति तस्य सिद्धतासमयवर्त्तिनीं साधनतां तत्पूर्वकालभाविनीं च कृतिव्याप्यतामिदानीमसतीमप्यभिधातुम् । यदेव च कृतिव्याप्यं तदेव च कृतिसाधनम्, इतिकर्त्तव्यतासाधनतयोः सामानाधिकरण्यमिष्टसाधनं कर्त्तव्यमिति । तदेवं कर्तुरिष्टसाधनतां विधिं वदतां कर्त्तव्यतैकार्थसमवायिसमीहितसाधनत्वमुक्तं भवति, न कर्त्तव्यतामात्रम्, फलेऽपि कर्त्तव्यताया अविशेषेण विधित्वप्रसङ्गात् । न च फलकर्त्तव्यता शब्दगोचरः । स्वयमेव हि जानन्ति कर्त्तव्यं पुरुषाः फलम्, न च शब्दः फले पुरुषस्योत्साहमुत्पादयेत्, न च तदोहागोचरस्तत्साधनं तु स्यात्, न च तद्भावेनाऽज्ञानं प्रवृत्तिहेतुरिति तज्ज्ञानमेव विधिः ।

किं कारणं पुनरेवमभ्युपेयत ? इत्यत आह—एवंकारं प्रवर्त्तनाप्रत्ययः[1] । इदमाकूतम् । ओदनकामः पचेत्, न सर्पायाऽङ्गुलिं दद्यादित्युपदेशश्रवणसमनन्तरमुपदेष्टव्यस्य पुंसः पाके प्रवृत्तिमुरगाङ्गुलिदानोद्यतस्य च ततो निवृत्तिमुपलभ्य बाला एवमवधारयन्ति नूनमस्य प्रवृतिहेतुगोचरः प्रत्यय उपजात इति । तथा हि । प्रवृत्तिरियमस्य पुंसः कारणवती प्रवृत्तित्वात्प्रवृत्तिवत् । प्रत्ययपूर्विका चेयं स्वतन्त्रप्रवृत्तित्वादस्मत्प्रवृत्तिवत् । कर्त्तव्यताकर्त्तव्यत्वैकार्थसमवायिहिताऽहितसाधनत्वगोचरश्च विवादाध्यासितः प्रत्ययः प्रवृत्तिहेतुप्रत्ययत्वात् अस्मत्प्रवृत्तिहेतुप्रत्ययवत् । तथा हि । स्तनपानादौ कर्त्तव्यतैकार्थसमवायिनीं हितसाधनतामवगम्य प्रवृत्तोस्मि, दहनसंपर्काच्चाऽकर्त्तव्यतैकार्थसमवायिनीमहितसाधनतामवेत्य निवृत्तोस्मीति

१. प्रत्ययाः २ पु० पा० ।

अन्यथा प्रवृत्तिहेतुत्वाभावात्। स्वतोऽन्यतो वा सिद्धे अतएवाऽनपेक्षितव्यापारे समीहितसाधनेऽप्यप्रवृत्तेः। तदुक्तं "शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वा"— दिति। प्रयोक्तृफलसाधनतालक्षणत्वाच्छास्त्रस्येति। ततश्च विधिपर्य्याया-च्छास्त्रादनुष्ठानं कर्म्मणोऽवगम्यते। अदृष्टार्थस्य च शास्त्राऽऽयत्ताऽनुष्ठानस्य स्वरूपविशेषोऽपि। प्राग्विधेरप्राप्तेः। अपेक्षिते चाऽपेक्षितसाधनत्वाद्विनियोगः। प्रवर्त्यश्च कश्चिदधिकारी स्वामी यस्य तदिष्टसाधनम्। सर्वत्रापि च प्रतीय-

कर्त्तव्यत्वं कृत्यर्हत्वं तदविरोधि चाऽकर्त्तव्यत्वम् अधर्मवत्। एवंविधे एव च हिताऽहितोपायत्वे तादर्थ्यात्प्रवर्त्तनानिवर्त्तनाज्ञाने गोचरयतः। ते च प्रागसती शब्दज्ञानानन्तरमुपजायमाने तज्ज्ञानमेव कारणतया स्वीकुरुतः। तस्मादेवं यतः प्रत्ययो भवति न त्वन्यथा, प्रवर्त्तनाप्रत्ययश्च प्रवृत्तिबीजं तस्मा-न्नेष्टसाधनतामात्रं विधिरपि तु कर्त्तुरिति सिद्धम्।

अन्यथाकारं कस्मान्न भवति ? इत्याह—अन्यथा विधेः प्रवृत्तिहेतुत्वाऽभावात्। कुतः ? स्वतः पुरुषप्रयत्नमनपेक्ष्य तत्क्षणस्फुटत्कमलकुड्मलपरिमलोद्गारिणि नासाऽग्रमधिरोहति मातरिश्वनि अन्यतो वा प्रयत्नवद्वैणिकवाद्यमानवल्लकीविपञ्च्यमाने पञ्चमध्वनौ नरान्तरश्रवणपथवर्त्तिनि सिद्धेऽत एवाऽनपेक्षितव्यापारे समीहितसाधनेऽप्यप्रवृत्तेः। अत्र भवतो महर्षेरप्येतदभिमतमित्याह—तदुक्तं शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति। कथमिदमनेनोक्तम् ? इत्याह—प्रयोक्तृफलसाधनतालक्षणत्वाच्छास्त्रस्य। ननु शास्त्रस्य तल्लणं न विधेरित्याशङ्कामपनयन्नुपसंहरति—ततश्च विधिपर्यायाच्छास्त्राद-नुष्ठानं कर्मणोऽवगम्यते, ततश्च सिद्धः प्रयोगविधिरित्यर्थः। अस्तु तर्हि प्रयोगात्मकतामात्रं किमुत्पत्त्यर्थतया ? इत्याह—अदृष्टार्थस्य शास्त्राऽऽयत्तानुऽष्ठानस्य स्वरूपविशेषोऽप्यवगम्यते। कुतः ? प्राग्विधेरप्राप्तेः। विनियोगार्थतां दर्शयति—अपेक्षिते चाऽपेक्षितसाधनत्वाद्विनियोगः। लिङादयः खलु विधौ स्मर्यन्ते, विधिः कर्तुरपेक्षितोपायता, ततश्च ते धातोः परे श्रूयमाणाः स्वार्थस्य भावनायाः समीहितं भाव्यमुपनयन्ति, धात्वर्थस्य च भावनाऽनुरञ्जनस्य समीहिताऽर्थप्रवृत्तभावनाभाव्यस्य समीहितांशसाधनत्वं समीहितभावनासाधनत्वं वा तद्रूपस्य तस्य स्वतोऽलाभात् श्रुत्यैवाऽभिदधतीति विनियोगार्थत्वम्। फलतद्भावनोपायत्वप्रतिपादनमेव हि तादर्थ्यप्रतिपादनमिति भावः। अधिक्रियात्मकतां दर्शयति—प्रवर्त्यश्च कश्चिदधिकारी स्वामी यस्य तदिष्टसाधनमिति। प्रवर्त्तनात्मको हि विधिर्विविच्यमानः कर्तुरभिमतसाधनात्मा स्थापितः। स च प्रवर्त्तनीयं कर्त्तारं यागाद्युपायजनितसमभिलाषे फलविशेषशालिनमधिकारिणं कर्मणि स्वामिनमधिकुर्वन्नधिकार इत्युच्यते। अनधिकुर्वतः कर्तुरित्यभावात्। समीहितसाधनतामात्रस्य

मानेऽस्मिंश्चतुष्टये ऐदम्पर्य्यं भिद्यते। तेनोत्पत्त्यादिविधिवाक्यभेदः। तच्चैदम्पर्य्यं प्राप्त्युपपदविशेषसंबन्धात्। क्वचिच्चतुष्टयपरता; यथोद्भिदा यजेतेति। अन्यतः कस्यचिदलाभात्। फलपदसंबन्धाच्च। क्वचित्त्रिपरता, यथा ज्योतिष्टोमवाक्ये। उत्पत्तेरन्यतो लाभात्। क्वचिद् द्विपरता, यथा

प्रवर्त्तनात्मकत्वाऽनुपपत्तेर्विधित्वव्याहृतिप्रसङ्गात्। ननु सर्वस्य विधेश्चातूरूप्यादुत्पत्त्यादीनां मा भूत्परस्परविरोधः, एकैकस्माद्वाक्यात्कार्त्स्न्येन चातूरूप्यस्य विधेरनुगमान्नोत्पत्त्यादिविधिवाक्यभेद इत्यत आह—सर्वत्र च प्रतीयमानेऽस्मिंश्चतुष्टये ऐदम्पर्यं भिद्यते तेनैवोत्पत्त्यादिविधिभेदः। यद्यपि सर्वस्य विधेरेतच्चतुष्टयात्मकता तथापि वाक्यानां वैचित्र्यात्सामर्थ्याऽभेदेन चतुस्त्रिद्व्येकपरत्वादुत्पत्त्यादिविधिवाक्यभेद इत्यर्थः। तदेव वैचित्र्यमैदम्पर्यनिमित्तमादर्शयति—प्राप्त्युपपदविशेषसंबन्धाद्भिद्यत इत्यनुषङ्गाच्चतुर्णामन्यतमस्याऽप्राप्तेः स्वर्गकामाद्युपपदविशेषसंबन्धाच्चेत्यर्थः। तन्निमित्तानैदम्पर्यभेदानुदाहरति—क्वचिच्चतुष्टयपरता यथोद्भिदा यजेतेति। कुतः? अन्यतश्चतुर्ण्णामपि विधिरूपाणां मध्ये कस्यचिदप्येकस्य लाभात्। ननु यजेतेति कर्मरूपस्य च समीहितसाधनतारूपविध्यभिधायिना च प्रत्ययेन समीहितं प्रति विनियोगस्य चाऽवगमादुत्पत्तिविनियोगपरत्वमुपपन्नम्, अनुपपन्नं त्वधिकारपरत्वम्, तत्स्वरूपाऽनवगमात्। न च प्रवर्त्तनात्मकेन विधिनाऽऽक्षिप्तं प्रवर्त्यमात्रमधिकारीति साम्प्रतम्, सामान्यमात्रस्य तद्भावाऽभावात्। उक्तं हि 'देवदत्तं वाऽनुद्दिश्य लिङादयः प्रवर्त्तन्ते' इति। पशुकामपदं तद्विशेषायाऽलं भावनाऽऽक्षिप्ताभव्यपरत्वात्। न चैकस्योभयपरत्वाऽसंभवः। तथा च तदभावे न प्रयोगात्मकता विधेरित्यत आह—फलपदसम्बन्धाच्च। पशुकाम इति फलपदम्, तच्च विध्युपहिताया भावनाया भाव्यसमर्पणमप्यधिकारिविशेषाऽपेक्षायामर्थादधिकारिणमप्युपनयति। एवं च कर्त्तृविशेषस्याऽभिमतसाधनता बुद्धिसिद्धा। तदेवं कर्त्तारमधिकारिणं प्रयोजयन्ति प्रयोगात्मकतामपि लभन्ते इति सिद्धं च चतुष्टयपरत्वम्।

त्रिपरता यथा ज्योतिष्टोमवाक्ये। उत्पत्तेरजातकर्मरूपज्ञानस्याऽन्यतः[1] सोमेन यजेतेत्यतो वाक्यात् लाभात्। क्वचिद् द्विपरता अधिकारविनियोगपरता, यथा दर्शपूर्ण्णमासवाक्ये। उत्पत्तेर्यदाग्नेयोऽष्टाकपाल इत्यादिभ्यः प्रयोगस्य च पौर्ण्णमास्यां पौर्णमास्या यजेतेत्येवमादिभ्योऽन्यतः सिद्धेः। क्वचित्त्रिपरता क्वचिद् द्विपरता वेति क्वचित्पाठः। तत्र त्रिपरतेति मतमुपन्यस्य द्विपरता वेति वाशब्देन निरस्य द्विपरता स्वीकृतेत्यर्थः। क्व-

१. अज्ञातरूपकर्मज्ञानस्य २ पु० पा०।

दर्शपूर्णमासवाक्ये। उत्पत्तियोगयोरन्यतः सिद्धेः। क्वचिदेकपरता, यथाऽग्निहोत्रं जुहोति पौर्णमास्यां यजेतेति। न च फले विनियोगः। अनिर्दिष्टफलविशेषस्याऽशक्यप्रतीतित्वात्। तदनिर्देशेऽधिकारिविशेषाऽप्रत्ययान्नाधिकारोऽपि। अत एव न प्रयोगः। न ह्यप्रतिष्ठितेष्टसाधनभावेऽनुष्ठानप्रत्ययः प्रतितिष्ठति नाऽनिरूपिताऽनुष्ठातृकः। तस्मात्फलवाक्यादेव प्रयोगप्रत्ययः। तेनाऽग्निहोत्रं जुहोतीति कर्म्मस्वरूपपरता विधेः। इतरे त्वंशाः प्रतीता

चिदेकपरता यथाऽग्निहोत्रं जुहोतीत्यत्र उत्पत्तिपरस्य पौर्णमास्यां पौर्णमास्या यजेतेति प्रयोगपरता। ननु कथमग्निहोत्रवाक्यस्योत्पत्तिपरता? यावता कर्तृसमीहितोपायतां विधिमभिदधता आख्यातेन समीहितं प्रति होमस्य विनियोगः कर्तुश्चाधिकारस्तन्निबन्धनश्च प्रयोग उक्त एवेत्यत आह—न फले विनियोगः। कुतः? अनिर्दिष्टफलविशेषस्याऽशक्यप्रतीतित्वात्।

इदमत्राकूतम्। सत्यं विधिस्वाभाव्यात्समीहितमात्रं फलम्, न त्वेतावता विनियोगोऽनुष्ठानाङ्गं सेद्धुमर्हति। अनेनैतदिति हि स स्यात्। न चाऽसौ समीहितभेदाऽभिधायिपदमन्तरेणेति। अत एव नाऽधिकारपरताऽपीत्याह—तदनिर्देशे फलविशेषाऽनिर्देशादधिकारिविशेषस्य तत्फलकामस्याऽप्रत्ययात् नाऽधिकारः। प्रयोगपरतां निषेधति—यतो न विनियोगो भूत्वाऽधिकारः अतएव न प्रयोगः। कस्मात्? न ह्यप्रतिष्ठितेष्टसाधनभावे कर्मणि विनियोगाऽभावे सत्यनुष्ठानप्रत्ययः प्रतितिष्ठति नाऽनिरूपिताऽनुष्ठातृकः। अनिरूपिताऽधिकारिविशेषोऽनुष्ठानप्रत्ययः प्रतितिष्ठतीति पूर्वेण संबन्धः। तस्मात्फलवाक्यादेव प्रयोगप्रत्ययः। उपसंहरति—तेनाऽग्निहोत्रं जुहोतीति कर्मस्वरूपपरता विधेः। ननु च विधिस्वाभाव्यादितरेऽपि सामान्यतः प्रतीयमाना नाऽविवक्षामर्हन्ति किं तु तत्सामर्थ्यादेव पिण्डपितृयज्ञवद्विशिष्टतां गमयिष्यन्तीत्यत आह—त्वंशाः प्रतीता अप्यविक्षिताः। युक्तं पिण्डपितृयज्ञे विशेषाणामन्यतोऽसिद्धेस्तेषामभावे च विधेस्तत्त्वाऽनुपपत्तेः तद्विशेषाऽभिधायिशब्दकल्पनेति, इह तु सामाम्नातेभ्य एव वचनान्तरेभ्यो विनियोगाधिक्रियाप्रयोगाणां प्राप्तेर्विधिस्वाभाव्यात्प्रतीतानामविवक्षैव युक्तेति भावः। प्रयोगमात्रपरतामुदाहरति—पौर्णमास्यामिति त्वनन्यपरत्वात्प्रयोगभेदपरता। न खल्वेतत् उत्पत्तिपरम्, उत्पत्तेर्यदाग्नेयोऽष्टाकपाल इत्यादिभ्योऽवगतेः। नापि विनियोगाऽधिकारिपरत्वम्, अनयोर्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत एव सिद्धेः। प्रयोगोऽपि यद्यपि तद्वाक्यादेव सिध्यति तथापि न तद्भेदः सेद्धुमर्हति। तथा हि। दर्शपूर्ण्णमासाभ्यामिति वचनं षण्णामपि यागानामेकप्रयोगतां गमयेत्, अस्मिंश्च पौर्ण्णमास्यामिति वचने कालविशेषे पौर्णमास्यां

अप्यविवक्षिता:। पौर्णमास्यामिति त्वनन्यपरत्वात्प्रयोगभेदपरता। संमार्गप्रोक्षणादौ तूत्पत्तिविनियोगपरता। व्रीह्यादिमुखेन प्रकृतयजिकरणांशप्राप्तौ

पौर्णमासीसंज्ञककर्मत्रयविधिपरे अमावास्यायामिति चाऽमावास्याकालेऽमावास्याऽभिधानकर्मत्रयविधिपरे कालभेदतः प्रयोगभेदप्रतीतेः प्रयोगावच्छेदकत्वात्। कालस्य प्रयोगभेदपरतैवाऽनन्यलभ्यत्वात् तद्भेदस्योत्पत्तिवाक्याच्चाऽऽग्नेयादिस्वरूपमात्रत्रयाणां कालयोगोपकरणीभूतानां करणानां तु तद्योगे तदङ्गानामपि तत्सहितानां करणत्वाद्विधिपरतां प्रकारान्तरेणाह—संमार्गप्रोक्षणादौ तु उत्पत्तिविनियोगपरता।

अयमभिसंधिः। दशापवित्रेण ग्रहं संमार्ष्टि व्रीहीन् प्रोक्षतीति संमार्गः प्रोक्षणं च विधीयते, न च तत्स्वरूपमन्यतः प्राप्तमिति तत्प्रज्ञापनादुत्पत्तिपरता वाक्यस्य। न च प्रोक्षणादेरपेक्षितं प्रत्यन्यतो वाक्यादेदमर्थ्यमवगम्यते इति विनियोगपरतापि। न च सहसैव विधिदर्शनात्स्वर्गादि साक्षादपेक्षितं[1] गम्यते। यच्छक्नुयादित्युपबन्धाद्धि यदपेक्षितं प्रति यस्य सामर्थ्यमुपलभ्यते तेन तत्साधनीयम्। इह व्रीहीन् प्रोक्षतीति विध्युपहिता[2] प्रोक्षणभावना द्वितीयाश्रुत्यापादितप्राधान्यान् व्रीहीनापाततः साध्यतया स्वीकर्त्तुं प्रवृत्ता सती साक्षादपेक्षितत्वं तेषामनासादयन्ती परम्परयाऽपि पुरुषार्थमर्थयते। तद्यदि परम्परयाऽपि तन्नाप्नोति ततो विपरिवृत्त्य सक्तून् जुहोतीतिवद्विनियोगभङ्गेन प्रोक्षणाद्येव[3] साक्षादपेक्षितं कल्पयेत्। अस्ति तु पारम्पर्येणाऽपेक्षितप्रतिलम्भः। तथा हि। व्रीहिभिर्यजेतेति प्रकृतयागाऽनुवादेन साधनतया व्रीहयो विधीयन्ते। न च साक्षाद्यागसाधनत्वं तेषामुपपत्तिमत्। उत्पत्तिशिष्टपुरोडाशाऽवरोधात्। आग्नेयादीनां च सोमेन यजेतेतिवद् व्रीहिद्रव्यविशिष्टकर्मान्तरविधिगौरवात्। तस्मात्प्रकृताऽऽग्नेयादिसाधनीभूतपुरोडाशप्रकृतितया तेषां विधानमिति साम्प्रतम्। ततश्च फलवद्यागसाधनीभूतपुरोडाशद्रव्यप्रकृतितया व्रीहीणामपेक्षितत्वाद्विधिसामर्थ्याद् व्रीहिस्वरूपाऽतिलङ्घनेन लक्षणया फलवद्यागसंबन्धिना रूपेण संबध्यमानाः प्रोक्षणादया संस्कारा व्रीहीन् प्रोक्षतीत्येवमादिभिरेव वाक्यैरपेक्षिते विनियुज्यन्ते। एवं च यवेष्वपि प्रोक्षणादय औपदेशिका एव। फलवद्यागसाधनीभूतपुरोडाशप्रकृतित्वस्योभयत्राविशेषादिति।

अथ प्रयोगपरतापि कस्मान्न भवति? इत्यत आह—व्रीह्यादिमुखेन

---

१. स्वर्गादि साध्यत्वादपेक्षितम् २ पु० पा०।

२. व्रीह्युपहिता २ पा०। ३. प्रोक्षणादेरेव १ पु० पा०।

करणविधिनैवाऽनुष्ठानसिद्धेः । अधिकृतस्य चाऽधिकारप्रत्ययात् । समिदादिषूत्पत्तिपरतामेव केचिन्मन्यन्ते । प्रकरणोन्नीतश्रुतिनिबन्धनत्वाद्विनियोगस्य । श्रुतिरेव त्विह विनियोजिका प्रकरणोन्नेया । विधिस्त्वयमेव विनि-

प्रकृतयजिरूपकरणांशप्राप्तौ करणविधेरेवाऽनुष्ठानसिद्धेः । पौर्णमास्यां पौर्णमास्येत्यमावास्यायाममावास्यया यजेतेत्यनेन पौर्णमास्येति चामावास्ययेति च करणीभूतस्य प्रयोगभेदश्चोद्यते । न चाऽनितिकर्तव्यताकस्य तद्भाव इति करणमनुष्ठापयत्येतिकर्त्तव्यताकमेवाऽनुष्ठापयति व्रीह्यादिमुखेनेति संनिपत्योपकारकाणां द्वारविशेषं कथयति । अथ कस्मादधिकारपता न भवति ? इत्यत आह—तदधिकृतस्य करणाऽधिकृतस्याऽधिकारप्रत्ययात् । फलवाक्यं हि फलं साधने विनियोजयत्फलार्थिनं कर्त्तारं तत्साधनेऽधिकरोति । साधनाऽनुप्रवेशिन्यश्चेतिकर्त्तव्यता इति फलविधिवाक्यसामर्थ्यादेव साधनाऽधिकृतस्याऽधिकारस्तदितिकर्त्तव्यतास्वपि तासामभावे तत्साधनताऽनवगतेरिति भावः ।

अत्रैकदेशिमतमुपन्यस्यति—समिदादिषूत्पत्तिपरतामेव केचिन्मन्यन्ते । कुतस्तर्हि तेषां विनियोगः ? इत्यत आह प्रकरणोन्नीतश्रुतिनिबन्धनत्वाद्विनियोगस्य । अयमर्थः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येतत्प्रधानभावनाया लब्धसमीहितसाध्यतत्साधनायाश्च साधनोपकाराकाङ्क्षायां वचनमुपपद्यमानं यदेव तत्सन्निधातुमुपनिपतति समिदादि अनवाप्तसमाहितभेदं तस्यैव स्वविषयसाधनोपकारकत्वादैदमर्थ्यापादकं वचनमुपकल्प्यैकवाक्यतां भजते इति प्रकरणोन्नीतैव श्रुतिश्च विनियोजिका न पुनः समिधो यजतीत्यादिका । न ह्यस्याः श्रुतेः प्रधानैदमर्थ्यंवगम्यते समिदादीनाम् । तस्मादग्निहोत्रं जुहोतीतिवदुत्पत्तिमात्रपरता समिदादिवाक्यानामिति केचिन्मन्यन्ते ।

अथ प्रकरणमेव कस्मान्न साक्षाद्विनियोजकम् ? इत्यत आह—श्रुतिरेव त्विह विनियोजिका साक्षान्न प्रकरणमित्यवधारणा । इदमत्राकूतम् । कर्त्तव्यस्य हीतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणम्, तच्च तदैदमर्थ्यापादनात्मकम्, ऐदमर्थ्यं च विनियोगः, यत्त्वनुपपद्यमानमुपपादकं कल्पयेत्तदेकवाक्यतां च गच्छेत्तदुपपादकमिति लोकसिद्धम् । न च विनियोगनिरूपणार्थेन प्रमाणान्तरेण वा वचनमनुपपन्नार्थमेकवाक्यतामुपैत्यपि तु वचनान्तरेणैव । अत एव वचनस्य परिपूर्णार्थौचित्ये वचनमध्याहरन्तो दृश्यन्ते शाब्दा इति । यदि श्रुतिरेव विनियोजिका न प्रकरणं किमिति तर्हि श्रुतेर्भेदेन प्रकरणाख्यं

यीगनिबन्धनः । ननु श्रुत्यादयश्च विनियोजकाः, किमत्र विधिना ? । नैतत् । तादर्थ्यं हि विनियोगस्तच्च विधेः । श्रुत्यादयस्तु संबन्धमात्रहेतवः । संबन्ध-

प्रमाणमुपन्यस्तं महर्षिणा? इत्यत आह—प्रकरणोन्नेयायां । यद्यपि श्रुतित्वेनाऽभेदः तथापि प्रत्यक्षश्रुतिः श्रुतिरित्युच्यते, प्रकरणोन्नेयायां श्रुतौ तन्मूलत्वात्प्रकरणं विनियोजकमुच्यते इति भेदः ।

तदिदमेकदेशिमतमुपन्यस्य दूषयति—विधिस्त्वयमेव विनियोगनिबन्धनः । तुशब्दः पूर्वपक्षं व्यावर्त्तयति । न प्रकरणोन्नीतश्रुतिर्विनियोजिका समिदादीनाम्, अपि तु तद्विधिः समीहितं प्रत्यैदमर्थ्यमापादयति तेषाम् । न चाऽग्निहोत्रं जुहोतीतिवत्समीहितभेदाऽनुपादानात् अविनियोजकत्वम्, तदनुपादानेऽपि विधिस्वाभाव्यादेव समीहितं प्रत्यैदमर्थ्याऽवगमात् तस्य च प्रकरणेन विशेषणात् । असति विधौ समानपदोपादानत्वेन धात्वर्थस्यैव भावनाभाव्यत्वप्रसङ्गात्समीहितं प्रत्यैदमर्थ्याऽनुपपत्तेः । अग्निहोत्रोत्पत्तिवाक्ये तु विधिस्वाभाव्यात्सत्यपि समीहितमात्रलाभेऽन्यत एव तद्विशेषप्रतीतेर्न विनियोगपरतेत्युक्तम् । अतः समिदादिवाक्यानामुत्पत्तिविनियोगपरत्वमित्यर्थः । अत्र चोदयति—ननु श्रुत्यादय एव विनियोजकाः, किमत्र विधिना ? अथातः शेषलक्षणमित्युपक्रम्य श्रुत्यादीनामेव तल्लक्षणत्वेन निर्देशादित्यर्थः । परिहरति—नैतत् । तादर्थ्यं हि विनियोगः । ततः किं ? तच्च विधेः । अकिंचित्करास्तर्हि श्रुत्यादय इत्याह—श्रुत्यादयस्तु संबन्धमात्रहेतवः । ननु चैदमर्थ्यमेव सम्बन्ध इत्यत आह—संबन्धश्चाश्रयाश्रयिभावादिरनेकविधः, शेषत्वलक्षणस्तु विधिगम्य एवेत्याह—पारार्थ्यं तु विधेः । यद्येवं कथं तर्हि श्रुत्यादयो विनियोजका ? न जातु संबन्धमात्रप्रतिपादकत्वं[1] विनियोजकत्वम्, अपि तु अत्यन्तपारार्थ्य[2]प्रतिपादनमित्यर्थः ।

उत्तरं—विधिना प्रतिपाद्यमानपारार्थ्योऽवघातादिर्यस्य व्रीह्यादेः श्रुत्यादिभिः संबन्धितयाऽवगम्यते सोऽवघातादिस्तदर्थोव्रीह्याद्यर्थ इति प्रत्ययात् । इदमत्राकूतम् । श्रुत्यादयो न पारार्थ्यमवगमयन्ति । प्रयाजशेषेण हवींष्यभिधारयतीत्यत्र मा भूत्प्रयाजशेषो गुणभूतो मा च भूवन् प्रधानहवींषि, विभक्त्योः करणकर्मत्वाऽभिधायित्वेन तदापादकत्वात् । यदा तु विध्यधीनं पारार्थ्यं तदाऽभिघारयतीति विधानादभिघारणस्य समीहितं प्रति तादर्थ्यप्रतिपादनात् प्रयाजशेषस्य च प्रयाजैदमर्थ्यापन्नस्याऽत्र हविष्षु शेषभावाऽभावात् प्रतिपत्तिविरोधात् । स्वरूपलक्षणायाश्चाऽप्रधानीभूत-

---

१. प्रतिपादनम् पु० पा० । २. अन्यत् २ पु० पा० ।

आश्रयाश्रयिभावादिरनेकविधः। पारार्थ्यं तु विधेः। कथं तर्हि श्रुत्यादयो विनियोजकाः? विधिना प्रतिपाद्यमानपारार्थ्यो यस्य श्रुत्यादिभिः संबन्धितयाऽवगम्यते तदर्थं इति प्रत्ययात्। न चोभयलक्षणमपि शेषलक्षणमुक्तम्। विधेस्तद्विषयत्वात्। या च स्वरूपपरता सा भेदलक्षणे चिन्तिता। तदायत्तत्वाद्भेदस्य। स्वरूपपरो हि विधिर्भिनत्ति कर्म्म।

विभक्त्यर्थाऽनुरोधेन प्रधानीभूतप्रकृत्यर्थाऽन्यथाभावस्याऽन्याय्यस्य प्रसक्तेः। समापितप्रयाजस्य तु तत्रोपयुक्तस्य तच्छेषस्य होममात्राऽविरोधिनो रोचनीयत्वेन समीहितत्वाद्धविषां च वाक्यान्तरेण स्नेहनार्थोपस्तरणाऽभिघारणविधानात् पुनरभिघारणस्याऽदृष्टार्थत्वप्रसङ्गात् असमीहितत्वात् प्रयाजशेषं हविष्षु क्षारयतीति वचनार्थः संपद्यते। ततश्च श्रुत्यादयः स्वसामर्थ्यात्संबन्धं प्रतिपादयन्तो विधिप्रतिपादितं[1] पारार्थ्यं विशेषे व्यवस्थापयन्तः पारार्थ्यं प्रति प्रमाणमुच्यन्ते इत्यर्थः। महर्षिणाप्यथाऽतः शेषलक्षणमित्युपक्रम्य 'कर्माण्यपि जैमिनिः फलार्थत्वा'दिति कर्मणः शेषभावं विधिविभक्तिहेतुकं वर्णयता श्रुत्यादीनि चोपारिष्टात्पारार्थ्यप्रतिपादकान्युपपादयतोभयविधलक्षणं केवला[2]दिविधिभक्तिः विधिसहितश्रुत्यादिभिरपि शेषलक्षणमुक्तम्। कथमवान्तरभेदेऽपि लक्षणैकत्वम्? इत्याह—विधेस्तद्विषयत्वात्। यदापि श्रुत्यादिगम्यं शेषत्वं तत्रापि विहित एव तदित्युक्तमित्यर्थः। न च स्वरूपपरत्वादयोऽस्माभिरुत्प्रेक्षिताः, किं तु भगवतो महर्षेरपि संमताः, तद्विचारणादित्याह—या च स्वरूपपरता सा भेदलक्षणे चिन्तितेति। कुतः? तदायत्तत्वात् स्वरूपपरत्वाद् भेदस्य। कुतस्तदायत्तत्व?-मित्यत आह—स्वरूपपरो हि विधिर्भिनत्ति कर्मभावनाम्[3]। अज्ञातस्वरूपज्ञापनं हि स्वरूपपरत्वं, न च तदन्येन ज्ञापिते संभवतीति ज्ञाप्यमानं ततो भिन्नं व्यवस्थाप्यते, अन्यथा भेदाऽभावादिति भावः।

सम्प्रति स्वरूपपरताहेतुकां भावनाभेदचिन्तामादर्शयति—तत्परता चेत्यादिना, व्याप्रियत इत्यन्तेन। अस्ति ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्रैवमाम्नायते सौमेन यजेत, दक्षिणानि जुहोति, हिरण्यमात्रेयाय ददातीति। तत्रैवं चिन्त्यते, किं स्वर्गकामो यजेतेति भावनायामेकस्यां दानादयो धात्वर्था विधीयन्ते उत प्रतिधात्वर्थं भावनाभेदः? इति। किं प्राप्तम्? आख्यातवाच्यत्वाद्भावनायास्तस्य च सर्वत्रैकत्वाद्वाचकभेदादृते वाच्यनानात्वाऽयोगात् अतिप्रसङ्गात् धात्वर्थानां च नानाधातुवाच्यानामपि भावनातोऽन्यत्वात्

१. विध्यःपादितम् २ पु० पा०। २. उभयविधं केवलादि २ पु० पा०।
३. धर्मभावताम् २ पु० पा०।

तत्परता चैकशब्दोपादानेऽपि भावनात्मनि प्रकृतिप्रत्यययोः पौर्वापर्य्यनियमात्प्रकृत्यर्थापेक्षेण प्रत्ययेनाऽर्थस्याऽभिधायाः कृताऽनुबन्धे प्रतीयमाने शब्दान्तरत्वाच्छुद्धेऽलभ्यमाने धात्वर्थविनियोगपरत्वानुपपत्तेरेकस्यां भावनायां

तद्भेदेऽपि भावनाभेदाऽनुपपत्तेः स्वर्गकामो यजेतेति भाव्यविशेषोपादानाद्यजिपरस्याऽऽख्यातस्य विशदतरभावनाऽभिधायित्वात् तद्विहितभावनाऽनुवादेन दानादयो धात्वर्था विनियुज्यन्ते। न चोत्पत्तिशिष्टयागाऽवरोधाद्दानानामविनियोग इति उक्तम्, दद्यात् जुहुयादित्यादिषु तदाख्यातप्रत्यभिज्ञानैर्भावनातद्भावस्याऽशक्याऽपह्नवत्वात्। तथा च तस्यां दानादीनां विनियोगाऽवगमात् सकलधात्वर्थविशिष्टा भावनैकैवेति प्राप्तम्।

एवं प्राप्ते उच्यते—एकशब्दोपादानेऽपि भावनात्मनि प्रकृतिप्रत्यययोः पौर्वापर्यनियमाद्धेतोः प्रकृत्यर्थाऽपेक्षेण प्रत्ययेनाऽर्थस्य भावनाया अभिधाया येयमभिधा तस्याः। एतदुक्तं भवति। यद्यप्ययमाख्यातप्रत्यय एक एव तथापि तत्तद्धातुपरः प्रयुज्यमानः तत्तद्धात्वर्थाऽनुरक्तं स्वार्थ[1]मभिदधानो यजेत दद्यात् जुहुयादिति परस्परव्यावृत्ताः प्रकृत्यर्थभेदभिन्ना भावना दर्शयति। कथमन्यस्य धात्वर्थस्य भेदो भावनाभेदहेतुः? इति चेत्, न। तस्यास्तद्विषयत्वेन तदधीननिरूपणत्वात्। औदासीन्यप्रच्युत्युपलक्ष्यमाणात्मव्यापारो हि भावना आशुतर[2]विनाशितयाऽन्योन्यं च तद्भेदात्तु भिद्यमाना अपि[3] न स्वरूपतो निरूप्यन्ते[4]। अपि तु तद्विषयधात्वर्थोपधानेन। न च प्रकृत्यर्थनिरपेक्षः केवलः स्वाऽर्थमभिधत्ते केवलस्याऽसाधुतया प्रयोगाऽनर्हत्वात्। प्रकृतिपरस्तु स्वाऽर्थमभिधत्तदर्थोपरक्तं भिन्नमेवाऽभिदधाती[5]ति भावनाभेदसिद्धिः। तस्मात् कृतानुबन्धे कृताऽवच्छेदे प्रत्ययार्थे प्रतीयमाने कृतशब्दान्तरत्वादनुबन्धा हि धात्वर्था भावनायाः। ते भिन्नधातुगोचरत्वाद्भिन्नाः सन्तो भावनामपि भिन्दन्तीत्यर्थः।

एवं हि भावना प्रतिधात्वर्थं न भिद्येत, यदि भावनाभिधायी प्रत्ययः प्रकृतिपरस्तां शुद्धामभिदध्यात्, न चैतदस्तीत्याह—शुद्धे भावनात्मन्यलभ्यमाने सति धात्वर्थविनियोगपरत्वाऽनुपपत्तेर्हेतोरेकस्यां स्वर्गभावनायां नानाधात्वर्थविनियोगाऽनुपपत्तेः। न जातु यागावच्छिन्नो भावनाभेदो दानाऽवच्छिन्नो भवितुमर्हति। ततश्च यदुक्तम् एकदेशिमतेऽपि पूर्वपक्षिणा।

---

१. स्वस्वार्थम् २ पु० पा०। २. स चाशुतर २ पु० पा०।
३. भिद्यमानोऽपि २ पु० पा०। ४. निरूप्यते १ पु० पा०।
५. अभिदधीत २ पु० पा०।

नानाधात्वर्थविनियोगपरत्वानुपपत्तौ नैकस्यां भावनायां नानाधात्वर्थविनियोजकाऽभावात्कृत्स्नो वेद एकं वाक्यमेकं चाऽपूर्वमिति। समिदादिषु त्वनन्यपरत्वात्।

तिस्र आहुतीरिति तु[1] स्वरूपपरत्वेऽपि संख्यातो भेदः। अकारणं

तदप्यस्मदुपन्यस्तपूर्वपक्षनिराकरणान्निरस्तं भवतीत्याह—नैकस्यां भावनायां नानाधात्वर्थविनियोगात्। कृत्स्नं चैकं वाक्यम् एवं चाऽपूर्वमिति कर्मभावनाभेदाऽनुविधायित्वादपूर्वभेदस्येति भावः।

एवं शब्दान्तरेण कर्मभेदं प्रतिपाद्येदानीमभ्यासेनाह—तत्र समिधो यजतीत्यादिषु पञ्चकृत्वोऽभ्यस्तो यजतिशब्दः, तत्र किमेका कर्मभावना आहोस्वित् पञ्चैवेति? किं प्राप्तम्? धात्वर्थाऽनुबन्धभेदेन भावनाभेदाऽभिधानात् धात्वर्थस्य च धातुभेदं विना भेदाऽनुपपत्तेः समिधो यजतीति प्रथमभावनावचनेन विहिता भावना विपरिवर्त्तमानोपरितनैरनूद्यते। न च प्रयोजनाऽभावादननुवादः। प्रमाणसिद्धस्याऽप्रयोजनत्वस्याऽपर्यनुयोज्यत्वात् अनेकाऽपूर्वकल्पनाप्रसङ्गादेकाऽपूर्वाऽवान्तरव्यापारमेकं कर्मेति।

एवं प्राप्तेऽभिधीयते—समिदादिषु त्वनन्यपरत्वाद् भेदः। इदमत्राकूतम्। परस्पराऽनपेक्षाणि समिदादिवाक्यानीति सर्वाण्येव प्राथम्यार्हाण्यपि युगपदध्ययनाऽनुपपत्तेः क्रमेणाऽधीतानि। न त्वयमेषां प्रयोजकः क्रमः। परस्पराऽनपेक्षाणामेकवाक्यत्वे हि स तथा स्यात्। अथ[2] प्राथम्याऽभावात्प्राप्तमित्येव नास्ति, कस्याऽनुवादः? कथंचित्परिवृत्तिमात्रस्यौत्सर्गिकाऽप्रवृत्तप्रवर्त्ततालक्षणविधित्वाऽपवादसामर्थ्याऽभावात्। गुणश्रवणे हि गुणविशिष्टकर्मविधिगौरवभयात्कर्माऽनुवादाऽपेक्षायां विपरिवृत्तेरुपकारः। यथा दध्ना जुहोत्यग्निहोत्रं जुहोतीति विहितहोमाऽनुवादेन दधिविधिपरे वाक्ये। न च गुणाद्भेदः। समिदादिपदानां कर्मनामधेयानां गुणवचनत्वाऽभावात् नामधेयानां च यजिसामानाधिकरण्येन तत्त्वात्तत्पारतन्त्र्येण व्यवस्थानात् नेह कर्मभेदसाधनत्वमिति न संज्ञातो विधिभेदः। तस्मादन्यपरत्वाभावादज्ञातकर्मप्रतिपादनपरत्वात्कर्माण्ययमभ्यासो भावनाऽनुबन्धभूतानि भिन्दानो भावनामपि भिनत्तीति सिद्धम्।

सम्प्रति सङ्ख्यातो भेदः प्रतिपाद्यते। तत्र तिस्र आहुतीर्जुहोतीत्येतदुदाहरणम्। तत्राऽयं विचार। किमाहुतिभावनेकैव विधीयते उत तिस्रः? इति।

---

१. य आहुतीः सप्त दशेति तु-मू० पु० पा०। २. अतः २ पु० पा०।

तर्हि तत् । न । तस्मिन्नसति संख्यायामभ्यासेनापि संपत्तेः ।

किं प्राप्तम् ? जुहोतीत्यस्य विधायकत्वात्तस्य चैकधात्वर्थविषयभावनाऽभिधायित्वादभ्यासस्य चाऽभावत्तिस्र इति चाऽऽहुतोरिति च बहुत्वसङ्ख्याया जुहोतीत्येतद्विहितैकहोमाभ्यासेनाऽप्युपपत्तेरनुबन्धभेदाऽभावात् एकैव भावनेति प्राप्तम् ।

एवं प्राप्तेऽभिधीयते—तिस्र आहुतीरिति स्वरूपपरत्वेऽपि सङ्ख्यातो भेदः । एतदाकूतम् । भवेदेतदेवं यदि जुहोतीत्येतावन्मात्रं विधायकं स्यात् । अपि तु वाक्यार्थस्य विधिविषयत्वात् पदार्थमात्रेण व्यवहारात् पदार्थाऽभिधानद्वारेण वाक्यमेव विधायकम् । तिस्र आहुतीर्जुहोतीत्येतच्च बहुत्वसङ्ख्यायुक्तमन्यतोऽप्रतीतं कर्मस्वरूपं विदधद् बहुत्वस्य नानात्वैकार्थसमवायनियमादेकस्मिंश्च तदनुपपत्तेरभ्यासाऽऽश्रयणे च जुहोतीति होमेनाऽभ्यासलक्षणापत्तेरनुबन्धभूतान् होमान् भिन्दत्तद्गोचरां भावनामपि भिनत्तीति सिद्धः सङ्ख्यातो भेदः ।

भाष्यकारेण तु दुरुपपादतया भीतिं मन्यमानेन सप्तदशप्राजापत्यान् पशूनित्युदाहृतमिति तदप्युपन्यस्तम् । तत्रेदं चिन्त्यते । किं प्रजापतिर्देवतैषामिति प्राजापत्या उत प्रजापतिर्देवताऽस्येति ? तत्र यदि कृतैकशेषस्य तद्धितोत्पत्तिर्यथा पूर्वः पक्षस्तथा सति सप्तदशपशूनामेको देवतासम्बन्ध इत्येकत्वाद्यागस्यैकैव भावना । अथ कृते तद्धिते पश्चादेकशेषः, यथा परः पक्षः, तथा सति प्रजापतिपशुसम्बन्धानां बहुत्वात्तावन्तो यागा इति तावन्त एव भावनाभेदा भवन्ति । तत्र किं प्राप्तम् ? कृतैकशेषस्य तद्धितसम्बन्ध इति । तथा सत्येकपूर्वं कल्प्येतैकत्वात् कर्मणः । कर्मभेदे तु बहून्यपूर्वाणि कल्प्येरन्निति ।

एवं प्राप्तेऽभिधीयते—सप्तदशेति स्वरूपरत्वेऽपि सङ्ख्यातो भेदः । इदमत्राकूतम् । औत्सर्गिकत्वादेकत्वसङ्ख्यायाः प्रजापतिर्देवताऽस्येत्यपि स्फुरति, अनेकाऽपूर्वकल्पनाभयाच्चैषामित्यपि । तदस्मिन्संशये प्रकृतिवद्विकृतिः कर्त्तव्येत्यर्थापत्तिपरिकल्पिताद्वाक्यशेषान्निर्णये सति अस्येत्येतदेव युक्तं नैषामिति । तथा हि । प्रकृतावग्नीषोमीये पशावेकादशाऽवदानानि विहितानि, तत्र चावत्तहृदयाद्यवदानद्वारेण पशोः साधनत्वमिति स्थितम्, तदिह प्रकृतिवदिति वचनेन प्रापयितव्यम्, तत्र यदि सप्तदशपशुद्रव्यक एको यागः तदाऽयमेकादशकोऽवदानगण एकस्मिन्यदि क्रियेत स एवैको यागसाधनमिति षोडश पशवो व्यर्था भवेयुः । अथ व्यासज्य क्रियेत तथाप्येकादशकोऽवदानगण एकादशपशून् व्याप्नोतीति षट् परे व्यर्थाः स्युः । न च प्रत्येकं सर्वेषु

गुणोऽपि पूर्वसंयोगात् विनियोगमात्रपरतां निवारयंस्तत्परतामेवाऽऽवहति ।

पशुष्ववदानगण इति युक्तम् । यागसाधनीभूतस्याऽवदानविधानात् । इह च सप्तदशानां साधनत्वं न[1] प्रत्येकं तदभावात् । प्रतिपशु तु यागभेदे प्रत्येकमवदानगण उपपद्यत इति तद्धितान्तस्य पश्वादेकशेष इति सङ्ख्यातोऽनुबन्धभेदाद्भावनाभेद इति सिद्धम् । ननु यदि स्वरूपपरत्वेऽपि सङ्ख्यात एव भेदः, अकारणं तर्हि स्वरूप[2]परत्वम् । उत्तरम्—न, तस्मिन् स्वरूपपरत्वे असति सङ्ख्यायाम् अभ्यासेनापि सम्पत्तेर्यत्परः शब्दः स शब्दार्थ इति स्वरूपपरत्वं चेन्न स्यात् न स्वरूपं शब्दार्थो भवेत् । ततश्चाऽभ्यासेनापि सङ्ख्या सम्पद्येत । होमावच्छिन्नभावनास्वरूपप्रतिपादनपरत्वे तु तिस्र आहुतीर्जुहोतीत्यस्य तस्यैवाऽभिधेयत्वात् तत्परत्वाच्छब्दस्य अभ्यासस्य च ततोऽन्यत्वात् तल्लक्षणायां स्वरूपपरत्वं सति सम्भवे शब्दो न जह्यात् । तस्मात्स्वरूपपरत्वस्याऽभ्यासलक्षणनिराकरणद्वारेणास्ति संख्याहेतुकेऽपि भेदे न रूपयोग इत्येवार्थः[3] ।

पूर्वकर्माऽसम्भविनो गुणादपि भेद इत्याह—गुणोऽपीत्यादिनाऽऽवहतीत्यन्तेन । इदमाम्नायते । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति । अत्र वैश्वदेव्यामिक्षेति च द्रव्यदेवतासम्बन्धाऽनुमितो यागो विधीयते । तदनन्तरं चेदमाम्नायते वाजिभ्यो वाजिनमिति । तत्र सन्दिह्यते । किं पूर्वस्मिन्कर्मणि वाजिनं गुणो विनियुज्यते, उत कर्मान्तरं द्रव्यदेवताविशिष्टं विधीयते ? किं प्राप्तम् ? द्रव्यदेवतान्तरविशिष्टकर्मान्तरविधौ विधिगौरवप्रसङ्गात्कर्मान्तराऽपूर्वकल्पनागौरवप्रसङ्गाच्च न कर्मान्तरम्, अपि तु पूर्वस्मिन् कर्मणि वाजिनद्रव्यनियोग इति । न चोत्पत्तिशिष्टाऽऽमिक्षागुणाऽवरोधात्तत्र वाजिनमलब्धाऽवकाशं कर्मान्तरं गोचरयतीति साम्प्रतम् । उभयोर्वाक्ययोः समसमयं प्रवृत्तेः आमिक्षावाजिनयोरुत्पत्तौ समं शिष्यमाणत्वात् न उत्पत्तिशिष्टत्वमामिक्षायाः सम्भवति । ततः कथमेतया विरुध्यते वाजिनम् ? न च वैश्वदेवीत्यत्र श्रौत आमिक्षासम्बन्धो विश्वेषां देवानां वाजिभ्यो वाजिनमिति वाजिनसम्बन्धाद्वाक्यगम्याद् बलीयानिति वाच्यम् । उभयोरपि पदान्तरसापेक्षप्रतीतयोर्वाक्यगम्यत्वस्याऽविशेषात् । न खलु वैश्वदेवीत्युक्ते विनाऽऽमिक्षापदमामिक्षामध्यवस्यन्ति श्रोतारः । भवतु वा श्रौतत्वं तथापि वाजिनम् इति पदं वाजमन्नमामिक्षा तदेषामिति व्युपत्त्या तत्सम्बन्धिनो विश्वान्

---

१. साधनत्वेन १ पु० पा० । २. तत्स्वरूप २ पु० पा० ।

३. हेतुकोऽपि भेदोपयोग इत्यर्थः २ पु० पा० ।

संज्ञाऽपि पूर्वबुद्धिविच्छेदेन सहस्रदक्षिणत्वादिगुणविनियोगमात्रविरोधेन अपूर्वबुद्धिप्रसूता[1] च तदेवानयति।

देवानाह। ततश्चाऽऽमिक्षासम्बन्धोपजीवनेन विश्वेभ्यो देवेभ्यो वाजिनं विधीयमानं नाऽऽमिक्षया बाध्यते अपि तु तया सह समुच्चीयत इति न कर्मान्तरम्, किं तु पूर्वस्मिन्नेव वाजिनगुणविनियोग इति प्राप्तम्।

एवं प्राप्तेऽभिधीयते—गुणोऽपि पूर्वसंयोगात्[2] विनियोगमात्रपरतां निवारयंस्तत्परतामावहतीति। इदमत्राकूतम्। भवेदेतद् यदि वैश्वदेवीति तद्धितश्रुत्या नाऽऽमिक्षाऽभिधीयेत, तद्धितस्य त्वस्येति सर्वनामार्थे स्मरणात्संनिहितस्य च विशेषस्य सर्वनामार्थत्वात् तत्रैव तद्धितस्यापि प्रवृत्तिर्न विश्वेषु देवेषु न तत्सम्बन्धे नापि तत्सम्बन्धमात्रे। नन्वेवं तर्हि कस्माद्वैश्वदेवीशब्दमात्रादेवाऽऽमिक्षां न प्रतीमः, किमिति वाऽऽमिक्षापदमपेक्षामहे? तद्धितान्तस्य पदस्याऽभिधानाऽपर्यवसानान्न प्रतीमः, तत्पर्यवसानाय चापेक्षामहे। अवसिताभिधानं हि पदं समर्थमर्थधियमाधातुं संनिहितविशेषाऽभिधायि तत्संनिधिमपेक्षमाणं तत्संनिधापकमामिक्षापदमपेक्षत इति। कुत आमिक्षापदादेव वैश्वदेवीपदादामिक्षाप्रत्ययप्रसङ्गः, कुतो वा तदनपेक्षा? अतश्च सत्यामपि पदान्तराऽपेक्षायां यत्पदमेव पदान्तराऽनपेक्षमभिधत्ते तत्प्रमाणभूतप्रथमभाविपदावऽगतत्वाच्छ्रौतं बलीयश्च। यत्तु पर्यवसिताऽभिधानपदाऽभिहितपदार्थाऽवगमनं चरमप्रतीतवाक्याऽवगम्यं दुर्बलं चेति तद्धितश्रुत्याऽवगतामिक्षालक्षणगुणाऽवरोधात्पूर्वकर्माऽसंयोगि वाजिनं तत्र स्वविनियोगं विनिवारयत् स्वगोचरकर्मान्तरस्वरूपविधानपरतामेवावहति। न च नित्याऽवगतनिरपेक्षसाधनभावाऽऽमिक्षा वाजिनेन सह विकल्पसमुच्चयौ सहते। न चाऽश्वत्वे निरुढवृत्तिर्वाजिशब्दः कथंचिद्योगेन सापेक्षवृत्तिर्विश्वेषु देवेषु व्याख्यातुमुचितः। प्रामाणिके च विधिकल्पनागौरवे अभ्युपेतव्य एव न त्वविषयत्वात्प्रमाणस्येति सिद्धो गुणाद्भेदः।

उद्देशक्रमस्याऽविवक्षित्वात् तदनुरोधेन सम्प्रति संज्ञाभेदमाह—संज्ञापीत्यादिना, नयतीत्यन्तेन। अथैष ज्योतिरथैष विश्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति। तत्र संदेहः। किं यजेतेति संनिहितज्योतिष्टोमाऽनुवादोऽयं सहस्रदक्षिणलक्षणगुणविधानायाऽथ वा गुणविशिष्टं कर्मान्तरं विधीयते? इति। किं प्राप्तम्? ज्योतिष्टोमस्य प्रकरणाद् गुणमात्रविधौ लाघवात् ज्योतिःशब्दस्य च वसन्ते वसन्ते ज्योतिषेति ज्योतिष्टोमे प्रयोगदर्शनात् नामैकदेशेन च नामोपलक्षणस्य लोके सिद्धत्वात् भीमसेनोपलक्षणभीमशब्द-

---

१. प्रसूत्या मू० पु० पा०। २. पूर्वासंयोगी २ पु० पा०।

प्रकरणान्तरमपि अन्यबुद्धिविच्छेदात्तात्पर्य्यायैव व्याप्रियते ।

वत्, अथशब्दस्य चाऽऽनन्तर्यार्थत्वात् असम्बन्धे च तदनुपपत्तेर्द्वादशशतदक्षिणायाश्चोत्पत्त्यशिष्टत्वात् तथा च समशिष्टतया तथा सहाऽस्य विकल्पोपपत्तेः प्रकृतस्यैव यागस्य सहस्रदक्षिणलक्षणगुणविधानार्थमनुवादोऽयं न कर्मान्तरमिति प्राप्ते उच्यते—

संज्ञाऽपि पूर्वबुद्धिविच्छेदेन सहस्रदक्षिणत्वादिगुणविनियोगमात्रविरोधेनाऽपूर्वबुद्धिप्रसूता च तदेवाऽऽनयति । अयमर्थः । भवेत्पूर्वस्मिन् गुणविनियोगो यदि तदेव प्रकरणं स्यात्, विच्छिन्नं तु तत् । तथा हि । संनिधावपि पूर्वाऽसम्बद्धार्थं संज्ञान्तरं प्रतीयमानं पूर्वकर्म्मबुद्धिं व्यवच्छिनत्ति, अपूर्वबुद्धिं च प्रसूत इति लोकसिद्धम् । न जातु देवदत्ताय देहि गाम् अथ देवाय स्वर्णमिति देवशब्दादपि देवदत्तं स्वर्णभाजमवगच्छन्ति जनाः । तथा चोपरिष्टाद्यजेतेति श्रूयमाणमप्यसम्बद्धार्थशब्दव्यवायात् तद्बुद्धिमनादधत्तत्र गुणविनियोगमात्रासमर्थं कर्मान्तरमेव गुणविशिष्टं विधत्ते । न चैकत्राऽनुपपत्त्या कथंचिल्लक्षणया ज्योतिःशब्दो ज्योतिष्टोमे प्रवृत्त इत्यत्रापि सति सम्भवे तत्रैव प्रवर्त्तनीयः । न जातु गङ्गायां घोष इत्यत्र गङ्गाशब्दो जघन्यवृत्तिरिति गङ्गायां मत्स्य इत्यत्रापि तथा । एवं चाथऽशब्दोऽधिकारार्थः प्रकरणान्तरतामेव द्योतयिष्यतीत्येषशब्दश्चाऽधिक्रियमाणपरामर्शायोपपद्यत इति सिद्धः संज्ञान्तराद्भेदः ।

सम्प्रति प्रकरणाद्भेदमाह—प्रकरणान्तरमिति । कुण्डपायिनामयने मासमग्निहोत्रं जुहुतीति समाम्नायते । तत्रैवं विचारणा, किमयं नैयमिकमग्निहोत्रमनूद्य मासलक्षणो गुणो विधीयते, उत कर्मान्तरमेव ? तत्राऽग्निहोत्रशब्दस्य नैयमिकाऽग्निहोत्रवचनत्वात्कर्मान्तरे चाऽप्रसिद्धेस्तद्वाचकत्वे चान्याय्याऽनेकार्थत्वापत्तेः लक्षणायां[1] च सति सम्भवे श्रुतिपरित्यागप्रसङ्गात् जुहुतीति च होमत्वसामान्यमात्राऽनुवादसम्भवेन विशेषाकाङ्क्षायामग्निहोत्रेण विशेषणेऽपि हविषेवार्त्तेरवाक्यभेदात् जुहुतीति च कर्तृबहुत्वेऽपि कर्मणस्तादवस्थ्येन प्रत्यभिज्ञानाऽविनाशात्तत्रापि च नैयमिके यावज्जीवश्रुतिविरोधेन मासपदार्थेऽन्वयाऽनर्हतया[2] सायंप्रातर्निर्वर्त्तनीयकाम्याग्निहोत्राऽनुवादेन तदभ्यासस्य मासविधि[3]रिति प्राप्ते उच्यते । प्रकरणान्तरमन्यबुद्धिव्यवच्छेदात्तात्पर्यायैव व्याप्रियते । इदमत्राकूतम् । स्यादेतदेवं यदि कर्मणि कालो

---

१. लक्षणया च २ पु० पा० । २. पदार्थाऽनन्वयादन्वयार्हतया २ पु० पा० ।
३. विधिविधानम् २ पु० पा० ।

सन्निधौ तु तदविच्छेदान्न तात्पर्य्यमित्यविच्छेदः । एवं च कर्म्मणो

विधीयेत । न त्वसावनुपादेयतया विधानमर्हति, किं तु काले कर्म विधेयम्, विधेयं चेत् कथं नाऽन्यत् ? अप्राप्तगोचरत्वाद्विधेः । सायंप्रातरग्निहोत्रं जुहोतीत्यत्राप्ययं प्रसङ्ग इति चेत् न । तत्प्रकरणवर्त्तितया स्फुटतरेणाऽग्निहोत्रप्रत्यभिज्ञानेनौत्सर्गिककर्मस्वरूपपरताऽपवादेन सायमादिविनियोगमात्रपरत्वात्तस्याः । अस्य तु प्रकरणान्तरसमाम्नायेन[1] तद्बुद्धिविच्छेदादपवादाऽभावेनौत्सर्गिकाऽप्राप्तेः कर्मस्वरूपविषयत्वस्याऽपनेतुमशक्यत्वात् नाम्नश्च विधिविषया[2]ऽवच्छेदकतया विधीयमानबहुकर्तृकपूर्वाऽपरभूताऽख्याताऽर्थप्रत्यभिज्ञापनाऽसामर्थ्यात्तदनुरोधेन व्यवस्थितेर्मुख्यतया च परशब्दस्य परत्र वृत्तेरनुपपत्तेरनुरूपकर्मान्तराऽपेक्षितनैमित्तिकाऽग्निहोत्रधर्मसंपत्त्यै जघन्याऽपि वृत्तिरुपपत्स्यते । तस्मात्प्रकरणान्तरमपि विधीयमानात् कर्मणो यदन्यद्विहितं तद्बुद्धिविच्छेदाद्धेतोस्तात्पर्याय तदेव कर्मस्वरूपं परं प्रधानं यस्य विधिवाक्यस्य तत्परं तस्य भावस्तत्त्वं तस्मै व्याप्रियते इति सिद्धं कर्मान्तरत्वमिति ।

यत्र तु न प्रकरणान्तरत्वमेवंविधे विषये तत्र न कर्मस्वरूपे तात्पर्यम्, अपि तु विनियोगमात्रपरतैवेत्याह--सन्निधौ तदविच्छेदात् प्रत्यभिज्ञानाऽविच्छेदात् न तात्पर्यं न स्वरूपपरत्वमित्यविच्छेदो विनियोगमात्रपरत्वम् । तद्यथा अवेष्टिं प्रकृत्येदमाम्नायते एतयाऽन्नाद्यकामं याजयेदिति । तत्र संदेहः । किमवेष्टिः कर्मान्तरमेतत्फलं प्रति विधीयते उत फले विनियोगमात्रमेतत् ? इति । किं प्राप्तम् ? फलस्योद्देश्यतया तद्विधानाऽनुपपत्तेस्तत्र कर्म विधातव्यम् । द्वयोरुद्देश्ययोर्मिथः संवन्धाऽभावात् । विधीयते चेत् कर्मान्तरमिति प्राप्तेऽभिधीयते । सत्यमप्रत्यभिज्ञायामेवमिह त्ववेष्टिसंनिधौ तत्पाठात् स्फुटतरं तत्प्रत्यभिज्ञानमपवादकमौत्सर्गिककर्मस्वरूपपरत्वं विघटयद्विनियोगमात्रपरतामापादयतीति सिद्धमस्य प्रकरणान्तरप्रत्युदाहरणत्वमिति दर्शिता षट्प्रमाणी कर्मस्वरूपपरतायाम् ।

यद्येषा कर्मस्वरूपपरत्वप्रतिपादनी कथं तर्हि भेदो लक्षणार्थः ? इत्यत आह—एवं च कर्मणो विधेयत्वं तद्भेद उपोद्घातः । यद्यपि भेद एव लक्षणार्थः, तथाप्यस्यैव स्वरूपपरत्वप्रतिपादनमन्तरेणाऽशक्या प्रतिपत्तिरित्युक्तम् । अतः प्रकृतभेदसिद्ध्यर्थमुपोद्घातः षट्प्रामाण्याः स्वरूपपरत्वं वोधयन्नधिकरणसिद्धान्तन्यायेन भेदप्रतिपाद्यत इति भेदोऽविलक्षणार्थः ।

---

१. समाम्नानेन २ पु० पा० । २. विषयत्व २ पु० पा० ।

विधेयत्वं तद्भेदोपोद्घातः। विनियोगपरता तु तृतीये वक्ष्यते। न हि श्रुत्यादि मात्रात्तादर्थ्यमित्युक्तम्। न चाऽनाश्रिताऽनुष्ठानं तत्। अनुष्ठानं च विधेः। तदपि तर्हि विवक्षितम्। सत्यम्। प्रयोगविधेस्तत्सिद्धेर्विनियोगमात्रपरमेतत्।

एवं तावदुत्पत्त्यर्थतां विधेर्द्वितीयाध्यायगोचरं दर्शयित्वा इदानीं विनियोगार्थतां तृतीयाध्यायविषयमादर्शयति—विनियोगपरता तु विधेस्तृतीयलक्षणे चिन्त्यते। ननु चिन्त्येतैवं यदि विधिर्विनियोजकः स्यात्। न त्वयं तथा, श्रुत्यादीनामेव विनियोजकत्वात्। उक्तं हि श्रुत्यादीनि च विनियोगे कारणानीत्यत आह—न हि श्रुत्यादिमात्रात्तादर्थ्यमित्युक्तम्। न खल्वत्र संबन्धमात्रं चिन्त्यतेऽपि तु पारार्थ्यम्, यथाह 'अथातः शेषलक्षणं,' 'शेषः परार्थत्वा'दिति। न च तच्छ्रुत्यादिमात्रगोचरो ग्रामं गच्छन् वृक्षमूलान्युपसर्पति। प्रयाजशेषेण हवींष्यभिघारयतीत्यादिषु तेषां दृष्टव्यभिचारतया परार्थत्वं प्रति प्रामाण्याऽभावात्। तथा च व्रीहीनवहन्तीत्यादावपि भावना स्वभावेन भाव्यमपेक्षमाणापि समानपदोपादानाऽवघातत्यागेन व्रीहिरूपं गृह्णीयात्। दवीयसी त्वस्याऽपूर्वसाधनभावावस्था तपस्विनीति कर्तृसमीहितसाधनतात्मा विधिरवहन्त्यादौ प्रतीयमानः समीहितं भाव्यमुपस्थापयत्संनिहितमप्यसमीहितत्वादवघातं हित्वा व्रीहीनुपसर्पयति। तानपि चोपसृत्य तद्रूपस्याप्यसमीहितत्वात्तन्मात्रेऽपर्यवस्यत्समीहितोपायक्रतुसाधनीभूतपुरोडाशप्रकृतित्वाऽवस्थामस्याऽवश्यमालम्बते, तत्साधनत्वं चाऽवघातस्याऽवगमयति। एवं च यवेष्वप्यौपदेशिक एवाऽवघातः सिद्धो भवति। साधनीभूतपुरोडाशप्रकृतित्वस्योभयत्राऽविशेषात्। तद्विधौ सति तादर्थ्यं न श्रुत्यादीनामित्युक्तमधस्तात् इत्यर्थः।

ननु मा भूच्छ्रुत्यादिमात्रात्तादर्थ्यं प्रधानविधिरेवत्ववघातादिषु प्रत्यभिज्ञायमानो विनियोगसिद्ध्यन्यप्रयोजनत्वाऽभावात्साक्षाद्विध्यविषयानप्यपूर्वसाधनीभूतक्रत्वपेक्षितानन्तरादृश्यमानतुषविमोचनलक्षणकार्यतया तद्विषयाऽनुप्रवेशिनोऽवघातादीनैदमर्थ्यं नयन् तत्सिद्धार्थतयोपादीयमानतया विधास्यतीति कृतमवघातादिष्ववान्तरविधिनेति शङ्कामपनेतुमाह—न चाऽनाश्रिताऽनुष्ठानं तत्तादर्थ्यम्। न खल्ववघातादय इत्येव प्रधानार्थाः किं तु तदर्थमनुष्ठीयमानाः। कस्मात्? तादर्थ्यमनुष्ठानमात्रं श्रिताः।

अस्त्वेवं तथापि प्रकृते किमायातम्? इत्याह—अनुष्ठानं च विधेः। साक्षादवहन्तिविषयाऽवान्तरविधेः। अत्रेदमाकूतम्। अपूर्वविधिपक्षे हि सर्वेषां प्रक्रिया घटितापि, न त्वपूर्वविधिरिति निवेदितमधस्तात् नियोग-

यथोक्तम् एवं सत्यङ्गविधिरनुवादः, न चाऽविहितमङ्गं भवतीत्यङ्गत्वाय विधातव्यमिति ।

परीक्षायाम् । कर्तुरपेक्षितोपयतया तु विधौ सर्वमिदमिन्द्रजालप्रतिमम् । न हि प्रधानविधिप्रत्यभिज्ञानमवहन्त्यादिषु समिदादिष्विव समस्ति । न खलु य एव दर्शपूर्णमासयोः समीहितं फलं प्रति साधनताविधिः स एवाऽवहन्त्यादीनामपि समीहितं फलवत्करणोपकारं प्रति साधनता विधिः संभवति । परस्परपरिहारस्थितिलक्षणविरोधात् । तद्यदि प्रधानविधिरभ्युपेयेताऽवहन्त्यादिषु ततोऽवहन्त्यादीनामाग्नेयादीनामिव प्रधानभावापत्तेर्न प्रधानार्थतालक्षणं शेषत्वं स्यादिति तत्सिद्ध्यर्थमवान्तरविधिरवघातादिषु समिदादिष्विवाऽभ्युपगन्तव्यः । एवं चाऽवहन्त्यादीनामपि साक्षाद्विधिगोचरतया विधेयत्वं न पुनः कथंचिद्विधिसिद्ध्यर्थतयोपादीयमानतया कल्पितं भविष्यति । न च यस्य सिद्धि[1]रेव प्रयोजनं स विषय इत्यपि युक्तम्, अस्मन्मते विषयैकदेशेऽप्यप्रवृत्तेः विरुद्धतयाऽस्य तल्लक्षणत्वाऽयोगात् । तथा हि । प्रधानस्यापि न विधिसिद्धिमात्रमपि प्रयोजनम्, अपूर्वाऽवान्तरव्यापारस्य तस्य फलसिद्धिप्रयोजनत्वात्प्रागेव पुनरेवकारार्थः । तस्मात् विधिविषयतया समिदादेरवघातादीनामविशेषेऽप्यपूर्वान्तरव्यापारयोगलक्षणो[1] विशेषोऽवगन्तव्यः । इदमेव च विशेषमाह स्म महर्षिः 'तानि द्वैध'मिति । तेनाऽनुष्ठानाऽवगमाद्विधिमन्तरेण च तदनुपपत्तेरवघातादिषु चाऽवान्तरविधिसिद्धिः ।

यद्येवं तदप्यनुष्ठानमपि तर्हि विवक्षितं, तथा च व्रीहीनवहन्तीत्यादिषु व्यवस्थिताद्विपरीतता व्याहन्येत । उत्तरम्—सत्यम् । प्रयोगविधेः पौर्णमास्यां पौर्णमास्यां यजेतेत्यादेस्तत्सिद्धेः अनुष्ठानसिद्धेः विनियोगमात्रपरमेतत् व्रीहीनवहन्त्यादिवाक्यम् । मात्रग्रहणं च शङ्कितत्वात् प्रयोगं व्यवच्छिनत्ति, न पुनरुत्पत्तिम् । व्यवस्थापिततद्विधिपरत्वव्याहतितादवस्थ्यात् । एददुक्तं भवति । सर्वस्यैव विधेश्चातूरूप्यान्नोत्पत्तिविनियोगपरताऽपि तु विधिवाक्यनान्तरीयकतया प्रयोगः प्रतीयमानोऽन्यतस्तत्सिद्धेरविवक्षितोऽस्ति । ननु नास्ति, अस्ति चेत्कथमवान्तरश्रुत्यादीनि च विनियोगे कारणानीत्यत आह—न हि श्रुत्यादिमात्रात्तादर्थ्यमित्यविधौ न प्रमाणमिति सिद्धाववघातादिष्ववान्तरविधिः । तत्राऽवहन्त्यादौ सत्यवान्तरविधावन्यतः प्रयोगसिद्धेः तदविवक्षेत्यत्राऽऽचार्यवचनमुपनस्यति—यथोक्तम् एवं हि सत्यङ्गविधिरनुवादः प्रयोगस्येति तस्याऽन्यतः सिद्धेरवघाताद्यङ्गविनियोगाय त्ववान्तरविधिरास्थातव्य इति ।

---

१. विधिसिद्धिः २ पु० पा० ।

तत्र श्रुत्यादिनिबन्धनत्वाद्विनियोगस्य प्रवर्त्तनमात्रत्वाद्विधेर्द्रव्यादिष्वेव शेषत्वमिति विधिरविनियोजक इति पूर्वपक्षयित्वा प्रवर्त्तनारूपमप्यविनियोजकत्वे दुर्ल्लभमिति। असाधकं तु तादर्थ्यादिति वक्ष्यमाणरीत्या विनियोगशक्तिरुक्ता।

आचार्यवचनमेव पठति—न चाऽविहितमङ्गं भवतीति अङ्गत्वाय विधातव्यमिति। तत्र भगवतो महर्षेरथातः शेषलक्षणमित्युपक्रम्य प्रथममेव बादर्यधिकरणं प्रणयतो विध्यधीनमेव पारार्थ्यं लक्षणार्थश्च संमतमित्याह—तत्रेत्यादिनोक्तेत्यन्तेन। अत्र दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवमाद्यमुदाहरणम्। इह हि स्वर्गस्तत्का श्च यागश्चाऽवगम्यते। तेषामन्योन्यस्य शेषशेषिभावोऽस्ति न वेति विचार्यते। तत्र श्रुत्यादिनिवन्धनत्वाद्विनियोगस्य। तथा हि व्रीहीनिति द्वितीयाश्रुतिरीप्सिततमत्वं व्रीहीणामभिदधती तादर्थ्यं प्रोक्षणलक्षणस्य संस्कारस्याऽवगमयति। एवमेकहायन्येति चारुणयेति च द्रव्यगुणयोः क्रियां प्रति तादर्थ्यं करणविभक्तिरिति युज्यते द्रव्यगुणसंस्काराणां शेषत्वं प्रमाणसद्भावात्। यागस्वर्गतत्कामानां तु शेषत्वेन श्रुत्यादीनामन्यतमत्प्रमाणमस्ति।

ननु मा भूवन्नन्यानि प्रमाणं विधिस्तु भविष्यतीत्यत आह—प्रवर्त्तनामात्रत्वाद्विधेः। विधिश्रवणसमनन्तरं पुरुषप्रवृत्तिदर्शनात्। प्रवर्त्तनामात्रं विधिरित्यस्ति प्रमाणम्, न पुनरयं विनियोजक इति। तस्माद् द्रव्यादिष्वेव शेषभावो न स्वर्गयागपुरुषेष्विति विधिरविनियोजक इति पूर्वपक्षयित्वा प्रवर्त्तनारूपमपि अविनियोजकत्वे दुर्लभमित्यसाधकं तु तादर्थ्यादिति वक्ष्यमाणनीत्या विनियोगशक्तिरुक्ता विधेः। एददुक्तं भवति। सत्यं प्रवर्त्तनारूपो विधिः। तद्रूपतैव तस्य विनियोजकत्वमन्तरेण दुर्लभा। न खलु कर्त्रपेक्षितोपायत्वमन्तरेण प्रयोजकत्वमिति निवेदितमधस्तात्, वक्ष्यामश्चात्रैव व्याचक्षाणाः स्वर्गकामाधिकरणमसाधकं तु तादर्थ्यादिति। एवं चेत्स्वर्गकामो यजेतेति लिङो विध्युपरक्ता भावना गम्यमाना तदुपरागवशादेव समानपदोपादानमपि दुःखाकरं कर्मकर्तृसमीहाऽनास्पदत्वादपहाय भिन्नपदोपादानमपि पुरुषविशेषणमपि समीहिततत्वाद्भाव्यस्वर्गं गृह्णीयात्। लब्धसमीहितभाव्या चोपायमपेक्षमाणा विधिवशादेव समीहितोपायतायां कर्म निवेशयतीति कर्मणः फलार्थत्वं विनियोगं कोऽन्यो विधेर्विधातुमर्हति। तदिदमुक्तं कर्माण्यपि जैमिनिः फलार्थत्वादिति। स एव च कर्तृसमीहितोपायतारूपः फलगोचरां कर्तृसमीहामुद्वहन् फलस्य चाऽकर्तृतायां समीहाऽनुपपत्तेस्तादर्थ्यमवबोधयति। न जातु कश्चिच्चेतनः कामयते स्वर्गं आत्मानं लभतामिति, अपि तु मदनु-

विधिश्चेद्विनियोजकोऽकारणं श्रुत्यादीनीत्याशङ्क्योत्तरत्र श्रुत्यादि-सापेक्षत्वमभिहितम् ।

चतुर्थे त्वनुष्ठानाङ्गताऽङ्गपरिमाणचिन्ता ।

कथम् ? [1]क्रतुविध्यनुष्ठानाऽधीनः क्रत्वर्थः, पुरुषेच्छानिबन्धनप्रवृत्तिः

कूलो भवेदिति । अनुकूलवेदनीयतैव हि काम्यानां काम्यता, प्रतिकूलस्वरूप-वेदनीययोर्द्विषोपेक्षाऽऽस्पदत्वात् । अतः फलस्यास्ति पुरुषं प्रति ऐदमर्थ्यम् । तदुक्तं फलं च पुरुषार्थत्वादिति । एवं स एव विधिः कर्त्रंशमुद्वहन् यस्यैव फलं प्रति प्राधान्यम् अधिकारिता पुरुषस्य तस्यैव तदुपाये कर्मणि कर्तृतया कारकतया कर्म प्रति पारार्थ्यं प्रतिपादयति । तदेतदुक्तं पुरुषश्च कर्मार्थत्वा-दिति । तस्मान्महर्षेरपि संमतमेतदिति सिद्धम् ।

नन्वेवमेतेनैवाधिकरणेनाऽऽरब्धेन विनियोगस्य विचारितत्वात् लक्षणार्थपरिसमाप्तेर्व्यर्थ उत्तरः प्रपञ्च इत्याशङ्कामपनयति—विधिरित्या-दिनाऽभिहितमित्यन्तेन । अयमर्थः । सत्यमनेन विधिनिबन्धनो विनियोगो विचारितो न त्वेतावता लक्षणार्थपर्यवसानम् । उपरितनस्याशङ्कोत्तरत्वात् । तथा हि । विधिश्चेत् विनियोजकः तत एव विनियोगसिद्धेः श्रुत्यादीनां च सम्बन्धमात्रहेतुत्वात्तादर्थ्यं प्रति व्यभिचारादकारणं तानीति शङ्कितम् । तत्रोत्तरम् । सत्यं, विनियोजको विधिस्तथापि नाऽसहायो विनियोक्तुमुत्सहते । न जातु विनियुञ्जानोऽपि विधिः प्रोक्षतीति च व्रीहीनिति सिद्धाऽनुगुणत्वं श्रुतिमन्तरेण व्रीहिषु प्रोक्षणं यजेतेति च पशुकाम इति विधिः पूर्वसिद्धाऽनु-गणत्वमन्तरेण पशुफलयागम् अभिघारयति च प्रयाजशेषेणेति विपरीतमपि श्रुतिमन्तरेण प्रयाजशेषेऽभिघारणं विनियोक्तुमर्हति । तस्माद्विनियोजकोऽपि श्रुत्यादीन्सहायतयाऽपेक्षत इति तदपेक्षोत्तरेण प्रपञ्चेन प्रतिपादितेति सिद्ध-मर्थवत्त्वम् ।

एवं तृतीये श्रुत्यादिसहायविनियोगं व्युत्पाद्य तदङ्गभावे सिद्धे चतुर्थेऽनुष्ठानगताङ्गपरिमाणचिन्ता । अयमर्थः । प्रवर्त्तनात्मकत्वाद्विधेरनुष्ठा-पकत्वं प्रसिद्धं लोकवेदयोरिति तत्स्वरूपमविचारणीयम् । अतोऽनुष्ठान-गताऽङ्गपरिमाणचिन्ताऽधिक्रियते कियन्त्यङ्गानि विधिनाऽनुष्ठाप्यन्ते कियन्ति निमित्तान्तरादित्येतावतापि विध्यधीनमनुष्ठानं चिन्तितं भवत्येव ।

नन्वथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति प्रतिजानानः सूत्रकारः क्रत्वर्थ-पुरुषार्थचिन्तामध्यायार्थमाह नाऽनुष्ठानगताङ्गपरिमाणचिन्तामित्याशय-

१. पृथगुपादानम् मू० पु० पा० ।

पुरुषार्थः। तत्र कस्य क्रतुविधितोऽनुष्ठानम्, कियत्यनुष्ठापनव्यापारः क्रतुविधेः, कस्य वाऽनपेक्षिततद्विधिनिमित्तान्तरतः पुरुषस्येति प्रयोजकाऽप्रयोजकचिन्ताऽपि क्रत्वनुष्ठानविधिव्यापारपरिमाणमवधार्य्यते।

तथाहि। आमिक्षार्थत्वेन चातुर्म्मास्यप्रयोगविधिर्द्दध्यानयनमनुष्ठा-

वानाक्षिपति—कथम्? उत्तरम्—क्रतुविध्यधीनाऽनुष्ठानः क्रत्वर्थः। पुरुषेच्छानिबन्धनप्रवृत्तिः पुरुषार्थः। क्रतुना हि विधिविषयेण विषयी विधिरूपलक्ष्यते तेनार्थ्यमानानि अनुष्ठाप्यमानानीति तस्यार्थः। ततो विध्यधीनोऽनुष्ठानो भवति क्रत्वर्थः। एवं पुरुषेणापि स्वसंवन्धे निमितान्तरं वा विधेरन्यदुपलक्ष्यते तेनार्थ्यमानान्यनुष्ठाप्यमानानीति तस्यार्थः। ततः पुरुषेच्छानिवन्धनप्रवृत्तिः पुरुषार्थः।

सूत्रपदार्थं व्याख्याय चिन्तायास्तदारूढतामाह—तत्र कस्य क्रतुविधितोऽनुष्ठानम्?। एतदेव स्फोरयति—कियत्यङ्गजातेऽनुष्ठापनव्यापारः क्रतुविधेः कस्य वाऽनपेक्षिततद्विधिनिमित्तान्तरतः पुरुषस्याऽनपेक्षितता। तद्विधिविषयं निमित्तान्तरं पुरुषसंबन्धि तस्मात्। अतो न प्रतिज्ञासूत्रव्याघात इत्यर्थः। ननु मा भूत्प्रतिज्ञासूत्रव्याघातः, प्रयोजकाऽप्रयोजकचिन्तात्वनुष्ठानगताङ्गपरिमाणचिन्तया कथं न विरुद्धयते? इत्यत आह—प्रयोजकाऽप्रयोजकचिन्तयापि क्रत्वर्थाऽनुष्ठानविधिव्यापारपरिमाणमेवाऽवधायते। क्रत्वनुष्ठाने यो विधिः तस्येयति व्यापारो नेयतीति व्यापारपरिमाणम्, तदेवाऽवधार्यते इत्यर्थः। तदवधारणमेव सोपपत्तिकमुदाहरति—तथा हीति। चातुर्मास्येषु वैश्वदेवे समाम्नायते। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति। तत्रैते द्वे कर्मणी एकत्राऽऽमिक्षा हविर्विश्वेदेवा देवता, अन्यत्र तु हविर्वाजिनं वाजिनो देवता। इह हि दध्यानयनमवगतम्, तत्र संशयः। किमयं चातुर्मास्यप्रयोगविधिरुभयार्थमपि दध्यानयनं प्रयोजयति, आहो स्विदामिक्षार्थमिति? तदर्थमयं कारणसंशयः किमामिक्षा दधिसंयुक्तं पय एव, किं वाऽर्थान्तरं पयसः? इति। किं प्राप्तम्? रूपसंस्थानव्यपदेशलिङ्गभेदात्सेति च सर्वनाम्नोऽथैष ज्योतिरितिवद्वक्ष्यमाणाऽपेक्षयाऽप्युपपत्तेर्वाजिनवदर्थान्तरमामिक्षा दधिसंयुक्तात्पयसः। दध्यानयनात्पुनरेतदुभयमपि वाजिनमामिक्षा च निष्पद्यते। द्वयमपि च चातुर्मास्यप्रयोगवचनगृहीतकर्मद्वयसाधनमिति मिथुनमपि चातुर्मास्यविधिरविशेषेण प्रयोजयतीति प्राप्तम्। एवं प्राप्तेऽभिधीयते। आमिक्षार्थत्वेन चातुर्मास्यप्रयोगविधिर्दध्यानयनमनुष्ठापयति, न वाजिनार्थतया तदर्थाऽनुनिष्पन्नस्यैव तदनुप्रवेशित्वात्। अयमभिसन्धिः। स्यादेतदेवं यद्यामिक्षा

पयति न वाजिनार्थतया, तदर्थाऽनुनिष्पन्नस्यैव तदनुप्रवेशित्वात् ।

एवं क्रयार्थनयननान्तरीयकस्य सप्तमस्य पदस्य। तथा पुरोडाश-

द्रव्यं न क्षीरजातीयकं भवेत्, सत्यपि तु रूपादिभेदे रसतः पयस्त्वजातेः प्रत्यभिज्ञायमानत्वात् । आमिक्षापयोरूपसंस्थानव्यङ्ग्या हि जातिस्तद्भेदे भिद्यते । इयं पुना रसविशेषव्यङ्ग्येति तद्भेदाऽभेदानुविधायिनौ भेदाभेदौ भवितुमर्हतः । अत एव सत्यपि वारिसौवीरयो रूपाद्यभेदे रसभेदाज्जाति-भेदमध्यवस्यन्ति, श्रुतयोश्च पयसोः सान्द्रसान्द्रतरयोरपि रसतः प्रत्यभिज्ञा-नान्नाभिन्नजातीयतामवधारतन्ति लौकिकाः । एकजातीयत्वेऽपि च लिङ्गादि-भेदोपपत्तिस्तथा चाऽऽमिक्षा पय इति पयो वैश्वदेवं वैश्वदेवे पयसि च दध्यानयनं विनियुक्तमित्यामिक्षायां विनियुक्तम्, विनियोगानुसारी च प्रयोग इति चातुर्मास्यप्रयोगविधिरामिक्षार्थत्वेन दध्यानयनमनुष्ठापयति, न वाजिनार्थत्वेन । तस्य भिन्नरसतया पयः प्रत्यभिज्ञानाऽनास्पदतया जात्यन्त-रस्य दध्यानयनविनियोगगोचरत्वात् । आमिक्षार्थदध्यानयनमनुनिष्पन्नस्य तस्य तदनुप्रवेशित्वात् न पृथक् प्रयुक्तिरिति चातुर्मास्यविध्यनुष्ठापनव्यापार-परिमाणमेव तेन सिद्धं भवति ।

उदाहरणान्तरं समुच्चिनोति—एवमिति । ज्योतिष्टोमे श्रूयते । अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति, षट्पदान्यनुनिष्क्रामति सप्तमं पदं गृह्णाति । यदि हविर्धाने प्रवर्त्तयेयुः तर्हि तेनाक्षमुपाञ्ज्युरिति । तत्र सन्देहः । सोऽयं ज्योतिष्टोमप्रयोगविधिः क्रयार्थं चाञ्जनसाधनसप्तम-पदपांसुग्रहणार्थं च किमेकहायन्यानयनमनुष्ठापयति, अथ क्रयार्थमेवेति । किं प्राप्तम् ? एकहायन्यानयनादुभयनिष्पत्तेः षट्पदान्यनुनिष्क्रामतीत्यस्य क्रयवचनं पदपांसुवचनं चान्तरा समाम्नानादुभयत्र विनियोगाऽविशेषा-दुभयार्थः प्रयोजक इति प्राप्ते उच्यते । क्रयार्थाऽऽनयननान्तरीयकस्य सप्तमपदस्य तदनुप्रवेशित्वादिति पूर्वेण पृथगनुष्ठानमिति च परेण सम्बन्धः । एतदुक्तं भवति । सिध्येदयं मनोरथो यदि पांसुग्रहणवाक्ये निरपेक्षैकहायनी श्रूयेत । किं तु एकहायन्या सोमं क्रीणातीत्येतद्वाक्यगतायास्तस्याः सन्नि-धानात् बुद्धौ विपरिवर्त्तमानायाः पांसुग्रहणवाक्येन सम्बन्ध उपजीवनीयः । सन्निहिता च सोमक्रयार्थमिति तन्नान्तरीयकतया सप्तमस्य पदस्य क्रयार्था-नयनाऽनुप्रवेशित्वान्न पृथगनुष्ठानं ज्योतिष्टोमविधिना प्रयुज्यते इति विध्यनुष्ठानपरिमाणसिद्धिः ।

उदाहरणान्तरमाह—तथेति । स्तो दर्शपूर्णमासौ, तत्रेदमाम्नायते कपाले श्रपयतीति, पुरोडाशकपालेन तुषानुपवपतीति । अत्र भवति विचारणा

शेषस्यैव कपालस्य तुषोपवापमुखेन तत्संस्पर्शात् उत्तरार्द्धस्य चैकदेशत्वादुपात्तैकदेश्युपादेयस्यैव तत्सम्बन्धान्न पृथगनुष्ठानमिति ।

किमयं प्रयोगविधिः पुरोडाशार्थं च तुषोपवापार्थं चाऽविशेषेण कपालस्य प्रयोजकः, उत पुरोडाशार्थस्यैव? इति । तत्र विनियोगाऽनुसारित्वात्प्रयोजकत्वस्य विनियोगस्य च कपाले श्रपयतीत्यनेन पुरोडाशे च पुरोडाशकपालेन तुषानुपवपतीत्यनेन तुषोपवापे चाऽविशेषादुभयसाधारणस्य चैकेनापि पुरोडाशेन व्यपदेशसम्भवादुभयार्थमपि कपालं प्रयुज्यत इति प्राप्तेऽभिधीयते । पुरोडाशशेषस्यैव कपालस्य तुषोपवापमुखेन तत्संस्पर्शान्नोपवापार्थं पृथगनुष्ठानमिति परेण सम्बन्धः । इदमत्राकूतम् । उपपद्येतैतत् यद्युपवापवाक्ये श्रपणवाक्यवत् केवलकपालवचनमश्रोष्यत, पुरोडाशसम्बन्धस्तु श्रूयते पुरोडाशकपालेनेति । न चास्य भविष्यता पुरोडाशेन सम्बन्धोऽन्यस्तादर्थ्यात् । एवं चेत् पुरोडाशशेषस्यैव कपालस्य तुषोपवापे विनियोगः । न च विनियुक्तविनियोगलक्षणः प्रतिपत्तिविरोधः । पुरोडशकपालशब्देन कपालस्वरूपस्य लक्षणात् । न च कपालान्तरे प्रसङ्गः । तादर्थ्येन स्वाऽधिष्ठानस्यैव सम्बन्धिनो लक्ष्यमाणत्वात् । न खलु गङ्गायां घोष इत्यत्र गङ्गाशब्दः तटाकतीरं लक्षयति । अत एवाह कपालस्येति । कपालान्तरे मा प्रसाङ्क्षीदिति शङ्कया पुरोडाशशेषस्यैवेत्यवधारयति । तथा च भविष्यत्पुरोडाशार्थमेव प्रयोगविधिना कपालस्योपदापितस्य तस्यैव तुषोपवापमुखेनापि प्रधानसंस्पर्शो न पुनरपुरोडाशार्थस्यापि कपालमात्रस्य । तस्मान्न पृथगनुष्ठानमित्यत्रापि प्रयोगेयत्ता सिद्धा ।

उदाहरणान्तरमाह—उत्तरार्धस्य चेति । दर्शपूर्णमासयोः श्रूयते उत्तरार्द्धास्त्विष्टकृते समवद्यतीति । तत्रेदं चिन्त्यते । किं प्रयोगविधिना स्विष्टकृदिज्यार्थमुत्तरार्थमपि प्रयुज्यते किं वाऽऽग्नेययागार्थं प्रयुक्तादेव पुरोडाशादपि सिध्यति? इति । किं प्राप्तम् ? आग्नेयस्य पुरोडाशस्य देवतान्तरसम्बन्धाऽनुपपत्तेः शिष्टाचारविरोधात् । न खल्वन्यार्थं कल्पितमन्यस्मादुपकल्पयन्ति शिष्टाः । अर्थस्य चाऽर्थद्वयनान्तरीयकतया तदाक्षेपसामर्थ्यात् स्विष्टकृदिज्यार्थं द्रव्यान्तरं प्रयोजयन्तीति प्राप्तेऽभिधीयते—उत्तरार्द्धस्य **चैकदेशत्वादुपात्तैकदेश्युपादेयस्यैव तत्सम्बन्धान्न पृथगनुष्ठानम्** । अयमर्थः । उत्तरार्द्धादिति श्रुतेरवयवभागिनीयमिज्या प्रतीयते । न चाऽवयवभाजः क्रतेऽवयविनमुपाददते लौकिकाः । न खलु मोदकशकलादाने प्रेषितो वटुर्मोदकाय घटते, न चाघटमानायास्मै प्रेषयिता कुप्यति । प्रधानयागार्थंप्तुपात्तस्य ह्यवदानमात्रनिर्वर्तितप्रधानस्योतरार्धेऽवदानीयतयाऽपेक्षिते स्विष्टकृदिज्या

अर्थवादत्वे हि जुह्वाद्यङ्गक्रतुप्रयोगविधिनिबन्धनानुष्ठानत्वं पर्णमयी-त्वादीनां फलविधौ तदभावः । अतोऽर्थवादः क्रत्वर्थः फलविधिः पुरुषार्थः । सत्यपि च विध्यधीनाऽनुष्ठानत्वे पर्णमयीत्वस्य क्रतुप्रयोगविध्यविषय-

विधीयमाना तदर्था, न त्विज्यार्थमुत्तरार्धम् । अत एव तद्भाविनीज्या नाऽऽचारविरोधमावहति । सत्यपि वा तद्विरोधे श्रुतिराचाराद् बलीयसीति स्थितम् । तस्मात्प्रधानार्थप्रयोगविधिनोपातेनैकदेशिना पुरोडाशेनोपादेय-स्योत्तरार्धस्येज्यासम्बन्धान्न पृथगनुष्ठानमिति सिद्धं प्रयोगपरिमाणम् । इतिः समाप्तौ ।

यदि प्रयोगविधिव्यापारपरिमाणाऽवधारणं लक्षणार्थो हन्ताऽसङ्गतं तर्हि फलविध्यर्थवादनिरूपणमत्रेत्यत आह—अर्थवादत्वे हि जुह्वाद्यङ्गक्रतु-प्रयोगविधिनिबन्धनाऽनुष्ठानत्वं पर्णमयीत्वादीनां फलविधौ तदभावः । यदि पुनर्ज्जुह्वाद्याश्रयं पर्णमयीत्वं फलाय चोद्येत तस्मिन्सति तदभावः क्रतुप्रयोगविधिनिबन्धनोऽनुष्ठानत्वाऽभावः । इह खल्वप्रकरणाधीनमस्ति वचनं यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति । तत्र संदेहः । किं फलविधिः, उताऽर्थवादः ? इति । यथा यस्य जीर्णे भोजनं भवति न तस्य रोगा जायन्ते इत्यतो जीर्णे भोजनस्य रुजाऽभावबीजत्वमवगम्यते तथैतस्मादप्यपापश्लोकश्रवणं प्रति कारणत्वमवगम्यते पर्णमयीत्वस्य । तच्च सर्वे रोचयन्ते । तस्माद्विना ऽपि कर्मिसंबन्धम् अपापश्लोकश्रवणस्य फलत्वं प्रतीयते इति फलविधिरिति प्राप्ते ऽभिधीयते । नैवंजातीयकस्य फलविधित्वम्, न ह्यन्वयमात्रात्कार्यकारणभावाऽवगतिः, व्यभिचारात् । किं तु यद्यस्मिन्सति सम्भवति सत्यपि तदन्ये तदभावे न भवति तत्तस्य कार्यमिति प्रामाणिकाः । जीर्णभोजनादिवाक्यं तु प्रमाणान्तराऽनुसारात् तथा । न चेह तदप्यस्ति, विपरीतस्यापि संभवात् न चाऽव्यभिचारिक्रतु-पारार्थ्याय लब्धसमीहिताया जुह्वाः पर्णमयीत्वसंबन्धविधिं प्रत्यस्ति सविशेषरूपा । सामान्यरूपा तु पुरुषेच्छयेत्येतावता पुरुषार्थः । इदमत्रार्थतत्त्वम-भिसंहितमाचार्येण । उभयी हि पुंसां कामना अज्ञातोपायविशेषा तद्विपरीता च । तत्राऽज्ञातोपायविशेषा समुद्दिष्टकाम्यमात्रमेव प्रयत्नं प्रसूयते । स च प्रयत्नः फलमात्रकामनाया निष्फलकर्त्तव्यतामात्रं तदुपायविशेषानव-च्छेदात् सामान्यरूपा प्रवृत्तिरुच्यते । उद्देश्यमात्रविषयत्वात् । न चासौ निर्विषयः । एतावत्येव फले प्रवृत्तिः । न खल्वात्मकायवचनचेष्टाविशेषाः फलरूपमवगाहन्ते । यथोक्तमाचार्येण 'फलेन साक्षात्करणे कर्तुश्चेष्टा फलार्थिन, इति । तादृशश्च फलप्रमा फलानुबन्धात् तदुपायमात्रे प्रमाण-

त्वात्पुरुषार्थत्वम् । तद्व्यापारपरिमाणं चैवमेव चिन्तितम् । प्रधाने तु यद्यपि विधितः प्रवृत्तिर्विशेषरूपा सामान्यरूपा तु पुरुषे सेत्येतावता पुरुषार्थः । अङ्गापेक्षा तु करणज्ञानात्पराचीना तज्ज्ञानं तद्विधिरिति सामान्यतोपि प्रवृत्तेस्तदायत्तत्वादङ्गं क्रत्वर्थः । इदं तर्हि कथम् प्रयोजकः कश्चित्पुरुषार्थो-

माधत्ते । सोऽपि चाऽनधिगतविशेषं तदुपायकर्त्तव्यतामात्रं प्रयत्नसामान्यं प्रसूयते । न च कर्त्तव्यतामात्रं कामव्यतिरिक्तं नास्तीति वक्तव्यम् । प्रतिविषयं सत्यपि कामे प्रेक्षावता कर्त्तव्यताऽनवगमात् । न च मानसप्रत्यक्ष-वेदनीया कामनाऽस्तीति शक्या दम्भरहितैरभिधातुम् । तद्विपरीता तूपायविशेषविषयत्वादुद्दिष्टफलविशिष्टमेव प्रयत्नं जनयति । तत्र सामान्यरूपा प्रवृत्तिरूपा प्रागेव विधेरिति फलप्रवृत्तिरिव न वैधी, विशेषरूपा तु न विधिं विनेति वैधी । स्यादेतत् । इच्छाऽऽपगास्रोतसा प्रतिक्षिप्यमाणः फले तदुपायविशेषाऽपरिज्ञानसेतुना प्रतिबद्धवृत्तिरयं चेतनस्तद्विशेषमात्र-मवबोध्यताम्, ततस्तदेवेच्छास्रोतः सेतुभेदादुपायविशेषे प्रवृत्तिविशेषं प्रसोष्यत इति कृतं प्रधानविधिविषयेण प्रयोगविधिना । नन्वेवं तदेव प्रधानपर्यन्त-मागतमङ्गविशेषाऽपरिज्ञानाऽवरुद्धं तत्परिज्ञानमात्रादङ्गेष्वपि प्रवर्तकमित्यङ्ग-गोचरोऽपि न प्रयोगविधिः स्यात् । अथ कामनया निःसामान्यरूपाऽपि प्रवृत्तिरङ्गेषु न प्राक्सिद्धा विधेः । तत्किमियमुपाये विशेषरूपा प्रवृत्तिः सिद्धचरी ? न च सामान्यसिद्धौ विशेषसिद्धिरन्यत्वात् । तस्मात्सत्यपि फलतदुपायतदङ्गेष्विच्छाहेतुसामान्यप्रवृत्तिविषयत्वेन तुल्यत्वे फले सामान्य-रूपैव प्रवृत्तिर्न प्रवृत्त्यन्तरमस्ति । सा च विधेः पूर्वमुत्पन्नेति न वैधी । तदुपाये तु सामान्यरूपेच्छा हेतुः । प्रवृत्तिर्विधेः पूर्वं यद्यपि विधितस्तु विशेषरूपा तद्बोधे सति भवेत् । तदभावे तु सत्यामपीच्छायामसम्भवात् । न च विधिमात्रमपि प्रवृत्तिहेतुः । अनिच्छतो विधीनां शतेनाप्यप्रवृत्तेः । तेन पूर्वोत्पन्नेच्छासहकारी विधिः प्रधाने प्रवृत्तिविशेषहेतुरिति पूर्वोत्पन्ने-च्छाऽधीनप्रवृत्तिविशेषत्वं प्रधानं पुरुषार्थः । अङ्गेषु तु यद्यपि विधिरिच्छा-सहकारी प्रवृत्तिविशेषहेतुः, असत्यामिच्छायां प्रयत्नाऽनुपपत्तेः । असति च तस्मिन् कायवचनचेष्टयोरनुपजननात् । हेत्वभावे कार्याऽभावात् तथाप्यङ्गजिज्ञासाचिकीर्षयोरुपायविधेः पूर्वमसम्भवात् विधिनिबन्धनत्व-मिति तद्धेतुः । सामान्यरूपा प्रवृत्तिरपि तन्निबन्धनेति विध्यधीनप्रवृत्ति-त्वात् क्रत्वर्थमिति । सोऽयमङ्गानामुपायाद्विशेषः । तदेतदाह—अङ्गापेक्षा तु करणज्ञानात्पराचीना, तज्ज्ञानं च विधेरिति न केवलं विशेषतः सामान्यतो-ऽपि प्रवृत्तेस्तदायत्तत्वात् विध्यायत्तत्वादङ्गं क्रत्वर्थम् ।

ऽप्रयोजकः क्रत्वर्थ इति ? किमत्र कथम् ? प्रयोज्यौ ह्यत्र क्रत्वर्थपुरुषार्थावुक्तौ। तत्रैवं वक्तव्यम्, प्रयोज्यः कश्चित्पुरुषार्थः कश्चित् क्रत्वर्थ इति। नैष दोषः। पुरुषार्थः क्रत्वर्थ इति समानाधिकरणसमासः। पुरुषार्थ इति विग्रहात्।

एतदुक्तं भवति। कस्यचित्कश्चित्पुरुषः किंचित्प्रयोज्यमित्यर्थः। क्रतुविधेरपि किंचित्प्रयोज्यं किं चिदप्रयोज्यम्, यथाऽऽमिक्षावाजिनद्वारेण

अत्र चोदयति—इदं तर्हि भाष्यकारोक्तं कथम्? प्रयोजकः कश्चित्पुरुषार्थोऽप्रयोजकः क्रत्वर्थ इति। अभिप्रायमजाननः पृच्छति—किमत्र कथम्? चोदकः स्वाऽभिप्रायं स्फोरयति—प्रधानविधितदितरनिमित्तप्रयोज्यौ ह्यत्र क्रतुपुरुषार्थावुक्तौ। तत्रैवं वक्तव्यम्, प्रयोज्यः कश्चित्पुरुषार्थ इत्यादि। परिहरति—नैष दोषः। प्रयोजकः कश्चिदित्यत्र भाष्यग्रन्थे पुरुषार्थः क्रत्वर्थश्चेति समानाधिकरणसमासः। पुरुषार्थो विषय आश्रयः कामनिमित्तयोः क्रतुरर्थः विषयः क्रतुविधेरिति विग्रहात्। तदेव प्रकटयति—एतदुक्तं भवति। कस्यचित्कर्मणः काम्यस्य नैमित्तिकस्य वा कश्चित्पुरुषः कामी वा निमित्तवान्वा प्रयोजकः। तदेव क्रियासमभिहारेण शिष्यहिताय स्फुटयति—किंचित्कर्म काम्यं वा नैमित्तिकं वा कस्यचित्कामिनो वा निमित्तवतो वा प्रयोज्यमित्यर्थः। अप्रयोजकः क्रत्वर्थ इति कश्चिच्छब्दमन्तर्भाव्यव्याचष्टे— क्रतुविधेरपि किञ्चित् प्रयोज्यं यथा ऽऽमिक्षाद्वारेण दध्यानयनम्, किं चिदप्रयोज्यं यथा वाजिनद्वारेण दध्यानयनम्। अनेन भाष्यकारीया वचनव्यक्तिर्व्याख्याता। स तु पुरुषेच्छाऽधीनप्रवृत्तिः पुरुषार्थः, क्रतुविध्यधीनप्रवृत्तिश्च क्रत्वर्थः, इत्येतदेव स्थितम्।

केचिदाहुः यस्यौपादानिकमेव शेषत्वं पुरुषार्थः। क्रतुविध्यधीनप्रवृत्तिश्च क्रत्वर्थः इत्येतदेव स्थितम्।

केचिदाहुः, यस्यौपादानिकमेव शेषत्वं पुरुषार्थः यथा यागस्य फलं प्रति फलस्य वाऽधिकारिणम्प्रति। न ह्यत्र श्रुत्यादीनामन्यतममस्ति प्रमाणम्। साध्यस्वर्गविशिष्टस्य तु यागविषयो नियोगः प्रतीययानोऽन्यथानुपपत्तेर्यागस्य स्वर्गसाधनतात्मिकां स्वर्गस्य चाऽधिकारिभोग्यतात्मिकां शेषतामाक्षिपति। तादृशशेषता पुरुषार्थता सति तु श्रुत्यादिविनियोगे यस्यौपादानिकं शेषत्वं स क्रत्वर्थः, यथैकत्वादिः। संख्या हि संख्येयमवच्छिनत्ति स्वभावत इति वस्तुसामर्थ्यलक्षणेन लिङ्गेन पशुस्वरूपसम्बद्धमेकत्वमधिकारसन्निधिसमाम्नानमात्राच्चाधिकारैदमर्थ्यमापन्नमधिकारत एव। तत आत्मैदमर्थ्यनिर्वाहायाऽधिकार एवाक्षिपति करणीभूतपशुसंबन्धमस्येत्यौपादानिकः शेषभावः। सति च विनियोग इति क्रत्वर्थतामेवाऽऽवहति

दध्यानयनम् । तत्र यस्मिन्प्रीतिरिति फलांशेऽनुष्ठानं न विधित इति दर्शितम् । प्रयोजनश्येनादिफलस्याऽनर्थत्वम् । पुनः क्रत्वङ्गत्वेन तदङ्ग-

संख्यायाम् । तदेवं यस्यौपादानिकमेवैदमर्थ्यं स पुरुषार्थः, सति तु विनियोगे क्रत्वर्थ इति । तयोश्च श्रुत्यर्थाभ्यां लक्षणाऽभिधित्सयेदं सूत्रं प्रवृत्तं यस्मिन्प्रीतिरिति । तान् प्रत्याह—यस्मिन् प्रीतिरति फलांशे ऽनुष्ठानं न विधित इति दर्शितम् । न खलु न्यायलक्षणपरे शास्त्रे सति सम्भवे पदार्थमात्रलक्षणमुचितम् । न चोपपद्यते । न च स्वर्गयागयोरधिकारिस्वर्गयोश्च शेषशेषत्वमौपादानिकं सम्भवति । नियोगाक्षेपः किलोपादानमुच्यते, अनुपपद्यमानश्चाक्षिपति यथा स्वर्गयागाधिकारिणां सङ्गतिमन्तरेणापि नियोगस्य नाऽनुपपत्तिस्तथोपपादितं नियोगपरीक्षायाम् । विधिश्रुतिरेव तु स्वर्गकामादिश्रुतिसहिता स्वर्गयागपुरुषाणां यथायथं विनियोजिकेति विनियोगव्यापारं विवेर्व्युत्पादयता दर्शितम् । तस्माद्यथोक्तस्माभिः क्रतुपुरुषार्थत्वं तदेव ज्यायः ।

सूत्रार्थ उच्यते । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र भाव्यः स्वर्ग उपनीतः, तत्र संदेहः किं फलांशेऽपि भावनाया विधिरनुष्ठापयति पुरुषम्, किं वा न ? इति । तत्र भावनाविषयत्वाद्विधेर्भावनायाश्चांशत्रयविहीनाया अननुष्ठेयत्वाद्विधातुमशक्तेरंशत्रयसहितायां च भावनायां साधनेतिकर्त्तव्यतांशवत्साध्यांशो ऽपि विधीयत इति साधनतदङ्गवत् फलेऽप्यनुष्ठापयति विधिः पुरुषमिति विध्यधीनाऽनुष्ठानत्वात् फलस्य न पुरुषार्थत्वमिति प्राप्तेऽभिधीयते । सत्यमंशत्रयोपेता भावना विधीयते । तथाप्यप्रवृत्तप्रवर्त्तनात्मको विधिः प्रवृत्तमुपनीतमपि परित्यक्ष्यति । उक्तं हि तद्गुणास्तु विधीयेरन्न चेदन्येन शिष्टा इति । प्रवृत्तश्च पुरुषः फले । न खल्विच्छा हेतोः सामान्यप्रवृत्तेरन्या फले प्रवृत्तिरित्युक्तमधस्तात् । तदुपाये तु यद्यपीच्छा हेतुः सामान्यप्रवृत्तिः प्राग्विधेरस्ति तथापि विशेषरूपात्मिका कायवचनचेष्टाविशेषविधेः प्रागप्राप्तेति विधीयते । फले तु प्रवृत्तत्वान्न प्रवर्त्यते विधिनेति सिद्धमस्य पुरुषार्थत्वम् ।

विचारप्रयोजनमाह—प्रयोजनश्येनादिफलस्याऽनर्थत्वम् । यदि हि फलांशस्याऽनुष्ठानं चोद्येत यथा पूर्वः पक्षः ततः कर्त्तव्यतया कर्तुरपेक्षितोपायतया च गम्यमानोऽभिचारो नानाऽर्थः । अथ पुनः फलस्य न विधीयमानत्वं यथोत्तरः पक्षः तथा सति न कर्त्तव्यताऽवगम इति न हिंस्यादिति अकर्त्तव्यता निरपवाधा प्रवर्त्तते । अकर्त्तव्यं च दुःखफलमित्यनर्थत्वं श्येनादिफलस्य सिद्धं भवति ।

त्वेन च क्रतुप्रयोगविधिविषयत्वाऽविषयत्वे शेषलक्षणेन। क्रत्वर्थपुरुषार्थौ विभक्तौ क्रतुशेषत्वाऽशेषत्वविचारेण। परस्तु सिद्धएकशेषत्वे क्रतुविधिप्रयोगविधिव्यापारपरिमाणमात्रविचारात्। अत एवोक्तमतिक्रान्तस्तृतीयविषय इति।

पञ्चमे तु किं चिन्त्यते? ननु क्रमः केन प्रमाणेन? श्रुत्यादिभिः।

ननु यदि क्रतुपुरुषार्थत्वमुखेन विधिव्यापारपरिमाणमिह चिन्त्यते असङ्गता तर्हि गोदोहनादिषु विनियोगप्रधानविचारणेत्यत आह—पुनः क्रत्वनङ्गत्वेन गोदोहनद्रव्यार्जनादेस्तदङ्गत्वेन च संख्यादेः क्रतुप्रयोगविधिविषयत्वाविषयत्वे दर्शिते भवतः। यथासंख्यमत्र नेष्यते।

केचिदाहुः, श्रुत्यादिप्रमाणाऽतिरिक्तमुपादानमेवैकत्वादीनां विनियोजकमिति, तान्प्रत्याह—तदपि शेषलक्षणेन श्रुत्यादिनेत्यर्थः। तथा हि। गोदोहनद्रव्यार्जनादौ विधिविभक्तिरेव पुरुषार्थत्वश्रुतिः, एकत्वादीनां च करणाभूतपशुवन्धतृतीयाश्रुतिः। नन्वियं प्रातिपदिकादुच्चरन्ती तदर्थमात्रगतमेकत्वमभिधातुमुत्सहते न करणगतम्, तत्किमस्या न करणत्वमर्थः? भवतु तथापि तदापि प्रातिपदिकार्थमात्रगतमेवाभिधत्ताम्। ननु किमेते असंवद्धे एव मिथः करणैकत्वे प्राक् सत्यमिति वदतो युगपद् द्वयाभिधानपरत्वम् न खलु समर्थोप्यक्षशब्दः सकृदेव परस्परासबन्धाऽनेकार्थपरः प्रयुज्यते लोके। न कदाचिदक्षमानयेत्युक्ते सहसैवाऽक्षत्रयं प्रतियन्ति लौकाः। किं तु प्रकरणादिवशादेकमेव, तदभावे वा संदिहते। अक्षाविति वा अक्षानिति वा द्वौ त्रीनक्षान्प्रतिपद्यन्त इति चेन्न। एकशेषेण संबन्धाऽवगतेः। इहाप्येकप्रातिपदिकार्थसमवायलक्षणः करणैकत्वयोरस्ति संवन्ध इति चेत्किमयमभिधानवृत्तौ निमित्तं न वा? नो चेत्किं तदभिधानेन? असत्कल्पत्वान्निमित्तत्वे तु करणस्यैव तदेकत्वम्। एकस्य वा करणत्वमिति तृतीयाश्रुतिलभ्यत्वान्नौपादानिकं शेषत्वमिति सिद्धम्। तदिह साम्यवैषम्यविचारात्पूर्वं क्रत्वर्थपुरुषार्थौ विभक्तौ क्रतुशेषत्वाऽशेषत्वविचारेण। परतस्तु सिद्ध एकशेषत्वे क्रतुप्रयोगविधिव्यापारपरिमाणमात्रविचाराद्ध्यानयनादौ तु क्रत्वर्थत्वपुरुषार्थत्वमुखेन प्रयोगेयत्तेति। यत एव च नौपादानिकमपि तु श्रुत्यादिलक्षणमेकत्वादेः शेषत्वम् अत एव साम्यवैषम्यविचारोपक्रमे भाष्यकार आह 'अतिक्रान्तस्तृतीयविषय' इति। तार्तीयप्रमाणविषयत्वेनेति तृतीयविषयता भवति नान्यथा। यथा च तद्विषयत्वं तथोक्तमित्यर्थः।

सम्प्रति पञ्चमाध्यायचिन्तामारिप्सुस्तद्विषयं तावदाक्षिपति—पञ्चमे

नैतत्सारम्। चोदनालक्षणोऽर्थो धर्म्मः, स च चतुरवस्थ एवेत्युक्तम्। क्रमश्च तदतिरिक्तः, न ह्येष प्रयोगविधेर्विषयोऽननुष्ठेयत्वात्[1]। अशब्दार्थ-

तु किं चिन्त्यते? चतस्रः खल्विमा विधेरवस्थास्तासां द्वितीयतृतीयचतुर्था-ध्यायैस्तिस्र उत्पत्तिविनियोगरूपा निरूपिताः, षष्ठेन चाऽधिकारो निरूप-यिष्यते। तत्किमपरमवशिष्यते यत्पञ्चमाध्यायगोचरः स्यादित्याशयः। समाधाता तु वक्ष्यमाणाऽभिसन्धिराह—ननु क्रमः। हन्त भोः स्थवीय एतत् क्रम इति। न पुनरयं प्रमाणगोचरः। चतसृणामपि विध्यवस्थाना-ऽनास्पदत्वादशाब्दत्वात्प्रत्यक्षादीनां च दवीयस्त्वात्। न च प्रमाणरहितं मीमांसायामाद्रियन्ते वृद्धा इत्याह—केन प्रमाणेन? समाधातुर्निगूढाभि-संधिराह—श्रुत्यादिभिः। वषट्कर्तुः प्रथमभक्ष इति प्रथमपदमैन्द्रवायवाग्रा-नित्यग्रहणं गृहपतिं दीक्षयित्वेति क्त्वाश्रुतिरर्थादयश्च वक्ष्यमाणलक्षणकाः प्रमाणं क्रम इत्यर्थः। आक्षेप्ता स्वाभिप्रायमाह—नैतत्सारम्। चोदना-लक्षणोऽर्थो धर्मः, सा च विध्यभिधायिनीत्वाद्विधेश्च चातूरूप्याच्चतुर-वस्थैवेत्युक्तमवस्तात्। सत्यमुक्तम्, किमेतावता? इत्यत आह—क्रमश्च तदतिवृत्तात्मा। कुतः? न ह्येष प्रयोगविधेर्विषयः। तत्र विवरणकृतो हेतुमाह—अननुष्ठेयत्वात्। अनुष्ठानं हि प्रयोगः, तद्विधिरनुष्ठानं व्यापारं तदावेशाद्वा कारकं गोचरयेत्। न च क्रमो व्यापारस्तत्कारकं वा व्यापार-कारकाऽनुष्ठानप्रचयलभ्यत्वादस्य। ननु न तर्हि विधिरेकादशप्रयाजा-नित्येकादशसंख्यायाः। इयमपि क्रमवत्पदार्थाऽनुष्ठानप्रचयलभ्यैवेति न व्यापारो न च कारकम्। नात्रैकादशसंख्या विधीयते प्रयाजादीनामपि तु तल्लक्षणस्तदभ्यासः। स च पौनःपुन्येन व्यापार एव। न च पौर्णमास्या-मिति प्रयोगविधिः प्रयोगमनुष्ठेयं विधत्ते, किं तु तदा कर्मेति नाऽनुष्ठेयगोचरो विधिरननुष्ठेयश्चायं तार्तीयः पाञ्चमिकश्च क्रमः। तस्मान्न प्रयोगविषयः।

निबन्धनकृतो हेतुमाह—अशब्दार्थत्वात्। इदमत्राकूतम्। यद्यपि भावार्थविषयो विधिः, तथापि न साक्षाद् गवार्थं प्रेरयति नियोज्यम्, अपि तु स्वात्मनि। इदमेव चास्य स्वात्मनि प्रेरकत्वं यत्तिरश्चीनतया तदवबोधः। पुरुषस्य तदवबोधवत्तैव चास्य नियोज्यता। स तु विधिः कार्यस्वभावो भावार्थविषयो ऽवगम्यमानो भावद्रव्यगुणसंख्याक्रमादिना सर्वेण प्रयोजनेना-ऽन्वितः स्वशब्देन प्रयोजनं सदभिधीयते। भावाद्यभिधायिनश्च शब्दाः स्वार्थास्तदैदमर्थ्यापन्नानेवाचक्षते। तदिदं ग्राहकग्रहणमुच्यते। ततश्चा-

---

१. अपदार्थत्वात्. मू. पु. प,.।

त्वात् क्रमवद्व्यतिरेकेणेदन्तयाऽनिरूपणात्। पदार्था हि क्रमेणाऽनुष्ठीयन्ते न तु क्रमः। नापि विनियोगविधेरुत्पत्तिविधेर्वा। अत एव नाधिकारविधेः।

प्रेरयन्नप्ययं विधिर्भावार्थादिषु तैर्विना स्वसिद्धिमनासादयंस्तया च विना ऽऽत्मसिद्धत्वाऽभावेन साध्यत्वाऽनुपपत्तेः सर्वानेव तानाक्षिपति। तदिदमेषां विधिविषयत्वम्। यथाह यत्तु तत्सिद्ध्यर्थमुपादीयते तद्विधेयमिति तत्रैव व्यवहार इति। तदेव च तेन स्वसिद्ध्यर्थमाक्षेप्तव्यं यत्तत्सिद्ध्यर्थं तत्र तत्सिद्ध्यर्थं यद्विधिनाऽऽत्मैदमर्थ्यमापादितम्, तच्चाऽऽपादितं यत्तत्संनिधिसमाम्नातम्। तत्र वषट्कर्तुः प्रथमभक्ष इत्येवमादेरधिकारविधिसन्निधौ स्वशब्देन समर्पितस्य पदार्थभूतस्य क्रमस्य भवतु विधेयता तार्तीयस्य, पाञ्चमिकस्य त्वशब्दार्थस्य गृहपतिं दीक्षयित्वेत्येवमादेस्तदैदमर्थ्याभावात्कथं तत्सिद्ध्यर्थतयोपादानम्? न च दीक्षयित्वेति क्त्वाश्रुतिः पूर्वकालतामभिदधाति, मुखं व्यादाय स्वपितीत्यत्र व्यभिचारात्। स्वापोत्तरकालमेव हि मुखव्यादानम् न च ये मुखव्यादानान्निद्राणस्य पराञ्चः क्षणास्तान्विवक्षित्वा व्याख्येया लोकाधीनावधारणत्वाच्छब्दार्थसंबन्धस्य, व्यादानस्य तु पुरस्तात्तनेष्वपि निद्राणां क्षणेषु मुखं व्यादाय स्वपितीति सोरस्ताडं क्रन्दन्तो ऽपि प्रयोगस्या[1] ऽनिवृत्तेः। समानकर्तृकतैवाऽव्यभिचारिणी क्त्वार्थः। समानकर्तृके ऽर्थे वर्त्तमानाच्च धातोर्विधीयमानं य एव पूर्वं प्रयुज्यते तत्रैव क्त्वाप्रत्ययं प्रयुञ्जते लौकिकाः। यथाप्रयोगं चाऽर्थप्रत्ययो यथाप्रतीति चाऽनुष्ठानमिति कुतः पूर्वकालार्थताभिमानः प्रयोगोपाधिरित्यशब्दार्थोऽयं क्रमः, तथा चाऽविधेय इत्यननुष्ठेयत्वादिति युक्तम्।

मा नाम भूत्क्रमस्य व्यापारवत्स्वतो ऽनुष्ठेयत्वम्, अनुष्ठेयावच्छेदकतया तु भविष्यति। तथा हि। व्यापाराः क्रमेणावऽच्छिद्यन्ते तेन तदवच्छेदकतयैकत्वादिवत्क्रमोऽनुष्ठास्यत इत्यत आह—क्रमवद्व्यतिरेकेणेदन्तया अनिरूपणात्। अनुष्ठेयावच्छेदकमनुष्ठेयम्, तच्चाऽनुष्ठेयम् यच्चोदितम्, समुदायिनश्च पदार्थाश्चोदिता नैषां समुदायस्तवच्छेदश्च क्रमस्तदाश्रयणात्समुदायिनः पदार्थान्ननुष्ठेय इत्यर्थः। नापि तस्य स्वतो ऽनुष्ठेयतेत्याह— पदार्था हि क्रमेणाऽनुष्ठीयन्ते न क्रमः। पदार्था इति बहुवचनं बहुत्वैकार्थसमवेतसमुदायाश्रयत्वं क्रमस्य सूचयति। तेन न स्वतो नापि परतः क्रमस्याऽनुष्ठेयत्वमिति न प्रयोगविधिगोचरः क्रम इति सिद्धम्।

ननु मा विदध्यात्प्रयोगविधिः, उत्पत्तिविधिर्नियोगविधिर्वा विधा-

---

१. लोकप्रयोगस्य।

अनियोज्यत्वात्[1] । स्याच्च तावच्छ्रौते क्रमनियमे तत्परो विधिरर्थादिषु तत्परविध्यसंभव । उच्यते । प्रयोगो विध्यर्थ इत्युक्तम् । क्रमभेदश्च प्रयोगविशेषः । तथा हि । क्रमेण पदार्था अनुष्ठीयन्ते इत्युच्यते ।

स्यति । न खल्वेतावनुष्ठानगोचरौ स्वरूपसंबन्धपरत्वादित्यत आह—नापि विनियोगविधेरुत्पत्तिविधेर्वा विषय इत्यनुषज्यते । कुतः ? अत एव अननुष्ठेत्वादेव । अयमभिप्रायः । सर्व एवायं विधिश्चतूरूपः, तदभिधानमेव त्विदम्परतया भिद्यत इत्युक्तम् । अतश्चोत्पत्तिविनियोगयोरपि प्रयोगव्याप्तत्वात्क्रमे च प्रयोगस्याऽभावादिति व्यापकनिवृत्त्या व्याप्तयोरुत्पत्तिनिवृत्तिरिति । अथाधिकारस्य विषयः कस्मान्न भवति ? इत्यत आह—नाऽधिकारविधेः । अत्रापि विषय इत्यनुषज्यते । कुतः ? अनियोज्यत्वात्, मा नाम भूदनुष्ठेयगोचरो ऽधिकारविधिः नियोज्यं गोचरयति, चेतनश्च नियोज्यः । क्रमस्य चैतन्यमिति च स्थवीयः । न च निमित्तत्वं प्रागसिद्धेः । तस्मात् अनुष्ठेयत्वादपदार्थत्वत्वादनियोज्यत्वाच्च न विधिविषयः क्रम इति । नन्वपदार्थात्वादित्यसिद्धो हेतुः, दीक्षयित्वेति क्त्वार्थात्वात्क्रमस्य । तथा च तत्परो विधिरित्यत आह - स्याच्च तावच्छ्रौतक्रमनियमे तत्परो विधिः अर्थादिषु तत्परविध्यसम्भवः । अयमर्थः । व्यभिचारात् पूर्वकालता न क्त्वार्थ इत्युक्तम् । तथा चाऽपदार्थत्वादिति नाऽसिद्धो हेतुः । अभ्युपगम्याप्युच्यते । श्रौतव्यतिरिक्तः पाञ्चमिकः क्रम इति धर्मिविशेषणान्न भागासिद्धो ऽपदार्थात्वादिति हेतुः । अर्थादिषु क्रमव्यापकत्वादिति ।

एवमाक्षिप्य समाधत्ते—उच्यते । प्रयोगो विध्यर्थ इत्युक्तम् । ततः किमित्यत आह—क्रमभेदश्च प्रयोगविशेषः । अयमर्थः । क्रमेण हि प्रयोगो विशेष्यते, प्रयोगान्तराद्व्यावर्त्यते । तथा हि । त एव पदार्थाः क्रमभेदेन प्रयुज्यमानाः प्रयोगक्रमभेदवियमादधति वर्णा इव तत्त्वेऽपि गवेवेगनदीदीनजराराजेतिपदभेदबुद्धिम् । अन्यथा ऽर्थधीभेदो न स्यात् । असति तु हेतुभेदे कार्यभेदस्याऽऽकस्मिकत्वप्रसङ्गात् इति ।

ननूक्तं पदार्था विधीयन्ते न तत्समुदायः । पदार्थानुष्ठानान्निष्पन्नो हि सः । तं च श्रितः क्रमो न पदार्थान्प्रत्येकं तेष्वनिरूपणादतः पदार्थविषयो विधिर्न क्रमं गोचरयति । न चायं शब्दार्थो येन कार्यैदमर्थ्यापत्त्या तत्सिद्ध्यर्थतयोपादीयमानतया विधेयः स्यादित्यत आह—तथा हि । क्रमेण

---

१. अविनियोज्यत्वात् मू. पृ. वा. ।

पदार्था अनुष्ठीयन्त इत्युच्यते। इदमत्राकूतम्। यत्तावदुच्यते न क्रमो नाम पदार्थवृत्तिः प्रत्येकं तेष्वनिरूपणात् इति, तदयुक्तम्। संयोगविभागावयविद्वित्वादिसंख्यादीनां प्रत्येकमनिरूप्यमाणानामपि पदार्थवृत्तिदर्शनात्। अथाऽनुपलम्भात्। तदयुक्तम्। संयोगादिवदेव पदार्थाश्रितस्य तस्योपलब्धेः। तथा हि। संयोगादयः सद्वितीयं पदार्थमाश्रयन्तो नैकत्र निरूप्यन्ते न च समुदायाश्रयाः। न च भवतः समूहः संयुक्त इति प्रत्ययव्यपदेशौ, अपि त्वनेनैतत्संयुक्तमिति वा संयुक्ते एते इति वा। समुदायैकार्थसमवायस्तु संयोगादीनाम्। तेभ्योऽपि च क्रमस्य पूर्वाऽपरत्वाऽपरनाम्नः प्रत्येकपदार्थाऽऽधारताविशेषः। तथापि तु द्वितीयपदार्थज्ञानाधीनानिरूपणमात्रेण संयोगादितुल्यता क्रमस्य। तेन भवत्यपि तद्रूपतया स द्वितीयवृत्तिः पूर्वत्वाऽपरत्वरूपेण केवलपदार्थवृत्तिर्वा। उभयथाऽपि पदार्थवृत्तिरेव न समुदायवृत्तिस्तथोपलम्भात्। न हि भवति कर्मणां समूहः पूर्व इति वा पर इति वा। कर्मैकं कर्मान्तराऽपेक्षया पूर्वं तदपेक्षया च कर्मान्तरमपरम्। पूर्वाऽपरत्वे एव वाऽप्यवधिमत्पदार्थनिरूपणीये तद्वितति र्वा क्रमः। तयोश्च शब्दकर्मादावुपलब्धेस्तदाश्रितत्वमिष्यते। तेन यद्यपि प्रत्येकं पदार्थेषु प्रातिस्विको विधिः, यद्यपि च प्रयोगविधिरवलम्बते। स च यौगपद्यानुष्ठानानुपपत्तेस्तद्वत्प्रयोगविधाने ज्वरहरतक्षकचूडारत्नाऽलङ्कारोपदेशवदप्रामाण्यप्रसङ्गात् यथा शक्नुयादित्युपादित्युपस्थापितक्रमभेदं समुच्चितपदार्थानुष्ठानभेदं विदधत्क्रममपि विधत्ते। न खल्वस्मिन्नविधीयमाने एतद्विशिष्टपदार्थानुष्ठानविधिसम्भवः।

यदपि मतम्—यत एव सोऽपेक्षिष्यते विधिना, अत एव न विधायिष्यते। न हि यद्यद्विधिनाऽपेक्ष्यते तत्तद्विधीयत इति कश्चिन्नियमहेतुरस्ति। अधिकारस्याप्याधेयत्वात्कर्तैव तु तत्सिद्धयर्थं विधीयते। क्रमभेदस्य त्वपेक्षितत्वाद्विधानां प्रमातुरस्य च प्रतीतेरन्यस्य चाऽप्रतीतेःप्रतीतिपूर्वकत्वाच्चानुष्ठानस्य प्रेक्षावतामाद्रियते विधिरिति।

अत्रोच्यते। किं पुनर्विधेयं मन्यते भवान् यदत्र नास्ति? ननूक्तं नियोगसिद्धयर्थतयोपादीयमानं तदिति। किमिदं तत्सिद्धयर्थमिति? तत्साधनं चेत्कथमेकत्वादिनो विधेयत्वम्। न हि तत्कारकम्। कारकावच्छेदं तदिति चेत्। क्रमोऽप्यनुष्ठेयवस्त्ववच्छेदकतयाऽनुष्ठेयस्य च कारकतया तादृश एव। न चैष समुदायायत्त[1] इत्युक्तम्। अथ न तत्सिद्धयर्थमिति तत्कारकं विधेयम्, अपि तु तदैदमर्थ्यापन्नं द्वैधं च तद्वि-

---

१. समुदायाश्रयः २ पु. पा०।

नियोगत उपादानतश्च । विनियोगतस्तार्तीयात्पशोः, उपादानतश्चतुर्थात् । तदेकत्वादीनां तूभयविधमपि शेषत्वं शब्दार्थस्य क्रमस्तु पाञ्चमिको न शब्दार्थ इत्युक्तम् । तत्किमिदानीं "विश्वजिता यजेत" इत्यशब्दार्थतैवेति चेत् । तर्हि दीक्षयित्वेत्यत्रापि पूर्वकालताममिधेयापि शब्दार्थः कथंचिदिति श्रौतः क्रमो विशेषत इति तत्सिद्ध्यर्थतयोपादीयत इति विधेयः । अपि च शब्दोपात्त एव तत्सिद्ध्यर्थतयोपादीयत इत्यत्र को हेतुः ? तस्यैव तादर्थ्यावगम इति चेत् । न, तस्य तादर्थ्यं किं तत्प्रतिपादकः शब्दोऽववोधयेत्, उतानुष्ठेयैकार्थाभिधायी शब्दः ? न तावत् पूर्वः कल्पः । न हि श्रुत्यादिमात्रात् तादर्थ्यमित्युक्तम् अनुष्ठेयकार्याभिधायी तु शब्दो यदेव तदनन्तरं बुद्धौ विपरिवर्तते येन प्रयोजनेनान्वितं स्वार्थं प्रयोजनं यदभिधत्ते तेन तत्सन्निधापनमात्रोपयोगीशब्दः सन्निधापनं वाऽन्यतोऽप्यर्थादेरिति शब्दोपात्तत्वं क्वोपयुज्यते ? तेन नास्य प्रमाणान्तरसमधिगम्यत्वादविधेयत्वम् । अर्थादिसहायस्य शब्दस्यैव प्रामाण्यात् । अन्यथा त्वनभिधेयक्रमवादिनोऽप्यचोदनालक्षणत्वेन क्रमस्य शास्त्रविचारानर्हत्वप्रसङ्गात् ।

यच्चोच्यते—विधेयत्वं प्रयुक्त्या व्याप्तम्, सा च क्रमे नास्ति तदुत्तरकालत्वात्क्रमस्य । अत एव प्रयुक्त्यनन्तरमयं विचारितः । तस्माद्विधेयत्वव्यापिका प्रयुक्तिः क्रमान्निवर्त्तमाना व्याप्यं विधेयत्वमपि निवर्त्तयति वृक्षतेव शिशंपात्वमाराद‍ुपलभ्यमानादेकशिलामयाद् गिरिप्रदेशादिति, तदयुक्तम् । प्रयुक्त्यनन्तरकालत्वस्यासिद्धेः ! विदधान एव हि प्रयोगमयं प्रयोगविधिर्येन येन विनाऽन्यतोऽप्राप्तेन प्रयोगसंबन्धेन न निर्वहति तत्सर्वं तच्छेषतया विधत्ते । एवं लक्षणकश्च श्रुत्यादिसमर्पितः क्रम इति कथं प्रयुक्त्युत्तरकालः ? तस्माद्व्यापकानुपलब्धिरसिद्धा । न चतुर्थे स्वरूपेण प्रयुक्तिर्विचारिता, किं तर्हि प्रयुज्यमानपदार्थेयत्तयेत्युक्तम् । तद्विज्ञानं क्रमभेद नियमावगमे हेतुः । प्रयुज्यमानपदार्थेयत्तानवधारणं हीति यावत् । न च पदार्थवत्क्रमोऽवगतः । स पदार्थान्तराऽनुप्रवेशे भज्येत । क्रमावधारणेन तु विना नेयत्तावगमप्रसङ्गः । नापि हि क्रमेष्वियत्ता तादवस्यात् । तस्मान्नाऽयं प्रयोगोत्तरकालः क्रमविचारः, अपि तु तदियत्ताऽवधारणोत्तरकालः । तद्धेतुत्वात् । तस्मात्प्रयुज्यमानपदार्थाश्रयस्तच्छेषक्रमो विधेयश्चेति साम्प्रतम् । तदिदमुक्तम् । तथा हि क्रमेण पदार्था अनुष्ठीयन्त इत्युच्यते । स्वरूपेणाऽननुष्ठेयोऽप्यशब्दोपात्तोऽपि अनुष्ठेयावच्छेदकतया तद्विधौ विधेय इत्यर्थः । यथा चैवंविधस्यापि विधेयत्वं तथोपपादितमधस्तादिति वहुविस्ताराद्बिभ्यतोऽपि विस्तरे पतिताः स्मः । तस्मादास्तान्तावत् ।

तथा च प्रयोगविधिविषयत्वान्न चोदनालक्षणत्वमतिवर्तते क्रमः। तत्र प्रथमं क्रमवद्व्यतिरेकेणेदन्तयाऽनिरूपितत्वात् अप्रयोज्यतामविनियोज्यतामनुत्पाद्यतां च मत्वा विधिविषयत्वमाशङ्क्य प्रयोगविधिविषयता दर्शिता। उत्तरवर्णकेन तूदाहरणशुद्धिः कृता। दीक्षापदार्थस्य प्राप्तेः।

तथा च चतुर्विधविधिव्यापाराऽगोचरत्वाद्यच्चोदनालक्षणत्वमाक्षिप्तं तत्प्रयोगविधिव्यापारविषयतां दर्शयता परिहृतमित्याह—तथा च प्रयोगविधिविषयत्वान्न चोदनालक्षणत्वमिति वर्तते क्रमः। एवं प्रमेयं परिशोध्य विचारस्वरूपमादर्शयति—तत्र प्रथमं क्रमवद्व्यतिरेकेणेदन्तयाऽनिरूपितत्वाद-प्रयोज्यतामविनियोज्यतामनुत्पाद्यतां च मत्वा विधिविषयत्वमाशङ्क्य प्रयोगविधिविषयता दर्शिता। प्रथमं दर्शितेति सम्बन्धः। कृतव्याख्यानमेतदाक्षेपपरिहारयोः।

वर्णकान्तरमाह—उत्तरवर्णकेनेत्यादिना कृतेत्यन्तेन। अत्र चोत्तरवर्णकेनोदाहरणपरिशुद्धिस्तद्विधौ कृतेति प्रथममध्यमाऽवसानैः ग्रन्थप्रयोजनम्। तत्रोदाहरणम्—"सत्रे ये यजमानास्ते ऋत्विजः" इत्याम्नायते। "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारम्, ततो होतारम्, ततस्तं प्रतिप्रस्थाता दीक्षयित्वा गाथिनो दीक्षयति" इत्यादि "ग्रावस्तुतं होता ब्रह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषितः" इत्यन्तम्। तत्र संशयः किं तत्तत्पदार्थविशिष्टा दीक्षा विधीयते उत क्रम इति? तत्तत्पदार्थविशिष्टदीक्षाविधानेनैवार्थलभ्यत्वात्क्रमस्य पृथगनवगमाच्च दीक्षैव विधीयत इति प्राप्ते विधेयान्तराभावात्क्रम एव विधीयत इत्याह—दीक्षापदार्थस्य प्राप्तेः। याजमानत्वात्सूत्रे गृहपत्यादीनां चोदकत एव प्राप्ता दीक्षेति सा तावन्न विधातव्या। ननु क्रमोऽप्यशब्दार्थ इति न विधातव्यः। उक्तं हि 'न क्त्वाश्रुतिः पूर्वकालतामाह' इत्यत आह—अनभिधेयस्यापि कथञ्चित्प्रतीयमानस्य विशिष्टक्रमानुष्ठानस्य विध्यर्थत्वात्। अयमर्थः। कुत एतत् क्त्वाश्रुतेर्न पूर्वकालताऽर्थ इति। तदभावेऽपि प्रयोगदर्शनादिति चेत्, नन्वेवं सति समानकर्तृकत्वमपि नार्थः स्यात्। अलं खलूपपदाद्धातोस्तदभावेऽपि प्रतिषेधमात्रे प्रयोगदर्शनात्। खलूक्त्वा, अलं भुक्त्वा इति। यद्युच्येत न व्यभिचारादशब्दार्थत्वं ब्रूमः। मा भूदक्षादिशब्दानामनेकार्थानामानर्थक्यम्, अपि त्वनन्यलभ्यः शब्दार्थ इति स्थितिः। प्रयोगोपाधिलभ्या च पूर्वापरकालतेत्युक्तम्। न त्वेवं सति समानकर्तृकतेति सैव व्यभिचरत्यपि क्त्वार्थः। कः पुनस्तर्हि प्रयोगोपाधिः? समानकर्तृकत्वेऽपि धात्वर्थयोर्य एव पूर्वं प्रयुज्यते धातुस्तत्रैव क्त्वाप्रत्ययो

अनभिधेयस्यापि कथंचित्प्रतीयमानस्य विशिष्टक्रमानुष्ठानस्य[1] विध्यर्थत्वात् कर्तृविशेषविधाध्वर्युसम्बन्धस्यानर्थक्यात् । अनेकार्थविधितो वाक्यभेदात् । दीक्षापदार्थस्य तु प्रतिप्रधानावृत्तेः अनुष्ठानविशेषविधिरेकार्थत्वात । तद्विधौ

लौकिकानां नान्यत्र । सत्यम्, प्रयोगनियमे सिद्धे स्यादेवं, न त्वयमस्ति । स खल्वन्वाख्यानाद्वा गम्यो भवेल्लोकतो वा । न तावत् क्त्वान्तं पूर्वं प्रयोक्तव्यमाख्यातादिति कस्यचिदन्वाख्यानमस्ति । नापि क्त्वान्तमेव लोकः पूर्वं प्रयुङ्क्ते । आख्यातादपि परस्तात्कवीनामृषीणामाम्नाये च क्त्वान्तपदप्रयोगदर्शनात् । तस्मादनन्यथासिद्धेः समानकर्तृकतावत् पूर्वकालता तदर्थ इति परमार्थः ।

माभूत्तथा, अनभिधेयाऽपि कथञ्चित्प्रतीयमानतया विधेयाऽभावात्सैव तावद्विधातव्या, तथा चाऽनर्थकोऽयं काकदन्तानामिव क्त्वः पूर्वकालताभिधानस्य विचार इति ।

अथोच्यते । मा विधायि दीक्षा, चोदकप्राप्तायां तु तस्यामध्वर्युप्रभृतयः कर्तृविशेषा विधायिष्यन्ते । ततः किं क्रमविधिनेत्यत आह—कर्तृविशेषविधावध्वर्युसम्बन्धस्यानर्थक्यात् । आध्वर्यवी हि प्रकृतौ दीक्षाऽवगतेति किमत्राऽध्वर्युसम्बन्धविधिना । प्राप्तत्वात् । इतश्च अनेकार्थविधितो वाक्यभेदात् । अध्वर्युगृंहपतिमध्वयुर्ब्रह्माणमध्वर्युर्होतारमित्यनेकेऽर्थास्तद्विधौ वाक्यं भिद्येतेति । ननु च तथापि प्रतिपदार्थं दीक्षाऽऽवृत्तौ कुतो न वाक्यभेदः ? इत्याह—दीक्षापदार्थस्य तु प्रतिप्रधानाऽऽवृत्तेः । मम दीक्षासमभिव्याहारौ विधीयेते । यजमानसंस्कारो हि दीक्षा । सा गुणत्वात् प्रतियजमानमावर्तते इति न्यायप्राप्तोऽयमर्थः । इत्थं क्रमविधौ न वाक्यभेदोऽर्थैकत्वादित्याह—अनुष्ठानविशेषविधेरेकार्थत्वात् । विशेष्यतेऽनेनानुष्ठानमिति अनुष्ठानविशेषः क्रमः । एवं तु वदत आचार्यस्य संयोगादिवदनेकपदार्थवृत्तिकः क्रमोऽभिमत इति ।

कश्चिदाह—'अध्वर्युविधावनियमः' इति । तस्याऽर्थमेके व्याचक्षते । अत्र हि "ये यजमानास्ते ऋत्विजः" इति ऋत्विक्कार्यैः यजमानविधानाद् ऋत्विजो निवृत्ताः, यजमाना एव तु तत्तदृत्विक्कार्यकरणाल्लब्धर्त्विग्व्यपदेशा न पुनरिह तत्त्वतोऽध्वर्यादयः सन्ति, तेन येनैव केनचित्क्वचित्कदाचिदाध्वर्यवं यजमानेन कृतं तेनाऽध्वर्युव्यपदेशभाजाऽऽध्वर्यवान्तरं कर्त्तव्य-

१. क्रमानुष्ठीनस्य मू. पु. पा० ।

न पूतः पावयतीति प्रतिषेधात्, इतरमन्यः, तेषां यतो विशेषः स्यादिति ।

मिति न कश्चिन्नियमहेतुरस्ति । तेनाध्वर्यवी दीक्षा गृहपतेर्येन कृता, स एव ब्रह्मादिदीक्षायामनेन वचनेन नियम्यते । एवं प्रतिप्रस्थात्रादिनियमोऽपीति न विधेयान्तराऽभावः । तदेतदालोचनीयम्—कथं नियमहेतुर्नास्तीति । ननु यद्यत्र नियामकं प्रमाणं नास्ति ततो ब्रह्मादयोऽप्यनियताः । तथा हि—य एव ब्रह्मकार्यकरणाद् ब्रह्मा स एव होतृनेष्ट्रादिकार्यकरणाद्धोतृनेष्ट्रादिः । एवं होत्रादिर्ब्रह्मनेष्ट्रादिकार्यकरणाद् ब्रह्मनेष्ट्रादिः । एवं नेष्ट्रादयो ब्रह्मनेष्ट्रादयस्तथा ब्रह्माऽप्यध्वर्यादिरिति नियम्यमानानां नियमविषयाणां चाऽव्यवस्थानात्किमाश्रयो नियमः कल्पयिष्यते । ब्रह्मादिष्वध्वर्युदीक्षाविधिना खल्वन्ये नेष्ट्रादयो निवर्त्तनीयाः । तत्र व्यावर्त्यानां ब्रह्मादिदीक्षायां नेष्ट्रादीनां विधेयस्य चाध्वर्योरव्यवस्थानात्संकरेण न शक्या व्यावृत्तिः प्रतिपत्तुम् । न ह्यववातनखनिर्भेदादीनां संकरेण "व्रीहीनवहन्ति" इति नियमः कल्प्यते । तस्माद्यस्यर्त्विजः कर्मणि प्रथमं यः प्रवृत्तो यजमानस्तेनैव तदीयं सर्वमेव समापनीयम्, न यजमानान्तरेणर्त्विज्यान्तरकारिणानौचित्यादङ्गीकर्त्तव्यम् । अव्यवस्थायामनौचित्यप्रसङ्गात् । प्रकरणसामर्थ्यादिवदौचित्यमपि हि वाक्यार्थावधारणोपायं सङ्गिरन्ते शाब्दाः । अतश्चौचित्यमेव नियमहेतुरस्तीति नियमतोऽपि न विधातव्य इति स्थवीय एतदतो न दूषितमाचार्येण ।

ये त्वन्ये मन्यन्ते—दीक्षाया आध्वर्यवीत्वाद् गृहपत्यादेश्चान्येषां च दीक्षायामध्वर्युः प्राप्त एव गृहपत्यादिषु विधानेन तदन्येभ्यः परिसंख्यायते तत्परिसंख्यायामेव च नियमोक्तिर्भक्त्याऽनन्यनिवृत्तिसाम्यं च भक्तिरिति तन्निरासायाह—न पूतः पावयतीति प्रतिषेधात् । तत्र विधिसंभवेन दोषत्रयवती परिसंख्योचितेति प्रसिद्धतरत्वादनभिधाय वचनविरोधो दर्शितः, होतृदीक्षाऽनन्तरमध्वर्युदीक्षाविधानाद्दीक्षितोऽध्वर्युपूतः कथमध्वर्युप्रभृतीन् पावयेद्दीक्षयेदिति । तस्मान्निषेधफला परिसंख्या निषेधेऽनुपपन्ना, फलाऽभावादित्यर्थः । न चाऽध्वर्युदीक्षायां प्रतिप्रस्थाता न प्राप्तो येन तं प्रतिप्रस्थातेतिवचनं प्रतिप्रस्थातारं विदध्यादित्याह—इतरमध्वर्युमन्यः प्रतिप्रस्थाता पावयति विनाऽपि वचनात् । आध्वर्यवे हि कर्मणि प्रकृतावेवाऽध्वर्युपुरुषाः प्रतिप्रस्थात्रादयो विहिताः । यदा खल्वध्वर्युरसमर्थः कर्मान्तरव्यासङ्गित्वात्स्वात्मनि क्रियाविरोधित्वाद्वा, तदा तदीयं कर्म तत्पुरुषाः प्रतिप्रस्थात्रादयः कुर्वन्तीति स्थितम् । तदयं स्वात्मनि क्रियाविरोधादात्मानं दीक्षयितुमसमर्थ इति स्वपुरुषेण दीक्षणीयः । स्वपुरुषश्च तस्य

अब्राह्मणस्याऽऽर्त्विज्याऽभावादुत्तराश्रमिणोश्च। ब्रह्मचारिणश्चाऽऽचार्य्यपरतन्त्रत्वात्। अर्थादिषु तु यद्यपि पदार्थपरो विधिस्तथापि तद्रूपप्रयोजनापेक्षी

प्रतिप्रस्थातेति प्राप्तत्वान्न विधातव्यः। नन्वध्वर्युपुरुषा वहव इति आह—तेषां यतो तेषां प्रतिप्रस्थातृविषये वचनं भविष्यतीत्यत विशेषः स्यादिति। तेषामध्वर्युपुरुषाणां मध्ये यतो यस्य। सार्वविभक्तिकस्तसिः। विशेषः अन्तरङ्गत्वलक्षणः स्यात्सोऽन्यः पावयति। आध्वर्यवे हि कर्मणि तदसामर्थ्ये सन्ति विहिता वहवः प्रतिप्रस्थातृप्रभृतयः उत्तरोत्तरबहिरङ्गाः। तेषामाद्यः प्रतिप्रस्थाताऽन्तरङ्ग इति तन्नियमो न विधातव्यः, प्राप्तत्वादित्यर्थः। ननु चोन्नेतृदीक्षायामध्वर्युप्रभृतीनां पूतत्वेनाऽनवकाशत्वात्पुरुषमात्रप्रसङ्गे ब्राह्मणो नियम्येतेत्यत आह—अब्राह्मणस्यार्त्विज्याभावात्। ब्राह्मणस्यैव याजनमसाधारणतया विहितमिति कुतोऽन्यत्र प्रसज्येतेत्यर्थः। अथ ब्राह्मणप्राप्तौ चातुराश्रम्यस्याऽविशेषप्रसक्तेर्ब्राह्मणेन सह ब्रह्मचारिणो विकल्प्यत्वाद्भिक्षुवानप्रस्थादिनिवृत्त्यर्थवचनमित्यत आह—उत्तराश्रमिणोश्च। आर्त्विज्याऽभावादिति चेहाऽनुकृष्यते। न वृत्त्यर्थमार्त्विज्यम्, भिक्षुवानप्रस्थयोस्तद्वृत्तिनिषेधात्। नाऽनुग्रहार्थम्, "हिंसाऽनुग्रहयोरनारम्भी" इत्यनुग्रहनिषेधादित्यर्थः। न च ब्रह्मचारिणः स्वातन्त्र्येण प्रवृत्तिनिषेधार्थमाचार्य्यप्रेषित इति वचनम्। वचनान्तरसिद्धं हि तस्याऽऽचार्य्यपारतन्त्र्यमित्याह—ब्रह्मचारिणश्चाऽऽचार्य्यपरतन्त्रत्वात्। तस्मादेतेभ्यो हेतुभ्यो विधेयान्तराऽभावात्क्रमस्य च विधानार्हत्वात्। उत्तरवर्णकेन तद्विधौ क्रमस्य विध्यर्थं "चर्मणि द्वीपिनं हन्ति" इतिवदुदाहरणपरिशुद्धिः कृतेति ग्रन्थयोजना।

सम्प्रत्यर्थलक्षणस्य क्रमस्य विधेयतामाह—अर्थादिष्वित्यादिनाऽपेक्षितेत्यन्तेन। अत्रोदाहरणम्। "अग्निहोत्रं जुहोति" यवागूं पचति" इति। तत्र संशयः—किं होमपाकयोरनियतक्रमः, उत पाकाऽनन्तरं होमः? तत्र विध्योर्होमपाकपदार्थमात्रविधानपरत्वात्पूर्ववच्च श्रुतेरभावात् होमरूपयवागूपचनप्रयोजनक्रिययोश्च प्रमेयान्तःपातितया क्रमनियमं प्रति प्रामाण्यानुपपत्तेर्द्रव्यान्तरेणापि होमस्योपपत्तेः क्रमनियमप्रमाणाऽभावादनियम इति प्राप्ते आह—अर्थादिषु यद्यपि पदार्थपरो विधिस्तथापि तद्रूपप्रयोजनाऽपेक्षी। "अनुष्ठानविशेषः क्रमं प्रतिपादयति" इति परेण सम्बन्धः। अयमर्थः—यद्यपि क्रमविशेषे न श्रुतिरस्ति तथापि होमविधिररूपं होमं विधातुमसमर्थस्तद्रूपभूतद्रव्यमपेक्षते—यवागूं पचतीति। निष्प्रयोजनं यवागूं प्रति गुणत्वेन पाकविधानमनुपपन्नमिति यवागूः प्रयोजनापेक्षिणी। तथा चाऽग्नि-

स्वाध्यायविधिप्रत्यायितपाठक्रमनियमप्रयोजनापेक्षश्च निर्ज्ञातं च क्रममनु-

होत्रं यवाग्वा तां च पाकेनेत्ययमर्थः सिद्धो भवतीति। न च प्रागसिद्धा यवागूरग्निहोत्राय कल्पत इति पदार्थपरोऽपि विधिः पदार्थरूपप्रयोजनापेक्षी अर्थसहकारीति यावत्पौर्वापर्यविशेषमवगमयति न च नियतं प्रामाण्यम्। प्रमेयस्याऽपि प्रामाण्यदर्शनात्। यथाहुः प्रामाणिकाः—'प्रमेया च तुला-प्रामाण्यवती' इति। तस्मादार्थोऽपि क्रमो विधेय इति सिद्धम्।

अर्थादिष्वित्यादिशब्दसूचितं क्रमप्राप्तं पाठक्रमस्य विधेयत्वमाह—स्वाध्याय इति। अत्रोदाहरणं "समिधो यजति, तनूनपातं यजति" इत्यादि। तत्र सन्देहः—किमेते समिदादयो नियतक्रमाः प्रयोक्तव्याः, उत पाठक्रमेणेति? श्रुत्यर्थयोरभावात्पाठक्रमस्य प्राप्तत्वान्नान्तरीयकत्वेनाऽवर्जनीयतयाऽनुप्रवेशादप्रयोजकत्वादनियतक्रमा एव समिदादयः प्रयोक्तव्या इति प्राप्ते आह—स्वाध्यायविधिप्रत्यायितपाठक्रमनियमप्रयोजनापेक्षश्च। "विधिरनुष्ठानविशेषं प्रतिपादयति" इति परेण सम्बन्धः। स्वाध्यायविधिना हि क्रमवन्ति वाक्यानि उपस्थापितानि, तदेषां क्रमस्य सति प्रयोजनसम्भवेनाऽवर्जनीयतामात्रेणोपादानमङ्गीकर्तुमुचितम्। सम्भवति च प्रयोगविध्यपेक्षितसमिदादिक्रमभेदनियमः प्रयोजनम्। न चात्र पाठक्रमस्यासामर्थ्यम्। तथा हि—क्रमेण वाक्यानि पठ्यन्ते, तेनैवाऽप्रतीतचरास्तदर्था अपि प्रकाशन्ते, कारणक्रमाऽनुविधानात् कार्यक्रमस्य, वाक्यविज्ञानजनितत्वाच्च तदर्थविज्ञानस्य, यथाऽवगमं चाऽनुष्ठानात्प्रेक्षावताम्। तेनाऽयं पाठक्रमः स्वाध्यायविधिनाऽपि प्रयोजनाऽऽकाङ्क्षः सामर्थ्येन च तदसम्भवान्निराकृतः प्रयोगविधिना समिदादिक्रमनियमलक्षणप्रयोजने व्यवस्थाप्यतामिति पाठक्रमसध्रीचीनप्रयोगविधिविधेयक्रमसिद्धिः। नानाधिकारेषु तु क्रमभेदपठितेष्वप्येकप्रयोगवचनसंग्रहाऽभावात् असम्बद्धेषु[1] न क्रमः सम्भवतीति स्वाऽध्यायविध्युत्पादितापि प्रयोजनाऽऽकाङ्क्षा तदसम्भवात्प्रलीयते।

अक्षरार्थस्तु स्वाध्यायविधिप्रत्यायितो यः पाठक्रमनियमस्तत्प्रयोजनं च तदपेक्षप्रयोगविधिरिति। आदिशब्दसूचितामेव प्रवृत्तिक्रमनियमस्य विधेयतामाह—निर्ज्ञातमिति। वाजपेये "सप्तदश प्राजापत्यान् पशूनालभते" इति श्रूयते। तत्र सप्तदशैते भागा वाजपेयाङ्गभूता वाजपेयप्रयोगविध्यापादितसहप्रयोगाश्चोदकप्राप्ताश्चैतेषु प्रोक्षणादयो धर्मास्तेऽपि च धर्मिसहभुवः सहैव प्रयोक्तव्या नैकैकशः कात्स्न्र्येन समापनीया इति समधिगतम्।

---

१. असम्बन्धेषु २ पु. पा०।

रुध्यमानः स्वावगतं च सहभावमत्यन्तमबाधमानोऽनुष्ठानविशेषं प्रतिपादय-

तत्र प्रथमपदार्थो नियमप्रमाणाऽभावाद्यत्र क्वचन पशौ प्रयोक्तव्य इति सिद्धम् । द्वितीयादिषु च पदार्थेषु संशयः । किमेते प्रथमपदार्थवदनियमेन प्रयोक्तव्याः, उत प्रथमपदार्थक्रमेण ? इति । तत्र प्रतीतिपूर्वकत्वाद-नुष्ठानस्य प्रत्ययसाम्ये च प्रथमपदार्थानुष्ठानवद् द्वितीयादिपदार्थानुष्ठानस्य क्रमनियमनिरपेक्षत्वादाद्यवद् द्वितीयादयोऽपि पुरुषेच्छाधीनाऽनुष्ठानक्रम इति प्राप्ते आह—निर्ज्ञातं क्रममनुरुध्यमानः प्रयोगविधिरनुष्ठानविशेषं प्रतिपादयतीति । कस्मादनुरुध्यते ? इत्यत आह—स्वाऽवगतं च सह-भावमत्यन्तमबाधमानः । चकारो हेतौ । वाजपेयप्रयोगविधिना हि सर्वे पदार्थाः समुच्चिताः प्रधानं प्रति प्रयुज्यमानतया संनिधाप्यन्ते । न च तेषां युगपत्प्रयोगः सम्भवतीति, यथा शक्नुयादित्युपबन्धात् । तादृशमेवाश्रयते कर्म यादृशोऽसौ संनिधिनात्यन्तं बाध्यते । न चास्ति विधेश्चोदकप्राप्तेषु प्रोक्षणादिषु किञ्चित्प्रति प्रेम द्वेषो वा, येन किञ्चित्संनिधापयेद् व्यवधाप-येद्वा । तेन तुल्यमेव सर्वेषां संनिधापनं प्रेक्षमाणः परिहरन्नपि च व्यवधि-मवर्जनीयतयाऽभिमन्यमानः पुरुषेच्छाऽधीनक्रमप्रत्ययात्पराञ्चमपि प्रथम-पदार्थप्रवृत्तिक्रमं सहकारिणमासाद्य प्रयोगमध्य एव द्वितीयादिपदार्थप्रयोगं तत्तत्क्रमेणैव नियच्छति प्रधानप्रत्यासत्तिसाम्याय । अन्यथा वैषम्यं धर्माणा-मत्यन्तव्यवधिमदभावः[1] स्यात् । तथा हि—यतः प्रभृति प्रथमपदार्थोऽनु-ष्ठितः, तत एव प्रभृति द्वितीयादीनामनुष्ठाने आद्यपदार्थप्रवृत्तिविषयसम्ब-न्धिना धर्मेण द्वितीयादिधर्मानुष्ठानानां षोडशभिः परपशुभिर्व्यवधानं स्यात् । तेनाऽवर्जनीयत्वात् प्रयोगविधिरनुमनुमन्यते एव । सप्तदशात्तु पशोरारभ्य द्वितीयादौ पदार्थे प्रतिलोमं प्रयुज्यमाने द्वाविंशता व्यवधानं स्यात् । एव-मन्येष्वपि वैषम्यं द्रष्टव्यम् । तच्च सर्वत्र समः प्रयोगविधिर्नाऽनुमन्यते यतः यस्मात् स्वाऽवगतं च सहभावं प्रधानं संनिधिर्नाऽत्यन्तं बाधते । अन्यथा वैषम्येण बाधः स्यात् । तस्मादनुष्ठानविशेषं क्रमं प्रतिपादयति प्रयोग-विधिरिति प्रयोगक्रमोऽपि विधेय इति सिद्धम् ।

अपरः कल्पः—साद्यस्के श्रूयते "सह पशूनालभते" इति । तस्य सोमविकारत्वात्ते त्रयोऽपि पशवः सोमाङ्गभूता अग्नीषोमीयसवनीयाऽनु-बन्ध्याश्चोदकप्राप्तास्तेषां त्वप्राप्तं सहत्वं विधीयते । तद्विधानाच्च प्राकृतः पाठक्रमः बाधितो भवति । सवनीयकाले च तेषां सहभावः, परिव्याणा-नन्तरं च सवनीयकालः "त्रिवृता यूपं परिवीय" इति वचनादिति सर्वमव-

---

१. व्यवधिमत्ता° पु० पा० ।

गतम्। इदं तु सन्दिह्यते, किममी सवनीयसमये त्रयोऽपि पशवः प्रयुज्यमाना अनियमेन प्रयोक्तव्याः, आहोस्वित्सवनीयस्य परस्तादग्नीषोमीयाऽनुवन्ध्यौ? इति। तत्र सवनीयसमये त्रयाणां सहाऽनुष्ठानश्रुतेः सहभावस्य सम्पादनादर्थादापतति क्रमः। तन्नियमे च परिव्याणाऽऽनन्तर्यमत्यन्तं वाध्यते। अनियमे तु पक्षे तदस्तीति नात्यन्तिको वाधः। तस्मान्नियमाऽनियमः क्रमस्याऽत्र ज्यायानिति प्राप्ते पुनरुपदिश्यते—"निर्ज्ञातं क्रममनुरुध्यमानः"। उत्पत्तावेव हि सवनीयस्य परिव्याणाऽनन्तरकालभाव इव क्रमोऽपि निर्ज्ञातः। सोऽपि वलवद्बाधकानुपनिपाते सवनीयशरीराऽवहिर्भूतोऽशक्यः परित्यक्तुम्। ननु सहभावविरोधोऽस्य वाधकः, अत आह—सवनीयस्थाने सहभावविधानात् सवनीयमुपसर्पतः पशू न तु तौ सवनीयः। तदौत्पत्तिकस्थानवता सवनीयेन सह भवन्तौ तदविरोधेन स्वसहभावं व्यवस्थापयतः, न पुनः सवनीयं स्वस्थानाच्चालयतः। तदविरोधेनाऽपि सहभावोपपत्तेः। सहभुवामेवारम्भविषयत्वात्। तदिदमवगतं सह पशूनालभत इति। विध्यवगतं सहभावमत्यन्तमवाधमान एकारम्भविषयत्वादिति स्थानक्रमस्यापि विधिविषयत्वमुक्तम्।

तथाऽपरः कल्पः—यत्र प्रधानद्वयं युगपच्चोदितं यथा "सारस्वतौ भवत एतद्वै दैव्यं मिथुनम्" इति। तत्र सन्देहः—किमेतयोरङ्गान्यनियतक्रमेण प्रयोक्तव्यानि, उत प्रधानप्रयोगक्रमेण? इति। तत्र प्रधानचोदनाऽनुविधानादङ्गचोदनानां तस्याश्च युगपत्प्रधानद्वयविधायिनीत्वेन क्रमाऽभावात् प्रधानचोदनाप्रयुक्ताऽनुष्ठानानामङ्गानामपि न क्रमनियम इति प्राप्ते पुनरुपस्थितम्—"निर्ज्ञातं क्रममनुरुध्यमानः"। स्त्रीपुंसयोः सरस्वत्याः सरस्वतश्च खलु याज्यानुवाक्यायुगलयोः क्रमसमाम्नानाद्वा असमाम्नाने वा नियमाभावेऽपि यदा यादृशः प्रधानक्रमो विज्ञातस्तमनुरुध्यमानः प्रयोगविधिरङ्गानामनुष्ठानविशेषं क्रमनियमं प्रतिपादयति यत्प्रधानं प्रथमं प्रयुज्यते तदङ्गान्यपि प्रथमं प्रयोक्तव्यानीति।

ननु प्रधानचोदना तत्तत्प्रधानद्वयविधानात्प्रधानक्रमनियमेऽप्यसमर्था किमङ्ग पुनस्तदङ्गानां क्रमनियमे, इत्यत आह—स्वाऽवगतं च सहभावमत्यन्तमबाधमानः। इदमत्राऽऽकूतम्। विधानस्य यौगपद्यमेतत् न विधेयस्य, अशक्त्यानुष्ठानोपदेशकत्वे शब्दस्याऽप्रामाण्यप्रसङ्गात्। यथा शक्नुयादित्युपवन्धात् अवश्यम्भाविनि क्रमे प्रधानयोर्द्वयोरन्योऽन्यं तदङ्गानां च प्रधानाभ्यां सहभाव प्रत्यासत्तिमात्यन्तिकीं विदधत् प्रयोगविधिर्यावानेवाऽवर्जनीयतया व्यवधिरापतति तावन्मात्रमनुमन्यते नाऽभ्यधिकं व्यवधि-

तीति प्रयोगाङ्गमेव । चिन्तितोऽसौ पुरस्तात् । सत्यम् । प्रयोज्येयत्ता । अप्रयोज्यस्तु क्रमः प्रयोगविशेष एव । अतः पूर्वेणाऽसिद्धेरनुष्ठानविशेषचिन्तेयमिति भिद्यते लक्षणार्थः ।

तुषमपि । प्रधानक्रमेण चाङ्गप्रक्रमेण यावदनुज्ञातं व्यवधानं भवति । अनियमे त्वनुज्ञाताऽतिरिक्तं भवेत्तच्च प्रयोगविधिर्न मृष्यति । ततः स्वाऽवगतसहभावपीडा मा प्रसाङ्क्षीदिति मुख्यक्रमसहायप्रयोगविधेरेवाङ्गक्रमनियमप्रमाणमिति अनियमेऽपि क्रमो विधेय इति सिद्धम् ।

तस्माच्चतुर्विधव्यापारागोचरत्वात क्रमो न चोदनालक्षण इति यदाक्षिप्तं तत्प्रयोगविशेषकत्वात् क्रमस्य परिहृतमित्युपसंहरति—तस्मात् प्रयोगाङ्गमेव क्रमः । ननु प्रयोगाङ्गं चेत् क्रमः तर्हि चतुर्थे प्रयोगचिन्तयैव चिन्तित इति नाऽध्यायान्तरं प्रयोजयतीति चोदयति—चिन्तितोऽसौ पुरस्तात् । परिहरति—सत्यम्, प्रयोगाङ्गं चिन्तितम् । किञ्चाऽसौ प्रयोज्या ये पदार्थास्तेषामपीयत्तारूपः प्रयोगाङ्गचिन्तितः क्रमस्तु न तथेत्याह—अप्रयोज्यस्तु क्रमः । अव्यापारत्वाच्च यद्यप्रयोज्यः कीदृशस्तर्हि ? इत्यत आह—प्रयोगविशेष एव । यथा चाऽनेन विशिष्यते प्रयोगस्तथोपपादितं पुरस्तात् । उपसंहरति—अतः पूर्वेणासिद्धेरनुष्ठानविशेषचिन्तेयम् । न चैवमेकलक्षणत्वमित्याह—इति । प्रयोगगतेयत्ताप्रयोगविशेषयोर्भेदाद्धेतोः सत्यपि प्रयोगविधिविषयतायास्तुर्यत्वे भिद्यते लक्षणार्थः । इतरथा तु चोदनाऽर्थविचारसाम्येन शास्त्रमेकोऽध्यायः स्यादिति । तदनेन द्वितीयादिना पञ्चमान्तेनाऽध्यायव्यूहेनोत्पत्तिविनियोगप्रयोगरूपविध्यंशनिरूपणपरेण कर्त्तव्यताविषयः कर्म साङ्गमनुष्ठेयं समधिगतम् ।

अथेदानीं कस्तस्य कर्ताधिकारीति निरूप्यते—अधिकारोऽपि कर्तृसमाहितसाधनात्मिकायाः कर्त्तव्यतायाः विधेरंश इतीह षष्ठे अधिकारांशो निरूप्यते विधेः । ननु स्वर्गकामपदश्रुतेरेव लब्धा स्वर्गकामस्य पुंसः कर्तृता स्वामिता चेति किमत्र निरूपणीयम् ? इत्यत आह—सर्वाङ्गोपसंहारसमर्थ एव उताऽसमर्थोऽपीति तद्विशेषः परीक्ष्यत इत्यर्थः । ननु संशयमापन्नः परीक्षामर्हति । न चेह संशयः । सामर्थ्यरहितस्यार्थिनोऽधिकारस्य मानान्तरनिरस्तत्वात् । अनुपलब्धाव्यवस्थायां च संशयोत्पत्तिरित्यत आह—शक्तेः शास्त्रीयत्वाच्छास्त्रीयाशास्त्रीयत्वाभ्याम् । एतदुक्तं भवति । स्वर्गकामस्य कर्तुरपेक्षितोपायतामनवगमयत् कर्मणः शास्त्रं सामर्थ्यमन्तरेण कर्तृत्वाऽनुपपत्तेर्यदि सामर्थ्यमपि गमयेत् ततस्तस्याऽपि शास्त्राऽधीनज्ञानत्वा-

षष्ठे त्वधिकारांशो निरूप्यते। सर्वाङ्गोपसंहारसमर्थस्येतरस्यापीति शक्तेः शास्त्रीयत्वाच्छास्त्रीयाऽशास्त्रीयत्वाभ्याम्। तत्र यथैवाऽपेक्षित-साधनत्वं प्रवृत्तिहेतुर्नेतरत्, तथा शक्यत्वमपि। शक्यताऽपि प्रवर्तनात्मविधि-रूपमनुप्रविशन्तीष्टसाधनतावच्छास्त्रगम्या। तथा चार्ऽथिमात्रस्येष्टसाधनम्। शक्यं च[1] शास्त्रात् प्रतीतं कर्म्म प्रमाणान्तरविरोधेन[2] यथासम्भवं व्यव-तिष्ठत इति सर्वाधिकार उक्तः। प्रमाणान्तरविषयत्वात् शक्तेरप्राप्तेः शास्त्रस्याऽर्थवत्त्वात् विधिरूपाऽनुगगताया अपि न शास्त्रार्थता। विधिस्तु

दर्थिमात्रोद्देशेन च शास्त्रप्रवृत्तेरनियमात् सर्वेषामर्थिनां तत्कर्म शक्यमभिमत-साधनं चेति शास्त्रावगमद्रढिम्ना देवर्षितिर्यगन्धबधिरशूद्रादीनामपि तत्त-दंशाऽनुष्ठानसामर्थ्यबाधनाच्च यो यथा शक्नुयात्तस्य तथा कर्माभिमतसाधन-मिति कल्पनायामविशेषेणाऽधिकार इति प्रतिभाति। अथ न सामर्थ्यं शास्त्रगम्यमपि तु मानान्तरसिद्धमुपजीव्य कर्तुरभिमतसाधनतामात्रमवबोध-यति शास्त्रम्, ततस्तन्मानान्तरं यमेवार्थिनमुपनयति तत्रैव शास्त्रं व्यवतिष्ठते, तदपेक्षं हि तदशास्त्रमिति। तदनेन क्रमेण शक्तेः शास्त्रीयत्वाऽशास्त्रीयत्व-पर्यवसितो विचारः।

पूर्वपक्षं गृह्णाति—तत्र यथैवाऽपेक्षितसाधनत्वं प्रवृत्तिहेतु नेतरत् तथा शक्यत्वमपि। लोकत एवाऽन्वयव्यतिरेकाभ्यामवगतमिति। शक्यताऽपि प्रवर्त्तनात्मविधिरूपमनुप्रविशन्तीष्टसाधनतेव शक्यतायास्तदपेक्षं शास्त्रम-प्रमाणं स्यादिति भावः। ननु नित्यवदङ्गाम्नानस्याऽविकल्पत्वादङ्गसाकल्यवत् प्रधानसामर्थ्यमपि विधिगोचरः। न च तत्सहस्रेणापि शास्त्रैः तिर्यगादीन् प्रति शक्यं शक्यतामापादयितुम्, इत्येतन्निराकर्तुमुपसंहरति—तथा च—शास्त्रगम्यसमीहितसाधनताऽवच्छेद्यत्वे नियामकस्य प्रमाणस्याऽभावात् अर्थिमात्रस्येष्टसाधनम्। शक्यं च शास्त्रात् प्रतीतं कर्म केवलं क्वचित् प्रमाणान्तरविरोधदर्शनादप्रामाण्यभिया प्रमाणान्तरविरोधेन यथासम्भवं = यो यावन्ति शक्नोत्युपसंहर्त्तुमङ्गानि तस्य तावद्भिरेवाङ्गैस्तत्प्रधानं शक्यम-भिमतसाधनमिति व्यवतिष्ठते इति शब्दाऽवगताऽर्थिमात्रद्रढिम्ना सर्वाऽधिकार उक्तः।

सिद्धान्तमुपक्रमते—प्रमाणान्तरविषयात्वात्तु शक्तेरप्राप्तेः शास्त्रस्याऽर्थ-वत्त्वाद्विधिरूपानुगताया अपि न शास्त्रार्थता। तु शब्दात्पूर्वपक्षं व्यावर्त्तयति

---

१. शक्तमपि मू० पु० पा०। २. विधानेन मू० पु० पा०।

मानान्तरगम्यशक्त्यपेक्षः शब्देन प्रतीयते। न चैवं सापेक्षत्वदोषः, यथा मानान्तरगोचरपदार्थरूपाऽपेक्षित्वे। अन्यथा सर्वः सर्वाङ्गोपसंहारसमर्थः स्यात्। कुतो यथासम्भवं व्यवस्था? प्रमाणान्तरविरोधत्वादिति चेत्, हन्त, तर्हि शब्दस्याप्रामाण्यम्। लक्षणप्रमाणान्तरसिद्धो यः पदार्थस्वरूपविशेषोपायप्रतिपत्तिरनन्यगोचरः शास्त्रविषयोऽभ्युपगमनीयः। तथा च नाशक्तस्य प्रवृत्तिहेतुरकर्तृकत्वादिति। नाऽसमर्थस्तत्र प्रवर्त्यो गम्यत इति समर्थाऽधिकारः सति चाऽधिकारे स कस्येति स एव पुरस्तात् प्रतिपादितः। कथं पुनस्तस्याऽभावः शङ्कितः? इह केचित्।

साध्यत्वात्कर्तुराख्यातैर्व्यापाराः सिद्धसाधनाः।
प्राधान्येनाभिधीयन्ते फलेनापि प्रवर्त्तिताः॥

भवेदेतदेवं यदि शक्तिः शास्त्रतोऽवगम्येत, न त्वेतदस्ति। अप्राप्तप्रापणं हि शास्त्रम्। न चाऽभिमतसाधनतावत्प्रामाणान्तरेणाऽप्राप्ता शक्तिः। तस्माद्विधिरूपाऽनुगतामपि शक्ति प्राप्तत्वान्न शास्त्रं गोचरयति, किन्तु तां मानान्तरसिद्धामुपजीव्य कर्तृसमाहितसाधनतामप्राप्तामवगमयतीत्याह—विधिस्तु मानान्तरगम्यशक्त्यपेक्षः शब्देन प्रतीयते। नन्वेवं सापेक्षत्वादप्रामाण्यप्रसङ्गः शास्त्रस्येत्यत आह—न चैवं साऽपेक्षत्वदोषः। यथा मानान्तरगोचरपदार्थरूपाऽपेक्षित्वे स्वविषये हि मानान्तराऽपेक्षा प्रामाण्यं व्याहन्ति न स्वसामग्र्या, अतिप्रसङ्गात्। न च शक्यता विध्यनुगताऽपि शास्त्रस्य विषय इत्युक्तमित्यर्थः। अन्यथा यदि शक्तिविषयं शास्त्रं स्यात् ततो नियामकप्रमाणाभावादर्थिपदेन सहैव सर्वेषामर्थिनामुपस्थापनात्सर्वः सर्वाङ्गोपसंहारसमर्थः स्यात् कुतो यथासम्भवं व्यवस्था।

पूर्वपक्षी शङ्कते—प्रमाणान्तरविरोधादिति चेत्। अर्थिपदसमभिव्याहृतेन विधिना सर्वेषां तिर्यगादीनां सामर्थ्यप्रतिपादनात् तस्य च मानान्तरविरोधात्। उत्तरम्—हन्त तर्हि शब्दस्याऽप्रामाण्यम्। लक्षणप्रमाणान्तरसिद्धो यः पदार्थस्वरूपविशेषः शक्यतालक्षणः तदुपायप्रतिपत्तिर्यस्य शास्त्रविषयस्य सोऽनन्यगोचरोऽभ्युपगमनीयः। तथा च शक्यताग्राहिणि नियामके प्रमाणे सति समर्थाधिकारसिद्धिः। यत् पुनराद्ये विचारितं किमधिकारोऽस्ति न वेति, तस्याऽत्र सङ्गतिमाह—सति चाऽधिकारे धर्मिणि कस्य समर्थस्येति तद्विशेषनिरूपणा घटते नाऽन्यथेति स एवाऽधिकारसद्भाव एव पुरस्तात् प्रतिपादितः। ननु स्वर्गकामो यजेतेत्येवमादिभ्यः स्वर्गकामादेरधिकारोऽवगम्यत इति कथं पुनस्तस्याभावः शङ्कितो येनऽसौ विचारणीयः स्यात्, तत्राह—इह केचित्।

क्रियाप्रधानमेकार्थं वाक्यमिति। क्रियैव हि भाव्यते स्वभावसिद्धं द्रव्यं गुणमिति वदन्तः फलस्याऽसमन्वयं वाक्ये मन्यन्ते। तथा च फलाऽभावादधिकाराऽभावः। न ह्यफलेषु कर्म्मसु कश्चिन्नियोज्यः स्वामी वा। कथं पुनरसमन्वयः फलस्य? कर्म्मणः साध्यत्वप्रतीतेर्द्वयोः साध्ययोरसमवायात्। तथा हि। यदि यागादय एव क्रियास्त एव पूर्वाऽपरीभूताः प्रधानात्मना गम्यन्ते। अथापि तदतिरेकिणी क्रिया सा च सकर्म्मिका भाव्यप्रधाना। तथापि त एव। कुतः? पौर्वापर्यनियमात्। प्रत्ययस्य प्रकृत्यर्थाऽभिसम्बन्धिस्वार्थाभिधायित्वात्साध्यत्वेन प्रतीतेः। अन्यथा द्रव्य-

साध्यत्वात् कर्तुराख्यातैर्व्यापाराः सिद्धसाधनाः।
प्राधान्येनाऽभिधीयन्ते फलेनापि प्रवर्त्तिताः॥

व्याचष्टे—सर्वमेव हि क्रियाप्रधानमेकार्थमेकप्रयोजनं वाक्यं शब्दप्रवृत्त्यनुसारात्। वस्तुतोऽपि क्रियैव हि स्वभावतः साध्यरूपा भाव्यते, स्वभावसिद्धं तु द्रव्यं भूतं भव्यायेति न्यायात् तां प्रति गुणभूतं स्वर्गादीति वदन्तः फलस्याऽसमन्वयं मन्यन्ते। फलत्वेन तु सम्बन्धे स्वर्गादेस्तत्प्राधान्यात् क्रियाया न प्राधान्यम्, उभयप्राधान्ये च एकार्थत्वं लोकाऽवगतमपहीयेतेति भावः। ननु मा भूत्फलं किं नश्छिन्नम्? इत्यत आह—तथा च फलाभावात् अधिकाराभावः। कस्मात्? न ह्यफलेषु कर्मसु कश्चिन्नियोज्यः स्वामी वा। तदेव च तस्य स्वं भवति यद्यस्योपकारे वर्तते। न चाऽफलं तथेति कथं स्वं भवति स्वामिनः? स्वामी चाऽधिकारीत्युच्यते। न चाऽफलं प्रयोगमपि प्रेक्षावान् प्रतिपद्यते न नियोज्योऽपीत्यर्थः।

ननु भावनाप्रधानं वाक्यम्, भावनायाश्च भाव्याकाङ्क्षायां भाव्यत्वेन फलं संभन्त्स्यते इति चोदयति—कथं पुनरसमन्वयः फलस्य? समाधत्ते—कर्मणो धात्वर्थस्य साध्यत्वप्रतीतेः। अथ फलकर्मणोः कस्मान्न साध्ये कर्मणी? इत्यत आह—उभयोः साध्ययोरसमवायात्। एकस्माद्वाक्याद्द्वावयोरपि कर्मैव साध्यं युक्तं, न पुनः फलमित्यत आह—तथा हि। यदि यागादय एव क्रियाः तथापि त एव पूर्वाऽपरीभूताः प्रधानात्मना गम्यन्ते न तदा भाव्यान्तराऽपेक्षाऽस्ति। अथापि तदतिरेकिणी क्रिया सदा सकर्मिका, तस्या भाव्याऽपेक्षायां सत्यामपि भाव्यप्राधान्यात्तथापि तएव यागादयो न तु फलम्। ननूभयभाव्यसम्भवे को विशेषः? इत्याशयवान् पृच्छति—कुतः? पौर्वापर्यनियमात्। प्रत्ययस्य प्रकृत्यर्थाऽभिसम्बन्धिस्वार्थाऽभिधायित्वात् धात्वर्थस्य च साध्यत्वेन प्रतीतेः। सोऽयं फलाद्विशेष इत्यर्थः। अन्यथा यदि धात्वर्थो न साध्यः स्यात्ततो द्रव्यगुणशब्दादविशेषात्। सिद्धार्थत्वेन

गुणशब्दाऽविशेषात् अनभ्युपगमाच्च "येषामुत्पत्तौ"विति। साक्षात्करणाभिसम्बन्धाच्च काष्ठैः पचतीति। ननु कर्म्मान्तराऽभिसम्बन्धान्नैवं स्यात्? न। कर्म्मण्यपि कारकस्मृतेः कारकत्वेनैव क्रियाऽन्वयात्। शब्देन भूततयोपादानात्। ईप्सिततमत्वं तु प्रमाणान्तरविषयः। तथा दृष्टफलेष्वस्तु फलवत्ता, यागादिषु तु न फलं स्वर्गादिस्तथाऽसमन्वयान्मानान्तरस्य चाऽभावात्। एवं च तानि द्वैधमित्युक्तम्। अन्यथैकध्यमेव स्यात्।

एवं तावद् द्रव्याणां कर्म्मसम्बन्धे[1] गुणत्वेनाऽभिसम्बन्धो न फलत्वेन

हि द्रव्यगुणशब्दा आख्याताऽत्साध्याऽभिधायिनो भिद्यन्ते। आख्यातानां महर्षिणां येषामुत्पत्तौ स्वे प्रयोगे रूपं नोपलभ्यते तान्याख्यातानीत्यनेन सूत्रेण। न च तद्भावनाऽभिप्रायं नामपदार्थस्य धात्वर्थसम्बन्धे दृष्टार्थतयाऽपेक्षितसम्बन्धप्रतिपादनार्थत्वात्। अतश्च साध्यत्वं धात्वर्थस्य साक्षात्करणाऽभिसम्बन्धात् काष्ठैः पचतीति। न खल्वसाध्यस्य साधनसम्बन्ध उपपद्यते। न चाऽऽख्यातवाच्यायां भावनायां करणत्वं काष्ठानां संभवति, तस्यास्त्वन्मते समानपदोपात्तपाककरणाऽवरोधात्। न च पाकाऽऽक्षिप्तायां सम्बन्धः। साक्षात्पाकसम्बन्धप्रतीतेः। न खलु मृदा घटः काष्ठैः पचतीति समः सम्बन्धाऽवगमः। तस्मात्काष्ठैरिति साक्षात्पाकादिसम्बन्धात् ते एव स्वरूपेण साध्या इति साम्प्रतम्।

ननु यत्र तर्हि काष्ठैरोदनं पचतीति कर्मान्तरं प्रतीयते तत्र न धात्वर्थस्य साध्यता स्यात्, न ह्येकस्मिन्वाक्ये साध्यद्वयमुपपद्यते, इति चोदयति—ननु कर्मान्तराऽभिसम्बन्धान्नैवं स्यात्। समाधत्ते—न, कर्मण्यपि कारकत्वस्मृतेः। कारकत्वेनैव क्रियाऽन्वयात्। अयमभिसन्धिः। उभयमस्त्योदनादौ कारकत्वमीप्सिततमत्वं च। तत्र कारकत्वेनाऽन्वये न क्रियासाध्यत्वहानिरिति। न च शब्दादोदनादिः पाक इव पच्यते इत्यत्र पूर्वाऽपरीभूतोऽवगम्यते, किन्तु सिद्धतयेत्याह—स्वशब्देन भूततयोपादानात्। ननु यदि न शब्दमीप्सिततमत्वं कुतस्तत्प्रतीतिः? इत्यत आह—ईप्सिततमत्वं तु प्रमाणान्तरविषयः। तथा च दृष्टफलेषु ओदनपाकादिष्वस्तु फलवत्ता, यागादिषु पुनरशब्दार्थः फलं स्वर्गादिः कुतः? तथा च फलत्वेनाऽसम्बन्धान्न चोदनादि तत्र भवितुमर्हति। मानान्तरस्य चाऽसम्भवात्। एवं च केषांचित्कर्मणां फलानां साध्यत्वेन प्रधानत्वं ज्योतिष्टोमप्रयाजादीनाम्, केषांचिच्च मानान्तरसिद्धफलानामवघातादीनां फलं प्रति गुणत्वेन तानि द्वैधं गुणप्रधानभूतानीत्युक्तं महर्षिणा। अन्यथा तु सर्वेषां फलवत्त्वेऽभ्युपगम्यमाने चैकरूपमेव स्यात्सर्वेषाम्, फलं प्रति गुणत्वादवघातादिवदिति।

१. संयोगे इति पाठान्तरम्।

इति युक्तम्। वस्तुतश्च न[1] सम्बन्धः फलत्वेन, पुरुषप्रयत्नस्य यागादिविषयत्वात्स्वर्गाद्यसम्बन्धाद्यागादेश्च व्यापारान्तराऽदर्शनात्करणत्वाऽनुपपत्तेः। भूतेरव्यापारत्वात्। शक्ये[2] च पुरुषनियोगात्स्वर्गं कुर्यादित्यनुपपत्तेः। अवश्यकर्त्तव्यताप्रसङ्गाच्च। फलस्य चाऽविधेयत्वोपगमात्। यागादेश्च विधेयत्वाश्रवणात्। प्रवृत्तिविषये हि विधिर्न साक्षाद्यागे फले वा। प्रवृत्तिश्च भावना। यद्विषयायाश्च प्रवृत्तेर्हेतुः शब्दः स विधिरित्युच्यते। तत्राख्यातोपादाना भावना नास्त्येव, या विधीयेत। सत्यामपि भिन्नभावनायां

प्रमेयं परिशोध्य सूत्रमत्र योजयति—एवं तावत् द्रव्याणां कर्मसंयोगे गुणत्वेनाऽभिसम्बन्धो न फलत्वेन स्वर्गादीनां शब्दत इति युक्तम्। न केवलं शब्दतो वस्तुतश्च न सम्बन्धः फलत्वेन। कुतः? पुरुषप्रयत्नस्य भावनाया यागादिविषयत्वाद्धेतोः स्वर्गाद्यसम्बन्धात्। न जातु पुरुषः स्वर्गे व्याप्रियमाण उपलभ्यते, अपि तु यागे। ततश्च याग एवाऽस्य साध्यो न स्वर्गः। अथ पुरुषप्रयत्नसाध्योऽपि यागः फलं प्रति करणं भविष्यति, ततः सम्बन्ध उपपत्स्यत इत्यत आह—यागादेश्च व्यापान्तराऽदर्शनात् करणत्वाऽनुपपत्तेः। करणत्वं हि क्रियायोगेन व्याप्तम्, स चाऽदर्शनाद् यागादेर्निवृत्तः करणत्वमपि निवर्त्तयतीत्यर्थः। ननु भूतिरेव भाव्यानां यागादीनां व्यापारः, ततश्च कारकत्वं करणत्वं चेत्यत आह—भूतेरव्यापारत्वात्। व्यापारो हि व्यापारवत्समवायिकारणकः, सिद्धं च समवायिकारणम्, असिद्धश्चेद्भाव्यो नाऽस्मिन् भूतिः समवेति। न खलु गगनकुसुमादयो व्यापारवन्तः। सिद्धोऽपि भविता न भवितुमर्हति। न जातु वियद्भवति। तस्मान्न भूतिर्व्यापार इति। अपि च भाव्यत्वे स्वर्गस्य तत्र पुरुषो नियोज्यः। न च तेनाऽसौ शक्य इत्याह—शक्ये च पुरुषनियोगात् स्वर्गं कुर्यादित्यनुपपत्तेः। अपि च इच्छातन्त्रत्वे स्वर्गादीनाम्। इच्छायाश्चाऽवश्यम्भावनियमाऽभावान्नावश्यकर्त्तव्यताप्रसक्तिः। विधितन्त्रत्वे त्विच्छाया अतन्त्रत्वात्तस्य च नित्यविधायकत्वात् अवश्यकर्त्तव्यता स्यादित्याह—अवश्यकर्त्तव्यताप्रसङ्गाच्च। फलस्य चाऽविधेयत्वोपगमात्। तस्य लिप्साऽर्थलक्षणेति चेदेवासौ ममैतत्कर्त्तव्यमिति। यागादेश्च विधेयत्वाऽश्रवणात्। यथाह उपायं तु न वेद। अतस्तदाकाङ्क्षात इदमुपदिश्यते यागेनेति। युक्तं चैतदित्याह—प्रवृत्तिविषयो हि विधिः प्रवर्त्तनारूपत्वान्न साक्षाद् यागे फले वा। प्रवृत्तिश्च भावना। यद्विषयायाश्च प्रवृत्तिर्हेतुः शब्दः अन्यनिमित्तत्वादिच्छानिमित्तत्वात्फले प्रवृत्तेरिति। अपि च विषयरूपाप्रवृत्तिर्विधातव्या, न चाऽसावुपायविषयाया

१. सम्बन्धत्वेन, पुस्तकपाठः। २. अप्राप्ये मू० पु०।

न भावनाकर्मणोर्यागफलयोरसमवायः, न विधिसामर्थ्यात् अन्यदपि फलम्, तस्याप्येवम[1] समवायात्। वैरूप्यात्साधनभावस्य दुरवबोधत्वात्।

नाऽर्थापत्तितः। चोदनालक्षणत्वहानेः। तस्याः साध्यत्वपर्यवसानात्। अफलस्य कर्मणो लोके साध्यत्वाऽदृष्टेः। साधनत्वस्य च साध्यत्वपुरःसरत्वादर्थात्तदाक्षेपायोगात्। साध्यत्वस्य पुरोभाविनः साधनत्वाऽऽक्षेपाऽसामर्थ्यात्। आक्षेपेऽपि सिद्ध्यर्थं कर्तृरूपस्य काणत्वाऽभावात्। कथं

अन्या फलविषयाऽस्तीत्याह—द्वितीया च भावना नास्त्येव, या फलविषया विधीयते। भवतु वा, तथापि प्रकृतं न सिध्यतीत्यत आह—सत्यामपि द्वितीयायां भावनायां न भावनाकर्मणोर्यागफलयोरसमवायः। अथ मा भूद् भिन्नभावनाकर्मणो भूतेन फलेन सम्बन्धो यागश्च विधिसामर्थ्यात्तु विश्वजिदादिवत्कल्पितेन फलान्तरेण संभन्त्स्यत इत्यत आह—न विधिसामर्थ्यादन्यदपि फलम्। कुतः? तस्याप्येवं श्रुतफलपदासमवायात्। कुतः? वैरूप्याद्धेतोः साधनभावस्य दुरवबोधत्वात्। न जातु सकृदेवश्रुतो यागः साध्यं साधनं चेत्युपपद्यते, विरोधात्। तस्मात् साधनभावो दुरवबोधः साध्यत्वेन श्रुतस्य यागस्येति।

स्यादेतत्। चोदनातः साध्यत्वेन प्रतीतस्य यागादेरर्थापत्तितः फलं प्रति साधनत्वं गम्यते, मा भूद्वैरूप्यम्, इत्यत आह—नार्थापत्तितः। कुतः? चोदनालक्षणत्वहानेः। फलसाधनता चेदर्थापत्तिगम्या चोदनालक्षणत्वं न स्यात्। ततश्च चोदनैवेति प्रतिज्ञाव्याघातः। न चाऽर्थापत्तेश्चोदनामूलतया तद्विषयश्चोदनालक्षण इति साम्प्रतम्। चोदनाया यागादिसाध्यमात्रपर्यवसितायाः फलसाधनतामन्तरेणोपपत्तेरर्थापत्तिमूलत्वाऽभावादित्याह—साध्यत्वपर्यवसानात्। अथाऽफलस्य साध्यत्वं चोदनाप्रतीतमनुपपन्नमिति चोदनैव साध्यत्वप्रतिपादिकाऽपर्यवस्यन्तो फलकल्पनाबीजमिति तत्राह—अफलस्य कर्मणो लोकसाध्यत्वेनाऽदृष्टेः। यत्किल धर्मशास्त्रकारो निषेधति 'न कुर्वीत वृथाचेष्टा'मिति। ननु यथा परेषां साधनत्वेन शब्दतः प्रतिपन्ना यागादयः साध्यतामाक्षिपन्त्यात्मनः तथाऽस्मन्मतेऽपि साध्यत्वेन प्रतीताः साधनतामात्मन आक्षेप्स्यन्तीत्यत आह—साधनत्वस्य यागादेः साध्यत्वपुरःसरत्वात्। अकृतस्य तत्त्वाऽनुपपत्तेः।

अथाऽयमाक्षेपयोगः शब्दसाधनत्ववादिनो मते। शब्दसाध्यत्ववादिनां तु मते साध्यत्वस्य पुरोभाविनः साधनताक्षेपाऽसामर्थ्यात्। सुगमम्। यदि मन्येत साध्यत्वमपि सिद्धिं प्रति कारकत्वमन्तरेण नोपपद्यत इति साधनत्व-

१. प्येवं समवायात् पु० पाठः।

तर्हीदानीं विधिः ? किमत्र कथम् ? प्रवर्त्तनामात्रं विधिर्न्न पुरुषार्थानर्थौ स्पृशति । कुतः ? प्रतीतेरव्यभिचाराच्च । तथा च लिङादिभ्यः प्रेरणाऽवगमः । यद्यपि चेष्टसाधनता प्रवृत्तिहेतुः, शब्दस्त्वनामृष्टतद्रूपः प्रवृत्तिहेतुमात्रमभिनिविशते । तदाकाराऽवबोधात्प्रैषादिषु च तदभावात् । प्रवर्त्तनामात्रस्य चाऽव्यभिचारात् । अनेकार्थत्वदोषात् । न च तद्रूपबोधादेव तद्बोधः । मोहादेरपि सम्भवात् ।

नन्वेवमपि प्रवर्त्तनायाः प्रवर्त्यविशेषविषयत्वात्तस्यैव पूर्वमपेक्षणात्

माक्षेप्स्यतीति, तत्राह—आक्षेपेऽपि सिद्धयर्थं कर्तृरूपस्य सिद्धः कारणत्वाऽभावात् । उपपादितमेतत् यथा न साध्यं कारकमिति ।

अभ्युपेत्योच्यते, भवतु कारकम्, अत एव चाऽऽक्षिपतु तस्य तथापि सिद्धिं प्रति कर्तृत्वात् तदेवाक्षिपेन्न करणत्वमित्यर्थः । यदि यागादीनां साध्यत्वमेव न चाऽभिमतसाधनत्वं कथं तर्हीदानीं विधिः ? पूर्वपक्षी ब्रूते—किमत्र कथम् ? प्रवर्त्तनामात्रं विधिः, नाऽभिमतसाधनत्वम्, ततश्च न पुरुषार्थाऽनर्थौ संस्पृशति । कुतः ? उत्तरम्—प्रतीतेः । नन्वभिमतसाधनतापि प्रतीयत इत्यत आह—अव्यभिचाराच्च । प्रतीतेरिति विवृणोति—तथा च लिङादिभ्यः प्रेरणाऽवगमः । नन्वस्तु, किन्त्वसौ समीहितसाधनतानिवन्धन इत्यत आह—यद्यपि चेष्टसाधनत्वं प्रवृत्तिहेतुः शब्दस्त्वनामृष्टतद्रूपः प्रवृत्तिहेतुमात्रमभिनिविशते । कुतः ? तदाकाराऽवबोधात् । अव्यभिचारादिति व्यतिरेकमुखेन विवृणोति—प्रैषादिषु च तदभावात् । अभिमतसाधनत्वाऽभावात् । प्रवर्त्तनामात्रस्य चाऽव्यभिचारात् क्वचित्प्रेषणा क्वचिदध्येषणा क्वचिदभिमतफलसाधनता लिङर्थो भविष्यति, तत्र तत्र प्रतीतेरित्यत आह—अनेकार्थत्वदोषात् । न खलु प्रवर्त्तनामात्रत्वे सम्भवत्यनेकार्थता युक्ता । अनेकशक्तिगौरवादित्यर्थः । ननु नाऽभिमतसाधनता व्यभिचरति । अभिमतसाधनता सर्वत्र प्रैषादिषु साक्षात्पारम्पर्येण वा विद्यत इत्यत आह—न च तत्राऽवबोधादेव अभिमतसाधनता बोधहेतुरित्यर्थः ।

अत्रान्तरे मीमांसकैकदेशी प्राह—नन्वेवमपि प्रवर्त्तनायाः प्रवर्त्यविशेषविषयत्वात्तस्यैव पूर्वमपेक्षणात् करणाद्यपेक्षया पूर्वत्वम् । न च स्वर्गकामादिपदमपेक्षां पूरयितुं न क्षममित्याह—स्वर्गकामादिपदानां च तत्समर्पणसामर्थ्यात् । स एव प्रवर्त्य एव तैः समर्प्यते[1] न साधनाकर्मविशेषः । कर्मणः पश्चात्तु कर्तृतया सम्भन्त्स्यत इति भावः ।

१. समर्थ्यते पु० पाठः ।

स्वर्गकामादिपदानां च तत्समर्पणसामर्थ्यात् स एव तैः समर्प्यते न साधनविशेषः। किमतः? कामिनोऽधिकारः प्रतिपन्नो[1] भवतीति। एवं नाम, न तु प्रवृत्तिसिद्धिरसति फले। प्रवृत्त्यर्थश्चाऽधिकारः। नन्वानर्थक्यमुपदेशस्यैवं स्यात्। सत्यर्थे नाऽऽनर्थक्यमसति तु किमन्यत्? आत्मविज्ञानाधिकारसिद्धिप्रयोजनत्वाद्वा नाऽऽनर्थक्यम्। एष खलु पुरुषः स्वभावतो रागाद्याविष्टो दृष्टफलैरुपायैर्विषयोपार्जनं प्रवर्त्तमानस्तदाक्षिप्तमनास्तत्पक्षपाती न विगलितविषयप्रपञ्चमात्मतत्त्वमुपदिष्टं प्रत्येतुं परिभावयितुं वा अलम्। कर्म्मोपदेशैस्त्वनुशिष्टः कृतकामनिबर्हणः स्वाभाविक्याः प्रवृत्तेर्निवृत्तः शास्त्रीयायां कर्मप्रवृत्तौ व्यवस्थितो दान्तः कामैरबाधितमनाः

पूर्वपक्षी वक्ष्यमाणाऽभिसन्धिः पृच्छति-किमतः? एकदेशिन उत्तरम्—कामिनोऽधिकारः प्रतिपन्नो भवति। ततश्च यजेत स्वर्गकाम इत्युपपन्ना संगतिरित्यर्थः। पूर्वपक्षी दूषयति—न ह्यफलेऽधिकार इत्युक्तम्, अभ्युपगम्याऽप्युच्यते—एवं नाम, न तु प्रवृत्तिसिद्धिरसति फले। ननु मा भूत्प्रवृत्तिः, अधिकारस्तु सिध्यतीत्यत आह—प्रवृत्यर्थश्चाऽधिकारः। प्रवृत्तिश्चेन्नास्ति व्यर्थोऽधिकार इति। नन्वानर्थक्यमुपदेशस्यैवं स्यात्। उत्तरम्—सत्यर्थे नाऽऽनर्थक्यम्। असति तु किमन्यदानर्थक्यं स्यात्। अथवैवमप्यानर्थक्यं नास्तीत्याह—आत्मविज्ञानाधिकारसिद्धिप्रयोजनत्वाद्वा नाऽऽनर्थक्यम्। कथं पुनरेतत्प्रयोजनाः सर्वे विधयः? इत्यत आह - एष खलु पुरुषः क्षेत्रज्ञः स्वभावतो रागाद्याविष्टः। यथाह भगवानक्षपादः 'वीतरागजन्माऽदर्शनादि'ति। अतो दृष्टफलैरुपायैः सेवादिभिः यद्विषयोपार्जनस्तस्मिंस्तु प्रवर्त्तमानस्तदाक्षिप्तमनास्तत्पक्षपाती सदैव तत्प्रयुक्तः। अतो न विगलितविषयप्रपञ्चमात्मतत्त्वम् उपदिष्टमपि प्रत्येतुं निश्चेतुं परिभाषयितुं समनस्कानीन्द्रियाणि प्रत्याहृत्यात्मन्येव बुद्धिधारां[2] विधातुमलं, किमङ्ग पुनः साक्षात्कर्तुम्।

भवत्वेवम्, तथापि किं कर्मोपदेशैः? इत्यत आह—कर्मोपदेशैस्त्वनुशिष्टस्त्रैवर्णिको ऽष्टवर्षादिर्ब्राह्ममुहूर्त्तोपक्रमायां प्रदोषपर्यवसानायां प्रतिवासरं कर्मपद्धतौ स्थितोऽपि स्तेयद्यूतस्त्र्यभिसरणमृगयाद्याहृतहृदय आत्मजयोनिजपरिजनचिन्तायास्तदनुशासनात् कृतकामनिवर्हणः ततः स्वभाविक्याः प्रवृत्तेर्निवृत्तः परिजनचिन्तायामिव शास्त्रीयायाम् अहरहर्ब्राह्ममुहूर्त्तोपक्रम-

---

१. प्रतीतः—मू० पु० पा०। २. विरोधि मू० पु० पा०।

शक्नोति तादृशमप्यात्मतत्त्वमुपदिष्टं प्रत्येतुं परिभावयितुं च। दृष्टेनैव कर्म्मविधय आत्मज्ञानाधिकारप्रयोजनाः। एवं च शास्त्रत्वं नियोज्याऽनुशासनाद्धितोपदेशाद्वा। कामे तु साध्ये रागाद्यभिव्याप्तायां स्वाभाविक्यां प्रवृत्तावुपायदर्शनेन स्वहस्तदानाच्छब्दः शास्त्रतामतिवर्त्तते। न हि तदा पुरुषोऽनुशिष्टः स्यात्। स्वच्छन्दचेष्टायां त्वनुज्ञायेत। अथापि हितमुपदिशत् शास्त्रं तथापि प्रकृत्या दुःखाऽनुषक्तेषु काम्येषूपायदर्शनेन प्रवर्तयन्न हितोपदेशी शब्दः स्यात्।

नन्वेवं ज्ञानविधिरप्यनुशासनमात्रमेव स्यात्। न। ज्ञानस्य दृष्टार्थत्वात् स्वभावतश्च गुणभूतत्वात्संमार्गादिवत्। इममेव चार्थमभिप्रेत्य कर्त्तव्यश्च

प्रदोषपर्यवसानयां कर्मपद्धतौ व्यवस्थितो दान्तः कामैरबाधितमनाः शक्नोति तादृशमपि विगलितविषयप्रपञ्चमपि आत्मतत्त्वं प्रत्येतुं परिभाषयितुं च। ननु साध्या क्रिया यथा स्वर्गादिना साध्येन न सम्बध्यते तथाऽऽत्मज्ञानाऽधिकारसिद्धया ऽपि, कः खल्वनयोर्विशेषः? इत्यत आह—एवं दृष्टेनैव कर्मविधय आत्मज्ञानाऽधिकारप्रयोजनाः। सत्यम्, न शाब्दः सम्बन्धः प्रमाणान्तरेण तूपनीयमानो न शब्देन प्रतिक्षिप्यते व्रीहीनवहन्तीतिवदिति भावः। एवं च शास्त्रत्वं नियोज्याऽनुशासनात् प्रवृत्त्यन्तरोपदेशेन परिणामतापसंस्कारदुःखरूषिताभ्यः प्रवृत्तिभ्यो ऽर्थान्निवर्त्तनमनुशासनं तस्मादित्यर्थः।

प्रकारान्तरमाह—हितोपदेशाद्वा। नित्यानन्दमयात्मज्ञानाऽधिकारसिद्धिप्रयोजनं कर्मज्ञानं तस्योपदेशादित्यर्थः। इतरथा तु न शास्त्रत्वमाम्नायस्य भवेदित्याह—कामे तु काम्यत इति स्वर्गादिः कामः तस्मिन्साध्ये रागाद्याक्षिप्तायां स्वाभाविक्यां प्रवृत्तावुपायदर्शनेन स्वहस्तदानाच्छब्दः शास्त्रतामतिवर्त्तते। इच्छन्नपि कथंचिदुपायाऽपरिज्ञानान्न प्रवर्त्तेत, उपायज्ञानादेव प्रवृत्तेः। अतस्तादृशमपि चेच्छास्त्रं किमन्यदशास्त्रं भविष्यतीत्यर्थः। शास्त्रतां कस्मादतिवर्त्तते? इत्यत आह—न हि तदा पुरुषोऽनुशिष्टः स्यात्। स्वच्छन्दचेष्टायां त्वनुज्ञायेत। एवं तावदहितनिवर्त्तनालक्षणं शास्त्रत्वं न स्यादित्युक्तम्। अथापि हितमुपदिशच्छास्त्रं तथापि प्रवृत्त्या दुःखानुषक्तेषु काम्येषु स्वर्गादिषूपायदर्शनेन प्रवर्त्तयन्न हितोपदेशो शब्दः स्यात्।

चोदयति—नन्वेवं ज्ञानविधिरप्यनुशासनमेव स्यात्। न हि तत्रापि स्वर्गादिवन्मोक्षः साध्यतया सम्बन्धुमर्हति। नापि मोक्षमाणो ऽधिकारीत्यर्थः। परिहरति—न, ज्ञानस्य दृष्टार्थत्वात्। तच्चोक्तं पुरस्तात्स्वभावतश्च

सुखवानकर्त्तव्यो दुःखवानित्याद्युक्तम् । एषोऽर्थः । स्वर्गादेः क्षणिकत्वादिदुःखानुषङ्गात्तदुपायो यागो दुःखतया न कर्त्तव्य एव स्यात् । प्रलीनाऽशेषदुःखप्रपञ्चाऽवभासप्रयोजनस्तु सुखफलः कर्त्तव्यः ।

नन्वेवं वर्णयता ऽतिसृष्ट[1] एवाधिकारो भवति । सत्यम् । नान्यस्तु निरूप्यते, नाऽभ्युपगमः । न च यागं कुर्यादित्यर्थो यथा ऽधिकारस्तथोपरिष्टाद्वक्ष्यते ।

अत्रोच्यते—

विशेषा एव शब्दार्था दृष्टरूपान्वयेऽपि हि ।
न च प्रवर्त्तनाबोध इष्टशक्तेर्विनाऽर्थवान् ।।

गुणभूतत्वात्संमार्गादिवत् । यथा संमृज्यमानपदार्थतन्त्रः संमार्गः तथा ज्ञेयतन्त्रं विज्ञानमित्येतदनुभवसिद्धमेतदित्यर्थः । इममेव चार्थमभिप्रेत्य कर्त्तव्यश्च सुखवान् अकर्त्तव्यश्च दुःखवान् इत्याद्युक्तमत्रभवता । ननु स्वर्गादिनरकादिफलत्वेऽपि कर्त्तव्यताकर्तव्यतयोर्वचनमेतद् भाष्यकारीयमुपपद्यत एवेत्यत आह—एषोर्थः । स्वर्गादेः क्षणिकत्वादिदुःखानुषङ्गात्तदुपायो यागो दुःखतया न कर्त्तव्य एव स्यात् । प्रलीनाऽशेषदुःखप्रपञ्चाऽवभासप्रयोजनस्तु सुखफलः कर्त्तव्यः ।

चोदयति—नन्वेवं पारम्पर्येण फलत्वात् कर्मणि नाऽधिकाराऽभाव ऐकान्तिक इत्याह—नन्वेवं वर्णयताऽतिसृष्ट एवाऽधिकारो भवति । परिहरति—सत्यम्, न्यायस्तु निरूप्यते नाऽभ्युपगमः । न वयमभ्युपगममात्रेणाऽधिकाराऽभावं ब्रूमः, अपि तु न्यायतः । स तु स्वतो निरधिकारत्वमापादयति कर्मविधीनाम्, नाधिकारान्तराऽनुप्रवेशं वारयति, तेन तदनुसारिणां तद्दृष्ट एवाभ्युपगमो युज्यत इत्यर्थः ।

एवं पूर्वपक्षाऽऽभासमुपन्यस्य प्रथममेवाऽऽनर्थक्यं स्वाऽभिमतमाह—न च यागं कुर्यादित्यचाऽऽर्थो यथाऽधिकारस्तथोपरिष्टाद्वक्ष्यते । एवं पूर्वपक्षयित्वा सिद्धान्तमाह—उच्यते ।

विशेषा एव शब्दार्था दृष्टरूपान्वयेऽपि हि ।
न च प्रवर्त्तनाबोध इष्टशक्तेर्विनाऽर्थवान् ।।

---

१. वर्णयतामिष्टः मू० पु० पा० ।

न तावत्सामान्यं लिङाद्यर्थः। प्रेषणाध्येषणाऽभ्यनुज्ञोपदेशानां तु विशेषाणामेव लोके प्रतीतेः। मोहादिभेदान्तराऽवगतेश्च। न हि प्रवृत्तिहेतुमात्राऽवबोधः क्वचिदस्ति। सामान्यशब्दाद्विशेषप्रमाणाऽभावे तन्मात्राऽवगतिः। अतो न तावन्मात्रं शब्दार्थः। विशेषाऽनुषक्तमेव तु तृन्नादीना[1]मिव कर्तृत्वं ताच्छील्याऽनुषक्तम्[2]। अन्यथा कर्तृप्रयोगप्रतीतिप्रसङ्गात्। नाप्युपाधयो न शब्दार्थाः। अप्रतीतानामभेदकत्वात्। अन्यस्य

प्रवर्त्तनामात्रं शब्दार्थ इति हि मन्यमानेन स्वर्गादेः साध्यत्वं निरासीति तदेव तावद् दूषयति—न तावत्सामान्यं लिङाद्यर्थः। प्रेषणाऽध्येषणाऽभ्यनुज्ञोपदेशानां विशेषणामेव लोके प्रतीतेः। न खलु लिङ उपदेशादिविशेषरहितं प्रवर्त्तनामात्रमवगच्छन्ति। न च तथा न गौः पदा स्प्रष्टव्येति गोत्वमात्रमपि तु अर्थादिशब्दादिवाऽभिधेयेषु सन्दिहते। प्रतिपद्यमानास्तु तामुपदेशाऽनुरक्तामेव नाऽवगमयन्ति। न हि ज्वरितः पथ्यमश्नीयादित्युपदेशप्रवृत्ता प्रवर्त्तनामात्राऽवगतिः तत्पूर्वा चोपदेशे प्रतिपत्तिरिति। यदि प्रवर्त्तनैव लिङर्थः तदाऽऽक्षेपेण तद्विशेषाः प्रतीयेरन्, तत उपदेशादिभेदवत्, क्वचिन्मोहस्यापि चैत्यवन्दनादौ प्रवृत्तिहेतुत्वप्रसङ्ग इत्याह—मोहादिभेदान्तराऽवगतेश्च।

ननु प्रतीयतां नाम विशेषाऽनुरक्ता प्रवर्त्तना, तथापि कस्मान्न तन्मात्रमर्थः? इत्यत आह—न हि प्रवृत्तिहेतुमात्राऽववोधः क्वचिदस्ति। सामान्यशब्दत्वं हि विशेषप्रमाणाऽभावे गृहीतसम्बन्धस्य सामान्यमात्राऽऽवबोधकत्वेन व्याप्तम्, तदिहोक्तेन क्रमेण सामान्यमात्राऽवबोधकत्वं निवर्त्तमानं स्वव्याप्यं सामान्यशब्दतामपि लिङो निवर्त्तयति। तदिदमाह—सामान्यशब्दाद्विशेषप्रमाणाऽभावे तन्मात्राऽवगतिः। क्वचिच्च सामान्याऽवगतिपुरःसरैव कस्यचित् विशेषस्य बाधे सति विशेषाऽवगतिः। सर्वथा तन्मात्राऽवगतिस्तावदस्ति। उपसंहरति—अतो न तन्मात्रं शब्दार्थः। विशेषानुषक्तमेव तु तृन्नादीनामिव कर्तृत्वं ताच्छील्याऽनुषक्तम्। न चायमसिद्धो दृष्टान्त इत्यत आह—अन्यथा ताच्छील्यादयो भेदा यदि नोच्येरन् कर्तृत्वमेवोच्येत, तथा सति तृजकादिवत् कर्तृमात्रे प्रयोगप्रसङ्गात्। यदपि कैश्चिदुच्यते प्रैषादयो न शब्दार्था उपाधयस्ते, प्रवर्त्तकत्वं तु शब्दार्थः सर्वत्राऽपरित्यागादिति, तत्राह—नाप्युपाधयो न शब्दार्था उपदेशादयः। कुतः? अप्रतीतानामभेदकत्वात्। उपाधित्वमेषामभ्युपगच्छद्भिरपि भेदकत्वमभ्यु-

१. शब्दादीनाम्, मू० पु० पा०। २. तच्छीलानुषक्तम्, मू० पा०।

प्रत्ययहेतोरभावात्। तदन्तत्वात्तद्वाच्यः समानशब्दोऽयम् इति च स्मरणात्। गोत्वादीनामप्युपाधित्वात्। सदित्येव शब्दार्थत्वप्रसङ्गात्।

उपेत्यापि तूच्यते। सामान्यचोदनाया विशेषपरत्वाद्विशेष एव प्रति-

पगमनीयम्, तदभावे उपाधित्वाऽनुपपत्तेः। न चाऽगृहीतं भेदकं भवितुमर्हति। न ह्यगृहीतविशेषणा बुद्धिरुदीयते। ननूपहिताभिधानमुपाधिप्रतीतिमपेक्षते, न तु स्वप्रतिपाद्यतामप्यस्येत्यत आह—अन्यस्य प्रत्ययहेतोरभावात्। उपहितवाचितैवाऽर्थात्प्रतिपाद्यत इत्यर्थः। न केवलमुपपत्तिः स्मरणमपि कातीयमत्रास्तीत्याह—तदन्तत्वात्तद्वाच्यः समानशब्दोऽयम् इति स्मरणात्। द्विविधोऽप्युपाधिरुपहितसमानाधिकरणस्तद्व्यधिककरणश्च। तद्यथा। दृतिहरिः पशुः, गार्गिकया श्लाघते इति च। तत्र यः समानशब्दः स समानाधिकरणोपाधिः स तदन्तवाच्यः प्रत्ययान्तवाच्यो दृतिहरिपश्वादिः। न त्वसमानशब्दोऽसमानाधिकरणो गार्गिकया श्लाघते इत्यादिः। न हि गार्गिकयेति श्लाघाद्यधिकारविहिते वुनि तदन्तेनाऽसमानाधिकरणः, गार्गिकया श्लाघाऽभिधीयत इत्यर्थः।

स्यादेतत्। अनन्यलभ्यः शब्दार्थ इति स्थितिः। उपाधयश्चाऽन्यतो लभ्या न वाच्या भवितुमर्हन्ति। कुतः? प्रयोगादेव लौकिकात्। तथा हि। दृतिहरिशब्दं पशावेव प्रयुञ्जते वृद्धाः नान्यत्र। तत्प्रयोगनियम एव कुतः? इति चेत्। न। अनादित्वेन लोकप्रयोगस्याऽपर्यनुयोज्यत्वात्। तस्मात्तटस्था एवोपाधयो न पुनरभिधाविनिवेशिन इत्यत आह—गोत्वादीनामप्युपाधिकत्वात्। सदित्येव शब्दार्थत्वप्रसङ्गात्। यद्यपर्यनुयोज्यादेव लौकिकात्प्रयोगनियमादवगतेरशब्दार्थत्वम्, हन्त गोत्वादीनामप्यशब्दार्थत्वं स्यात्, सत्तैव गवादिशब्दानामर्थः प्रसज्येत। सत्तामात्रप्रवर्त्तिनामपि तेषां प्रयोगनियमादेव गोत्वादिषूपाधिसिद्धेः। तथा चाऽन्याय्यमनेकार्थत्वं तन्न भविष्यति। न वा सत्तामप्यभिदध्युः, प्रयोगनियमादेव सापि गंस्यते, ततश्च सर्वेषामेव शब्दानामवाचकत्वप्रसङ्गः। अनादिरपि वृद्धप्रयोगोऽर्थप्रत्ययनार्थत्वात् तत्प्रयुक्तस्तदप्रत्यायने पर्यनुयोज्यः। न हि प्रयोक्तव्यः शब्द इत्येव प्रयुञ्जते वृद्धाः, अपि त्वर्थं प्रत्याययितुम्। तद् गोत्वादिषु गवादिशब्दप्रयोगनियमस्तदभिधायकत्वादुपपन्नो नाऽन्यथेति। तर्हि समानमेतत् उपाधिषु सर्वेष्वत्यत्राऽभिनिवेशात्। न च लिङ्गादिषु प्रयोगनियमोऽप्यस्ति। एतेन पङ्कजादिषु योगरूढिरुपपादिता। न चाऽसमानाधिकरणेषूपाधिषु वाच्यत्वप्रसङ्गः। तत्र श्लाघादिवाचिनां शब्दान्तराणां सदैव प्रयोगप्रसङ्गात्। न हि गार्गिकयेत्येतावन्मात्रं प्रयुञ्जते

पाद्यः। स च यः कश्चित्सर्वो वा कश्चिदेव वा। सर्वथा तु विशेषप्रत्यस्तमयेन सामान्यबोधो ऽर्थवान्। तत्रेष्टतच्छक्त्यनपेक्षाणामभिप्रायमात्राऽनुविधायिनां तदपेक्षाणां च तदानुकूल्यमपेक्षमाणानां प्रवृत्तिहेतवः प्रेषणाऽध्येषणाऽभ्यनुज्ञा अपुरुषबुद्धिप्रभवाया न प्रतिपाद्याः। न मोहादयो बोधविरोधात्। ते हि प्रतिपाद्यमाना अप्रवृत्तिहेतव इति प्रवर्त्तनाऽवबोधो मोहप्रतिपादनान् विहन्येत। विपर्य्यय एव स्यात। नेष्टता कर्म्मणि, प्रत्यक्षविरोधात्। इष्टसाधनतामपि चेन्न गमयेदप्रतिपादकतैव स्यात्। सामान्यबोधस्य विशेषप्रत्यस्तमयेऽनर्थकत्वान्मिथ्यात्वापातात्। तस्य च हेतुद्वयाभावे ऽयुक्तत्वात्।

वृद्धाः, तन्मात्राद्वा श्लाघां प्रतिपद्यन्ते। तस्मादुपदेशादयस्तच्छीलादयश्चोपाधयो वाच्याः। अन्यथातिप्रसङ्गादित्यभ्युपेत्यापि प्रवर्त्तनामात्राऽभिधानमुच्यते। सामान्यचोदनाया विशेषपरत्वाद्विशेष एव प्रतिपाद्यः। स च यः कश्चिद्यथा स्थाल्यामोदनं पचेदिति काचित् स्थाली सर्वो वा, अविशेषात्। यथा ब्राह्मणो न हन्तव्य इति ब्राह्मणमात्रम्। कश्चिदेव यथा पुरुषमानय, सुरा वोढव्येति शूद्रप्रतिपत्तिः। सर्वथा विशेषप्रत्यस्तमयेन सामान्यबोधो ऽर्थवान्। निर्विशेषस्य सामान्यस्याऽनुपपत्तेः। तदेवं प्रसक्ताऽऽज्ञादिव्युदासेन अन्यत्र च मोहादप्रसक्तेरुपदेशस्यैव शिष्यमाणस्य संप्रत्यय इत्याह—तत्रेष्टतच्छक्त्यनपेक्षाणां प्रेषितुरध्येषितुर्वाऽभिप्रायमात्राऽनुविधायिनां प्रेष्याणाम् अध्येष्याणां वाऽतदपेक्षाणां च तदानुकूल्यमपेक्षमाणानामनुज्ञात्रमात्राभिप्रायज्ञानां प्रवृत्तिहेतवः प्रेषणाध्येषणाऽभ्यनुज्ञा अपुरुषप्रभावायाश्चोदनाया न प्रतिपाद्याः। मोहादीनामप्रसक्तिमाह—न मोहादयः प्रवृत्तिहेतवः। कुतः? बोधविरोधात्। विरोधमाह—ते हि प्रतिपाद्यमाना अप्रवृत्तिहेतव इति प्रवर्त्तनाबोधो मोहप्रतिपादनाद्विहन्येत, विपर्यय एव स्यात्। निवृत्तिरेव प्रसज्येत, न जातु प्रामाणिकाश्चैत्यवन्दनादौ मायामोहविनिर्मार्णेऽवगते प्रवर्तन्ते प्रवृत्ता वा न निवर्त्तन्ते। अस्तु तर्हीष्टसाधनता प्रवृत्तिहेतुरित्यत आह—नेष्टसाधनता कर्मणि प्रवृत्तिहेतुः। कुतः? प्रत्यक्षविरोधात्। इष्टसाधनतामपि चेन्न गमयेदप्रतिपादकतैव स्यात्। प्रत्यक्षविशेषप्रत्यस्तमये सामान्यस्याप्यभावादनर्थकत्वान्निर्विषयत्वान्मिथ्यात्वाऽऽपातात्। भवतु मिथ्यात्वम्, को विरोधः? इत्यत आह तस्य च हेतुद्वयाऽभावे कारणदोषबाधकाप्रत्ययाभावेऽयुक्तत्वात्। अत्र च पारमर्षं सूत्रं योजयति—असाधकं तु तादर्थ्यादिति। तद्व्याचष्टे—भवेदसाधकं कर्म साधयितारं नाधिगच्छेत्। अनधिकारि स्यात् इत्यर्थः। अत्रैव हेतुमाह—तादर्थ्यात्। विवृणोति—प्रवर्त्तनामात्रार्थत्वात् विधिशब्दस्य प्रीतिसाधनत्वाऽनवगमात्। भवत्वनवगमः, तथापि किमित्यसाधकं कर्म? इत्यत

तदुक्तम् । 'असाधकं तु तादर्थ्या'दिति । अवेदसाधकं कर्म्म साधयितारं नाऽधिगच्छेदनधिकारी स्यादित्यर्थः । तादार्थ्यात्प्रवर्त्तनामात्रार्थत्वात् । शब्दस्य प्रीतिसाधनत्वाऽनवगमात् । प्रीत्यर्थत्वाच्च पुरुषप्रयत्नानाम् । अविशेषे तु प्रीतिसाधनत्वे सिद्धोऽधिकारः । सर्वविशेषप्रत्यस्तसमये चाऽसाधकं वाक्यं स्यात् अबोधकम् । अविशेषार्थत्वात्सामान्यचोदनायाः ।

ननूक्तं 'प्रज्ञायते लिङादीनां व्यञ्जनीया प्रवर्त्तना प्रयोक्तृधर्म' इति । सत्यम् । आज्ञादिको नोपदेशः । ननूपदेशोऽप्यनुग्रहाऽभिप्रायात्मक इति न प्रयोक्तृधर्म्मतामतिवर्त्तते ।

नैतत्सारम् । उपदेशे प्रैषादिष्विव प्रवृत्तिहेतुत्वाभावादभिप्रायस्य । तथा हि—

आज्ञादौ कर्म्मशक्तेर्हि नाऽभिप्रायानुरोधिता ।
उपदेशे कर्म्मशक्तिमवबुध्य प्रवर्त्तते ॥

आज्ञाऽभ्यर्थनयोर्हि कर्म्मणः सामर्थ्यमनपेक्षमाणास्तद्विशेषमनाद्रिय-

आह—प्रीत्यर्थत्वाच्च पुरुषप्रयत्नानाम् । प्रीत्यभावादिच्छाभावः सुखाऽनुशायित्वादिच्छायास्तदभावे प्रयत्नाऽभावः, वह्न्यभावइव धूमाभाव इति सामान्यवचनम् । अविशेषे तु प्रीतिसाधनत्वे सिद्धोऽधिकारः, सर्वविशेषप्रत्यस्तमये ऽसाधकं वाक्यं स्यादबोधकम्, अनवबोधकम् । कुतः ? अविशेषार्थत्वात् सामान्यचोदनाया निर्विशेषस्य च सामान्यस्याऽयोगान्निर्विषयत्वाऽऽपत्तेः । अत्रान्तरे पूर्वोक्तमाक्षेपं स्मारयति—ननूक्तमिति । प्रज्ञायते लिङादीनां व्यञ्जनीया प्रवर्त्तना । प्रयोक्तृधर्मो न णिचो यथानियतकर्तृकेति । प्रयोक्तुश्चोदनायामसंभवान्नास्ति प्रवर्त्तनेत्यर्थः । तत्रांशे सिद्धसाधनतामाह—सत्यम्, आज्ञादिकः प्रयोक्तृधर्मो वेदे नास्त्येव, न तूपदेशः । चोदयति—ननूपदेशोऽप्यनुग्रहाऽभिप्रायात्मक इति न प्रयोक्तृधर्मतामतिवर्तते । तथा हि । महर्षयः स्वार्थमनपेक्षमाणाः परेषां हिताऽहितमाप्तिपरिहारलक्षणाऽनुग्रहाभिप्राया उपदेशं प्रणयन्तीत्युपदेशोऽपि प्रयोक्तृधर्म एवेत्यर्थः । परिहरति—नैतत्सारम् । कुतः ? उपदेशे प्रैषादिष्विव प्रवृत्तिहेतुत्वाऽभावात् अभिप्रायस्य । तथा हि ।

आज्ञादौ कर्मशक्तेर्हि नाऽभिप्रायाऽनुरोधिता ।
उपदेशे कर्मशक्तिमवबुध्य प्रवर्त्तते ॥

आज्ञाभ्यर्थनयोर्हि कर्म स्वसमीहितसिद्धिं प्रति सामर्थ्यमनपेक्षमाणो

त्वम् । **सर्वशब्दानां ज्ञातार्थत्वप्रसङ्गात् ।**

नन्वेवं प्रमेयैव स्याच्चोदना, प्रमाणं चेष्यते, चोदनालक्षणोऽर्थो धर्म इत्यभिधानात् । तस्माच्छब्देन प्रमाणात्मनाऽभिधेयः प्रवृत्तिप्रतिपत्तिकार्योन्नेयः क्रियाविषयः प्रतिपत्तृस्थः स्वयंसंवेद्यः प्रवृत्तिहेतुरर्थश्चोदना ।

ऽत एव तद्विशेषं तस्य कर्मणः प्रयोजनविषयं विशेषमनाद्रियमाणः तदभिप्रायाऽनुरोधादेव किंचित्समीहमानस्तुष्टो ऽयमाज्ञापयिता किंचिदभिमतं मे करिष्यतीति समीहमानोऽभिप्रायानुरोधी प्रवर्तते । अनुज्ञानेऽपि यद्यपि क्रियाफलात् प्रवृत्तिः तथाप्यभिप्रायाऽऽनुकूल्यमपेक्षते । उपदेशस्याज्ञादिभ्योऽभिप्रायाननुरोधं विशेषमाह—उपपदेशे तु सत्यप्यनुग्रहाऽभिप्राये कर्मणः समीहितशक्त्याद्यभावे न प्रवर्त्तते । कर्मशक्तिं त्ववबुध्योपदेष्टुरप्रतारकत्वमात्रेण विप्रलम्भनिमित्ताऽभावमात्रेण हेतुना सत्यार्थाद्वचनादसत्यप्यनुपहाऽभिप्राये वक्तुः प्रवर्त्तते । तस्मादुपदेशप्रवृत्तेः प्रवृत्तिविषयसमीहितसाधनत्वभावानुविधानादभिप्रायाऽननुविधानाच्च नाऽनुग्रहाऽभिप्रायः शब्दार्थोऽभिमतसाधनतया तु कर्मणः शब्दार्थ इति साम्प्रतम् ।

शङ्कते—तत्प्रतिपादनमभिमतसाधनताप्रतिपादनं नाऽनुग्रहाऽभिप्रायमन्तरेण, तस्मादभिप्रायः शब्दार्थ इति चेत् । निराकरोति—न, मध्यस्थस्यापि प्रश्नादिदर्शनात् । प्रायेण खलु वरिवसितोपसन्नो जिज्ञासुः पृच्छन्ननुग्रहाऽभिप्रायेणाऽऽचार्येणोपदिश्यते । मध्यस्थेन तु जिज्ञासुना पृष्टस्य मध्यस्थस्योपदेष्टुरुपदेशदर्शनाद् व्यभिचार इत्युपदेशो नाऽनुग्रहाऽभिप्रायः इति । मा भूद् व्यभिचारः, तथापि नाऽभिप्रायार्थता । न हि यं यं विनोपदेशो न भवति स सर्व उपदेशार्थोऽपि त्वनन्यलभ्यः । अन्यथा सर्वेषामेव शब्दानामर्थज्ञानाऽधीननिष्पत्तित्वात् ज्ञानर्थता स्यादित्याह—न चैव तावता शब्दार्थत्वप्रसङ्गः ।

अथ चोदयति—नन्वेवं सति समीहितसाधनतायाः प्रवर्त्तनात्वे प्रवर्त्तनैव चोदनेति तस्याः शब्दार्थत्वात्प्रमेयैव स्याच्चोदना, प्रमाणं चेष्यते, चोदनालक्षणोऽर्थो धर्म इत्यभिधानात् । उपसंहारव्याजेन पूर्वपक्षी स्वपक्षमाह—तस्माच्छब्देन प्रमाणात्मनाऽभिधेयः प्रवृत्तिप्रतिपत्तिकार्योन्नेयः क्रियाविषयः प्रतिपत्तृस्थः स्वसंवेद्यः प्रवृत्तिहेतुरर्थश्चोदना प्रमाणात्मनेति न मम पक्षे प्रतिज्ञाव्याघातः । प्रमाणात्मनैव शब्देनाऽभिधानाच्चोदनायाः प्रवृत्तौ या प्रतिपत्तिः सैव कार्यं तदुन्नेय इति सम्बन्धग्रहणसम्भवः क्रियाविषय इति क्रियायामस्य प्रवर्त्तकत्वमुपपन्नम् । प्रतिपत्तृस्थ इति । प्रतिपत्तुस्तन्निमित्तगोचरप्रवृत्तिप्रत्ययाधारत्वात् । स्वसंवेद्य इति । शब्दप्रभवायास्तदालम्ब-

वार्त्तमेतत्। प्रवृत्तिहेतोर्वाक्यस्य चोदनात्वाभिधानाच्चोदनेति क्रियायाः प्रवर्त्तकं वचनमिति। यत्र चाऽस्य प्रामाण्यं शब्दस्यैव तत्रास्तु किमनेनान्तर्गडुना? न हि तत्र शब्दस्य कश्चिद्विरोधः। पदार्थान्तरवत् प्रामाण्यमस्तु, व्यर्थं विशेषणाऽभिधानम्। क्व चाऽस्य प्रामाण्यम्? विषये चेत्। न, प्रमाणान्तरसिद्धेः। अपूर्वस्यापि च संसर्गस्य लोकवत्तदभावेऽपि प्रतिपत्तेः। अदृष्टसाधनत्वे चेत्। शब्दस्यैवास्तु। शब्दकार्यत्वे चाऽव्युत्पन्नशब्दप्रवृत्तिः। शब्दज्ञाप्यत्वमन्य-हेतुकस्याऽयुक्तमित्युक्तम्। अनुमानं च न स्वार्थप्रतिपत्त्या। तस्या

नायाः प्रतिपत्तेः स्वसंवेद्यत्वात्साऽपि तथेत्यर्थः। दूषयति—वार्त्तमेतत्। कुतः? प्रवृत्तिहेतोर्वाक्यस्य चोदनात्वाऽभिधानात्। चोदनेति क्रियायाः प्रवर्त्तकं वचनमिति वचनाऽभिधेया चोदना वचनस्य चोदनात्वाभिधानं भाष्यकरीयं विरुध्यत इत्यर्थः। अपि च यत्र चास्य प्रामाण्यमभिधेयस्येष्यते शब्दस्यैव तत्रास्तु, किमन्तर्गडुना प्रमाणरहितेनाऽनेन? शब्दस्यैव प्रमायां शक्तत्वात्[1]। तस्य तु स्वरूपेणाप्यप्रतीयमानत्वात्। न हि तत्र शब्दस्य कश्चिद्विरोधः। यद्युच्येत प्रामाण्येन शब्दाऽभिहितस्य स्वाकाङ्क्षावशान्नियोज्या साधनेति[2] कर्त्तव्यता संसर्गावऽगतिर्नाऽन्यथेति प्रमाणात्मना सा त्वभिधेय एषितव्येत्यत आह—पदार्थान्तरवत् प्रामाण्यमस्तु, व्यर्थं विशेषाऽभिधानम्। तथैव हि क्रिया स्वपदेन प्रमाणत्वेनाऽनभिहिताऽप्याकाङ्क्षावशात्कारकेण योग्येन संनिहितेनाऽऽत्मनः सम्बन्धमवगमयति एवं कारकमपि क्रियायाः स्थाल्यामोदनं पचति चैत्र इत्यादौ, तथाऽयमपि गमयिष्यतीति व्यर्थं प्रमाणत्वविशेषाऽभिधानमित्यर्थः।

एवं तावदविचारितसिद्धं विषयं कृत्वोक्तम्, संप्रति विषयं विचारयति—क्व चास्य प्रामाण्यम्? शङ्कते—विषये यागादौ चेत्। निराकरोति—न प्रमाणान्तरसिद्धेः। अथ पदार्थसंसर्गे प्रमाणान्तरादृष्टे, तत्राह—अपूर्वस्यापि संसर्गस्य तदभावे लोकवत्प्रतीतेः। लोके स्थाल्यामोदनं पचतीति क्रियाकारकसंसर्गस्य तदभावेऽपि भवदभिमतचोदनार्थाभावेऽपि प्रतिपत्तेः। अदृष्टसाधनत्वे[3] यागादीनां श्रेयःसाधनत्वे चेत्। निराकरोति—शब्दस्यैवास्तु। अपि चाऽर्थभेदः शब्देन क्रियते ज्ञाप्यते वा। शब्दकार्यत्वे अव्युत्पन्नशब्दप्रवृत्तिः। शब्दज्ञाप्यत्वमन्यहेतुकस्याऽन्यप्रमाणकस्याप्य-

१. प्रतिपन्नशक्तित्वात् २ पु० पा०। २. नियोगसाधन० २ पु० पा०।
३. अदृष्टत्वे २ पु० पा०।

अलिङ्गत्वात् । लिङ्गफलत्वात् । अनवस्थानात् । न च विषयप्रतिपत्त्या, विषयशब्देभ्यस्तत्सिद्धेः । प्रवृत्त्याऽपि नात्मीयया । तदभावादितरेतराश्रयात् । प्रवृत्तिमेये शब्दवैयर्थ्यम् । शब्दमेये वृथा ऽनुमानम् । परप्रवृत्त्याऽनुमिताद्विदितशब्दसङ्गतेः स्वयंशब्दादवबुध्य प्रवर्त्तत इति नोभयवैयर्थ्यमिति चेत् । न । परप्रवृत्त्या प्रवृत्तिहेतुमात्राऽवगमाद्विशेषाऽनिर्धारणात्तद-

युक्तमित्युक्तम् । अदृष्टवत्त्वे यागादीनां सम्बन्धसंवेदनाऽसंभवात् । यद्युच्येत अनुमानचोदनाख्यमर्थभेदं गृहीत्वा तत्र शब्दस्य सम्बन्धो ग्रहीष्यत इति । तत्राह—अनुमानं च न स्वार्थप्रतिपत्त्या गृहीतसम्बन्धम् । लिङ्गदर्शनजं खल्वनुमानं भवति, ततश्च न प्रतीतिर्भवितुमर्हति । तस्या अलिङ्गत्वात् । प्रमाणफलयोश्चैकत्वाऽनुपपत्तेः । अथ स्वप्रतिपत्त्यैकया लिङ्गभूतया प्रतिपद्य प्रतिपत्त्यन्तरं चोदनाविषयं जनयिष्यति, ततो भेदाश्रये प्रमाणफलत्वे उपपत्स्येते इत्यत आह—अनवस्थानात् । लिङ्गभूतायाः प्रतिपत्तेरपि कारणान्तराऽभावात् स्वात्मप्रतिपत्त्यन्तरमेव कारणं वाच्यम् । एवं च तस्या अप्यात्मप्रतिपत्त्यन्तरमित्यनवस्थेत्यर्थः ।

यद्युच्येत भावार्थविषया प्रतिपत्तिर्लिङ्गमस्य भविष्यतीति, तत्राह—न विषयप्रतिपत्त्या चोदनानुमानम् । कुतः ? विषयशब्देभ्यस्तत्सिद्धेः । भावार्थरूपविषयप्रतिपत्तिसिद्धेः । अयमभिसन्धिः । न तावद्दृष्टस्वलक्षणमेतदनुमानम् । न हि विषयप्रतिपत्त्या क्वचिदपि चोदना दृष्टचरी । कस्मात् ? सामान्यतोदृष्टमनुमानमिन्द्रियादिवद्रूपाद्युपलब्धिलिङ्गकमेषितव्यं भवतु, तच्चाऽनुपपन्नम् । विषयशब्देभ्य एव विषयप्रतिपत्तिलक्षणस्य कार्यस्योपपत्तेरिति । प्रवृत्तेरिति चेत्, सा ऽप्यात्मीया परकीया वा स्यात्, तत्र प्रथमं कल्पमपाकरोति—प्रवृत्त्यानात्मीयया लिङ्गेन चोदनाऽनुमानम् । कुतः ? निमित्ताऽभावेन तदभावात् । चोदनाऽवगमनिमित्तत्वे वा इतरेतराश्रयात् । अथ प्रवृत्त्यनिमित्तान्तरजन्मनैव सोऽर्थोऽनुमीयते, तथा च नेतरेतराश्रयन् । तत्राह—प्रवृत्तिमेये वृथाऽनुमानम् । परप्रवृत्त्याऽनुमिताद् । विदितशब्दसङ्गतेः स्वयंशब्दादवबुध्य प्रवर्त्ततइति नोभयवैयर्थ्यमिति चेत् । शब्दस्य च प्रवृत्तिलिङ्गस्य चाऽनुमानस्य च न वैयर्थ्यमिति चेत् । निराकरोति—न, परप्रवृत्त्या कार्येण प्रवृत्तिहेतुमात्रावगमात् विशेषाऽनिर्धारणात् तन्मात्राभिधानप्रतीतेः । भवतु तन्मात्रप्रतीतिः, किं नश्छिन्नम् ? इत्यत आह—तन्मात्रप्रतीत्या प्रवृत्त्ययोगात् । यदि हि स्वात्मनि प्रवृत्तिहेतुविशेषः कश्चित्प्रतीतः स्यात् स एव प्रवृत्तिदर्शनात्परत्राप्यनुमीयते । न च विदितसङ्गतेः, शब्दात्तमवगम्य प्रवृत्तिरुपपद्येत, परमप्रवृत्तिमात्रलिङ्गके तस्मिंस्तद्धेतु-

भिधानप्रतीतेः। तन्मात्रप्रतिपत्त्या प्रवृत्त्ययोगात्। न हि सर्वः सर्वस्य प्रवृत्तिहेतुः। अनन्यहेतुकस्वभावत्वाच्च। शब्दपूर्वैव प्रवृत्त्याऽनुमान-हेतुकमिति चेत्। अनुमानपूर्वकमेव शब्दात्प्रतीतेः किं नाऽनुमानप्रमाणक एव?

अपि च नाऽदृष्टातिरिक्तः प्रवृत्तिहेतुरनुमीयते। तस्य पूर्वसिद्ध्य-पेक्षत्वात् प्रवृत्तेः दृष्टैरपि हेतुभिस्तदुपपत्तेः। प्रतिपत्त्राश्रितश्च यैः प्रत्ययविशेष आश्रितः तैरालम्बनं वाच्यम्। अन्यप्रमाणकत्वं च समर्थ-

त्वमात्रेणाऽनुमानात्। स्वरूपाऽनवगतेर्न प्रवृत्तिहेतुता शब्दाऽवगतस्यापि भवितुमर्हतीत्यर्थः। अथ सामान्यमात्रेणाऽवगतः प्रवृत्तिहेतुः कस्मान्न भवति? इत्यत आह—न हि सर्वस्य सर्वः प्रवृत्तिहेतुः। न खल्वाज्ञादयो विशेषाः सर्वे सर्वं प्रवर्त्तयन्ति, अपि तु कश्चिदेव तद्विशेषावसाय एव प्रवृत्तिहेतुर्न सामान्य-मात्रम्। तस्य सर्वत्राऽविशेषेण सर्वेषामाज्ञादीनां सर्वान्प्रति प्रवर्त्तकत्व-प्रसङ्गादित्यर्थः। अपि च सम्बन्धसंवेदनाऽधीनप्रवृत्तित्वाच्छब्दस्य माना-न्तरेण च सम्बन्धग्रहणमन्तरेण तदनुपपत्तेः। अनन्यहेतुकस्वभावत्वाच्च।

शङ्कते—शब्दपूर्वयैव प्रवृत्त्याऽनुमानात् शब्दहेतुक इति चेत्। निरा-करोति—अनुमानपूर्वमेव शब्दात् प्रतीतेः किं नानुमानप्रमाणक एव। अयमभिसन्धिः। यत्रार्थे येन प्रतिपत्त्रा गृहीतसङ्गतिः शब्दस्तमेव प्रतिपत्तारं तमर्थमवगमयति। स च सम्बन्धाऽवधारणसमयप्रवृत्तं तदर्थविषयमात्मनः प्रमाणं पुरोधाय प्रतिपत्ता शब्दादर्थमवगच्छतीति स्मारकं मन्यते परम्। तदिह यद्यनुमानात् गृहीत्वा प्रवृत्तिहेतुं सम्बधिनं गृहीतवान् नूनमस्या अप्यर्थोऽनुमानमेव पुरोधाय प्रतिपत्तव्यः स्यात्। तथा च तदनुवादता लिङः। न च लिङार्थाऽवगतिनिमित्तप्रवृत्तिहेतुकमनुमानं निमित्तमवगमं पुरोधाय वर्त्तत इति साम्प्रतम्। प्रतिपत्त्रन्तरस्थं हि तत्। न च प्रवृत्त्य-न्तरस्थबोधं तद्विषयमपि प्रतिपत्त्रन्तरप्रतिपत्तिं पुनरुक्तयति, अतिप्रसङ्गात्। अत एवाह। अनुमानप्रमाणक एवेति। नात्राऽऽगमाऽवगमगन्धोऽप्यस्ती-त्येवकारार्थः। प्रवृत्तिहेतुः प्रमाणान्तरदृष्ट एव स्वात्मनि परत्राऽनुमातव्यो न पुनः शब्दैकसमधिगम्योऽप्रतीतचर इत्याह—अपि च न शब्दाददृष्टा-ऽतिरिक्तः प्रवृत्तिहेतुरनुमीयते। तस्य तस्य पूर्वसिद्ध्यपेक्षितत्वात्प्रवृत्तेः। तस्य शब्दनिबन्धनप्रवृत्तिलिङ्गकस्याऽनुमानस्य प्रवृत्तेरित्यर्थः। मा भूदनु-मानं शब्दान्तरप्रवृत्त्यन्यथानुपपत्त्या तु प्रवृत्तिहेतुरदृष्टपूर्वः कल्पयिष्यत इति चेत्, तत्राह—दृष्टैरपि हेतुभिस्तदुपपत्तेः। यच्चोक्तं प्रतिपत्तृस्थ इति। किमयं प्रत्ययोऽभिमतः, अर्थान्तरं वा तत्। य आहुः प्रत्यय इति, तान्

नीयम्। अर्थान्तरोपगमेऽपि नित्यत्वे सर्वः सर्वदा सर्वत्राऽधिकृतः स्यात् अप्रमाणकं च तत्, शब्दात्कस्यचित् क्वचिन्नियोगप्रतीतेः। अनित्यत्वेऽपि न शब्दः कार्य्य उक्तदोषत्वात्। निमित्तात्कामाद्वोत्पत्तौ कृतप्रयोगस्यापि प्रसङ्गः। यावन्निमित्तमनुवृत्तौ कृतप्रयोगस्यापि प्रागुपभोगात् प्रवृत्तिः स्यात्। तस्मात्पूर्व एव विधिः। तत्र

यागाऽनुरक्तो व्यापारो दृष्टहेतुर्न्न युज्यते।
तत्परत्वेन शब्देन यदा स प्रतिपादितः॥

अत्याह—प्रतिपत्त्राश्रितश्च यैः प्रत्ययविशेषैः आश्रितः तैरालम्बनं वाच्यम्। निरालम्बनत्वाऽनुपपत्तेः न च तदन्यदीहितोपायताया इति सिद्धं नः समीहितमिति।

अनन्यप्रमाणकत्वं च समर्थनीयम्, न च शक्यं स्वसंवेदनसिद्धत्वादनुमेयत्वाद्वा। कल्पान्तरं विकल्प्य दूषयति—अर्थान्तरोपगमेऽपि नित्यत्वे तस्याविशेषेण सकलपुरुषाधारतया समर्थतया तद्विषयसाधारणतया सदातनतया च सर्वः सर्वदा सर्वत्राधिकृतः स्यात्। समर्थहेतुसद्भावे कार्यक्षेपाऽनुपपत्तेः। अप्रमाणकं च तत्। प्रमाणाऽभिमताच्छब्दादेव कस्यचित् क्वचिन्नियोगप्रतीतेः। अनित्यत्वेऽपि तन्नान्तरीयकत्वात्कार्यत्वस्य शब्दकार्यो वा नियोगो भवेत्, कामनिमित्तकार्यो वा। तत्र न शब्दकार्यः, उक्तदोषत्वात् प्रमाणत्वादित्यादिना। निमित्तात्कामाद्वोत्पत्तौ निमित्तकारकाऽविनाशेऽपि कार्याऽविनाशात्। कृतप्रयोगस्यापि तदस्तीति प्रसङ्गः।

अथ न कामो निमित्तकारणम्, अपि तु कार्यैकार्थसमवायिकारणम्, तद्विनाशाच्च कार्यं विनश्यति। तन्तुव्यतिषङ्गनाशादिव पटः, तत्राह—यावन्निमित्तमनुवृत्तौ कृतप्रयोगस्यापि प्रागुपभोगात् प्रवृत्तिः स्यात्। इदमत्राकूतम्। आत्मविशेषगुणत्वादयं नियोग आत्मनः संयोगाऽसमवायिकाकारणको बुद्ध्यादिवत्। न तु कामाऽसमवयिकारणः। निमित्तं त्वस्य कामः। तथा हितसाधनतैव विधिः। तथाप्यस्ति किंचिन्निमित्तकरणं यद्विनाशः कार्यविनाशहेतु, अपेक्षाबुद्धिविनाश इव द्वित्वादिविनाशस्य। तत्रेदमुच्यते—यावन्निमित्तमनुवृत्तौ कृतप्रयोगस्यापि प्रागुपभोगात्प्रवृत्तिः स्यात् इति। प्रकृतमुपसंहरति—तस्मात्पूर्व एव कर्तृसमीहितसाधनतैव विधिः। तत्र च स्थिते तदनुगुणो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवमादीनां वाक्यार्थो वर्णनीयः। परमते तु तद्विपरीतं स्यादित्याह—

यागाऽनुरक्तो व्यापारो दृष्टहेतुर्न युज्यते।
तत्परत्वेन शब्देन यदा स प्रतिपादितः॥

यदि खलु यागानुरक्ते व्यापारे यागः साध्यात्मना भावाऽनुरञ्जकत्वेन गृह्यते तदा सन्निकृष्टस्तत्परः शब्देनोक्त इति इष्टहेतुतात्मा न तत्र विध्यर्थः समवेयात्। तस्याऽनिष्टत्वात्। तत्राऽविवक्षिते विधौ सफलस्य निष्फलस्य वा लोके कथंचित्प्रवृत्तिः स्यात्। तदुक्तम्—'असाधकं तु तादर्थ्याद्' इति। प्रीत्यर्थत्वात्पुरुषप्रयत्नानाम्। प्रीतिहेतुता तु [1]विध्यर्थाऽसमवाये साधकं नाऽधिगच्छेदिति। अथैवं विधिसामर्थ्यादिष्टनिष्ठस्तथा सति धात्वर्थः करणम्, तन्नान्तरीयकताप्तितः। यदि तु विध्यविवक्षाहेत्वभावान्नार्थव्यापार-

यदि हि व्यापारयोगपरतया प्रतिपाद्येत शब्देन कार्यादिरिति यथा प्रथमः पक्षः, तदेष्टसाधनताव्यापारस्य विधिप्रत्ययगम्यस्य व्याहन्येत। तदेतत्प्रपञ्चयति—यदि खलु यागाऽनुरक्ते व्यापारे यागः साध्यात्मना भावानुरञ्जकत्वेन यागं कुर्यादित्यनेन रूपेण गृह्येत ततः स व्यापारस्तन्निष्ठः तत्परव्याख्येयाऽनुभाषणं शब्देन लिङोक्त इति हेतोरिष्टहेतुतात्मा न[2] तत्र व्यापारो विध्यर्थः समवेयात्। अथ यागेऽपि साध्यात्मके को व्यापारस्येष्टहेतुताविरोधः? अत आह—तस्य यागादेरनिष्टत्वात् दुःखं कर्मे[3]त्यनुभवो लोकस्य। नन्वसत्यामप्युपदेशविवक्षायामाज्ञादौ यथा पुरुषप्रवृत्तिर्लोके तथा वेदेऽपि विनाऽप्युपदेशविवक्षाया भविष्यतीत्यत आह—तत्राऽविवक्षिते विधौ सफलस्य निष्फलस्य वा लोके कथंचिदनुविधेयपुरुषाऽऽशयवशात्प्रवृत्तिः स्यात्। अपौरुषये तु वेदे पुरुषाऽऽशयाऽभावात्। तस्याप्रवर्त्तकत्वेऽपि विध्यविवक्षायां न प्रवृत्तिः स्यादिति मन्तव्यम्। विशेषविधिर्विशेषान्तरनिषेधहेतुत्वात्। यथा वामेनाऽक्ष्णा पश्यतीति दक्षिणाऽक्षिदर्शनप्रतिषेधो गम्यते। तत्रापि पारमर्षं सूत्रं योजयति। तदुक्तम् 'असाधकं तु तादर्थ्यादि'ति। तद्विवृणोति—प्रीत्यर्थत्वात्पुरुषप्रयत्नानां प्रीतिहेतुता तु विध्यर्थाऽसमवाये साधयितारं नाऽधिगच्छेदिति। सुगमम्। यजेतेति समीहितसाधनतामात्रे विधिरवगम्यते। तथा यागस्य साध्यत्वम्। तद्यदि विधिर्विवक्ष्येत साध्यत्वं यागस्य हीयेत। न च साध्यत्वपरित्यागेन न विधिर्विवक्षितव्य इति विनिगमनायां हेतुरस्ति। द्वयोः श्रुतत्वेनाऽविशेषादित्यत आह—अथैवं विधिसामर्थ्यादिष्टाऽनिष्टस्तथा सति धात्वर्थः करणं तत्र नान्तरीयकताप्तितः। विधिविवक्षायामपि यागस्य साध्यत्वप्रतिपत्तिरुपपद्यते। तस्य प्रागसिद्धेः साधितस्यैव साधनत्वेन साध्यत्वाक्षेपात्तद्भावस्य तन्नान्तरीयकत्वात्।

---

१. नेति नास्ति २ पु०। २. अनिष्टत्वविमुखं कर्म २ पु० पा०।

३. प्रवृत्तिहेतुता। मू० पु० पा०।

स्तदा यागस्यानिष्टत्वात् तदन्यपरे प्रधानात्मनोऽनवकाशो यागः। प्रकारान्तरेणापि सावकाशतया विधेश्चानवकाशतया सामर्थ्यान्नान्तरीयकतया प्रतिपाद्यमानो विषयत्वं करणात्मना ऽन्वेति।

न हीष्टपरो व्यापारस्तत्परो यागपरो वा इष्टपरः। एवं तावद्यजेतेति विधिवशात् फलाऽभिसंबन्धः। यतश्च—

भावनाकर्मता पूर्वमिच्छारूपाऽवगम्यते।
स्वर्गः सिद्धोऽपि तद्योगादतोऽन्वेति फलात्मना॥

यो हि यदिच्छति स तत् करोतीति भावनायाः प्रारम्भ इच्छा।

कारिकां व्याचष्टे—यदि तु विध्यविवक्षाहेत्वभावात् साधकाऽभावेनाऽर्थव्यापारः इष्टाऽनिष्टः तदा यागस्याऽनिष्टत्वात् यागादन्यदिष्टं तत्परे व्यापारे प्रधानात्मना यागो ऽनवकाशो न भवति। नन्वनवकाशत्वादेव समीहितपरता[1]मपोह्य यागः प्रधानतयैव[2] संभत्स्यतेऽन्यथा साध्यत्वाऽनुपत्तेरित्यत आह—प्रकारान्तरेणापि यागस्य साध्यतायाः सावकाशतया विधेश्चाऽनवकाशतयेष्टपरतैव व्यापारस्य युक्तेत्यर्थः। ननूभयथा ऽप्यनवकाशे विनिगमनायां को हेतुः? इत्यत आह—सामर्थ्यात्। अनवकाशविधिप्रतीतिसामर्थ्यात् नान्तरीयकता वृत्त्या प्रतिपाद्यमानो विषयत्वं यागः करणात्मनाऽन्वेति। यद्यपि पुरुषप्रयत्नः समीहितोद्देशेन प्रवृत्तः तथापि यागादिकमगोचरयन्न समीहिताय कल्पत इति नान्तरीयकतया समीहितार्थप्रवृत्तप्रयत्नव्याप्यतालक्षणं साध्यत्वमतत्परे व्यापारे यागादेः सिद्धमित्यर्थः। ननु समीहितपरेऽपि व्यापारे यागपरत्वं कस्मान्न[3] भवति? इत्याह—न हीष्टपरो व्यापारः तत्परो यागपरः। यागपरो वा इष्टपरः। सकृच्छ्रुतस्योभयपरत्वाऽदर्शनाल्लोके तन्मूलत्वाच्छब्दार्थसम्बन्धप्रतीतेरिति उपसंहरति—एवं तावद्यजेतेति विधिवशात्फलाऽभिसम्बन्धः। न केवलं विधिवशात्कर्मिसम्बन्धादपि स्वर्गादेर्भाव्यतेत्याह— यतश्च।

भावनाकर्मता पूर्वमिच्छारूपाऽवगम्यते।
स्वर्गः सिद्धोऽपि तद्योगादतो ऽन्वेति फलात्मना॥

भावनाकर्मतायाः पूर्वरूपत्वमिच्छायां दर्शयति—यो यदिच्छति स तत्करोतीति भावनायाः प्रारम्भ इच्छा, तया भावनाप्रयत्न आरभ्यते,

---

१. समीहितसाधनताम् २ पु० पा०। २. प्रधानपरतयैव २ पु० पा०।
३. नेति नास्ति २ पु०।

तथा च तद्भावनासाध्यमिति सिद्धोऽपि स्वर्गादिस्तत्कर्म्मतया कर्मिसम्बन्धादिवौदनादिस्तत्साध्यात्मनैव भावनायामन्वेति नान्यथा। तदुक्तम्। प्रत्यर्थं चाभिसम्बन्धा[1]दिति। अर्थ्यमानं प्रति पुरुषव्यापार आभिमुख्येन सम्बध्यते। अतोऽर्थनायोगात्स्वर्गादेस्तत्कर्म्मतयाऽभिसम्बन्धः। अन्यथाऽनन्वयात्। अतः केवलं यजेतेति फलापेक्षत्वात्स्वर्गादेरन्यथासमवायात्। तथा च सम्बन्धात्कर्म स्वर्गं प्रति साधनत्वेन गम्यते। कथं पुनः स्वर्गस्यान्यविशेषणस्य भावनाऽभिसम्बन्धः, तत्सम्बन्धे वा ऽन्यविशेषणत्वं कथं समासो वा? न हि तदभिसम्बन्धरहितस्याऽन्यसम्बन्धसव्यपेक्षस्य वा भावनासम्बन्धः। गुणभूतस्य न हि समासो युज्यते।

नैष दोषः।

अर्थाद्विशेषणपरं सम्बन्धं याति दण्डवत्।
तद्योगाच्चाऽन्यसम्बन्धे न समासः प्रदुष्यति॥

इच्छापूर्वकत्वात्प्रयत्नस्य तत्कर्म इच्छाकर्म भावनासाध्यमिति सिद्धोऽपि स्वर्गादिस्तत्कर्मतया इच्छाकर्मतया कर्मिसम्बन्धादद्वितीयासम्बन्धादिव ओदनादिस्तत्साध्यात्मनैव भावनायामन्वेति नाऽन्यथा ऽधिकृतविशेषणतया। अत्रैव पारमर्षं सूत्रं योजयति—तदुक्तं 'प्रत्यर्थं चाऽभिसंबन्धादि'ति। तद्विवृणोति—अर्थ्यमानं प्रति पुरुषव्यापार आभिमुख्येन संबध्यते, अतोऽर्थनायोगात्स्वर्गादेस्तत्कर्मतयैवाऽभिसम्बन्धः। अन्यथासिद्धत्वेऽनन्वयात्। उपसंहरति—अतो न केवलं यजेतेति फलाऽपेक्षत्वाद्विध्युपहिताया भावनाया अपि तु स्वर्गादेः कर्मियोगापादितसाध्यभावस्याऽन्यथासमवायात्। उपसंहरति—तथा च साध्यत्वेन सम्बन्धात्कर्मव्यापारः। स्वर्गकाम इति हि विशेषणशब्दात्स्वर्गोऽत्रगम्यते, स कथं भावनायां प्राधान्येन सम्बध्यते? तत्सम्बन्धे वा भावनाया अन्यविशेषणत्वं कथं समासो वा?। सापेक्षत्वेनाऽसामर्थ्यात्। असामर्थ्यमेवाह—न हि तत्सम्बन्धरहितस्य पुरुषसम्बन्धरहितस्याऽन्यसम्बन्धसव्यपेक्षस्य वा भावनासम्बन्धः। प्रधानस्य त्वन्यसम्बन्धसापेक्षस्यापि समासो दृष्ट एव, यथा राजपुरुषः शोभन इत्यत आह—गुणभूतस्य न हि समासो युज्यते। परिहरति—नैष दोषः।

अर्थाद्विशेषणपरः सम्बन्धं याति दण्डवत्।
तद्योगाद्वाऽन्यसम्बन्धे न समासः प्रदुष्यति॥

---

१. संयोगात् मू० पु० पा०।

न खलु स्वर्गकामाऽन्वयनिरपेक्षः स्वर्गो भावनाऽभिसम्बन्धी, किन्तु स एव विशेषणप्रधानः सम्बन्धमुपाश्नुते। यथा दण्डी प्रैषानन्वाहेति दण्डप्रधानो दण्डो। तदभिसम्बन्धो तु तत्परस्वात्मना अविवक्षित एव। एवं च समासोऽप्युपपन्नः। स्वतन्त्रस्य ह्यन्यसम्बन्धे तदसंभवात् सापेक्षत्वात् समासो न स्यात्। तदभिसम्बन्धेन तु तद्द्वारा अन्यसम्बन्धे नैकार्थ्यभावो-

यदि हि पुरुषसम्बन्धनिरपेक्ष एव स्वर्गो भावनया सम्बध्येत ततः शाब्दी पुरुषान्वयप्रतीतिर्विरुध्येत। यदि वा पुरुषपरमेव स्वर्गकामपदं स्यात् ततो भावनया न स्वर्गः सम्बध्येत। न च तदुभयमस्तीत्याह—न खलु स्वर्गकामाऽन्वयनिरपेक्षः स्वर्गो भावनासंबन्धी, येन शाब्दी पुरुषविशेषणप्रतीतिर्व्याहन्येत। किन्तु स एव विशेषणप्रधानः सम्बन्धमुपाश्नुते भावनायाम्। विशेष्यप्रधाने हि स्वर्गकामपदे स्वर्गः पुरुषवशेन भावनायां सम्बध्यते, विशेषणपरे त्वस्मिन्नाऽयं दोषः। क्व विशेषणपरत्वं दृष्टम्? इत्यत आह—यथा दण्डी प्रैषानन्वाहेति दण्डप्रधानो दण्डी। यथा मैत्रारुणः प्रैषानन्वाहेति प्रैषाऽनुवचने मैत्रावरुणस्य प्राप्ते दण्डी प्रैषानन्वाहेति मैत्रावरुणलक्षणविशेष्यविधानाऽनुपपत्तेर्विशेषणस्य दण्डस्य चाऽप्राप्तेर्विधेयत्वात् तत्परो दण्डिशब्दः, तथेह यजेतेति भावनाक्षेपादेव भावयितुः प्राप्तेरविधेयत्वात् भाव्यविशेषापेक्षत्वाच्च भावनायाः स्वर्गस्य च पुरुषविशेषणस्याऽप्राप्तरूपतया कर्मिकर्मतया च भाव्यत्वार्हत्वादन्यतश्चाऽप्राप्तेस्तत्परा स्वर्गकामश्रुतिरिति रमणीयम्।

ननु यदि विशेषणपरा स्वर्गकामश्रुतिः ततो विशेष्यसम्बन्धः स्वर्गस्य शब्दतो न प्रथेत चेत् नाऽस्य भावनासम्बन्धः, तत्परत्वादित्यत आह—तदभिसम्बन्धी तु तत्परो भावनासम्बन्धपरः, स्वात्मना विवक्षित एव, स्वपरतया विवक्षित एव। सम्बन्धो ह्यसम्बन्धविरोधी न पुनरन्यपरताविरोधीत्यर्थः। असमासप्रसङ्गं परिहरति—एवं च समासोऽप्युपपन्नः। एवं चेति। तदेव व्यतिरेकाऽन्वयाभ्यां विवृणोति—स्वतन्त्रस्य हि पुरुषसम्बन्धनिरपेक्षस्याऽन्यसम्बन्धे तदसंभवात् पुरुषसम्बन्धाऽसम्भवात् समासो न स्यात्। समाससमये वाऽन्यसम्बन्धरहितोऽपि भावनासम्बन्धसापेक्षः स्वर्गः तथापि साऽपेक्षत्वात्समासो न स्यात्। न त्वेतदुभयमस्तीति। अन्वयमाह—तदभिसम्बन्धेन तु पुरुषसम्बन्धेन तद्द्वाराऽन्यसम्बन्धे सति नैकार्थीभावोपरोधो न विग्रहवाक्यार्थाऽभिधानसामर्थ्योपरोध इति। तस्माद्युक्तः समासः। यदि तु विशेष्याऽभिसम्बन्धद्वारेणापि क्रियामनुप्रविशद्विशेषणं सापेक्षमसमर्थमिति न समस्येत तत्सर्वमेव विशेषणं नाऽस्मिन्समासे

परोध इति युक्तः समासः। अन्यथा सर्वमेव विशेषणसमासं स्यात्। तस्य कार्यमसंस्पृशतो वैयर्थ्यात्। संस्पर्शे वा साऽपेक्षत्वात्समासो भवेत्।

यत्त्वाख्यातार्थे साध्ये साध्यान्तराऽसमवाय इति। भावनायां तावद्रूपादेव तत्समवायः। तस्य भाव्यप्रधानरूपत्वात्। धात्वर्थेऽपि यदि तात्पर्येण भावनायाः साध्यत्वं तद्विधिनाऽपास्तम्। अथ भावनाविषयत्वमात्र तत्कारणान्तरेष्वपि समानम्। उक्तं हि 'करणं खलु सर्वत्र कर्तृव्यापारगोचरमि'ति। द्रव्यगुणशब्दार्थस्वरूपतो ऽपि निष्पाद्यस्य साधनत्वात्। सिद्धस्योपादानाऽभावात्। श्रुत्यैव भावनामनुरञ्जयतो यागादेस्तद्विशेष-

सम्भवेदित्याह—अन्यथा सर्वमेव विशेषणमसमासं स्यात्। ननु किमित्यसमासम्? भविष्यति हि किंचिद्विशेषणं यद्विशेष्यमात्रपरम्, तद्यथा नीलोत्पलमानयेत्यत आह—तस्य विशेषणस्य नीलादेः कार्यमानयनादिकमसंपृशतो वैयर्थ्यात्। एवं हि यावदुक्तं भवति उत्पलमानयेति तथा चाऽविशेषकरत्वात् कार्यवैयर्थ्यं विशेषणपरस्यैति उत्पलस्य प्रसज्येतेत्यर्थः। कार्यसंस्पर्शे वा विशेषणस्य सापेक्षत्वात्समासो भवन्मते भवेदिति।

यच्च परिचोदितम्, आख्यातार्थे साध्ये साध्यान्तरस्य स्वर्गादेरसमवाय इति। तत्रेदं विकल्पनीयं—किं भावनायां साध्यायां साध्यान्तरस्याऽसमवाय उच्यते, आहोस्वित् धात्वर्थे साध्ये यागादौ? तत्र भावनायां तावद्रूपादेव तत्समवायः साध्यसंबन्धः। कुतः? तस्या भाव्यप्रधानरूपत्वात्। भावना हि साध्यरूपापि भवितारं भाव्यमन्तरेणाऽनुपपत्तेः स्वभावादेव भाव्याऽपेक्षा। न ह्यस्ति संभवो यदुत्पादना च न चाऽन्यदुत्पाद्यमस्तीति। तस्मात्साध्याऽपेक्षायां न साध्यसम्बन्धो घटते। अथ धात्वर्थे साध्ये न साध्यान्तरसमवायः तस्यापि साध्यत्वं भावनायां तत्परत्वाद्वा फलार्थप्रवृत्तभावनाविषयत्वाद्वा। न तावद्भावना तात्पर्यरूपेण विधिवोधविरोधादित्याह—धात्वर्थे यदि तात्पर्येण भावनाया धात्वर्थस्य साध्यत्वं तद्विधिना ऽपास्तम्। अथाऽन्यार्थप्रवृत्तभावनाविषयत्वमात्रं तत्कारणान्तरेष्वपि परश्वादिषु समानम्। भवन्ति हि ते ऽपि द्वैधीभावोद्देशप्रवृत्तोद्यमननिपातनलक्षणव्यापारविषयाः। ते च कारणम्। एवं यागादयो ऽन्यार्थप्रवृत्तभावनाविषयतया साध्या अपि कारणतया साध्यान्तरैः सम्भन्त्स्यन्ते व्रश्चनादय इव द्विधाभवद्भिः काष्ठादिभिः। एतच्च न साधितमिहाऽन्यत्र सिद्धत्वादित्याह—करणं खलु सर्वत्र कर्तृव्यापारगोचर इति **भावनाविवेके।**

णस्य प्रतीतेः । द्विविधत्वं त्वपूर्वभावाऽभावकृतम् । पुरुषप्रयत्नस्य यागा-विषयत्वं स्वर्गेऽपि अविरुद्धम्, वृक्ष इव च्छेद्ये परशुविषयत्वम् । न च यागादेरव्यापारत्वम् । शब्दादेव तत्प्रतीते । ज्ञानप्रदीपानां चोत्पत्तेरपि

यच्च परिचोदयाँबभूवुः, आख्यातस्य करणार्थत्वे द्रव्यगुणशब्दाभ्याम-विशेषः, सिद्धार्थत्वादिति, तत्राह—द्रव्यगुणशब्दार्थविशेषस्तु धात्वर्थस्य रूपतो ऽपि निष्पाद्यस्य साधनत्वात्प्रागसिद्धेः सिद्धस्योपादानाऽभावात् गोदोहनादीनां त्वन्यतः सिद्धार्थानां सतामुपादानादिति । न केवलं वस्तुतः शब्दतोऽप्यस्य साध्यत्वेनाऽवगतिः प्रकृत्यर्थतया नियतपूर्वप्रतीतकत्वेन स्वरूपविनिवेशेन साध्यरूपभावनानुरञ्जकतया तद्विशेषणत्वात्, शाबलेयादय इव गोत्वविशेषणत्वेन गाव इत्याह—श्रुत्यैव भावनां साध्यरूपामनुरञ्जयतो यागादेस्तद्विशेषणस्य भावनाया विशेषणस्य प्रतीतेः साध्यत्वाऽवगमः । न त्वेवं द्रव्यादौ भिन्नपदोपादाने तद्विशेषणत्वं तद्विनिवेशेन तदवच्छेदकतया न पुनर्भावनात्वसामान्याश्रयेणेति मन्तव्यम् । एवं च व्यापारावेशात् साध्यरूपप्रतीतेः साक्षात्पच्यर्थे करणभावः काष्ठादेरुपपन्नः काष्ठैः पच-तीत्यादाविति सूचितं भवति ।

यद्यपि चोदितम्, सर्वाऽभिमतसाधनत्वेन कर्मणो गुणभावाद् गुणप्रधान-भावेन द्वैविध्यं हीयेतेति, तत्परिहरति—द्विविधत्वं त्वपूर्वभावाऽभावकृतम् । सत्यप्यपेक्षितपरत्वे यत्रापूर्वभावस्तस्य प्राधान्यमाग्नेयादेः समिदादेश्च । यत्र तदभावस्तस्य गुणकर्मताऽवघातादेः प्रोक्षणादेश्च । नियमापूर्वं तु नियमादेव न कर्मण इत्युक्तं वार्त्तिककृता ।

यच्चोक्तं वस्तुतो न भाव्यता स्वर्गादेः पुरुषप्रयत्नस्य यागादिधात्वर्थ-विषयत्वादिति, तत्परिहरति—पुरुषप्रयत्नस्य यागादिविषयत्वं स्वर्गेऽपि साध्ये ऽविरुद्धम्, वृक्षे इव च्छेद्ये परशुविषयत्वम् । यदि हि साक्षात्पुरुष-व्यापारगोचरतया भाव्यं नेदानीं लोकप्रसिद्धभाव्यत्वानां द्वैधीभावादीनामपि भाव्यत्वं भवेत् । न हि तेऽपि साक्षात्पुरुषव्यापारविषयाः । अपि तूद्यम्य-माननिपात्यमानाः परश्वादय एव । न च ते भाव्याः, अपि तु तत्साधनम् । परशुविषयस्यापि पुरुषव्यापरस्य फलांशद्वैधीभावोद्देशेन प्रवृत्तेस्तस्य भाव्यत्वं स्वर्गादीनामपि समानम् । तत्रापि स्वर्गाद्युद्देशेन पुरुषव्यापारस्य यागादि-विषयस्यापि प्रवृत्तेः ।

यच्चोक्तमव्यापारा यागादयो न करणम्, न च भूतिरेषां व्यापार इति, तत्राह—न च यागादेरव्यापारत्वम् । कुतः ? शब्दादेः साधनतया प्रतीतेः । अन्यथा ऽन्यथाऽनुपपत्त्या तन्निर्वाहायाऽर्थापत्त्या ऽपूर्वाभिधानावान्तरव्यापार-

व्यापारत्वाऽभ्युपगमात् । न च स्वर्गो नित्योऽत्यन्तमसत्त्वात् येनाऽशक्यः । उपायाज्ञानादिति चेत् ? अत एव स ज्ञाप्यते । न चावश्यकर्त्तव्यता-

परिकल्पनात् । कथं तदनाश्रित उपरतेऽपि कर्मणि तस्य व्यापार इति चेत्, तर्हि किमिदानीमाग्नेयाद्युत्पत्त्यपूर्वाण्याग्नेयादिभिः करणैरधिकाराऽपूर्वे जनयितव्ये न तेषामवान्तरव्यापाराः ? न हि तान्याग्नेयादिसमानकालानि, उपरतेष्वेव तेषु तेभ्यः परमाऽपूर्वोत्पत्तेः, दर्शपूर्णमासयोश्च सहभुवोः स्वरूपतो दर्शपूर्णमासाभ्यामित्यवगतसाधनभावनिर्वाहाय तदभिधानकल्पनायां तादर्थ्यात्तदसमवायितदाश्रिततया तदवान्तरव्यापारतया चाऽसिद्धमव्यापारत्वं यागादीनामपि । प्रपञ्चितं चैतन्न्यायपरीक्षायाम् ।

न च भूतिर्न व्यापारो ज्ञानप्रदीपादिषु दर्शनादित्याह—ज्ञानप्रदीपादीनां चोत्पत्तेरपि व्यापारत्वाऽभ्युपगमात् 'तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते' इत्यादिना । नन्वसिद्धस्य कथं भवनकर्तृत्वम् ? नाऽसिद्धम् । उपादानरूपेण सिद्धत्वात् । तन्तव एव पटोत्पादनप्रवृत्ताः पूर्वाऽपरीभूतसंयोगविशेषप्रचयशालिनस्तादर्थ्यादुपचारात् पट इत्युच्यन्ते । तेषां च तदुद्देशप्रवृत्तानां पटीभवनव्यापारस्य भवनमिति नाऽसिद्धस्य व्यापारः । द्विविधं च भवनांशाय (?) । किं चिद्भावमात्राऽधीनजन्म यथा विज्ञानस्य ज्ञेयाऽभिव्याप्तिः । किं चिच्चोत्पन्नानां सतां पश्चात्सहकारिग्रामसमवधानोत्पादनम्, यथा चक्षुरादीनां रूपादिज्ञानम् । न ह्युत्पन्नमित्येव चक्षू रूपमीक्षते किं त्वर्थालोकादिसहकारिप्रत्ययसमवधानात् । न हि निर्व्यापाराणां साधनतोपलब्धा । तत्र यत्कार्यं येषां नैयत्याधीनं तस्मिञ्जनयितव्ये कश्चिदुत्पत्तिमान्प्रत्यक्षः परोक्षव्यापारोऽभ्युपेतव्य इति तद्योगात्तेषां साधनता । यत्पुनः स्वभावमात्राऽऽयत्तप्रभवं कार्यं न तत्र व्यापारान्तरं समस्ति । न च निर्व्यापारस्य साधनतेति जन्मैव तत्र व्यापारोऽभ्युपेयते । तत्र चाऽस्य कर्तृत्वमुपपादितम् । न चोत्पत्त्यनन्तरमेव व्यापाराः फलं जनयन्ति । उत्पन्ने व्यापारे पूर्वसंयोगे विभागेन विनाशिते सत्युत्तरसंयोगोत्पत्तिरिति सर्वमवदातम् ।

यच्चोक्तं स्वर्गं कुर्यादित्यशक्योपदेश इति । तदनुपपन्नम् । द्विधा हि भवति क्रियाऽनर्हता ऽत्यन्तसत्त्वाद् गगनवद्, अत्यन्ताऽसत्वाद्वा तत्पुष्पवत् । न चैतदुभयमपि स्वर्गादौ समस्तीत्याह—न च स्वर्गो नित्यः अत्यन्तमसत्त्वाद्येनाऽशक्यः स्यात् । ननु मा भूदस्य स्वरूपाऽयोग्यता उपायाऽज्ञानात्त्वकरणीयो भविष्यतीति चोदयति—उपायाऽज्ञानादिति चेत् । परिहरति—अत एव स ज्ञाप्यते विधिना अतश्च ज्ञातोपायः शक्यो भविष्यतीति ।

प्रसङ्गः। फलांशेऽनुवादात्करणांशोपसंहाराच्च विधेः। दध्ना जुहोतीति यथा। फलविषयाया एव च प्रवृत्तेर्यागविषयत्वेन शब्दो हेतुरिति यागो विधीयते। न ह्यन्या पुरुषस्य कर्म्मणि प्रवृत्तिरन्या करणे। करण एव प्रवृत्तः फलप्रवृत्तो भवति। कर्म्मण्येव प्रवर्त्तमानः करणे प्रवर्त्तते। तदेवमर्थाऽवगमान्न वैयर्थ्यम्। नाप्यन्यत् प्रयोजनम्। स्वर्गकामो यागं कुर्यादिति। यागनिष्ठे शब्दे तत्समवायादप्रमाणत्वाच्छ्रुतहानादश्रुतकल्पनाच्च। न च दृष्टमेव प्रयोजनमात्मप्रतिपत्तिः कर्म्मभिः कृतकाम-

यच्चोक्तमवश्यकर्तव्यताप्रसङ्गो विध्यधीनत्वात्पुरुषस्येति, तत्राह—न चाऽवश्यकर्तव्यताप्रसङ्गः। स्वर्गादिः फलांशेऽनुवादात्करणांशोपसंहाराच्च विधेः। अप्राप्तप्रापणस्वरसो हि विधिः सत्यपि भावनाविषयत्वे तत्सम्बन्धेन तमंशमस्या विधत्ते यो न प्राप्तः। प्राप्तश्च फलांशः। तस्मात्तदनुवादेनाऽप्राप्ते साधनांशे वर्तते। अत्रैव दृष्टान्तमाह—दध्ना जुहोतीति। यथा होमभावनाविषयोऽपि विधिस्तस्या होमांशमग्निहोत्रं जुहोतीत्युत्पत्तिवाक्यसमधिगतमनूद्योपपादपरो भवति तथाऽयमपीत्यर्थः।

यच्चोक्तं प्रवृत्तिविषयो विधिः फलविषया चेत्प्रवृत्तिः फलं विधीयेत न यागो, यागविषया चेन्न फलमिति, अत्राह—न वयमाचक्ष्महे न फलविषयेति, किन्तु तदुद्देश्यत्वात्फलविषयाया एव प्रवृत्तेः फलपरतया व्याप्यत्वेन यागविषयत्वमप्राप्तत्वाच्छाब्दो हेतुः प्रमाणमिति यागो विधीयते। नन्वेवं यागप्रवृत्तौ विधीयमानायां कुतः फलसंगतिः? इत्यत्राह—न ह्यन्या पुरुषस्य कर्मणि फले प्रवृत्तिरन्या करणे। करणप्रवृत्त्या फलप्रवृत्तो भवति, तदेवाऽनेन फलं साधितं भवति। कर्मण्येव फले प्रवर्तमानस्तस्याऽन्यथासिद्ध्यसंभवान्नान्तरीयकतया करणे प्रवर्तते। तस्मात्फलसम्बन्धादाधिक्याऽभावाद्यदानर्थक्यमापादितं पूर्वपक्षिणा तत्फलसम्बन्धोपपादनेनाऽपास्तमित्युपसंहरति—तदेवमर्थावगमान्न वैयर्थ्यम्। पूर्वपक्षैकदेशिनो मतमनुपपन्नमित्याह—नाप्यन्यदात्मज्ञानाऽधिकाराऽनुप्रवेशः प्रयोजनम्। कुतः? भवन्मते स्वर्गकामो यागं कुर्यादिति यागकर्तव्यतानिष्ठे शब्दे तत्रैव तात्पर्यसमवायादप्रमाणत्वादात्मज्ञानाऽधिकाराऽनुप्रवेशस्य। तत्परत्वे वा श्रुतयागकर्त्तव्यताहानादश्रुतात्मज्ञानाऽनुप्रवेशकल्पनाच्च। ननु शब्दसमधिगम्यत्वे भवेदयं दोषः, दृष्टा त्वात्मप्रतिपत्तिः, कर्मणां प्रयोजनम्, इत्यत आह—न च दृष्टमेव प्रयोजनमात्मप्रतिपत्तिः कर्मभिः कृतकामनिवर्हणेन दान्तेन कामैरनागर्धितमनसाऽऽत्मतत्त्वस्य सुप्रत्ययत्वात्। कृतव्याख्यानमेतत्पूर्वपक्षे। तत्र कथं कर्मविधयः कामं निवर्हयन्ति, किं तत्कामो-

निर्बर्हणेन दान्तेन कामैरनागर्द्धितमनसाऽऽत्मतत्त्वस्य सुप्रत्ययत्वात्। यदि खलु कामनिबर्हणानि कर्म्माणि तैश्च कृती न प्रयोजनान्तरमपेक्षते कामी। तथा च तत्पर एव कर्म्मविधिरिति नान्यपरत्वे प्रमाणम्। न चाऽशास्त्रत्वम्। श्रेयोऽभिधायकत्वात्। श्रेयसः प्रीतिरूपत्वात्, प्रीतेश्च कामेषु प्रत्यात्मसंवेद्यत्वात्। न च भोगो निबर्हणम्। न हि कामानां तृप्तिरस्ति। अथ प्रवृत्त्यन्तरनिवृत्त्या, तत्रापि यदि कामी यागेन कुर्य्यान्नाऽन्येनोपायेन कामं को विशेषः कामपक्षे चेतसः कामनिवृत्तायां प्रवृत्तौ कथं च पक्षेऽप्यप्राप्तविधावन्यनिवृत्तिः[1] ?। अथ कामी यागं कुर्य्यान्न कामम्? दुर्लभमर्थद्वयम-

पहारेण तदुपभोजकतया, आहोस्वित्प्रवृत्त्यन्तरोपदेशेन स्वाभाविकीभ्यः प्रवृत्तिभ्यो निवर्तनेन? न तावदाद्यः कल्प इत्याह—यदि खलु कामनिर्बर्हणानि तदुपभोजकतया तैरेव कर्मभिः कृतकामैः कृती पुरुष इति न प्रयोजनान्तरमपेक्षते। अनाकाङ्क्षितं च न विधिना स्वीक्रियत इति। तथा च तत्पर एव स्ववाक्योपात्तकर्मपर एव कर्मविधिरिति अन्यपरत्वे प्रमाणं कामनाऽनपेक्षितत्वात्। अस्य च तद्वैपरीत्यात्।

तदुक्तं कामनापरत्वे शास्त्रव्यापत्तिरिति, तत्राह—न चाऽशास्त्रत्वम्। कुतः? श्रेयोऽभिधायकः पदसमूहः शास्त्रमिति वृद्धाः। कामविधयश्च तथेत्याह—श्रेयोऽभिधायकत्वात् नन्वापातत एव कमनीयानामनर्थपरिणामानां केन श्रेयःस्वभावतेत्यत आह—श्रेयसः प्रीतिरूपत्वात्। श्रेयो हि पुरुषप्रीतिरिति लौकिकी प्रतीतिस्तदुपदेशः शास्त्रमिति लौकिकमेव। न चैते पर्यनुयोगिनः, येन न कामलोभमाद्रियेरन्। कामास्तु पशुस्वर्गादयो न प्रीत्यात्मान इत्याह—प्रीतेश्च कामेषु प्रत्यात्मसंवेद्यत्वात्। न च भोगो निवर्हणं संभवति। न हि कामानां स्वर्गादीनां तृप्तिरस्ति पुरुषस्य। कामानामिति सुहितार्थयोगे षष्ठी। तदुक्तं 'न जातु कामः कामानामुपभोगेन शाम्यती'ति। 'भोगाऽभ्यासमनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणा'मिति च। द्वितीयं कल्पमनुभाषते—अथ प्रवृत्त्यन्तरनिवृत्त्या। दूषयति—तत्रापि यदि कामी यागेन कुर्यान्नाऽन्येनोपायेन कामं को विशेषः कामाक्षेपे चेतसः कामनिवृत्तायां प्रवृत्तौ? कथं च पक्षेण प्राप्तविधावन्यनिवृत्तिः[1]? न तावत्कामिनो विधेः पूर्वं कामोपायान्यागादिभेदानङ्गभेदप्रचयसाधनोपरागानधिगन्तुमीशते लौकिकानिव तुषविमोकादिहेतूनवघातादीन्, येन तेषां लौकिकैः कामोपायै-

१. निवृत्तिप्रतीतिः—मू० पु०।

विशेषतः श्रौतलाक्षणिकादिकम्[1]। यागविधिपरत्वे न कामनिषेधः। कामनिषेधपरत्वे न यागविधिः। अर्थात्कामनिवृत्तिरुभयस्यापि असमवायात्[2]। सर्वदृष्टार्थप्रवृत्तिविरोधे च कर्म्मविधिकृते ऽप्यपार्थकाः स्युः। दृष्टोपायसाध्यत्वात्तदर्थस्य। स्वाभाविकत्वाच्च फलोपभोगस्य स्वभाववाद एवाऽऽम्नायार्थश्छद्मना[3] ऽऽश्रितः स्यात्। तस्मान्महद्दण्डपदमिदं दृष्टेनैव कर्म्मविधय आत्मज्ञानाधिकारमारोहन्तीति। नियोज्याऽनुशासनं शास्त्रस्येति ज्ञाननियोगोऽपि नियोज्याऽनुशासनमात्रमिति न तत आत्मप्रतिपत्तिः।

विकल्पे सत्यवघातादिवत्पक्षे प्राप्तिः स्यात्। अभ्युपेत्य पक्षे प्राप्तिमेतदुक्तमिति मन्तव्यम्। अथ तु न कामसाधनतया यागो विधीयतेऽपि तु कामेभ्यो निवर्तयितुं कामिनं यागं कुर्यादित्येतावन्मात्रमित्याह—अथ कामी यागं कुर्यान्न कामम्। उत्तरम्—दुर्लभमर्थद्वयं विशेषतः श्रौतलाक्षणिकादिकम्। यागं कुर्यादिति श्रौते संभवति, न कामनिवृत्तिर्लाक्षणिकी युक्ताऽऽश्रयितुमित्यर्थः। अथ शक्यतामेव दर्शयति--यागविधिपरत्वे न कामनिषेधः, कामनिषेधपरत्वे न यागविधिः। पीनो दिवा न भुङ्क्ते इति भोजननिषेधपरे वाक्ये ऽर्थादस्य भोजनं दोषा विहितं भवति तथेहाप्यर्थात्कामनिवृत्तिः। कुतः? इह द्वयस्याप्यसमवायात्। पीनस्य दिवा भोजननिषेधो रात्रावभोजने दिवा भोजननिषेधो रात्रावभोजनेन सह न सम्भवतीत्यर्थाद्दोषा भुङ्क्ते इत्यवगम्यते। न पुनर्यागादयः कामनिवृत्तायां प्रवृत्तौ न संभवन्तीत्यर्थः। भवतु वोभयपरत्वं तथापि यागादिविधिभिः सर्वा एव दृष्टार्थाः प्रवृत्तय उपरुद्धा इति तत्साध्यानां व्रीह्यादीनामसंभवाद्यागादयो ऽपि न निवर्तेरन्साधनाभावादित्याह—सर्वदृष्टार्थप्रवृत्तिनिरोधे च कर्मविधिकृते ऽप्यपार्थकाः स्युर्दृष्टोपायसाध्यत्वात्तदर्थस्य यागादेः। अपि च यागादीनामफलसाधनत्वे सेवादेश्च व्यभिचारादहेतुः[4] सुखदुःखादिरेव स्वाभाविकलौकायतिकाऽभ्युपगताम्नायार्थ इति वचनव्यक्त्यन्तरेणाऽभ्युपगतं भवतीत्याह—स्वाभाविकत्वाच्च फलभोगस्य स्वभाववाद एवाऽर्थादाम्नायार्थच्छद्मनाऽऽश्रितः स्यात्। उपसंहरति—तस्मान्महद्दण्डपदमिदं दृष्टेनैव कर्मविधय आत्मज्ञानाऽधिकारमधिरोहन्तीति। अपि चाऽधिकाराऽनभ्युपगमे नियोज्याऽनुशासनं शास्त्रत्वं शास्त्रस्य यागादिविधेरिति तेनैव न्यायेन ज्ञाननियोगोऽपि नियोज्याऽनुशासनमात्मज्ञानं कर्तव्यमित्येतावन्मात्रविधानपरमिति। तस्मात्फलं नाऽऽत्मप्रतिपत्तिरभिव्याप्तिः स्यात्।

१. लाक्षणिकात्मकम्—मू० पु० पा०। २. उभयस्यापि असंभवात्—मू०पु०पा०।
३. अर्थः शब्देन मू० पु०। ४. चारहे० पु० पा०।

ज्ञानस्वभावादिति चेत् ? । विधिवैयर्थ्यात् । अवहन्त्यादिवदिति चेत् ? न नियमार्थत्वात् । न ज्ञानविशेषनियमः । पक्षेऽप्यप्राप्तेः । समारोपेण च सम्भवात् न तत्त्वपरिच्छेदः । तस्मान्नाऽसाधने धात्वर्थे ऽधिकारसिद्धिः । साधनत्वं चास्य विधिरित्युक्तम् ।।

इति श्रीमहामहोपाध्यायमण्डनमिश्रविरचितो
विधिविवेकः समाप्तः ।।

शङ्कते—ज्ञानस्वभावादिति चेत् । निराकरोति--विधिवैयर्थ्यात् । पुनः शङ्कते—अवहन्त्यादिवदिति चेत् । निराचष्टे—न, नियमार्थत्वादवहन्त्यादिविधेः । यद्युच्येत इहाप्यात्माऽवगतावात्मज्ञानं नियम्यत इति, तत्राह—न ज्ञानविशेषनियमः । कुतः ? पक्षेऽप्यप्राप्तेर्ज्ञानानन्तरं न खल्वात्मज्ञानादात्मप्रतीतिसंभवः । आत्मज्ञाने च विधेये विपरीतस्याप्यात्मज्ञानत्वात्तस्यापि विधेयत्वसंभवान्न तत्त्वपरिच्छेदः स्यादित्याह--समारोपेण संभवान्न तत्त्वपरिच्छेदः । उपसंहरति--तस्मान्नाऽसाधने धात्वर्थे ऽधिकारसिद्धिः[1] । भवतु फलसाधनं धात्वर्थः, सिध्यतु चाऽधिकारः, तथापि किमायातं विधावित्यत आह--साधनत्वं चाऽस्य विधिरित्युक्तम् ।।

इत्याचार्यवाचस्पतिमिश्रविरचिता विधिविवेकटीका
न्यायकणिका समाप्ता ।।

---

१. न साधने धात्वर्थाऽधिकाराऽसिद्धिः—मू० पु० पा० ।